Almira 3
Shelf 1
3

4030

# ॥ अथ श्रीधरकृतटीकासहितश्रीमद्भगवद्गीताप्रारम्भः ॥



श्रीगणेशाय नमः ॥ श्रीनारायणजगद्गुरवे नमः ॥ श्रीकृष्णाय नमः ॥ शेषाशेषमुखव्याख्याचातुर्यंत्वेकवक्त्रतः ॥ दधानमद्भुतंवंदेपरमानंदमाधवम् ॥ १ ॥ श्रीमाधवंप्रणम्योमाधवंविश्वेशमादरात् ॥ तद्भक्तियंत्रितःकुर्वेगीताव्याख्यांसुबोधिनीम् ॥ २ ॥ भाष्यकारमतंसम्यक्तद्व्याख्यातृगिरस्तथा ॥ यथामतिसमालोच्यगीताव्याख्यांसमारभे ॥ ३ ॥ गीताव्याख्यायतेयस्याःपाठमात्रादयत्नतः ॥ सेयंसुबोधिनीटीकासदाध्येयामनीषिभिः ॥ ४ ॥ इहखलुसकललोकहितावतारःसकलवंदितचरणःपरमकारुणिकोभगवान्देवकीनंदनस्तत्त्वाज्ञानाविजृंभितशोकमोहविभ्रंशितविवेकतयानिजधर्मत्यागपरधर्माभिसंधिपरमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेनतस्माच्छोकमोहसागरादुद्दधार

धृतराष्ट्र उवाच ॥ ॥ धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः ॥ मामकाःपांडवाश्चैवकिमकुर्वतसंजय ॥ १ ॥
॥ संजय उवाच ॥ दृष्ट्वातुपांडवानीकंव्यूढंदुर्योधनस्तदा ॥ आचार्यमुपसंगम्यराजावचनमब्रवीत् ॥ २ ॥

तमेवभगवदुपादिष्टमर्थंकृष्णद्वैपायनःसप्तभिःश्लोकशतैरुपनिबबंध तत्रचप्रायशःश्रीकृष्णमुखानिःसृतानेवश्लोकानलिखत् कांश्चित्तत्संगतयेस्वयंव्यरचयत् यथोक्तंगीतामाहात्म्ये “गीतासुगीताकर्तव्याकिमन्यैःशास्त्रविस्तरैः ॥यास्वयंपद्मनाभस्यमुखपद्माद्विनिःसृते”तितत्रतावद्धर्मक्षेत्रइत्यादिनाविषीदन्निदमब्रवीदित्यंतेनग्रंथेनश्रीकृष्णार्जुनसंवादप्रस्तावायकथानिरूप्यते धर्मक्षेत्रइति । भोसंजय ! धर्मभूमौ कुरुक्षेत्रे मत्पुत्राःपांडुपुत्राश्च युयुत्सवःयोद्धुमिच्छंतः समवेताः मिलिताः संतः किंकृतवंतः ॥ १ ॥ दृष्ट्वेति पांडवानामनीकंसैन्यंव्यूढंव्यूहरचनयाव्यवस्थितंदृष्ट्वाद्रोणाचार्यसमीपंगत्वाराजादुर्योधनोवक्ष्यमाणवाक्यमुवाच ॥ २ ॥

तदेववाक्यमाह पश्यैतामित्यादिनवभिःश्लोकैः। भोआचार्य ! पांडवानांविततांचमूंसेनांपश्य द्रुपदपुत्रेणधृष्टद्युम्नेनव्यूढांव्यूहरचनयाअधिष्ठिताम् ॥३॥ अत्रशूराइति । अत्रास्यांचम्वाम् इषवोबाणाअस्यंतेक्षिप्यंतेएभिरितिइष्वासाःधनूंषि महांतइष्वासायेषांते तथा भीमार्जुनौतावदत्रातिप्रसिद्धौयोद्धारौ ताभ्यांसमाःशूराः शौर्येणक्षात्रधर्मेणउपेताःसंति । तानेवनामभिर्निर्दिशति । युयुधानः सात्यकिः॥४॥किंच धृष्टकेतुरिति । चेकितानोनामएकोराजा नरपुंगवःनरश्रेष्ठःशैब्यः॥५॥युधामन्युश्चेति।विक्रांतोयुधामन्युर्नामैकः सौभद्रोऽभिमन्युः द्रौपदेयाः

पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूम्।।व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता।।३।अत्रशूरामहेष्वासाभीमार्जुनसमायुधि॥युयुधानोविराटश्चद्रुपदश्चमहारथः ॥४॥ धृष्टकेतुश्चेकितानःकाशीराजश्चवीर्यवान् ॥ पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः ॥५॥ युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान्॥सौभद्रोद्रौपदेयाश्चसर्वएव महारथाः ॥ ६ ॥ अस्माकंतुविशिष्टायेतान्निबोधद्विजोत्तम ॥ नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते॥७॥ भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः ॥ अश्वत्थामाविकर्णश्चसौमदत्तिस्तथैवच ॥८॥ ॥ ॥

द्रौपद्यांपंचभ्योयुधिष्ठिरादिभ्योजाताःप्रतिविंध्यादयःपंच।महारथादीनांलक्षणम् "एकोदशसहस्राणियोधयेद्यस्तुधन्विनाम्॥शस्त्रशास्त्रप्रवीणश्चमहारथइतिस्मृतः॥ अमितान्योधयेद्यस्तुसंप्रोक्तोऽतिरथस्तुसः॥रथीत्वेकेनयोयुध्येत्तन्न्यूनोऽर्द्धरथोमतः"इति॥६॥अस्माकमिति।निबोधबुद्ध्यस्व नायकाः नेतारः संज्ञार्थंसम्यग्ज्ञानार्थमित्यर्थः॥७॥तानेवाह भवानितिद्वाभ्याम्। भवान्द्रोणः समितिंसंग्रामंजयतीतितथा

सौमदत्तिः सोमदत्तस्यपुत्रोभूरिश्रवाः ॥८॥ अन्येचेति । मदर्थेमत्प्रयोजनार्थंजीवितंत्यक्तुमध्यवसिताइत्यर्थः । नानाअनेकानिशस्त्राणिप्रहरणसाधनानियेषांते युद्धेविशारदानिपुणाइत्यर्थः ॥ ९ ॥ ततःकिमित्यतआह । अपर्याप्तमिति । तत्तथाभूतैर्वीरैः युक्तमपिभीष्मेणाभिरक्षितमप्यस्माकंबलंसैन्यमपर्याप्तं तैःसहयोद्धुमसमर्थंभाति इदंतुएतेषां पांडवानांबलंभीमेनाभिरक्षितंसत्पर्याप्तंसमर्थंभाति भीष्मस्योभयपक्षपातित्वादस्मद्बलंपांडवसैन्यंप्रत्यसमर्थम् भीमस्यैकपक्षपातित्वात् ॥ १० ॥ तस्मात्भवद्भिरेवंवर्त्तितव्यमित्याह । अयनेष्विति । अयनेषु

अन्येचबहवःशूरामदर्थेत्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ॥९॥ अपर्याप्तंतदस्माकंबलं
भीष्माभिरक्षितम् ॥पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितम् ॥१०॥अयनेषुचसर्वेषुयथाभागमवस्थिताः ॥भी
ष्ममेवाभिरक्षंतुभवंतःसर्वएवहि ॥११॥ तस्यसंजनयन्हर्षंकुरुवृद्धःपितामहः ॥ सिंहनादंविनद्योच्चैःशंखंदध्मौ
प्रतापवान् ॥ १२ ॥ ततःशंखाश्चभेर्यश्चपणवानकगोमुखाः ॥ सहसैवाभ्यहन्यंतसशब्दस्तुमुलोऽभवत् ॥१३॥

व्यूहप्रवेशमार्गेषुयथाभागंविभक्तांस्वांस्वांरणभूमिमपरित्यज्यावस्थिताः संतः सर्वेभीष्ममेवाभितोरक्षंतु यथान्यैर्युध्यमानः पृष्ठतःकैश्चिन्नहन्येततथारक्षंतु भीष्मबलेनैवास्माकंजीवितमितिभावः ॥ ११ ॥ तदेवंबहुमानयुक्तंराज्ञोदुर्योधनस्यवाक्यंश्रुत्वाभीष्मःकिंकृतवांस्तदाह। तस्येति। तस्यराज्ञःहर्षंसंजनयन्कुर्वन् पितामहोभीष्मउच्चैः महांतंसिंहनादंकृत्वाशंखंदध्मौ वादितवान्॥१२॥तदेवंसेनापतेःभीष्मस्ययुद्धोत्सवमालक्ष्य सर्वतोयुद्धोत्सवःप्रवृत्तइत्याह । ततइति । पणवाः आनकाः गोमुखाश्चवाद्यविशेषाः सहसैवतत्क्षणमेवाभ्यहन्यंत

वादिताः सचशंखादिशब्दस्तुमुलोमहानभवत् ॥१३॥ ततःपांडवसैन्येप्रवृत्तंयुद्धोत्सवमाह।तत इति पञ्चभिः।ततःकौरवसैन्यवाद्यकोलाह
लानंतरम् स्यंदनेरथेस्थितौसंतौकृष्णार्जुनौदिव्यौशंखौप्रकर्षेणदध्मतुः वादयामासतुः ॥१४॥ तदेवविभागेनदर्शयन्नाह।पांचजन्यमिति।पां
चजन्यादीनिश्रीकृष्णादिशंखानांनामानि भीमं घोरंकर्म यस्यसः वृकवदुदरंयस्यसवृकोदरोमहाशंखंपौंड्रंदध्माविति॥ १५ ॥ अनंतविजय

ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ॥माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः ॥१४॥पांचजन्यंहृषीकेशोदे
वदत्तंधनंजयः॥पौंड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः ॥१५॥ अनंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः॥ नकु
लःसहदेवश्चसुघोषमणिपुष्पकौ ॥ १६ ॥ काश्यश्चपरमेष्वासःशिखंडीचमहारथः॥धृष्टद्युम्नोविराटश्चसात्य
किश्चापराजितः ॥ १७॥ द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते ॥ सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथकपृथक्
॥ १८ ॥ सघोषोधार्त्तराष्ट्राणांहृदयानिव्यदारयत् ॥ नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् ॥ १९ ॥ अथव्य
वस्थितान्दृष्ट्वाधार्त्तराष्ट्रान्कपिध्वजः ॥ प्रवृत्तेशस्त्रसंपातेधनुरुद्यम्यपांडवः ॥ २० ॥

मिति।नकुलःसुघोषंनामशंखंदध्मौ सहदेवोमणिपुष्पकंनाम॥१६॥काश्यश्चेति । काश्यःकाशिराजः कथंभूतः परमःश्रेष्ठःइष्वासोधनुर्यस्य
सः॥ १७ ॥ द्रुपदइति । हेपृथिवीपते हेधृतराष्ट्र ॥१८ ॥ सचशंखानांनादस्त्वदीयानांमहाभयंजनयामासेत्याह।सघोषइति।धार्त्तराष्ट्राणांत्व
दीयानांहृदयानिविदारितवान् किंकुर्वन् नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् ॥ १९ ॥ तस्मिन्समयेश्रीकृष्णमर्जुनोविज्ञापयामासेत्या

ह अथेतिचतुर्भिः । व्यवस्थितान्युद्धोद्योगेनस्थितान् कपिध्वजःअर्जुनः ॥ २०॥हृषीकेशमिति । तदेववाक्यमाह । सेनयोरिति॥२१॥यावदेतानिति ननुत्वंयोद्धानतुयुद्धप्रेक्षकस्तत्राह।कैःसहमयायोद्धव्यम् ॥२२॥योत्स्यमानानिति । धार्त्तराष्ट्रस्यदुर्योधनस्याप्रियंकर्तुमिच्छंतो यइहसमागतास्तान्यावद्द्रक्ष्यामितावदुभयोःसेनयोर्मध्येमेरथंस्थापयेत्यन्वयः ॥ २३ ॥ ततःकिंप्रवृत्तमित्यपेक्षायांसंजयउवाच । एवमि

हृषीकेशंतदावाक्यमिदमाहमहीपते ॥ सेनयोरुभयोर्मध्येरथंस्थापयमेऽच्युत॥२१॥यावदेतान्निरीक्षेऽहंयो
द्धुकामानवस्थितान् ॥ कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहंयएतेऽत्रसमाग
ताः ॥ धार्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः ॥ २३ ॥ संजयउवाच ॥ एवमुक्तोहृषीकेशोगुडाकेशेनभारत ॥
सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमम् ॥ २४॥ भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षिताम् ॥ उवाचपार्थप
श्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थःपितॄनथपितामहान् ॥ आचार्यान्मातुलान्भ्रा
तॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि ॥ २६ ॥

ति। गुडाकानिद्रातस्याईशेनाजितनिद्रेणार्जुनेनैवमुक्तःसन् हेभारतधृतराष्ट्र! सेनयोर्मध्येरथानामुत्तमंरथंहृषीकेशःस्थापितवान्॥ २४॥भीष्मद्रोणेति । महीक्षितांपितामहद्रोणराज्ञांचप्रमुखतःसंमुखेरथंस्थापयित्वा हेपार्थ! एतान्कुरून्पश्येत्युवाच॥२५ ॥ततःकिंप्रवृत्तमित्यतआह।पितॄन्पितृव्यादीनित्यर्थः ।पुत्रान्पौत्रानिति ।दुर्योधनादीनांयेपुत्राः पौत्राश्चतानित्यर्थः।सखीन्मित्राणि सुहृदःकृतोपकारांश्चापश्यत्२६

ततः किंकृतवानित्यतआह। तानिति। आविष्टोव्याप्तः युक्तःविषीदन्विशेषेणसीदन् अवसादंग्लानिंलभमानः ॥२७॥ किमब्रवीदित्यपेक्षायामाह दृष्ट्वेममित्यादियावदध्यायसमाप्ति । हेकृष्ण योद्धुमिच्छंतंपुरतःसम्यगवस्थितमिमंबंधुजनंदृष्ट्वामदीयानिगात्राणिकरचरणादीनि सीदंतिविशीर्यंते किंच मुखंपरिसमंतात्शुष्यति निर्द्रवीभवति ॥ २८ ॥ किंच वेपथुश्चेति । वेपथुःकंपः रोमांचः स्रंसतेनिपततिपरिदह्य

तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनवस्थितान्॥कृपयापरयाविष्टोविषीदन्निदमब्रवीत् ॥२७॥ अर्जुनउवाच ॥
दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितम् ॥ सीदंतिममगात्राणिमुखंचपरिशुष्यति ॥२८॥ वेपथुश्चशरीरेमेरो
महर्षश्चजायते॥गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते॥२९॥ नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः॥निमि
त्तानिचपश्यामिविपरीतानिकेशव॥३०॥नचश्रेयोऽनुपश्यामिहत्वास्वजनमाहवे॥नकांक्षेविजयंकृष्णनच
राज्यंसुखानिच॥३१॥किन्नोराज्येनगोविंदकिंभोगैर्जीवितेनवा ॥ येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानि
च ॥ ३२ ॥ तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच ॥ आचार्याःपितरःपुत्रास्तथैवचापितामहाः ॥ ३३ ॥

तेसर्वतः संतप्यते ॥ २९ ॥ अन्यच्च नचेति। विपरीतानिनिमित्तानिअनिष्टसूचकानिशकुनानिपश्यामि॥३०॥किंच नचेति।स्वजनम् आहवेयुद्धेहत्वाश्रेयःफलंनपश्यामि।विजयादिकंफलंकिंनपश्यसीतिचेत्तत्राह।नकांक्षइति ॥३१ ॥एतदेवप्रपंचयति किंनइतिसार्धाभ्याम्।यदर्थमस्माकंराज्यादिकमपेक्षितंतएतेप्राणधनानित्यक्त्वात्यागमंगीकृत्ययुद्धार्थमवस्थिताः अतःकिमस्माकंराज्यादिभिःकृत्यमित्यर्थः॥३२।३३॥

ननुयदिकृपयात्वमेतान्नहंसितर्हित्वामेतेराज्यलोभेनहनिष्यंत्येवअतस्त्वमेवैतान्हत्वाराज्यंभुंक्ष्वतत्राह   एतानितिसार्द्धेन । घ्नतोप्यस्मान्घातयतोपिएतान्त्रैलोक्यराज्यस्यापिहेतोस्तत्प्राप्त्यर्थमप्यहंहंतुंनेच्छामि किंपुनर्महीमात्रप्राप्त्यर्थमित्यर्थः ॥३४॥३५॥ ननुच "अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः॥ क्षेत्रदारापहर्त्ताचषडेतेआततायिनः" इतिस्मरणात् अग्निदइत्यादिभिःषड्भिरपिहेतुभिरेतेतावदाततायिनः आततायिनांचवधोयुक्तएव "आततायिनमायांतंहन्यादेवाविचारयन्॥नाततायिवधेदोषोहंतुर्भवतिकश्चने" तिवचनात्तत्राहसार्द्धेन।पापमि

मातुलाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्तथा॥एतान्नहंतुमिच्छामिघ्नतोऽपिमधुसूदन ॥३४॥ अपित्रैलोक्य
राज्यस्यहेतोःकिंनुमहीकृते ॥ निहत्यधार्त्तराष्ट्रान्नःकाप्रीतिः स्याज्जनार्दन ॥३५॥ पापमेवाश्रयेदस्मान्हत्वै
तानाततायिनः॥ तस्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्स्वबांधवान् ॥ स्वजनंहिकथंहत्वासुखिनःस्याममाधव ॥
॥ ३६ ॥ यद्यप्येतेनपश्यंतिलोभोपहतचेतसः ॥ कुलक्षयकृतंदोषंमित्रद्रोहेचपातकम् ॥ ३७ ॥ कथंनज्ञेयम
स्माभिः पापादस्मान्निवर्तितुम् ॥ कुलक्षयकृतंदोषप्रपश्यद्भिर्जनार्दन ॥ ३८ ॥     ॥     ॥     ॥     ॥

ति। आततायिनमायांतमित्यादिकमर्थशास्त्राद्दुर्बलम्।यथोक्तंयाज्ञवल्क्येन "स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः॥ अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमिति स्थितिः॥"तस्मादाततायिनामप्येतेषामाचार्यादीनांवधेऽस्माकंपापमेवभवेत् अन्याय्यत्वादधर्मत्वाच्चैतद्वधस्य ॥ ३६ ॥ नचेहसुखंस्यादित्याह । स्वजनंहीति ।ननुतवैतेषामपिबंधुवधदोषेसमानेसातियथैवैतेबंधुवधदोषमंगीकृत्ययुद्धेप्रवर्त्तंते तथैवभवानपिप्रवर्त्त

तांकिमनेनविषादेनेत्यतआह यद्यपीतिद्वाभ्याम् । राज्यलोभेनोपहतंभ्रष्टविवेकंचेतोयेषांते एतेदुर्योधनादयोयद्यपिदोषंनपश्यंति तथाप्यस्माभिर्दोषंप्रपश्यद्भिरस्मात्पापान्निवर्तितुंकथंनज्ञेयम् निवृत्तावेवबुद्धिःकर्त्तव्येत्यर्थः।३७।३८॥तमेवदोषंदर्शयति।कुलक्षयइति।सनातनाः परंपराप्राप्ताः उतअपिअवशिष्टंकुलमधर्मोऽभिभवति व्याप्नोति॥३९॥ ततश्चअधर्माभिभवादिति॥४०॥एवंसतिसंकरइति । एषांकुलघ्नानां पितरःपतंति हियस्मात् लुप्ताःपिंडोदकक्रियायेषांते ॥४१॥ उक्तंदोषमुपसंहरति दोषैरितिद्वाभ्याम्। उत्साद्यंतेलुप्यंतेजातिधर्माःवर्णधर्माः

कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः॥धर्मेनष्टेकुलंकृत्स्नमधर्मोऽभिभवत्युत ॥ ३९ ॥ अधर्माभिभवात्कृ
ष्णप्रदुष्यंतिकुलस्त्रियः॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः॥४०॥संकरोनरकायैवकुलघ्नानांकुलस्यच ॥
पतंतिपितरोह्येषांलुप्तपिंडोदकक्रियाः ॥ ४१ ॥ दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः॥ उत्साद्यंतेजातिधर्माः
कुलधर्माश्चशाश्वताः ॥ ४२ ॥ उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन ॥ नरकेनियतंवासोभवतीत्यनुशु
श्रुम ॥ ४३ ॥ अहोबतमहत्पापंकर्तुंव्यवसितावयम् ॥ यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः ॥ ४४ ॥

कुलधर्माश्च चकारादाश्रमधर्मादयोऽपिगृह्यंते॥४२॥उत्सन्नेति।उत्सन्नाःकुलधर्मायेषामितिउत्सन्नजातिधर्मादीनामप्युपलक्षणम्।अनुशुश्रुम श्रुतवंतोवयम्“प्रायश्चित्तमकुर्वाणाःपापेषुनिरतानराः॥अपश्चात्तापिनःकष्टान्निरयान्यांतिदारुणानि”त्यादिवचनेभ्यः ॥४३ ॥बंधुवधाध्यवसायेनसंतप्यमानआह।अहोइति।स्वजनंहंतुमुद्यताइति। यतएतन्महत्पातकंकर्तुमध्यवसायंकृतवंतोवयम् अहोबतकष्टमित्यर्थः ॥ ४४ ॥

एवंसंततःसन्मृत्युमेवाशासानआह।यदीति। अकृतप्रतीकारंतूष्णीमुपविष्टंमांयदिहनिष्यंतितर्हितद्धननंममक्षेमतरमत्यंतंहितंभवेत् पापानिष्पत्तेः ॥ ४५ ॥ ततःकिंवृत्तमित्यपेक्षायांसंजयउवाच । एवमिति । संख्येसंग्रामे रथोपस्थेरथस्योपरिउपाविशत् उपविवेश शोकेन संविग्नंप्रकंपितंमानसंचित्तंयस्यसः ॥ ४६ ॥ इति श्रीसुबोधिन्यांटीकायांश्रीधरस्वामिविरचितायांप्रथमोऽध्यायः ॥१॥ ततःकिंवृत्तमित्यपेक्षायांसंजयउवाच । तंतथेति । अश्रुभिःपूर्णेआकुलेईक्षणेयस्यतम् तथोक्तप्रकारेणविषीदंतमर्जुनंप्रतिमधुसूदनइदंवाक्यमुवाच॥१॥तदेववाक्यमाह । श्रीभगवानुवाच कुतइति। कुतोहेतोः त्वाइतित्वाम् विषमेसंकटेइदंकश्मलं समुपस्थितम् अयंमोहःप्राप्तः यतआर्यैरसेवितम् अस्वर्ग्यमधर्म्यम् अयशस्करंच ॥ २ ॥ तस्मात् क्लैब्यमिति हेपार्थ! क्लैब्यंकातर्यंमास्मगमः नप्राप्नुहि यतस्त्वय्येतन्नोपपद्यते योग्यंन भवति क्षुद्रंतुच्छम् हृदयदौर्बल्यंकातर्यंत्यक्त्वायुद्धायोत्तिष्ठ हे परंतपशत्रुतापन! ॥ ३ ॥

यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः।धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्४५संजयउवाच।एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्॥विसृज्यसशरंचापंशोकसंविग्नमानसः ४६ इति श्रीमद्भ०सूपनि०ब्रह्म० अर्जुनविषादयोगोनामप्रथमोऽध्यायः ॥ १ ॥ संजयउवाच ॥ तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणम्॥विषीदंतमिदंवाक्यमुवाचमधुसूदनः१॥श्रीभगवानुवाच॥कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितम्॥अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन॥२॥क्लैब्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते॥क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप॥३॥

नाहंकातर्येणयुद्धादुपरतोऽस्मिकिंतुयुद्धस्यान्याय्यत्वादित्यर्जुनउवाच।कथमिति।भीष्मद्रोणौपूजायामर्हौयोग्यौतौप्रतिकथमहंयोत्स्यामि
तत्रापिइषुभिः यत्रवाचापियोत्स्यामीतिवक्तुमनुचितं तत्रबाणैःकथंयोत्स्यामीत्यर्थः। हेअरिसूदनशत्रुसूदन! ॥ ४ ॥ तर्हितवदेहयात्रा
पिनस्यादितिचेत्तत्राह। गुरूनिति।गुरून्द्रोणादीनहत्वापरलोकाविरुद्धोगुरुवधस्तमकृत्वाइहलोकेभिक्षान्नमपिभोक्तुं श्रेयः उचितम्।विपक्षे
तु नकेवलं परत्रदुःखम् इहैवतुनरकदुःखमनुभवेयमित्याह हत्वेति गुरून्हत्वाइहैवतुरुधिरेणप्रादिग्धान्प्रकर्षेण लिप्तान्अर्थकामात्म
कान्भोगानहंभुंजीयअश्नीयाम् यद्वा अर्थकामानितिगुरूणांविशेषणम् अर्थतृष्णाकुलत्वादेतेतावद्युद्धान्ननिवर्त्तेरन् तस्मादेतद्वधःप्रस

अर्जुनउवाच।कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन॥इषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन४गुरूनहत्वाहिम
हानुभावाञ्छ्रेयोभोक्तुंभैक्ष्यमपीहलोके॥हत्वाऽर्थकामांस्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धान् ॥५॥नचैत
द्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥यानेवहत्वानजिजीविषामस्तेऽवस्थिताःसंमुखेधार्तराष्ट्राः६

ज्येतैवेत्यर्थः। तथाचयुधिष्ठिरंप्रतिभीष्मेणोक्तम्“अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित्॥इतिसत्यंमहाराजबद्धोऽस्म्यर्थेनकौरवैरि”ति
॥ ५ ॥ किंच यद्यपिअधर्ममंगीकरिष्यामस्तथाऽपिकिमस्माकंजयःपराजयोवाभवेदितिनज्ञायतइत्याह। नचेति।एतद्वयोर्मध्येनोऽस्माकं
कतरत् किंनामगरीयोऽधिकतरंभविष्यतीतिनविद्मः। तदेवद्वयंदर्शयति। यद्वा एतान्वयंजयेमजेष्यामः यदिवानोऽस्मानेतेजयेयुः जेष्यं
तीति किंचास्माकंवाजयोऽपिफलतःपराजयएवेत्याह। यानेवहत्वाजीवितुंनेच्छामस्तएवैतेसंमुखेअवस्थिताः ॥ ६ ॥

कार्पण्येति । तस्मात्कार्पण्यदोषोपहतस्वभावःएतान्हत्वाकथंजीविष्यामइतिकार्पण्यं दोषश्चस्वकुलक्षयकृतस्ताभ्यामुपहतोऽभिभूतःस्वभावःशौर्यादिलक्षणोयस्यसोऽहंत्वांपृच्छामि तथाधर्मेसंमूढंचेतोयस्यसःयुद्धंत्यक्त्वाभिक्षाटनमपिक्षत्रियस्यधर्मोवाऽधर्मोवेतिसंदिग्धचित्तःसन्नित्यर्थः। अतोमेयन्निश्चितंश्रेयोयुक्तंस्यात्तद्ब्रूहि किंचतेऽहंशिष्यःशासनार्हः अतस्त्वांप्रपन्नंशरणागतंमांशाधि शिक्षय॥७ ॥ त्वमेवविचार्ययद्युक्तंतत्कुर्वितिचेत्तत्राह। नहीति । इंद्रियाणामुच्छोषणमतिशोषणकं मदीयंशोकंयत्कर्मापनुद्यादपनयेत्तदहंनप्रपश्यामि यद्यपिभू

कार्पण्यदोषोपहतस्वभावःपृच्छामित्वांधर्मसंमूढचेताः॥यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेऽहंशाधिमां
त्वांप्रपन्नम्॥ ७ ॥नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम् ॥ अवाप्यभूमावसपत्नमृद्धं रा
ज्यंसुराणामपिचाधिपत्यम्॥८॥॥संजयउवाच॥ ॥एवमुक्त्वाहृषीकेशंगुडाकेशःपरंतप ॥ नयोत्स्यइतिगोविंद
मुक्त्वातूष्णींबभूवह ॥ ९ ॥ तमुवाचहृषीकेशःप्रहसन्निवभारत ॥ सेनयोरुभयोर्मध्येविषीदंतमिदंवचः ॥ १० ॥
श्रीभगवानुवाच॥अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे॥ गतासूनगतासूंश्चनानुशोचंतिपंडिताः ॥११॥

मौनिष्कंटकंसमृद्धंराज्यंप्राप्स्यामि तथासुरेंद्रत्वमपियदिप्राप्स्यामि एवमभीष्टंतत्सर्वमवाप्यापिशोकापनोदनोपायंनप्रपश्यामीत्यन्वयः॥८॥ एवमुक्त्वार्जुनःकिंकृतवानित्यपेक्षायांसंजयउवाच।एवमिति।स्पष्टार्थः॥९॥ततःकिंवृत्तमित्यपेक्षायामाह ।तमुवाचेति। प्रहसन्निवप्रसन्नमुखःसन्नित्यर्थः॥१०॥देहात्मनोरविवेकादस्यैवंशोकोभवतीतितद्विवेकप्रदर्शनार्थं श्रीभगवानुवाच। अशोच्यानिति । शोकस्याविषय

भूतानेवबंधूंस्त्वमन्वशोचः अनुशोचितवानसि दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितमित्यादिनातत्रकुतस्त्वाकश्मलमिदंविषमे समुपस्थितमित्यादिनामयाबोधितोपि पुनश्चप्रज्ञावतांपंडितानांवादान्शब्दान्कथंभीष्ममहंसंख्यइत्यादीन्केवलंभाषसे नतुपंडितोऽसियतःगतासून् गतप्राणान्बंधूनगतासूंश्चजीवतोपिबंधुहीनाएतेकथंजीविष्यंतीतिनानुशोचंति॥ ११॥अशोच्यत्वेहेतुमाह ।नत्वेवेति। यथाऽहंपरमेश्वरो जातुकदाचित्लीलाविग्रहस्याविर्भावेतिरोभावेपिनासमितिनैव अपितुआसमेव अनादित्वात् नचत्वंनासीः नाभूःअपित्वासीरेव इमेच जनाधिपाःनृपाःनासन्नितिन अपितुआसन्नेवमदंशत्वात् तथाऽतःपरमितउपर्यपिनभविष्यामोनस्थास्यामइतिचनैव अपितुस्थास्याम

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः ॥ नचैवनभविष्यामःसर्वेवयमतःपरम् ॥ १२ ॥
देहिनोऽस्मिन्यथादेहेकौमारंयौवनंजरा ॥ तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥ १३ ॥

एव जन्ममरणशून्यत्वादशोच्याइत्यर्थः ॥ १२॥नन्वीश्वरस्यतवजन्मादिशून्यत्वंसत्यमेव जीवानांतुजन्ममरणेप्रसिद्धेतत्राह देहिनइति देहिनो देहाभिमानिनोजीवस्ययथाऽस्मिन्स्थूलदेहेकौमाराद्यवस्थादेहनिबंधनाएवनतुस्वतः पूर्वावस्थानाशेऽवस्थांतरोत्पत्तावपिसएवाहमिति प्रत्यभिज्ञानात्तथैवैतदेहनाशेदेहांतरप्राप्तिरपिलिंगदेहनिबंधना नतुतावतात्मनोनाशःजातमात्रस्यपूर्वसंस्कारेणस्तन्यपानादौप्रवृत्तिदर्शनात् अतोधीरः धीमांस्तत्रतयोर्देहनाशोत्पत्त्योर्नमुह्यति आत्मैवमृतोजातश्चेतिनमन्यते ॥ १३ ॥

ननुगतानागतानहंनशोचामि किंतुतद्वियोगादिदुःखभाजमात्मानमेवेतिचेत्तत्राह मात्रास्पर्शाइति मीयंतेज्ञायंतेविषयाआभिरितिमात्राइंद्रियवृत्तयःतासांस्पर्शाःविषयैःसंबंधाः तेशीतोष्णादिप्रदाभवंति तेत्वागमापायित्वादनित्याअस्थिराः अतस्तांस्तितिक्षस्वसहस्व यथाजलातपादिसंपर्कास्तत्तत्कालकृताःस्वभावतःशीतोष्णादिप्रयच्छंति एवमिष्टसंयोगवियोगाअपिसुखदुःखादिप्रयच्छंतितेषांचास्थिरत्वात्सहनंतवधीरस्योचितं नतुतन्निमित्तहर्षविषादपारवश्यमित्यर्थः ॥१४॥ तत्प्रतीकारप्रयत्नादपितत्सहनमेवोचितंमहाफलत्वादित्या

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः ॥ आगमापायिनोनित्यास्तांस्तितिक्षस्वभारत ॥१४॥ यंहिन
व्यथयंत्येतेपुरुषंपुरुषर्षभ ॥ समदुःखसुखंधीरंसोऽमृतत्वायकल्पते ॥ १५ ॥ नासतोविद्यते भावोनाभावो
विद्यतेसतः ॥ उभयोरपिदृष्टोंऽतस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

ह । यमिति । एतेमात्रास्पर्शाःयंपुरुषंनव्यथयंति नाभिभवंति समेसुखदुःखेयस्यतम् सतैरविक्षिप्यमाणोधर्मज्ञानद्वाराअमृतत्वायमोक्षाय कल्पतेयोग्योभवति ॥ १५ ॥ ननुतथाऽपिशीतोष्णादिकमतिदुःसहंकथंसोढव्यम् अत्यंतंतत्सहनेचकदाचिद्देहनाशस्यापिसंभवादित्याशंक्यतत्त्वविचारतःसर्वंसोढुंशक्यमित्याशयेनाह । नेति । असतःअनात्मधर्मत्वादविद्यमानस्यशीतोष्णादेरात्मनिभावःसत्तानविद्यतेतथासतः सत्स्वभावस्यात्मनोऽभावोविनाशोनविद्यते एवमुभयोःसदसतोरंतोनिर्णयोदृष्टः कैस्तत्वदर्शिभिर्वस्तुयाथात्म्यविद्भिः एवंभूतविवे

केनसहस्वेत्यर्थः॥१६॥तत्रसत्स्वभावमविनाशिवस्तुसामान्येनोक्तंविशेषतोदर्शयति।अविनाशीति।येनसर्वमिदमागमापायधर्मकंदेहादिकं
ततं तत्साक्षित्वेनव्याप्तम् तत्तुआत्मस्वरूपंअविनाशि विनाशशून्यंविद्धि जानीहि।तत्रहेतुमाह।विनाशमिति ॥ १७ ॥ आगमापायधर्मकं
संदर्शयति।अंतवंतइति।अंतोविनाशोविद्यतेयेषांतेअंतवंतःनित्यस्यसर्वदैकरूपस्यशरीरिणःशरीरवतःअतएवअनाशिनःविनाशरहितस्या
प्रमेयस्यापरिच्छिन्नस्यात्मनइमेसुखदुःखादिधर्मकादेहाउक्तास्तत्वदर्शिभिः यस्मादेवमात्मनोनविनाशः नचसुखदुःखादिसंबंधःतस्मान्मो

अविनाशितुतद्विद्धियेनसर्वमिदंततम्॥विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति॥१७॥अंतवंतइमेदेहानि
त्यस्योक्ताःशरीरिणः॥अनाशिनोऽप्रमेयस्यतस्माद्युध्यस्वभारत॥१८॥यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतम्
उभौतौनविजानीतोनायंहंतिनहन्यते॥१९॥नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः॥ अजो
नित्यःशाश्वतोऽयंपुराणोनहन्यतेहन्यमानेशरीरे॥२०॥ हजंशोकंत्यक्त्वायुद्धचस्वधर्ममात्याक्षीरित्यर्थः ॥१८॥ तदेवंभी

ष्मादिमृत्युनिमित्तःशोकोनिवारितःयच्चात्मनोहंतृत्वनिमित्तंदुःखमुक्तम् एतान्नहंतुमिच्छामीत्यादिना तदपितद्वदेवनिर्निमित्तमित्याह ।
यएनमिति । एनमात्मानं आत्मनोहननक्रियायांकर्मत्ववत्कर्तृत्वमपिनास्तीत्यर्थः । तत्रहेतुः । नायमिति ॥ १९ ॥ नहन्यतइत्येतदेवष
ड्भावविकारशून्यत्वेनद्रढयति । नेति । नजायतइतिजन्मप्रतिषेधः नम्रियतेचेतिविनाशप्रतिषेधः वाशब्दौचार्थे नचायंभूत्वाउत्पद्यभ
विताभवतिअस्तित्वंभजते किंतुप्रागेवस्वतःसद्रूपइतिजन्मानंतरास्तित्वलक्षणद्वितीयविकारप्रतिषेधः । तत्रहेतुः । यस्मादजः योहिजाय

तेसजन्मांतरमस्तित्वंभजते नतुयःस्वयमेवास्तिसभूयोऽप्यन्यदास्तित्वंभजतइत्यर्थः।नित्यःसर्वदैकरूपइतिवृद्धिप्रतिषेधःशाश्वतःशश्वद्भवइत्यपक्षयप्रतिषेधः पुराणइतिविपरिणामप्रतिषेधः पुराऽपिनवएव नतुपरिणामतोरूपांतरंप्राप्यनवोभवतीत्यर्थः।यद्वा नभावितेत्यस्यानुषंगंकृत्वाभूयोऽधिकं यथाभवतितथानभवतीतिवृद्धिप्रतिषेधः।अजोनित्यइतिचोभयवृद्ध्यभावेहेतुरित्यपौनरुक्त्यम्।तदेव जायतेअस्तिवर्धतेविपरिणमतेअपक्षीयतेविनश्यतीत्येवंयास्कादिभिर्वेदवादिभिरुक्ताः षड्भावविकारानिरस्ताःयदर्थमेतेविकारानिरस्तास्तंप्रस्तुतंविनाशाभावमुपसंहरति नहन्यतेहन्यमानेशरीरइति ॥२०॥ अतएवहंतृत्वाभावोऽपिपूर्वोक्तःप्रसिद्धइत्याह।वेदेति।नित्यंवृद्धिशून्यमव्ययमपक्षय

वेदाविनाशिनंनित्यंयएनमजमव्ययम्॥कथंसपुरुषःपार्थकंघातयतिहंतिकम्॥२१॥वासांसिजीर्णानियथा
विहायनवानिगृह्णातिनरोऽपराणि॥ तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही ॥ २२ ॥ नैनं
छिंदंतिशस्त्राणिनैनंदहतिपावकः॥ नचैनंक्लेदयंत्यापोनशोषयतिमारुतः ॥ २३ ॥

शून्यम्अजमविनाशिनंचयोवेद सपुरुषःकंहंति कथंवाहंति एवंभूतस्यवधेसाधनाभावात् तथास्वयंप्रयोजकोभूत्वाऽन्येनकंघातयति नकंचिदपिकथंचिदपीत्यर्थः। अनेनमय्यपिप्रयोजकत्वाद्दोषदृष्टिंमाकार्षीः इत्युक्तंभवति ॥२१॥ नन्वात्मनोऽविनाशित्वेपितदीयशरीरनाशंपर्यालोच्यशोचामीतिचेत्तत्राह। वासांसीति। कर्मनिबंधनभूतानांदेहानामवश्यंभावित्वान्नजीर्णदेहनाशेशोकावकाशइत्यर्थः ॥२२॥ कथंहंतीत्यनेनोक्तंवधसाधनाभावंदर्शयन्नविनाशित्वमात्मनःस्फुटीकरोति। नैनमिति। आपोनैनंक्लेदयंति मृदुकरणेनशिथिलंनकुर्वंति ॥ २३॥

तत्रहेतूनाह अच्छेद्यइतिसार्द्धेन।निरवयवत्वादच्छेद्योऽयमक्लेद्यश्चअमूर्त्तत्वात् अदाह्यो द्रवत्वाभावादशोष्यइतिभावः।इतश्चछेदादियोग्यो नभवति यतोनित्यः अविनाशीसर्वत्रगतः स्थाणुः स्थिरस्वभावः रूपांतरापत्तिशून्यः अचलः पूर्वरूपापरित्यागी सनातनःअनादिः ॥ २४ ॥ किंच अव्यक्तश्चक्षुराद्यविषयः अचिंत्योमनसोऽप्यविषयः अविकार्यः कर्मेंद्रियाणामप्यगोचरइत्यर्थः उच्यतइतिनित्यत्वादावभियुक्तोक्तिप्रमाणयतिउपसंहरतितस्मादिति ॥ २५ ॥ तदेवमात्मनोजन्मविनाशाभावान्नशोकःकार्यइत्युक्तम् इदानींदेहेनसहात्मनोजन्मतद्विनाशेनच

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यएवच॥नित्यःसर्वगतःस्थाणुरचलोऽयंसनातनः॥२४अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते॥तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि २५अथचैनंनित्यजातंनित्यंवामन्यसेमृतम्॥तथाऽपित्वंमहाबाहोनैनंशोचितुमर्हसि२६जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच॥तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि२७अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत॥अव्यक्तनिधनान्येवतत्रकापरिदेवना॥

विनाशमंगीकृत्यापिशोकोनकार्यइत्याह । अथचेति । अथचयद्यप्येनमात्मानंनित्यंसर्वदातत्तद्देहजातेजातंमन्यसे तथातत्तद्देहमृतेमृतंमन्यसे पुण्यपापयोस्तत्फलभूतयोर्जन्ममरणयोरात्मगामित्वात् तथापित्वंशोचितुंनार्हसि ॥ २६ ॥ कुतइत्यतआह।जातस्येति।हियस्मात् जातस्यस्वारंभककर्मक्षयेमृत्युर्ध्रुवोनिश्चितः मृतस्यतत्तद्देहकृतेनकर्मणाजन्मापिध्रुवमेव तत्तस्मादेवमपरिहार्येर्थेऽवश्यंभाविनिजन्ममरणलक्षणेऽर्थेत्वंविद्वान्शोचितुंनार्हसि योग्योनभवसीत्यर्थः ॥ २७ ॥ किंच देहादीनांचस्वभावंपर्यालोच्यतदुपाधिकेआत्मनोजन्ममरणेच

शोकोनकार्यइत्याह । अव्यक्तादीनीति ।अव्यक्तंप्रधानंतदेवआदिःपूर्वरूपंयेषांतान्यव्यक्तादीनि । भूतानिशरीराणिकारणात्मनापिस्थिततानामेवोत्पत्तेः । तथाव्यक्तमभिव्यक्तंमध्यंजन्ममरणांतरालस्थितिलक्षणंयेषाम् ।अव्यक्तेनिधनंलयोयेषांतानीमान्येवंभूतान्येवतत्रतेषुकापरिदेवना कःशोकनिमित्तोविलापः ।प्रतिबुद्धस्यस्वप्नदृष्टवस्तुष्विवशोकोनयुज्यतइत्यर्थः॥२८॥कुतस्तर्हिविद्वांसोऽपिलोकेशोचंति आत्माज्ञानादेवेत्याशयेनात्मनोदुर्विज्ञेयतामाह । आश्चर्यवदिति।कश्चिदेनमात्मानंशास्त्राचार्योपदेशाभ्यांपश्यन्नाश्चर्यवत्पश्यति । सर्वगतस्यनित्यज्ञानानंदस्वभावस्यात्मनोऽलौकिकत्वादैंद्रजालिकवद्घटमानंपश्यन्निवविस्मयेनपश्यति।असंभावनाभिभूतत्वात्।तथाआश्चर्यवदन्यो

आश्चर्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः ॥ आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९ ॥
देहीनित्यमवध्योऽयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ॥३०॥
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि ॥ धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यते ॥३१॥

वदतिचशृणोतिचान्यः। कश्चित्पुनःविपरीतभावनाभिभूतः श्रुत्वापिनैववेद चशब्दादुक्त्वापिनसम्यग्वेदेतिद्रष्टव्यम् ॥२९॥तदेवंदुर्बोधमात्मतत्त्वंसंक्षेपेणोपदिशन्अशोच्यत्वमुपसंहरति । देहीति ॥३०॥ यच्चोक्तमर्जुनेन वेपथुश्चशरीरेमेरोमहर्षश्चजायतइतितदप्ययुक्तमित्याह । स्वधर्ममिति ।आत्मनोनाशाभावादेवैतेषांहननेऽपिविकंपितुंनार्हसि । किंच स्वधर्ममपिअवेक्ष्यविकंपितुंनार्हसीतिसंबंधः । यच्चोक्तम् नचश्रेयोऽनुपश्यामिहत्वास्वजनमाहवइत्यादितत्राह । धर्म्यादिति । धर्मादनपेतान्न्याय्याद्युद्धादन्यत् ॥ ३१ ॥

किंच महतिश्रेयसिस्वयमेवोपगतेसातिकुतोविकंपसइत्याह । यदृच्छयेति । यदृच्छयाप्रार्थितमेवोपपन्नंप्राप्तमीदृशंयुद्धंसुखिनःसभाग्या
एवलभंते यतोनिरावरणंस्वर्गद्वारमेवैतत्।यद्वा यएवंविधंयुद्धंलभंतेतएवसुखिनइत्यर्थः । एतेनस्वजनंहिकथंहत्वासुखिनः स्यामेतियदुक्तंत
न्निरस्तंभवति ३२विपक्षेदोषमाह।अथचेत्त्वमिति ३३ किंच अकीर्तिमिति।अव्ययांशाश्वतीं संभावितस्यबहुमानितस्याकीर्तिर्मरणादतिरि

यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतम्॥सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशम्॥३२॥अथचेत्त्वमिमंधर्म्यं
संग्रामंनकरिष्यसि॥ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि॥३३॥अकीर्तिंचापिभूतानिकथयिष्यंतितेऽ
व्ययाम्॥संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ॥३४॥ भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः ॥ येषांचत्वं
बहुमतोभूत्वायास्यसिलाघवम्॥३५॥अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः ॥ निंदंतस्तवसामर्थ्यंततो
दुःखतरंनुकिम् ॥ ३६ ॥ हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीम्॥तस्मादुत्तिष्ठकौंतेययुद्धायकृतनि
श्चयः ॥ ३७ ॥ सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ ॥ ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि ॥ ३८ ॥

च्यते।अधिकतराभवति॥३४॥किंच भयादिति।येषांबहुगुणत्वेनत्वंपूर्वंसंगतोऽभूस्तएवभयेनसंग्रामात्त्वांनिवृत्तंमन्येरन्ततश्चपूर्वंबहुमतोभू
त्वालाघवंयास्यसि॥३५॥किंच अवाच्येति।अवाच्यान्वादान्वचनानर्हान्शब्दांस्तवाहितास्त्वच्छत्रवोवदिष्यंति॥३६॥यच्चोक्तंनचैतद्विद्मः
कतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुरितितत्राह।हतोवेति।पक्षद्वयेऽपितवलाभएवेत्यर्थः ॥ ३७ ॥ यदप्युक्तंपापमेवाश्रयेदस्मानितित

त्राह । सुखदुःखेइति । सुखदुःखेसमेकृत्वातथातयोःकारणभूतौयौलाभालाभावपितयोरपिकारणभूतौजयाजयावपिसमौकृत्वाएतेषांसमत्वेकारणंहर्षविषादराहित्यं युज्यस्वसन्नद्धोभव सुखाद्यभिलाषंहित्वास्वधर्मबुद्ध्यायुध्यमानःपापंनप्राप्स्यसीत्यर्थः ॥ ३८ ॥ उपदिष्टंज्ञानयोगमुपसंहरंस्तत्साधनंकर्मयोगंप्रस्तौति।एषातइति । सम्यक्ख्यायतेप्रकाश्यतेवस्तुतत्त्वमनयेतिसंख्यासम्यग्ज्ञानंतस्मिन् प्रकाशमानमात्मतत्वंसांख्यंतस्मिन्करणीयाबुद्धिरेषातवाभिहिता । एवमभिहितायामपिसांख्यबुद्धौतवचेदात्मतत्त्वमपरोक्षंनसंभवतितर्ह्यंतःकरणशुद्धिद्वारात्मतत्त्वापरोक्षार्थंकर्मयोगेत्विमांबुद्धिंशृणु ययाबुद्ध्यायुक्तःपरमेश्वरार्पितकर्मयोगेनशुद्धांतःकरणःसन्तत्प्रसादप्राप्तापरोक्षज्ञाने

एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणु ॥ बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ॥ ३९ ॥
नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते ॥ स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ॥ ४० ॥
व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन ॥ बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

नकर्मात्मकंबंधंप्रकर्षेणप्रहास्यसि त्यक्ष्यसि ॥३९॥ननुकृष्यादिवत्कर्मणांकदाचिद्विघ्नबाहुल्येनफलेव्यभिचारान्मंत्राद्यंगवैगुण्येनचप्रत्यवायसंभवात्कुतःकर्मयोगेनकर्मबंधप्रहरणंतत्राह । नेहेति । इहनिष्कामकर्मयोगेअभिक्रमस्यप्रारंभस्यनाशोनिष्फलत्वंनास्ति । प्रत्यवायश्चनविद्यतेईश्वरोद्देशेनैवविघ्नवैगुण्याद्यसंभवात्।किंच अस्यधर्मस्यस्वल्पमपिउपक्रममात्रमपिकृतंमहतोभयात्संसारात्त्रायतेरक्षतिनतुकाम्यकर्मवत्किंचिदंगवैगुण्यादिनानैष्फल्यमस्येत्यर्थः ॥४०॥ कुतइत्यपेक्षायामुभयोर्वैषम्यमाह । व्यवसायेति । इहईश्वराराधनलक्षणेकर्मयोगे

व्यवसायात्मिकापरमेश्वरभक्त्यैवध्रुवंतरिष्यामीतिनिश्चयात्मिकाएकैवैकनिष्ठैवबुद्धिर्भवति ॥ अव्यवसायिनांतुबहिर्मुखानांकामिनांकामानामानंत्यादनंताः तत्रापिकर्मगुणफलादिभेदात्बहुशाखाश्चबुद्धयोभवंति ॥ ईश्वराराधनार्थंहिनित्यनैमित्तिकंकर्मकिंचिदंगवैगुण्येनापि ननश्यति ।यथाशक्नुयात्तथाकुर्यादितिहितद्विधीयते नचवैगुण्यम् ईश्वरोद्देशेनैववैगुण्योपरमात् नतुतथाकाम्यंकर्म अग्निहोत्रंजुहुयात्स्वर्गकामः दध्नेंद्रियकामोजुहुयात् । अतोमहद्वैषम्यामितिभावः ॥४१॥ ननुकामिनोऽपिकष्टान्कामान्विहायव्यवसायात्मिकामेवबुद्धिंकिंनकुर्वंतितत्राह । यामिति । पुष्पितांविषलतावदापातरमणीयांप्रकृष्टांपरमार्थफलपरामेववदंतिवाचंस्वर्गादिफलश्रुतिंयेतेषांतयावाचाऽपहृतचे

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः ॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनः ॥ ४२ ॥
कामात्मानःस्वर्गपराजन्मकर्मफलप्रदाम् ॥ क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानांतयापहृतचेतसाम् ॥ व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ॥ ४४ ॥

तसांव्यवसायात्मिकाबुद्धिर्नविधीयतइतितृतीयेनान्वयः ।किमितितथावदंति यतोऽविपश्चितोमूढाः।तत्रहेतुः वेदेयेवादाः अर्थवादाः। अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति । अपामसोमममृताअभूमेत्याद्याः तेष्वेवरताःप्रीताः। अतएव अतःपरमन्यदीश्वरतत्वंप्राप्यंनास्तीतिवचनशीलाः॥४२॥अतएवकामात्मानइति।कामात्मानः कामाकुलचित्ताः अतःस्वर्गएवपरः पुरुषार्थोयेषांते जन्मचतत्रकर्माणिचतत्फलानिचप्रददातीतितथाताम्।भोगैश्वर्ययोर्गतिंप्राप्तिंप्रतिसाधनभूतायेक्रियाविशेषाः।तेबहुलायस्यांतांप्रवदंतीत्यनुषंगः ४३ततश्च भोगैश्वर्ये

बुद्धियोगयुक्तस्तु श्रेष्ठइत्याह। बुद्धीति। सुकृतंस्वर्गादिप्रापकं दुष्कृतंनिरयादिप्रापकं तेउभेइहैवजन्मनिपरमेश्वरप्रसादेनजहातित्यजाति तस्माद्योगायतदर्थायकर्मयोगाययुज्यस्वघटस्व यतः कर्मसुयत्कौशलंबंधकानामपितेषामीश्वराराधनेनमोक्षपरत्वसंपादनचातुर्यंसएवयोगः ॥ ५० ॥ कर्मणांमोक्षसाधनत्वप्रकारमाह। कर्मेति। कर्मजंफलंत्यक्त्वाकेवलमीश्वराराधनार्थमेवकर्मकुर्वाणामनीषिणोज्ञानिनोभूत्वाजन्मरूपेणबंधेनविनिर्मुक्ताःसंतोऽनामयंसर्वोपद्रवरहितंविष्णोःपदंमोक्षाख्यंगच्छंति॥५१॥कदातत्पदमहंप्राप्स्यामीत्यपेक्षायामाह यदेतिद्वाभ्याम्

बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते॥तस्माद्योगाययुज्यस्वयोगःकर्मसुकौशलम्॥५०॥कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः॥जन्मबंधविनिर्मुक्ताःपदंगच्छंत्यनामयम् ॥ ५१ ॥ यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति ॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ॥ ५२ ॥ श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्चला ॥ समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि ॥ ५३ ॥

मोहोदेहादिष्वात्मबुद्धिःतदेवकलिलं कलिलंगहनंविदुरित्यभिधानकोशस्मृतेः। ततश्चायमर्थः। एवंपरमेश्वराराधनेक्रियमाणेयदातत्प्रसादेनतवबुद्धिःदेहाभिमानलक्षणंमोहमयंगहनंदुर्गंविशेषेणाऽतितरिष्यति । तदाश्रोतव्यस्यश्रुतस्यार्थस्यचानिर्वेदंवैराग्यंगंतासिप्राप्स्यासि तयोरनुपादेयत्वेनजिज्ञासांनकरिष्यसीत्यर्थः॥५२॥ततश्च श्रुतीति। श्रुतिभिःनानालौकिकवैदिकार्थश्रवणैःविप्रतिपन्नाइतःपूर्वंविक्षिप्तासतीतवबुद्धिर्यदासमाधौस्थास्यतीति । समाधीयतेचित्तमस्मिन्नितिसमाधिः परमेश्वरः तस्मिन्निश्चलाविक्षेपव्याप्तिविषयांतरैरनाकृष्टातएवा

चलाअभ्यासपटुत्वेनतत्रैवास्थिरालयव्याप्तिःसती तदायोगंयोगफलंतत्वज्ञानमवाप्स्यसि ॥ ५३ ॥ पूर्वश्लोकोक्तस्यात्मतत्वज्ञस्यलक्षणं जिज्ञासुःअर्जुनउवाच । स्थितप्रज्ञस्येति । स्वाभाविकेसमाधौस्थितस्यातएवास्थितानिश्चलाप्रज्ञाबुद्धिर्यस्यतस्यकाभाषा भाष्यतेऽनयेति भाषा लक्षणमितियावत् केनलक्षणेनास्थितप्रज्ञउच्यतइत्यर्थः। तथास्थितधीः किंकथंभाषणमासनंव्रजनंचकुर्यादित्यर्थः॥ ५४ ॥अत्रचया निसाधकस्यज्ञानसाधनानितान्येवस्वाभाविकानिसिद्धस्यलक्षणानि अतः सिद्धस्यलक्षणानिकथयन्नेवांतरंगाणिज्ञानसाधनान्याहयाव

अर्जुनउवाच॥स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव॥स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिम् ५४
श्रीभगवानुवाच॥ प्रजहातियदाकामान्सर्वान्पार्थमनोगतान्॥ आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते
॥ ५५ ॥ दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः॥वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते॥ ५६ ॥ यःसर्वत्रान
भिस्नेहस्तत्तत्प्राप्यशुभाशुभम् ॥ नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥

दध्यायसमाप्ति तत्रप्रथमप्रश्नोत्तरमाह प्रजहातीतिद्वाभ्याम् । श्रीभगवानुवाच।मनसिस्थितान्कामान्यदाप्रकर्षेणजहातित्यागेहेतुः आत्मन्येवस्वस्मिन्नेवपरमानंदरूपेआत्मनास्वयमेवतुष्टइतिआत्मारामः सन्यदाक्षुद्रविषयाभिलाषांस्त्यजति । तदातेनलक्षदानभूमिः स्थितप्रज्ञउच्यतइत्यर्थः ॥ ५५ ॥ किंच दुःखेष्विति।दुःखेषुप्राप्तेष्वपि अनुद्विग्नमक्षुभितंमनोयस्यसः।सुखेषुविगतास्पृहायस्यसः तत्रहेतुः वीता अपगतारागभयक्रोधायस्मात् तत्ररागः प्रीतिः समुनिः स्थितधीःस्थितप्रज्ञइत्युच्यते ॥ ५६ ॥ कथंभाषेतेत्यस्योत्तरमाह । यइति । यःस

प्रसक्तानामिति।भोगैश्वर्ययोःप्रसक्तानांअभिनिविष्टानां तयापुष्पितयावाचापहृतंआकृष्टंचेतोयेषां तेषां समाधिःचित्तैकाग्र्यं परमेश्वरैकाग्र्याभिमुखत्वंतस्मिन्निश्चयात्मिकाबुद्धिर्नविधीयते । कर्मकर्तरिप्रयोगोनोत्पद्यतइत्यर्थः ॥ ४४ ॥ ननुचयदिस्वर्गादिकंपरमंफलंनभवतितर्हिकिमितिवेदैस्तत्साधनतयाकर्माणिविधीयंतेतत्राह । त्रैगुण्यविषयाइति । त्रिगुणात्मकाः सकामायेऽधिकारिणःतद्विषयास्तेषांकर्मफलसंबंधप्रतिपादकावेदाः । त्वंतुनिस्त्रैगुण्योनिष्कामोभव। तत्रोपायमाह। निर्द्वंद्वःसुखदुःखशीतोष्णादियुगुलानिद्वंद्वानितद्रहितोभव तानिसहस्वेत्यर्थः । कथमित्यत्राह । नित्यसत्वस्थःसन्धैर्यमवलंब्येत्यर्थः । तथानिर्योगक्षेमः । अप्राप्तस्वीकारोयोगःप्राप्तपरिपालनंक्षेमंतद्रहितः ।

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन ॥ निर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान् ॥ ४५॥
यावानर्थउदपानेसर्वतःसंप्लुतोदके ॥ तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ॥ ४६ ॥

आत्मवान्अप्रमत्तः । नहिद्वंद्वाकुलस्ययोगक्षेमव्यापृतस्यचप्रमादिनः । त्रैगुण्यातिक्रमःसंभवतीति ॥ ४५ ॥ ननुवेदोक्तनानाफलपरित्यागेननिष्कामतयाईश्वराराधनविषयाव्यवसायात्मिकाबुद्धिस्तुकुबुद्धिरेवेत्याशंक्याह । यावानिति । उदकंपीयतेऽस्मिन्नित्युदपानंवापीकूपतडागादितस्मिन्स्वल्पोदकेएकत्रकृत्स्नस्यार्थस्याभावात्।तत्रतत्रपरिभ्रमणेनविभागशोयावान्स्नानपानादिरर्थःप्रयोजनंभवति।तावान्सर्वोप्यर्थःसर्वतःसंप्लुतोदकेमहाह्रदेएकत्रैवयथाभवति एवंयावान्सर्वेषुवेदेषुतत्तत्कर्मफलरूपोऽर्थः तावान्सर्वोऽपिविजानतोव्यवसायात्मिकाबुद्धियुक्तस्यब्राह्मणस्यब्रह्मनिष्ठस्यभवत्येव ब्रह्मानंदेक्षुद्रानंदानामंतर्भूतत्वात्। एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः।

तस्मादियमेवबुद्धिःसुबुद्धिरित्यर्थः॥४६॥ तर्हिसर्वकर्मफलानिपरमेश्वराराधनादेवभविष्यंतीत्यभिसंधायप्रवर्तेतकिंकर्मणेत्याशंक्यतद्वारयन्नाह।कर्मण्येवेति।तेतवतत्त्वज्ञानार्थिनःकर्मण्येवाधिकारः।तत्फलेषुवंधहेतुष्वाधिकारःकामोमास्तु। ननुकर्मणिकृतेतत्फलंस्यादेवभोजनेकृतेतृप्तिवदित्याशंक्याह । माकर्मफलहेतुर्भूः कर्मफलंप्रवृत्तिहेतुर्यस्यतथाभूतोमाभूः कामितस्यैवस्वर्गादेर्नियोज्यविशेषणत्वेनफलत्वादकामितंफलंनस्यादितिभावः।अतएवफलंबंधकंभविष्यतीतिभयादकर्मणिकर्माऽकरणेपितवसंगोनिष्ठामास्तु॥४७॥किंतर्हियोगस्थइति।योगःपरमेश्वरैकपरता तत्रस्थितः कर्माणिकुरु तथासंगंकर्तृत्वाभिनिवेशंत्यक्त्वाकेवलमीश्वराश्रयेणैवकुरु तत्फलस्यज्ञानस्यापिसिद्ध्यसिद्ध्योः

कर्मण्येवाधिकारस्तेमाफलेषुकदाचन ॥ माकर्मफलहेतुर्भूर्मातेसंगोऽस्त्वकर्मणि ॥ ४७॥
योगस्थःकुरुकर्माणिसंगंत्यक्त्वाधनंजय ॥ सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते ॥ ४८॥
दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय ॥ बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ॥ ४९ ॥

समोभूत्वाकेवलमीश्वरार्पणेनैवकुरु । यतएवंभूतंसमत्वमेवयोगउच्यतेसद्भिःचित्तसमाधानरूपत्वात् ॥ ४८ ॥ काम्यंतुकर्मातिनिकृष्टमित्याह।दूरेणेति।बुद्ध्याव्यवसायात्मिकयाकृतःकर्मयोगोबुद्धियोगः बुद्धिसाधनभूतोवातस्मात्सकाशात् अन्यत् काम्यंकर्मदूरेणावरम् अत्यंतमपकृष्टम् हियस्मादेवंतस्माद्बुद्धौज्ञानेशरणमाश्रयंकर्मयोगमन्विच्छअनुतिष्ठ यद्वा बुद्धौशरणंत्रातारमीश्वरमाश्रयेत्यर्थः।फलहेतवस्तु सकामानराः कृपणाःदीनाः योवाएतदक्षरमविदित्वागार्ग्यस्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः ॥ ४९ ॥

वैत्रपुत्रादिष्वपिअनभिस्नेहः स्नेहशून्यः अतएवबाधितानुवृत्त्यातत्तच्छुभमनुकूलंप्राप्यनाभिनंदाति नप्रशंसति अशुभंप्रतिकूलंप्राप्यनद्वेष्टिनर्निंदाति किंतुकेवलमुदासीनएवभाषतेतस्यप्रज्ञाप्रातिष्ठितेत्यर्थः ॥ ५७॥ किंच यदेति।यदाचायंयोगीइंद्रियार्थेभ्यःसकाशात्इंद्रियाणि संहरते प्रत्याहराति अनायासेनसंहारेदृष्टांतः अंगानिकरचरणादीनिकूर्मोयथास्वभावेनैवआकर्षति तद्वत् ॥ ५८॥ ननुनेंद्रियाणांविषयेष्वप्रवृत्तिः स्थितप्रज्ञस्यलक्षणंभवितुमर्हति जडानामातुराणामुपवासपराणांचविषयेष्वप्रवृत्तेरविशेषात्तत्राह । विषयाइति । इंद्रियैर्विषयाणामाहरणंग्रहणमाहारः । निराहारस्येंद्रियैर्विषयग्रहणमकुर्वतोदेहिनोदेहाभिमानिनोऽज्ञस्यविषयाविनिवर्त्तंते तदनुभवोनिवर्त्ततइत्यर्थः ।

यदासंहरतेचायंकूर्मोऽगानीवसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रातिष्ठिता ॥ ५८ ॥
विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः ॥ रसवर्जंरसोऽप्यस्यपरंदृष्ट्वानिवर्त्तते ॥ ५९ ॥
यततोह्यपिकौन्तेयपुरुषस्यविपश्चितः ॥ इन्द्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ॥ ६० ॥

किंतु रसोरागोऽभिलाषस्तद्वर्जम् अभिलाषस्तुनानिवर्त्ततइत्यर्थः । रसोऽपिरागोऽपिपरंपरमात्मानंदृष्ट्वास्यस्थितप्रज्ञस्यस्वतोनिवर्त्तंते नश्यतीत्यर्थः।यद्वा निराहारस्योपवासपरस्यविषयाःप्रायशोविनिवर्त्तंते क्षुधासंतप्तस्यशब्दस्पर्शाद्यपेक्षाभावात्।परंतु रसवर्जम् रसापेक्षातुनानिवर्त्ततइत्यर्थः । शेषंसमानम् ॥ ५९ ॥ इंद्रियसंयमंविनातुस्थितप्रज्ञतानसंभवति अतःसाधकावस्थायांतत्रमहान्प्रयत्नःकर्तव्यइत्याह यततोह्यपीतिद्वाभ्याम् यततःमोक्षप्रयतमानस्यापिविपश्चितोविवेकिनोऽपिमनः इंद्रियाणिप्रसभंबलाद्धरति यतःप्रमाथीनिप्रमथनशीलानि

प्रक्षोभकाणि ॥ ६० ॥ यस्मादेवंतस्मात् तानीति।युक्तोयोगीतानींद्रियाणिसंयम्यमत्परःसन्आसीतयस्यवशेवशवर्तीनि एतेनकथमासीतेतिप्रश्नस्यवशीकृतेन्द्रियःसन्आसीतेत्युत्तरमुक्तंभवति ॥ ६१ ॥ बाह्येंद्रियसंयमाभावेदोषमुक्त्वा मनःसंयमाभावेदोषमाह ध्यायतइतिद्वाभ्याम्। गुणबुद्ध्याविषयान्ध्यायतःपुरुषस्यतेषुसंगआसक्तिर्भवति ।आसक्त्याचतेष्वधिकःकामोभवति।कामाच्चकेनचित्प्रतिहतात्क्रोधोभवति ॥६२॥ किंच क्रोधादिति। क्रोधात्संमोहः कार्याकार्यविवेकाभावः।ततःशास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमोविचलनं ततोबुद्धेश्चेतनाया

तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः ॥ वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता ॥ ६१ ॥
ध्यायतोविषयान्पुंसः संगस्तेषूपजायते॥संगात्संजायते कामःकामात्क्रोधोऽभिजायते॥६२॥
क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः॥स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ॥६३ ॥
रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ॥ ६४ ॥

विनाशःवृक्षादिष्विवाभिभवःततःप्रणश्यतिमृततुल्योभवति ॥ ६३ ॥ नन्विंद्रियाणांविषयप्रवणस्वभावानांनिरोद्धुमशक्यत्वादयंदोषोदुष्परिहरइतिस्थितप्रज्ञत्वंकथंस्यादित्याशंक्याह रागेतिद्वाभ्याम् । रागद्वेषरहितैर्विगतदर्पैरिंद्रियैर्विषयांश्चरन्भुंजानोऽपिप्रसादंशांतिंप्राप्नोति। रागद्वेषराहित्यमेवाह । आत्मनोमनसोवश्यैर्विधेयोवशवर्तीआत्मामनोयस्येति ।अनेनैवकथंव्रजेतभुंजीतेत्यस्यचतुर्थप्रश्नस्यस्वाधीनैरिंद्रियैर्विषयानधिगच्छतिइत्युत्तरमुक्तंभवति ॥ ६४ ॥

प्रसादेसतिकिंस्यादित्यत्राह।प्रसादइति।प्रसादेसतिसर्वदुःखनाशस्ततश्चप्रसन्नचेतसोबुद्धिःप्रतिष्ठिताभवतीत्यर्थः ॥ ६५ ॥ इंद्रियनिग्रहस्य
स्थितप्रज्ञतासाधनत्वंव्यतिरेकमुखेनोपपादयाति।नास्तीति।अयुक्तस्यावशीकृतेंद्रियस्यनास्तिबुद्धिः शास्त्राचार्योपदेशाभ्यामात्मविषयाबु
द्धिःप्रज्ञैवनोत्पद्यते कुतस्तस्यप्रतिष्ठावार्त्ता कुतइत्यतआह।नचायुक्तस्यभावनाध्यानं भावनयाहिबुद्धेरात्मनिप्रतिष्ठाभवति साचायुक्तस्य
यतोनास्ति नचाभावयतआत्मध्यानमकुर्वतःशांतिःआत्मनिचित्तोपरतिः अशांतस्यकुतःसुखंमोक्षानंदइत्यर्थः ॥६६॥ नास्तिबुद्धिरयुक्त
स्येत्यत्रहेतुमाह।इंद्रियाणामिति।इंद्रियाणामवशीकृतानांस्वैरंविषयेषुचरतांमध्येयदेवैकमिंद्रियंमनोऽनुविधीयते अवशीकृतंसदिंद्रियेणसह

प्रसादेसर्वदुःखानांहानिरस्योपजायते॥प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते॥६५॥नास्तिबुद्धिरयुक्तस्यनचा
युक्तस्यभावना॥नचाभावयतःशांतिरशांतस्यकुतःसुखम्॥६६॥इंद्रियाणांहिचरतांयन्मनोऽनुविधीयते॥तद
स्यहरतिप्रज्ञांवायुर्नावमिवांभसि॥६७॥तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्त
स्यप्रज्ञाप्रतिष्ठिता॥६८॥

गच्छति तदेवैकमिंद्रियमस्यमनसःपुरुषस्यवाप्रज्ञांहरति विषयविक्षिप्तांकरोति किमुतवक्तव्यंबहूनिप्रज्ञांहरंतीति यथाप्रमत्तस्य कर्णधारस्य
नावंवायुःसमुद्रेसर्वतःपरिभ्रामयति तद्वत् ६७इंद्रियसंयमस्यस्थितप्रज्ञत्वसाधनत्वलक्षणत्वंप्रोक्तमुपसंहरति।तस्मादिति । प्रतिष्ठिताभवती
त्यर्थः।लक्षणत्वोपसंहारेतस्यप्रज्ञाप्रतिष्ठिताज्ञातव्येत्यर्थः।महाबाहोइतिसंबोधनंवैरिनिग्रहसमर्थस्यतवात्रापिसामर्थ्यंभवेदितिसूचयति ६८

ननुचकश्चिदपिप्रसुप्तइवदर्शनादिव्यापारशून्यःसर्वात्मनानिगृहीतेंद्रियोलोकेनदृश्यतेंअतोऽसंभावितमिदंलक्षणमित्याशंक्याह।यानिशेति।
सर्वेषांभूतानांयानिशानिशेवनिशाआत्मनिष्ठा आत्माज्ञानध्वांतावृतमतीनांतस्यांदर्शनादिव्यवहाराभावात् । तस्यामात्मनिष्ठायांसंयमी
निगृहीतेंद्रियोजागर्ति प्रबुद्ध्यते । यस्यांतुविषयबुद्ध्याभूतानिजाग्रति प्रबुद्ध्यंते साआत्मतत्त्वंपश्यतोमुनेर्निशा तस्यांदर्शनादिव्या
पारस्तस्यनास्तीत्यर्थः।एतदुक्तंभवति । यथादिवांधानामुलूकादीनांरात्रावेवदर्शनंनतुदिवसे एवंब्रह्मज्ञस्योन्मीलिताक्षस्यापिब्रह्मण्येवदृष्टि
र्नतुविषयेषु अतोनासंभावितमिदंलक्षणमिति ॥६९॥ ननुविषयेषुदृष्टयभावेकथमसौतान्भुंक्तेइत्यपेक्षायामाह । आपूर्यमाणमिति । नाना

यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी ॥ यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ॥ ६९ ॥ आपूर्यमा
णमचलप्रतिष्ठंसमुद्रमापःप्रविशंति यद्वत् ॥ तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ॥७०॥
विहायकामान्यःसर्वान्पुमांश्चरतिनिःस्पृहः ॥ निर्ममोनिरहंकारःसशांतिमधिगच्छति ॥ ७१ ॥

नदीभिरापूर्यमाणमपिअचलप्रतिष्ठंअनतिक्रांतमर्यादमेवसमुद्रंपुनरप्यन्याआपोयथाप्रविशंति । तथाकामाविषयायंमुनिमंतर्दृष्टिंभोगैरवि
क्रियमाणमेवप्रारब्धकर्मभिराक्षिप्ताःसंतःप्रविशंति सशांतिंकैवल्यंप्राप्नोति नतुकामकामीभोगकामनाशीलः ॥ ७० ॥ यस्मादेवंतस्मा
द्विहायेति।प्राप्तान्कामान्विहायत्यक्त्वाउपेक्ष्य अप्राप्तेषुचनिःस्पृहः यतोनिरहंकारः अतएवतद्भोगसाधनेषुनिर्ममःसन्नंतर्दृष्टिर्भूत्वायश्चरतिप्रा
रब्धवशेनभोगान्भुंक्ते यत्रक्वापिगच्छतिवासशांतिमाप्नोति ॥ ७१ ॥

उक्तांज्ञाननिष्ठांस्तुवन्नुपसंहरति । एषेति । ब्राह्मीस्थितिःब्रह्मज्ञाननिष्ठाएषाएवंविधा एनांपरमेश्वराराधनेनशुद्धांतःकरणःपुमान्प्राप्यनविमुह्यतिपुनःसंसारमोहंनप्राप्नोति यतःअंतकालेमृत्युसमयेऽपिअस्यांक्षणमात्रमपिस्थित्वाब्रह्मणिनिर्वाणंलयमृच्छति प्राप्नोतिकिंपुनर्वक्तव्यंबाल्यमारभ्यस्थित्वाप्राप्नोतीति ॥ ७२ ॥ शोकपंकनिमग्नंयःसांख्ययोगोपदेशतः।उज्जहारार्जुनंभक्तंसकृष्णःशरणंमम॥ १॥इति श्रीमद्भ० सुबोधिन्यांटीकायांद्वितीयोऽध्यायः ॥ २ ॥ एवंतावदशोच्यानन्वशोचस्त्वमित्यादिनाप्रथमंमोक्षसाधनत्वेनदेहात्मविवेकबुद्धिरुक्ता

एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति ॥ स्थित्वास्यामंतकालेऽपिब्रह्मनिर्वाणमृच्छति
॥ ७२ ॥ ॥ इति श्रीमद्भगवद्गीता० सांख्ययोगोनामद्वितीयोऽध्यायः ॥ २ ॥ अर्जुनउवाच ॥
ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन ॥ तत्किंकर्मणिघोरेमांनियोजयसिकेशव ॥ १ ॥

तदनंतरमेषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृण्वित्यादिनाकर्मचोक्तं नचतयोर्गुणप्रधानभावःस्पष्टंदर्शितः । तत्रबुद्धियुक्तस्यस्थितप्रज्ञस्यनिष्कामत्वनियतेंद्रियत्वनिरहंकारत्वाद्यभिधानादेषाब्राह्मीस्थितिःपार्थेतिसप्रशंसमुपसंहाराच्चबुद्धिकर्मणोर्मध्येबुद्धेः श्रैष्ठ्यंभगवतोऽभिमतंमन्वानोऽर्जुनउवाच । ज्यायसीचेदिति । कर्मणःसकाशान्मोक्षांतरंगत्वेनबुद्धिर्ज्यायसीअधिकतराश्रेष्ठाचेत्तवसंमता तर्हिकिमर्थंतस्माद्युद्धयस्वेतितस्मादुत्तिष्ठेतिचवारंवारंवदन्घोरेहिंसात्मकेकर्मणिमांनियोजयसिप्रवर्त्तयसि ॥ १ ॥

ननुधर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यतइत्यादिनाकर्मणोऽपिश्रेष्ठत्वमुक्तमेवेत्याशंक्याह व्यामिश्रेणेति । क्वचित्कर्मप्रशंसाक्वचि
ज्ज्ञानप्रशंसेत्येवंव्यामिश्रंसंदेहोत्पादकमिवयद्वाक्यंतेनमेबुद्धिंमतिमुभयत्रदोलायितांकुर्वन्मोहयसीव परमकारुणिकस्यतवमोहकत्वं
नास्त्येवतथापिभ्रांत्याममैवंभातिइतीवशब्देनोक्तम् अतउभयोर्मध्येयद्भद्रंतदेकंनिश्चित्यवदेति यद्वा इदमेवश्रेयःसाधनमितिनिश्चित्य
येनानुष्ठितेनश्रेयोमोक्षमहमाप्नुयांप्राप्स्यामि तदेवैकंनिश्चित्यवदेत्यर्थः॥२॥अत्रोत्तरंश्रीभगवानुवाच।लोकेस्मिन्निति । अयमर्थः यदिमयाप
रस्परनिरपेक्षंमोक्षसाधनत्वेनकर्मज्ञानयोगरूपंनिष्ठाद्वयमुक्तंस्यात्तर्हिद्वयोर्मध्येयद्भद्रंतदेकंवदेतित्वदीयःप्रश्नःसंगच्छेत नतुमयातथोक्तंकिं

व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे ॥ तदेकंवदनिश्चित्ययेनश्रेयोऽहमाप्नुयाम्॥२॥श्रीभगवानुवाच॥
लोकेऽस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ ॥ ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनाम् ॥ ३ ॥

तुद्वाभ्यामेकैवब्रह्मनिष्ठोक्ता गुणप्रधानभूतयोस्तयोःस्वातंत्र्यानुपपत्तेःएकस्याएवतुप्रकारभेदमात्रमधिकारभेदेनोक्तमिति अस्मिन्शुद्धा
शुद्धान्तःकरणतयाद्विविधेलोकेअधिकारिजनेद्वेविधेप्रकारौयस्याःसाद्विविधानिष्ठामोक्षपरतापुरापूर्वाध्यायेमयासर्वज्ञेनप्रोक्तास्पष्टमेवोक्ता।
प्रकारद्वयमेवनिर्दिशति । सांख्यानांशुद्धांतःकरणानांज्ञानभूमिकामारूढानांज्ञानपरिपाकार्थं ज्ञानयोगेनध्यानादिना निष्ठाब्रह्मपरतोक्ता।
तानिसर्वाणिसंयम्ययुक्तआसीतमत्परइत्यादिनासांख्यभूमिकामारुरुक्षूणांतुअंतःकरणशुद्धिद्वारातदारोहार्थंतदुपायभूतकर्मयोगाधिका
रिणांयोगिनांकर्मयोगेननिष्ठोक्ता धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यतइत्यादिना अतएवचित्तशुद्ध्यशुद्धिरूपावस्थाभेदेनैवद्विवि

धापिनिष्ठोक्ता एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणिवति ॥३॥ अतःसम्यक्चित्तशुद्ध्यर्थंज्ञानोत्पत्तिपर्यंतंवर्णाश्रमोचितानिकर्माणि कर्त्तव्यानि अन्यथाचित्तशुद्ध्यभावेनज्ञानानुत्पत्तेरित्याह। नकर्मणामिति। कर्मणामनारंभादननुष्ठानान्नैष्कर्म्यंज्ञानंनाश्नुते नाप्नोति ननुच एवमेवप्रव्राजिनोलोकमीप्संतः प्रव्रजंतीतिसंन्यासस्यमोक्षांगत्वश्रुतेः संन्यासादेवमोक्षोभविष्यतीतिकिंकर्मभिरित्याशंक्योक्तम् नचेति।नचचित्तशुद्धिंविनाकृतात्संन्यसनादेवज्ञानशून्यात्सिद्धिंमोक्षंसमधिगच्छतिप्राप्नोति ॥४॥ कर्मणांचसंन्यासस्तेष्वनासक्तिमात्रंनतुस्वरू

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोऽश्नुते ॥ नचसंन्यसनादेवसिद्धिंसमधिगच्छति ॥ ४ ॥
नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् ॥ कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ॥ ५ ॥
कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन् ॥ इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यते ॥ ६ ॥
यस्त्विंद्रियाणिमनसानियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैःकर्मयोगमसक्तःसविशिष्यते ॥ ७ ॥

पेणाशक्यत्वादित्याह। नहीति। जातुकस्यांचिदवस्थायांक्षणमात्रमपिकश्चिदपिज्ञानीवाज्ञोवाकर्मकृत्कर्माण्यकुर्वाणोनातिष्ठति।तत्रहेतुःप्रकृतिजैःस्वभावप्रभवैःरागद्वेषादिगुणैःसर्वोऽपिजनःकर्मकार्यतेकर्माणिप्रवर्तते अवशः अस्वतंत्रःसन् ॥५॥ अतोऽज्ञंकर्मत्यागिनंनिंदाति।कर्मेंद्रियाणीति । वाक्पाण्यादीनिकर्मेंद्रियाण्यपिसंयम्यनिगृह्ययोमनसाभगवद्ध्यानच्छलेनेंद्रियार्थान्विषयान्स्मरन्नास्ते अविशुद्धतयामनस आत्मनिस्थैर्याभावात् समिथ्याचारःकपटाचारोदांभिकउच्यतइत्यर्थः॥६।एतद्विपरीतःकर्मकर्ताश्रेष्ठइत्याह।यस्त्विति।यस्तुज्ञानेंद्रियाणि

मनसानियम्यईश्वरप्रवणानिकृत्वाकर्मेंद्रियैःकर्मरूपंयोगमुपायमारभते अनुतिष्ठति । असक्तःफलाभिलाषरहितःसन्सविशिष्यते विशि
ष्टोभवतिचित्तशुद्ध्याज्ञानवान्भवतीत्यर्थः॥७॥यस्मादेवंतस्मात् नियतमिति।नियतंनित्यंसंध्योपासनादिकर्मकुरु हियस्मादकर्मणःकर्मा
करणात्सकाशात्कर्मज्यायःअधिकतरम् अन्यथाकर्मणःसर्वकर्मशून्यस्यतवशरीरनिर्वाहोऽपिनभवेत् ॥८॥सांख्यास्तुसर्वमपिकर्मबंधकत्वा
न्नकार्यमित्याहुस्तन्निराकुर्वन्नाह यज्ञार्थादिति । यज्ञोऽत्रविष्णुःयज्ञोवैविष्णुरितिश्रुतेः।तदाराधनार्थात्कर्मणोऽन्यत्रतदेकंविनायंलोकःकर्मबं
धनःकर्मभिर्बद्ध्यते नत्वीश्वराराधनार्थेनकर्मणा अतस्तदर्थंविष्णुप्रीत्यर्थंमुक्तसंगोनिष्कामःसन्कर्मसम्यगाचर ॥ ९ ॥ प्रजापतिवचनाद

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः ॥ शरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणः ॥ ८॥ यज्ञा
र्थात्कर्मणोऽन्यत्रलोकोऽयंकर्मबंधनः ॥ तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर ॥ ९ ॥ सहय
ज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः ॥ अनेनप्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक् ॥ १० ॥

पिकर्मकर्तैवश्रेष्ठइत्याह सहयज्ञाइतिचतुर्भिः । यज्ञेनसहवर्ततइतिसहयज्ञाः यज्ञाधिकृताब्राह्मणाद्याः प्रजाःपुरासर्गादौसृष्ट्वाब्रह्माइदमुवाच
अनेनयज्ञेनप्रसविष्यध्वंप्रसूयध्वम् प्रसवोवृद्धिः उत्तरोत्तरामभिवृद्धिंलभध्वमित्यर्थः । तत्रहेतुः । एषयज्ञःवोयुष्माकंइष्टकामधुक्इष्टान्का
मान्दोग्धीतितथाअभीष्टभोगप्रदोऽस्त्वित्यर्थः। अत्रचयज्ञग्रहणमावश्यककर्मोपलक्षणार्थम् । काम्यकर्मप्रशंसातुप्रकरणेऽसंगतापिसामान्य
तोऽकर्मणःकर्मश्रेष्ठमित्येतदर्थेत्यदोषः ॥ १० ॥

कथमिष्टकामदोग्धायज्ञोभवेदित्यत्राह । देवानिति । अनेनयज्ञेनयूयंदेवान्भावयत हविर्भागैःसंवर्धयत तेचदेवावोयुष्मान्संवर्धयंतु वृष्ट्यादिनान्नोत्पत्तिद्वारेण एवमन्योन्यंसंवर्धयंतोदेवाश्चयूयंचपरस्परंश्रेयोऽभीष्टमर्थंप्राप्स्यथ ॥११॥ एतदेवस्पष्टीकुर्वन्कर्माकरणेदोषमाह । इष्टानिति । यज्ञैर्भाविताःसंतोदेवा वृष्ट्यादिद्वारेण वःयुष्मभ्यं भोगान् दास्यंतिहि अतोदेवैर्दत्तानन्नादीनेभ्योदेवेभ्यःपंचयज्ञादिभिरदत्वायो भुंक्तेसतुचोरएवज्ञेयः ॥ १२ ॥ अतश्चयजंतएवश्रेष्ठानेतराइत्याह।यज्ञशिष्टाशिनइति।वैश्वदेवादियज्ञावशिष्टंयेऽश्नंतितेपंचसूनाकृतैःसर्वैःकिल्बिषैर्मुच्यंते पंचसूनाश्चस्मृतावुक्ताः "कंडनीपेषणीचुल्लीउदकुंभीचमार्जनी॥पंचसूनागृहस्थस्यताभिःस्वर्गंनविंदती" ति।येत्वात्मनोभोजनार्थमेवान्नंपचंतिनतुवैश्वदेवाद्यर्थंतेपापाःदुराचाराःअघमेवभुंजते॥१३॥जगच्चक्रप्रवृत्तिहेतुत्वादपिकर्मकर्तव्यमित्याह । अन्नादितित्रिभिः अन्नाच्छुक्रशोणितरूपेणपरिणताद्भूतान्युत्पद्यंते।अन्नस्यचसंभवःपर्जन्याद्वृष्टेः सचपर्जन्योयज्ञाद्भवति । सचयज्ञःकर्मसमुद्भवःकर्मणायजमानादिव्यापारेणसम्यङ्निष्पद्यतइत्यर्थः"अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठति॥आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजा" इतिस्मृतेः१४॥

देवान्भावयतानेनतेदेवाभावयंतुवः।परस्परंभावयंतःश्रेयःपरमवाप्स्यथ ११इष्टान्भोगान्हिवोदेवादास्यंतेय
ज्ञभाविताः॥तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः १२यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः॥भुंजतेतेत्व
घंपापायेपचंत्यात्मकारणात् १३अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः।यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः १४

तथाकर्मब्रह्मोद्भवमिति । तच्चयजमानादिव्यापाररूपंकर्मब्रह्मोद्भवंविद्धि ब्रह्मवेदःतस्मात्प्रवृत्तंजानीहि । तच्चब्रह्मवेदाख्यंअक्षरात्परब्रह्मणः समुद्भूतंविद्धि “अस्यमहतोभूतस्यानिःश्वसितमेतद्यदृग्वेदोयजुर्वेदःसामवेद” इतिश्रुतेः।यतएवमक्षरादेवयज्ञप्रवृत्तेरत्यंतंतस्याभिप्रेतोयज्ञः तस्मात्सर्वगतमप्यक्षरंब्रह्मनित्यंसर्वदायज्ञेप्रतिष्ठितं यज्ञेनोपायभूतेनप्राप्यतइतियज्ञेप्रतिष्ठितमुच्यते उद्यमस्थासदालक्ष्मीरितिवत् । यद्वायस्माज्जगच्चक्रमूलंकर्म तस्मात्सर्वगतंमंत्रार्थवादैः सर्वेषुसिद्धार्थप्रतिपादकेषुभूतार्थाख्यानादिषुगतंस्थितमपिवेदाख्यंब्रह्मसर्वदायज्ञेचतात्पर्यरूपेणप्रतिष्ठितं अतोयज्ञादिकर्मकर्तव्यमित्यर्थः ॥ १५॥यस्मादेवंपरमेश्वरेणैवभूतानांपुरुषार्थसिद्ध्येकर्मादिचक्रंप्रवर्तितंतस्मात्त

कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवम् ॥ तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितम् ॥ १५ ॥
एवंप्रवर्तितंचक्रंनानुवर्त्तयतीहयः ॥ अघायुरिंद्रियारामोमोघंपार्थसजीवति ॥ १६ ॥
यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः ॥ आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते ॥ १७ ॥

दकुर्वतोवृथैवजीवितमित्याह । एवमिति॥ परमेश्वरवाक्यभूताद्वेदाख्याद्ब्रह्मणःपुरुषाणांकर्मणिप्रवृत्तिः।ततःकर्मनिष्पत्तिःततःपर्जन्यस्ततोऽन्नंततोभूतानि । भूतानांचपुनस्तथैवकर्मणिप्रवृत्तिःइत्येवंप्रवर्तितंचक्रंयोनानुवर्त्तयातिनानुष्ठातिसअघायुः । अघंपापरूपंआयुर्यस्यसः यत इंद्रियैर्विषयेष्वेवरमते नतुईश्वराराधनार्थंकर्माणि अतोमोघंव्यर्थंसजीवति ॥ १६ ॥ तदेवंनकर्मणामनारंभान्नैष्कर्म्यमित्यादिनाज्ञस्यांतःकरणशुद्ध्यर्थंकर्मयोगमुक्त्वाज्ञानिनःकर्मानुपयोगमाह । यस्त्वितिद्वाभ्याम् । आत्मन्येवरतिःप्रीतिर्यस्य ततश्चात्मन्येवतृप्तः स्वानंदा

नुभवेनानिर्वृतः।अतएवात्मन्येवसंतुष्टोभोगापेक्षारहितोयस्तस्यकर्तव्यंनास्ति॥१७॥तत्रहेतुमाह।नैवतस्येति।कृतेनकर्मणातस्यार्थःपुण्यंनैवास्ति।नचाकृतेनकश्चनकोऽपिप्रत्यवायोऽस्ति निरहंकारत्वेनविधिनिषेधातीतत्वात्।तथापि तस्मात्तदेषांनप्रियंयदेतन्मनुष्याविदुरितिश्रुतेःमोक्षेदेवकृतविघ्नसंभवात् तत्परिहारार्थंकर्मभिर्देवाःसेव्याइत्याशंक्योक्तं सर्वभूतेषुब्रह्मादिस्थावरांतेषुकश्चिदपिअर्थव्यपाश्रयः आश्रयएवव्यपाश्रयः अर्थेमोक्षआश्रयणीयोऽस्यनास्तीत्यर्थः।विघ्नाभावस्यश्रुत्यैवोक्तत्वात् तथाचश्रुतिः।“तस्यहनदेवाश्चनाभूत्याईशतेआत्माह्येषांसंभवति” इति।हनेत्यव्ययमप्यर्थे देवाअपितस्यात्मतत्त्वज्ञस्यअभूत्यैब्रह्मताप्रतिबंधनायनेशतेनशक्नुवंतीतिश्रुतेरर्थः।देवकृतास्तुवि

नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन ॥ नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः ॥ १८ ॥
तस्मादसक्तःसततंकार्यंकर्मसमाचर ॥ असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः ॥ १९ ॥
कर्मणैवहिसंसिद्धिमास्थिताजनकादयः ॥ लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि ॥२०॥

घ्नाः सम्यग्ज्ञानोत्पत्तेः प्रागेव यदेतद्ब्रह्ममनुष्याविदुस्तदेषांदेवानांनप्रियमिति । श्रुत्याब्रह्मज्ञानस्यैवाप्रियत्वोक्त्यातत्रैवविघ्नकर्तृत्वस्यसूचितत्वात्॥१८॥यस्मादेवंभूतस्यज्ञानिनएवकर्मानुपयोगोनान्यस्यतस्मात्त्वंकर्मकुर्वित्याह।तस्मादिति।असक्तःफलसंगरहितःसन्कार्यमवश्यकर्तव्यतयाविहितंनित्यनैमित्तिकंकर्मसम्यगाचर हियस्मात्असक्तःकर्माचरन्पुरुषःपरंमोक्षंचित्तशुद्धिज्ञानद्वाराप्राप्नोति॥१९॥अत्रसदाचारंप्रमाणयति। कर्मणैवेति । कर्मणैवशुद्धसत्वाःसंतःसंसिद्धिंसम्यग्ज्ञानंप्राप्ताइत्यर्थः । यद्यपित्वंसम्यग्ज्ञानिनमेवात्मानंमन्यसेतथापिक

मांचरणंभद्रमेवेत्याह । लोकसंग्रहइति । लोकस्यसंग्रहःस्वधर्मेप्रवर्तनं मयाकर्मणिकृतेजनःसर्वोपिकरिष्यतिअन्यथाज्ञानिदृष्टांतेनअज्ञःक
र्मत्यजेदित्येवंलोकरक्षणमपितावत्प्रयोजनंपश्यन्कर्मकर्तुमेवार्हसि नतुत्यक्तुमित्यर्थः ॥२०॥ कर्मकरणेलोकसंग्रहोयथास्यात्तथाह।यदीति
इतरःप्राकृतोजनःतत्तदेवाचरति सश्रेष्ठोजनःकर्मशास्त्रंनिवृत्तिशास्त्रंवायत्प्रमाणंमन्यते तदेवलोकोऽप्यनुसरति ॥ २१॥ अत्रचाहमेवदृष्टांत
इत्याहत्रिभिः। नमेपार्थेति।हेपार्थमेकर्तव्यंनास्ति यतस्त्रिष्वपिलोकेष्वनवाप्तंअप्राप्तंसदवाप्तव्यंप्राप्यंनास्ति तथापिकर्मण्यहंवर्ते कर्मकरो

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः॥सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते॥२१॥नमेपार्थास्तिकर्त्तव्यंत्रिषुलो
केषुकिंचन॥नानवाप्तमवाप्तव्यंवर्त्तएवचकर्मणि॥२२॥यदिह्यहंनवर्तेयंजातुकर्मण्यतंद्रितः॥ममवर्त्मानुवर्त्तं
तेमनुष्याःपार्थसर्वशः॥२३॥उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहम्॥संकरस्यचकर्तास्यामुपहन्यामिमाः
प्रजाः॥२४॥ सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभारत॥ कुर्याद्विद्वांस्तथासक्ताश्चिकीर्षुर्लोकसंग्रहम् ॥२५॥

म्येवेत्यर्थः॥२२॥अकरणेलोकस्यनाशंदर्शयति।यदीति। जातुकदाचित् अतंद्रितोऽनलसःसन्यादिकर्मणिनवर्तेयं कर्मनानुतिष्ठेयं तर्हिममै
ववर्त्ममार्गंमनुष्याःअनुवर्तंतेअनुवर्तेरन्नित्यर्थः ॥२३॥ ततःकिमतआह।उत्सीदेयुरिति।उत्सीदेयुःकर्मलोपेननश्येयुः ततश्चयोवर्णसंकरोभ
वेत्तस्याप्यहमेवकर्तास्यां भवेयं एवमहमेवप्रजाउपहन्यां मलिनीकुर्याम् ॥२४॥तस्मादात्मविदापिलोकसंग्रहार्थंतत्कृपयाकर्मकार्यमेवेत्यु
पसंहरति।सक्ताइति।कर्मणिसक्ता अभिनिविष्टाःसंतोऽज्ञाःयथाकर्मकुर्वंति असक्तःसन्विद्वानपितथैवकुर्यात्।लोकसंग्रहंकर्तुमिच्छुः ॥२५॥

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् ॥ जोषयेत्सर्वकर्माणि विद्वान्युक्तःसमाचरन् ॥ २६ ॥ प्रकृतेः क्रियमाणानिगुणैःकर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्त्ताहमिति मन्यते ॥ २७ ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ गुणा गुणेषुवर्त्तंत इति मत्वा न सज्जते ॥ २८ ॥ प्रकृतेर्गुणसंमूढाःसज्जंते गुणकर्मसु ॥ तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥

ननुकृपयातत्त्वज्ञानमेवोपदेष्टुंयुक्तंनेत्याह । नेति।अज्ञानांअतएवकर्मसंगिनांकर्मासक्तानामकर्त्तात्मोपदेशेनबुद्धेर्भेदंअन्यथात्वंनजनयेत्कर्मणःसकाशाद्बुद्धिचालनंनकुर्यात्।अपितुजोषयेत् सेवयेत् जुषप्रीतिसेवनयोः अज्ञान्कर्माणिकारयेत् । कथं युक्तःअवहितोभूत्वास्वयंचसमाचरन् बुद्धिचालनेकृतेसतिकर्मसुश्रद्धानिवृत्तेर्ज्ञानस्यचानुत्पत्तेस्तेषामुभयभ्रंशःस्यादितिभावः॥२६॥ननुविदुषापिचेत्कर्मकर्तव्यं तर्हि विद्वदविदुषोःकोविशेषइत्याशंक्योभयोर्विशेषंदर्शयति । प्रकृतेरितिद्वाभ्याम् । प्रकृतेर्गुणैःप्रकृतिकार्यैरिंद्रियैःसर्वप्रकारेणक्रियमाणानियानिकर्माणितान्यहमेवकर्त्ता करोमीतिमन्यते तत्रहेतुः अहंकारेणइंद्रियादिष्वात्माध्यासेनविमूढआत्माबुद्धिर्यस्यसः॥२७॥विद्वांस्तुतथानमन्यतइत्याह । तत्त्वविदिति । नाहंगुणात्मकइतिगुणेभ्यआत्मनोविभागःनमेकर्माणीतिकर्मभ्योऽप्यात्मनोविभागस्तयोर्गुणकर्मविभागयोर्यस्तत्त्वंवेत्तिसतुनसज्जतेकर्तृत्वाभिनिवेशनकरोति तत्रहेतुः गुणाइंद्रियाणिगुणेषुविषयेषुवर्त्तंते नाहमितिमत्वा ॥२८॥ नबुद्धिभेदंजनयेदित्युक्तमुपसंहरति प्रकृतेरिति यैःप्रकृतेर्गुणैःसत्त्वादिभिःसंमूढाःसंतोगुणेष्विंद्रियेषुतत्कर्मसुचसज्जंतेवयंकुर्मइति तानकृत्स्नविदोमदं

मतीन्कृत्स्नवित्सर्वज्ञोनविचालयेत् ॥ २९ ॥ तदेवंतत्त्वविदापिकर्मकर्त्तव्यंत्वंतुनाद्यापितत्त्ववित् अतःकर्मैवकुर्वित्याह।मयीति।सर्वाणिक
र्माणिमयिसंन्यस्यसमर्प्याध्यात्मचेतसांतर्याम्यधीनोऽहंकरोमीतिदृष्ट्यानिराशीर्निष्कामोऽतएव मत्फलसाधनं मदर्थमिदंकर्मेत्येवंमम
ताशून्यश्चभूत्वा विगतज्वरस्त्यक्तशोकश्चभूत्वा युद्धचस्व॥३०॥एवंकर्मानुष्ठानेगुणमाह।येमेमतमिति।मद्वाक्येश्रद्धावंतःअनसूयंतःदुःखा
त्मकेकर्मणिप्रवर्त्तयतीतिदोषदृष्टिमकुर्वंतश्चयेमेमदीयमिदंमतंअनुतिष्ठंति तेऽपिशनैः कर्मकुर्वाणाःसम्यग्ज्ञानिवत्कर्मभिर्मुच्यंते ॥३१॥वि

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युद्धचस्व विगतज्वरः ॥ ३० ॥
ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः ॥ श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि कर्मभिः ॥ ३१ ॥
ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतम् ॥ सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥

पक्षेदोषमाह। येत्विति। येतुमेमतंईश्वरार्थंकर्मकर्त्तव्यमित्यनुशासनमभ्यसूयंतः द्विषंतःनानुतिष्ठंति तान्अचेतसःविवेकशून्यानतएवसर्व
स्मिन्कर्मणिब्रह्मविषयेचयज्ज्ञानंतत्रविमूढान्नष्टान्विद्धि ॥ ३२ ॥ ननुतर्हिमहाफलत्वादिंद्रियाणिनिगृह्य निष्कामाःसंतःसर्वेऽपिस्वधर्ममेव
किंनानुतिष्ठंतितत्राह।सदृशमिति। प्रकृतिःप्राचीनकर्मसंस्काराधीनस्वभावःस्वस्याःस्वकीयायाःप्रकृतेःस्वभावस्यसदृशमनुरूपमेवगुणदो
षज्ञानवानपिचेष्टते किंपुनर्वक्तव्यमज्ञश्चेष्टतइति तस्माद्भूतानिसर्वेऽपिप्राणिनः प्रकृतिंयांति। अनुवर्त्ततेएवंसतिइंद्रियनिग्रहःकिंकरिष्यति

प्रकृतेर्बलिष्ठत्वादित्यर्थः ॥ ३३ ॥ नन्वेवंप्रकृत्यधीनैवचेत्पुरुषस्यप्रवृत्तिःतर्हिविधिनिषेधवैयर्थ्यंप्राप्तमित्याशंक्याह । इंद्रियस्येंद्रियस्येति वीप्सयाप्रत्येकंसर्वेषामिंद्रियाणामित्युक्तम् अर्थेस्वस्वविषयेऽनुकूलेरागः प्रतिकूलेद्वेषश्चेत्येवंरागद्वेषौव्यवस्थितौ अवश्यंभाविनौ ततश्चतदनुरूपाप्रवृत्तिरितिभूतानांप्रकृतिः तथापितयोर्वशवर्त्तीनभवेदितिशास्त्रेणनियम्यते हियस्मात् अस्यमुमुक्षोः तौपरिपंथिनौप्रतिपक्षौ अयंभावः विषयस्मरणादिनारागद्वेषावुत्पाद्यानवहितंपुरुषमनर्थेऽपिगंभीरेस्त्रोतसीवप्रकृतिर्बलात्प्रवर्त्तयाति शास्त्रंतुततः प्रागेवविषयेषु रागद्वेषप्रतिबंधकेपरमेश्वरभजनादौप्रवर्त्तयाति गंभीरस्त्रोतःपातात्पूर्वमेवनावमाश्रितइवनानर्थंप्राप्नोतीति ॥ ३४ ॥ तदेवंस्वाभाविकींपश्वादिसदृशींप्रकृतिंत्यक्त्वास्वधर्मेप्रवर्तितव्यमित्युक्तं तर्हिस्वधर्मस्ययुद्धादेर्दुःखरूपस्ययथावत्कर्त्तुमशक्यत्वात्परधर्मस्यचअहिंसादेःसुकरत्वाद्धर्मत्वाविशेषाच्चतत्रप्रवर्तितुमिच्छतं प्रत्याह । श्रेयानिति । किंचिदंगहीनोऽपिस्वधर्मः श्रेयान् प्रशस्यतरः स्वनुष्ठितात्सर्वांगपूर्त्याकृतादपि परधर्मात्सकाशात् तत्रहेतुः स्वधर्मेयुद्धादौप्रवर्त्तमानस्यनिधनंमरणमपिश्रेष्ठम् स्वर्गादिप्रापकत्वात्।परधर्मस्तुस्वस्यभयावहःनिषिद्धत्वेननरकप्रापकत्वात् ३५ तयोर्नवशमागच्छेदित्युक्तंतदेतदशक्यंमन्वानोऽर्जुनउवाच।अथकेनेति।वृष्णेर्वंशेऽवतीर्णोवार्ष्णेयःहेवार्ष्णेय

**इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ॥ ३४ ॥**
**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥३५॥अर्जुन उ०॥अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः॥अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥३६॥**

अनर्थरूपंपापंकर्त्तुमनिच्छन्नपिकेनप्रयुक्तःप्रेरितोऽयंपूरुषःपापंचरति। कामक्रोधौविवेकबलेननिरुंधतोऽपिपुरुषस्यपुनःपापेप्रवृत्तिदर्शनादन्योऽपितयोर्मूलभूतःकश्चित्प्रवर्त्तकोभवेदितिसंभावनायांप्रश्नः ॥३६॥अत्रोत्तरम् श्रीभगवानुवाच।कामएषइति।यस्त्वयापृष्टोहेतुरेषकामएवनतुक्रोधोपिपूर्वंत्वयोक्तःइंद्रियस्येंद्रियस्येत्यत्र सत्यं नासौततःपृथक् किंतु क्रोधोप्येषएवकामएव केनचित्प्रतिहतःक्रोधात्मनापरिनमते अतःपूर्वंपृथक्त्वेनोक्तोऽपिक्रोधःकामजएवेत्यभिप्रायेणकामेनैकीकृत्योच्यते रजोगुणात्समुद्भवतीतितथा अनेनसत्त्ववृद्ध्यारजसिक्षयंनीतेसतिकामोऽपिक्षीयतइतिसूचितम् एनंकामंइहमोक्षमार्गेवैरिणंविद्धि अयंचवक्ष्यमाणक्रमेणहंतव्यएव यतोनासौदानेनसंधातुं शक्यइत्या

॥ श्रीभगवानुवाच ॥ काम एष क्रोध एष रजोगुणसमुद्भवः॥ महाशनो महापाप्मा विद्ध्येनमिहवैरिणम्॥ ३७॥ धूमेनाव्रियते वह्निर्यथाऽऽदर्शो मलेन च ॥ यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥
॥ ३८॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ॥ कामरूपेणकौंतेय दुष्पूरेणाऽनलेन च ॥ ३९ ॥

ह। महाशनःमहदशनंयस्य दुष्पूरइत्यर्थः नचसाम्नासंधातुंशक्यः यतोमहापाप्माअत्युग्रः ॥ ३७ ॥ कामस्यवैरित्वंदर्शयति। धूमेनेति।यथाधूमेनसहजेनवह्निराव्रियते आच्छाद्यते यथावाआदर्शोमलेनागंतुकेन यथाचउल्बेनगर्भवेष्टनचर्मणागर्भः सर्वतोनिरुद्ध्यावृतः तथाप्रकारत्रयेणापितेनकामेनावृतमिदम् ॥३८॥ इदंशब्दनिर्दिष्टंदर्शयन्वैरित्वंस्फुटयति। आवृतमिति। इदंतुविवेकज्ञानमेतेनावृतम् अज्ञस्यखलुभोगसमयेकामःसुखहेतुरेव परिणामेतुवैरितांप्रपद्यते ज्ञानिनःपुनःतत्कालमप्यनर्थानुसंधानाद्दुःखहेतुरेवेतिनित्यवैरिणेत्युक्तम्। किंच

स्मेमयानोच्यते हियस्मादिदमुत्तमंरहस्यम् ॥ ३ ॥भगवतोविवस्वंतंप्रतियोगोपदेशासंभवंपश्यन्नर्जुनउवाच।अपरमिति।अपरमर्वाचीनंतव जन्म परंप्राक्कालीनंविवस्वतोजन्म तस्मात्तवाधुनिकत्वाच्चिरंतनायविवस्वतेत्वमादौयोगंप्रोक्तवानित्येतत्कथमहंविजानीयांज्ञातुंशक्नुयाम् ॥ ४ ॥ इतिपृष्टवंतमर्जुनंरूपांतरेणोपदिष्टवानित्यभिप्रायेणोत्तरंश्रीभगवानुवाच।बहूनीति।ममबहूनिजन्मानितवचव्यतीतानि तानिसर्वाण्यहंवेदजानामि अलुप्तविद्याशक्तित्वात् त्वंतुनजानासि अविद्यावृतत्वात् ॥ ५ ॥ नन्वनादेस्तवकुतोजन्मअविनाशिनश्चकथंपुनर्जन्मये

॥ अर्जुन उवाच ॥ ॥अपरं भवतो जन्म परं जन्म विवस्वतः॥कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ४॥
॥श्रीभगवानुवाच ॥ ॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन॥तान्यहं वेद सर्वाणि नत्वं वेत्थ परंतप५॥
अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ॥ प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥

नबहूनिमेव्यतीतानीत्युच्यते ईश्वरस्यतवपुण्यपापविहीनस्यकथंजीववज्जन्मेत्यतआह । अजोऽपीति । सत्यमेवंतथापिअजोऽपिसन्नहंतथाव्ययात्मापिअनश्वरस्वभावोऽपिसन्तथाईश्वरोऽपिकर्मपारतंत्र्यरहितोऽपिसन्स्वमाययासंभवामि सम्यगप्रच्युतज्ञानबलवीर्यादिशक्त्यैव भवामि ननुतथापिषोडशकलात्मकलिंगदेहशून्यस्यतवकुतोजन्मेत्यतउक्तं स्वांशुद्धसत्वात्मिकांप्रकृतिमधिष्ठायस्वीकृत्यविशुद्धोर्जितसत्वमूर्त्यास्वेच्छयाअवतरामीत्यर्थः॥६॥कदासंभवसीत्यपेक्षायामाह॥यदायदेति।धर्मस्यग्लानिर्हानिःअधर्मस्यअभ्युत्थानमाधिक्यम्॥७॥

किमर्थमित्यपेक्षायामाह परित्राणायेति साधूनांस्वधर्मवर्तिनांरक्षणाय दुष्टंकर्मकुर्वंतीतिदुष्कृतस्तेषांवधायच एवंधर्मस्यसंस्थापनार्थाय साधुरक्षणेनदुष्टवधेनचधर्मंस्थिरीकर्तुंयुगेयुगेतत्तदवसरेसंभवामीत्यर्थः नचैवंदुष्टनिग्रहंकुर्वतोऽपिनैर्घृण्यंशंकनीयं यथाचाहुः “लालनेताडनेमातुर्नाकारुण्यंयथार्भके ॥ तद्वदेवमहेशस्यनियंतुर्गुणदोषयो”रिति ॥८॥एवंविधानामीश्वरजन्मकर्मणांज्ञानेफलमाह । जन्मकर्मेति । मे जन्मस्वेच्छाकृतंकर्मचधर्मपालनरूपंदिव्यमलौकिकंतत्त्वतः परानुग्रहार्थमेवेतियोवेत्तिसदेहाभिमानंत्यक्त्वापुनर्जन्मनैति । नप्राप्नोति । किंतुमामेवप्राप्नोति॥९॥कथंजन्मकर्मज्ञानेनत्वत्प्राप्तिः स्यादित्यत्राह । वीतरागेति । अहंशुद्धसत्वावतारैर्धर्मपरिपालनंकरोमीति । मदीयं

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥
जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥ ९ ॥
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ॥ बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

परमकारुणिकत्वंज्ञात्वा वीताविगतारागभयक्रोधायेभ्यस्ते विक्षेपाभावात् । मन्मयामदेकचित्ताभूत्वामामेवोपाश्रिताः संतोमत्प्रसादलभ्यंयदात्मज्ञानंचतपश्चतत्परिपाकहेतुःस्वधर्मःतयोर्द्वंद्वैकवद्भावः तेनज्ञानतपसापूताः शुद्धानिरस्ताज्ञानतत्कार्यमलाःसंतोमद्भावंमत्सायुज्यंप्राप्तावहवः नत्वधुनैवप्रवृत्तोऽयंमद्भक्तिमार्गइत्यर्थः तदेवंतान्यहंवेदसर्वाणीत्यादिनाविद्याविद्योपाधिभ्यांतत्त्वंपदार्थावीश्वरजीवौप्रदर्श्येश्वरस्यचाविद्याभावेन नित्यशुद्धत्वाज्जीवस्यचेश्वरप्रसादलब्धाज्ञाननिवृत्तेः शुद्धस्य सताश्चिदंशेनतदैक्यमुक्तमितिद्रष्टव्यम् ॥ १० ॥

विषयैःपूर्यमाणोऽपिदुष्पूरः अपूर्यमाणः शोकसंतापहेतुत्वादनलतुल्यः अनेनसर्वान्प्रातिनित्यवैरित्वमुक्तम् ॥ ३९ ॥ इदानींतस्याधिष्ठानंक
थयन्जयोपायमाह । इंद्रियाणीतिद्वाभ्याम्। विषयदर्शनश्रवणादिभिः । संकल्पेनाध्यवसायेनचकामस्याविर्भावादिंद्रियाणिचमनश्चबुद्धि
श्चास्याधिष्ठानमुच्यते एतैरिंद्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवेकज्ञानमावृत्यदेहिनंविमोहयति ॥ ४० ॥ यस्मादेवंतस्मात्त्वामि
ति । आदौविमोहात्पूर्वमेवइंद्रियाणिमनोबुद्धिंचनियम्यपापरूपमेनंकामंहिस्फुटंप्रजाहि घातय । यद्वा प्रजहिपरित्यज ज्ञानंआत्मविषयंवि
ज्ञानंशास्त्रीयंतयोर्नाशकं यद्वाज्ञानंशास्त्राचार्योपदेशजम् । विज्ञानंनिदिध्यासनजं तमेवधीरोविज्ञायप्रज्ञांकुर्वीतेतिश्रुतेः ॥४१॥ अथात्रप्रस

इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥ तस्मात्त्वमिं
द्रियाण्यादौ नियम्य भरतर्षभ॥पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥४१॥इंद्रियाणि पराण्याहुरिंद्रि
येभ्यः परं मनः॥मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥४२॥एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना॥

न्नतयाचित्तप्रणिधानेनइंद्रियाणिनियंतुंशक्यंते तदात्मस्वरूपंदेहादिभ्योविविच्यदर्शयाति । इंद्रियाणीति । इंद्रियाणिदेहादिभ्योग्राह्ये
भ्यःपराणिश्रेष्ठान्याहुः सूक्ष्मत्वात्प्रकाशकत्वाच्च अतएवतद्व्यतिरिक्तत्वमप्यर्थादुक्तंभवति।इंद्रियेभ्यश्चसंकल्पात्मकंमनःपरम् । तत्प्रवर्त्त
कत्वात् मनसस्तुबुद्धिर्निश्चयात्मिकापरा निश्चयपूर्वकत्वात्संकल्पस्य यस्तुबुद्धेःपरःतत्साक्षित्वेनावस्थितःसर्वांतरः सआत्माविमोहय
तिदेहिनामिति देहिशब्दोक्तआत्मासइतिपरामृश्यते ॥४२॥ उपसंहराति । एवमिति।बुद्धेरेवविषयेंद्रियादिजन्याःकामादिविक्रियाः आत्मा

तुनिर्विकारस्तत्साक्षीत्येवंबुद्धेःपरमात्मानंबुद्ध्वा आत्मनाएवंभूतनिश्चयात्मिकयाबुद्ध्यात्मानंमनःसंस्तभ्यानिश्चलंकृत्वाकामरूपंशत्रुंज
हिमारयदुरासदंदुःखेनासादनीयंदुर्विज्ञेयगतिमित्यर्थः ॥ ४३ ॥ स्वधर्मेणयमाराध्यभक्त्यामुक्तिमितानराः ॥ तंकृष्णंपरमानंदंतोषयेत्सर्वक
र्मभिः॥१॥इति सुबोधिन्यांटीकायांतृतीयोऽध्यायः॥३॥आविर्भावतिरोभावावाविष्कर्तुंस्वयंहरिः । तत्त्वंपदविवेकार्थंकर्मयोगंप्रशंसति ॥१॥
एवंतावदध्यायद्वयेनकर्मयोगोपायोज्ञानयोगोपायश्चमोक्षसाधनत्वेनउक्तः तमेवब्रह्मार्पणादिगुणविधानेनत्वंपदार्थविवेकादिनाचप्रपंचयिष्य

जहि शत्रुं महाबाहो कामरूपं दुरासदम्॥४३॥ ॥इति श्रीमद्भ०पनि०ब्रह्मवि० योगशास्त्रे श्रीकृष्णार्जुनसंवा
देकर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ श्रीभगवानुवाच ॥ ॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययम्॥ वि
वस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः ॥ स कालेनेह महता योगो
नष्टः परंतप॥२॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः॥भक्तोसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

न्प्रथमंतावत्परंपराप्राप्तत्वेनस्तुवन् श्रीभगवानुवाच।इममितित्रिभिः अव्ययफलत्वादव्ययं इमंयोगं पुराहंविवस्वतेआदित्यायकथितवान्
सचस्वपुत्रायमनवेश्राद्धदेवायप्राह।सचमनुःस्वपुत्रायेक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवमिति।राजानश्चतेऋषयश्चान्येऽपिराजर्षयोनिमिप्रमुखाःस्व
पुत्रादिभिरिक्ष्वाकुप्रमुखैःप्रोक्तमिमंयोगंविदुर्जानंतिस्म अद्यतनानामज्ञानेकारणमाह । हेपरंतप शत्रुतापन सयोगःकालवशादिहलोकेन
ष्टः विच्छिन्नः ॥ २ ॥ सएवायमिति सएवायंयोगोऽद्याविच्छिन्नेसंप्रदायेसातिपुनश्चमयातेतुभ्यमुक्तःयतस्त्वंममभक्तोऽसिसखाचेति । अन्य

ननुतर्हिकिंत्वय्यपिवैषम्यमस्ति। यस्मादेवंत्वदेकशरणानामेवात्मभावंददासिनान्येषांसकामानामित्यतआह । येयथेति। यथायेनप्रकारेण सकामतयानिष्कामतयावायेमांभजंतितानहंतथैवतदपेक्षितफलदानेनभजामि । अनुगृह्णामि । ननुयेसकामामांविहायेंद्रादीनेवभजन्तेतानहमुपेक्षइतिमंतव्यम् यतःसर्वशःसर्वप्रकारैःइंद्रादिसेवकाअपिममैववर्त्मभजनमार्गमनुवर्तंते इंद्रादिरूपेणापिममैवसेव्यत्वात् ॥ ११ ॥ तर्हिमोक्षार्थमेवकिमितिसर्वेत्वांनभजंतीत्यतआह । कांक्षंतइति । कर्मणांसिद्धिंफलंकांक्षंतः प्रायशः इहमनुष्यलोकेइंद्रादिदेवताएवयजंतेन तुसाक्षान्मामेव हियस्मात्कर्मजासिद्धिःकर्मजंफलंशीघ्रंभवति।नतुज्ञानफलंकैवल्यं दुष्प्राप्यत्वाज्ज्ञानस्य ॥१२॥ ननुकेचित्सकामतयाप्रव

ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् ॥ मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः ॥ ११ ॥
कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः ॥ क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥ तस्य कर्त्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

र्त्तंतेकेचिन्निष्कामतयेतिकर्मवैचित्र्यं तत्कर्तॄणांचब्राह्मणादीनामुत्तममध्यमादिवैचित्र्यंकुर्वतस्तवकथंवैषम्यंनास्तीत्याशंक्याह चातुर्वर्ण्यमितिचत्वारोवर्णाएवचातुर्वर्ण्यम् । स्वार्थेष्यञ्प्रत्ययः । अयमर्थःसत्वप्रधानाब्राह्मणास्तेषांशमदमादीनिकर्माणि सत्वरजःप्रधानाःक्षत्रियास्तेषांचशौर्ययुद्धादीनिकर्माणि रजस्तमःप्रधानावैश्यास्तेषांकृषिवाणिज्यादीनिकर्माणि तमःप्रधानाः शूद्रास्तेषांचत्रैवर्णिकशुश्रूषादिकर्माणीत्येवंगुणानांकर्मणांचविभागैश्चातुर्वर्ण्यंमयैवसृष्टमिति सत्यं तथाप्येवंतस्यकर्त्तारमपिफलतोऽकर्त्तारमेवमांविद्धि तत्रहेतुः अव्ययं

आसक्तिराहित्येनश्रमरहितंनाशादिरहितं ॥१३॥ तदेवदर्शयन्नाह।नमामिति। कर्माणिविसृष्ट्यादीन्यपिमांनलिंपंति आसक्तंनकुर्वंति निरहंकारत्वात्आप्तकामत्वेनममकर्मफलेस्पृहाभावाच्च मांनलिंपंतीतिकिंवक्तव्यं यतःकर्मफलेस्पृहाराहित्येनमांयोऽभिजानातिसोऽपिकर्मभिर्नबद्ध्यते ममनिर्लेपत्वंकारणंनिरहंकारत्वनिःस्पृहत्वादिकंजानतस्तस्याप्यहंकारादिशैथिल्यात् ॥१४॥ येयथामांप्रपद्यंतइत्यादिचतुर्भिःश्लोकैःप्रासंगिकमीश्वरस्यवैषम्यंपरिहृत्यपूर्वोक्तमेवकर्मयोगंप्रपंचयितुमनुस्मारयति । एवमिति अहंकारादिराहित्येनकृतंकर्मबंधकंनभव

न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा ॥ इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ॥ १४ ॥
एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मात्त्वं पूर्वैःपूर्वतरं कृतम् ॥ १५ ॥ किं कर्म
किमकर्मेति कवयोऽप्यत्र मोहिताः ॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥
कर्मणोह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ॥ अकर्मणश्च बोद्धव्यं गहना कर्मणोगतिः ॥ १७ ॥

तीत्येवंज्ञात्वापूर्वैर्जनकादिभिरपिमुमुक्षुभिःसत्त्वशुद्ध्यर्थंपूर्वतरंयुगांतरेष्वपिकृतम् तस्मात्त्वमपिप्रथमंकर्मैवकुरु॥१५॥तच्चतत्त्वविद्भिःसह विचार्यकर्त्तव्यंनलोकपरंपरामात्रेणेत्याह।किंकर्मेति। किंकर्मकीदृशंकर्मकरणं किमकर्मकीदृशंकर्माकरणमित्येतस्मिन्नर्थेविवेकिनोऽपिमोहिताः अतोयज्ज्ञात्वानुष्ठायअशुभात्संसारान्मोक्ष्यसे मुक्तोभविष्यसितत्कर्माकर्मचतुभ्यमहंप्रवक्ष्यामिशृणु ॥ १६ ॥ ननुलोकप्रसिद्धमेव कर्मदेहादिव्यापारात्मकं अकर्मचतदव्यापारात्मकं अतःकथमुच्यतेकवयोऽप्यत्रमोहंप्राप्ताइतितत्राह । कर्मणइति । कर्मणोविहितव्यापा

रस्यापितत्त्वंबोद्धव्यमस्ति नतुलोकप्रसिद्धमात्रमेव अकर्मणोऽविहितव्यापारस्यापितत्त्वंबोद्धव्यमस्ति । विकर्मणोऽपिनिषिद्धस्यापितत्त्वंबोद्धव्यमस्ति यतःकर्मणोगतिर्गहना कर्मणइत्युपलक्षणार्थम् कर्माकर्मविकर्मणांतत्त्वंबोद्धव्यमस्ति यतः दुर्विज्ञेयमित्यर्थः ॥ १७॥ तदेवंकर्मादीनांदुर्विज्ञेयत्वंदर्शयन्नाह । कर्मण्यकर्मेति । परमेश्वराराधनलक्षणेकर्मणिविषयेअकर्मकर्मेदंनभवतीतियःपश्येत्तस्यज्ञानहेतुत्वेनबंधनत्वाभावात् । अकर्मणिचविहिताकरणेकर्मयःपश्येत्तस्य प्रत्यवायोत्पादकत्वेनबंधहेतुत्वात् मनुष्येषुकर्मकुर्वाणेषुसबुद्धिमान्व्यवसायात्मकबुद्धिमत्त्वाच्छ्रेष्ठः तंस्तौति सयुक्तःयोगी तेनकर्मणाज्ञानयोगावाप्तेः सएवकृत्स्नकर्मकर्ताच सर्वतःसंप्लुतोदकस्थानीयेतस्मिन्कर्मणिसर्वकर्मफलानामंतर्भूतत्वात् तदेवमारुरुक्षोःकर्मयोगाधिकारावस्थायांनकर्मणामनारंभादित्यादिनोक्तएवकर्मयोगःस्फुटीकृतःतत्प्र

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तःकृत्स्नकर्मकृत्॥१८॥

पंचरूपत्वाच्चास्यप्रकरणस्यनपौनरुक्त्यदोषःअनेनैवयोगारूढावस्थायांयस्त्वात्मरतिरेवस्यादित्यादिनायःकर्मानुपयोगउक्तस्तस्याप्यर्थात्प्रपंचःकृतोवेदितव्यः यदाआरुरुक्षोरपिकर्मबंधकंनभवति तदारूढस्यकुतोबंधकंस्यादित्यत्रापिश्लोकोयोज्यते यद्वा कर्मणिदेहेंद्रियादिव्यापारेवर्तमानेऽप्यात्मनोदेहादिव्यतिरेकानुभवेनाकर्मस्वाभाविकंनैष्कर्म्यमेवयःपश्येत् तथाकर्माणिचज्ञानरहितेदुःखबुद्ध्याकर्मणांत्यागेनकर्मयःपश्येत् तस्यप्रतिबंधकत्वेनमिथ्याचारत्वात् तदुक्तं कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन्निति यएवंभूतःसतुसर्वेषुमनुष्येषुबुद्धिमान्पंडितः तत्रहेतुः यतःकृत्स्नानिसर्वाणियदृच्छयाप्राप्तान्याहारादीनिकर्माणिकुर्वन्नपिसयुक्तएवाकर्त्रात्मज्ञानेनसमाधिस्थएवेत्य

र्थः अनेनैवज्ञानिनःस्वभावादापन्नंकलंजभक्षणादिकंनदोषाय अज्ञस्यतुरागतःकृतंदोषायेतिविकर्मणोऽपितत्त्वंनिरूपितंद्रष्टव्यं॥१८॥कर्मण्यकर्मयःपश्येदितिश्रुत्यर्थार्थापत्तिभ्यांयदुक्तमर्थद्वयंतदेवस्पष्टयाति यस्येत्यादिपंचभिः सम्यगारभ्यंतइतिसमारंभाःकर्माणि काम्यतइतिकामःफलंतत्संकल्पेनवर्जितायस्यभवंतितंपंडितमाहुः तत्रहेतुः यतस्तैःसमारंभैःशुद्धचित्तेसतिजातेनज्ञानाग्निनादग्धानिअकर्मतांनीतानिकर्माणियस्यतं आरूढावस्थायांतुकामःफलविषयस्तदर्थमिदंकर्मकर्तव्यमितिकर्मविषयः संकल्पश्चताभ्यांवर्जितःशेषंस्पष्टम्॥१९॥

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥ १९ ॥
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः॥कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः॥२०॥
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥ शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

किंचत्यक्त्वेति । कर्मणितत्फलेचासक्तिंत्यक्त्वानित्येनानिजानंदेनतृप्तःअतएवयोगक्षेमार्थमाश्रयणीयरहितःएवंभूतोयःस्वाभाविकेविहितेच कर्मणिअभितःप्रवृत्तोऽपिकिंचिदपिनैवकरोति ॥तस्यकर्माकर्मतामापद्यतइत्यर्थः॥२०॥किंचनिराशीरितिनिर्गताआशिषःकामनायस्मात् यतांनियतंचित्तंआत्माचशरीरंयस्य त्यक्तःसर्वपरिग्रहायेनसः शारीरंशरीरमात्रनिर्वर्त्यंकर्तृत्वाभिनिवेशरहितंकर्मकुर्वन्नपिकिल्बिषंबंधनं नप्राप्नोति।योगारूढपक्षेशरीरनिर्वाहमात्रोपयोगिस्वाभाविकभिक्षाटनादिकर्मकुर्वन्नपिकिल्बिषंविहिताकरणनिमित्तंदोषंनप्राप्नोतीति २१॥

किंच यदृच्छेति । अप्रार्थितोलाभोयदृच्छालाभः तेनसंतुष्टः द्वंद्वानिशीतोष्णादीन्यतीतः अतिक्रांतः तत्सहनशीलइत्यर्थः । विमत्सरोनिर्वैरः यदृच्छालाभस्यापिसिद्धावसिद्धौचसमःहर्षविषादरहितः यएवंभूतः सपूर्वोत्तरभूमिकयोर्यथायथंविहितंस्वाभाविकंवाकर्मकृत्वाऽपिनवंधंप्राप्नोति ॥२२॥ किंच गतसंगस्येति।गतसंगस्य निष्कामस्यरागादिभिर्मुक्तस्य ज्ञानेवस्थितंचेतोयस्य यज्ञायपरमेश्वरार्थंकर्माचरतःसतःसमग्रंसवासनंकर्मप्रविलीयते अकर्मभावमापद्यते आरूढयोगपक्षेयज्ञायेति । यज्ञसंरक्षणार्थंलोकसंग्रहार्थमेवकर्मकुर्वतइत्यर्थः

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः॥समः सिद्धावसिद्धौ च कृत्वाऽपि न निबद्ध्यते ॥२२॥
गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञायाचरतःकर्म समग्रं प्रविलीयते ॥ २३ ॥
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

॥२३॥तदेवंपरमेश्वराराधनलक्षणंकर्मज्ञानहेतुत्वेनवंधकत्वाभावादकर्मैव आरूढावस्थायांत्वकर्त्रात्मज्ञानेनबाधितत्वात्स्वाभाविकमपिकर्माकर्मैवेति । कर्मण्यकर्मयःपश्येदित्यनेनोक्तःकर्मप्रविलयःप्रपंचितः । इदानींकर्माणितदंगेषुचब्रह्मैवानुस्यूतंपश्यतः कर्मप्रविलयमाह।ब्रह्मार्पणमिति । अर्प्यतेऽनेनेत्यर्पणंस्रुवादितदपिब्रह्मैव । अर्प्यमाणंहविरपिघृतादिकंब्रह्मैवब्रह्मैवाग्निस्तस्मिन्ब्रह्मणाकर्त्राचहुतंब्रह्मैव होमः अग्निश्चकर्ताचक्रियाचब्रह्मैवेत्यर्थः । एवंब्रह्मण्येवकर्मात्मकेसमाधिश्चित्तैकाग्र्यंयस्यतेनब्रह्मैवगंतव्यंप्राप्यंनतुफलांतरमित्यर्थः ॥ २४ ॥

एतदेवयज्ञत्वेनसम्पादितंसर्वंत्रब्रह्मदर्शनलक्षणंज्ञानं सर्वयज्ञोपायप्राप्यत्वात्सर्वयज्ञेभ्यः श्रेष्ठमित्येवंस्तोतुमधिकारिभेदेनज्ञानोपायभूता
न्बहून्यज्ञानाह दैवमित्यष्टभिः। देवाइंद्रवरुणादयइज्यंतेयस्मिन् एवकारेणेंद्रादिब्रह्मबुद्धिराहित्यंदर्शितं तंदैवंयज्ञं अपरेकर्मयोगिनःपर्यु
पासतेश्रद्धयाऽनुतिष्ठंति। अपरेतुज्ञानयोगिनः ब्रह्मरूपेऽग्नौयज्ञेनैवोपायभूतेनब्रह्मार्पणमित्युक्तप्रकारेणयज्ञमुपजुह्वति यज्ञादिसर्वकर्माणि
प्रविलापयंतीत्यर्थः।सोऽयंज्ञानयज्ञः॥ २५ ॥ श्रोत्रादीनीति।अन्येनैष्ठिकब्रह्मचारिणस्तत्तदिंद्रियसंयमरूपेष्वग्निषुश्रोत्रादीनिजुह्वति प्रविला
पयंतिइंद्रियाणिनिरुद्ध्यसंयमप्रधानास्तिष्ठंतीत्यर्थः। इंद्रियाण्येवाग्नयस्तेषुशब्दादीनन्येगृहस्थाजुह्वतिविषयान् भोगसमयेऽप्यनासक्ताः

दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥ श्रोत्रा
दीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ॥ शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति ॥ २६ ॥
सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ॥ आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

संतोऽग्नित्वेनभावितेष्विंद्रियेषुहविष्ट्वेनभावितान्शब्दादीन्प्रक्षिपंतीत्यर्थः॥२६॥ सर्वाणीति।अपरेध्याननिष्ठाःबुद्धींद्रियाणांश्रोत्रादीनांकर्मा
णिश्रवणदर्शनादीनि। कर्मेन्द्रियाणांवाक्पाण्यादीनांकर्माणिवचनोपादानादीनिच प्राणानांदशानांकर्माणि प्राणस्यबहिर्गमनं अपान
स्याधोनयनम् व्यानस्यव्यानयनाकुंचनप्रसारणादि समानस्याशितपीतादीनांसम्यगुन्नयनम् उदानस्योर्ध्वनयनम् "उद्गारेनाग
आख्यातः कूर्मउन्मीलनेस्मृतः॥कृकरःक्षुतकृज्ज्ञेयोदेवदत्तोविजृंभणे॥नजहातिमृतंवापिसर्वव्यापीधनंजयः॥"इत्येवंरूपाणिजुह्वति। कआ

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्च यतयःसंशितव्रताः ॥ २८ ॥
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ॥ प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥
अपरे नियताहाराःप्राणान्प्राणेषु जुह्वति ॥ सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

त्मनिसंयमोध्यानैकाग्र्यंसएवयोगः सएवाग्निस्तस्मिन्ज्ञानेनध्येयविषयेणदीपितेप्रज्वलिते ध्येयंसम्यग्ज्ञात्वातस्मिन्मनः संयम्यतानिसर्वाणिकर्माण्युपरमयतीत्यर्थः ॥ २७ ॥ किंच द्रव्येति । द्रव्यदानमेवयज्ञोयेषांतेद्रव्ययज्ञाः कृच्छ्रचांद्रायणादितपएवयज्ञोयेषांतेतपोयज्ञाः योगश्चित्तवृत्तिनिरोधलक्षणःसमाधिःसएवयज्ञोयेषांतेयोगयज्ञाः । स्वाध्यायेनवेदेनश्रवणमननादिनायत्तदर्थज्ञानंतदेवयज्ञोयेषांते अथवा वेदपाठयज्ञास्तदर्थज्ञानयज्ञाश्चेतिद्विविधाः यतयःप्रयत्नशीलाः सम्यक्शितंनिशितंतीक्ष्णीकृतंव्रतंयेषांते ॥ २८ ॥ किंच अपानइति । अपानेअधोवृत्तौप्राणमूर्ध्ववृत्तिंपूरकेणजुह्वति । पूरककालेप्राणमपानेनैकीकुर्वंति तथाकुंभकेनप्राणापानयोरूर्ध्वाधोगतीरुद्ध्वारेचककालेअपानंप्राणेजुह्वति एवंपूरककुंभकरेचकैःप्राणायामपरायणाअपरेइत्यर्थः ॥२९ ॥ किंचअपरेइति । अपरेत्वाहारसंकोचमभ्यस्यंतः स्वयमेवजीर्यमाणेष्विन्द्रियेषुतत्तादिंद्रियवृत्तिलयंहोमंभावयंतीत्यर्थः । यद्वा अपाने जुह्वतिप्राणंप्राणेऽपानंतथापरइत्यनेनपूरकरेचकयोरावर्त्यमानयोर्हंसः सोहमित्यनुलोमतः प्रतिलोमतश्चाभिव्यज्यमानेनाजपामंत्रेणतत्त्वंपदार्थैक्यंव्यातिहारेणभावयंतीत्यर्थः । तदुक्तंयोगशास्त्रे।“सकारेणवाहिर्यातिहकारेणविशेत्पुनः ॥ प्राणस्तत्रसएवाहंहंसइत्यनुचिंतयेदि”ति । प्राणापानगतीरुद्ध्वेत्यनेनतुश्लोकेनप्राणायामयज्ञाःअपरैःक

थ्यंतेतत्रायमर्थः“द्वौभागौपूरयेदन्नैस्तोयेनैकंप्रपूरयेत्॥मारुतस्यप्रचारार्थंचतुर्थमवशेषयेदि” त्येवमादिवचनोक्तोनियत आहारोयेषांतेकुंभकेनप्राणापानगतीरुद्ध्वाप्राणायामपरायणाःसंतःप्राणानिंद्रियाणिप्राणेषुजुह्वति कुंभकेहिसर्वेप्राणाएकीभवंतीतितत्रैवलीयमानेष्विंद्रियेषुहोमंभावयंतीत्यर्थः।तदुक्तंयोगशास्त्रे“यथायथासदाभ्यासान्मनसःस्थिरताभवेत्॥वायुवाक्कायदृष्टीनांस्थिरताचतथातथे”ति।तदेवमुक्तानांद्वादशानांयज्ञविदांफलमाह।सर्वइति।यज्ञान्विदंतिलभंतइतियज्ञविदः यज्ञज्ञाइतिवा यज्ञैःक्षपितंनाशितंकल्मषंयैस्ते॥३०॥यज्ञशिष्टेति।यज्ञान्कृत्वावशिष्टेकालेऽनिषिद्धमन्नममृतरूपंभुंजतइतितथातेसनातनंनित्यंब्रह्मज्ञानद्वारेणप्राप्नुवंति।तदकरणेदोषमाह।नायंलोकइति।अयमल्प

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनम् ॥ नायं लोकोस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥ कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

सुखोऽपिमनुष्यलोकः अयज्ञस्ययज्ञानुष्ठानशून्यस्यनास्ति कुतोऽन्यः परलोकः अतोयज्ञाःसर्वथाकर्त्तव्याइत्यर्थः ॥ ३१ ॥ ज्ञानयज्ञंस्तोतुमुक्तान्यज्ञानुपसंहरति।एवमिति।ब्रह्मणोवेदस्यमुखेविततावेदेनसाक्षाद्विहिताइत्यर्थः।तथापितान्सर्वान्वाङ्मनःकायकर्मजनितानात्मस्वरूपसंस्पर्शरहितान्विद्धि जानीहि आत्मनःकर्मागोचरत्वादेवंज्ञात्वाज्ञाननिष्ठःसन्संसाराद्विमुक्तोभविष्यसि ॥ ३२ ॥ कर्मयज्ञाज्ज्ञानयज्ञस्तुश्रेष्ठइत्याह। श्रेयानिति । द्रव्यमयादनात्मव्यापारजन्याद्दैवादियज्ञाज्ज्ञानयज्ञःश्रेयाञ्छ्रेष्ठःयद्यपिज्ञानयज्ञस्यापिमनोव्यापाराधीनत्वम

स्त्येव तथाप्यात्मरूपस्यज्ञानस्यमनःपरिणामेऽभिव्यक्तिमात्रं नतुतज्जन्यत्वमितिद्रव्यमयाद्विशेषः श्रेष्ठत्वेहेतुः सर्वंकर्माखिलंफलसहितंज्ञानेपरिसमाप्यते अंतर्भवतीत्यर्थः“सर्वंतदभिसमेतियत्किंचित्प्रजाःसाधुकुर्वंती”तिश्रुतेः॥३३॥एवंभूतात्मज्ञानेसाधनमाह।तद्विद्धीति। तज्ज्ञानंविद्धिप्राप्नुहि ज्ञानिनांप्रणिपातेनदंडवन्नमस्कारेण ततःपरिप्रश्नेन कुतोऽयंममसंसारःकथंवानिवर्त्ततइतिप्रश्नेन सेवयाशुश्रूषयाच ज्ञानिनःशास्त्रज्ञास्तत्त्वदर्शिनःअपरोक्षानुभवसंपन्नाश्चतेतुभ्यंज्ञानमुपदेशेनसंपादयिष्यंति ॥३४॥ ज्ञानफलमाह यज्ज्ञात्वेतिसार्द्धैस्त्रिभिः। यज्ज्ञानंज्ञात्वाप्राप्यपुनर्बंधुवधादिनिमित्तंमोहंनप्राप्स्यसि तत्रहेतुः।येनज्ञानेनभूतानिपितृपुत्रादीनिस्वाविद्यारचितानिस्वात्मन्येवाभेदेनद्रक्ष्यासि अथोअनंतरमात्मानंमयिपरमात्मन्येवाभेदेनद्रक्ष्यसीत्यर्थः ॥ ३५ ॥ किंच अपिचेदिति सर्वेभ्यःपापकारिभ्योयद्यपिअतिशयेन पापकारीत्वमसि तथापिसर्वंपापसमुद्रंज्ञानपोतेनैवसम्यगनायासेनतरिष्यसि ॥ ३६ ॥ समुद्रवत्स्थितस्यैवपापस्यातिलंघनमात्रंनतुपापस्यनाशइतिभ्रांतिंदृष्टांतेनवारयन्नाह । यथेति एधांसिकाष्ठानिप्रदीप्तोऽग्निर्यथाभस्मीभावंनयाति तथाआत्मज्ञानरूपोऽग्निःप्रारब्धकर्मव्यतिरिक्तानिसर्वाणिकर्माणिभस्मीकरोतीत्यर्थः ॥ ३७ ॥

तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया।उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शिनः३४यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपांडव।येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि३५अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः।सर्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसि३६यथैधांसिसमिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा॥

तत्रहेतुमाह।नहीति।पवित्रंशुद्धिकरमिहतपोयोगादिषुमध्येज्ञानतुल्यंनास्त्येव।तर्हिसर्वेऽप्यात्मज्ञानमेवकिंनाभ्यस्यंतीत्यतआह तत्स्वयमितिसार्द्धेन । तदात्मविषयंज्ञानंकालेनमहताकर्मयोगेनसंसिद्धोयोग्यतांप्राप्तःसन्स्वयमेवानायासेनलभते नतुकर्मयोगंविनेत्यर्थः ॥ ३८ ॥ किंचश्रद्धावानिति।श्रद्धावान्गुरूपदिष्टेऽर्थेआस्तिक्यबुद्धिमान् तत्परस्तदेकनिष्ठःसंयतेंद्रियश्चतज्ज्ञानंलभते नान्यः।अतःश्रद्धादिसंपत्त्याज्ञानलाभात्प्राक्कर्मयोगएवशुद्धयर्थमनुष्ठेयःज्ञानलाभानंतरंतुनतस्यकिंचित्कृत्यमस्तीत्याह ज्ञानंलब्ध्वात्वचिरेणपरांशांतिंमोक्षंप्राप्नोति॥३९॥

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥ तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति ॥ ३८ ॥
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः॥ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति॥नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥
योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ॥ आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥

ज्ञानाधिकारिणमुक्त्वातद्विपरीतमनधिकारिणमाह । अज्ञश्चेति।अज्ञोगुरूपदिष्टार्थानभिज्ञःकथंचिज्ज्ञानेजातेप्यश्रद्दधानश्चजातायामपिश्रद्धायांममेदंसिद्धयेद्वानवेतिसंशयाक्रांतचित्तश्चनश्यति स्वार्थाद्भ्रश्यति एतेषुत्रिष्वपिसंशयात्मासर्वथानश्यतियतस्तस्यायंलोकोनास्तिधनार्जनविवाहाद्यसिद्धेः नचपरलोकः धर्मस्यानिष्पत्तेः नचसुखं संशयेनैवभोगस्याप्यसंभवात् ॥ ४० ॥ अध्यायद्वयोक्तांपूर्वापरभूमिकाभेदेनकर्मज्ञानमयींद्विविधांब्रह्मनिष्ठामुपसंहरति योगेतिद्वाभ्याम् । योगेनपरमेश्वराराधनरूपेणतस्मिन्संन्यस्तानिसमर्पितानिकर्माणियेनतम्

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥
इति श्रीमद्भग० ज्ञानयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥ अर्जुन उवाच ॥ संन्यासं कर्मणां कृष्ण
पुनर्योगं च शंससि ॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥ श्रीभगवानुवाच ॥
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥ २ ॥

पुरुषंकर्माणिस्वफलैर्ननिबध्नंति अतश्चज्ञानेनाकर्त्रात्मबोधेनसंछिन्नःसंशयोदेहाद्यभिमानलक्षणोयस्यतंचात्मवंतमप्रमादिनंकर्माणिलोकसंग्रहार्थानिस्वाभाविकानिवानानिबध्नंति ॥ ४१ ॥ तस्मादिति । यस्मादेवंतस्मादात्मनोऽज्ञानेनसंभूतंहृदिस्थितमेनंसंशयंशोकादिनिमित्तंदेहात्माविवेकज्ञानखड्गेनाछित्त्वापरमात्मज्ञानोपायभूतंकर्मयोगमातिष्ठाश्रय तत्रचप्रथमंप्रस्तुताययुद्धायोत्तिष्ठ।हेभारत क्षत्रियत्वेनयुद्धस्यस्वधर्मत्वंदर्शितम् ॥४२॥ पुमवस्थादिभेदेनकर्मज्ञानमयीद्विधा॥निष्ठोक्तायेनतंवंदेशौरिंसंशयसंछिदम् ॥ १ ॥ इतिसुबोधिन्यांटीकायांचतुर्थोऽध्यायः॥४॥निवार्यसंशयंजिष्णोःकर्मसंन्यासयोगयोः ॥ जितेंद्रियस्यचयतेःपंचमेमुक्तिमब्रवीत् ॥१॥ अज्ञानसंभूतंसंशयंज्ञानासिनाछित्त्वा कर्मयोगमातिष्ठेत्युक्तंतत्रपूर्वापरविरोधंमन्वानोर्जुनउवाच । संन्यासमिति । यस्त्वात्मरतिरेवस्यादित्यादिनासर्वंकर्माखिलंपार्थेत्यादिनाच ज्ञानिनःकर्मसंन्यासंकथयसि ज्ञानासिनासंशयंछित्त्वायोगमातिष्ठेतिपुनर्योगंचकथयसि नचकर्मसंन्यासःकर्मयोगश्चैकस्यैकदैवसंभवतः विरुद्धस्वरूपत्वात् तस्मादेतयोर्मध्येएकस्मिन्ननुष्ठातव्येसतिममयच्छ्रेयःश्रेष्ठंसुनिश्चितंतदेकंब्रूहि ॥१ ॥ अत्रोत्तरंश्रीभगवानुवाच।संन्यास

इति।अयंभावः।नहिवेदांतवेद्यात्मतत्त्वविदंप्रतिकर्मयोगमहंब्रवीमि यतःपूर्वोक्तेनसंन्यासेनविरोधःस्यात् । अपितुदेहात्माभिमानिनंत्वांबंधुवधादिनिमित्तशोकमोहादिकृतमेनंसंशयंदेहात्माविवेकज्ञानासिनाच्छित्त्वापरमात्मज्ञानोपायभूतंकर्मयोगमातिष्ठेतिब्रवीमि । कर्मयोगेनशुद्धचित्तस्यचात्मतत्त्वज्ञानेजातेसतितत्परिपाकार्थंज्ञाननिष्ठांगत्वेनसंन्यासःपूर्वमुक्तः एवंसत्यंगप्रधानयोर्विकल्पायोगात्संन्यासःकर्मयोगश्चेत्येतावुभावपिभूमिकाभेदेनसमुच्चितावेवनिःश्रेयसंसाधयतः तथाऽपितुतयोर्मध्येकर्मसंन्यासात्सकाशात्कर्मयोगोविशिष्टोभवति ॥ २ ॥ कुतइत्यपेक्षायांसंन्यासित्वेनकर्मयोगंस्तुवंस्तस्यश्रेष्ठत्वंदर्शयति।ज्ञेयइति । रागद्वेषादिराहित्येनपरमेश्वरार्थंकर्माणियोनुतिष्ठतिसनित्यंकर्मानुष्ठा

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते॥३॥सांख्ययोगौ
पृथग्बालाःप्रवदंति न पंडिताः॥एकमप्यास्थितःसम्यगुभयोर्विंदते फलम्॥४॥

नकालेऽपिसंन्यासीत्येवज्ञेयः।तत्रहेतुः। निर्द्वंद्वोरागद्वेषादिशून्योहिशुद्धचित्तोज्ञानद्वारासुखमनायासेनसंसारात्प्रमुच्यते ॥३ ॥ यस्मादेवमंगप्रधानत्वेनोभयोरवस्थाभेदेनक्रमसमुच्चयः अतोविकल्पमंगीकृत्योभयोःकःश्रेष्ठइतिप्रश्नोऽज्ञानिनामेवोचितोनविवेकिनामित्याह । सांख्ययोगाविति । सांख्यशब्देनज्ञाननिष्ठावाचिनातदंगंसंन्यासंलक्षयति संन्यासकर्मयोगावेकफलौसंतौपृथक्स्वतंत्राविितिबालाः अज्ञाएवप्रवदंतिनतुपंडिताः।तत्रहेतुः। अनयोरेकमपिसम्यगास्थितआश्रितःसन्नुभयोरपिफलंप्राप्नोति तथाहिकर्मयोगंसम्यगनुतिष्ठन्शुद्धचित्तःसन्ज्ञानद्वारायदुभयोःफलंकैवल्यंविंदति संन्यासंसम्यगास्थितोऽपिपूर्वमनुष्ठितस्यकर्मयोगस्यापिपरंपरयाज्ञानद्वारायदुभयोःफलंकैवल्यंतद्विंदतीतिनपृथक्फलत्वमनयोरित्यर्थः ॥ ४ ॥

यत्सांख्यैःप्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति॥५॥
संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥ योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥ ६ ॥
योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥ ७ ॥

एतदेवस्फुटयति । यत्सांख्यैरिति । सांख्यैर्ज्ञाननिष्ठैःसंन्यासिभिर्यत्स्थानंमोक्षाख्यंप्रकर्षेणसाक्षादवाप्यते योगैरित्यत्रअर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययोद्रष्टव्यः तेनकर्मयोगिभिरपितदेवज्ञानद्वारेणगम्यतेअवाप्यतइत्यर्थः अतःसांख्यंचयोगंचैकफलत्वेनैकंयःपश्यतिसएवसम्यक्पश्यति ॥५॥ यदिकर्मयोगिनोऽप्यंततःसंन्यासेनैवज्ञाननिष्ठातर्हिआदितएवसंन्यासःकर्तुंयुक्तइतिमन्वानंप्रत्याह । संन्यासइति। अयोगतःकर्मयोगंविनासंन्यासःप्राप्तुंदुःखंदुःखहेतुः अशक्यइत्यर्थः। चित्तशुद्ध्यभावेनज्ञाननिष्ठायाअसंभवात्।योगयुक्तस्तुशुद्धचित्ततयामुनिःसंन्यासीभूत्वाऽचिरेणैवब्रह्माधिगच्छति अपरोक्षंजानाति।अतश्चित्तशुद्धेःप्राक्कर्मयोगएवसंन्यासाद्विशिष्यतेइतिपूर्वोक्तंसिद्धम्। तदुक्तंवार्तिककृद्भिः। "प्रमादिनोबहिश्चित्ताःपिशुनाःकलहोत्सुकाः। संन्यासिनोऽपिदृश्यंतेदैवसंदूषिताशयाः"इति ॥६॥ कर्मयोगादिक्रमेणब्रह्माधिगमेसत्यपितदुपरितनेनकर्मणाबंधःस्यादेवेत्याशंक्याह। योगयुक्तइति। योगेनयुक्तोऽतोविशुद्धआत्माचित्तंयस्यातएवविजितआत्माशरीरंयेन अतएवविजितानींद्रियाणियेन ततश्चसर्वेषांभूतानामात्मभूतआत्मायस्य सःलोकसंग्रहार्थंस्वाभाविकंवाकर्मकुर्वन्नपिनलिप्यते तैर्नबध्यते॥७॥

कर्मकुर्वन्नपिनालिप्यतइत्येतद्विरुद्धमित्याशंक्यकर्तृत्वाभिमानाभावान्नविरुद्धमित्याह नैवेतिद्वाभ्याम् कर्मयोगेनयुक्तःक्रमेणतत्त्वविद्भूत्वादर्शनश्रवणादीनिकुर्वन्नपि इंद्रियाणींद्रियार्थेषुवर्ततइतिधारयन्बुद्ध्यानिश्चित्यकिंचिदप्यहंनकरोमीतिमन्येतमन्यते । तत्रदर्शनश्रवणस्पर्शनावघ्राणाशनानिचक्षुरादिज्ञानेंद्रियव्यापाराः गतिःपादयोः स्वापोबुद्धेः श्वासःप्राणस्य प्रलपनंवागिंद्रियस्य विसर्गःपायूपस्थयोर्ग्रहणंहस्तयोःउन्मेषणनिमेषणेकूर्माख्यप्राणस्येतिविवेकः।एतानिकर्माणिकुर्वन्नपिअनभिमानात्ब्रह्मविन्नलिप्यतेतथाचपारमर्षसूत्रं“तदधिगमउत्त

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्॥पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्छ्वसन्॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषु वर्त्तंत इति धारयन् ॥ ९ ॥
ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा॥१०॥
कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ॥ योगिनःकर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥ ११ ॥

रपूर्वार्द्धयोरसंश्लेषविनाशौतद्व्यपदेशादि”ति॥८॥९॥तर्हियस्यकरोमीत्यभिमानोस्तितस्यकर्मलेपोदुर्वारोऽविशुद्धचित्तत्वात् संन्यासोपि नास्तीतिमहत्संकटमापन्नमित्याशंक्याह।ब्रह्मणीति।ब्रह्मण्याधायपरमेश्वरेसमर्प्यतत्फलेचसंगंत्यक्त्वायःकर्माणिकरोति असौपापेनबंधहेतुतयापापिष्ठेनपुण्यपापात्मकेनकर्मणानलिप्यते यथापद्मपत्रमंभसिस्थितमप्यंभसानलिप्यतेतद्वत् ॥ १० ॥ बंधकत्वाभावमुक्त्वामोक्षहेतुत्वंसदाचारेणदर्शयति।कायेनेति।कायेनस्नानादिमनसाध्यानादिबुद्ध्यातत्त्वनिश्चयादिकेवलैः कर्माभिनिवेशरहितैरिंद्रियैश्चश्रवणकीर्तना

दिलक्षणंकर्मफलसंगंत्यक्त्वाचित्तशुद्ध्येकर्मयोगिनःकर्मकुर्वंति ॥११॥ ननुतेनैवकर्मणाकश्चिन्मुच्यतेकश्चिद्बध्यतइतिव्यवस्थाकथमत
आह।युक्तइति। युक्तःपरमेश्वरैकनिष्ठःसन्कर्मणांफलंत्यक्त्वाकर्माणिकुर्वन्नात्यंतिकींशांतिंमोक्षंप्राप्नोतिअयुक्तस्तुबहिर्मुखःकामकारेणकाम
तःप्रवृत्त्याफलेआसक्तोनितरांबंधंप्राप्नोति॥१२॥ एवंतावच्चित्तशुद्धिशून्यस्यसंन्यासात्कर्मयोगोविशिष्यतइत्येतत्प्रपंचितम् इदानींशुद्धचि
त्तस्यसंन्यासः श्रेष्ठइत्याह।सर्वकर्माणीति। वशीयतचित्तः सर्वाणिकर्माणिविक्षेपकाणिमनसाविवेकयुक्तेनसंन्यस्यसुखंयथाभवत्येवंज्ञाननि
ष्ठःसन्नास्ते। क्वास्तइत्यतआह।नवद्वारे नेत्रेनासिकेकर्णौमुखंचेतिसप्तशिरोगतानि अधोगतेद्वेपायूपस्थरूपे इत्येवंनवद्वाराणियस्मिंस्तस्मि

युक्तःकर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् ॥ अयुक्तःकामकारेण फले सक्तो निबद्ध्यते ॥१२॥
सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥ नवद्वारे पुरे देही नैव कुर्वन्नकारयन् ॥१३॥
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते॥१४॥

न्पुरे पुरवदहंभावशून्येदेहे देही अवतिष्ठते अहंकाराभावादेवस्वयंतेनदेहेननैवकुर्वन्ममकाराभावाच्चनकारयन्नित्यविशुद्धचित्ताद्व्यावृत्ति
रुक्ता अविशुद्धचित्तोहिसंन्यस्यपुनःकरोतिकारयतिच नत्वयंतथाअतःसुखमास्तइत्यर्थः॥१३॥ननु“एषएवसाधुकर्मकारयतितंयमेभ्योलो
केभ्यउन्निनीषते एषएवासाधुकर्मकारयातितंयमेभ्योलोकेभ्योऽधोनिनीषते”इत्यादिश्रुतेः परमेश्वरेणैवशुभाशुभफलेषुकर्मसुकर्तृत्वेनप्रयु
ज्यमानोऽस्वंतंत्रःपुरुषःकथंतानिकर्माणित्यजेत् ईश्वरेणैवज्ञानमार्गेप्रयुज्यमानःशुभान्यशुभानिचत्यक्ष्यतीतिचेत्एवंसतिवैषम्यनैर्घृण्या

भ्यांप्रयोजककर्तृत्वादीश्वरस्यापिपुण्यपापसंबंधःस्यादित्याशंक्याह नकर्तृत्वमितिद्वाभ्याम्।प्रभुःईश्वरःजीवलोकस्यकर्तृत्वादिकंनसृजाति किंतु जीवस्यैवस्वभावोऽविद्यैवकर्तृत्वादिरूपेणप्रवर्त्तते अनाद्यविद्याकामवशात्प्रवृत्तिस्वभावंजीवलोकमीश्वरः कर्मसुनियुंक्ते नतुस्वयमेवकर्तृत्वादिकमुत्पादयतीत्यर्थः१४यस्मादेवंतस्मात् नादत्तइति प्रयोजकोऽपिसन्प्रभुः कस्यचित्पापंसुकृतंचनैवादत्तेनभजते।तत्रहेतुः।विभुःपरिपूर्णः आप्तकामइत्यर्थः। यदिहिस्वार्थकामनयाकारयेत्तर्हितथास्यात् नत्वेतदस्ति आप्तकामस्यैवाचिंत्यनिजमाययातत्तत्पूर्वकर्मानुसारेणप्रवर्तकत्वात्। ननुभक्ताननुगृह्णतोऽभक्तान्निगृह्णतश्चवैषम्योपलंभात्कथमाप्तकामत्वमित्यतआह। अज्ञानेनेति। निग्रहोऽपिदंडरू

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः॥अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः॥१५॥ज्ञानेन तु तदज्ञानंयेषां नाशितमात्मनः।तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्१६तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥

पोऽनुग्रहएवेत्येवमज्ञानेनसर्वत्रसमःपरमेश्वरइत्येवंभूतंज्ञानमावृतम्। तेनहेतुनाजंतवोजीवामुह्यंति भगवतिवैषम्यंमन्यंतइत्यर्थः॥१५॥ज्ञानिनस्तुनमुह्यंतीत्याह।ज्ञानेनेति।आत्मनोभगवतोज्ञानेनयेषांतद्वैषम्योपलंभकमज्ञानंनाशितंतज्ज्ञानंतेषामज्ञानंनाशयित्वातत्परंपारिपूर्णमीश्वरस्वरूपंप्रकाशयति यथाआदित्यस्तमोनिरस्यसमस्तंवस्तुजातंप्रकाशयति तद्वत् ॥१६॥ एवंभूतेश्वरोपासनाफलमाह। तद्बुद्धयइति। तस्मिन्नेवबुद्धिर्निश्चयात्मिकायेषाम् तस्मिन्नेवात्मामनोयेषाम् तस्मिन्नेवनिष्ठातात्पर्यंयेषाम् तदेवपरमयनमाश्रयोयेषाम् ततश्चतत्प्रसादलब्धेनात्मज्ञानेननिर्धूतंनिरस्तंकल्मषंयेषांते अपुनरावृत्तिंमुक्तिंयांति॥१७॥

कीदृशास्तेज्ञानिनोयेऽपुनरावृत्तिंगच्छंतीत्यपेक्षायामाह।विद्याविनयसंपन्नइति।विषमेष्वपिसमंब्रह्मैवद्रष्टुंशीलंयेषांते पंडिताज्ञानिनइत्यर्थः। तत्रविद्याविनयाभ्यांयुक्तेब्राह्मणेच शुनोयःपचातितस्मिन्श्वपाकेचेतिकर्मणावैषम्यं गविहास्तिनिशुनिचेतिजातितोवैषम्यंदर्शितम्।१८।ननु विषमेषुसमदर्शनंनिषिद्धंकुर्वंतोपिकथंतेपंडिताः यथाहगौतमः"समासमाभ्यांविषमसमेपूज्येते" इतिअस्यार्थःसमायपूजायाविषमेप्रकारेकृतेसति विषमायचसमेप्रकारेकृतेसति सपूजकइहलोकात्परलोकाच्चहीयतइति तत्राह।इहैवेति।इहैवजीवद्भिरेवतैः सृज्यतइतिसर्गः संसारोजि

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ १८॥
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥
न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्॥स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

तः निरस्तः कैः येषांमनःसाम्येसमत्वेस्थितम् तत्रहेतुः हियस्मात्ब्रह्मसमंनिर्दोषंचतस्मात्तेसमदर्शिनोब्रह्मण्येवस्थिताः ब्रह्मभावं प्राप्ताइत्यर्थः।गौतमोक्तस्तुदोषोब्रह्मभावप्राप्तेःपूर्वमेव पूज्यतइतिपूजकावस्थाश्रवणात् ॥ १९ ॥ ब्रह्मप्राप्तस्यलक्षणमाह।नेति। योब्रह्मविद्भूत्वाब्रह्मण्येवस्थितःसप्रियंप्राप्यनप्रहृष्येत् नप्रहृष्टोहर्षवान्स्यात् अप्रियंचप्राप्यनोद्विजेत् नविषीदतीत्यर्थः। यतः स्थिरबुद्धिः स्थिरा निश्चलाबुद्धिर्यस्य तत्कुतः यतोऽसंमूढःनिवृत्तमोहः ॥ २० ॥

मोहनिवृत्त्याबुद्धिस्थैर्यहेतुमाह।बाह्यस्पर्शेष्विति।इंद्रियैःस्पृश्यंतइतिस्पर्शाविषयाःबाह्येंद्रियविषयेषु असक्तात्माअनासक्तचित्तः आत्मन्यं
तःकरणेयदुपशमात्मकंसात्विकंसुखंतद्विंदति लभते सचोपशमात्मकंसुखंलब्ध्वाब्रह्मणियोगेनसमाधिनायुक्तस्तदैक्यंप्राप्तआत्मायस्यसःअ
क्षय्यंसुखमश्नुतेप्राप्नोति॥२१॥ननु प्रियविषयभोगानामपिनिवृत्तेःकथंमोक्षःपुरुषार्थःस्यात्तत्राह।येहीति।संस्पृश्यंतइतिसंस्पर्शाविषयाःते
भ्योजातायेभोगाःसुखानितेहिवर्त्तमानकालेऽपिस्पर्द्धासूयादिव्याप्तत्वाद्दुःखस्यैवयोनयः कारणभूताः तथाआदिमंतोंऽतवंतश्चअतोविवेकी
तेषुनरमते॥२२॥तस्मान्मोक्षएवपरःपुरुषार्थस्तस्यचकामक्रोधवेगोऽतिप्रतिपक्षोऽतस्तत्सहनसमर्थएवमोक्षभागित्याह ।शक्नोतीति।कामा

बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखम् ॥ स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥२१॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ॥ आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२ ॥
शक्नोतीहैव यः सोढुं प्राक्छरीरविमोक्षणात् ॥ कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥ २३ ॥

त्क्रोधाच्चोद्भवतियोवेगोमनोनेत्रादिक्षोभलक्षणः तमिहैवतदुद्भवसमयएवयोनरःसोढुंप्रतिरोद्धुंशक्नोति तदपिनक्षणमात्रम् किंतुशरीरविमो
क्षणात्प्राक् यावद्देहपातमित्यर्थः यएवंभूतःसएवयुक्तःसमाहितःसुखीचभवति नान्यः । यद्वा मरणादूर्ध्वंविलपंतीभिर्युवतीभिरालिंग्यमानो
ऽपिपुत्रादिभिर्दह्यमानोऽपियथाप्राणशून्यःकामक्रोधवेगंसहते तथामरणात्प्रागपिजीवन्नेवयःसहेतसएवयुक्तःसुखीचेत्यर्थः।तदुक्तंवासिष्ठेन“प्रा
णेगतेयथादेहःसुखंदुःखेनविंदति ॥ तथाचेत्प्राणयुक्तोऽपिसकैवल्याश्रयोभवेदि”ति ॥ २३ ॥

नकेवलंकामक्रोधवेगसंहरणमात्रेणमोक्षंप्राप्नोति अपितु योंऽतरिति । अंतःआत्मन्येवसुखंयस्यनविषयेषु अंतरेवारामःक्रीडायस्यनबाहिः अंतरेवज्योतिर्दृष्टिर्यस्यनगीतनृत्यादिषुसएवब्रह्मणिभूतःस्थितःसन्ब्रह्मणिनिर्वाणंलयमधिगच्छतिप्राप्नोति ॥२४॥ किंच लभंतइति।ऋषयः सम्यग्दर्शिनः क्षीणंकल्मषंयेषां छिन्नंद्वैधंसंशयोयेषां यतःसंयतआत्माचित्तंयेषां सर्वेषांभूतानांहितेरताःकृपालवस्तेब्रह्मनिर्वाणंमोक्षंलभंते॥२५॥ किंच कामक्रोधवियुक्तानामिति । कामक्रोधाभ्यांवियुक्तानांयतीनांसंन्यासिनां संयतचित्तानांज्ञातात्मतत्त्वानामभितउभयतःमृ

योंतःसुखोंतरारामस्तथांऽतर्ज्योतिरेव यः ॥ स योगी ब्रह्म निर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ २४ ॥
लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ॥ छिन्नद्वैधा यतात्मानःसर्वभूतहिते रताः ॥ २५ ॥
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ॥ अभितो ब्रह्म निर्वाणं वर्त्तते विदितात्मनाम् ॥ २६॥
स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः॥प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ॥ २७॥

तानांजीवतांच नदेहांतरएवतेषांब्रह्मणिलयः अपितुजीवतामपिवर्ततइत्यर्थः ॥ २६ ॥ सयोगीब्रह्मनिर्वाणमित्यादिषुयोगीमोक्षमाप्नोतीत्युक्तंतमेवयोगंसंक्षेपेणदर्शयन्नाह स्पर्शानितिद्वाभ्याम् । बाह्याएवस्पर्शारूपरसादयोविषयाश्चिंतिताःसंतोंऽतःप्रविशंति तांस्तांश्चितात्यागेनबहिरेवकृत्वाचक्षुश्चभ्रुवोरंतरेभ्रूमध्यएवकृत्वाऽत्यंतंनेत्रयोर्निमीलनेनिद्रयामनोलीयते उन्मीलनेनचबाहिःप्रसरति तदुभयदोषपरिहारार्थमर्धनिमीलनेनभ्रूमध्येदृष्टिंनिधायेत्यर्थः । उच्छ्वासानिःश्वासरूपेणनासिकयोरभ्यंतरेचरंतौप्राणापानावूर्ध्वाधोगतिनिरोधेनसमौकृत्वा कुंभयि

त्वेत्यर्थः यद्वा प्राणोयथाबहिर्ननिर्याति यथाचापानोऽतर्नप्रविशति किंतु नासामध्यएवद्वावीपियथाचरतः तथामंदाभ्यासुच्छ्वासानिःश्वासाभ्यांसमौकृत्वेति ॥ २७ ॥ यतेति । अनेनोपायेनयताःसंयताइंद्रियमनोबुद्धयोयस्य मोक्षएवपरमयनंप्राप्यंयस्य अतएवविगताइच्छाभयक्रोधायस्य यएवंभूतोमुनिःससदाजीवन्नपिमुक्तएवेत्यर्थः ॥ २८ ॥ नन्वेवमिंद्रियादिसंयममात्रेणकथंमुक्तिःस्यान्नतावन्मात्रेग किंतुज्ञानद्वारेणेत्याह । भोक्तारमिति।यज्ञानांतपसांचमद्भक्तैःसमर्पितानांयदृच्छयाभोक्तारम् पालकमितिवा सर्वेषांलोकानांमहांतमीश्वरंसर्वेषांभूतानांसुहृदंनिरपेक्षोपकारिणमंतर्यामिणंमांज्ञात्वामत्प्रसादेनशांतिमोक्षमृच्छतिप्राप्नोति ॥२९॥ विकल्पशंकापोहेनयेनैवंसांख्ययोगयोः॥समु

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यःसदा मुक्त एव सः ॥ २८ ॥ भोक्तारं यज्ञतपसांसर्वलोकमहेश्वरम्॥सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥ २९ ॥ इति श्रीमद्भ०कर्मसंन्यासयोगो नाम पंचमोऽध्यायः ॥५॥ श्रीगववाच ॥ अनाश्रितः कर्मफलंकार्यं कर्म करोतियः॥ससंन्यासीचयोगीचननिरग्निर्नचाक्रियः॥१॥

त्रयःक्रमेणोक्तः सर्वज्ञंनौमितंहरिम् ॥ १ ॥ इतिसुबोधिन्यांटीकायांपंचमोऽध्यायः ॥ ५ ॥ चित्तेशुद्धेऽपिनध्यानंविनासंन्यासमात्रतः ॥ मुक्तिःस्यादितिषष्ठेऽस्मिन्ध्यानयोगोवितन्यते ॥१॥ पूर्वाध्यायांतेसंक्षेपेणोक्तंयोगंप्रपंचयितुंषष्ठाध्यायारंभः तत्रतावत्सर्वकर्माणिमनसेत्यारभ्यसंन्यासपूर्विकायाज्ञाननिष्ठायास्तात्पर्येणाभिधानात् दुःखरूपत्वाच्चकर्मणःसहसासंन्यासादिप्रसंगंप्राप्तंवारायितुंसंन्यासादपिश्रेष्ठत्वेनकर्मयोगंस्तौति श्रीभगवान् अनाश्रितइतिद्वाभ्याम् कर्मफलमनाश्रितोऽनपेक्षमाणःअवश्यंकर्तव्यतयाविहितंकर्मयःकरोतिसएवसंन्यासी

योगीच नतुनिरग्निः अग्निसाध्येष्टाख्यकर्मत्यागी नचाक्रियोऽनग्निसाध्यपूर्ताख्यकर्मत्यागीच ॥१॥कुतइत्यपेक्षायांकर्मयोगस्यैवसंन्यासत्वं संपादयन्नाह।यमिति ।यंसंन्यासमितिप्राहुः प्रकर्षेणश्रेष्ठत्वेनाहुः“संन्यासएवात्यरेचयदि”त्यादिश्रुतेः केवलात्फलसंन्यसनाद्धेतोःयोगमेवतं जानीहि कुतइत्यपेक्षायामितिशब्दोक्तोहेतुयोगेऽप्यस्तीत्याह ।नहीति। नसंन्यस्तःफलसंकल्पोयेनसः कर्मनिष्ठोज्ञाननिष्ठोवाकश्चिदपिनहि योगीभवति अतःफलसंकल्पत्यागसाम्यात्संन्यासात्संन्यासीच फलसंकल्पत्यागादेवचित्तविक्षेपाभावात्योगीचभवत्येवसइत्यर्थः ॥ २ ॥

यं संन्यासमितिप्राहुर्योगं तं विद्धि पांडव ॥ न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥
आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥
यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

तर्हियावज्जीवंकर्मयोगएवप्राप्तइत्याशंक्यतस्यावधिमाह ।आरुरुक्षोरिति। ज्ञानयोगमारोढुंप्राप्तुमिच्छोः पुंसस्तदारोहेकारणंकर्मोच्यते चित्तशुद्धिकरत्वात् ज्ञानयोगमारूढस्यतुतस्यैवज्ञाननिष्ठस्यशमःसमाधिश्चित्तविक्षेपककर्मोपरमोज्ञानपरिपाकेकारणमुच्यते ।३।कीदृशोऽसौ योगारूढःयस्यशमःकारणमुच्यतइत्यत्राह । यदाहीति । इंद्रियार्थेषुइंद्रियभोग्येषुशब्दादिषुतत्साधनेषुचकर्मसुयदानानुषज्जतेआसक्तिंन करोति तत्रहेतुः आसक्तिमूलभूतान्सर्वान्भोगविषयान्कर्मविषयांश्चसंकल्पान्संन्यसितुंत्यक्तुंशीलंयस्यसः तदायोगारूढउच्यते ॥ ४ ॥

अतोविषयासक्तित्यागेमोक्षंतदासक्तौचबंधंपर्यालोच्यरागादिस्वभावंत्यजेदित्याह । उद्धरेदिति । आत्मनाविवेकयुक्तेनात्मानंसंसारादुद्धरेत् नत्ववसादयेत् अधोननयेत्।हियस्मात् आत्मैवमनःसंगादुपरतआत्मनःस्वस्यबंधुरुपकारकः रिपुरपकारकश्च ॥५॥ कथंभूतस्यात्मैवबंधुः कथंभूतस्यचात्मैवारिपुरित्यपेक्षायामाह । बंधुरिति । येनात्मनैवआत्माकार्यकारणसंघातरूपोजितोवशीकृतः तस्यतथाभूतस्यात्मनः आत्मैवबंधुः अनात्मनोऽजितात्मनस्तुआत्मैवात्मनःशत्रुत्वेशत्रुवदपकारकारित्ववेवर्त्तेत ॥६॥ जितात्मनःस्वस्मिन्बंधुत्वंस्फुटयाति । जितात्म

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥
बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥
जितात्मनः प्रशांतस्य परमात्मा समाहितः ॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ॥ युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

नइति । जितः आत्मायेनतस्यप्रशांतस्यरागादिरहितस्यैवपरंकेवलमात्माशीतोष्णादिषुसत्स्वपिसमाहितः स्वात्मनिष्ठोभवति नान्यस्य यद्वातस्यहृदिपरमात्मासमाहितः स्थितोभवति ॥७॥ योगारूढस्यलक्षणंश्रैष्ठ्यंचोक्तमुपपाद्योपसंहरति।ज्ञानविज्ञानतृप्तात्मेति । ज्ञानमौपदेशिकंविज्ञानमपरोक्षानुभवस्ताभ्यांतृप्तोनिराकांक्षआत्माचित्तंयस्य अतः कूटस्थोनिर्विकारःअतएवविजितानिइंद्रियाणियेन अतएव समानिलोष्टादीनियस्य मृत्खंडपाषाणसुवर्णेषुहेयोपादेयबुद्धिशून्यः सयुक्तोयोगारूढइत्युच्यते ॥ ८ ॥

सुहृन्मित्रादिषुसमबुद्धियुक्तस्ततोऽपिश्रेष्ठइत्याह।सुहृदिति।सुहृत्स्वभावेनैवहिताशंसी मित्रंस्नेहवशेनोपकारकः अरिर्घातुकः उदासीनोविवदमानयोरुभयोरप्युपेक्षकः मध्यस्थोविवदमानयोरुभयोरपिहिताशंसी द्वेष्यःद्वेषविषयः बंधुः संबंधी साधवः सदाचाराः पापादुराचाराः एतेषुसमारागद्वेषादिशून्याबुद्धिर्यस्यसतुविशिष्टः।९।एवंयोगारूढस्यलक्षणमुक्त्वेदानींतस्यसांगंयोगंविधत्ते योगीत्यादिना सयोगीपरमोमतइत्यंतेनग्रंथेन।योगीति।योगीयोगारूढः आत्मानंमनः युंजीत समाहितंकुर्यात् सततंनिरंतरंरहसिएकांतेस्थितःसन्नेकाकीसंगशून्यः यतं

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥
योगी युंजीत सततमात्मानं रहसि स्थितः ॥ एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ॥ उपविश्यासने युंज्याद्योगमात्मविशुद्धये ॥ १२ ॥

संयतंचित्तमात्मादेहश्चयस्यानिराशीःनिराकांक्षः निराहारोवा अपरिग्रहःपरिग्रहशून्यश्च ॥१०॥ आसननियमंदर्शयन्नाह शुचावितिद्वाभ्याम् । शुद्धेस्थानेआत्मनःस्वस्यासनंस्थापयित्वा कीदृशम् । स्थिरमचलम् । नातिचोन्नतंनचातिनीचंच चैलंवस्त्रमजिनंव्याघ्रादिचर्मचैलाजिनेकुशेभ्यउत्तरे यस्मिन् कुशानामुपरिचर्म तदुपरिवस्त्रमास्तीर्येत्यर्थः ॥ ११ ॥ तत्रेति । तत्रतस्मिन्नासनेउपविश्यएकाग्रंविक्षेपरहितं मनःकृत्वायोगंयुंज्यात् अभ्यसेत् यताःसंयताः चित्तस्येंद्रियाणांचक्रियायस्यात्मनोमनसोविशुद्धयेउपशांतये ॥ १२ ॥

चित्तैकाग्र्योपयोगिनींदेहादिधारणांदर्शयन्नाह सममितिद्वाभ्याम् कायइतिदेहमध्यभागोविवक्षितः कायश्चशिरश्चग्रीवाचकायशिरोग्रीवंमूलाधारादारभ्यमूर्द्धाग्रपर्यंतंसममवक्रंनिश्चलंधारयन्‌स्थिरः दृढप्रयत्नोभूत्वेत्यर्थः।स्वकीयंनासिकाग्रंसंप्रेक्ष्यच अर्धनिमीलितनेत्रइत्यर्थः।इतस्ततोदिशश्चानवलोकयन्नासीतेत्युत्तरेणान्वयः ॥ १३ ॥ प्रशांतेति।प्रशांत आत्माचित्तंयस्य विगताभीर्भयंयस्य ब्रह्मचारिव्रतेब्रह्मचर्येस्थितः सन्मनःसंयम्यप्रत्याहृत्यमय्येवचित्तंयस्य अहमेवपरःपुरुषार्थोयस्य समत्परः एवंयुक्तोभूत्वाआसीत तिष्ठेत् ॥ १४ ॥ योगाभ्यासफलमाह।युंजन्नेवमिति। एवमुक्तप्रकारेणसदाआत्मानंमनोयुंजन्समाहितंकुर्वन्नियतंनिरुद्धंमानसंचित्तंयस्यसः शांतिंसंसारोपरतिं प्राप्नोति। कथंभूताम्।निर्वाणंपरमंप्राप्यं यस्यांतांमत्संस्थांमद्रूपेणावस्थितिम् ॥ १५ ॥ योगाभ्यासनिष्ठस्याहारादिनियममाह नेतिद्वाभ्याम्। अत्यंतमधिकंभुंजानस्य एकांतमत्यंतमभुंजानस्यापियोगःसमाधिर्नभवति तथाऽतिनिद्राशीलस्यातिजाग्रतश्चयोगोनैवास्ति ॥ १६ ॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥
प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ॥ मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ १४ ॥
युंजन्नेवं सदात्मानं योगी नियतमानसः ॥ शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ १५ ॥
नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः ॥ न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ १६ ॥

तर्हिकथंभूतस्ययोगोभवतीत्यितआंह।युक्तेति।युक्तोनियतआहारोविहारश्चगतिर्यस्य कर्मसुकार्येषुयुक्तानियतैवचेष्टायस्य युक्तौनियतौस्वप्नावबोधौनिद्राजागरौयस्यतस्यदुःखनिवर्त्तकोयोगोभवतीतिसिद्ध्यति।१७।कदानिष्पन्नयोगःपुरुषोभवतीत्यपेक्षायामाह।यदेति।विनियतंविशेषेणनिरुद्धंसच्चित्तमात्मन्येवयदानिश्चलंतिष्ठति किंच सर्वकामेभ्यःऐहिकामुष्मिकभोगेभ्यःविगततृष्णोभवति तदाप्राप्तयोगइत्युच्यते।१८।आत्मैकाकारतयावस्थितस्यचित्तस्योपमानमाह।यथेति।वातशून्येदेशेस्थितो दीपोयथानेंगते नविचलतिसाउपमादृष्टांतः कस्यआत्मविषयंयोगंयुंजतोऽभ्यसतोयोगिनोयतंनियतंचित्तंयस्य निष्कंपतयाप्रकाशकतयाचाचंलंतच्चित्तंतद्वत्तिष्ठतीत्यर्थः ॥१९॥ यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडवेत्यादौकर्मैवयोगशब्देनोक्तं नात्यश्नतस्तुयोगोस्तीत्यादौतुसमाधिर्योगशब्देनोक्तः तत्रमुख्योयोगःकइत्यपेक्षायांसमाधिमेवस्वरूपतःफलतश्चलक्षयन्सएवमुख्योयोगइत्याह यत्रेतिसार्द्धैस्त्रिभिः यत्रयस्मिन्नवस्थाविशेषेयोगाभ्यासेननिरुद्धंचित्तमुपरतंभवतीतियोगस्यस्वरूपलक्षणमुक्तं तथाचपातंजलंसूत्रं “योगश्चित्तवृत्तिनिरोध”इति।इष्टप्राप्तिलक्षणेनफलेनतमेवलक्षयति। यत्रचयस्मिन्नवस्थाविशेषआत्मनाशुद्धेनमनसात्मानमेवपश्यतिनतुदेहादिपश्यंश्चात्मन्येवतुष्यति नतुविषयेषु। यत्रेत्यादीनांयच्छब्दानांतंयोग

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु॥युक्तस्वप्नावबोधस्ययोगो भवति दुःखहा॥१७॥यदा विनियतं चित्तमात्मन्येवावतिष्ठते। निःस्पृहःसर्वकामेभ्यो युक्त इत्युच्यते तदा।१८। यथादीपो निवातस्थो नेंगते सोपमा स्मृता॥योगिनो यतचित्तस्य युंजतो योगमात्मनः।१९।यत्रोपरमते चित्तं निरुद्धं योगसेवया॥यत्र चैवात्मनात्मानं पश्यन्नात्मनितुष्यति।२०।

संज्ञितंविद्यादितिचतुर्थेनान्वयः॥२०॥आत्मन्येवतोषेहेतुमाह।सुखमिति ।यत्रयास्मिन्नवस्थाविशेषेयत्तत्किमपिनिरतिशयमात्यंतिकंनित्यं सुखंवेत्ति । ननुतदाविषयेंद्रियसंबंधाभावात्कुतःसुखंस्यात्तत्राह । अतींद्रियंविषयेंद्रियसंबंधातीतम् केवलंबुद्ध्यैवात्माकारतयाग्राह्यम् अतएवचयत्रास्थितःसन्तत्त्वतःआत्मस्वरूपान्नैवचलति॥ २१ ॥ अचलत्वमेवोपपादयति।यमिति।यमात्मसुखरूपलाभंलब्ध्वाततोऽधिकम परंलाभंनमन्यतेनचिंतयति तस्यैवनिरतिशयसुखत्वात्यस्मिंश्चस्थितोमहतापिशीतोष्णादिदुःखेननविचाल्यतेनाभिभूयते एतेनानिष्टनिवृत्तिफलेनापियोगलक्षणमुक्तंद्रष्टव्यम्॥२२॥यएवंभूतोऽवस्थाविशेषस्तमाह तमित्यर्द्धेन।दुःखशब्देनदुःखमिश्रितत्वाद्वैषयिकंसुखमपि

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियम् ॥ वेत्ति यत्र न चैवाऽयं स्थितश्चलति तत्त्वतः॥ २१ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः॥यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते॥२२॥
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ २३ ॥

गृह्यते दुःखस्यसंयोगेनस्पर्शमात्रेणापिवियोगोयस्मिन्तमवस्थाविशेषं योगसंज्ञितंयोगशब्दवाच्यंजानीयात् परमात्मनाक्षेत्रज्ञस्ययोजनंयोगः यद्वा दुःखसंयोगेनवियोगएवशूरेकातरशब्दवद्विरुद्धलक्षणयायोगउच्यते कर्मणितुयोगशब्दस्तदुपायत्वादौपचारिकएवेतिभावः यस्मादेवंमहाफलोयोगस्तस्मात्सएवयत्नतोऽभ्यसनीयइत्याह सइतिसार्धेन । सयोगोनिश्चयेनशास्त्राचार्योपदेशजनितेनयोक्तव्योऽभ्यसनीयः । यद्यपिशीघ्रंनसिद्ध्यतितथापिअनिर्विण्णेननिर्वेदरहितेनचेतसायोक्तव्यःदुःखबुद्ध्याप्रयत्नशैथिल्यंनिर्वेदः ॥ २३ ॥ ॥ ॥

किंच संकल्पेति । संकल्पात्प्रभवोयेषांतान्योगप्रतिकूलान्सर्वान्कामानशेषतः सवासनांस्त्यक्त्वा मनसैवविषयदोषदर्शिनासर्वतःप्रसरंतमिंद्रियसमूहंविशेषेणनियम्ययोगोयोक्तव्यइतिपूर्वेणान्वयः ॥ २४ ॥ यदितुप्राक्तनकर्मसंस्कारेणमनोविचलेत्तर्हिधारणयास्थिरीकुर्यादित्याह। शनैरिति। धृतिर्धारणातयागृहीतयावशीकृतयाबुद्ध्यात्मसंस्थमात्मन्येवसम्यक्स्थितंनिश्चलंमनःकृत्वोपरमेत् तच्चशनैःशनैरभ्यासक्रमेणनतुसहसा । उपरमस्वरूपमाह । नकिंचिदपिचिंतयेत् निश्चलेमनसिस्वयमेवप्रकाशमानपरमानंदस्वरूपोभूत्वात्मध्यानादपिननिवर्त्तेते

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसैवेंद्रियग्रामं विनियम्य समंततः ॥ २४ ॥
शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया ॥ आत्मसंस्थं मनःकृत्वा न किंचिदपि चिंतयेत् ॥ २५ ॥
यतो यतो निश्चरति मनश्चंचलमस्थिरम् ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ २६ ॥
प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमम् ॥ उपैति शांतरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

त्यर्थः ॥२५॥ एवमपिरजोगुणवशाद्यदिमनःप्रचलेत्तर्हिपुनःप्रत्याहारेणवशीकुर्यादित्याह । यतइति । स्वभावतश्चंचलंधार्यमाणमप्यस्थिरंमनोयंयंविषयंप्रतिनिर्गच्छतिततस्ततः प्रत्याहृत्यात्मन्येव स्थिरंकुर्यात् ॥ २६ ॥ एवंप्रत्याहारादिभिःपुनःपुनर्मनोवशीकुर्वतंरजोगुणक्षयेसति योगसुखंप्राप्नोतीत्याह । प्रशांतमनसमिति । एवमुक्तेनप्रकारेणशांतंरजोयस्यतम् अतएवप्रशांतंमनोयस्यतमेनंनिष्कल्मषंब्रह्मत्वप्राप्तंयोगिनमुत्तमंसुखंसमाधिसुखंस्वयमेवोपैतिप्राप्नोति ॥ २७ ॥

ततश्चकृतार्थोभवतीत्याह ।युंजन्निति। एवमनेनप्रकारेणसर्वदात्मानंमनोयुंजन्वशीकुर्वन्विशेषेणसर्वात्मनागंतकल्मषंयस्यसयोगीसुखेनानायासेनब्रह्मणःसंस्पर्शोऽविद्यानिवर्त्तकःसाक्षात्कारस्तदेवात्यंतंसर्वोत्तमंसुखमश्नुते जीवन्मुक्तोभवतीत्यर्थः ॥ २८ ॥ ब्रह्मसाक्षात्कारमेवदर्शयति । सर्वभूतस्थमिति । योगेनाभ्यस्यमानेनयुक्तात्मासमाहिताचित्तः सर्वत्रसमंब्रह्मैवपश्यतीतिसमदर्शनः स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यंसर्वभूतेषुब्रह्मादिस्थावरांतेष्ववस्थितंपश्यति तानिचआत्मन्यभेदेनपश्यति ॥ २९ ॥ एवंभूतात्मज्ञानस्यसर्वभूतात्मतयामदुपासनंमुख्यंकारणमित्याह । यइति । मांपरमेश्वरंसर्वत्रभूतमात्रेयःपश्यति सर्वंचप्राणिमात्रंमयियः पश्यति तस्याहंनप्रणश्यामि अदृश्योनभवामि सचममादृश्योनभवति प्रत्यक्षोभूत्वाकृपादृष्ट्यातंविलोक्यानुगृह्णामीत्यर्थः ॥ ३० ॥ नचैवंभूतोविधिकिंकरःस्यादित्याह । सर्वभूतस्थितमिति । सर्वेषुभूतेषुस्थितंमामभेदमास्थितआश्रितोयोभजति सयोगीज्ञानीसन्सर्वथाकर्मत्यागेनापिवर्त्तमानोमय्येववर्त्ततेमुच्यते नतुभ्रश्यतीत्यर्थः ॥ ३१ ॥

युंजन्नेवं सदात्मानं योगी विगतकल्मषः ॥ सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥ २८ ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा वर्त्तमानोऽपि स योगी मयि वर्तते ॥ ३१ ॥

एवंचमांभजतांयोगिनांमध्येसर्वभूतानुकंपीश्रेष्ठइत्याह।आत्मौपम्येनेति।आत्मौपम्येनस्वसादृश्येनयथाममसुखंप्रियंदुःखंचाप्रियंतथान्येषामपीतिसर्वत्रसमंपश्यन्सुखमेवसर्वेषांयोवांछति नतुकस्यापिदुःखम् सयोगीश्रेष्ठोममाभिमतइत्यर्थः ।३२। उक्तलक्षणस्ययोगस्यासंभवंमन्वानोऽर्जुनउवाच।योऽयमिति।साम्येनमनसोलयविक्षेपशून्यतयाकेवलात्माकारावस्थानेनयोऽयंयोगस्त्वया प्रोक्तएतस्ययोगस्यस्थिरांदीर्घकालांस्थितिंनपश्यामि मनसश्चंचलत्वात्॥३३॥एतत्स्फुटयति।चंचलमिति।चंचलंस्वभावेनैवचपलं किंच प्रमाथिप्रमथनशीलंदेहेंद्रियक्षोभ

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन॥सुखं वा यदि वा दुःखं स योगी परमो मतः॥३२॥ ॥अर्जुन उवाच॥योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिराम्॥३३॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्॥तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥ ॥श्रीभगवानुवाच ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलम् ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥ ३५ ॥

कमित्यर्थः।किंच बलवद्विचारेणापिजेतुमशक्यम् किंच दृढंविषयवासनानुबद्धतयादुर्भेद्यम् अतोयथाकाशेदोधूयमानस्यवायोःकुंभादिषुनिरोधनमशक्यम् तथातस्यमनसोऽपिनिग्रहंनिरोधंसुदुष्करंसर्वथाकर्त्तुमशक्यंमन्ये ॥ ३४ ॥ तदुक्तं चंचलत्वादिकमंगीकृत्यैव मनोनिग्रहोपायंश्रीभगवानुवाच । असंशयमिति। चंचलत्वादिनामनोनिरोद्धुमशक्यमितियद्वदसि एतन्निःसंशयमेव तथापितुविषयाचिंतनपूर्वकमभ्यासेनपरमात्माकारप्रत्ययावृत्त्याविषयवैतृष्ण्येनचगृह्यते निगृह्यते अभ्यासेनलयप्रतिबंधाद्वैराग्येणचाविक्षेपप्रतिबंधादुपर

तवृत्तिकंसत्परमात्माकारेणपरिणतंतिष्ठतीत्यर्थः। तदुक्तंयोगशास्त्रे“मनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः। यासंप्रज्ञातनामासौसमाधिरभिधीयते”इति॥३५॥एतावांस्त्विहानिश्चयइत्याह।असंयतात्मनेति।असंयतात्माउक्तप्रकारेणाभ्यासवैराग्याभ्यामसंयतआत्माचित्तंयस्यतेनपुरुषेण।यंयोगोदुष्प्रापःप्राप्तुमशक्यः अभ्यासवैराग्याभ्यांवश्योवशवर्तीआत्माचित्तंयस्यतेनपुरुषेणपुनश्चानेनैवोपायेनप्रयत्नंकुर्वतायोगःप्राप्तुंशक्यः॥३६॥अभ्यासवैराग्यभावेनकथंचित्प्राप्तसम्यग्ज्ञानःकिंफलमाप्नोतीत्यर्जुनउवाच।अयतिरिति।प्रथमंश्रद्धोपेतएवयोगेप्रवृत्तः नतुमिथ्याचारतया ततःपरंतुअयतिः नसम्यग्यतते शिथिलाभ्यासइत्यर्थः।तथायोगाच्चलितंमानसंविषयप्रवणंचित्तंयस्यमंदवैराग्यइत्यर्थः।

असंयतात्मना योगो दुष्प्राप इति मे मतिः॥वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः३६अर्जुन उवाच॥अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति३७कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति॥अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि३८एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः।

एवमभ्यासवैराग्यशैथिल्याद्योगस्यसंसिद्धिंफलंज्ञानमप्राप्यकांगतिंप्राप्नोति।३७प्रश्नाभिप्रायंविवृणोति कच्चिदिति।कर्मणामीश्वरार्पितत्वादनुष्ठानाच्चनतावत्कर्मफलंस्वर्गादिकंप्राप्नोति योगानिष्पत्तेश्चनमोक्षंप्राप्नोति एवमुभयस्माद्भ्रष्टः अप्रतिष्ठोनिराश्रयःअतएवब्रह्मणःप्राप्त्युपायेपथिमार्गेविमूढःसन्काच्चित्किन्नश्यति किंवानश्यतीत्यर्थः।नाशेदृष्टांतः। यथाछिन्नमभ्रंपूर्वस्मादभ्राद्विश्लिष्टमभ्रांतरंचाप्राप्तंसन्मध्यएवविलीयतेतद्वदित्यर्थः३८त्वयैवसर्वज्ञेनायंममसंदेहोनिरसनीयः त्वत्तोन्यस्त्वेतत्संदेहनिवर्त्तकोनास्तीत्याह।एतन्मइति।एतत्एनं छेत्तानिवर्त्तकः

स्पष्टमन्यत् ३९अत्रोत्तरंश्रीभगवानुवाच पार्थेतिसार्द्धैश्चतुर्भिः।इहलोकेनाशउभयभ्रंशात्पातित्यम् अमुत्रपरलोकेनाशोनरकप्राप्तिःतदुभयं तस्यनास्त्येवयतःकल्याणकृच्छुभकारीकश्चिदपिदुर्गतिंनगच्छति अयंचशुभकारीश्रद्धयायोगेप्रवृत्तत्वात् तातेतिलोकरीत्योपालालन्यसंबोधयति ॥४०॥ तर्हिकिमसौप्राप्नोतीत्यपेक्षायामाह।प्राप्येति।पुण्यकारिणामश्वमेधादियाजिनांलोकान्प्राप्य तत्रशाश्वतीःसमाः बहून्संवत्सरानुषित्वावाससुखमनुभूयशुचीनांसदाचाराणांश्रीमतांधनिनांगेहेसयोगभ्रष्टोजन्मप्राप्नोति ॥ ४१ ॥ अलपकालाभ्यस्तयोगभ्रंशेगतिरियमु

त्वदन्यः संशयस्यास्य च्छेत्ता न ह्युपपद्यते॥३९॥ श्रीभगवानुवाच॥पार्थ नैवेह नामुत्र विनाशस्तस्य विद्य
ते ॥ नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥ ४० ॥ प्राप्यपुण्यकृताँल्लोकानुषित्वा शाश्वतीः समाः ॥
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥४१ ॥ अथवा योगिनामेव कुले भवति धीमताम् ॥ एतद्धि
दुर्लभतरं लोके जन्म यदीदृशम्॥४२॥तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्॥यतते च ततो भूयः संसिद्धौ
कुरुनंदन ॥४३॥पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः॥जिज्ञासुरपि योगस्य शब्दब्रह्माऽतिवर्त्तते ॥४४॥

क्ताचिराभ्यस्तयोगभ्रंशेतुपक्षांतरमाह।अथेति।योगनिष्ठानांधीमतांज्ञानिनामेवकुलेजायते नतुपूर्वोक्तानामनारूढयोगानांकुलेजायते । एतज्जन्मस्तौति।ईदृशंयज्जन्मएतद्धिलोके दुर्लभतरम् मोक्षहेतुत्वात् ॥ ४२ ॥ ततःकिमतआह तत्रेतिसार्द्धेन।तत्रद्वि।प्रकारेऽपिजन्मनिपूर्वदेहेभवं पौर्वदेहिकंतमेवब्रह्मविषययाबुद्ध्यासंयोगंलभते ततश्चभूयोऽधिकंसंसिद्धौमोक्षेप्रयत्नंकरोति ॥४३॥ तत्रहेतुः।पूर्वेति।तेनैवपूर्वदेहकृता

भ्यासेनावशोऽपिकुतश्चिदंतरायादनिच्छन्नपिसंह्रियते विषयेभ्यःपरावर्त्यब्रह्मनिष्ठःक्रियते तदेवंपूर्वाभ्यासवशेनप्रयत्नंकुर्वञ्छनैर्मुच्यतइ
तीममर्थंकैमुत्यन्यायेनस्फुटयति ।जिज्ञासुरितिसार्द्धेन।योगस्यस्वरूपंजिज्ञासुरेवकेवलंनतुप्राप्तयोगः एवंभूतोयोगेप्रविष्टमात्रोऽपिपापवशा
द्योगभ्रष्टोऽपिशब्दब्रह्मवेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रामतितेभ्योऽधिकंफलंप्राप्यमुच्यतइत्यर्थः ४४ यदेवंमंदप्रयत्नोऽपियोगीपरां
गतिंयाति तदायस्तुयोगीप्रयत्नादुत्तरोत्तरमधिकंयोगेयतमानोयत्नंकुर्वन्योगेनैवसंशुद्धकिल्बिषोविधूतपापः सोऽनेकेषुजन्मसूपचितेनयो
गेनसंसिद्धः सम्यग्ज्ञानीभूत्वाततःश्रेष्ठांगतिंयातीति । किंवक्तव्यमित्यर्थः॥ ४५ ॥ यस्मादेवंतस्मात् तपस्विभ्यइति । कृच्छ्रचांद्रायणा

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥ तप
स्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ॥ कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥
योगिनामपि सर्वेषां मद्गतेनांतरात्मना ॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥ इति श्रीमद्भ
गवद्गीतासूपनिषत्सुब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेअभ्यासयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

दितपोनिष्ठेभ्योऽपि ज्ञानिभ्यः शास्त्रज्ञानवद्भ्योऽपिकर्मिभ्यःइष्टापूर्तादिकर्मकारिभ्योऽपियोगीश्रेष्ठोऽभिमतः तस्मात्त्वंयोगीभव ॥ ४६ ॥
योगिनामनियमादिपराणांमध्येमद्भक्तः श्रेष्ठइत्याह । योगिनामिति । मद्गतेनमय्यासक्तेनांतरात्मनामनसायोमांपरमेश्वरंवासुदेवंश्रद्धायुक्तः
सन्भजते सयोगयुक्तेषुश्रेष्ठोममसंमतःअतोमद्भक्तोभवेतिभावः ॥ ४७॥ आत्मयोगमवोचद्योभक्तियोगशिरोमणिम्॥तंवंदेपरमानंदंमाधवं
भक्तशेवधिम् ॥ १ ॥ इति श्रीमद्भगवद्गीतासुबोधिनीटीकायांषष्ठोऽध्यायः ॥ ६ ॥ इति गीतासु प्रथममध्यायषट्कम् ॥ ॥

श्रीः ॥ विज्ञेयमात्मनस्तत्त्वंसयोगंसमुदाहृतं ॥ भजनीयमथेदानीमैश्वरंरूपमीर्यते ॥ १ ॥ पूर्वाध्यायांतेमद्गतेनांतरात्मनायोमांभजातिसमेयुक्ततमोमतइत्युक्तं तत्रकीदृशस्त्वम् यस्यभक्तिःकर्त्तव्येत्यपेक्षायांस्वस्वरूपंनिरूपयिष्यन्श्रीभगवानुवाच । मय्यासक्तमनाइति । मयिपरमेश्वरेआसक्तमभिनिविष्टंमनोयस्यसः मदाश्रयः अहमेवाश्रयोयस्यानन्यशरणःसन्योगंयुंजन्नभ्यसन्असंशयंयथाभवत्येवंमां समग्रंविभूतिबलैश्वर्यादिसहितंयथाज्ञास्यसितदिदंमयावक्ष्यमाणंशृणु ॥ १ ॥ वक्ष्यमाणंस्तौति । ज्ञानमिति । ज्ञानंशास्त्रीयंविज्ञानमनुभवस्तत्सहितम् इदंमद्विषयम् अशेषतःसाकल्येनवक्ष्यामि यज्ज्ञात्वाइहश्रेयोमार्गेवर्त्तमानस्यपुनरन्यज्ज्ञातव्यमवशिष्टंनभवतितेनैवकृतार्थोभवतीत्यर्थः ॥ २ ॥ मद्भक्तिंविनातुमज्ज्ञानंदुर्लभमित्याह । मनुष्याणामिति । असंख्यातानांजीवानांमध्येमनुष्यव्यतिरिक्तानांश्रेयसिप्रवृत्तिरेवनास्ति मनुष्याणांतुसहस्रेषुमध्येकश्चिदेवप्रकृष्टपुण्यवशात्सिद्धयेआत्मज्ञानायप्रयतते प्रयत्नंकुर्वतामपिसहस्रेषुकश्चिदेवप्रकृष्टपुण्यवशादात्मानंवेत्तिताद‍ृशानांचात्मज्ञानासिद्धानांसहस्रेषुकश्चिदेवमांपरमात्मानंमत्प्रसादेनतत्त्वतोवेत्तितदेवमातिदुर्लभमपि

श्रीः ॥ श्रीभगवानुवाच ॥ ॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ॥ यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥ २॥मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये॥यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥३॥

मज्ज्ञानंतुभ्यमहंवक्ष्यामीत्यर्थः ॥ ३ ॥ एवंश्रोतारमभिमुखीकृत्येदानींप्रकृतिद्वारासृष्ट्यादिकर्तृत्वेनेश्वरतत्त्वंप्रतिज्ञातंनिरूपयिष्यन् परापरभेदेनप्रकृतिद्वयमाह भूमिरितिद्वाभ्याम् भूम्यादिशब्दैःपंचगंधादितन्मात्राण्युच्यंते मनःशब्देनतत्कारणभूतोऽहंकारः बुद्धिशब्देन तत्कारणभूतंमहत्तत्त्वंमहंकारशब्देनतत्कारणमविद्येत्येवमष्टधाभिन्ना । यद्वा भूम्यादिशब्दैः पंचमहाभूतानिसूक्ष्मैःसहैकीकृत्यगृह्यंते अहंकारशब्देनैवाहंकारस्तेनैवतत्कार्याणींद्रियाण्यपिगृह्यंते बुद्धिरितिमहत्तत्त्वं मनःशब्देनमनसैवोन्नेयमव्यक्तरूपंप्रधानमित्यनेन

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ॥ जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

प्रकारेणमेप्रकृतिर्मायाख्याशक्तिरष्टधाभिन्नाविभागंप्राप्ता चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवांतर्भावविवक्षयाष्टधाभिन्नेत्युक्तम् तथाचवक्ष्यमाणक्षेत्राध्याये इमामेवप्रकृतिंचतुर्विंशतितत्त्वात्मनाप्रपंचयिष्यति "महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच ॥ इंद्रियाणिदशैकंचपंचचेंद्रियगोचरा" इति ॥ ४ ॥ अपरामिमांप्रकृतिमुपसंहरन्परांप्रकृतिमाह । अपरेति । अष्टधोक्तायाप्रकृतिः इयमपरानिकृष्टा जडत्वात् परार्थत्वाच्च इतःसकाशात्परांप्रकृष्टामन्यांजीवभूतांजीवस्वरूपांमेप्रकृतिंविद्धि जानीहि परत्वेहेतुःयथाचेतनयाक्षेत्रज्ञरूपयास्वकर्मद्वारेणेदंजगद्धार्यते ॥ ५ ॥ अनयोःप्रकृतित्वंदर्शयन्स्वस्यतद्वारासृष्ट्यादिकारणत्वमाह । एतदिति । एते क्षेत्रक्षेत्रज्ञरूपेप्रकृतीयोनीकारणभूतेयेषां

तान्येतद्योनीनिस्थावरजंगमात्मकानिसर्वाणिभूतानीत्युपधारयबुद्धयस्व   तत्रजडाप्रकृतिर्देहरूपेणपरिणमते   चेतनातुमदंशभूताभोक्तृत्वेनदेहेषुप्रविश्यस्वकर्मणातानिधारयति   तेचमदीयेप्रकृतीमत्तःसंभूते   अतोऽहमेवकृत्स्नस्यसप्रकृतिकस्यजगतःप्रभवः   प्रकर्षेणभवत्यस्मादितिप्रभवः परंकारणमहमित्यर्थः । तथाप्रलीयतेऽनेनेतिप्रलयः संहर्त्ताप्यहमेवेतिभावः ॥ ६ ॥ यस्मादेवंतस्मान्मत्तइति । मत्तःसकाशात्परतरंश्रेष्ठं जगतःसृष्टिसंहारयोः स्वतंत्रंकारणंकिंचिदपिनास्ति । स्थितिहेतुरप्यहमेवेत्याह । मयीति । मयिसर्वमिदंजगत्प्रोतंग्रथि

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥
रसोऽहमप्सु कौंतेय प्रभाऽस्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥
पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥९ ॥

तमाश्रितमित्यर्थः । दृष्टांतः स्पष्टः ॥ ७ ॥ जगतः स्थितिहेतुत्वंप्रपंचयति रसोऽहमितिपंचभिः । अप्सुरसोऽहंरसतन्मात्ररूपयाविभूत्यातदाश्रयत्वेनाप्सुस्थितोऽहमित्यर्थः । तथाशशिसूर्ययोःप्रभास्मिचंद्रेऽर्केचप्रकाशरूपयाविभूत्यातदाश्रयत्वेनस्थितोऽहमित्यर्थः । एवमुत्तरत्रापिद्रष्टव्यम् । सर्वेषुवेदेषुवैखरीरूपेषुतन्मूलभूतःप्रणवओंकारोऽस्मि   खेआकाशेशब्दतन्मात्ररूपोऽस्मि   नृषुपुरुषेषुपौरुषमुद्यमोऽस्मि । उद्यमेहिपुरुषास्तिष्ठंति ॥ ८ ॥ किंचपुण्यइति । पुण्योऽविकृतोगंधःगंधतन्मात्रंपृथिव्याआश्रयभूतमहमित्यर्थः । यद्वा विभूति

रूपेणाश्रयत्वस्यविवक्षितत्वात्सुरभिगंधस्यैवोत्कृष्टतयाविभूतित्वात्पुण्योगंधइत्युक्तम् तथाविभावसावग्नौयत्तेजःसहजादीप्तिस्तदहम् सर्वभूतेषुजीवनंप्राणधारणमायुरहमित्यर्थः । तपस्विषुवानप्रस्थादिषुद्वंद्वसहनरूपंतपोऽस्मि ॥ ९ ॥ किंच बीजमिति । सर्वेषांचराचराणांभूतानांबीजंसजातीयकार्योत्पादनसामर्थ्यंसनातनंनित्यमुत्तरोत्तरसर्वकार्येष्वनुस्यूतंतदेवबीजंमद्विभूतिंविद्धि नतुप्रतिव्यक्तिविनश्यत् तथाबुद्धिमतांबुद्धिःप्रज्ञाहमस्मि तेजस्विनांतेजःप्रागल्भ्यमहम् ॥ १० ॥ किंचबलमिति । कामोऽप्राप्तेवस्तुन्यभिलाषोराजसः रागः

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥ १० ॥
बलं बलवतामस्मि कामरागविवर्जितम् ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥
ये चैव सात्विका भावा राजसास्तामसाश्च ये ॥ मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥

पुनरभिलषितेऽर्थेप्राप्तेऽपिपुनरधिकेऽर्थेचित्तरंजनात्मकस्तृष्णापरपर्यायस्तामसस्ताभ्यांविवर्जितंबलवतांबलमस्मि सात्विकंस्वधर्मानुष्ठानसामर्थ्यमहमित्यर्थः । स्वधर्मेणाविरुद्धःस्वदारेषुपुत्रोत्पत्तिमात्रोपयोगीकामोऽहम् ॥ ११ ॥ किंच ।येचेति येचान्येऽपिसात्विकाभावाः शमदमादयः राजसाश्चद्वेषदर्पादयः तामसाश्चशोकमोहादयःप्राणिनांस्वकर्मवशाज्जायंते तान्सर्वान्मत्तएवजातानितिविद्धि मदीयप्रकृतिगुणत्रयकार्यत्वात् । एवमपितेष्वहंनवर्त्ते जीववत्तदधीनोऽहंनभवामीत्यर्थः । तेतुमदधीनाःसंतोमयिवर्त्ततइत्यर्थः ॥ १२ ॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ १४ ॥
न मां दुष्कृतिनो मूढाःप्रपद्यंते नराधमाः ॥ माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५ ॥

एवंभूतंत्वांपरमेश्वरमयंजनः किमितिनजानातीत्यंतआह।त्रिभिरिति।त्रिभिस्त्रिविधैरेभिःपूर्वोक्तैः गुणमयैःकामलोभादिभिर्गुणविकारैःभावैः स्वभावैर्मोहितमिदंजगत् अतोमांनाभिजानाति।कथंभूतम् एभ्योभावेभ्यःपरम् एभिरसंस्पृष्टम् एतेषांनियंतारम् अतएवाव्ययं निर्विकारमित्यर्थः ॥ १३ ॥ केतर्हित्वांजानंतीत्यतआह । दैवीहीति।दैवीअलौकिकी अत्यद्भुतेत्यर्थः।गुणमयीसत्वादिगुणविकारात्मिका ममपरमेश्वरस्यशक्तिर्मायादुरत्ययादुस्तरा हिप्रसिद्धमेतत् । तथापियेमामेवेत्येवकारेणाव्यभिचारिण्याभक्त्याप्रपद्यंतेभजंति तेमायामेतांदुस्तरामपितरंति ततोमांजानंतीतिभावः॥ १४ ॥किमितितर्हिसर्वेत्वामेवनभजंतितत्राह । नमामिति । नरेषुयेऽधमास्तेमांनप्रपद्यंतेनभजंति।अधमत्वेहेतुः । मूढाः विवेकशून्याः । तत्कुतः । दुष्कृतिनःपापशीलाः अतोमाययापहृतंनिरस्तंशास्त्राचार्योपदेशाभ्यां जातमपिज्ञानंयेषांतेतथा अतएवं दंभोदर्पोऽभिमानश्चक्रोधःपारुष्यमेवचेत्यादिनावक्ष्यमाणमासुरंभावंस्वभावंप्राप्ताःसंतो नमां भजंति ॥ १५ ॥

सुकृतिनस्तुमांभजंतितेचसुकृततारतम्येनचतुर्विधाइत्याह । चतुर्विधाइति । पूर्वजन्मसुयेकृतपुण्याजनास्तेमांभजंति तेतु चतुर्विधाः आर्त्तोरोगाद्यभिभूतः सयदिपूर्वकृतपुण्यस्तर्हिमांभजति । अन्यथाक्षुद्रदेवताभजनेनसंसरति एवमुत्तरत्रापिद्रष्टव्यम् । जिज्ञासुरात्मज्ञानेच्छुः अर्थार्थीअत्रवापरत्रवाभोगसाधनभूतार्थलिप्सुः ज्ञानीचआत्मवित् ॥१६॥ एतेषांमध्येज्ञानीश्रेष्ठइत्याह । तेषामिति । तेषांमध्येज्ञानीविशिष्टः । तत्रहेतवः । नित्ययुक्तःसदामन्निष्ठः एकस्मिन्मय्येवभक्तिर्यस्यसः ज्ञानिनोदेहाद्यभिमानाभावेनचित्तविक्षेपाभावान्नित्ययुक्तत्वमेकांत

चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन ॥ आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥१७॥
उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्॥आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम्॥१८॥

भक्तित्वंचसंभवतिनान्यस्य अतएवहितस्याहमत्यंतंप्रियः सचमम तस्मादेतैर्नित्ययुक्तत्वादिभिश्चतुर्भिर्हेतुभिःसउत्तमइत्यर्थः ॥ १७ ॥ तर्हिकिमितरेत्रयस्त्वद्भक्ताःसंसरंतिनहिनहीत्याह । उदाराइति । सर्वेंप्येतेउदाराःमहांतः मोक्षभाजएवेत्यर्थः।ज्ञानीपुनरात्मैवेतिमेमतंनिश्चयः।हियस्मात्सज्ञानीयुक्तात्मामदेकचित्तःसन् नविद्यतेउत्तमायस्यास्तामनुत्तमांसर्वोत्तमांगतिंमामेवास्थितः।आश्रितवान् मद्व्यतिरिक्तमन्यत्फलंनमन्यतइत्यर्थः ॥ १८ ॥

एवंभूतोमद्भक्तोऽतिदुर्लभइत्याह ॥ बहूनामिति । बहूनांजन्मनांकिंचित्किंचित्पुण्योपचयेनांतेचरमेजन्मनिज्ञानवान्सन्सर्वमिदंचराचरंवासुदेवएवेतिसर्व्वात्मदृष्ट्यामांप्रपद्यते भजति अतःसमहात्माऽपरिच्छिन्नदृष्टिःसुदुर्लभः ॥ १९ ॥ तदेवंकामिनोऽपिसंतःकामप्राप्तयेपरमेश्वरंमामेवभजंति तेकामान्प्राप्यशनैर्मुच्यंतइत्युक्तम् । येत्वत्यंतंराजसास्तामसाश्चकामाभिभूताःक्षुद्रदेवताःसेवंते तेसंसरंतीत्याह कामैरितिचतुर्भिः । येतुतैस्तैःपुत्रकीर्तिशत्रुजयादिविषयैःकामैरपहृतविवेकाःसंतः अन्याःक्षुद्राःभूतप्रेतयक्षादिदेवताभजंति । किंकृत्वा ।

बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ १९ ॥
कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः ॥ तंतं नियममास्थाय प्रकृत्या नियताः स्वया ॥ २० ॥
योयो यांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति॥तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम्॥२१॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहितान्हितान् ॥ २२ ॥

तत्तद्देवताराधनेयोनियमउपवासादिलक्षणस्तंतंनियमंस्वीकृत्य । तत्रापिस्वकीययाप्रकृत्यापूर्वाभ्यासवासनया नियताःसंतोदेवताविशेषंभजंति ॥ २० ॥ योयोयां यामिति । तेषांमध्ये योयोभक्तः यांयांतनुंदेवतारूपां मदीयामेवमूर्त्तिंश्रद्धयार्चितुमिच्छतिप्रवर्तते तस्यतस्य भक्तस्यतत्तन्मूर्त्तिविषयांतामेवश्रद्धामचलांदृढामहमंतर्यामीविदधामिकरोमि ॥ २१ ॥ ततश्च सतयेति । सभक्तस्तयादृढयाश्रद्ध

यातस्यास्तनोराराधनमीहते करोति।ततश्चयेसंकल्पिताःकामास्तान्कामांस्ततोदेवताविशेषाँल्लभते किंतु मयैवतत्तद्देवतांतर्यामिणाविहितान्निर्मितान् हिस्फुटमेवतत्तद्देवतानामपिमदधीनत्वान्ममभूर्तित्वाच्चेत्यर्थः ॥ २२ ॥ तदेवं यद्यपिसर्वाअपिदेवताममैवमूर्त्तयः अतस्तदाराधनमपिवस्तुतोमदाराधनमेव तत्तत्फलदातापिचाहमेव तथापिसाक्षान्मद्भक्तानांचतेषांफलवैषम्यंभवतीत्याह। अंतवत्त्विति। अल्पमेधसांपरिच्छिन्नदृष्टीनांमयादत्तमपितत्फलमन्तवत् विनाशिभवति।तदेवाह। देवान्यजंतीतिदेवयजः तेदेवानंतवतोयांति मद्भक्तास्तु मामनाद्यंतंपरमानंदंप्राप्नुवंति ॥ २३ ॥ ननुचसमानेप्रयासेमहतिचफलविशेषेसतिसर्वेऽपि किमितिदेवतांतरंहित्वात्वामेवनभजंतित

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ २३ ॥
अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ॥ परं भावमजानंतो ममाव्ययमनुत्तमम् ॥ २४ ॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥ २५ ॥

त्राह । अव्यक्तमिति । अव्यक्तंप्रपंचातीतंमांव्यक्तिंमनुष्यमत्स्यकूर्मादिभावंप्राप्तमल्पबुद्धयोमन्यंते । तत्रहेतुः। ममपरंभावंस्वरूपमजानंतः। कथंभूतम् । अव्ययंनित्यं नविद्यतेउत्तमोयस्मात्तंभावम् । अतोजगद्रक्षार्थंलीलयाविष्कृतनानाविशुद्धोर्जितसत्वमूर्तिंमांपरमेश्वरंस्वकर्मनिर्मितभौतिकदेहं देवतांतरसमंपश्यंतोमंदमतयोमांनातीवाद्रियंते प्रत्युताक्षिप्रफलंदेवतांतरमेवभजंति तेचोक्तप्रकारेणअंतवत्फलंप्राप्नुवंतीत्यर्थः ॥ २४ ॥ तेषांस्वाज्ञानेहेतुमाह । नाहमिति।सर्वस्यलोकस्यनाहंप्रकाशः । प्रकटोनभवामि किंतुमद्भक्तानामेव य

तोयोगमाययासमावृतः योगोयुक्तिः मदीयःकोऽप्यचिंत्यप्रज्ञाविलासः सएवमाया अघटमानघटनाचातुर्यं अनयासंच्छन्नः अतएव मत्स्वरूपज्ञानेमूढःसन्नयंलोकः अजमव्ययंचमांनजानाति ॥ २५ ॥ सर्वोत्तमंमत्स्वरूपंअजानंतइत्युक्तम् । तदेवस्वस्यसर्वोत्तमत्वम नावृतज्ञानशक्तित्वेनदर्शयन्नन्येषामज्ञानमेवाह । वेदेति । समतीतानिविनष्टानिवर्त्तमानानिभावीनिचत्रिकालवर्त्तीनिभूतानिस्थावरजंगमा निसर्वाण्यहंवेद जानामि मायाश्रयत्वान्मम तस्याःस्वाश्रयव्यामोहकत्वाभावातृइतिप्रसिद्धम् । मांतुनकोपिवेत्ति मन्मायामोहितत्वात्

वेदाहं समतीतानि वर्त्तमानानि चार्जुन ॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥
इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥
येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ २८ ॥

प्रसिद्धंहिलोकेमायायाःस्वाश्रयाधीनत्वमन्यमोहकत्वंच ॥ २६ ॥ तदेवंमायाविषयत्वेनजीवानांपरमेश्वराज्ञानमुक्तम् तस्यैवाज्ञानस्यदृढत्वेकारणमाह । इच्छाद्वेषसमुत्थेनेति । सृज्यतइतिसर्गः सर्गेस्थूलदेहोत्पत्तौसत्यां तदनुकूलेइच्छा तत्प्रतिकूलेचद्वेषः ताभ्यांसमुत्थःस मुद्भूतोयःशीतोष्णसुखदुःखादिद्वंद्वनिमित्तोमोहोविवेकभ्रंशःतेनसर्वभूतानिसंमोहंचअहमेवसुखीदुःखीचेतिगाढतरमभिनिवेशंप्राप्नुवंतिअत स्तानिमज्ज्ञानाभावान्नमांजानंतीतिभावः ॥ २७ ॥ कुतस्तर्हिकेचनत्वांभजंतोदृइयंतेतत्राह । येषामिति । येषांतुपुण्याचरणशीलानां

सर्वंप्रतिबंधकंपापंअंतगतम् नष्टम् तेद्वंद्वनिमित्तेनमोहेननिर्मुक्ताः दृढव्रताएकांतिनःसंतोमांभजंते ॥ २८ ॥ एवंचमांभजंतस्तेसर्वं विज्ञेयंविज्ञायकृतार्थाभवंतीत्याह । जरामरणेति । जरामरणयोर्निरासार्थंमामाश्रित्ययेप्रयतंतेतेतत्परंब्रह्मविदुःकृत्स्नमध्यात्मंचविदुः येनतत्प्राप्तव्यंतंदेहादिव्यतिरिक्तंशुद्धमात्मानंचजानंतीत्यर्थः । तत्साधनभूतमखिलंसरहस्यंकर्मचजानंति ॥ २९ ॥ नचैवंभूतानांयोगभ्रंशशंकापीत्याह । साधिभूताधिदैवमिति । अधिभूतादिशब्दानामर्थंभगवानेवानंतराध्यायेव्याख्यास्यति अधिभूतेनाधिदैवेनचसहाधियज्ञे

जरामरणमोक्षाय मामाश्रित्य यतंति ये ॥ ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥२९॥
साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ॥ प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ३० ॥
इति श्रीमद्भगव० ज्ञानविज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

नचसहितंयेमांभजंति तेयुक्तचेतसःमय्यासक्तमनसः प्रयाणकालेऽपिमरणसमयेऽपिमांविदुर्जानंति नतुतदापिव्याकुलीभूयमांविस्मरंति अतोमद्भक्तानांनयोगभ्रंशशंकेत्यर्थः ॥ ३० ॥ कृष्णभक्तैरयत्नेनब्रह्मज्ञानमवाप्यते ॥ इतिविज्ञानयोगाख्येसप्तमेसंप्रकाशितम् ॥ १ ॥ इतिसुबोधिन्यां टीकायां सप्तमोऽध्यायः ॥ ७ ॥

ब्रह्मकर्माधिभूतादिविदुःकृष्णैकचेतसः ॥ इत्युक्तंब्रह्मकर्मादिस्पष्टमष्टमउच्यते ॥१॥ पूर्वाध्यायांतेभगवतोपाक्षिप्तानांब्रह्माध्यात्मादिसप्तानां पदार्थानांतत्त्वंजिज्ञासुरर्जुनउवाच किंतद्ब्रह्मेतिद्वाभ्याम्। स्पष्टोर्थः॥१॥किंच अधियज्ञइति।अत्रदेहेयोयज्ञोवर्त्ततेतस्मिन्कोऽधियज्ञः अधिष्ठाताप्रयोजकःफलदाताचकइत्यर्थः।स्वरूपंपृष्ट्वा अधिष्ठानप्रकारंपृच्छति कथंकेनप्रकारेणासावस्मिन्देहेस्थितोयज्ञमधितिष्ठतीत्यर्थः।यज्ञग्रहणंसर्वकर्मणामुपलक्षणार्थकम्। अंतकालेचानियताचित्तैःपुरुषैःकथंकेनोपायेनज्ञेयोऽसि ॥ २ ॥ प्रश्नक्रमेणोत्तरंश्रीभगवानुवाच अक्षरमिति

॥ अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ॥ अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥
॥ १ ॥ अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ॥ प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ २ ॥
श्रीभगवानुवाच ॥अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥३॥

त्रिभिः। नक्षरतिनचलतीत्यक्षरम् ननुजीवोऽप्यक्षरस्तत्राह।परमंयदक्षरंजगतांमूलकारणंतद्ब्रह्म “एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंती” ति श्रुतेःस्वस्यैवब्रह्मणएवांशतोजीवरूपेणभवनंस्वभावःसएवात्मानंदेहमाधिकृत्यभोक्तृत्वेनवर्त्तमानोऽध्यात्मशब्देनोच्यतइत्यर्थः । भूतानां जरायुजादीनांभावउत्पत्तिः उद्भवश्चउत्कृष्टत्वेनभवनमुद्भवः “आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततः प्रजा”इत्युक्तक्रमेणवृद्धिः तौभूतभावोद्भवौ करोतियःविसर्गःदेवतोद्देशेनद्रव्यत्यागरूपोयज्ञःसर्वकर्मणामुपलक्षणमेतत्सकर्मशब्दवाच्यः॥ ३ ॥

किंच । अधिभूतमिति । क्षरोविनश्वरोभावोदेहादिपदार्थोभूतंप्राणिमात्रमधिकृत्यभवंतीत्यधिभूतमुच्यते पुरुषोवैराजःसूर्यमंडलमध्यवर्त्तीस्वांशभूतसर्वदेवतानामधिपतिरधिदैवतमुच्यते अधिदैवतमधिष्ठात्रीदेवता “ सवैशरीरीप्रथमःसवैपुरुषउच्यते ॥ आदिकर्त्तासभूतानांब्रह्माग्रेसमवर्त्तते ” तिश्रुतेः अत्रास्मिन्देहेंऽतर्यामित्वेनास्थितोऽहमेवाधियज्ञोयज्ञाधिष्ठात्रीदेवता यज्ञादिकर्मप्रवर्त्तकस्तत्फलदाताचकथमित्यस्योत्तरमनेनैवोक्तंद्रष्टव्यम् । अंतर्यामिणोऽसंगत्वादिभिर्गुणैर्जीववैलक्षण्येनदेहांतर्वर्त्तित्वस्यप्रसिद्धत्वात् । तथाचश्रुतिः “द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते । तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीती ” ति । देहभृतांमध्येश्रेष्ठइतिसंबोधयन्त्वमप्येवंभूतमंतर्यामिणंपराधीनस्वप्रवृत्तिनिवृत्त्यन्वयव्यतिरेकाभ्यांबोद्धुमर्हसीतिसूचयति ॥ ४ ॥ प्रयाणकालेचकथंज्ञेयोऽसीत्यनेनपृष्टमंतकालज्ञानोपायंतत्फलंचदर्शयति । अंतकालइति । मामेवोक्तलक्षणमंतर्यामिरूपंपरमेश्वरंस्मरन्देहंत्यक्त्वायःप्रकर्षेणार्चिरादिमार्गेणयाति समद्भावंमद्रूपतांयाति अत्रचसंशयोनास्ति स्मरणंज्ञानोपायोमद्भावापत्तिश्चफलमित्यर्थः ॥ ५ ॥ नकेवलंमांस्मरन्मद्भावंप्रा

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ॥ अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ४ ॥
अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥ ५ ॥
यंयं वापि स्मरन् भावं त्यजत्यंते कलेवरम् ॥ तं तमेवैति कौंतेय सदा तद्भावभावितः ॥ ६ ॥

प्नोतीतिनियमः किंतर्हि यंयमिति । यंयंभावंदेवतांतरंवान्यमपिवाअंतकालेस्मरन्देहंत्यजति तंतमेवस्मर्यमाणंभावंप्राप्नोति । अंतकालेभावविशेषस्मरणेहेतुः।सदेति।सर्वदातस्यभावोभावनानुचिंतनंतेनभावितोवासितचित्तः ॥ ६ ॥ तस्मादिति।यस्मात्पूर्ववासनैवांतकालेस्मृतिहेतुः नहितदाविवशस्यस्मरणोद्यमः संभवति।तस्मात्सर्वदामामनुस्मरानुचिंतय संततस्मरणंचचित्तशुद्धिंविनानभवति अतोयुद्ध्यचयुद्ध्यस्वचित्तशुद्ध्यर्थंयुद्धादिकंस्वधर्मंचानुतिष्ठेत्यर्थः । एवंमय्यर्पितंमनः संकल्पात्मकंबुद्धिश्चव्यवसायात्मिकायेनत्वया सत्वंमामेवप्राप्स्यसि

तस्मात्सर्वेषु कालेषु मामनुस्मर युद्ध्य च ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥ ७॥ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ॥ परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥ ८ ॥ कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्यधातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥

असंशयःसंशयोऽत्रनास्ति ॥ ७ ॥ संततस्मरणस्यचाभ्यासोंऽतरंगसाधनमितिदर्शयन्नाह।अभ्यासेति । अभ्यासःसजातीयप्रत्ययप्रवाहः स एवयोगउपायस्तेनयुक्तेनैकाग्रेण अतएवनान्यंविषयंगंतुंशीलंयस्यतेनचेतसादिव्यंद्योतनात्मकंपरमंपुरुषंपरमेश्वरमनुचिंतयन्हेपार्थतंमेवयातीति ॥८॥पुनरप्यनुचिंतनीयंपुरुषंविशिनष्टि कविमितिद्वाभ्याम् । कविंसर्वज्ञम् सर्वविद्यानिर्मातारं पुराणमनादिसिद्धम् अनुशासितारंनियंतारम् अणोःसूक्ष्मादप्यणीयांसमतिसूक्ष्मम् आकाशकालदिग्भ्योप्यतिसूक्ष्मतरम् सर्वस्यधातारंपोषकम् अपरिमितमाहिमत्वा

दर्चित्यरूपम् मलीमसयोर्मनोबुद्ध्योरगोचरं आदित्यवत्स्वपरप्रकाशात्मकोवर्णःस्वरूपंयस्यतम् तमसःप्रकृतेःपरस्ताद्वर्त्तमानम् "वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तादि"तिश्रुतेः ॥ ९ ॥ सप्रपंचप्रकृतिंभित्त्वायस्तिष्ठति एवंभूतंपुरुषमंतकालेभक्तियुक्तोनिश्चलेनाविक्षेपरहितेनमनसायोऽनुस्मरेत् । मनोनैश्चल्येहेतुः । योगबलेनसम्यक्सुषुम्नामार्गेणभ्रुवोर्मध्येप्राणमावेश्येति । सतंपरंपुरुषंपरात्मस्वरूपं दिव्यंद्योतनात्मकंप्राप्नोति ॥ १० ॥ केवलादभ्यासयोगादपिप्रणवाधारमभ्यासमंतरंगंविधित्सुःप्रतिजानीते । यदक्षर

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव॥भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्स तं परं पुरुषमुपैति
दिव्यम्१०यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः॥यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण
प्रवक्ष्ये११सर्वद्वाराणि संयम्य मनो हृदि निरुद्ध्य च॥मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्॥१२॥

मिति । यदक्षरंवेदांतज्ञावदंति । "एतस्यवाक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठत"इतिश्रुतेः । वीतोरागोयेभ्यस्तेवीतरागायतयः प्रयत्नवंतोयद्विशंति यच्चज्ञातुमिच्छंतोगुरुकुलेब्रह्मचर्यंचरंति तत्तेतुभ्यं पदंपद्यतेगम्यतेइतिपदंप्राप्यंसंग्रहेणसंक्षेपेणप्रवक्ष्येतत्प्राप्त्युपायंकथयिष्यामीत्यर्थः ॥ ११ ॥ प्रतिज्ञातमुपायंसांगमाह सर्वेतिद्वाभ्याम् । सर्वाणींद्रियद्वाराणिसंयम्यप्रत्याहृत्यचक्षुरादिभिर्बाह्यविषयग्रहणमकुर्वन्नित्यर्थः । मनश्चहृदिनिरुद्ध्यबाह्यविषयस्मरणमकुर्वन्नित्यर्थः । मूर्ध्निभ्रुवोर्मध्ये प्राणमाधाययोगस्यधारणांस्थैर्य

मास्थितआश्रितवान्सन् ॥ १२ ॥ ओमिति । ओमित्येकंयदक्षरंतदेव ब्रह्मवाचकत्वाद्वाप्रतिमादिवद्ब्रह्मप्रतीकत्वाद्वाब्रह्म तद्व्याहरन्नुच्चारयन् तद्वाच्यंचमामनुस्मरन्नेवदेहंत्यजन्यः प्रकर्षेणयाति । अर्चिरादिमार्गेण सपरमांश्रेष्ठांमद्गतिंयातिप्राप्नोति ॥ १३ ॥ एवं चांतकालेधारणयामत्प्राप्तिर्नित्याभ्यासवशतएवभवति नान्यस्येतिपूर्वोक्तस्यसमाहितस्याहंसुखेनलभ्योऽस्मि नान्यस्य ॥ १४ ॥ यद्यप्येवंत्वंसुलभोऽसिततःकिमतआह । मामिति । उक्तलक्षणामहात्मानोमद्भक्तामांप्राप्यपुनर्दुःखाश्रयमनित्यंचजन्मनप्राप्नुवंति यतस्ते

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्॥यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥ १३॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः॥तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः॥१४॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥
आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥ मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

परमांसम्यक्सिद्धिंमोक्षमेवप्राप्ताः पुनर्जन्मदुःखानांचालयंस्थानंतेमामुपेत्यनप्राप्नुवंतीतिवा ॥ १५ ॥ एतदेवसर्वेष्वपिलोकेषुपुनरावृत्तिंदर्शयन्निर्धारयति । आब्रह्मेति । ब्रह्मणोभुवनंवासस्थानंब्रह्मलोकस्तमभिव्याप्य सर्वेलोकाःपुनरावर्त्तनशीलाः ब्रह्मलोकस्यापिविनाशित्वात्तत्प्राप्तानामनुत्पन्नज्ञानानामवश्यंभाविपुनर्जन्म यएवंक्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकंप्राप्ताः तेषामेवतत्रोत्पन्नज्ञानानां

ब्रह्मणासहमोक्षोनान्येषाम् तथाच“ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे । परस्यांतेकृतात्मानःप्रविशंतिपरंपदम्”परस्यांतेब्रह्मणःपरमायुषोंऽते कृतात्मानोब्रह्मभावापादितमनोवृत्तयः कर्मद्वारेणयेषांब्रह्मलोकप्राप्तिस्तेषांनमोक्षइतिपरिनिष्ठितिः मामुपेत्यवर्त्तमानानांतु पुनर्जन्मनास्त्येवेत्यर्थः ॥ १६ ॥ ननुच“तपस्विनोदानशीलावीतरागास्तितिक्षवः।त्रिलोक्याउपरिस्थानंलभंतेशोकवर्जितमि”त्यादिपुराणवाक्यैस्त्रिलोक्याःसकाशान्महर्लोकादीनामुत्कृष्टत्वंगम्यते । विनाशित्वेचसर्वेषामवैशिष्ट्येकथमसौविशेषः स्यादित्याशंक्य बहुकल्पकालावस्थायित्वनिमित्तोऽसौविशेषइत्याशयेनस्वमानेनशतवर्षायुषोब्रह्मणोऽहन्यहनित्रिलोक्याउत्पत्तिर्निशिनिशिचलयोभवतीति दर्शयिष्यन्ब्रह्म

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥ १७ ॥

णोऽहोरात्रयोःप्रमाणमाह । सहस्रेति । सहस्रंयुगानिपर्यंतोऽवसानंयस्यतद्ब्रह्मणोयदहस्तद्येविदुःयुगसहस्रंअंतोयस्यास्तांरात्रिंच योगबलेनयेविदुस्तएवसर्वज्ञाजनाअहोरात्रविदः येषांतुकेवलंचंद्रार्कगत्यैवज्ञानंतेतथाअहोरात्रविदोनभवंति अल्पदर्शित्वात् । युगशब्देनात्र चतुर्युगमभिप्रेतम् “चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यते”इतिविष्णुपुराणोक्तेः । ब्रह्मणइतिचमहर्लोकादिवासिनामप्युपलक्षणार्थम् । तत्रायं कालगणनाप्रकारः मनुष्याणांयद्वर्षंतद्देवानामहोरात्रं तादृशैः अहोरात्रैः पक्षमासादिकल्पनयाद्वादशभिर्वर्षसहस्रैश्चतुर्युगंभवति । चतुर्युगसहस्रंचब्रह्मणोदिनम् तावत्परिमाणैवरात्रिः तादृशैश्चाहोरात्रैःपक्षमासादिक्रमेणवर्षशतंब्रह्मणःपरमायुरिति ॥ १७ ॥

ततःकिमतआह । अव्यक्तादिति । कार्यस्याव्यक्तंरूपंकारणात्मकंतस्मादव्यक्तात्कारणरूपात् व्यज्यंतेअभिव्यज्यंतइतिव्यक्तयश्चरा
चराणिभूतानिप्रादुर्भवंति कदा अहरागमेब्रह्मणोदिनस्योपक्रमे तथारात्रेरागमेब्रह्मशयने तस्मिन्नेवाव्यक्तसंज्ञकेकारणरूपेप्रलयंयां
तियद्वातेऽहोरात्रविदइत्येतन्नविधीयते । किंतु तेप्रसिद्धाअहोरात्रविदोजनायद्ब्रह्मणोऽहर्विदुस्तस्याह्नआगमेअव्यक्ताद्व्यक्तयःप्रभवंति
यांचरात्रिंविदुस्तस्यारात्रेरागमेप्रलीयंतेइतिद्वयोरन्वयः ॥ १८ ॥ तत्रचकृतनाशाकृताभ्यागमशंकांवारयन्वैराग्यार्थंसृष्टिप्रलय

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥
भूतग्रामः स एवायं भूत्वाभूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥
परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः ॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

प्रवाहस्याविच्छेदंदर्शयति । भूतेति । भूतानांचराचरप्राणिनांग्रामःसमूहोयःप्रागासीत्सएवायमहरागमेभूत्वारात्रेरागमेप्रलीयते प्रलीयपु
नरप्यहरागमेऽवशःकर्मादिपरतंत्रःप्रभवति । नान्यइत्यर्थः ॥ १९ ॥ लोकानामनित्यत्वंप्रपंच्यपरमेश्वरस्वरूपस्यनित्यत्वंप्रपंचयति प
रइतिद्वाभ्याम् । तस्माच्चराचरकारणभूतादव्यक्तात्परः तस्यापिकारणभूतोयोऽन्यस्तद्विलक्षणोऽव्यक्तः चक्षुराद्यगोचरोभावः सनातनः
अनादिः सतु सर्वेषुकार्यकारणलक्षणेषुभूतेषुनश्यत्स्वपि नविनश्यति ॥ २० ॥

अव्यक्तोऽक्षरइत्युक्तस्तमाहुः परमां गतिम् ॥ यं प्राप्य न निवर्त्तंते तद्धाम परमं मम ॥ २१ ॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ यस्यांतःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ॥ प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

अविनाशेप्रमाणंदर्शयन्नाह । अव्यक्तइति । यो भावः अव्यक्तोऽतींद्रियोऽक्षरःप्रवेशनाशशून्यइति “तथाक्षरात्संभवतीदंविश्वमि”त्यादिश्रुतिष्वक्षरइत्युक्तः तंपरमांगतिंगम्यंपुरुषार्थमाहुः“पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरि ”त्यादिश्रुतयः परमगतित्वमेवाह।यंप्राप्यपुनर्ननिवर्त्ततइति । तच्चममैवधामस्वरूपं ममैवेत्युपचारेषष्ठी राहोः शिरइतिवत् । अतोऽहमेवपरमागतिरित्यर्थः ॥ २१ ॥ तत्प्राप्तौचभक्तिरंतरंगोपायइत्युक्तमेवाह । पुरुषइति । सचाहंपरःपुरुषः अनन्यया नविद्यते अन्यःशरणत्वेनयस्यास्तया एकांतभक्त्यैवलभ्योनान्यथा । परत्वमेवाह । यस्यकारणभूतस्यांतर्मध्येभूतानिस्थितानि । येनचकारणभूतेनसर्वमिदंजगत्ततंव्याप्तम् ॥ २२ ॥ तदेवंपरमेश्वरोपासकाःतत्पदंप्राप्यननिवर्त्तंते अन्येत्वावर्त्तंतइत्युक्तम् । तत्रकेनमार्गेणगतानावर्त्तंतेकेनवागताश्चावर्त्तंतइत्यपेक्षायामाह । यत्रेति । यत्रयस्मिन्कालेप्रयातायोगिनोऽनावृत्तिंयांतियस्मिंश्चकालेप्रयाताआवृत्तिंयांति तंकालंवक्ष्यामीत्यन्वयः । अत्रचरश्म्यनुसारी अतश्चायनेऽपिदक्षिणइतिसूचितन्यायेनोत्तरायणादिकालविशेषस्मरणस्याविवक्षितत्वात् । कालशब्देनकालाभिमानिनीभिरातिवाहिकीभिर्देवताभिः

प्राप्योमार्गउपलक्ष्यते अतोऽयमर्थः यस्मिन्कालाभिमानिदेवतोलक्षितेमार्गेंप्रयातायोगिनउपासकाः कर्मिणश्चयथाक्रममनावृत्तिमावृत्तिंच यांतितंकालाभिमानिदेवतोपलक्षितंमार्गंकथयिष्यामीति अग्निज्योतिषोः कालाभिमानित्वाभावेऽपिभूयसामहरादिशब्दोक्तानांकालाभिमानित्वात्तत्साहचर्यादाम्रवनमित्यादिवत्कालशब्देनोपलक्षणमविरुद्धम् ॥ २३ ॥ तत्रानावृत्तिमार्गमाह।अग्निरिति।अग्निज्योतिःशब्दाभ्यां तेऽर्चिषमभिसंभवंतीतिश्रुत्युक्तार्चिरभिमानिनीदेवतोपलक्ष्यते अहरितिदिवसाभिमानिनी। शुक्लइति शुक्लपक्षाभिमानिनीउत्तरायणरूपाः षण्मासाइत्युत्तरायणाभिमानिनीएतच्चान्यासामपिश्रुत्युक्तानांसंवत्सरदेवलोकादिदेवतानामुपलक्षणार्थम् । एवंभूतोमार्गःतत्रप्रयातागताः

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्॥तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदोजनाः॥ २४ ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्॥तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥२५॥

भगवदुपासकाजनाः ब्रह्मप्राप्नुवंति यतस्तेब्रह्मविदः तथाचश्रुतिःतेर्चिषमभिसंभवंति अर्चिषोहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्यएतिमासेभ्योदेवलोकमिति नहिसद्योमुक्तिभाजांसम्यग्दर्शननिष्ठानांगतिर्वाक्कचिदस्ति नतस्यप्राणाउत्क्रामंतीतिश्रुतेः ॥ २४ ॥ आवृत्तिमार्गमाह । धूमइति । धूमाभिमानिनींदेवतांरात्र्यादिशब्दैश्चपूर्ववदेवरात्रिकृष्णपक्षदक्षिणायनरूपषण्मासाभिमानिन्यस्तिस्रोदेवताउपलक्ष्यंते एताभिर्देवताभिरुपलक्षितोयोमार्गस्तत्रप्रयातःकर्मयोगीचांद्रमसंज्योतिस्तदुपलक्षितंस्वर्गलोकंप्राप्यतत्रेष्टापूर्तकर्मफलंभुक्त्वापुनरावर्त्ततेअत्रापिश्रुतिः । “तेधूममभिसंभवंतिधूमाद्रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्यएति

मासेभ्यः पितृलोकं पितृलोकाच्चंद्रं ते चंद्रं प्राप्यान्नं भवंती"त्यादिः । तदेवं निवृत्तिकर्मसहितोपासनया क्रममुक्तिः काम्यकर्मभिश्च स्वर्गभोगानंतरमावृत्तिः निषिद्धकर्मभिस्तु नरकभोगानंतरमावृत्तिः क्षुद्रकर्मणां जंतूनां त्वत्रैव पुनः पुनर्जन्मेति द्रष्टव्यम् ॥ २५ ॥ उक्तौ मार्गावुपसंहरति शुक्लेति । शुक्लार्चिरादिगतिः प्रकाशमयत्वात् कृष्णा धूमादिगतिः तमोमयत्वात् एते गती मार्गौ ज्ञानकर्माधिकारिणो जगतः शाश्वते अनादी संमते संसारस्यानादित्वात् तयोरेकया शुक्लया निवृत्तिं मोक्षं याति अन्यया कृष्णया तु पुनरावर्त्तते ॥ २६ ॥ मार्गज्ञानफलं दर्श

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः ॥ २६ ॥
नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥
वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ॥ अत्येति तत्सर्वमिदं विदित्वा योगी परं
स्थानमुपैति चाद्यम् ॥ २८ ॥ इति श्रीमद्भ०सू०ब्रह्म०योग०श्रीकृ०महापुरुषयोगो नामाष्टमोऽध्यायः ॥ ८ ॥

यन् भक्तियोगमुपसंहरति । नैतेइति । एते सृती मार्गौ हे पार्थ मोक्षसंसारप्रापकौ जानन् कश्चिदपि योगी न मुह्यति । सुखबुद्ध्या स्वर्गादिफलं न कामयते किंतु परमेश्वरनिष्ठ एव भवतीत्यर्थः । स्पष्टमन्यत् ॥ २७ ॥ अध्यायार्थमष्टप्रश्नार्थनिर्णयं सफलमुपसंहरति । वेदेष्विति । वेदेष्वध्ययनादिभिः यज्ञेष्वनुष्ठानादिभिः तपस्सु कायशोषणादिभिः दानेषु सत्पात्रार्पणादिभिः यत्पुण्यफलमुपदिष्टं शास्त्रेषु तत्सर्वमत्येति । ततोऽ

पिश्रेष्ठंयोगैश्वर्यंप्राप्नोति किंकृत्वा इदमष्टप्रश्नार्थनिर्णयेप्रोक्तंतत्त्वंविदित्वा ततश्चयोगीज्ञानीभूत्वापरमुत्कृष्टमाद्यंजगन्मूलभूतस्थानं विष्णोःपरमंपदंप्राप्नोति ॥ २८ ॥ अष्टमेऽष्टविशिष्टेष्टसंपृष्टार्थाष्टनिर्णयैः ॥ अक्लिष्टमिष्टधामाप्तिःस्पष्टिताष्टमवर्त्मना ॥ १ ॥ इतिसुबोधिन्यांटीकायामष्टमोऽध्यायः ॥ ८ ॥ परेशःप्राप्यतेशुद्धभक्त्येतिस्थितमष्टमे ॥ नवमेतुतदैश्वर्यमत्याश्चर्यंप्रपंच्यते ॥ १ ॥ एवंतावत्सप्तमाष्टमयोःस्वीयंपारमेश्वरंतत्त्वंभक्त्यैवसुलभंनान्यथेत्युक्त्वेदानीमचिंत्यंस्वकीयमैश्वर्यंभक्तेश्चासाधारणप्रभावंप्रपंचयिष्यन् श्रीभगवानुवाच इदंत्विति विशेषेणज्ञायतेऽनेनेतिविज्ञानंउपासनंतत्साहितंज्ञानमीश्वरविषयमिदं अनसूयवेपुनःपुनःस्वमाहात्म्यमेवोपदिशतीत्येवंपरमकारुणिकेमयिदोषदृष्टिरहितायतेतुभ्यंवक्ष्यामि तुशब्दोवैशिष्ट्ये तदेवाह गुह्यतममित्यादिना गुह्यंधर्मज्ञानंततोदेहादिव्यतिरिक्तात्मज्ञानंगुह्यतरं ततोऽपिपरमात्मज्ञानंअतिरहस्यत्वाद्गुह्यतमम् यज्ज्ञात्वाऽशुभात्संसारान्मोक्ष्यसेसद्यएवमुक्तोभविष्यसि ॥ १ ॥ किंच राजविद्येति । इदंज्ञानंराजविद्या विद्यानांराजेतिराजविद्याचगुह्यानांराजेतिराजगुह्यं विद्यासुगोप्येषुचरहस्यं अतिश्रेष्ठमित्यर्थः राजदंतादित्वादुपसर्जनस्यपरत्वं राज्ञांविद्याराज्ञांगुह्यमितिवा उत्तमं पवित्रं अत्यंतपावनमिदं ज्ञानिनांप्रत्यक्षावगमंचप्रत्यक्षःस्पष्टो

श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभा
त् ॥ १ ॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्त्तुमव्ययम् ॥ २ ॥

ऽवगमोऽवबोधोयस्यतत्प्रत्यक्षावगमम् दृष्टफलमित्यर्थः धर्म्यंचधर्मादनपेतं सर्वधर्मफलत्वात् कर्तुंसुसुखंच सुखेनकर्त्तुंशक्यमित्यर्थः अव्ययं अक्षयफलत्वात् ॥ २ ॥ नन्वेदमस्यातिसुकरत्वेकेनामसंसारिणःस्युस्तत्राह । अश्रद्दधानाइति । अस्यभक्तिलक्षणज्ञानसहितस्यधर्मस्येति कर्मणिषष्ठ्यौ इमंधर्ममश्रद्दधानाआस्तिक्येनास्वीकुर्वंतः उपायांतरेणमत्प्राप्तयेकृतप्रयत्नाअपिमामप्राप्यमृत्युयुक्तेसंसारवर्त्मनि निवर्त्तंते मृत्युव्याप्तेसंसारमार्गेपरिभ्रमंतीत्यर्थः ॥ ३ ॥ तदेवंवक्तव्यतयाप्रस्तुतस्यज्ञानस्यस्तुत्याश्रोतारमभिमुखीकृ

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ॥ अप्राप्य मां निवर्त्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥ मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥
नच मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥ भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

त्यतदेवज्ञानंकथयाति । मयेतिद्वाभ्याम् ॥ अव्यक्ताअतींद्रियामूर्तिःस्वरूपंयस्यतादृशेनमयाकारणभूतेनसर्वमिदंजगत्ततंव्याप्तम् ॥ “तत्सृष्ट्वातदेवानुप्राविश”दितिश्रुतेः अतएवकारणभूतेमयितिष्ठंतीतिमत्स्थानिसर्वाणिचराचराणिभूतानि एवमापिघटादिषुस्वकार्येषुमृत्तिकेवतेषुभूतेषुनाहमवस्थितआकाशवदसंगत्वात् ॥ ४ ॥ किंच नचेति । नचमयिस्थितानिभूतानिअसंगत्वादेवमम ननुतर्हिंव्यापकत्वमाश्रयत्वंचपूर्वोक्तंविरुद्धमित्याशंक्याह । पश्येति । मेऐश्वरमसाधारणंयोगंयुक्तिंअघटितघटनाचातुर्यंपश्य मदीययोगमायावैभवस्या

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६॥
सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकाम् ॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥७॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः ॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

वितर्क्यत्वान्नविरुद्धंकिंचिदित्यर्थः अन्यदप्याश्चर्यंपश्येत्याह । भूतेति । भूतानिबिभर्तिंधारयतीतिभूतभृत् भूतानिभावयतिपालयतीति भूतभावनः । एवंभूतोऽपिममात्मापरंस्वरूपंभूतस्थोनभवति अयंभावःयथाजीवोदेहंबिभ्रत्पालयंश्चाहंकारेणतत्संश्लिष्टस्तिष्ठति एवमहंभूतानिधारयन्पालयन्नपिनतेषुतिष्ठामि निरहंकारत्वादिति ॥ ५ ॥ असंश्लिष्टयोरप्याधाराधेयभावंदृष्टांतेनाह । यथेति । अवकाशंविनावस्थानानुपपत्तेर्नित्यमाकाशस्थितोवायुः सर्वत्रगोऽपिमहानपिनाकाशेनसंश्लिष्यते निरवयवत्वेनसंश्लेषायोगात् तथासर्वाणिभूतानिमयिस्थितानीतिजानीहि ॥ ६ ॥ तदेवमसंगस्ययोगमाययास्थितिहेतुत्वमुक्तम् तथैवसृष्टिप्रलयहेतुत्वंचाहसर्वेति कल्पक्षयेप्रलयकालेसर्वाणिभूतानिमदीयांप्रकृतिंयांतित्रिगुणात्मिकायांमायायांलीयंते पुनःकल्पादौसृष्टिकालेतानिविसृजामिविशेषेणसृजामि ॥ ७ ॥ नन्वसंगोनिर्विकारश्चत्वंकथंसृजसीत्यपेक्षायामाह प्रकृतिमितिद्वाभ्याम् । स्वांस्वाधीनांप्रकृतिमवष्टभ्याधिष्ठायप्रलयेलीनंसंतंचतुर्विधमिमंसर्वंभूतग्रामंकर्मादिपरवशंपुनःपुनर्विविधंसृजामि विशेषेणसृजामीतिवा कथं प्रकृतेर्वशात् प्राचीनकर्म

निमित्ततत्स्वभाववलात् ॥ ८ ॥ ननु एवंनानाविधानिकर्माणिकुर्वंतस्तवजीववद्बंधःकथंनस्यादित्याशंक्याह । नचेति । तानिसृष्ट्यादीनिकर्माणिमांनानिबध्नंति कर्मासक्तिर्हिबंधहेतुः साचाप्तकामत्वान्ममनास्तिअतउदासीनवद्वर्त्तमानस्यमेबंधनंनापादयंति उदासीनत्वेकर्तृत्वानुपपत्तेःउदासीनवत्स्थितमित्युक्तम् ॥ ९ ॥ तदेवोपपादयति । मयेति । मयाध्यक्षेणाधिष्ठात्रानिमित्तभूतेनप्रकृतिःसचराचरं विश्वंसूयते जनयति अनेनमदाधिष्ठानेन हेतुनाइदंजगत्विपरिवर्त्तते पुनःपुनर्जायते सन्निधिमात्रेणाधिष्ठातृत्वात्कर्त्तृत्वमुदासीनत्वं

न च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ॥ हेतुनानेन कौंतेय जगद्विपरिवर्त्तते ॥ १० ॥
अवजानंति मां मूढा मानुषीं तनुमाश्रितम् ॥ परं भावमजानंतो मम भूतमहेश्वरम् ॥ ११ ॥
मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ॥ राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥१२॥

चाविरुद्धमितिभावः ॥ १० ॥ नन्वेवंभूतंपरमेश्वरंत्वांकिमितिकेचिन्नाद्रियंतेतत्राह । अवजानंतीतिद्वाभ्याम् सर्वभूतमहेश्वररूपं मदीयंपरंभावंतत्त्वमजानंतोमूढामूर्खाः मामवजानन्त्यवमन्यंते अवज्ञानेहेतुः शुद्धसत्वमयीमपितनुंभक्तेच्छावशान्मनुष्याकारामाश्रितवंतम् ॥ ११ ॥ किंच मोघाशाइति । मत्तोऽन्यद्देवतांतरंक्षिप्रंफलंदास्यतीत्येवंभूतामोघानिष्फलैवाशायेषांते अतएवमद्वि

मुखत्वान्मोघानिव्यर्थानिकर्माणियेषांते मोघमेवनानाकुतर्काश्रितंशास्त्रज्ञानंयेषांते अतएवविचेतसोविक्षिप्तचित्ताः सर्वत्रहेतुः राक्षसींतामसींहिंसादिप्रचुराम् आसुरींचराजसींकामदर्पादिबहुलाम् मोहिनींबुद्धिभ्रंशकरींप्रकृतिंस्वभावंश्रिताआश्रिताःसंतोमामवजानंतीतिपूर्वेणान्वयः ॥ १२ ॥ केतर्हित्वामाराधयंतीत्यतआह महात्मानस्त्विति महात्मानः कामाद्यनभिभूताचित्ताः यतः अभयं सत्वसंशुद्धिरित्यादिनावक्ष्यमाणां दैवींप्रकृतिंस्वभावमाश्रिताः अतएवमद्व्यतिरेकेणनास्त्यन्यस्मिन्मनोयेषांते भूतादिंजगत्कारणमव्य

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः॥भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥१३॥
सततं कीर्तयंतो मां यतंतश्च दृढव्रताः ॥ नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥ १४ ॥
ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते ॥ एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥ १५ ॥

यंनित्यंचमांज्ञात्वाभजंति ॥ १३ ॥ तेषांभजनप्रकारमाह सततमितिद्वाभ्यां सततंसर्वदास्तोत्रमंत्रादिभिःकीर्तयंतःकेचिन्मामुपासते सेवंते दृढानिव्रतानिनियमायेषांतादृशाःसंतोयतंतश्चेश्वरपूजादिषु इंद्रियोपसंहारादिषुप्रयत्नंकुर्वंतश्चकेचिद्भक्त्यानमस्यंतःप्रणमंतश्चान्येनित्ययुक्ताअनवरतमवहिताः सर्वेसेवंते भक्त्येतिनित्ययुक्ताइतिचकीर्तनादिष्वपिद्रष्टव्यम् ॥ १४ ॥ किंच ज्ञानेति वासुदेवःसर्वमित्येवं सर्वात्मत्वदर्शनंज्ञानंतदेवयज्ञस्तेनज्ञानयज्ञेनमांयजंतः पूजयंतोऽन्येऽप्युपासतेतत्रापिकेचिदेकत्वेनएकमेवपरंब्रह्मेतिपरमार्थदर्शनरूपाभेद

भावनया केचित्पृथक्त्वेनदासोऽहमितिपृथग्भावनया केचित्तुविश्वतोमुखंसर्वात्मकंमांबहुधाब्रह्मरुद्रादिरूपेणोपासते ॥ १५ ॥ सर्वात्मतांप्रपंचयति अहमितिचतुर्भिः क्रतुः श्रौतोऽग्निष्टोमादिः यज्ञस्तुस्मार्त्तःपंचयज्ञादिः स्वधापित्रर्थंश्राद्धादिः औषधमोषधिप्रभवमन्नंभेषजंवा मंत्रोयाज्यापुरोनुवाक्यादिः आज्यंहोमादिसाधनम् अग्निराहवनीयादिः हुतंहोमः एतत्सर्वमहमेव ॥ १६ ॥ किंच पितेति

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ॥ मंत्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥
पिताहमस्य जगतो माता धाता पितामहः ॥ वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥ १७ ॥
गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्॥प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ १८ ॥

धाताकर्मफलविधाता वेद्यंज्ञेयंवस्तु पवित्रंशोधकंप्रायश्चित्तात्मकंवा ओंकारःप्रणवः ऋग्वेदादयोवेदाश्चअहमेव स्पष्टमन्यत् ॥ १७ ॥ किंच गतिरिति गम्यतइतिगतिःफलम् भर्त्तापोषणकर्त्ता प्रभुःनियंता साक्षीशुभाशुभद्रष्टा निवासः भोगस्थानम् शरणंरक्षकः सुहृद्धितकर्त्ता प्रकर्षेणभवत्यनेनेतिप्रभवःस्रष्टा प्रलीयतेऽनेनेतिप्रलयःसंहर्त्ता तिष्ठंत्यस्मिन्नितिस्थानमाधारःनिधीयतेऽस्मिन्नितिनिधानंलयस्थानम् बीजंकारणम् तथाप्यव्ययमविनाशि नतुव्रीह्यादिबीजवन्नश्वरमित्यर्थः ॥ १८ ॥

किंच तपामीति आदित्यात्मनास्थित्वानिदाघसमयेतपामि जगतस्तापंकरोमि वृष्टिसमयेचवर्षमुत्सृजामि विमुंचामि कदाचित्तुवर्षंनि
गृह्णामिआकर्षामि अमृतंजीवनं मृत्युश्चनाशः सत्स्थूलंदृश्यम् असच्चसूक्ष्ममदृश्यम् एतत्सर्वमहमेवेतिमत्वामामेवबहुधाउपासतइतिपूर्वे
णैवान्वयः ॥ १९ ॥ तदेवमवजानंतिमांमूढाइत्यादिश्लोकद्वयेनाक्षिप्रफलाशयादेवतांतरंभजंतोमांनाद्रियंतइत्यभक्तादर्शिताः महात्मान
स्तुमांपार्थेत्यादिनाचभक्ताउक्ताः तत्रैकत्वेनपृथक्त्वेनवापरमेश्वरंश्रीवासुदेवंये न भजंति तेषांजन्ममृत्युप्रवाहोदुर्वारइत्याह । त्रैविद्यामामि

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च॥अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९त्रैविद्या मां सोमपाः पूत
पापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते॥ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यां दिवि देवभोगान्२०ते तं भुक्त्वा
स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्त्यलोकं विशंति ॥एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते २१

ति द्वाभ्यां ऋग्यजुःसामलक्षणास्तिस्रोविद्यायेषांतेत्रिविद्याः त्रिविद्याएवत्रैविद्याः स्वार्थेतद्धितः तिस्रोविद्याअधीयंतेजानंतीतिवात्रैवि
द्याः वेदत्रयोक्तकर्मतत्पराइत्यर्थः वेदत्रयेविहितैर्यज्ञैर्मामिष्ट्वाममैवरूपंदेवतांतरमित्यजानंतोऽपिवस्तुतइंद्रादिरूपेणमामेवेष्ट्वासंपूज्य
यज्ञशेषंसोमंपिबंतीतिसोमपाः तेनैवपूतपापाःशोधितकल्मषाः संतःस्वर्गतिंस्वर्गंप्रतिगतिंयेप्रार्थयंते तेपुण्यफलरूपंसुरेंद्रस्यलोकंस्व
र्गमासाद्यप्राप्यदिविस्वर्गेदिव्यानुत्तमान्देवानांभोगानश्नंति भुंजते ॥ २० ॥ ततश्च तेतंभुक्त्वेति तेस्वर्गकामास्तंप्रार्थितंविपुलंस्वर्गलो

कंतत्सुखंभुक्त्वाभोगप्रापकेपुण्येक्षीणेसतिमर्त्यलोकंविशंति पुनरप्येवमेववेदत्रय्याविहितंधर्ममनुसृताः कामकामाः भोगान्कामयमाना गतागतंयातायातंलभंते ॥ २१ ॥ मद्भक्तास्तुमत्प्रसादेनकृतार्थाभवंतीत्याह अनन्याइति अनन्याः नास्तिमद्व्यतिरेकेणान्यत्काम्यं भजनीयंदेवतांतरंयेषांतथाभूतायेजनाः मांचिंतयंतःसेवंतेतेषांनित्याभियुक्तानांसर्वदामदेकनिष्ठानांयोगंधनादिलाभंक्षेमंचतत्पालनंमोक्षं वातैरप्रार्थितमप्यहमेववहामि प्रापयामि ॥ २२ ॥ ननुचत्वद्व्यतिरेकेणवस्तुतोदेवतांतरस्याभावादिंद्रादिसेविनोऽपित्वद्भक्ताएवेतिक

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते॥तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ २२ ॥
येऽप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम्॥ २३ ॥
अहं हि सर्वयज्ञानांभोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥
यांति देवव्रता देवान्पितॄन्यांति पितृव्रताः॥भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि माम्॥२५॥

थंतेगतागतंलभेरंस्तत्राह येपीति श्रद्धयोपेताभक्ताःसंतोयेऽपिजनाःयज्ञेनान्यदेवताइंद्राद्रिरूपायजंते तेऽपिमामेवयजंतीतिसत्यम् किंतु अविधिपूर्वकंमोक्षप्रापकंविधिंविनायजंति अतस्तेपुनरावर्त्तंते ॥ २३ ॥ एतदेवविवृणोति अहंहीति सर्वेषांयज्ञानांतत्तद्देवतारूपेणाहमेवभोक्ता प्रभुश्चस्वामी फलदातापिचाहमेवेत्यर्थः एवंभूतंमांतेतत्त्वेनयथावन्नाभिजानंतिअतश्च्यवंतिप्रच्यवंतेपुनरावर्तंते येतुसर्वदेवतासु मामेवांतर्यामिणंपश्यंतोयजंतितेतुनावर्त्तंते ॥ २४ ॥ तदेवोपपादयति यांतीति देवेषुइन्द्रादिषुव्रतंनियमोयेषांतेअंतवतोदेवान्यांतिअतः

पुनरावर्तंते पितृषुव्रतंयेषांश्राद्धादिक्रियापराणांतेपितॄन्यांति भूतेषुविनायकमातृकादिषुइज्यापूजायेषांतेभूतानियांति मांयष्टुंशीलंयेषांते मद्याजिनस्तेतुमामक्षयंपरमानंदरूपंनारायणंयांति ॥२५ ॥ तदेवंस्वभक्तानामक्षयफलत्वमुक्तं अनायासत्वंस्वभक्तेर्दर्शयति।पत्रमिति।पत्रपुष्पादिमात्रमपिमह्यंभक्त्याप्रीत्यायःप्रयच्छति तस्यप्रयतात्मनःशुद्धचित्तस्यनिष्कामभक्तस्यतत्पत्रपुष्पादिकंतेनभक्त्याउपहृतंसमर्पितमहमश्नामिप्रीत्यागृह्णामिनाहिमहाविभूतिपतेःपरमेश्वरस्यममक्षुद्रदेवतानामिवबहुवित्तसाध्ययागादिभिः परितोषःस्यात् किंतु भक्तिमात्रेण

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ २६ ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥ २७ ॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ।। संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

अतोभक्तेनसमर्पितंयत्किंचित्पत्रादिमात्रमपितदनुग्रहार्थमेवाश्नामीतिभावः ॥ २६ ॥ नचपत्रपुष्पादिकमपियज्ञार्थपशुसोमादिद्रव्यवन्मदर्थमेवोद्यमैरापाद्यसमर्पणीयम् । किंतर्हियदिति । स्वभावतोवाशास्त्रतोवायत्किंचित्कर्मकरोषि तथायदश्नासि यज्जुहोषि यद्ददासि यत्तपस्यसितपःकरोषि तत्सर्वंमय्यर्पितंयथाभवत्येवंकुरुष्व ॥ २७ ॥ एवंचयत्फलंप्राप्स्यसितच्छृणु शुभेति एवंकुर्वन्कर्मबंधनैः कर्मनिमित्तैरिष्टानिष्टैःफलैर्मुक्तोभविष्यसि कर्मणांमयिसमर्पितत्वेनतवतत्फलसंबंधानुपपत्तेः तैश्चविमुक्तःसन् संन्यासयोगयुक्तात्मा

संन्यासःकर्मणांमदर्पणंसएवयोगस्तेनयुक्तः आत्माचित्तंयस्यतथाभूतस्त्वं मांप्राप्स्यसि ॥२८॥ यदिभक्तेभ्यएवमोक्षंददासि नाभक्तेभ्यश्चतर्हितवापिकिंरागद्वेषादिकृतंवैषम्यमस्तिनेत्याह । समइति । समोऽहंसर्वेष्वपिभूतेषुअतोमेममप्रियश्चद्वेष्यश्चनास्त्येव एवंसत्यपियेमांभजंतितेभक्त्यामयिवर्तंते अहमपितेषुअनुग्राहकतयावर्ते अयंभावः यथाग्नेः स्वसेवकेष्वेवतमःशीतादिदुःखमपाकुर्वतोऽपिनवैषम्यं यथावाकल्पवृक्षस्य तथैवभक्तपक्षपातिनोऽपिममनवैषम्यंकिंतु मद्भक्तेरेवंमहिमेति ॥ २९ ॥ अपिच मद्भक्तेरवितर्क्यःप्रभावइतिद

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः॥ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मंतव्यःसम्यग्व्यवसितो हि सः ॥३०॥
क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति॥कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥३१॥

र्शयन्नाह । अपिचेदिति। अत्यंतंदुराचारोपियद्यप्यपृथक्त्वेनपृथक्देवताअपिवासुदेवएवेतिबुद्ध्यानरोदेवतांतरभक्तिमकुर्वन्मामेवश्रीनारायणंभजते तर्हिसाधुःश्रेष्ठएवसमंतव्यः यतोऽसौसम्यग्व्यवसितः परमेश्वरभजनेनैवकृतार्थोभविष्यामीतिशोभनमध्यवसायंकृतवान् ॥ ३० ॥ ननु कथंसमीचीनाध्यवसायमात्रेणसाधुर्मंतव्यस्तत्राह । क्षिप्रमिति । दुराचारोऽपिमांभजन्शीघ्रंधर्मचित्तोभवति ततश्चशश्वच्छांतिंशाश्वतीमुपशांतिंचित्तोपप्लवोपरमरूपांपरमेश्वरनिष्ठांनितरांगच्छतिप्राप्नोति कुतर्ककर्कशवादिनोनैतन्मन्येरन्नितिशंकाव्या

कुलाचित्तमर्जुनंप्रोत्साहयाति हेकौंतेय पटहकहलादिमहाघोषपूर्वकंविवदमानानांसभांगत्वाबाहुमुत्क्षिप्यानिःशंकंप्रतिजानीहि प्रतिज्ञांकुरु कथंमेपरमेश्वरस्यभक्तः सुदुराचारोऽपिनप्रणश्यति अपितुकृतार्थएवभवतीति ततश्चतेत्वत्प्रौढिविजृंभाद्विध्वंसितकुतर्कानिःसंशयं त्वामेवगुरुत्वेनआश्रयेरन् ॥ ३१ ॥ आचारभ्रष्टंमद्भक्तिःपवित्रीकरोतिकिमत्रचित्रम् यतोमद्भक्तिर्दुष्कुलानप्यनधिकारिणोपिसंसारान्मोचयतीत्याह । मांहीति । येऽपिपापयोनयःस्युःनिकृष्टजन्मानोंऽत्यजादयोभवेयुः येऽपिवैश्याःकेवलंकृष्यादिनिरताः स्त्रियः

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः॥स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिम्॥३२॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्॥ ३३॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ ३४॥

शूद्रादयश्चाध्ययनादिरहिताः तेऽपिमांव्यपाश्रित्यसंसेव्यपरांगतिंयांति हिनिश्चितम् ॥ ३२ ॥ यदेवंतदासत्कुलाःसदाचाराश्चमद्भक्ताः परांगतिंयांतीतिकिंवक्तव्यमित्याह । किमिति । पुण्याःसुकृतिनोब्राह्मणाः तथाराजानश्चतेऋषयश्चक्षत्रियाः एवंभूताःपरांगतिंयांतीतिकिंवक्तव्यमित्यर्थः अतस्त्वमिमंराजर्षिरूपंलोकंदेहंप्राप्यलब्ध्वामांभजस्व किंच अनित्यमध्रुवमसुखंसुखरहितमिमंमर्त्यलोकंप्राप्यानित्यत्वाद्विलंबमकुर्वन् असुखत्वाच्चसुखार्थोंद्यमंहित्वामामेवभजस्वेत्यर्थः ॥ ३३ ॥ भजनप्रकारंदर्शयन्नुपसंहरति । मन्मनाइति

मय्येवमनोयस्यसमन्मनास्त्वंभव तथैवममैवभक्तःमत्सेवकोभव मद्याजीमद्यजनशीलोभव मामेवचनमस्कुरु एवमेभिःप्रकारैर्मत्परायणःसन्नात्मानंमनोमयियुक्त्वासमाधायमामेवपरमानंदरूपमेष्यसि प्राप्स्यसि ॥ ३४ ॥ निजमैश्वर्यमाश्चर्यंभक्तेश्चाद्भुतवैभवम् ॥ नवमेराजगुह्याख्येकृपयावोचदच्युतः ॥ १ ॥ इति सुबोधिन्यांटीकायांनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ उक्ताःसंक्षेपतःपूर्वंसप्तमादौविभूतयः ॥ दशमेताવितन्यंतेसर्वत्रेश्वरदृष्टये ॥ १ ॥ एवंतावत्सप्तमादिभिस्त्रिभिरध्यायैर्भजनीयंपरमेश्वररूपंनिरूपितम् तद्विभूतयश्चस

इति श्रीमद्भग० राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ श्रीभगवानुवाच ॥
भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥ १ ॥
न मे विदुः सुरगणाः प्रभवं न महर्षयः ॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥

प्तमे रसोऽहमप्सुकौंतेयेत्यादिनासंक्षेपतोदर्शिताः अष्टमेचअधियज्ञोऽहमेवात्रेत्यादिना नवमेचअहंक्रतुरहंयज्ञइत्यादिना अथेदानींताएवविभूतीःप्रपंचयिष्यन्स्वभक्तेश्चावश्यंकरणीयत्वंवर्णयिष्यन् श्रीभगवानुवाच । भूयएवेति महांतौयुद्धादिस्वधर्मानुष्ठानेमहत्परिचर्यायांवाकुशलौबाहूयस्य हेमहाबाहो भूयएवपुनरपिमेवचः शृणु कथंभूतम् परमंपरमात्मनिष्ठं मद्वचनामृतेनैवप्रीतिमाप्नुवतेतेतुभ्यंहितकाम्ययाहितेच्छयायदहंवक्ष्यामितत् ॥ १ ॥ उक्तस्यापिपुनर्वचनेदुर्ज्ञेयत्वंहेतुमाह । नमइति । मेममप्रकृष्टंभवं जन्मरहितस्या

पिनानाविभूतिभिराविर्भावंसुरगणाअपिमहर्षयोभृग्वादयोऽपिनजानंति तत्रहेतुः अहंहिदेवानांमहर्षीणांचादिः कारणम् सर्वशःसर्वप्रकारैःउत्पादकत्वेनबुद्ध्यादिप्रवर्त्तकत्वेनच अतोमदनुग्रहंविनामांकेऽपिनजानंतीत्यर्थः ॥ २ ॥ एवंभूतात्मज्ञानेफलमाह । योमामिति । सर्वकारणत्वादेवनविद्यतेआदिःकारणंयस्यतमनादिम् अतएवाजंजन्मशून्यम् लोकानांमहेश्वरंचमांयोवेत्ति समनुष्येषुअसंमूढःसंमोहरहितःसन्सर्वपापैःप्रमुच्यते ॥ ३ ॥ लोकमहेश्वरतामेवस्फुटयाति बुद्धिरितित्रिभिः बुद्धिःसारासारविवेकनैपुण्यम् ज्ञानमात्मविषयम्।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ॥ असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवो भावो भयं चाभयमेव च ॥ ४ ॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः ॥ भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥

अंसमोहः व्याकुलत्वाभावः क्षमासहिष्णुत्वम् सत्यंयथार्थभाषणम् दमोबाह्येंद्रियसंयमः शमोंऽतःकरणसंयमः सुखमनुकूलसंवेदनीयम् दुःखंचतद्विपरीतम् भवउद्भवः अभावस्तद्विपरीतः भंयंत्रासः अभयंतद्विपरीतम् अस्यश्लोकस्यमत्तएवभवंतीत्युत्तरेणान्वयः ॥ ४ ॥ किंच अहिंसेति । अहिंसापरपीडानिवृत्तिः समतारागद्वेषादिराहित्यम् मित्रामित्रतुल्यताच तुष्टिर्दैवलब्धेनसंतोषः तपःशारीरादिवक्ष्यमाणम् दानंन्यायार्जितधनादेःसत्पात्रार्पणम् यशःसत्कीर्तिः अयशोऽपकीर्तिः एतेबुद्धिर्ज्ञानमित्यादयस्तद्विपरीताश्चा

बुद्ध्यादयोनानाविधाभावाःप्राणिनांमत्तःसकाशादेवभवंति ॥ ५ ॥ किंच महर्षयइति । सप्तमहर्षयोभृग्वादयःसप्तब्राह्मणाइत्येतेपुराणे निश्चयंगताइत्यादिपुराणप्रसिद्धाः तेभ्योऽपिपूर्वेऽन्येचत्वारोमहर्षयः सनकादयःतथामनवःस्वायंभुवादयः मद्भावा मदीयोभावः प्रभावोयेषुते हिरण्यगर्भात्मनोममैवमनसःसंकल्पमात्राज्जाताः प्रभावमेवाह । येषामिति । येषांभृग्वादीनांचसनकादीनांचइमाब्राह्मणाद्यालोकेवर्धमानाः यथायथंपुत्रपौत्रादिरूपाः शिष्यादिरूपाश्च प्रजाजातावर्त्तंते ॥ ६ ॥ यथोक्तविभूत्यादितत्त्वज्ञानस्यफलमाह ।

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ॥ मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ ६ ॥
एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ॥ सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥ ७ ॥
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ॥ इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥

एतामिति एतांभृग्वादिलक्षणांममविभूतिंयोगंचैश्वर्यलक्षणंतत्त्वतोयोवेत्तिसोऽविकम्पेनंनिःसंशयेनयोगेनसम्यग्दर्शनेनयुक्तोभवति नास्त्यत्रसंशयः ॥ ७ ॥ यथाचविभूतियोगयोर्ज्ञानेनसम्यग्ज्ञानावाप्तिस्तद्दर्शयति अहमित्यादिचतुर्भिः अहंसर्वस्यजगतःप्रभवः भृग्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुःमत्तएवचास्यसर्वस्यबुद्धिर्ज्ञानमसंमोहइत्यादिसर्वंप्रवर्त्ततइति एवंमत्वावबुद्ध्य बुधाविवेकिनोभावसमन्विताः प्रीतियुक्तामांभजंते ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥

प्रीतिपूर्वकंभजनमेवाह । मच्चित्ताइति । मय्येवचित्तंयेषांतेमच्चिताः मामेवगताःप्राप्ताःप्राणाइंद्रियाणियेषांतेमद्गतप्राणाः मदर्पितजीवनाइतिवा एवंभूतास्तेबुधाः अन्योऽन्यंमांन्यायोपेतैः श्रुत्यादिप्रमाणैर्बोधयंतः बुद्ध्वाचमांकथयन्तःसंतोनित्यंतुष्यंति अनुमोदनेनतुष्टिंयांति रमंतिच निवृत्तिंयांति ॥ ९ ॥ एवंभूतानांचसम्यग्ज्ञानमहंददामीत्याह तेषामितिएवंसततयुक्तानांमय्यासक्तानांप्रीतिपूर्वकंभजतांतेषांतंबुद्धिरूपंयोगमुपायंददामि तमितिकम् येनोपायेनतेभक्तामांप्राप्नुवंति ॥ १० ॥ बुद्धियोगंदत्वाचतस्यानुभवपर्यंतंतमापा

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परम् ॥ कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ ९ ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ॥ ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥
तेषामेवानुकंपार्थमहमज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥
अर्जुन उवाच॥परं ब्रह्म परं धाम पवित्रं परमं भवान्॥पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥१२॥

द्याविद्याकृतंसंसारंनाशयामीत्याह । तेषामिति । तेषामनुकंपार्थमनुग्रहार्थमेवाज्ञानाज्जातंतमः संसाराख्यं नाशयामिकुत्रवास्थितःसन्केनसाधनेनतमोनाशयसीत्यतआह आत्मभावस्थः बुद्धिवृत्तौस्थितःसन् भास्वताविस्फुरताज्ञानलक्षणेनदीपेननाशयामि ॥ ११ ॥ संक्षेपेणोक्ताविभूतीर्विस्तरेणजिज्ञासुर्भगवंतंस्तुवन्नर्जुनउवाच परंब्रह्मेतिसप्तभिः परंब्रह्मचपरंधामचआश्रयःपरमंचपवित्रंभवानेव कुत

इत्यतआह यतःशाश्वतंनित्यंपुरुषं तथादिव्यंद्योतनात्मकं स्वप्रकाशंच आदिश्चासौदेवश्चतं देवानामादिभूतमित्यर्थः तथाअजंअजन्मानंविभुंव्यापकंत्वामेवाहुः ॥ १२ ॥ केतइत्यतआह । आहुरिति । ऋषयः भृग्वादयःसर्वे देवर्षिर्नारदःअसितश्चदेवलश्चव्यासश्च स्वयंत्वमेव साक्षान्मेमह्यंब्रवीषि ॥ १३ ॥ अतोममेदानींत्वदैश्वर्येअसंभावनानिवृत्तेत्याह । सर्वमिति । एतद्भवानेवपरंब्रह्मेत्यादि सर्वमपिऋतंसत्यंमन्येयन्मांप्रतित्वंकथयासि नमेविदुःसुरगणाइत्यादितदपिसत्यमेवमन्यइत्याह । नहीति । हेभगवन् तवव्यक्तिंदेवानविदुः अस्मदनुग्रहार्थमि

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥
स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ॥ भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥
वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥

यमभिव्यक्तिरितिनजानंतिदानवाश्चास्मन्निग्रहार्थमितिनविदुरेवेति ॥ १४ ॥ किंतर्हि स्वयमेवत्वमात्मानंवेत्थजानासि नान्यः तदप्यात्मनास्वेनैववेत्थ नसाधनांतरेण अत्यादरेणबहुधासंबोधयाति हेपुरुषोत्तमपुरुषोत्तमत्वेहेतुगर्भाणिसंबोधनानि हेभूतभावन भूतोत्पादक भूतानामीश नियन्तः देवानामादित्यादीनांदेवप्रकाशक जगत्पते विश्वपालक ॥ १५ ॥ यस्मात्तवाभिव्यक्तित्वमेववेत्सिनदेवाद

यस्तस्माद्वक्तुमर्हसीति । याआत्मनस्तवदिव्याअत्यद्भुताविभूतयस्ताःसर्वावक्तुंत्वमेवार्हसि योग्योभवसि याभिरितिविभूतीनांविशेषणम् स्पष्टार्थम् ॥ १६ ॥ कथनप्रयोजनंदर्शयन्प्रार्थयते कथमितिद्वाभ्याम् हेयोगिन् कथंकैर्विभूतिभेदैःसदापरिचिंतयन्नहंत्वांविद्याम् जानीयाम् विभूतिभेदेनचिंत्योऽपित्वंकेषुकेषुपदार्थेषुमयाचिंतनीयोऽसि ॥ १७ ॥ तदेवंबाहिर्मुखेऽपिचित्तेतत्रतत्रविभूतिभेदेनत्वाञ्चिंतैव यथाभवेत्तथाविस्तरेणकथयेत्याह । विस्तरेणेति।आत्मनस्तवयोगंसर्वज्ञत्वसर्वशक्तित्वादिलक्षणंयोगैश्वर्यंविभूतिंचविस्तरेणपुनःकथय हि

कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् ॥ केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥१७॥ विस्तरेणात्मनो
योगं विभूतिं च जनार्दन ॥ भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ॥ १८ ॥ ॥ श्रीभगवानुवाच ॥
॥ हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ॥ प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे॥
॥ १९ ॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः ॥ अहमादिश्च मध्यं च भूतानामंत एव च ॥ २० ॥

यस्मात्त्वद्वाक्यममृतरूपंशृण्वतोममतृप्तिरलंबुद्धिर्नास्ति ॥ १८ ॥ एवंप्रार्थितःसन् श्रीभगवानुवाच । हन्तेतिहंतेत्यनुकंपासंबोधनं दिव्यायाममविभूतयस्ताःप्राधान्येनतुभ्यंकथयिष्यामि यतोऽवांतरस्यविभूतिविस्तरस्यमदीयस्यांतोनास्ति अतः प्रधानभूताःकतिचिद्वर्णयिष्यामि ॥१९॥तत्रप्रथममैश्वरंरूपंकथयति । अहमिति । हेगुडाकेश सर्वेषांभूतानामाशयेष्वंतःकरणेषुसर्वज्ञत्वादिगुणैर्नियंतृत्वेनाव

स्थितःपरमात्माऽहम्आदिर्जन्म मध्यंस्थितिः अंतःसंहारः सर्वभूतानांजन्मादिहेतुश्चाहमेवेत्यर्थः ॥ २० ॥ इदानींविभूतीःकथयति। आदित्यानामित्यादिनायावदध्यायसमाप्ति आदित्यानांद्वादशानांमध्येविष्णुर्वामनोऽहम् ज्योतिषांप्रकाशानांमध्येंऽशुमान्विश्वव्यापकरश्मियुक्तोरविःसूर्योऽहंमरुतांदेवविशेषाणांमध्येमरीचिनामाहमस्मि यद्वा सप्तमरुद्गणावयवास्तेषांमध्यइति। तेच आवहःप्रवहःविवहःपरावहःउद्वहःसंवहःपरिवहइतिमरुद्गणाःनक्षत्राणांमध्येचंद्रोऽहम् अत्रच आदित्यानामहंविष्णुरित्यादिषुप्रायशोनिर्धारणेषष्ठी क्वचि

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ॥ मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी॥ २१॥
वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ॥ इंद्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥ २२ ॥
रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥ २३ ॥
पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ॥ सेनानीनामहं स्कंदः सरसामस्मि सागरः ॥ २४ ॥

च्चभूतानामस्मिचेतनेत्यादिनासंबंधेषष्ठी तच्चतत्रतत्रैवदर्शयिष्यामः विष्णुरित्याद्यवतारोऽपिप्रभावातिशयमात्रविवक्षयाविभूतित्वेननिर्दिश्यतेअतःपरंचाध्यायस्यस्पष्टार्थत्वेऽपिक्वचित्किंचिद्व्याख्यास्यामः ॥ २१ ॥ वेदानामिति। वासवइंद्रःभूतानांसंबंधिनीचेतनाज्ञानशक्तिरहमस्मि ॥ २२ ॥ रुद्राणामिति । यक्षरक्षसामितिराक्षसानामपिक्रूरत्वादिसाम्याद्यक्षैःसहैकीकृत्यनिर्देशःतेषांमध्येवित्तेशः कुबेरोऽस्मि पावकोऽग्निः शिखरिणांशिखरवतांउच्छ्रितानांमध्येमेरुः ॥ २३ ॥ पुरोधसामिति । पुरोधसांमध्येदेवपुरोहितत्वान्मुख्यंबृहस्पतिंमांवि

द्धि सेनानीनांसेनापतीनांमध्येदेवसेनापतिःस्कंदोऽहमस्मि सरसांस्थिरजलाशयानांमध्येसमुद्रोऽस्मि ॥ २४ ॥ महर्षीणामिति । गिरां वाचांपदात्मिकानांमध्येएकमक्षरमोंकाराख्यंपदमस्मि यज्ञानांश्रौतस्मार्त्तानांमध्येजपरूपोयज्ञोऽहम् ॥ २५ ॥ अश्वत्थइति । देवाएवसंतोमंत्रदर्शनेनयेऋषित्वंप्राप्तास्तेषांमध्येनारदोऽस्मिसिद्धानांउत्पत्तितएवाधिगतपरमार्थतत्त्वानांमध्येकपिलाख्योमुनिरस्मि ॥ २६ ॥

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ॥ यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥ २५ ॥
अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥ २६ ॥
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपम् ॥ २७ ॥
आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः ॥ २८ ॥
अनंतश्चास्मि नागानां वरुणो यादसामहम् ॥ पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥ २९ ॥

उच्चैःश्रवसमिति । अमृतार्थंक्षीराब्धिमथनादुद्भूतमुच्चैःश्रवसंनामाश्वंमद्विभूतिंविद्धि अमृतोद्भवमित्येतदैरावतेऽपिसंबध्यते नराधिपंराजानंमांविद्धि ॥ २७ ॥ आयुधानांमध्येवज्रम् कामान्दोग्धीतिकामधुक् प्रजनःप्रजोत्पत्तिहेतुःकंदर्पःकामोऽस्मि नकेवलंसंभोगप्रधानः कामोमद्विभूतिः अशास्त्रीयत्वात् सर्पाणांसविषाणांराजावासुकिरस्मि ॥ २८ ॥ अनंतइति । नागानांनिर्विषाणांराजाअनंतः शेषोऽ

स्मि यादसांजलचराणांराजावरुणोऽस्मि पितॄणांराजाअर्यमास्मि संयमतांनियमनंकुर्वतांमध्येयमोऽस्मि ॥ २९ ॥ प्रह्लादइति । कलयतांवशीकुर्वतांगणयतांवामध्येकालोऽहम् मृगेंद्रःसिंहः पक्षिणांमध्येगरुडोऽस्मि ॥ ३० ॥ पवनइति । पवतांपावयितॄणांवेगवतांवामध्ये वायुरस्मि शस्त्रभृतांवीराणांरामोदाशरथिः यद्वापरशुरामः झषाणांमत्स्यानांमकरःमत्स्यविशेषास्तिमिंगिलः स्रोतसांप्रवाहोदकानांमध्येभागीरथी ॥ ३१ ॥ सर्गाणामिति । सृज्यंतइतिसर्गाआकाशादयस्तेषामादिरंतश्चमध्यंचैवाहम् अहमादिश्चमध्यंचेत्यत्रसृष्ट्यादिकर्तृत्वं

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ॥ मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम् ॥ ३० ॥
पवनः पवतामस्मि रामः शस्त्रभृतामहम् ॥ झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥
सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ॥ अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ ३२ ॥

पारमैश्वर्यमुक्तं अत्रतूत्पत्तिस्थितिलयामद्विभूतित्वेनध्येयाइत्युच्यतइतिविशेषः अध्यात्मविद्याआत्मविद्या प्रवदतांवादिनांसंबंधिन्यो वादजल्पवितंडाख्यास्तिस्रःकथाःप्रसिद्धाः तासांमध्येवादोऽहम् यत्रद्वाभ्यामपिप्रमाणतस्तर्कतश्चस्वपक्षःस्थाप्यते परपक्षश्छलजातिनिग्रहस्थानैर्दूष्यतेसजल्पोनाम यत्रत्वेकःस्वपक्षंस्थापयति अन्यस्तुछलजातिनिग्रहस्थानैस्तत्पक्षंदूषयति नतुस्वपक्षंसाधयति सा वितंडानामकथा तत्रजल्पवितंडेविजिगीषमाणयोर्वादिनोःशक्तिपरीक्षामात्रफले वादस्तुवीतरागयोःशिष्याचार्ययोरन्ययोर्वातत्त्वनि

अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्यच ॥ अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ ३३ ॥
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ॥ कीर्तिः श्रीर्वाक्चनारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ ३४॥
बृहत्साम तथा साम्नां गायत्री छंदसामहम् ॥ मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥ ३५ ॥

र्णयफलश्चातोऽसौश्रेष्ठत्वान्मद्विभूतिरित्यर्थः॥३२॥अक्षरेति । अक्षराणांवर्णानांमध्येऽकारोऽस्मि तस्यसर्ववाङ्मयत्वेनश्रेष्ठत्वात् तथाचश्रुतिः 'अकारोहिसर्वावाक्सैषास्पर्शोष्मभिर्व्यज्यमानाबह्वीनानारूपाभवति'इति सामासिकस्यसमाससमूहस्यमध्येद्वंद्वःरामकृष्णावित्यादिसमासोऽस्मि उभयपदप्रधानत्वेनश्रेष्ठत्वात् अक्षयः प्रवाहरूपःकालोऽहमेवकालःकलयतामित्यत्रायुर्गणनात्मकःसंवत्सरशताद्यायुःस्वरूपःकालयुक्तः सचतस्मिन्नायुषिक्षीणेसतिक्षीयते अत्रतुप्रवाहात्मकोऽक्षयःकालउच्यतइतिविशेषः कर्मफलविधातॄणांमध्येविश्वतोमुखोधाता सर्वकर्मफलविधाताहमित्यर्थः ॥३३॥ मृत्युरिति।संहारकारिणांमध्येसर्वहरोमृत्युरहम् भविष्यताभाविकल्याणानांप्राणिनामुद्भवः अभ्युदयोऽहम् नारीणांस्त्रीणांमध्येकीर्त्याद्याःसप्तदेवतारूपाः स्त्रियोऽहम् यासामाभासमात्रयोगेनप्राणिनःश्लाघ्याभवंतिताःकीर्त्याद्याः स्त्रियोमद्विभूतयः ॥३४॥ बृहत्सामेति । “त्वामिंद्रहवामह” इत्यस्यामृचिगीयमानंबृहत्साम तेनचेंद्रःसर्वेश्वरत्वेनस्तूयतइतिश्रैष्ठ्यंदर्शितं छंदोविशिष्टानांमंत्राणांमध्येगायत्रीमंत्रोऽहम् द्विजत्वापादकत्वेनसोमाहरणेनचश्रेष्ठत्वात् कुसुमाकरोवसंतः ॥ ३५ ॥

द्यूतमिति।छलयतामन्योन्यवंचनपराणांसंबंधिद्यूतमस्मि तेजस्विनांप्रभाववतां तेजःप्रभावोऽस्मिजेतॄणांजयोऽस्मि व्यवसायिनामुद्यमवतां व्यवसायउद्यमोऽस्मिसत्ववतांसात्विकानांसत्त्वमहम् ॥३६॥वृष्णीनामिति।वासुदेवोयोऽहंत्वामुपदिशामिधनंजयस्त्वमेवमद्विभूतिःमुनीनां वेदार्थमननशीलानां वेदव्यासोऽहमस्मि कवीनांकाव्यदर्शिनांमध्येउशनानामकविः शुक्रः ॥३७॥दंडइति।दमयतांदमनकर्तॄणांसंबंधीदंडो

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ॥जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥३६॥
वृष्णीनां वासुदेवोऽस्मि पांडवानां धनंजयः ॥ मुनीनामप्यहं व्यासः कवीनामुशनाकविः ॥३७॥
दंडो दमयतामस्मि नीतिरस्मि जिगीषताम् ॥ मौनं चैवास्मिगुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥
यच्चापि सर्वभूतानां बीजं तदहमर्जुन ॥ न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥
नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप ॥ एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

ऽस्मि येनअसंयताअपिसंयताभवंतिसदंडोमद्विभूतिः जेतुमिच्छतांसंबंधिनीसामाद्युपायरूपानीतिरस्मि गुह्यानांगोप्यानांगोपनहेतुर्मौनमवचनमहमस्मि नहितूष्णींस्थितस्याभिप्रायोज्ञायते ज्ञानवतांतत्त्वज्ञानिनांयज्ज्ञानंतदहम् ॥ ३८ ॥ यादिति । यदपिचसर्वभूतानां बीजंप्ररोहकारणंतदहम् तत्रहेतुः मयाविनायत्स्यात् भवेत् तच्चराचरंभूतंनास्त्येवेति ॥३९॥ प्रकरणार्थमुपसंहरति।नान्तइति।अनन्तत्वा

द्विभूतीनांताःसाकल्येनवक्तुंनशक्यंते एषतुविभूतेर्विस्तरउद्देशतःसंक्षेपतःप्रोक्तः ॥ ४ ० ॥पुनश्चसाकांक्षंप्रतिकथंचित्साकल्येनकथयाति यद्यदिति ।विभूतिमदैश्वर्ययुक्तम् श्रीमत्संपत्तियुक्तम् ऊर्जितंकेनाचित्प्रभावबलादिनागुणेनातिशायितंयद्यत्सत्त्वंवस्तुमात्रंतत्तदेवममतेजसःप्रभावस्यांशेनसंभूतंजानीहि॥४१॥अथवाकिमनेनपरिच्छिन्नज्ञानेन सर्वत्रसमदृष्टिमेवकुर्वित्याह। अथवेति ।बहुनापृथग्ज्ञानेनाकिंतवकार्यं यदिदंसर्वंजगदेकांशेनएकदेशमात्रेणविष्टभ्यधृत्वाव्याप्येतिवाअहमेवास्थितः नमद्व्यतिरिक्तंकिंचिदस्ति “पादोस्यविश्वाभूतानि”इति

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छत्वं मम तेजोंऽशसंभवम् ॥ ४१ ॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन॥विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥४२॥
इति श्रीमद्भग० विभूतियोगो नाम दशमोऽध्यायः ॥ १० ॥ ॥ अर्जुन उवाच ॥ ॥
मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ॥ यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥

श्रुतेः ॥ ४२ ॥ इंद्रियद्वारतश्चित्तेवहिर्धावतिसत्यपि ईशदृष्टिविधानायविभूतीर्दशमेऽब्रवीत् ॥ १ ॥ इति सुबोधिन्यांटीकायांदशमोऽध्यायः ॥ १० ॥ विभूतिवैभवंप्रोच्यकृपयापरयाहरिः ॥ दिदृक्षोरर्जुनस्याथविश्वरूपमदर्शयत् ॥ १ ॥ पूर्वाध्यायांतेविष्टभ्याहमिदंकृत्स्नमेकांशेनास्थितोजगदितिविश्वात्मकंपारमेश्वरंरूपमुपाक्षिप्तं तद्दिदृक्षुःपूर्वोक्तमभिनंदन्नर्जुनउवाच । मदनुग्रहायेतिचतुर्भिःममानुग्रहायशोकनिवृत्तयेपरमंपरमार्थनिष्ठंगुह्यंगोप्यमपिआध्यात्ममितिसंज्ञितम् ॥आत्मानात्मविवेकविषयं यत्त्वयोक्तंवचःअशोच्यानन्वशोचस्त्वामि

त्यादिषष्ठाध्यायपर्यंतंयद्वाक्यं तेनममायंमोहोहंहंताएतेहन्यतइत्यादिलक्षणोभ्रमोविगतः विनष्टःआत्मनःकर्तृत्वाद्यभावोक्तेः ॥ १ ॥ किं च भवाप्ययाविति। भूतानांभवाप्ययौसृष्टिप्रलयौत्वत्तःसकाशादेवभवतइतिश्रुतौमया । अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथाइत्यादौविस्तरशः पुनः पुंनःकमलस्यपत्रेइवसुप्रसन्नेविशालेअक्षिणीयस्यसः हेकमलपत्राक्षमाहात्म्यमपिचाव्ययम् अक्षयंश्रुतम् विश्वसृष्ट्यादिकर्तृत्वेऽपिशुभाशुभकर्मकारयितृत्वेऽपिबंधमोक्षादिविचित्रफलदातृत्वेऽपिअविकारवैषम्यासंगौदासीन्यादिलक्षणमपरिमितंमहत्त्वंश्रुतं

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥ त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥
एवमेतद्यथात्थत्वमात्मानं परमेश्वर ॥ द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥
मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ॥ योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ४ ॥

अव्यक्तंव्यक्तिमापन्नंमन्यंते मयाततमिदंसर्वं नचमां तानिकर्माणिनिबध्नंति समोऽहंसर्वभूतेषुइत्यादिना। अतस्त्वत्परतंत्रत्वादपिजीवानामहंकर्त्तेत्यादियोमोहोविगतइतिभावः ॥ २ ॥ किंच एवमिति । भवाप्ययौहिभूतानामित्यादिमयाश्रुतं यथाचेदानीमात्मानंत्वमात्थ विष्टभ्याहमिदंकृत्स्नमित्येवंकथयसि हेपरमेश्वर ।एवमेतत्।अत्राप्यविश्वासोममनास्तीत्यर्थः।तथापिहेपुरुषोत्तम तवैश्वरंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिःसंपन्नंत्वद्रूपं कौतूहलादहंद्रष्टुमिच्छामि ॥ ३ ॥ नचाहंद्रष्टुमिच्छामीत्येतावतेवत्वयातद्रूपंदर्शयितव्यम् । किंतर्हिमन्यसइति ।

श्रीभगवानुवाच॥पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः॥नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ५ ॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ॥ ६ ॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७॥

योगिन एवयोगास्तेषामीश्वर मयाअर्जुनेनतद्रूपंद्रष्टुंशक्यमितियदिमन्यसे ततस्तर्हितद्रूपवंतमात्मानंअव्ययंनित्यंममदर्शय ॥ ४ ॥ एवंप्रार्थितःसन्नत्यद्भुतंरूपंदर्शयिष्यन्सावधानोभवेत्येवमर्जुनमभिमुखीकरोति । श्रीभगवानुवाच। पश्येतिचतुर्भिः रूपस्यैकत्वेऽपिनानाविधत्वाद्रूपाणीतिवहुवचनं अपरिमितान्यनेकप्रकाराणिदिव्यान्यलौकिकानिममरूपाणिंपश्य वर्णाःशुक्लकृष्णादयः आकृतयोऽवयवसन्निवेशविशेषाः नानाअनेकावर्णाआकृतयश्चयेषांतानिनानावर्णाकृतीनि ॥ ५ ॥ तान्येवाह । पश्येति । आदित्यादीन्ममदेहेपश्य मरुतएकोनपंचाशद्देवविशेषान् अदृष्टपूर्वाणि त्वयावान्येनवापूर्वमदृष्टाणि रूपाणि आश्चर्याण्यत्यद्भुतानि ॥ ६ ॥ किंच इहेति । तत्रतत्रपरिभ्रमतावर्षकोटिभिरपिद्रष्टुमशक्यंकृत्स्नमपिचराचरसहितं जगदिहास्मिन्ममदेहेऽवयवरूपेणैकत्रैवस्थितमद्याधुनैवपश्ययच्चान्यज्जगदाश्रयभूतंकारणस्वरूपम् जगतश्चावस्थाविशेषादिकम् जयपराजयादिकंच यदप्यन्यद्द्रष्टुमिच्छसितत्सर्वंपश्य ॥ ७ ॥

यदुक्तमर्जुनेन मन्यसेयदितच्छक्यमिति । तत्राह । नत्विति । अनेनैवतुस्वीयेनचर्मचक्षुषामांद्रष्टुंनशक्यसे शक्तोनभविष्यसि अतोऽहं दिव्यमलौकिकंज्ञानात्मकंचक्षुस्तुभ्यंददामिममैश्वरमसाधारणंयोगंयुक्तिमघटितघटनासामर्थ्यंपश्य ॥८॥ एवमुक्त्वाभगवानर्जुनायरूपंदर्शितवान् तच्चरूपंदृष्ट्वार्जुनःश्रीकृष्णंविज्ञापितवानितीममर्थं एवमुक्त्वेत्यादिभिःषड्भिःश्लोकैःधृतराष्ट्रंप्रति संजयउवाच ॥ । एवमिति हेराजन् धृतराष्ट्र महांश्चासौयोगेश्वरश्चहरिःपरमंऐश्वरंरूपंदर्शितवान् ॥ ९ ॥ कथंभूतंतदित्यतआह। अनेकेति। अनेकानिवक्राणिनयनानिचयस्मिन्तत् अनेकानामद्भुतानांदर्शनंयस्मिन्तत् अनेकानिदिव्याभरणानियस्मिन्तत् दिव्यान्यनेकानिउद्यतानिआयुधानिचयस्मिन्तत् ॥ १० ॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥ दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ८ ॥
संजय उवाच ॥ एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ॥ दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥
॥ ९ ॥ अनेकवक्रनयनमनेकाद्भुतदर्शनम् ॥ अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ १० ॥
दिव्यमाल्यांबरधरं दिव्यगन्धानुलेपनम् ॥ सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११ ॥
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

किंच दिव्येति।दिव्यानिमाल्यांबराणिचधारयतीतितथा दिव्योगंधोयस्यतादृशमनुलेपनंयस्यतत् सर्वाश्चर्यमयमनेकाश्चर्यप्रायम् देवंद्योतनात्मकम् अनंतमपरिच्छिन्नम् विश्वतःसर्वतोमुखानियस्मिन्तत् ॥११॥विश्वरूपदीप्तेर्निरुपमत्वमाह ॥ दिवीति ।

दिव्याकाशेसूर्यसहस्रस्ययुगपदुत्थितस्ययदियुगपदुत्थिताभाः प्रभाभवेत् तर्हिसातदामहात्मनोविश्वरूपस्यभासःप्रभायाःकथंचित्सदृशीस्यात् नान्योपमास्तीत्यर्थः तथाभूतंरूपंदर्शयामासेतिपूर्वेणान्वयः ॥१२॥ ततःकिंवृत्तमित्यपेक्षायामाहसंजयः तत्रेति । अनेकधाप्रविभक्तंनानाविभागेनावस्थितंकृत्स्नंजगद्देवदेवस्यशरीरेतदवयवत्वेनैकत्रैवस्थितंतदापांडवोऽर्जुनोऽपश्यत् ॥ १३ ॥ एवंदृष्ट्वाकिंकृतवानित्यतआह । ततइति । ततोदर्शनानंतरं विस्मयेनाविष्टोव्याप्तः सन्हृष्टान्युत्पुलकितानिरोमाणियस्यसधनंजयोदेवंतमेवाशिरसाप्रणम्यकृ

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा॥अपश्यद्देवदेवस्य शरीरे पांडवस्तदा॥१३॥ततः सविस्मयाविष्टो
हृष्टरोमा धनंजयः॥प्रणम्य शिरसा देवं कृतांजलिरभाषत ॥ १४ ॥ अर्जुन उवाच ॥ पश्यामि देवांस्तव देव
देहे सर्वांस्तथा भूतविशेषसंघान्॥ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्१५अनेकबाहू
दरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपम् ॥नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूपम्॥१६॥

तांजलिःसंपुटीकृतहस्तोभूत्वाऽभाषत उक्तवान् ॥१४॥ भाषणमेवाह । पश्यामीतिसप्तदशभिःहेदेव तवदेहे देवानादित्यादीन् पश्यामि तथासर्वान्भूतविशेषाणांजरायुजांडजादीनांसंवंधांश्च तथादिव्यानृषीन्वसिष्ठादीन् उरगांश्चतक्षकादीन्तथादेवानामीशंस्वामिनं ब्रह्माणंच कथंभूतम् कमलासनस्थम् पृथ्वीपद्मकर्णिकायांमेरौस्थितम् यद्वा त्वन्नाभिपद्मासनस्थम् ॥ १५ ॥ किंच अनेकेति।अनेका

निवाह्वादीनियस्यतादृशंपश्यामि अनंतानिरूपाणियस्यतं त्वांसर्वतःपश्यामि तवतुअंतंमध्यमादिंचनपश्यामि सर्वगतत्वात् ॥ १६ ॥ किंच किरीटिनमिति । किरीटीनंमुकुटवन्तं गदिनंमुगदावन्तं चक्रिणंचक्रवन्तं सर्वतोदीप्तिमन्तं तेजःपुंजरूपम् तथादुर्निरीक्ष्यंद्रष्टुमशक्यम् तत्रहेतुः दीप्तयोनलार्कयोर्द्युतिरिवद्युतिस्तेजोयस्यतम् अतएवाप्रमेयम् एवंभूतइतिनिश्चेतुमशक्यम् त्वांसमन्ततःपश्यामि ॥ १७ ॥ यस्मादेवंतवातर्क्यमैश्वर्यंतस्मात् । त्वामिति । त्वमेवाक्षरंपरमंब्रह्म कथंभूतं वेदितव्यंमुमुक्षुभिर्ज्ञातव्यम् त्वमेवास्यविश्वस्यपरं

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतम्॥पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ॥
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥ १८॥
अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रम् ॥ पश्यामि त्वां दीप्तहुताशवक्रं स्वतेजसा विश्वमिदं तपन्तम् ॥ १९ ॥

निधानम् निधीयतेऽस्मिन्निितिनिधानंप्रकृष्टाश्रयः । अतएवत्वमव्ययोनित्यः शाश्वतस्यानित्यस्यधर्मस्यगोप्तापालकः सनातनश्चिरन्तनः पुरुषोमेमतः संमतोऽसि ॥ १८ ॥किंच अनादीति । अनादिमध्यान्तमुत्पत्तिस्थितिप्रलयरहितम् अनन्तंवीर्यंप्रभावोयस्यतम् अनन्तबाहुं अनन्ताबाहवोयस्यतम् शशिसूर्यौ नेत्रेयस्यतम् तादृशंत्वांपश्यामि तथादीप्तोहुताशोऽग्निर्वक्त्रेषुयस्यतम् स्वतेजसा इदंवि

श्वं तपंतंसंतापयंतंपश्यामि ॥ १९ ॥ किंच द्यावापृथिव्योरिति ॥ द्यावापृथिव्योरिदमंतरं हि अंतरिक्षंत्वयैकेनव्याप्तम् दिशश्चसर्वा व्याप्ताः अद्भुतंअदृष्टपूर्वंत्वदीयमिदमुग्रंघोरंरूपंदृष्ट्वालोकत्रयंप्रव्यथितमतिभीतंपश्यामिइतिपूर्वस्यैवानुषंगः ॥ २० ॥ किंच अमी हीति । अमीसुरसंघाः भीताःसंतः त्वांविशंतिशरणंप्रविशंति तेषांमध्येकेचिदतिभीताः दूरतएवास्थित्वाकृतसंपुटकरयुगुलाः संतोगृ

द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्य
थितं महात्मन्॥२०॥अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति ॥ स्वस्तीत्युक्त्वा
महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ॥ गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥

णंति जयजयरक्षरक्षेतिप्रार्थयंते स्पष्टमन्यत् ॥ २१ ॥ किंच रुद्रेति । रुद्राश्चादित्याश्चवसवश्चयेचसाध्यानामदेवाः विश्वेदेवाः अश्विनौदेवौ मरुतोमरुद्गणाः ऊष्माणंपिबंतीत्यूष्मपाःपितरः “ ऊष्मभागाहिपितर ” इत्यादिश्रुतेः स्मृतिश्च “यावदुष्णंभवेदन्नंयावदश्नंति वाग्यताः ॥ पितरस्तावदश्नंतियावन्नोक्ताहविर्गुणा”इति ॥ गंधर्वाश्चयक्षाश्चासुराश्चविरोचनादयः सिद्धानांसंघाश्चतेसर्वएव विस्मिताःसं

तः त्वांवीक्षंतइत्यन्वयः ॥ २२ ॥ किंच रूपमिति । हेमहाबाहो महदत्यूर्जितंतवेरूपंदृष्ट्वालोकाःसर्वेप्रव्यथिताः अतिभीताः तथाहंप्रव्यथितोऽस्मि कीदृशंरूपंदृष्ट्वा बहूनिवक्त्राणिनेत्राणिचयस्मिन्तत् बहवोबाहवऊरवःपादाश्चयस्मिन्तत् बहूनिउदराणियस्मिंस्तत् बहुभिर्दंष्ट्राभिःकरालंविकृतं रौद्रमित्यर्थः ॥ २३ ॥ नकेवलंभीतोऽहमित्येतावदेव अपितु नभःस्पृशमिति । नभःस्पृशतीति नभःस्पृक् तं अंतरिक्षव्यापिनमित्यर्थः दीप्तंतेजोयुक्तम् अनेकेवर्णायस्यतमनेकवर्णम् व्यात्तानिविवृतान्याननानियस्यतम् दीप्तानिविशालानिनेत्राणियस्यतम् एवंभूतंत्वांदृष्ट्वाप्रव्यथितोंऽतरात्मामनोयस्यसोऽहम् धृतिंधैर्यमुपशमंचनलभे ॥ २४ ॥ किंच दंष्ट्रेति । भोदेवेश तवमुखानिदृष्ट्वाभयावेशेनदिशोनजानामि शर्मचसुखंनलभे भोजगन्निवास प्रसन्नोभव कीदृशानिमुखानि दंष्ट्राभिःकरालानि कालानलःप्रलयाग्निः तत्सदृशानि ॥ २५ ॥ यच्चान्यद्द्रष्टुमिच्छसीत्यनेनास्मिन्संग्रामेभाविजयपराजयादिकंचममदेहेपश्ये

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्॥२३॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्॥दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो॥२४॥दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि॥ दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास॥ २५ ॥अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥

तियद्भगवतोक्तंतादिदानींपश्यन्नाह अमीचेतिपंचभिः अमीधृतराष्ट्रस्यपुत्रादुर्योधनादयःसर्वे अवनिपालानांजयद्रथादीनांराज्ञांसंघैः सहैव तववक्त्राणिविशंतीत्युत्तरेणान्वयः । तथा भीष्मश्चद्रोणश्चासौसूतपुत्रःकर्णश्च नकेवलंतएवविशंति अपितुप्रतियोद्धारोयेऽस्मदीयायोधमुख्याःशिखंडिधृष्टद्युम्नादयः तैःसह ॥ २६ ॥ वक्त्राणीति । एतेसर्वेत्वरमाणाधावंतइवदंष्ट्राभिःकरालानिभयंकराणिवक्त्राणिविशंति तेषांमध्येकेचिच्चूर्णीकृतैरुत्तमांगैःशिरोभिरुपलक्षितादंतसंधिषुसंश्लिष्टाःसंदृश्यंते ॥ २७ ॥ प्रवेशमेवदृष्टांतेनाह । यथेति । न

वक्त्राणि ते त्वरमाणा विशंते दंष्ट्राकरालानि भयानकानि ॥ केचिद्विलग्ना दशनांतरेषु संदृश्यंते
चूर्णितैरुत्तमांगैः ॥ २७ ॥ यथा नदीनां बहवोंऽबुवेगाः समुद्रमेवाभिमुखा द्रवंति ॥ तथातवामी
नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति ॥ २८ ॥ यथा प्रदीप्तं ज्वलनं पतंगा विशंति
नाशाय समृद्धवेगाः ॥ तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥

दीनामनेकमार्गप्रवृत्तानांबहवःअंबूनांवारीणांवेगाःप्रवाहाःसमुद्राभिमुखाःसंतोयथासमुद्रमेवद्रवंति प्रविशंति तथा अमीयेनरलोकवीराःतेअभिविज्वलंति सर्वतःप्रदीप्यमानानिवक्त्राणिप्रविशंति ॥ २८ ॥ अवशत्वेनप्रवेशेनदीवेगोदृष्टांतउक्तः बुद्धिपूर्वकप्रवेशेदृष्टांतमाह । यथेति । प्रदीप्तंज्वलनमग्निंपतंगाःसूक्ष्मपक्षिविशेषाः बुद्धिपूर्वकंसमृद्धोवेगोयेषां तेयथानाशायमरणायैवविशंतितथैवलोकाएतेजनाअ

पितवमुखानिप्रविशंति ॥ २९ ॥ ततःकिमतआह । लेलिह्यसइति । ग्रसमानोगिलन् समग्रान्लोकान्सर्वानेतान्वीरान्समंतात्सर्वतो लेलिह्यसे अतिशयेनभक्षयासि कैः ज्वलद्भिर्वदनैः किंच हेविष्णो तवभासोदीप्तयस्तेजोभिर्विस्फुरणैःसमस्तंजगद्व्याप्यतीव्राःसत्यः प्रतपंति संतापयंति ॥ ३० ॥ यतएवंतस्मात् आख्याहीति भवानुग्ररूपःकइत्याख्याहिकथय तुभ्यंनमोऽस्तु हेदेववरप्रसीदप्रसन्नोभव भवंतमाद्यंपुरुषं विशेषेणज्ञातुमिच्छामि यतस्तवप्रवृत्तिंचेष्टांकिमर्थमेवंप्रवृत्तोऽसीतिनजानामि एवंभूतस्यतवप्रवृत्तिंवार्त्तामपिन

लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति
विष्णो ॥ ३० ॥ आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ॥ विज्ञातुमिच्छामि भवंतमाद्यं
नहि प्रजानामि तव प्रवृत्तिम् ॥ ३१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्त्तुमिह प्रवृत्तः ॥ ऋतेऽपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ३२ ॥

जानामीतिवा ॥३२ ॥ एवंप्रार्थितःसन् श्रीभगवानुवाच । कालोऽस्मीतित्रिभिः लोकानांक्षयकर्त्ताप्रवृद्धोऽत्युग्रः कालोऽस्मि लोकान्प्राणिनः संहर्त्तुमिहलोकेप्रवृत्तोस्मिअतःऋतेऽपित्वामिति । त्वांहंतारंविनापिनभविष्यंति नजीविष्यंति यद्यपित्वयानहंतव्याएतेतथापिमया कालात्मनाग्रस्ताः संतोमरिष्यंत्येव केते प्रत्यनीकेषु अनीकान्यनीकानिप्रतिभीष्मद्रोणादीनांसर्वासुसेनासुयेयोद्धारोऽवस्थितास्ते

सर्वेंपि ॥ ३२ ॥ तस्मादिति यस्मादेवं तस्मात्त्वंयुद्धायोत्तिष्ठ देवैरपिदुर्जयाःभीष्मद्रोणादयोऽर्जुनेननिर्जिताइत्येवंभूतंयशोलभस्व प्राप्नुहि अयत्नेनशत्रून्जित्वासमृद्धंराज्यंभुंक्ष्व एतेचतवशत्रवस्त्वदीययुद्धात्पूर्वमेवमयैवकालात्मनानिहतप्रायाः तथापित्वंनिमित्तमात्रंभव हेसव्यसाचिन् सव्येनवामहस्तेनसाचितुंशरान्संधातुंशीलंयस्येतिव्युत्पत्त्यावामेनापिवाणक्षेपात्सव्यसाचीत्युच्यते ॥ ३३ ॥ नचैतद्विभ्रंशःकतरन्नोगरीयइत्यादिर्याशंकासाऽपिनकार्येत्याह द्रोणंचेति येभ्यस्त्वंशंकसेतान्द्रोणादीन्मयैवहतांस्त्वंजहि घातय माव्य

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धम् ॥ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ॥ ३३ ॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ॥ मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥ ३४ ॥ ॥ संजय उवाच ॥ ॥ एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी ॥ नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ ३५ ॥

थिष्ठाः शोकंमाकार्षीः सपत्नान्शत्रून् रणेयुद्धेनिश्चितंजेतासिजेष्यसि ॥ ३४ ॥ ततोयद्वृत्तंतद्धृतराष्ट्रंप्रतिसंजयउवाच एतदिति एतत्पूर्वश्लोकत्रयात्मकंकेशवस्यवचनंश्रुत्वा वेपमानःकंपमानः किरीटी अर्जुनः कृतांजलिःसंपुटीकृतहस्तः कृष्णंनमस्कृत्यपुनरप्याह उक्तवान् कथमाह भयहर्षाद्यावेशवशाद्गद्गदेनकंठकंपेनसहवर्त्ततइतिसद्गदंयथाभवतितथा किंच भीतादपिभीतःसन् प्रणम्यअवनतो

मंता ॥ ३५ ॥ स्थानइत्येकादशभिरर्जुनस्योक्तिः स्थानेइत्यव्ययंयुक्तमित्यस्मिन्नर्थे हेहृषीकेशयतएवंत्वमद्भुतप्रभावोभक्तवत्सलश्च अतस्तवप्रकीर्त्यामाहात्म्यसंकीर्तनेननकेवलमहमेवप्रहृष्यामिकिंतु जगत्सर्वंप्रहृष्यति प्रकर्षेणहर्षं प्राप्नोति एतत्तुस्थाने युक्तमित्यर्थः तथा जगदनुरज्यतेअनुरागंचोपैतिइतियत् तथा रक्षांसिभीतानि संतिदिशःप्रतिद्रवंतिपलायंतइतियत् सर्वेयोगतपोमंत्रादिसिद्धानांसंघानमस्यंतिप्रणमंतीतियत् एतच्चस्थाने युक्तमेव नचित्रमित्यर्थः ॥ ३६ ॥ तत्रहेतुमाह कस्मादिति हेमहात्मन् हेअनंतहेदेवेश हेज

॥ अर्जुन उवाच ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि भीतानि दिशो
द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ ३६ ॥ कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्या
दिकर्त्रे ॥ अनंतदेवेशजगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ त्वमादिदेवः पुरुषः पुराण
स्त्वमस्य विश्वस्य परं निधानम् ॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥

गन्निवास कस्माद्धेतोस्तेतुभ्यंननमेरन् नमस्कारंनकुर्युः कथंभूताय ब्रह्मणोऽपिगरीयसेगुरुतराय आदिकर्त्रेच ब्रह्मणोऽपिजनकाय किंच सद्व्यक्तंअसदव्यक्तंचताभ्यांपरंमूलकारणंयदक्षरंब्रह्मतच्चत्वमेव एतैर्नवभिर्हेतुभिस्त्वांसर्वेनमस्यंतीतिनचित्रमित्यर्थः ॥३७॥ किंच त्वमिति त्वमादिदेवः देवानामादिः यतःपुराणःअनादिःपुरुषस्त्वम् अतएव त्वमस्यविश्वस्यपरंनिधानम् लयस्थानम् तथाविश्वस्यवेत्तावे

दिताज्ञाताचत्वम् यच्चवेद्यंवस्तुजातं परंचधामवैष्णवंपदंतदपित्वमेवासि अतएवहेअनंतरूप त्वयैवाविश्वमिदंततंव्याप्तंएतैश्चसप्तभिर्हेतुभिस्त्वमेवनमस्कार्यइतिभावः ॥ ३८ ॥ इतश्चत्वमेवसर्वैर्नमस्कार्यः सर्वदेवात्मकत्वादितिस्तुवन्स्वयमपिनमस्करोतिवायुरितिवाय्वादिरूपस्त्वमितिसर्वदेवतात्मकत्वोपलक्षणार्थमुक्तम् प्रजापतिःपितामहःतस्यापिजनकत्वात् प्रपितामहस्त्वमतस्तेतुभ्यंसहस्रकृत्वः सहस्रशोनमोऽस्तु भूयोऽपिपुनरपिसहस्रकृत्वोनमोनमइति भक्तिश्रद्धाभरातिरेकेणनमस्कारेषुतृप्तिमनधिगच्छन्बहुशः प्रणमति ॥ ३९ ॥

वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च ॥ नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च
भूयोऽपि नमोनमस्ते ॥ ३९ ॥ नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वतएव सर्व ॥ अनंतवी
र्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसिसर्वः ॥ ४० ॥ ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण
हे यादव हे सखेति ॥ अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥ ४१ ॥

किंच नमइति हेसर्व सर्वात्मन् सर्वास्वपिदिक्षुतुभ्यंनमोस्तु सर्वात्मकत्वमुपपादयन्नाह अनंतंवीर्यंसामर्थ्यंयस्य तथापिअमितोविक्रमः पराक्रमोयस्यसः एवंभूतस्त्वंसर्वंविश्वंसम्यगंतर्बहिश्चसमाप्नोषिव्याप्नोषि सुवर्णमिवकटककुंडलादि स्वकार्यंव्याप्यवर्त्तसे ततःसर्वरूपोऽसि ॥ ४० ॥ इदानींभगवंतंक्षमापयतिसखेतिद्वाभ्याम् त्वांप्राकृतःसखेतिमत्वाप्रसभंहठेनातिरस्कारेणयदुक्तंतत्क्षामयेत्वामित्यु

त्तरेणान्वयः किंतत् हेकृष्णहेयादवहेसखेति सांधिरार्षः प्रसभोक्तौहेतुः तवमाहिमानमिदंचविश्वरूपमजानता मयाप्रमादात्प्रणयेनस्नेहे नापिवायदुक्तमिति ॥ ४१ ॥ किंच यच्चेति । हे अच्युत यच्चपरिहासार्थंक्रीड़ादिषुतिरस्कृतोऽसि एकःकेवलःसखीन्विनारहासिस्थित इत्यर्थः अथवातत्समक्षंतेषांपरिहसतांसखीनांसमक्षंपुरतोऽपि तत्सर्वमपराधजातंत्वां अप्रमेयमचिंत्यप्रभावंक्षामये क्षमांकारयामि ॥ ॥ ४२ ॥ अचिंत्यप्रभावमेवाह पितेति नविद्यतेप्रतिमाउपमायस्यसोऽप्रतिमः तथाविधःप्रभावोयस्यतव हेअप्रतिमप्रभाव त्वमस्य

यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु॥एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वाम
हमप्रमेयम् ॥ ४२ ॥ पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ॥ नत्वत्समोऽस्त्य
भ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः ॥ ४३ ॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसा
दये त्वामहमीशमीडचम् ॥ पितेव पुत्रस्य सखेव सख्युःप्रियःप्रियायार्हसि देवसोढुम् ॥ ४४ ॥

चराचरस्यलोकस्यापिताजनकोऽसि अतएवपूज्यश्चगुरुश्च गुरोरपिगरीयान् गुरुतरः अतोलोकत्रयेपित्वत्समएवतावदन्योनास्ति परमेश्वरस्यान्यस्याभावात् त्वत्तोऽभ्यधिकःपुनःकुतःस्यात् ॥ ४३ ॥ यस्मादेवं तस्मादिति तस्मात्त्वामीशंजगतःस्वामिनमीडचंस्तुत्यंप्रसादये प्रसादयामि । कथं । कायंप्राणिधायदंडवन्निपात्य प्रणम्यप्रकर्षेणनत्वा अतस्त्वंममापराधंसोढुंक्षंतुमर्हसि कस्यकइव पु

त्रस्यापराधंकृपयापितायथासहते सख्युर्मित्रस्यापराधंसखानिरुपाधिबंधुर्यथा प्रियश्चप्रियायाअपराधंतत्प्रियार्थंयथातद्वत् ॥ ४४ ॥ एवंक्षमापयित्वाप्रार्थयते अदृष्टपूर्वमितिद्वाभ्यां हेदेव पूर्वमदृष्टंतवरूपंदृष्ट्वाहृषितोस्मि हृष्टोऽस्मि तथाभयेनचमेमनः प्रव्यथितंप्रचलितं तस्मान्ममव्यथानिवृत्तयेतदेवरूपंदर्शय हेदेवेश हेजगन्निवास प्रसन्नोभव॥४५॥तदेवरूपंविशेषयन्नाह किरीटिनमिति किरीटिनंगदावंतंचक्रहस्तंचत्वांद्रष्टुमिच्छामि पूर्वंयथादृष्टोऽसितथैव अतोहेसहस्रबाहो विश्वमूर्त्तेइदंविश्वरूपंसंहृत्यतेनैवकिरीटादियुक्तेनचतुर्भुजेनरूपेण

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देव रूपं प्रसीद देवेश
जगन्निवास ॥ ४५ ॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण
चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥ ४६ ॥ ॥ श्रीभगवानुवाच ॥ मया प्रसन्नेनतवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ४७ ॥

भव आविर्भव तदनेनश्रीकृष्णमर्जुनःपूर्वमपिकिरीटादियुक्तमेवपश्यतीतिगम्यते यत्तुपूर्वमुक्तंविश्वरूपदर्शने किरीटिनंगादिनंचक्रिणंच पश्यामीतितद्बहुकिरीटाद्यभिप्रायेण यद्वा एतावंतंकालंयंत्वांकिरीटिनंगदिनंचक्रिणंचसुप्रसन्नमपश्यम् तमेवइदानींतेजोराशिंदुर्निरीक्ष्यं पश्यामीत्येवंतत्रबहुवचनव्यक्तिरित्यविरोधः ॥ ४६ ॥ एवंप्रार्थितःसन्तमाश्वासयन् श्रीभगवानुवाच मयेतित्रिभिः हेअर्जुनकिमि

तिबिभेषि यतोमयाप्रसन्नेनकृपयातवेदंपरमुत्तमंरूपंदर्शितम् आत्मनोममयोगाद्योगमायासामर्थ्यात् परत्वमेवाह तेजोमयंविश्वंविश्वात्मकमनंतमाद्यंच यन्ममरूपंत्वदन्येनत्वादृशाद्भक्तादन्येनननपूर्वंदृष्टंतत् ॥ ४७ ॥ एतद्दर्शनमतिदुर्लभंलब्ध्वात्वंकृतार्थोऽसीत्याह नेति वेदाध्ययनातिरेकेणयज्ञाध्ययनस्याभावाद्यज्ञशब्देनयज्ञविद्याःकल्पसूत्राद्यालक्ष्यंते वेदानांयज्ञविद्यानांचाध्ययनैरित्यर्थः नचदानैर्नचक्रियाभिरग्निहोत्रादिभिः नचोग्रैस्तपोभिश्चांद्रायणादिभिः एवंरूपोऽहंत्वदन्येनमनुष्यलोकेद्रष्टुंशक्यः अपितुत्वमेवकेवलंमत्प्रसा

न वेदयज्ञाध्ययनैर्नदानैर्न चक्रियाभिर्न तपोभिरुग्रैः॥एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन

कुरुप्रवीर ॥ ४८ ॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ् ममेदम्॥व्यपेतभीःप्री

तमनाःपुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥ ४९ ॥ संजयउवाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा

स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा॥५०॥

देनदृष्ट्वाकृतार्थोऽसि ॥ ४८ ॥ एवमपिचेत्तवेदंरूपंघोरंदृष्ट्वाव्यथाभवतितर्हितदेवरूपंदर्शयामीत्याह मातइति ईदृक्ईदृशंमदीयंघोरंरूपंदृष्ट्वातेव्यथामास्तु विमूढभावोविमूढत्वंचमास्तु व्यपगतभयःप्रीतमनाश्वसन्पुनस्त्वंतदेवेदंममरूपंप्रकर्षेणपश्य ॥ ४९ ॥ एवमुक्त्वाप्राक्तनमेवरूपंदर्शितवानितिसंजयउवाच इतीति श्रीवासुदेवोऽर्जुनमेवमुक्त्वायथापूर्वमासीत्तथैवाकिरीटादियुक्तंचतुर्भुजंस्वीयंरूपंपुन

दर्शयामास एनमर्जुनंभीतमेवप्रसन्नवपुर्भूत्वापुनरप्याश्वासितवान् महात्माविश्वरूपःकृपालुरितिवा ॥ ५० ॥ ततोनिर्भयःसन्नर्जुन उवाच दृष्ट्वेति सचेताः प्रसन्नचित्तइदानींसंवृत्तः जातोस्मि प्रकृतिंस्वास्थ्यंचप्राप्तोऽस्मि शेषंस्पष्टम् ॥ ५१ ॥ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन् श्रीभगवानुवाच सुदुर्दर्शमिति यन्ममविश्वरूपंत्वंदृष्टवानसि इदंसुदुर्दर्शमत्यंतंद्रष्टुमशक्यम् अतोदेवाअप्यस्य

॥ अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ॥ इदानीमस्मि संवृत्तः सचेताः प्रकृतिंगतः
॥५१ ॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम॥देवा अप्यस्य रूपस्य नित्यंदर्शन
कांक्षिणः ॥५२॥ नाहं वेदैर्न तपसा न दानेन नचेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा
॥ ५३ ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४ ॥
मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥ ५५ ॥

रूपस्यसर्वदादर्शनमिच्छंति नकेवलंपुनरिदंपश्यंति ॥ ५२ ॥ तत्रहेतुः नाहमितिस्पष्टार्थः ॥ ५३ ॥ केनोपायेनतर्हिद्रष्टुंशक्यइति तत्राह भक्त्येति अनन्ययामदेकनिष्ठयाभक्त्यातुएवंभूतोविश्वरूपोऽहंतत्त्वेनपरमार्थतोज्ञातुंशक्यःशास्त्रतः द्रष्टुंप्रत्यक्षतःप्रवेष्टुंच तादात्म्येनशक्यः नान्यैरुपायैः ॥ ५४ ॥ अतःसर्वशास्त्रसारंपरमंरहस्यंशृण्वित्याह मत्कर्मकृदिति मदर्थंकर्मकरोतीतिमत्कर्मकृत्

अहमेवपरमःपुरुषार्थोयस्यसः ममैवभक्तोमामेवाश्रितः पुत्रादिषुसंगवर्जितोनिर्वैरश्चसर्वभूतेषु एवंभूतोयःसमांप्राप्नोति नान्यइति ॥ ५५ ॥ दैवैरपिसुदुर्दर्शंतपोज्ञानादिकोटिभिः ॥ भक्तायभगवानेवंविश्वरूपमदर्शयत् ॥ १ ॥ इतिसुबोधिन्यांटीकायामेकादशोऽध्यायः ॥ ११ ॥ निर्गुणोपासनस्यैवंसगुणोपासनस्यच ॥ श्रेयःकतरदित्येवंनिर्णेतुंद्वादशोद्यमः ॥ १ ॥ पूर्वाध्यायांतेमत्कर्मकृन्मत्परमइत्येवंभक्तिनिष्ठस्य श्रेष्ठत्वमुक्तम्।कौंतेयप्रतिजानीहीत्यादिना तत्रतस्यैवश्रेष्ठत्ववर्णितम् । तथातेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यतइत्यादिनासर्वंज्ञानप्लवे

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो
नामैकादशोऽध्यायः ॥ ११ ॥ अर्जुन उवाच ॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरम
व्यक्तं तेषां के योगवित्तमाः ॥ १ ॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ॥
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

नैववृजिनंसंतरिष्यसीत्यादिनाचज्ञाननिष्ठस्यश्रेष्ठत्वमुक्तम् एवमुभयोःश्रैष्ठ्येऽपिविशेषजिज्ञासयाभगवंतंप्रतिअर्जुनउवाच एवमिति एवंसर्वकर्मार्पणादिनासततंयुक्तास्त्वन्निष्ठाःसंतोयेभक्तास्त्वांविश्वरूपंसर्वज्ञंसर्वशक्तिंपर्युपासतेध्यायंति येचाप्यक्षरंब्रह्मअव्यक्तंनिर्विशेषंउपासतेतेषांउभयेषांमध्येअतिशयेनकेयोगविदःश्रेष्ठइत्यर्थः ॥ १ ॥ तत्रप्रथमाःश्रेष्ठाइत्युत्तरंश्रीभगवानुवाच मयीति मयिपरमेश्वरेसर्वज्ञत्वादिगुणविशिष्टेमनआवेश्यैकाग्रंकृत्वा नित्ययुक्ताःमदर्थकर्मानुष्ठानादिनामन्निष्ठाःसंतः श्रेष्ठयाश्रद्धयायुक्तायेमामाराधयंति तेयुक्ततमा

ममाभिमताः ॥ २ ॥ तर्हिइतरेकिंनश्रेष्ठाइत्यतआहयेत्वितिद्वाभ्याम् येत्वक्षरंपर्युपासतेध्यायंतितेपिमामेवप्राप्नुवंतीतिद्वयोरन्वयःअक्षरस्यलक्षणमनिर्देश्यमित्यादि अनिर्देश्यंशब्देनानिर्देष्टुमशक्यम् यतोव्यक्तंरूपादिहीनम् सर्वत्रगंसर्वव्यापि अव्यक्तत्वादेवाचिंत्यं कूटस्थंकूटेमायाप्रपंचेस्थितम् अधिष्ठानत्वेनास्थितम् अचलंस्पंदनरहितम् अतएवध्रुवंनित्यम् वृद्ध्यादिरहितम् ॥३॥ संनियम्येति स्पष्टम् ॥ ४॥ननुचतेऽपित्वामेवप्राप्नुवंतितर्हीतरेषांयुक्ततमत्वंकुतइत्यपेक्षायांक्लेशाक्लेशकृतंविशेषमाह क्लेशइतित्रिभिः अव्यक्तेनिर्विशेषेअक्षरेआसक्तंचेतोये

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ॥ सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥
सन्नियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहितेरताः ॥ ४ ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥ अव्यक्ता हि गतिर्दुःखंदेहवद्भिरवाप्यते ॥ ५ ॥
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायंत उपासते ॥ ६ ॥

षांतेषांक्लेशोऽधिकतरः हियस्मादव्यक्ताविषयागतिर्निष्ठा देहाभिमानिभिःदुखंयथाभवत्येवमवाप्यते देहाभिमानिनांनित्यंप्रत्यक्प्रवणत्वस्यदुर्घटत्वादितिभावः ॥ ५ ॥ मद्भक्तानांमत्प्रसादादनायासतएवसिद्धिर्भवतीत्याह येत्वितिद्वाभ्याम् । मयिपरमेश्वरेसर्वाणिकर्माणिसंन्यस्यसमर्प्यमत्पराभूत्वामांध्यायंतः अनन्येननविद्यतेअन्योभजनीयोयस्मिन्तेनैव एकांतभक्तियोगेनोपासतइत्यर्थः ॥ ६ ॥

तेषामिति एवंमयिआवेशितंचेतोयैस्तेषांमृत्युयुक्तात्संसारसागरादहंसम्यगुद्धर्त्ताअचिरेणैवभवामि॥७॥ यस्मादेवंतस्मात् मय्येवेति।मय्येवसंकल्पविकल्पात्मकंमनआधत्स्व स्थिरीकुरु बुद्धिमपिव्यवसायात्मिकांमय्येवानिवेशय एवंकुर्वन्मत्प्रसादेनलब्धज्ञानःसन्नतऊर्ध्वंदेहांतेमरणानंतरंमय्येवानिवासिष्यासि निवत्स्यसि मदात्मनावासं करिष्यासि नात्रसंशयःतथाचश्रुतिःदेहांतेदेवस्तारकंपरंब्रह्मव्याचष्टइति॥८॥ अत्राशक्तंप्रतिसुगमोपायमाह अथेति स्थिरंयथाभवत्येवंमयिचित्तंधारायितुंयदिशक्तोनभवसि तर्हिविक्षिप्तंचित्तंपुनःप्रत्याहृत्यममानुस्मर

तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ॥ भवामिनचिरात्पार्थमय्यावेशितचेतसाम् ॥ ७ ॥
मय्येवमन आधत्स्व मयि बुद्धिं निवेशय ॥ निवासिष्यसि मय्येव अतऊर्ध्वं न संशयः ॥ ८ ॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्॥ अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय॥९॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्म परमो भव॥मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥
अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ॥ सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

णलक्षणोयोगाभ्यासस्तेनमांप्राप्तुमिच्छप्रयत्नंकुरु ॥ ९ ॥ यदिपुनर्नैवंतत्राह अभ्यासइति अभ्यासेऽपियद्यशक्तोऽसितर्हिमत्प्रीत्यर्थानियानिकर्माणिएकादश्युपवासव्रतचर्यानामसंकीर्त्तनादीनितदनुष्ठानमेवपरमंयस्यताद्दशोभव एवंभूतानिकर्माण्यपिमदर्थंकुर्वन्मोक्षंप्राप्स्यसि॥१०॥अत्यंतंभगवद्धर्मपरिनिष्ठायामशक्तस्यपक्षांतरमाह अथैतदपीति अथैतदपिकर्त्तुमशक्तोऽसितर्हिमद्योगंमदेकशरणत्वमाश्रितः

सर्वेषांदृष्टादृष्टार्थानामावश्यकानांचाग्निहोत्रादिकर्मणांफलानिनियतचित्तोभूत्वापरित्यज एतदुक्तंभवति मयातावदीश्वराज्ञयायथाशक्ति कर्माणिकर्त्तव्यानिफलंपुनर्दृष्टमदृष्टंवापरमेश्वराधीनमित्येवंमयिभारमारोप्यफलासक्तिंपरित्यज्यवर्त्तमानोमत्प्रसादेनकृतार्थोभविष्यसीति तात्पर्यम् ॥ ११ ॥ तमिमंफलत्यागंस्तौति श्रेयोहीति सम्यग्ज्ञानरहितादभ्यासाद्युक्तिसहितोपदेशपूर्वकंज्ञानंश्रेष्ठंतस्मादपितत्पूर्वकंध्यानंश्रेष्ठंततस्तुतंपश्यतिनिष्कलंध्यायमानइतिश्रुतेः तस्मादपिउक्तलक्षणःकर्मफलत्यागःश्रेष्ठः तस्मादेवंभूतात्कर्मफलत्यागात्कर्मसुतत्फलेषु

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरम्
॥ १२ ॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

चासक्तिनिवृत्त्यामत्प्रसादेनचसमनंतरमेवसंसारशांतिर्भवति ॥ १२ ॥ एवंभूतस्यभक्तस्याक्षिप्रमेवपरमेश्वरप्रसादहेतून्धर्मानाह अद्वेष्टेत्यष्टभिः सर्वभूतानांयथायथमद्वेष्टामैत्रःकरुणश्च उत्तमेषुद्वेषशून्यः समेषुमित्रतयावर्त्ततइतिमैत्रःहीनेषुकृपालुरित्यर्थः निर्ममोनिरहंकारश्चकृपालुत्वादेवान्यैःसहसमेदुःखसुखेयस्यसःक्षमीक्षमावान् ॥ १३ ॥ संतुष्टइति सततंलाभेअलाभेचसंतुष्टःप्रसन्नचित्तःयोगीअप्रमत्तः यतात्मा संयतस्वभावःदृढोमद्विषयोनिश्चयोयस्यमय्यर्पितेमनोबुद्धीयेन एवंभूतोयोमद्भक्तःसमेप्रियः ॥ १४ ॥

किंच यस्मादिति यस्मात्सकाशाल्लोकोजनोनोद्विजतेभयशंकयासंक्षोभंनप्राप्नोति यश्चलोकान्नोद्विजते यश्चस्वाभाविकैर्हर्षादिभिर्मुक्तः तत्रहर्षस्स्वस्येष्टार्थलाभेउत्साहः अमर्षःपरस्यलाभेऽसहनम् भयंत्रासः उद्वेगोभयादिनिमित्ताचित्तक्षोभः एतैर्विमुक्तोयोमद्भक्तःसमेप्रियः ॥ १५ ॥ किंच अनपेक्षइति अनपेक्षोयदृच्छोपस्थितेऽप्यर्थेनिःस्पृहः शुचिर्बाह्याभ्यंतरशौचसंपन्नः दक्षोऽनलसः उदासीनःपक्षपातरहितः गतव्यथआधिशून्यः सर्वान्दृष्टादृष्टार्थानारंभानुद्यमान्परित्यक्तुंशीलंयस्यसः एवंभूतःसन् योमद्भक्तःसमेप्रियः ॥ १६ ॥ किंच

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ॥हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति॥शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥१७॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ॥ शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥ १८ ॥

योनेति प्रियंप्राप्ययोनहृष्यति अप्रियंप्राप्ययोनद्वेष्टि इष्टार्थनाशेसतियोनशोचति अप्राप्तमर्थंयोनकांक्षति शुभाशुभेपुण्यपापेपरित्यक्तुंशीलंयस्यसएवंभूतोभूत्वा योमद्भक्तिमान्समेप्रियः ॥ १७ ॥ किंच समइति शत्रौचमित्रेचसमएकरूपः मानापमानयोरपितथासमएवहर्षविषादशून्यइत्यर्थः शीतोष्णयोः सुखदुःखयोश्चसमः संगविवर्जितःक्वचिदप्यनासक्तः ॥ १८ ॥

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् ॥ अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥
ये तु धर्मामृतमिदं यथोक्तं पर्युपासते ॥ श्रद्दधानामत्परमा भक्तास्तेऽतीव मे प्रियाः ॥ २० ॥

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥ १२ ॥

तुल्यइति तुल्येनिंदास्तुतीयस्य मौनीसंयतवाक् येनकेनचिद्यथालब्धेनसंतुष्टः अनिकेतोनियतवासशून्यः स्थिरमतिःव्यवस्थितचित्तः एवंभूतोमद्भक्तिमान्यःसमेप्रियोनरः ॥ १९ ॥ उक्तंधर्मजातंसफलमुपसंहरति येत्विति यथोक्तमुक्तप्रकारंधर्मएवामृतममृतत्वसाधनत्वात् धर्म्यामृतमिदमितिकेचित्पठंति तद्येऽपासतेअनुतिष्ठंति श्रद्धांकुर्वंतोमत्परमाश्चसंतोमद्भक्तास्तेऽतीवमेप्रियाइति ॥ २० ॥ दुःखमव्यक्तवर्त्मैतद्बहुविघ्नमतोबुधः ॥ सुखंकृष्णपदांभोजभक्तिसत्पथमाभजेत् ॥ १ ॥ इतिसुबोधिन्यांटीकायांद्वादशोऽध्यायः ॥ १२ ॥

भक्तानामहमुद्धर्त्तासंसारादित्यवादियत् त्रयोदशेऽथतत्सिद्ध्यैतत्त्वज्ञानमुदीर्यते ॥ १ ॥ तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात् भवामीतिपूर्वंप्रतिज्ञातम् तन्नचात्मज्ञानंविनासंसारादुद्धरणंसंभवति इतितत्त्वज्ञानोपदेशार्थंप्रकृतिपुरुषविवेकाध्यायआरभ्यते तत्रयत्सप्तमेऽध्यायेअपराचेतिप्रकृतिद्वयमुक्तम् तयोरविवेकाज्जीवभावमापन्नस्यचिदंशस्यायंसंसारः याभ्यांचजीवोपभोगार्थमीश्वरःसृष्ट्यादिषुप्रवर्त्तते तदेवप्रकृतिद्वयंक्षेत्रक्षेत्रज्ञशब्दवाच्यंपरस्परंविविक्तंतत्वतोनिरूपयिष्यन्श्रीभगवानुवाच इदमिति इदंभोगायतनंशरीरंक्षेत्रमित्यभिधीयते संसारस्यप्ररोहभूमित्वात् एतद्योवेत्ति अहंममेतिमन्यते तंक्षेत्रज्ञइतिप्राहुः कृषीवलवत्तत्फलभोक्तृत्वात्

श्रीभगवानुवाच ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ॥ एतद्योवेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥ तत्क्षेत्रं यच्च यादृक्च
यद्विकारि यतश्च यत् ॥ स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥ तद्विदःक्षेत्रक्षेत्रज्ञयोर्विवेकज्ञाः ॥ ॥

तदेवंसंसारिणःस्वरूपमुक्तम् इदानींतस्यैवपारमार्थिकमसंसारिस्वरूपमाह क्षेत्रज्ञमिति तंचक्षेत्रज्ञंसंसारिणंजीवंवस्तुतःसर्वक्षेत्रेष्वनुगतंमामेवविद्धि तत्त्वमसीतिश्रुत्युपलक्षितेनचिदंशेनमद्रूपस्योक्तत्वात् आदरार्थमेवतज्ज्ञानंस्तौति क्षेत्रक्षेत्रज्ञयोर्यद्वैलक्षण्येनज्ञानंतदेवमोक्षहेतुत्वान्ममज्ञानंमतम् अन्यत्तुवृथापांडित्यम् बंधहेतुत्वादित्यर्थः तदुक्तम् तत्कर्मयन्नबंधायसाविद्यायामुक्तये आयासायापरंकर्मविद्यान्याशिल्पनैपुणमिति॥२॥अत्रयद्यपिचतुर्विंशतिभेदैर्भिन्नाप्रकृतिःक्षेत्रमित्यभिप्रेतम् तथापिदेहरूपेणपरिणतायामेवतस्यामहंभावेनाविवेकः

स्फुटइतितद्विवेकार्थमिदंशरीरंक्षेत्रमित्यादिद्युक्तम् तदेतत्प्रपंचयिष्यन्प्रतिजानीते तत्क्षेत्रमिति यदुक्तंमया तत्क्षेत्रं यत्स्वरूपतोजडंदृश्यादिस्वभावम् यादृक्यादृशंचेच्छादिधर्मकम् यद्विकारियैरिंद्रियादिविकारैर्युक्तम् यतश्चप्रकृतिपुरुषसंयोगाद्भवति यदिति यैःस्थावरजंगमादिभेदैर्भिन्नमित्यर्थः सचक्षेत्रज्ञोयः स्वरूपतःयत्प्रभावश्चअचिंत्यैश्वर्ययोगेनयैःप्रभावैःसंपन्नः तत्सर्वंसंक्षेपतोमत्तःशृणु ॥३॥ कैर्विस्तरेणोक्तस्यायंसंक्षेपइत्यपेक्षायामाहऋषिभिरिति ऋषिभिर्वसिष्ठादिभिर्योगशास्त्रेषुध्यानधारणादिविषयत्वेनवैराजादिरूपेणबहुधागीतंनिरूपितम् विविधैर्विचित्रैश्चनित्यनैमित्तिककाम्यविषयैश्छंदोभिर्वेदैर्नानायजनीयदेवतादिरूपेणगीतम् ब्रह्मणःसूत्रैःपदैश्च ब्रह्मसूत्र्यतेसूच्यतेएभिरितिब्रह्मसूत्राणि यतोवाइमानिभूतानिजायंतइत्यादीनितटस्थलक्षणपराण्युपनिषद्वाक्यानि तथाचब्रह्मपद्यतेगम्यतेसाक्षाज्ज्ञा

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैःपृथक् ॥ ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

यतेएभिरितिपदानिस्वरूपलक्षणपराणि सत्यंज्ञानमनंतंब्रह्मेत्यादीनितैश्चबहुधागीतम् किंच हेतुमद्भिः सदेवसैम्येदमग्रआसीत्कथमसतःसज्जायेतेति तथाकोह्येवान्यात्कःप्राण्यात् यदेषआकाशआनंदोनस्यात् एषह्येवानंदयतीत्यादियुक्तिमद्भिः अन्यात्अपानचेष्टांकःकुर्यात् प्राण्यात्प्राणानांव्यापारंकोवाकुर्यादितिश्रुतिपदयोरर्थः विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया असंदिग्धार्थप्रतिपादकैरित्यर्थः तदेवमेतैर्विस्तरेणोक्तंदुःसंग्रहंसंक्षेपतस्तुभ्यंकथयिष्यामितच्छृण्वित्यर्थः।यद्वा अथातोब्रह्मजिज्ञासेत्यादीनिब्रह्मसूत्राणिगृह्यंतेतान्येवब्रह्मापद्यतेनिश्चीयतएभिरितिपदानि तैर्हेतुमद्भिः ईक्षतेर्नाशब्दं आनंदमयोऽभ्यासादित्यादिभिर्युक्तिमद्भिर्विनिश्चितार्थैः शेषंसमानम् ॥ ४ ॥

तत्रक्षेत्रस्वरूपमाह महाभूतानीतिद्वाभ्यां महाभूतानिभूम्यादीनिपंच अहंकारस्तत्कारणभूतःबुद्धिर्विज्ञानात्मकंमहत्तत्त्वं अव्यक्तंमूलप्रकृतिःइंद्रियाणिबाह्यानिदश श्रोत्रत्वग्घ्राणदृग्जिह्वावाग्दोर्मेंढ्रांघ्रिपायुरिति एकंचमनः इंद्रियगोचराश्चपंचतन्मात्ररूपाएवशब्दादयः आकाशादिविशेषगुणतयाव्यक्ताःसंतइंद्रियविषयाःपंच तदेवंचतुर्विंशतितत्त्वान्युक्तानि॥५॥इच्छेति इच्छादयःप्रसिद्धाःसंघातःशरीरं चेतना ज्ञानात्मिकामनोवृत्तिः धृतिर्धैर्यम् एतइच्छादयोदृश्यत्वान्नात्मधर्माअपितुमनोधर्माएव अतःक्षेत्रांतःपातिनएव उपलक्षणंचैतत्संकल्पादीनां तथाचश्रुतिः कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेति अनेनचयादृगितिप्रतिज्ञाताः क्षेत्रधर्मादर्शिताः एतत्क्षेत्रंसविकारं इंद्रियादिविकारसहितंसंक्षेपेणतुभ्यंमयोक्तमितिक्षेत्रोपसंहारः ॥ ६ ॥ इदानीमुक्तलक्षणात्क्षेत्राद्विविक्ततयाज्ञेयंशुद्धंक्षेत्रज्ञंविस्तरेणवर्णयिष्यन्तज्ज्ञानसाधनान्याह अमानित्वमितिपंचभिः अमानित्वंस्वगुणश्लाघाराहित्यम् अदंभित्वंदंभराहित्यं अहिंसापरपीडावर्जनम् क्षांतिःसहिष्णुत्वम् आर्जवमवक्रता आचार्योपासनंसद्गुरुसेवा शौचंबाह्यमाभ्यंतरंच । तत्रबाह्यंमृज्जलादिना आभ्यंतरंचरागादिमलक्षालनम् तथाचस्मृतिः शौचंतुद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरमिति स्थैर्यं

महाभूतान्यहंकारो बुद्धिरव्यक्तमेवच ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ ५ ॥
इच्छा द्वेषःसुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥
अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवम् ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥

सन्मार्गेप्रवृत्तस्यतदेकनिष्ठता आत्मविनिग्रहःशरीरसंयमः एतज्ज्ञानमितिप्रोक्तमितिपंचमेनान्वयः ॥७॥ किंच इंद्रियार्थेष्विति । जन्मादिषुदुःखदोषयोरनुदर्शनम् पुनःपुनरालोचनम् दुःखरूपस्यादोषस्यनुदर्शनमितिवा स्पष्टमन्यत् ॥८॥ किंच असक्तिरिति।असक्तिःपुत्रादिपदार्थेषुप्रीतित्यागः अनभिष्वंगः पुत्रादीनांसुखेदुःखेवाअहमेवसुखीदुःखीचेत्यध्यासातिरेकाभावः इष्टानिष्टयोरुपपत्तिषुप्राप्तिषुनित्यंसर्वदासमचित्तत्वम् ॥९॥ किंच मयिचेति।मयिपरमेश्वरेअनन्ययोगेनसर्वात्मदृष्ट्या अव्यभिचारिणीएकांतभक्तिःविविक्तःशुद्धचित्तप्रसादकरः

इंद्रियार्थेषु वैराग्यमनहंकार एवच ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥

तंदेशंसेवितुंशीलंयस्यतस्यभावस्तत्वम् प्राकृतानांजनानांसंसदिसभायाम् अरतिःरत्यभावः॥१०॥किंच अध्यात्मेति।आत्मानमधिकृत्य वर्त्तमानंज्ञानमध्यात्मज्ञानम् तस्मिन्नित्यत्वंनित्यभावःत्वंपदार्थशुद्धिनिष्ठत्वमित्यर्थः । तत्त्वज्ञानस्यार्थः प्रयोजनंमोक्षः तस्यदर्शनं मोक्षस्यसर्वोत्कृष्टतालोचनमित्यर्थः । एतदमानित्वमदंभित्वमित्यादिविंशतिसंख्यात्मकंयदुक्तमेतज्ज्ञानमितिप्रोक्तम् ज्ञानसाधनत्वात् अतोऽन्यथास्माद्विपरीतंमानित्वादियदेतदज्ञानमितिप्रोक्तंवसिष्ठादिभिः ज्ञानविरोधित्वात् अतःसर्वथात्याज्यमित्यर्थः ॥ ११ ॥ ॥ ॥

एभिःसाधनैर्यज्ज्ञेयंतदाह ज्ञेयमितिषड्भिः।यज्ज्ञेयंतत्प्रवक्ष्यामि।श्रोतुरादरसिद्धयेज्ञानफलंदर्शयति यद्वक्ष्यमाणंज्ञात्वाऽमृतंमोक्षंप्राप्नोति किंतत् अनादिमत् आदिमन्नभवतीत्यनादिमत् परंनिरतिशयंब्रह्म अनादीत्येतावतैवबहुव्रीहिणाअनादिमत्त्वेसिद्धेऽपिपुनर्मतुपःप्रयोगश्छांदसः। यद्वा अनादीतिमत्परमितिचपदद्वयं ममविष्णोः परंनिर्विशेषरूपंब्रह्मेत्यर्थः तदेवाह नसत्नचासदुच्यते विधिमुखेनप्रमाणस्यविषयःसच्छब्देनोच्यते निषेधस्यविषयस्त्वसच्छब्देनोच्यते इदंतुतदुभयविलक्षणमविषयत्वादित्यर्थः॥१२॥नन्वेवंब्रह्मणःसदसद्विलक्षणत्वेसति सर्वंखल्विदंब्रह्म ब्रह्मैवेदंसर्वमित्यादिश्रुतिभिर्विरुद्धचेतेत्याशंक्य परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्यादि

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥
सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥
सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितम् ॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

श्रुतिप्रसिद्धयाचिंत्यशक्त्यासर्वात्मतांतस्यदर्शयन्नाह सर्वतइतिपंचभिः । सर्वतःसर्वत्रपाणयःपादाश्चयस्यतत् सर्वतोऽक्षीणिशिरांसिमुखानिचयस्यतत् सर्वतःश्रुतिमच्छ्रवणेंद्रिययुक्तंसल्लोकेसर्वमावृत्यव्याप्यातिष्ठति सर्वप्राणिप्रवृत्तिभिःपाण्यादिभिरुपाधिभिःसर्वव्यवहारास्पदत्वेनतिष्ठतीत्यर्थः॥ १३ ॥ किंच सर्वेंद्रियेति।सर्वेषांचक्षुरादीनामिंद्रियाणांगुणेषुरूपाद्याकारासुवृत्तिषुतत्तदाकारेणभासतइति तथा सर्वाणींद्रियाणिगुणांश्चतत्तद्विषयानाभासयतीतिवा सर्वेंद्रियैर्विवर्जितंच तथाचश्रुतिः अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृ

णोत्यकर्णइत्यादि असक्तंसंगशून्यम् तथापिसर्वंबिभर्त्तीतिसर्वभृत् सर्वस्याधारभूतम् तदेवनिर्गुणंसत्त्वादिगुणरहितम् गुणभोक्तृगुणानांसत्त्वादीनांभोक्तृचपालकम्॥१४॥किंच बहिरिति।भूतानांचराचराणांस्वकार्याणांबहिश्चांतश्चतदेवसुवर्णमिवकटककुंडलादीनाम् जलतरंगाणामन्तर्बहिश्चजलमिव अचरंस्थावरंचरंजंगमंयद्भूतजातंतदेव कारणात्मकत्वात्कार्यस्य एवमपिसूक्ष्मत्वाद्रूपादिहीनत्वात्तदविज्ञेयमिदंतदितिस्पष्टज्ञानार्हंनभवति अतएवाविदुषांयोजनलक्षांतरितामिवदूरस्थंचसविकारायाःप्रकृतेःपरत्वात् विदुषांपुनःप्रत्यगात्मत्वादंतिकेच तन्नित्यंसन्निहितम् तथाचमंत्रः यदेजतितन्नैजतितद्दूरेतदंतिकेतदंतरस्यसर्वस्य तदुसर्वस्यास्यबाह्यतइति एजतिचलतिनैजतिनचलतितत्उ अंतिकेइतिच्छेदः॥१५॥ किंच अविभक्तमिति।भूतेषुस्थावरजंगमात्मकेषु अविभक्तंकारणात्मनाअभिन्नं कार्यात्मनाविभक्तंचभिन्नमिवावस्थितंच समुद्राज्जातंफेनादिसमुद्रादन्यन्नभवति तत्पूर्वोक्तंस्वरूपंचज्ञेयम् भूतानांभर्तृचपोषकंस्थितिकाले प्रलयकालेचग्रासिष्णु ग्रसनशीलम् सृष्टिकालेचप्रभविष्णु नानाकार्यात्मनाप्रभवनशीलम् ॥१६॥ किंच ज्योतिषामिति।ज्योतिषांचंद्रादित्यादीनामपितज्ज्योतिः प्रकाशकंततोयेनसूर्यस्तपतितेजसेद्धःनतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोऽयमग्निः तमेवभांतमनुभा

बहिरंतश्च भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥ १५ ॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ॥ भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७॥

तिसर्वंतस्यभासासर्वमिदंविभातीत्यादिश्रुतेः। अतएवतमसोऽज्ञानात्परं तेनासंस्पृष्टमुच्यते आदित्यवर्णंतमसःपरस्तादित्यादिश्रुतेः। ज्ञा
नंचतदेवबुद्धिवृत्तावभिव्यक्तम् तदेवरूपाद्याकारेणज्ञेयंच ज्ञानेनगम्यंच अमानित्वमदंभित्वमित्यादिलक्षणेनपूर्वोक्तेनज्ञानसाधनेनप्राप्यमि
त्यर्थः।ज्ञानगम्यंविशिनष्टि।सर्वस्यप्राणिमात्रस्यहृदिविष्ठितंविशेषेणाप्रच्युतस्वरूपेणनियंतृतयास्थितम् धिष्ठितमितिपाठेऽधिष्ठायस्थित
मित्यर्थः ॥१७॥ उक्तंक्षेत्रादिकमधिकारिफलसहितमुपसंहरति।इतीति।इत्येवंक्षेत्रंमहाभूतादिधृत्यंतंतथाज्ञानंच अमानित्वादितत्वज्ञानार्थ
दर्शनांतम् ज्ञेयंच अनादिमत्परंब्रह्मेत्यादिविष्ठितमित्यंतम् वसिष्ठादिभिर्विस्तरेणोक्तंसर्वमपिमयासंक्षेपेणोक्तम् एतच्चपूर्वाध्यायोक्तलक्ष

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥ मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥
प्रकृतिं पुरुषंचैव विध्यनादी उभावपि ॥ विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥१९॥

णोमद्भक्तोविज्ञायमद्भावायब्रह्मत्वायउपपद्यतेयोग्योभवति ॥१८॥तदेवंतत्क्षेत्रंयच्चयादृक्चेत्येतावत्प्रपंचितम् इदानींतुयद्विकारियतश्चयत्
सचयोयत्प्रभावश्चेत्येतत्पूर्वंप्रतिज्ञातमेवप्रकृतिपुरुषयोःसंसारहेतुत्वकथनेनप्रपंचयति प्रकृतिमितिपंचभिः। तत्रप्रकृतिपुरुषयोरादिमत्त्वे
तयोरपिप्रकृत्यंतरेणभाव्यमित्यनवस्थापत्तिःस्यात् अतस्तावुभावनादीविद्धि अनादेरीश्वरस्यशक्तित्वात्प्रकृतिरनादिः पुरुषोऽपितदंश
त्वादनादिरेव अत्रच परमेश्वरस्यतच्छक्तीनांचानादित्वंनित्यत्वंचश्रीमच्छंकरभगवद्भाष्यकृद्भिरतिप्रबंधेनोपपादितमितिग्रन्थबाहुल्या
न्नास्माभिःप्रतन्यते विकारांश्चदेहेंद्रियादीन् गुणांश्चगुणपरिणामान्सुखदुःखमोहादीन्प्रकृतेःसंभवान्संभूतान्विद्धि ॥ १९ ॥

विकाराणांप्रकृतिसंभवत्वंदर्शयन्पुरुषस्यसंसारहेतुत्वंदर्शयति।कार्यकारणेति।कार्यंशरीरम् कारणानिसुखदुःखसाधनानींद्रियाणि तेषांकर्तृत्वेतदाकारपरिणामे प्रकृतिर्हेतुरुच्यतेकापिलादिभिः पुरुषोजीवस्तत्कृतसुखदुःखानांभोक्तृत्वेहेतुरुच्यते । अयंभावः । यद्यप्यचेतनायाः प्रकृतेःस्वतःकर्तृत्वंनसंभवति तथापुरुषस्याप्यविकारिणोभोक्तृत्वंनसंभवति तथापिकर्तृत्वंनामक्रियानिर्वर्त्तकत्वम् तच्चाचेतनस्यापिचेतनादृष्टवशाच्चैतन्याधिष्ठितत्वात्संभवति यथावन्हेरूर्ध्वज्वलनम् वायोस्तिर्यग्गमनम् वत्सादृष्टवशात्स्तन्यपयसःक्षरणमित्यादिअतःपुरुषसान्निधानात्प्रकृतेःकर्तृत्वमुच्यते भोक्तृत्वंचसुखदुःखसंवेदनम् तच्चेतनधर्मएवेतिसन्निधानात्पुरुषस्यभोक्तृत्वमुच्यतइति ॥२०॥ तथाप्य

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥
पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् ॥ कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु ॥२१॥
उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः ॥ परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥२२॥

विकारिणोजन्मरहितस्यचभोक्तृत्वंकथमित्यतआह।पुरुषइति।हियस्मात्प्रकृतिस्थःतत्कार्यदेहेतादात्म्येनास्थितःपुरुषः अतस्तज्जनितान्सुखादीन्भुंक्ते अस्यचपुरुषस्यसतीषुदेवादियोनिषुअसतीषुतिर्यगादियोनिषुयानिजन्मानितेषुगुणसंगः गुणैःशुभाशुभकर्मकारिभिरिंद्रियैःसंगःकारणमित्यर्थः ॥२१॥तदनेनप्रकारेणप्रकृत्यविवेकात्पुरुषस्यसंसारःनतुस्वरूपतइत्याशयेनतस्यस्वरूपमाह।उपद्रष्टेति।अस्मिन्प्रकृतिकार्येदेहेचवर्तमानोऽपिपुरुषः परोभिन्नएव नतद्गुणैर्युज्यतइत्यर्थः तत्रहेतवः यस्मादुपद्रष्टा पृथग्भूतएवसमीपेस्थित्वाद्रष्टासाक्षीत्यर्थः।

तथानुमंता अनुमोदितेवसन्निधिमात्रेणानुग्राहकः साक्षीचेताकेवलोनिर्गुणश्चेत्यादिश्रुतेः । तथाऐश्वरेणरूपेणभर्त्ताविधारकइतिचोक्तः भोक्तापालकइतिच महांश्चासावीश्वरश्चेति सब्रह्मादीनामधिपतिरितिच परमात्माअंतर्यामीतिचोक्तःश्रुत्या । तथाचश्रुतिः एषभूताधिपतिरेषलोकेश्वरएषलोकपालइत्यादिः ॥२२॥ एवंप्रकृतिपुरुषविवेकज्ञानिनंस्तौति । यएवमिति । एवमुपद्रष्टृत्वादिरूपेणपुरुषंयोवेत्ति प्रकृतिंचगुणैःसुखदुःखादिपरिणामैः सहितांयोवेत्ति सपुरुषःसर्वथाविधिमतिलंघ्यवर्त्तमानोऽपिपुनर्नाभिजायते मुच्यतएवेत्यर्थः ॥२३ ॥ एवंभूतविविक्तात्मज्ञानेसाधनविकल्पानाह ध्यानेनेतिद्वाभ्याम् ध्यानेनआत्माकारप्रत्ययावृत्त्याआत्मनिदेहे आत्मनामनसाएवमात्मानं

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैःसह॥ सर्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥
ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥
अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते ॥ तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

केचित्पश्यंति अन्येतुसांख्येनप्रकृतिपुरुषवैलक्षण्यालोचनेन योगेनाष्टांगेन अपरेचकर्मयोगेन पश्यंतीतिसर्वत्रानुषंगः एतेषांचध्यानादीनांयथायोगंक्रमसमुच्चयेसत्यपितत्तन्निष्ठाभेदाभिप्रायेणविकल्पोक्तिः ॥ २४ ॥ अतिमंदाधिकारिणांनिस्तारोपायमाह।अन्यइति।अन्येतुसांख्ययोगादिमार्गैणैवंभूतमुपद्रष्टृत्वादिलक्षणमात्मानंसाक्षात्कर्त्तुमजानंतोऽन्येभ्यआचार्येभ्यउपदेशेनश्रुत्वाउपासते ध्यायंति तेच श्रद्धयाउपदेशश्रवणपरायणाःसंतोमृत्युंसंसारंशनैरतितरंत्येव ॥ २५ ॥

तत्रकर्मयोगस्यतृतीयचतुर्थपंचमेषुप्रपंचितत्वात् ध्यानयोगस्यचषष्ठाष्टमयोः प्रपंचितत्वात् ध्यानादेश्चसांख्यविविक्तात्मविषयत्वात् सांख्यमेवप्रपंचयन्नाह यावदित्यादियावदध्यायसमाप्ति । यावत्किंचित्वस्तुमात्रंसत्वमुत्पद्यते तत्सर्वंक्षेत्रक्षेत्रज्ञयोर्योगात् अविवेककृतात्तादात्म्याध्यासाद्भवतीतिजानीहि ॥ २६ ॥ अविवेककृतंसंसारोद्भवमुक्त्वातन्निवृत्तयेविविक्तात्मविषयंसम्यग्दर्शनमाह । सममिति । स्थावरजंगमात्मकेषुभूतेषुनिर्विशेषसद्रूपेणसमंयथाभवत्येवंतिष्ठंतंपरमात्मानंयःपश्यति अतएव तेषुविनश्यत्स्वपि अविनश्यंतंयःपश्यति

यावत्संजायतेकिंचित्सत्वंस्थावरजंगमम् ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ॥ २६ ॥ समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्व
रम् ॥ विनश्यत्स्वविनश्यंतं यःपश्यतिसपश्यति ॥२७॥ समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरम् ॥ नहिनस्त्यात्मना
त्मानंततोयातिपरांगतिम् ॥२८॥प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वशः॥यःपश्यतितथात्मानमकर्तारंसपश्यति २९

सएवसम्यक्पश्यतिनान्यः२७कुतइत्यतआह।सममिति। सर्वत्रभूतमात्रेसमंसम्यगप्रच्युतस्वरूपेणावस्थितम् परमात्मानं पश्यन् हियस्मात् आत्मनास्वेनैवात्मानंनहिनास्ति अविद्ययासच्चिदानंदरूपमात्मानंतिरस्कृत्यनविनाशयाति ततश्चपरांगतिंमोक्षमाप्नोति यस्त्वेवंनपश्यति सहिदेहात्मदर्शीदेहेनसहात्मानंहिनस्ति।तथाचश्रुतिः असुर्यानामतेलोकाअंधेनतमसावृताः । तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाइति ॥२८॥ननुशुभाशुभकर्मकर्तृत्वेनवैषम्यदृश्येमानेकथमात्मनःसमत्वमित्याशंक्याह।प्रकृत्यैवेति।प्रकृत्यैवदेहेंद्रियाकारेणपरिणतया

सर्वशः सर्वैः प्रकारैः क्रियमाणानि कर्माणि यः पश्यति तथात्मानं चाकर्तारम् देहाभिमानेनैवात्मनः कर्तृत्वं नस्वतः इत्येवं यः पश्यति सएवसम्यक्पश्यति नान्य इत्यर्थः॥२९॥ इदानीं तु भूतानां प्रकृतितावन्मात्रत्वेनाभेदाद्भूतभेदकृतमप्यात्मनो भेदमपश्यन्ब्रह्मत्वमुपैतीत्याह। यदेति। यदाभूतानां स्थावरजंगमानां पृथग्भावं भेदं पृथक्त्वम् एकस्थं एकस्यामेवेश्वरशक्तिरूपायां प्रकृतौ स्थितम् प्रलये अनुपश्याति आलोचयति ततएवच तस्याएव प्रकृतेः सकाशाद्भूतानां विस्तारं सृष्टिसमयेऽनुपश्यति तदा प्रकृतितावन्मात्रत्वेन भूतानामप्यभेदं पश्यन्परिपूर्णब्रह्म संपद्यते ब्रह्मैव भवतीत्यर्थः ॥ ३० ॥ तथापि परमेश्वरस्य संसारावस्थायां देहकर्मसंबंधनिमित्तैः कर्मभिस्तत्फलैश्च सुखदुःखादिभिर्वैषम्यं दुष्परिहरमि

यदा भूतपृथग्भावमेकस्थमनुपश्याति ॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ॥ ३१ ॥ यथा
सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥

ति कुतः समदर्शनं तत्राह। अनादित्वादिति। यदुत्पत्तिमत् तदेवहिव्येति विनाशमेति यच्चगुणवद्वस्तु तस्य गुणनाशेव्ययो भवति अयंतु परमात्मा अनादिर्निर्गुणश्चातोऽव्ययः अविकारीत्यर्थः। तस्माच्छरीरे स्थितोऽपि किंचिन्नकरोति नचकर्मफलैर्लिप्यत इति ॥ ३१ ॥ तत्रदृष्टांतमाह। यथेति। यथा सर्वत्र पंकादिष्वपि स्थितमाकाशं सौक्ष्म्यादसंगत्वात्पंकादिभिर्नोपलिप्यते तथा सर्वत्र उत्तमे मध्यमेऽधमेवा देहेऽवस्थितोप्यात्मा नोपलिप्यते दैहिकैर्गुणदोषैर्नयुज्यत इत्यर्थः ॥ ३२ ॥

असंगत्वाल्लेपोनास्तीत्याकाशदृष्टांतेनोक्तम् प्रकाशकत्वाच्चप्रकाश्यधर्मैर्नयुज्यतइतिरविदृष्टांतेनाह यथेति स्पष्टार्थः॥३३॥अध्यायार्थमुप
संहरति क्षेत्रक्षेत्रज्ञयोरिति एवमुक्तप्रकारेणक्षेत्रक्षेत्रज्ञयोरंतरंभेदंविवेकज्ञानलक्षणेनचक्षुषायेविदुः तथाचेयमुक्ताभूतानांप्रकृतिस्तस्याःस
काशान्मोक्षंमोक्षोपायंध्यानादिकंचयेविदुःतेपरंपदंयांति ॥३४॥विविक्तौयेनतत्त्वेनमिश्रौप्रकृतिपुरुषौ तंवंदेपरमानन्दनंदनंदनमीश्वरम् १
इतिसुबोधिन्यांटीकायांत्रयोदशोऽध्यायः ॥१३॥ पुंप्रकृत्योः स्वतंत्रत्वंवारयन्गुणसंगतः॥प्राहसंसारवैचित्र्यंविस्तरेणचतुर्दशे॥१॥यावत्सं

यथा प्रकाशयत्येकःकृत्स्नं लोकमिमं रविः॥क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३३॥ क्षेत्रक्षेत्रज्ञयोरेव
मंतरं ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ॥ ३४ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे प्रकृतिपुरुषयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ श्रीभगवानुवाच ॥
परं भूयःप्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ॥ यज्ज्ञात्वा मुनयःसर्वे परां सिद्धिमितो गताः ॥ १ ॥ ॥ ७९ ॥

जायतेकिंचित्सत्त्वंस्थावरजंगमम् क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभेत्युक्तम् सचक्षेत्रक्षेत्रज्ञयोःसंयोगोनिरीश्वरसांख्यानामिवनस्वातंत्र्ये
णाकिंत्वीश्वरेच्छयैवेतिकथनपूर्वकम् कारणंगुणसंगोऽस्यसदसद्योनिजन्मस्वित्यनेनोक्तंसत्त्वादिगुणकृतंसंसारवैचित्र्यंप्रपंचयिष्यन् एवंभूतं
वक्ष्यमाणमर्थंस्तौति श्रीभगवानुवाच परंभूयइतिद्वाभ्याम् परंपरमार्थनिष्ठंज्ञायतेऽनेनेतिज्ञानमुपदेशम् भूयोऽपितुभ्यंप्रकर्षेणवक्ष्यामि कथं
भूतम् ज्ञानानांतपःकर्मादिविषयाणांमध्येउत्तमम् मोक्षहेतुत्वात् तदेवाह यज्ज्ञात्वाप्राप्यमुनयोमननशीलाःसर्वेइतोदेहबंधनात्परांसि

द्धिगताःप्राप्ताः ॥ १ ॥ किंच इदमिति इदंवक्ष्यमाणंज्ञानमुपाश्रित्यइदंज्ञानसाधनमनुष्ठायममसाधर्म्यंमद्रूपत्वंप्राप्ताःसंतःसर्गेऽपिब्रह्मादिषूत्पद्यमानेष्वपिनोत्पद्यंते तथाप्रलयेऽपिनव्यथंति प्रलयेदुःखानिनानुभवंति पुनर्नावर्त्ततइत्यर्थः ॥२॥ तदेवंप्रशंसयाश्रोतारमभिमुखीकृत्य परमेश्वराधीनयोः प्रकृतिपुरुषयोःसर्वभूतोत्पत्तिप्रतिहेतुत्वम् नतुस्वतंत्रयोरितीमंविवक्षितमर्थंकथयति ममेति।देशतः।कालतश्चानवच्छिन्नत्वान्महत् बृंहणत्वात्स्वकार्याणांवृद्धिहेतुत्वाद्वा ब्रह्म प्रकृतिरित्यर्थः।तन्महत्ब्रह्ममम परमेश्वरस्ययोनिःगर्भाधानस्थानम् तस्मिन्नहंगर्भं

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेऽपिनोपजायन्ते प्रलये न व्यथन्ति च ॥ २ ॥
मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ॥ ॥ संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥
सर्वयोनिषु कौंतेय मूर्त्तयः संभवंति याः ॥ तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

जगद्विस्तारहेतुंचिदाभासंदधामि निक्षिपामि । प्रलयेमयिलीनंसंतमविद्याकामकर्मानुशयवंतंक्षेत्रज्ञंसृष्टिसमयेभोग्येनक्षेत्रेणसंयोजयामीत्यर्थः । ततोगर्भाधानात्सर्वभूतानांब्रह्मादीनांसंभवउत्पत्तिर्भवतीति ॥ ३ ॥ नकेवलंसृष्ट्युपक्रमएवमदधिष्ठिताभ्यांप्रकृतिपुरुषाभ्यामयंभूतोत्पत्तिप्रकारः।अपितुसर्वदैवेत्याह।सर्वयोनिष्विति सर्वासुयोनिषुमनुष्याद्यासुयामूर्त्तयः स्थावरजंगमात्मिकाउत्पद्यंते तासांमूर्तीनांमहद्ब्रह्मप्रकृतिःयोनिर्मातृस्थानीया अहंचबीजप्रदः गर्भाधानादिकर्त्तापिता ॥ ४ ॥

तदेवं परमेश्वराधीनाभ्यांप्रकृतिपुरुषाभ्यांसर्वभूतोत्पत्तिंनिरूप्य इदानींप्रकृतिसंयोगेन पुरुषस्य संसारं प्रपंचयति । सत्वमित्यादिचतुर्भिः।सत्त्वंरजस्तमइतित्रयोगुणाः प्रकृतिसंभवा प्रकृतितः संभवउद्भवोयेषांतेतथोक्ताः गुणसाम्यंप्रकृतिस्तस्याः सकाशात्पृथक्त्वेनाभिव्यक्ताःसंतःप्रकृतिकार्येदेहेतादात्म्येनास्थितंदेहिनंचिदंशंवस्तुतोऽव्ययंनिर्विकारमेवसंतंनिबध्नंति स्वकार्यैः सुखदुःखमोहादिभिः संयोजयंतीत्यर्थः ॥५॥ तत्रसत्वस्यलक्षणंबंधकत्वप्रकारंचाह।तत्रेति तत्रतेषांगुणानांमध्येसत्वंनिर्मलत्वात्स्वच्छत्वात्स्फटिकवत्प्रकाशकंभास्वरम्

सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ॥ निबध्नंति महाबाहो देहे देहिनमव्ययम् ॥ ५ ॥
तत्र सत्त्वं निर्मलत्त्वात्प्रकाशकमनामयम् ॥ सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥
रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवम् ॥ तन्निबध्नाति कौंतेय कर्मसंगेन देहिनम् ॥ ७ ॥

अनामयंचनिरुपद्रवंशांतमित्यर्थः।अतःशांतत्वात्स्वकार्येणसुखेन यःसंगस्तेनबध्नाति प्रकाशकत्वाच्चस्वकार्येणज्ञानेनयः संगस्तेनचबध्नाति।हे अनघ निष्पाप अहंसुखीज्ञानीचेतिमनोधर्मास्तदभिमानिनिक्षेत्रज्ञेसंयोजयतीत्यर्थः॥६॥रजसोलक्षणंबंधकत्वंचाह।रजोरागेति रजःसंज्ञकंगुणंरागात्मकमनुरंजनरूपंविद्धि अतएवतृष्णासंगसमुद्भवम् तृष्णाअप्राप्तेर्थेऽभिलाषः संगःप्राप्तेऽर्थेप्रीतिःविशेषेणासक्तिस्तयोस्तृष्णासंगयोः समुद्भवोयस्मात्तद्रजोदेहिनंदृष्टादृष्टार्थेषुकर्मसुसंगेनासक्त्यानितरांबध्नाति तृष्णासंगाभ्यांहिकर्मस्वासक्तिर्भवति ॥ ७ ॥

तमसोलक्षणंबंधकत्वंचाह तमइति तमस्तुअज्ञानाज्जातम् आवरणशक्तिप्रधानात्प्रकृत्यंशादुद्भूतंविद्धीत्यर्थः अतःसर्वेषांदेहिनांमोहनंभ्रांतिजनकम् अतएवप्रमादेनालस्येननिद्रयाचतत्तमोदेहिनंनिबध्नाति तत्रप्रमादोऽनवधानम् आलस्यमनुद्यमः निद्राचित्तस्यावसादो लयः॥८॥

सत्वादीनामेवंस्वस्वकार्यकरणेसामर्थ्यातिशयमाह सत्वमिति सत्वंसुखेसंजयतिसंश्लेषयति दुःखशोकादिकारणेसत्यपिसुखाभिमुखमेवदेहिनंकरोतीत्यर्थः एवंसुखादिकारणेसत्यपिरजःकर्मण्येवसंजयति तमस्तुमहत्संगेनोत्पद्यमानमपिज्ञानमावृत्याच्छाद्यप्रमादेसंजयति महद्भिरुपदिश्यमानस्यार्थस्यानवधानेयोजयति उतअपिआलस्यादावपिसंयोजयतीत्यर्थः ॥ ९ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्॥प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥८॥सत्त्वं सुखे संजयति रजः कर्माणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत॥९॥रजस्तमश्चाभिभूय सत्त्वं भवति भारत॥रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥१०॥सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते॥ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥११॥

तत्रहेतुमाह रजइति रजस्तमश्चेतिगुणद्वयमभिभूयतिरस्कृत्यसत्वंभवति अदृष्टवशादुद्भवति ततःस्वकार्येसुखेज्ञानादौसंयोजयतीत्यर्थः एवंरजोपिसत्वंतमश्चेतिगुणद्वयमभिभूयोद्भवतिततःस्वकार्येतृष्णादौसंयोजयति एवंतमोऽपिसत्वंरजश्चाभिभूयोद्भवति तमश्चस्वकार्येप्रमादालस्यादौसंयोजयतीत्यर्थः ॥ १० ॥

इदानींसत्वादीनांवृद्धानांलिंगान्याह त्रिभिः सर्वद्वारेष्विति अस्मिन्आत्मनोभोगायतनेदेहेसर्वेष्वपिद्वारेषुश्रोत्रादिषुयदाशब्दादिज्ञानात्मकःप्रकाशउपजायतेउत्पद्यतेतदाअनेनप्रकाशलिंगेनसत्वंविवृद्धंविद्याज्जानीयात् उतशब्दात्सुखादिलिंगेनापिजानीयादित्युक्तम् ॥११॥

किंचलोभइति लोभः धनाद्यागमेबहुधाजायमानेऽपिपुनःपुनर्वर्धमानोऽभिलाषःप्रवृत्तिःनित्यंकुर्वद्रूपता कर्मणामारंभोगृहादिनिर्माणोद्यमः। अशमइदंकृत्त्वाइदंकरिष्यामीत्यादिसंकल्पाविकल्पानुपरमः स्पृहाउच्चावचेषुदृष्टमात्रेषुवस्तुष्वितस्ततोजिघृक्षा रजसिप्रवृद्धेसतिएतानि लिंगानिजायंतेएतैर्लिंगैरजोगुणस्यवृद्धिंविद्यादित्यर्थः॥१२॥किंच अप्रकाशइति अप्रकाशोविवेकभ्रंशः अप्रवृत्तिरनुद्यमः प्रमादःकर्त्तव्यार्थानुसंधानराहित्यम् मोहोमिथ्याभिनिवेशः तमसिप्रवृद्धेएतानिलिंगानिचिह्नानिजायंतेएतैस्तमसोवृद्धिंजानीयादित्यर्थः ॥१३॥ मरणसमय

लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा ॥ रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥ १२॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन ॥ १३॥ यदासत्वे प्रवृद्धे तु प्रलयं याति देहभृत्॥तदोत्तमविदाँल्लोकानमलान्प्रतिपद्यते ॥ १४॥ रजसि प्रलयं गत्वा कर्मसंगिषु जायते ॥ तथा प्रलीनस्तमसि मूढयोनिषुजायते॥१५॥कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलम्॥रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥१६॥

एववृद्धानांसत्वादीनांफलविशेषमाह।यदेतिद्वाभ्याम् सत्वेप्रवृद्धेसतियदाजीवोमृत्युंप्राप्नोति तदाउत्तमान्हिरण्यगर्भादीन्विदंति उपासत इत्युत्तमविदस्तेषांयेअमलाःप्रकाशमयालोकाःसुखोपभोगस्थानविशेषास्तान्प्रतिपद्यतेप्राप्नोति ॥ १४ ॥ किंचरजसीति रजसिप्रवृद्धेसति मृत्युंप्राप्यकर्मासक्तेषुमनुष्येषुजायते तथातमसिप्रवृद्धेसतिप्रलीनोमृतोमूढयोनिषुपश्वादिषुजायते ॥ १५ ॥ इदानींसत्वादीनां स्वानुरूपकर्मद्वारेणविचित्रफलहेतुमाह । कर्मणइति सुकृतस्यसात्विककर्मणः सात्विकंसत्वप्रधानंनिर्मलंप्रकाशबहुलंसुखंफलमाहुः

कपिलादयः रजसइतिराजसस्यकर्मणइत्यर्थः।कर्मफलकथनस्यप्राकृतत्वात्तस्यदुःखंफलमाहुः तमसइति तामसस्यकर्मणइत्यर्थः। तस्याज्ञानंमूढत्वंफलमाहुःसात्विकादिकर्मलक्षणंचनियतंसंगरहितमित्यादिनाष्टादशेवक्ष्यति ॥ १६ ॥ तत्रैवहेतुमाह सत्वादिति सत्वाज्ज्ञानंसंजायते अतःसात्विकस्यकर्मणःप्रकाशवहुलंसुखंफलंभवति रजसोलोभोजायते तस्यचदुःखहेतुत्वात् तत्पूर्वकस्यकर्मणोदुःखंफलंभवति तमसस्तुप्रमादमोहाज्ञानानिभवंति ततस्तामसस्यकर्मणोऽज्ञानप्रापकंफलंभवतीतियुक्तमेवेत्यर्थः॥ १७॥इदानींसत्वादिवृत्तिशीलानांफलभेदमाह। ऊर्ध्वमिति सत्वस्थाःसत्ववृत्तिप्रधानाऊर्ध्वंगच्छंति सत्वोत्कर्षतारतम्यादुत्तरोत्तरशतगुणानंदान्मनुष्यगंधर्वपितृदेवादिलो

सत्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥ ऊर्ध्वं
गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः ॥ जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः ॥१८॥
नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ॥ गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

कान्सत्यलोकपर्यंतान्प्राप्नुवंतीत्यर्थः।राजसास्तुतृष्णाद्याकुलामध्येतिष्ठंति मनुष्यलोकेएवोत्पद्यंते जघन्योऽतिनिकृष्टस्तमोगुणस्तस्यवृत्तिःप्रमादमोहादिस्तत्रस्थिताः अधोगच्छंति तमोवृत्तितारतम्यात्तामिस्रादिषुनिरयेषूत्पद्यंते॥१८॥ तदेवंप्रकृतिगुणसंगकृतंसंसारंसप्रपंचमुक्त्वाइदानींतद्विवेकतोमोक्षंदर्शयति। नान्यमिति यदातुद्रष्टाविवेकीभूत्वाबुद्ध्याद्याकारपरिणतेभ्योगुणेभ्योऽन्यंकर्तारंनानुपश्यति अपितुगुणाएवकर्माणिकुर्वंतीतिपश्यति गुणेभ्यश्चपरंव्यतिरिक्तंतत्साक्षिणमात्मानंवेत्ति सतुमद्भावंब्रह्मत्वमधिगच्छति प्राप्नोति ॥ १९ ॥

ततश्चगुणकृतसर्वानर्थनिवृत्त्याकृतार्थोभवतीत्याह । गुणानिति देहाद्याकारःसमुद्भवःपरिणामोयेषांतेदेहसमुद्भवाः तानेतांस्त्रीनपिगुणानतीत्यातिक्रम्य तत्कृतैर्जन्मादिभिर्विमुक्तःसन्नमृतमश्नुते ब्रह्मानंदंप्राप्नोति ॥२०॥ गुणानेताननतीत्यामृतमश्नुतइत्येतच्छ्रुत्वागुणातीतस्य लक्षणमाचारंगुणात्ययोपायंचसम्यग्बुभुत्सुरर्जुनउवाच कैर्लिंगैरिति। हेप्रभो कैर्लिंगैः कीदृशैरात्मन्युत्पन्नैश्चिह्नैर्गुणातीतोदेहीभवतीतिलक्षणप्रश्नःकआचारोयस्येतिकिमाचारः कथंवर्त्ततइत्यर्थः।कथंचकेनोपायेनैतांस्त्रीनपिगुणानतीत्यवर्त्तते तत्कथयेति॥ २१ ॥ स्थितप्रज्ञस्य

गुणानेतानतीत्यत्रीन्देही देहसमुद्भवान्॥जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुनउवा
च ॥ कैर्लिंगैस्त्रीन् गुणानेतानतीतो भवति प्रभो ॥ किमाचारःकथं चैतांस्त्रीन् गुणानतिवर्त्तते ॥ २१ ॥ श्री
भगवानुवाच ॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव॥न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥

काभाषेत्यादिनाद्वितीयाध्यायेपृष्टमपिदत्तोत्तरमपिपुनर्विशेषबुभुत्सयापृच्छतीतिज्ञात्वाप्रकारांतरेणतस्यलक्षणादिकंश्रीभगवानुवाच प्रकाशंचेत्यादिषड्भिः तत्रएकेनलक्षणमाह प्रकाशंचेति प्रकाशंचसर्वद्वारेषुदेहेऽस्मिन्नितिपूर्वोक्तंसत्वकार्यम् प्रवृत्तिंचरजःकार्यम् मोहंचतमसः कार्यम् उपलक्षणमेतत् सत्वादीनांसर्वाण्यपिकार्याणियथायथंसंप्रवृत्तानिस्वतःप्राप्तानिसंतिदुःखबुद्ध्यायोनद्वेष्टि निवृत्तानिचसंतिसुखबुद्ध्यानकांक्षति गुणातीतः सउच्यतेइतिचतुर्थेनान्वयः ॥ २२ ॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणावर्त्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥ सम
दुःखसुखःस्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः ॥ २४ ॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ॥ सर्वारंभपरित्यागी गुणातीतः स उच्यते॥२५॥
मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ २६ ॥

तदेवंस्वसंवेद्यंतस्यलक्षणमुक्त्वापरसंवेद्यंतस्यलक्षणंवक्तुंकिमाचारइतिद्वितीयप्रश्नस्योत्तरमाह उदासीनवदितित्रिभिः उदासीनवत्साक्षितयाआसीनःस्थितःसन् गुणैर्गुणकार्यैःसुखदुःखादिभिर्योनविचाल्यते स्वरूपान्नप्रच्याव्यते अपितुगुणाएवस्वकार्येषुवर्तंते एतैर्ममसंबंधएवनास्तीतिविवेकज्ञानेनयस्तूष्णीमवतिष्ठति परस्मैपदमार्षम् नेंगते नचलति ॥ २३ ॥ अपिच समेति समेसुखदुःखेयस्य यतः स्वस्थः स्वरूपएवस्थितः अतएवसमानिलोष्टाश्मकांचनानियस्य तुल्येप्रियाऽप्रियेसुखदुःखहेतुभूतेयस्य धीरोधीमान् तुल्यानिंदाचआत्मस्तुतिश्चयस्य ॥ २४ ॥ अपिच मानापमानयोरिति मानेअपमानेचतुल्यः मित्रपक्षेअरिपक्षेचतुल्यः सर्वान्दृष्टादृष्टार्थानारंभानुद्यमान्परित्यक्तुंशीलं यस्य सएवंभूताचारयुक्तोगुणातीतउच्यते ॥ २५ ॥ कथंचैतांस्त्रीन्गुणानतिवर्ततइत्यस्यप्रश्नस्योत्तरमाह । मांचेति चशब्दोऽवधारणार्थः मामेवपरमेश्वरम् श्रीनारायणमव्यभिचारेणएकांतभक्तियोगेनयःसेवते स तान्गुणान्समतीत्यसम्यगतिक्रम्यब्रह्मभूयाय ब्रह्मभावायमोक्षायकल्पतेयोग्योभवति ॥ २६ ॥

तत्रहेतुमाह। ब्रह्मणोहीति। हियस्माद्ब्रह्मणोऽहंप्रतिष्ठाप्रतिमाघनीभूतंब्रह्मैवाहम् यथाघनीभूतःप्रकाशएवसूर्यमंडलंतद्वदेवेत्यर्थः। तथाऽव्ययस्यनित्यस्य अमृतस्यमोक्षस्यच नित्यमुक्तत्वात् तथातत्साधनस्यशाश्वतस्यचधर्मस्यशुद्धसत्वात्मकत्वात् तथाएकांतिकस्यअखंडितस्यसुखस्यचप्रतिष्ठाहम् परमानंदैकरूपत्वात् अतोमत्सेविनोमद्भावस्यावश्यंभावित्वाद्युक्तमेवोक्तंब्रह्मभूयायकल्पतइति॥२७॥कृष्णाधीनगुणासंगप्रसंजितभवांबुधिम्॥सुखंतरतितद्भक्तइत्यभाणिचतुर्दशे।१।इतिसुबोधिन्यांटीकायांचतुर्दशोऽध्यायः॥१४॥

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च ॥२७॥ इतिश्रीमद्भगव० गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥ १४॥ श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययम् ॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

वैराग्येणविनाज्ञानंनचभक्तिरतःस्फुटम्॥वैराग्योपस्कृतंज्ञानमीशःपंचदशेऽदिशत्॥१॥पूर्वाध्यायांते मांचयोऽव्यभिचारेणभक्तियोगेनसेवतइत्यादिनापरमेश्वरमेकांतभक्त्याभजतस्तत्प्रसादलब्धज्ञानेनब्रह्मभावोभवतीत्युक्तम् नचैकांतभक्तिर्ज्ञानंवाविरक्तस्यसंभवतीतिवैराग्यपूर्वकंज्ञानमुपदेष्टुकामः प्रथमंतावत्सार्द्धश्लोकाभ्यांसंसारस्वरूपंवृक्षरूपकालंकारेणवर्णयन् श्रीभगवानुवाच। ऊर्ध्वमूलमिति। ऊर्ध्वमुत्तमः क्षराक्षराभ्यामुत्कृष्टःपुरुषोत्तमोमूलंयस्यतम् अधइतिततोऽर्वाचीनाःकार्योपाधयोहिरण्यगर्भादयोगृह्यंते तेतुशाखाइवशाखायस्यतम् विनश्वरत्वेनश्वःप्रभातपर्यंतमपिनस्थास्यतीतिविश्वासानर्हत्वादश्वत्थंप्राहुः प्रवाहरूपेणाविच्छेदादव्ययंचप्राहुः ऊर्ध्वमूलोऽवाक्छाखएषोऽश्वत्थःसनातनइ

त्याद्याःश्रुतयः छंदांसिवेदाःयस्यपर्णानि धर्माधर्मप्रतिपादनद्वारेणछायास्थानीयैःकर्मफलैः संसारवृक्षस्यसर्वजीवाश्रयणीयत्वापादनात् पर्णस्थानीयावेदाः यस्तमेवंभूतमश्वत्थंवेद सएववेदार्थवित् संसारप्रपंचवृक्षस्यमूलमीश्वरः श्रीनारायणः ब्रह्मादयस्तदंशाः शाखास्थानीयाः सचसंसारवृक्षोविनश्वरःप्रवाहरूपेणनित्यश्च वेदोक्तैः कर्मभिः सेव्यतामापादितश्चेत्येतावानेवहिवेदार्थःअतएवविद्वान्वेदाविदितिस्तूयते। १॥ किंच अधश्चेति। हिरण्यगर्भादयःकार्योपाधयोजीवाःशाखास्थानीयत्वेनोक्तास्तेषुचयेदुष्कृतिनस्तेऽधःपश्वादियोनिषुप्रसृताःविस्तारंगताः सुकृतिनश्चोर्ध्वंदेवादियोनिषुप्रसृतास्तस्यसंसारवृक्षस्यशाखाः किंच गुणैःसत्वादिवृत्तिभिःजलसेचनैरिवयथायथंप्रवृद्धाःवृद्धिंप्राप्ताः किंच

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः॥ अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके॥
॥२॥न रूपमस्येह तथोपलभ्यते नांतो नचादिर्न च संप्रतिष्ठा॥अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ३

विषयाःरूपादयः प्रवालाः पल्लवस्थानीयाःयासांताः प्रशाखास्थानीयाभिःइंद्रियवृत्तिभिःसंयुक्तत्वात् किंचअधश्च चशब्दादूर्ध्वंचमूलानि अनुसंततानिविरूढानि मुख्यंमूलम् ईश्वरएकएव इमानित्ववांतरमूलानि तत्तद्भोगवासनालक्षणानि तेषांकार्यमाह मनुष्यलोकेकर्मानुबंधीनिकर्मएवानुबंधिअनंतरभावियेषांतानि ऊर्ध्वाधोलोकेषुयदुपभुक्तंतत्तद्भोगवासनादिभिर्हिकर्मक्षयेणमनुष्यलोकंप्राप्तानांतत्तदनुरूपेषुकर्मसुप्रवृत्तिर्भवति एतस्मिन्नेवहिकर्माधिकारोनान्येषु लोकेषु अतोमनुष्यलोकेइत्युक्तम् ॥ २ ॥ किंच नरूपमस्येति इहसंसारे स्थितैः प्राणिभिःअस्यसंसारवृक्षस्यतथोर्ध्वमूलत्वादिप्रकारेणरूपंनोपलभ्यते नचांतःअवसानम् अपर्यंततत्वात् नचादिरनादित्वात् नचसंप्राति

ष्ठास्थितिः कथंतिष्ठतीतिनचोपलभ्यते यस्मादेवंभूतोयंसंसारवृक्षोदुरुच्छेद्यः अनर्थकरश्च तस्मादेनंदृढेनवैराग्येणशस्त्रेणछित्त्वातत्त्व
ज्ञानेयतेतेत्याह अश्वत्थमेनामितिसार्द्धेन।एनमश्वत्थंसुविरूढमूलमत्यंतंबद्धमूलंसंतम् असंगःसंगराहित्यमहंममतात्यागस्तेनदृढेनशस्त्रेण
सम्यग्विचारेणछित्त्वापृथक्कृत्य ॥ ३ ॥ ततइति।ततस्तस्यमूलभूतंतत्पदंवस्तुवैष्णवंपदंपरिमार्गितव्यमन्वेष्टव्यम्।कीदृशम्।यस्मिन्
गता यत्पदंप्राप्ताःसंतोभूयोनानिवर्त्तंति नआवर्त्ततइत्यर्थः।अन्वेषणप्रकारमाह।यतएषापुराणीचिरंतनीसंसारप्रवृत्तिःप्रसृताविस्तृता तमेव
चाद्यंपुरुषंप्रपद्येशरणंव्रजामीत्येवमेकांतभक्त्यान्वेष्टव्यमित्यर्थः ॥ ४ ॥ तत्प्राप्तौसाधनांतराणिदर्शयन्नाह।निर्मानेति।निर्गतौमानमोहौअहं

ततःपदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्त्तंति भूयः ॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी
॥४॥निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः॥द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छंत्यमूढाःप-
दमव्ययं तत् ॥ ५ ॥ न तद्भासयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्त्तंते तद्धाम परमं मम ॥ ६ ॥

कारमिथ्याभिनिवेशौयेभ्यस्ते जितःपुत्रादिसंगरूपोदोषोयैस्ते अध्यात्मेआत्मज्ञानेनित्याःपरिनिष्ठिताः विशेषेणनिवृत्तःकामोयेभ्यस्ते
सुखदुःखहेतुत्वात् सुखदुःखसंज्ञानिशीतोष्णादीनिद्वंद्वानितैर्विमुक्ताः अतएवामूढाः निवृत्ताविद्याःसंतस्तदव्ययंपदंवैष्णवंगच्छंति ॥ ५ ॥
तदेवंगतव्यंपदंविशिनष्टि।नतदिति।यत्पदंसूर्यादयोनप्रकाशयंति यत्प्राप्यनानिवर्त्तंतेयोगिनः तद्धामस्वरूपंपरमंमम अनेनसूर्यादिप्रकाश
विषयत्वेनजडत्वशीतोष्णादिदोषप्रसंगोनिरस्तः ॥ ६ ॥

ननुचत्वदीयंधामप्राप्ताः संतोयदिननिवर्तंते तर्हिसतिसंपद्यनविदुःसतिसंपद्यामहइत्यादिश्रुतेः सुषुप्तिप्रलयसमयेत्वत्प्राप्तिःसर्वेषामस्तीतिकोनामसंसारीस्यादित्याशंक्यसंसारिणंदर्शयति ममेतिपंचभिः । ममैवांशोयोऽयमविद्ययाजीवभूतःसनातनःसर्वदासंसारित्वेन प्रसिद्धः असौसुषुप्तिप्रलययोः प्रकृतौलीनतयास्थितानिमनःषष्ठंयेषांतानींद्रियाणिपुनर्जीवलोकेसंसारेभोगार्थमाकर्षति एतच्चकर्मेंद्रियाणांप्राणस्यचोपलक्षणार्थम् । अयंभावः । सत्यं सुषुप्तिप्रलययोरपिमदंशत्वात्सर्वस्यापिजीवमात्रस्यमयिलयादस्त्येवमत्प्राप्तिः तथाप्यविद्ययावृतस्यसानुशयस्यसप्रकृतिकेमयिलयोनतुशुद्धे । तदुक्तम् अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंतीत्यादिना अतश्चपुनःसंसारायनिर्गच्छन्न

ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥
शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥ ८ ॥
श्रोत्रं चक्षुःस्पर्शनं च रसनं घ्राणमेव च ॥ अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

विद्वान्प्रकृतौलीनतयास्थितानिस्वोपाधिभूतानींद्रियाण्याकर्षति विदुषांतुशुद्धस्वरूपप्राप्तेर्नावृत्तिरिति॥७॥तान्याकृष्यकिंकरोतीत्यत्राह। शरीरमिति । यदाशरीरांतरंकर्मवशादवाप्नोति यतश्चशरीरादुत्क्रामति ईश्वरोदेहादीनांस्वामी तदापूर्वस्माच्छरीरादेतानिगृहीत्वातच्छरीरांतरंसम्यग्याति । शरीरेसत्यपींद्रियग्रहणेदृष्टांतः आशयात्स्वस्थानात् कुसुमादेःसकाशात्गंधान्गंधवतःसूक्ष्मानंशान्गृहीत्वायथावायुर्गच्छतितद्वत्॥८॥तान्येवेंद्रियाणिदर्शयन्यदर्थंगृहीत्वागच्छतितदाह।श्रोत्रमिति।श्रोत्रादीनिबाह्येंद्रियाणिमनश्चान्तःकरणमधिष्ठायाश्रित्य

शब्दादीन्विषयानयंजीवउपभुंक्ते ॥९॥ननुचकार्यकारणसंघातव्यतिरेकेणैवंभूतमात्मानंसर्वेपिकिंनपश्यंतितत्राह । उत्क्रामंतमिति।उत्क्रामं
तंदेहाद्देहांतरंगच्छन्तम् तस्मिन्नेवदेहेस्थितंवाविषयान्भुंजानंवागुणान्वितमिंद्रियादियुक्तंजीवंविमूढानानुपश्यंति नालोकयंति ज्ञानमे
वचक्षुर्येषांतेविवेकिनःपश्यंति ॥१०॥ दुर्ज्ञेयश्चायंयतोविवेकिष्वपिकेचिदेवपश्यंतिकेचिन्नपश्यंतीत्याह।यतंतइति।यतंतःध्यानादिभिःप्रय
तमानायोगिनःकेचिदेनमात्मानम् आत्मनिदेहेऽवस्थितंविविक्तंपश्यंति शास्त्राभ्यासादिभिःप्रयत्नंकुर्वाणाअपिअकृतात्मानः अविशुद्ध

उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितम् ॥ विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः॥१०॥
यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितम्॥यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥११॥
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥
गामाविश्य च भूतानि धारयाम्यहमोजसा ॥ पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥

चित्ताः अतएवाचेतसोमंदमतयः एनंनपश्यंति॥११॥तदेवंनतद्भासयतेसूर्यइत्यादिनापरमेश्वरंपरंधामोक्तम् तत्प्राप्तानांचापुनरावृत्तिरु
क्तातत्रचसंसारिणोऽभावमाशंक्यसंसारिस्वरूपंदेहादिव्यतिरिक्तंदर्शितम् । इदानींतदेवपारमेश्वरंरूपमनंतशक्तित्वेननिरूपयति यदेत्यादि
चतुर्भिः । आदित्यादिषुस्थितंयदनेकप्रकारं तेजोविश्वंप्रकाशयति तत्सर्वंतेजोमदीयमेवजानीहि ॥१२॥ किंच गामाविश्येति । गांपृथ्वी
मोजसाबलेनाधिष्ठायअहमेवचराचराणिभूतानिधारयामि अहमेवरसमयःसोमोभूत्वाव्रीह्याद्यौषधीःसर्वाःसंवर्धयामि ॥ १३ ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ॥ प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥ सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च॥ क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥

किंच अहमिति।वैश्वानरोजाठरोभूत्वाप्राणिनांदेहस्यांतःप्रविश्यप्राणापानाभ्यांतदुद्दीपकाभ्यांसहितःप्राणिभिर्भुक्तंभक्ष्यंभोज्यंलेह्यंचोष्यंचेतिचतुर्विधमन्नंपचामि तत्रयद्दंतैरवखंड्यावखंड्यभक्ष्यतेऽपूपादितद्भक्ष्यम् यत्तुकेवलंजिह्वयाविलोड्यानिगीर्यतेपायसादितद्भोज्यम् यत्तुजिह्वायांनिक्षिप्यरसास्वादेनक्रमशोनिगीर्यतेद्रवीभूतंगुडादितल्लेह्यम् चतुर्दंष्ट्रादिभिःनिष्पीड्यरसांशंनिगीर्यावशिष्टंत्यज्यतइक्षुदंडादितच्चोष्यमितिचतुर्विधभेदः॥ १४ ॥ किंच सर्वस्येति । सर्वस्यप्राणिजातस्यहृदिसम्यगंतर्यामिरूपेणप्रविष्टोऽहम् अतश्चमत्तएवहेतोः प्राणिमात्रस्यपूर्वानुभूतार्थविषयास्मृतिर्भवति ज्ञानंचविषयेंद्रियसंयोगजंभवति अपोहनचतयोःप्रमोषोभवति वेदैश्चसर्वैस्तत्तद्देवतादिरूपेणाहमेववेद्यःवेदांतकृत् तत्संप्रदायप्रवर्त्तकज्ञानदोगुरुरहमित्यर्थः।वेदविदेवचवेदार्थविदहमेव ॥ १५ ॥ इदानींतद्धामपरमंममेतियदुक्तंतत्स्वकीयंसर्वोत्तमत्वंदर्शयति द्वाविमाविति त्रिभिः । क्षरश्चाक्षरश्चेतिद्वाविमौपुरुषौलोकेप्रसिद्धौ तावेवाह तत्रक्षरःपुरुषोनामसर्वाणिभूतानिब्रह्मादिस्थावरांतानिशरीराणि अविवेकिलोकस्यशरीरेष्वेवपुरुषत्वप्रसिद्धेः कूटः शिलाराशिः पर्वतइवदेहेषुनश्यत्स्वपिनिर्विकारतयातिष्ठतीतिकूटस्थः चेतनोभोक्ता सतुअक्षरःपुरुषइत्युच्यतेविवेकिभिः ॥ १६ ॥

यदर्थमेतौलक्षितौतमाह।उत्तमइति।एताभ्यांक्षराक्षराभ्यामन्योविलक्षणस्तूत्तमः पुरुषः।वैलक्षण्यमेवाह।परमश्चासावात्मेतिचोदाहृतउक्तः श्रुतिभिः आत्मत्वेनक्षरादचेतनाद्विलक्षणःपरमत्वेनक्षराच्चेतनाद्भोक्तुःविलक्षणइत्यर्थः। परमात्मत्वमेवदर्शयति। योलोकत्रयमिति। यईश्वरईशनशीलः अव्ययश्चनिर्विकारएवसन्लोकत्रयंकृत्स्नमाविश्यबिभर्त्ति पालयति ॥ १७ ॥ एवंभूतंपुरुषोत्तमत्वमात्मनोनामनिर्वचनेनदर्शयति यस्मादिति।यस्मात्क्षरंजडवर्गमतिक्रांतोऽहम् नित्यमुक्तत्वात् अक्षराच्चेतनवर्गादप्युत्तमश्चनियंतृत्वात् अतोलोकेवेदेचपुरुषोत्तमइति

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः॥योलोकत्रयमाविश्यबिभर्त्त्यव्ययईश्वरः ॥ १७॥यस्मात्क्षरमतीतोऽहमक्षराद
पिचोत्तमः ॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥ १८ ॥ योमामेवमसंमूढोजानातिपुरुषोत्तमम्॥ससर्वविद्भजति
मांसर्वभावेन भारत ॥ १९ ॥ इतिगुह्यतमं शास्त्रमिदमुक्तं मयानघ॥एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥

प्रथितः प्रख्यातोऽस्मि । तथाचश्रुतिः सवाअयमात्मासर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिः सर्वमिदंप्रशास्तीत्यादिः॥१८॥एवंभूतेश्वरस्यज्ञातुःफलमाह । योमामिति । एवमुक्तप्रकारेणासंमूढोनिश्चितमतिःसन्योमांपुरुषोत्तमंजानाति ससर्वभावेनसर्वप्रकारेणमामेवभजति ततःसर्ववित्सर्वज्ञोभवति॥१९॥अध्यायार्थमुपसंहरति। इतीति।इत्यनेनप्रकारेणगुह्यतमम् अतिरहस्यंसंपूर्णशास्त्रमेवमयोक्तम् नपुनर्विंशतिश्लोकमध्यायमात्रम् हेअनघ व्यसनशून्य अतएतन्मदुक्तंशास्त्रं बुद्ध्वा बुद्धिमान्सम्यग्ज्ञानी कृतकृत्यश्चस्याद्योपिकोऽपि हेभारत

त्वंकृतकृत्योऽसीतिकिंवक्तव्यमितिभावः।२०।संसारशाखिनंछित्त्वास्पष्टंपंचदशेप्रभुः।पुरुषोत्तमयोगाख्येपरंपदमुपादिशत्।१।इतिसुबोधिन्यांटीकायांपंचदशोऽध्यायः॥१५॥आसुरींसंपदंत्यक्त्वादैवीमेवाश्रितानराः।मुच्यंतइतिनिर्णेतुंतद्विवेकोऽथषोडशे।१।पूर्वाध्यायांते एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेत्युक्तम् तत्रकएतत्तत्त्वंबुध्यतेकोवानबुध्यतइत्यपेक्षायांतत्वज्ञानेऽधिकारिणोऽनधिकारिणश्चविवेकार्थं षोडशाध्यायारंभः निरूपितेहिकार्यार्थेऽधिकारिजिज्ञासाभवति तदुक्तंभट्टैः भारोयोयेनवोढव्यःसप्रागांदोलितोयदा।तदाकस्तस्यवोढेतिशक्यंकर्त्तुंनिरूपणमिति तत्राधिकारिविशेषणभूतांदैवींसंपदमाह श्रीभगवानुवाच अभयमितित्रिभिः। अभयंभयाभावःसत्वस्यचित्तस्यसंशुद्धिः सुप्रसन्नता ज्ञानयोगेआत्मज्ञानोपायेव्यवस्थितिःपरिनिष्ठा दानंस्वभोज्यस्यान्नादेर्यथोचितंसंविभागः दमोबाह्येंद्रियसंयमः यज्ञोयथाधिकारंदर्शपूर्णमासादिः स्वाध्यायोब्रह्मयज्ञादिर्जपयज्ञः तपउत्तराध्यायेवक्ष्यमाणंशारीरादि आर्जवमवक्रता ॥१॥ किंच अहिंसेति।अहिंसापरपीडावर्जनम् सत्यंयथार्थभाषणम् अक्रोधस्ताडितस्यापिचित्तेक्षोभानुत्पत्तिः त्यागऔदार्यम् शांतिश्चित्तोपरतिःपैशुनंपरोक्षेपरदोषप्रकाशनम् तद्वर्जनमपैशुनम् भूतेषुदीनेषुदया अलोलुप्त्वम् लोभाभावः।अवर्णलोपआर्षः। मार्दवंमृदुत्वमक्रूरता ह्रीःअकार्यप्रवृ

इति श्रीमद्भगव० पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ श्रीभगवानुवाच ॥ अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥ दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनम्॥दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥ २ ॥

तेजःक्षमा धृतिःशौचमद्रोहो नातिमानिता ॥ भवंति संपदं दैवी मभिजातस्य भारत॥ ३ ॥दंभो दर्पोऽभिमानश्च क्रोधः
पारुष्यमेव च॥अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥४॥दैवीसंपद्विमोक्षाय निबंधायासुरीमता॥मा शुचः संपदंदै
वीमभिजातोऽसि पांडव ॥५॥द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च॥दैवो विस्तरशःप्रोक्त आसुरं पार्थ मे शृणु ॥६॥

त्तौलोकलज्जा अचापलंव्यर्थक्रियाराहित्यम् ॥२ ॥ किंच तेजइति।तेजः प्रागल्भ्यम् क्षमापरिभवादिषूत्पद्यमानेषुक्रोधप्रतिबंधः धृतिर्दुःखादिभिरवसीदतश्चित्तस्यस्थिरीकरणम् शौचंबाह्याभ्यंतरशुद्धिःअद्रोहोजिघांसाराहित्यम् अतिमानिताआत्मन्यातिपूज्यत्वाभिमानस्तदभावोनातिमानिता एतान्यभयादीनिषड्विंशतिप्रकाराणिदैवींसंपदमभिजातस्यभवंति देवयोग्यांसात्विकींसंपदमभिलक्ष्यतदाभिमुख्येनजातस्यभाविकल्याणस्यपुंसोभवंतीत्यर्थः॥३॥आसुरींसंपदमाह । दंभइति । दंभोधर्मध्वजित्वम् दर्पोधनविद्यादिनिमित्तश्चित्तस्योत्सेकःअभिमानोव्याख्यातः क्रोधःप्रसिद्धः पारुष्यंनिष्ठुरत्वम् अज्ञानमविवेकः । आसुरीमित्युपलक्षणम् । असुराणांराक्षसानांचयासंपत् तामासुरीमभिलक्ष्यजातस्यैतानिदंभादीनिभवंतीत्यर्थः ॥ ४ ॥ एतयोःसंपदोःकार्यंदर्शयन्नाह । दैवीसंपदिति । दैवीयासंपत्तयायुक्तोमयोक्तेतत्त्वज्ञानेऽधिकारी । आसुर्यासंपदायुक्तस्तुनित्यंसंसारीत्यर्थः । एतच्छुत्वा किमहमत्राधिकारीनवेति संदेहव्याकुलचित्तमर्जुनमाश्वासयति । हे पांडव माशुचः शोकंमाकार्षीः यतस्त्वंदैवींसंपदमभिजातोऽसि ॥५॥ आसुरींसंपत् सर्वात्मनावर्जयितव्येत्येतदर्थमासुरींसंपदंप्रपंचयितुमाह । द्वाविति । द्वौद्विःप्रकारौभूतानांसर्गौमेमद्वचनाच्छृणु आसुरराक्षसप्रकृत्योरेकीकरणेनद्वावित्युक्तम् । अतोराक्षसीमासुरींचैवप्रकृतिंमो

हिनींश्रिताइत्यादिनानवमाध्यायोक्तप्रकृतित्रैविध्येनाविरोधःस्पष्टमन्यत्॥६॥आसुरींविस्तरतोनिरूपयतिप्रवृत्तिंचेत्यादिद्वादशभिः।धर्मेप्रवृत्तिं अधर्मान्निवृत्तिंच आसुरस्वभावाजनानजानंति अतःशौचमाचारःसत्यंचतेषुनास्त्येव॥७॥ननुवेदोक्तयोर्धर्माधर्मयोःप्रवृत्तिंनिवृत्तिं चकथंनविदुःकुतोवाधर्माधर्मयोरनंगीकारेजगतःसुखदुःखादिव्यवस्थास्यात् कथंवाशौचाचारादिविषयामीश्वराज्ञामतिवर्त्तेरन् ईश्वरानंगीकारे चकुतोजगदुत्पत्तिःस्यादतआह। असत्यमिति।नास्तिसत्यंवेदपुराणादिप्रमाणंयस्मिन् तादृशंजगदाहुः वेदादीनांप्रामाण्यंनमन्यंतइत्यर्थः। तदुक्तम् त्रयोवेदस्यकर्तारोभण्डधूर्तनिशाचराइत्यादि अतएवनास्तिधर्माधर्मरूपाप्रतिष्ठाव्यवस्थाहेतुर्यस्यतत् स्वाभाविकंजगद्वैचित्र्य

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥ न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥ अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ ८॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ ९ ॥

माहुरित्यर्थः।अतएवनास्तीश्वरः कर्त्ताव्यवस्थापकश्चयस्यतादृशंजगदाहुः।तर्हिकुतोऽस्यजगतउत्पत्तिंवदंतीत्यत आह।अपरस्परसंभूतमिति । अपरश्चपरश्चेत्यपरस्परम् अपरस्परतः अन्योऽन्यतःस्त्रीपुरुषमिथुनात् संभूतंजगत् किमन्यत्कारणमस्य नास्त्यन्यत्किंचित्किंतुकामहैतुकम् स्त्रीपुरुषयोःकामएवप्रवाहरूपेणहेतुरस्येत्याहुरित्यर्थः॥८॥किंच एतामिति । एतांलोकायतिकानांदृष्टिंदर्शनमाश्रित्यनष्टात्मानो मलिनचित्ताः संतोऽल्पबुद्धयः दृष्टार्थमात्रमतयः अतएवउग्रंहिंस्रंकर्मयेषांतेऽहितावैरिणोभूत्वाजगतःक्षयायप्रभवंतिउद्भवंतीत्यर्थः ॥ ९ ॥

अपिच काममिति।दुष्पूरयितुमशक्यंकाममाश्रित्यदंभादिभियुक्ताः संतःक्षुद्रदेवताराधनादौप्रवर्त्तंते कथम् असद्ग्राहान्गृहीत्वानेनमंत्रेणैतां देवतामाराध्यमहाविधीन्साधयिष्यामइत्यादिदुराग्रहान्मोहमात्रेणस्वीकृत्यप्रवर्त्तंते अशुचिव्रताअशुचीनिमद्यमांसादिविषयाणिव्रतानियेषांते ॥१०॥ किंच चिंतामिति । प्रलयोमरणमेवांतोयस्यास्ताम् अपरिमेयांपरिमातुमशक्यांचिंतामाश्रिताः नित्यांचिंतापरायणाइत्यर्थः । कामोपभोगएवपरमोयेषांते एतावदितिकामोपभोगएवपरमःपुरुषार्थोनान्यदस्तीतिकृतनिश्चयाःअर्थसंचयानीहंतइत्युत्तरेणान्वयः ।तथाच

काममाश्रित्यदुष्पूरंदंभमानमदान्विताः ॥ मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेशुचिव्रताः ॥ १० ॥ चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः ॥ कामोपभोगपरमाएतावदितिनिश्चिताः ॥ ११ ॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ॥ ईहंतेकामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥ इदमद्यमयालब्धमिमंप्राप्स्ये मनोरथम् ॥ इदमस्तीदमपिमेभविष्यतिपुनर्धनम् ॥ १३ ॥

बार्हस्पत्यंसूत्रम् कामएवैकःपुरुषार्थइतिचैतन्याविशिष्टः कामः पुरुष इतिच ॥ ११ ॥ अतएव आशेति । आशाएवपाशास्तेषांशतानितैर्बद्धा इतस्ततआकृष्यमाणाः कामक्रोधौपरमयनमाश्रयोयेषांते कामभोगार्थमन्यायेनचौर्यादिनार्थानांसंचयान्राशीनीहंतेइच्छंति ॥१२॥ तेषांमनोराज्यंकथयन्नरकप्राप्तिमाह इदमद्येतिचतुर्भिः।प्राप्स्येप्राप्स्यामि मनोरथंमनसः प्रियम्।शेषंस्पष्टम्।एषांत्रयाणांश्लोकानामित्यज्ञानविमोहिताः संतोनरकेपतंतीतिचतुर्थेनान्वयः ॥ १३ ॥

किंच असाविति।सिद्धः कृतकृत्यः स्पष्टमन्यत्॥१४॥किंच आढ्यइति।आढ्योधनादिसंपन्नः अभिजनवान्कुलीनःयक्ष्येयागाद्यनुष्ठानेनापि दीक्षितांतरेभ्यःसकाशान्महतींप्रतिष्ठांप्राप्स्यामि दास्यामिस्तावकेभ्यश्च मोदिष्येहर्षंप्राप्स्यामीत्येवमज्ञानेनविमोहिताःमिथ्याभिनिवेशं प्रापिताः॥१५॥एवंभूतायत्प्राप्नुवंतितच्छृणु।अनेकेति।अनेकेषुमनोरथेषुप्रवृत्तंचित्तमनेकाचित्तंतेन विभ्रांताः विक्षिप्ताः तेनैवमोहमयेनजालेनसमावृताः मत्स्याइवसूत्रमयेनजालेनयंत्रिताः एवंकामभोगेषुप्रसक्ताः अभिनिविष्टाःसंतोऽशुचौकश्मलेनरकेपतंति ॥१६॥ यक्ष्यइति

असौ मया हतः शत्रुर्हनिष्ये चापरानपि॥ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १४ ॥आढ्यो
ऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया॥यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥
अनेकचित्तविभ्रांता मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥ आत्म
संभाविताः स्तब्धा धनमानमदान्विताः ॥ यजंतेनाम यज्ञैस्ते दंभेनाविधिपूर्वकम् ॥ १७॥

चयस्तेषांमनोरथउक्तः सकेवलंदंभाहंकारादिप्रधानएव नतुसात्विकइत्यभिप्रायेणाह आत्मसंभाविताइतिद्वाभ्याम् । आत्मनैवसंभाविताः पूज्यतांनीताः नतुसाधुभिःकैश्चित् अतएवस्तब्धाअनम्राः धनेनयोमानःमदश्चताभ्यामन्विताःसंतः ते नाममात्रेणयेयज्ञाःतेनामयज्ञाः यद्वा दीक्षितः सोमयाजीत्येवमादिनानाममात्रप्रसिद्धयेयेयज्ञास्तैर्यजंते।कथम् दंभेननतुश्रद्धया अविधिपूर्वकंचयथाभवतितथा ॥ १७॥

अविधिपूर्वकत्वमेवप्रपंचयति।अहंकारमिति।अहंकारादिसंश्रिताःसंतः आत्मपरदेहेषु स्वदेहेषु परदेहेषुचचिदंशेनास्थितंमांप्रद्विषंतोयजंते दंभयज्ञेषुश्रद्धायाअभावात् । आत्मनोवृथैवपीडाभवति तथापश्वादीनामपि अविधिनाहिंसायांचैतन्यद्रोहमात्रमेवावशिष्यतइतिप्रद्विषंतइत्युक्तम् अभ्यसूयकाःसन्मार्गवर्तिनांगुणेषुदोषारोपकाः॥१८॥तेषांकदाचिदप्यासुरस्वभावप्रच्युतिर्नभवतीत्याह तानितिद्वाभ्याम्।तानहंमांद्विषतःक्रूरान्संसारेषुजन्ममृत्युमार्गेषु तत्रापिआसुरीष्वेव अतिक्रूरासुव्याघ्रादियोनिषु अजस्रमनवरतंक्षिपामि तेषांपापकर्मणांताह

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः॥१८॥तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १९ ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥ मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिम् ॥ २० ॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ २१ ॥

शंफलंददामीत्यर्थः॥१९॥किंच आसुरीमिति।तिच मामप्राप्यैवेत्येवकारेणमत्प्राप्तिशंकाकुतस्तेषांयतोमत्प्राप्त्युपायंसन्मार्गमप्यप्राप्यततोऽप्यधमांगतिंकृमिकीटादियोनिंयांतीत्युक्तंशेषंस्पष्टम् ॥२०॥ उक्तानामासुरदोषाणांमध्येसकलदोषमूलभूतंदोषत्रयंसर्वथावर्जनीयमित्याह। त्रिविधमिति।कामःक्रोधोलोभश्चेतीदंत्रिविधंनरकस्यद्वारम् अतएवात्मनोनाशनंनीचयोनिप्रापकम् तस्मादेतत्त्रयंसर्वात्मनात्यजेत् ॥२१॥

त्यागेचविशिष्टफलमाह । एतैरिति ।तमसोनरकस्यद्वारभूतैरेतैस्त्रिभिःकामादिभिर्विमुक्तोनरः आत्मनःश्रेयःसाधनंतपोयोगादिकमाचरति ततश्चमोक्षंप्राप्नोति॥२२॥कामादित्यागश्चस्वधर्माचरणंविनानभवतीत्याह यइति।शास्त्रविधिंवेदविहितंधर्ममुत्सृज्ययःकामकारतोयथेच्छं वर्तते ससिद्धिंतत्वज्ञानंनप्राप्नोति नचसुखमुपशमम् नचपरांगतिंमुक्तिंप्राप्नोति॥२३॥फलितमाह । तस्मादिति।इदंकार्यमिदमकार्यमित्यस्यांव्यवस्थायांतेतवशास्त्रंश्रुतिस्मृतिपुराणादिकमेवप्रमाणम् अतःशास्त्रविधानोक्तंकर्मज्ञात्वाइहकर्माधिकारेवर्तमानोयथाऽधिकारंकर्मक

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परांगतिम् ॥२२॥ यः शास्त्रविधि
मुत्सृज्य वर्त्तते कामकारतः॥न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥२३॥तस्माच्छास्त्रं प्रमाणं ते कार्या
कार्यव्यवस्थितौ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि॥२४॥ ॥इति श्रीमद्भगवद्गीतासूपनिषत्सुब्रह्म
विद्यायां योगशा०दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः।१६।अर्जुन उवाच॥ये शास्त्रविधिमुत्सृज्य
यजंते श्रद्धयाऽन्विताः ॥ तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥ १ ॥

र्तुमर्हसि तन्मूलत्वात्सत्वशुद्धिसम्यग्ज्ञानमुक्तीनामित्यर्थः॥२४॥ देवदैतेयसंपत्तिसंविभागेनषोडशे।तत्वज्ञानेऽधिकारस्तुसात्विकस्येतिदर्शितम्॥१॥इतिसुबोधिन्यांटीकायांश्रीधरस्वामिविरचितायांषोडशोध्यायः॥१६॥उक्ताधिकारहेतूनांश्रद्धामुख्यातुसात्त्विकी । इतिसप्तदशेगौणश्रद्धाभेदास्त्रिधोच्यते ॥१॥ पूर्वाध्यायांते यःशास्त्रविधिमुत्सृज्यवर्ततेकामकारतः । नससिद्धिमवाप्नोतीत्यनेनशास्त्रोक्तविधिमुत्सृज्यका

मकारेणवर्तमानस्यज्ञानेअधिकारोनास्तीत्युक्तम् तत्रशास्त्रविधिमुत्सृज्यकामकारंविना श्रद्धयावर्तमानानांकिमधिकारोऽस्तिनास्तिवेतिबुभुत्सया अर्जुनउवाच । यइति । अत्रशास्त्रविधिमुत्सृज्ययजंतेइत्यनेनशास्त्रार्थंबुद्ध्वातमुल्लंघ्यवर्तमानाश्चगृह्यंते तेषांश्रद्धयायजनानुपपत्तेः आस्तिक्यबुद्धिर्हिश्रद्धा। नचासौशास्त्रज्ञानवतांशास्त्रविरुद्धेर्थेसंभवति तानेवाधिकृत्यत्रिविधाभवतिश्रद्धा यजंतेसात्विकादेवानित्याद्युत्तरानुपपत्तेश्च अतोनात्रशास्त्रातिलंघिनोगृह्यंते अपितुक्लेशबुद्ध्या आलस्याद्वाशास्त्रार्थज्ञानेप्रयत्नमकृत्वाकेवलमाचारपरंपरावशेनश्रद्धया क्वचिद्देवताराधनादौप्रवर्तमानागृह्यंते अतोयमर्थः येशास्त्रविधिमुत्सृज्यदुःखबुद्ध्याआलस्याद्वाअनादृत्यकेवलमाचारप्रामाण्येनश्रद्धयान्विताःसंतोयजंते तेषांतुकानिष्ठाकास्थितिःकआश्रयः तामेवविशेषेणपृच्छति किंसत्वम् आहोकिंवारजः अथवातमइति तेषांतादृशीदेवपूजादिप्रवृत्तिःकिंसत्वसंश्रितारजःसंश्रितावातमःसंश्रितावेत्यर्थः।श्रद्धायाःसात्विकत्वात्।क्लेशबुद्ध्याआलस्येनचशास्त्रानादरस्यचराजसतामसत्वात्रेधासंदेहः यदिसत्वभावसंश्रितास्तर्हितेषामपिसात्विकत्वाद्यथोक्तात्मज्ञानेऽधिकारःस्यात् अन्यथानेतिप्रश्नतात्पर्यार्थः ॥१॥

**श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा॥सात्विकी राजसी चैव तामसी चेति तां शृणु २**

अत्रोत्तरं श्रीभगवानुवाच । त्रिविधेति । अयमर्थः शास्त्रतत्वज्ञानतःप्रवर्तमानायांपरमेश्वरपूजाविषयासात्विकीएकविधैवश्रद्धा लोकाचारमात्रेणतुप्रवर्तमानानांदेहिनांयाश्रद्धासातुसात्विकीराजसीतामसीवेतित्रिविधाभवति । तत्रहेतुः । स्वभावजा स्वभावःपूर्वकर्मसंस्कारःतस्माज्जातास्वभावजास्वभावमन्यथाकर्तुंसमर्थंहिशास्त्रोक्तंविवेकज्ञानंतत्तुतेषांनास्ति अतःकेवलंस्वभावेनैवभवतीति श्रद्धात्रिविधाभवति

तामिमांत्रिविधांश्रद्धांशृणु।तदुक्तम्।व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदनेत्यादिना ॥ २ ॥ ननुचश्रद्धासात्विक्येवसत्वकार्यत्वेनत्वयैवभगवताउद्धवंप्रतिनिर्दिष्टत्वात्।यथोक्तम्।शमोदमस्तितिक्षेज्यातपःसत्यंदयास्मृतिः।तुष्टिस्त्यागोऽस्पृहाश्रद्धाह्रीर्दयानिर्वृतिर्धृतिः इत्येताःसत्वस्यवृत्तयइति।अतःकथंतस्यास्त्रैविध्यमुच्यते।सत्यम्।तथाऽपिरजस्तमोयुक्तपुरुषाश्रयत्वेनरजस्तमोमिश्रत्वेनसत्वस्यत्रैविध्यात् श्रद्धाया अपि त्रैविध्यंघटतइत्याह । सत्वानुरूपेति । सत्वानुरूपासत्वतारतम्यानुसारिणीसर्वस्यविवेकिनोऽविवेकिनोवालोकस्यश्रद्धाभवति तस्मादयंपुरुषः लौकिकः श्रद्धामयः श्रद्धाविकारः त्रिविधयाश्रद्धयाविक्रियतइत्यर्थः।तदेवाह।योयच्छ्रद्धः यादृशीश्रद्धायस्यसएवसः तया

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत॥श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥३॥
यजंते सात्त्विका देवान्यक्षरक्षांसि राजसाः ॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥

श्रद्धयायुक्तःपुरुषःसपुनस्तादृशसत्वसंस्कारेणसात्विकश्रद्धयायुक्तएवभवति यस्तुरजसउत्कर्षेणराजसश्रद्धायुक्तः सपुनस्तादृशएवभवति यस्तुतमसउत्कर्षेणतामसश्रद्धयायुक्तःसपुनस्तादृशएवभवति इतिलोकाचारमात्रेणप्रवर्तमानेष्वेवंसात्विकराजसतामसश्रद्धाव्यवस्था शास्त्रजनितविवेकज्ञानयुक्तानांतुस्वभावविजयेनसात्विक्येकैवश्रद्धेतिप्रकरणार्थः॥३॥ सात्विकादिभेदमेवकार्यभेदेनप्रपंचयति।यजंतइति । सात्विकाजनाःसत्वप्रकृतीन्देवानेवयजंते पूजयंति राजसास्तुरजःप्रकृतीन्यक्षान्राक्षसांश्चयजंते एतेभ्योन्येतुविलक्षणास्तामसाजनास्तामसानेवप्रेतान्भूतगणांश्चयजंतेसत्वादिप्रकृतीनांतत्तद्देवतानां तुपूजारुचिभिस्तत्तत्पूजकानांसात्विकत्वादिज्ञातव्यमित्यर्थः ॥ ४ ॥

राजसतामसेषुपुनर्विशेषांतरमाह।अशास्त्रविहितमितिद्वाभ्याम् । शास्त्रविधिमजानंतोपिकेचित्प्राचीनपुण्यसंस्कारेणोत्तमाःसात्विकाएवभवंति केचित्तुमध्यमाराजसाभवंति अधमास्तुतामसाभवंति येपुनरत्यंतंमंदभाग्याः गतानुगत्यापाखंडसंगेनचतदाचारानुवर्त्तिनःसंतःअशास्त्रविहितंघोरंभूतभयंकरंतपस्तप्यंते कुर्वंति तत्रहेतवः दंभाहंकाराभ्यांसंयुक्ताःतथाकामोऽभिलाषःरागःआसक्तिःबलमाग्रहःएतैरन्विताःसंतः तानासुरनिश्चयान्विद्धीत्युत्तरेणान्वयः॥५॥किंचकर्षयंतइतिशरीरस्थंप्रारंभकत्वेनदेहस्थितंभूतानांपृथिव्यादीनांग्रामंसमूहंकर्षयं

अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥
कर्षयंतः शरीरस्थं भूतग्राममचेतसः ॥ मांचैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥
आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ॥ यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७॥

तःवृथैवोपवासदिभिःकृशंकुर्वंतोऽचेतसोऽविवेकिनः मांचअंतर्यामितयाअंतःशरीरस्थंदेहमध्येस्थितम् मदाज्ञालंघनेनैवकर्षयंतःसंतएवयेतपश्चरंति तानासुरनिश्चयानासुरोतिक्रूरोनिश्चयोयेषांतान्विद्धि ॥६॥ आहारादिभेदादपिसात्विकादिभेदंदर्शयितुमाह । आहारस्त्वित्यादित्रयोदशभिः । सर्वस्यापिजनस्ययआहारोन्नादिःसतुयथायथंत्रिविधःप्रियोभवति । तथायज्ञतपोदानानिचत्रिविधाभवंति । तेषांचवक्ष्यमाणमिमंभेदंशृणु।एतच्चराजसतामसाहारयज्ञादिपरित्यागेनसात्विकाहारयज्ञादिसेवयासत्ववृद्धौयत्नःकर्त्तव्यइत्येतदर्थंकथ्यते ॥ ७ ॥

तत्राहारत्रैविध्यमाह । आयुरितित्रिभिः । आयुर्जीवितम् सत्वमुत्साहः वलंशक्तिः आरोग्यंरोगराहित्यम् सुखंचित्तप्रसादः प्रीतिरभिरुचिः
आयुरादीनांविवर्द्धनाः विशेषेणवृद्धिकराः तेचरस्यारसवंतः स्निग्धाःस्नेहयुक्ताः स्थिरादेहेसारांशेनचिरकालावस्थायिनः हृद्याहष्टमात्राएव
हृदयंगमाः एवंभूताआहाराभक्ष्यभोज्यादयःसात्विकप्रियाः।८।तथा कट्विति।अतिशब्दः कट्वादिषुसप्तस्वपिसंबध्यते अतिकटुर्निंबादिः अ
त्यम्लोऽतिलवणोत्युष्णश्चप्रसिद्धः अतितीक्ष्णोमरीचादिः अतिरूक्षःकंगुकोद्रवादिः अतिविदाहीसर्षपादिः अतिकाट्वदयआहाराराजसस्ये

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः ॥ रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः
॥ ८ ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजसस्येष्टा दुःखशोकामयप्रदाः
॥ ९ ॥ यातयामं गतरसं पूति पर्युषितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१०॥
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥ ११ ॥

ष्टाःप्रियाः दुःखंतात्कालिकम् हृदयसंतापादिः शोकःपश्चाद्भाविदौर्मनस्यम् आमयोरोगः एतान्प्रददतिप्रयच्छंतीतितथा९तथा यातयाममि
ति।यातोयामःप्रहरोयस्यपक्वस्योदनादेस्तद्यातयामं शैत्यावस्थांप्राप्तमित्यर्थः।गतरसंनिष्पीडितसारम् पूतिदुर्गंधम् पर्युषितंदिनांतरपक्वम्
उच्छिष्टम् अन्यभुक्तावशिष्टम् अमेध्यम् अभक्ष्यंकलंजादि एवंभूतंभोजनंभोज्यंतामसस्याप्रियम् १०यज्ञोऽपित्रिविधः तत्रसात्विकंयज्ञमाह
अफलाकांक्षिभिरितित्रिभिः । फलाकांक्षारहितैःपुरुषैर्विधिनादृष्टःआवश्यकतयाविहितोयोयज्ञइज्यते अनुष्ठीयते ससात्विकोयज्ञः कथ

मिज्यते यष्टव्यमेवेति।यज्ञानुष्ठानमेवकार्यंनान्यत्फलंसाधनीयमित्येवंमनःसमाधायएकाग्रंकृत्वेइत्यर्थः ॥११॥ राजसंयज्ञमाह।अभिसंधाये
ति फलमभिसंधायउद्दिश्ययास्त्विज्यते यज्ञःक्रियते दंभार्थंस्वमहत्त्वख्यापनार्थंतंयज्ञंराजसंविद्धि॥१२॥तामसंयज्ञमाह । विधिहीनमिति ।
विधिहीनम् शास्त्रोक्तविधिशून्यम् असृष्टान्नंब्राह्मणादिभ्योनसृष्टंननिष्पादितमन्नंयस्मिंस्तम्।मंत्रहीनंयथोक्तदक्षिणारहितंच श्रद्धाशून्यंयज्ञं
तामसंपरिचक्षते कथयंतिशिष्टाः॥१३ ॥ तपसःसात्विकादिभेदंदर्शयितुंप्रथमंतावच्छारीरादिभेदेनतस्यत्रैविध्यमाह।देवद्विजेतित्रिभिः।प्रा

अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥ विधिहीनमसृष्टा
न्नं मंत्रहीनमदक्षिणम्॥श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥१३॥देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्॥ब्रह्म
चर्यमहिंसा च शारीरं तप उच्यते १४अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्॥स्वाध्यायाभ्यसनंचैव वाङ्म
यं तप उच्यते १५मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः॥भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥

ज्ञागुरुव्यतिरिक्ताः अन्येपितत्त्वविदःदेवब्राह्मणादिपूजनंशौचादिकंशारीरंशरीरनिर्वर्त्यंतपउच्यते॥१४॥वाचिकंतपआह।अनुद्वेगेति।उद्वेगं
भयंनकरोतीत्यनुद्वेगकरंवाक्यम् सत्यंच श्रोतुःप्रियंच हितंचपरिणामेसुखकरम् स्वाध्यायाभ्यसनंवेदाभ्यासश्चवाङ्मयम् वाचानिर्वर्त्यंतपः
॥ १५ ॥ मानसंतपआह। मनःप्रसादइति। मनसःप्रसादःस्वस्थता सौम्यत्वमक्रूरता मौनंमुनेर्भावःमननमित्यर्थः आत्मनोमनसोविनिग्रहः
विषयेभ्यःप्रत्याहारः भावसंशुद्धिः व्यवहारेमायाराहित्यम् इत्येतन्मानसंतपः ॥ १६ ॥

तदेवंशरीरेवाङ्मनोभिर्निर्वर्त्यंत्रिविधंतपोदर्शितम्।त्रिविधस्यापितपसःसात्विकादिभेदेनत्रैविद्ध्यमाह।श्रद्धयेतित्रिभिः।त्रिविधमपितपःश्रेष्ठया श्रद्धयाफलाकांक्षाशून्यैर्युक्तैरेकाग्रचित्तैर्नरैस्तप्तंतत्सात्विकंकथयंति १७राजसंतपआह।सत्कारेति।सत्कारःसाधुकारःसाधुरयमितितापसइत्यादिवाक्पूजा।मानःप्रत्युत्त्थानाभिवादनादिर्दैहिकीपूजाऽर्थलाभादिः।एतदर्थंदंभेनचयत्तपःक्रियते अतएवचलम्अनियतंअध्रुवंचक्षणिकम् यदेवंभूतंतपःतदिहराजसंप्रोक्तम्॥१८॥तामसंतपआह।मूढेति।मूढग्राहेणाविवेककृतेनदुराग्रहेणात्मनःपीडयायत्तपःक्रियते परस्यो

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते ॥१७॥ सत्कारमान
पूजार्थं तपो दंभेन चैव यत् ॥ क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥ १८ ॥ मूढग्राहेणात्मनो यत्पीड
या क्रियते तपः ॥ परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥ दातव्यमिति यद्दानं दीयतेऽनुपका-
रिणे ॥ देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥ २० ॥

त्सादनार्थंवाऽन्यस्यविनाशार्थम् आभिचाररूपम् तत्तामससमुदाहृतम् कथितम् ॥१९॥पूर्वंप्रतिज्ञातमेवदानस्यत्रैविध्यमाह।दातव्यमिति । दातव्यमित्येवंनिश्चयेनयद्दानंदीयते अनुपकारिणेप्रत्युपकारासमर्थाय देशेकुरुक्षेत्रादौ कालेग्रहणादौ पात्रेचेतिदेशकालादिसाहचर्यात्सप्तमीप्रयुक्ता पात्रभूताय तपःश्रुतादिसंपन्नायब्राह्मणायेत्यर्थः।यद्वा पात्रइतिचतुर्थ्येवैषापात्रइतितृजंतंरक्षकायेत्यर्थः । सहिसर्वस्मादापद्गणाद्दातारंपातीति यदेवंभूतंदानंतत्सात्विकम् ॥ २० ॥

राजसंदानमाह । यात्त्विति।कालांतरेऽयंमांप्रत्युपकारंकरिष्यतीत्येवमर्थम् फलंवास्वर्गादिकमुद्दिश्ययत्पुनर्दानंदीयते परिक्लिष्टंचित्तक्लेशयुक्तंयथाभवत्येवंभूतम् तद्दानंराजसमुदाहृतंकथितम्॥२१॥तामसंदानमाह।अदेशेति । अदेशेअशुचिस्थाने अकालेअशौचसमये अपात्रेभ्योविटनटनर्तकादिभ्योयद्दानंदीयते देशकालपात्रसंपत्तावपि असत्कृतंपादप्रक्षालनादिसत्कारशून्यम् अवज्ञातंतिरस्कारयुक्तम् एवंभूतं दानंतामससमुदाहृतम् ॥ २२ ॥ ननुचैवंविचार्यमाणेसर्वमपियज्ञतपोदानादिराजसतामसप्रायमेवेतिव्यर्थोयज्ञादिप्रयासइत्याशंक्यतथाविधस्यापिसात्विकत्वापादानप्रकारंदर्शयितुमाह । ॐमिति।ॐतत्सदित्येवंत्रिविधोब्रह्मणः परमात्मनोनिर्देशोनामव्यपदेशः स्मृतः शिष्टैः।तत्रतावदोमितित्रिवृद्ब्रह्मेत्यादिश्रुतिप्रसिद्धेरोमितिब्रह्मणोनामजगत्कारणत्वेनातिप्रसिद्धत्वात् अविदुषांपरोक्षत्वाच्चतच्छब्दोऽपिब्रह्मणो नाम परमार्थसत्वसाधुत्वप्रशस्तत्वादिभिःसच्छब्दोब्रह्मणोनाम । सदेवसौम्येदमग्रआसीदित्यादिश्रुतेः।अयंत्रिविधोऽपिनामनिर्देशोविगुणमपिसगुणीकर्तुंसमर्थइत्याशयेनस्तौति तेनत्रिविधेनब्रह्मणोनिर्देशेनब्राह्मणाश्चवेदाश्चयज्ञाश्चपूर्वंसृष्ट्यादौविहिताः विधात्रानिर्मिताः सगुणीकृतावा।यद्वा यस्यायंत्रिविधोनिर्देशस्तेनपरमात्मनाब्राह्मणादयःपवित्रतमाःसृष्टाः तस्मात्तस्यायंत्रिविधोनिर्देशोऽतिप्रशस्तइत्यर्थः२३

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ॥ दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥२१॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥ २२ ॥
ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥

इदानींप्रत्येकमोंकारादीनांप्रशास्त्यंदर्शयिष्यन्नोंकारस्यतदेवाह। तस्मादिति।यस्मादेवंब्रह्मणोनिर्देशस्तस्मादोमित्युदाहृत्यउच्चार्यकृतावेदवादिनांयज्ञाद्याःशास्त्रोक्ताःक्रियाःसततंसर्वदाअंगवैकल्येऽपिप्रकर्षेणवर्त्तंते सगुणाभवंतीत्यर्थः ॥२४॥ किंच द्वितीयंनामप्रस्तौति । तदिति।उदाहृत्येतिपूर्वस्यानुषंगः तदित्युदाहृत्यशुद्धचित्तैर्मोक्षकांक्षिभिःपुरुषैःफलाभिसंधिमकृत्वायज्ञाद्याःक्रियाःक्रियंते अतश्चित्तशोधनद्वारेणफलसंकल्पत्याजनेनमुमुक्षुत्वसंपादकत्वात्तच्छब्दनिर्देशःप्रशस्तइत्यर्थः॥२५॥सच्छब्दस्यप्राशस्त्यमाह।सद्भावइतिद्वाभ्याम्।सद्भा

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ॥ प्रवर्तंते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥
तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ॥ दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः ॥ २५॥
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥ प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥

वेअस्तित्वे देवदत्तस्यपुत्रादिकमस्तीत्यस्मिन्नर्थे साधुभावेचसाधुत्वे देवदत्तस्यपुत्रादिश्रेष्ठमित्यस्मिन्नर्थेसदित्येतत्पदंप्रयुज्यते प्रशस्तेमांगलिकेविवाहादिकर्मणिचसदिदंकर्मेतिसच्छब्दोयुज्यतेप्रयुज्यतेसंगच्छतइतिवा ॥ २६ ॥ किंच।यज्ञइति।यज्ञादिषुयास्थितिस्तात्पर्येणावस्थानंतदपिसदित्युच्यते।यस्यचेदंनामत्रयंसएवपरमात्माअर्थःफलंयस्यतत्तदर्थंकर्म पूजोपहारगृहांगणपरिमार्जनोपलेपरंगमांगलिकादिक्रिया तत्सिद्ध्येयदन्यत्कर्मक्रियते उद्यानशालिक्षेत्रधनार्जनादिविषयम् तत्कर्मतदर्थीयम् तच्चातिव्यवहितमपिसदित्येवाभिधीयते यस्मा

देवमतिप्रशस्तमेतन्नामत्रयंतस्मादेतत्सर्वकर्मसाद्गुण्यार्थंकीर्त्तयेदितितात्पर्यार्थः।अत्रचार्थवादानुपपत्या।विधिःकल्प्यतेविधेयंस्तूयतेवस्त्वितिन्यायात्। अपरेतु प्रवर्त्तंतेविधानोक्ताःक्रियंतेमोक्षकांक्षिभिरित्यादिवर्त्तमानोपदेशः समिधोयजतीत्यादिवद्विधितयापरिणमनीयइत्याहुः तत्तुसद्भावेसाधुभावेचेत्यादिषुप्राप्तार्थत्वान्नसंगच्छतइतिपूर्वोक्तक्रमेणाविधिकल्पनैवज्यायसी ॥ २७ ॥ इदानींसर्वकर्मसुश्रद्धयैवप्रवृत्त्यर्थमश्रद्धाकृतंसर्वंनिंदति।अश्रद्धयेति ।अश्रद्धया हुतंहवनंदत्तंदानं तप्तंनिर्वर्त्तितंतपः यच्चान्यदपिकृतंकर्म तत्सर्वंअसदित्युच्यते । यतस्तत्प्रेत्य लोकांतरेनफलतिविगुणत्वान्नोइहनचास्मिन्लोकेफलतिअयशस्करत्वात् ॥ २८ ॥ रजस्तमोमयींत्यक्त्वाश्रद्धांसत्वमयींश्रितः । तत्त्वज्ञा

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ २८ ॥ इति श्रीमद्भगव॰ श्रद्धात्रययोगो नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अर्जुन उवाच ॥ संन्यासस्य
महाबाहो तत्त्वमिच्छामि वेदितुम् ॥ त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥

नेऽधिकारीस्यादितिसप्तदशोस्थितम्॥ १ ॥इतिसुबोधिन्यांटीकायांसप्तदशोऽध्यायः॥ १७ ॥न्यासत्यागविभागेनसर्वगीतार्थसंग्रहम्।स्पष्टमष्टादशेप्राहपरमार्थविनिर्णये॥ १ ॥अत्रचसर्वकर्माणिमनसासंन्यस्यास्तेसुखंवशी ॥ संन्यासयोगयुक्तात्मेत्यादिषुकर्मसंन्यासउपदिष्टः । तथा त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः ॥ सर्वकर्मफलात्यागंततःकुरुयतात्मवानित्यादिषुचफलमात्रत्यागेनकर्मानुष्ठानमुपदिष्टम् । नचपरस्परंविरुद्धंसर्वज्ञःपरमकारुणिकोभगवानुपदिशेत् । अतःकर्मसंन्यासस्यतदनुष्ठानस्यचाविरोधप्रकारंबुभुत्सुरर्जुनउवाच । संन्यासस्येति ।

भोहृषीकेश सर्वेंद्रियनियामक हेकेशिनिषूदन केशिनाम्नोहिमहतोहयाकृतेर्दैत्यस्ययुद्धेमुखंव्यादाय भक्षयितुमागच्छतोऽत्यतंव्यात्तेमुखे वामबाहुंप्रवेश्यतत्क्षणमेवविवृद्धेनतेनैवबाहुनाकर्कटिकाफलवत्तंविदार्यनिषूदितवान् अतएवहेमहाबाहोइतिसंबोधनम् संन्यासस्यत्यागस्यचतत्त्वंपृथक्विवेकेनवेदितुमिच्छामि ॥१॥ तत्रोत्तरंश्रीभगवानुवाच।काम्यानामिति।पुत्रकामोयजेतस्वर्गकामोयजेतेत्येवमादिकामोपवंधेनविहितानांकाम्यानांकर्मणांन्यासंपरित्यागंसंन्यासंकवयोविदुः सम्यक्फलैःसहसर्वकर्मणामपिन्यासंसंन्यासंपंडिताविदुः जानंतीत्यर्थः।सर्वेषांकाम्यानांनित्यनैमित्तिकानांचकर्मणांफलमात्रत्यागंप्राहुस्त्यागंविचक्षणानिपुणाः नतुस्वरूपतः कर्मत्यागम्। ननुनित्यनैमित्तिकानांफलाश्रवणादविद्यमानस्यफलस्यकथंत्यागः स्यात् नहिवंध्यायाःपुत्रत्यागःसंभवति। उच्यते यद्यपिस्वर्गकामःपशुकामइत्यादि

श्रीभगवानुवाच॥काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः॥सर्वं कर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः२

वदहरहःसंध्यामुपासीत यावज्जीवमग्निहोत्रंजुहोतीत्यादिषुफलविशेषोनश्रूयते। तथाप्यपुरुषार्थेव्यापारेप्रेक्षावंतंप्रवर्त्तयितुमशक्नुवन्विधिर्विश्वजितायजेतेत्यादिष्विवसामान्यतःकिमपिफलमाक्षिपत्येव। नचातीवगुरुमतः श्रद्धयास्वासिद्धिरेवंविधेःप्रयोजनमितिमंतव्यम्।पुरुषप्रवृत्त्यनुपपत्तेर्दुष्परिहरत्वात्।श्रूयतेचनित्यादिष्वपिफलम् सर्वएतेपुण्यलोकाभवंतीति।कर्मणापितृलोकइति धर्मेणपापमपनुदतीत्येवमादिषु। तस्माद्युक्तमुक्तम् सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाइति।ननुफलत्यागेनपुनरपिनिष्फलेषुकर्मस्यप्रवृत्तिरेवस्यात्तन्न।सर्वेषामपिकर्मणांसंयोगपृथक्त्वेनविविदिषार्थतयाविनियोगात्। तथाचश्रुतिः तमेतमात्मानंवेदानुवचनेनब्राह्मणाविविदिषंति यज्ञेनदानेनतप

सानाशकेनेति।अतःप्रतिपदोक्तसर्वफलंबंधकत्वेनत्यक्त्वाविविदिषार्थंसर्वकर्मानुष्ठानंघटतएव।विविदिषाचनित्यानित्यवस्तुविवेकेनानिवृत्तदेहाद्यभिमानतयाबुद्धेः प्रत्यक्प्रवणता तावत्पर्यंतंचसत्त्वशुद्ध्यर्थंज्ञानाविरुद्धंयथोचितमावश्यकंकर्मकुर्वतस्तत्फलत्यागएवकर्मत्यागोनाम न स्वरूपेण।तथाचश्रुतिः।कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइति। ततःपरंतुसर्वकर्मनिवृत्तिःस्वतएवभवति तदुक्तंनैष्कर्म्यसिद्धौप्रत्यक्प्रवणताबुद्धेःकर्माण्युत्पाद्यशुद्धितः॥कृतार्थान्यस्तमायांतिप्रावृडंतेघनाइवेति।उक्तंच।भगवता ।यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यतइति।वसिष्ठेनचोक्तम्।नकर्माणित्यजेद्योगीकर्मभिस्त्यज्यतेह्यसौ कर्मणोमूलभूतस्यसंकल्पस्यैवनाशतइति॥ज्ञाननिष्ठाविक्षेपकत्वमालक्ष्यत्यजेद्वा।तदुक्तंभागवते ।तावत्कर्माणिकुर्वीतननिर्विद्येतयावता॥मत्कथाश्रवणादौवाश्रद्धायावन्नजाय

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ॥ यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥ ३ ॥

ते॥ज्ञाननिष्ठोविरक्तोवामद्भक्तोवानपेक्षकः॥सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरइत्यादि।अलमतिप्रसंगेन प्रकृतमनुसरामः२अविदुषः फलत्यागमात्रमेवत्यागशब्दार्थोनकर्मत्यागइत्येतदेवमतांतरनिरासेनदृढीकर्तुंमतभेदंदर्शयति। त्याज्यमिति। दोषवद्धिंसादिदोषवत्त्वेनबंधकमितिहेतोःसर्वमपिकर्मत्याज्यमित्येकेसांख्याः प्राहुर्मनीषिणइत्यस्यायंभावः नहिंस्यात्सर्वभूतानीतिनिषेधःपुरुषस्यानर्थहेतुर्हिंसेत्याह।अग्नीषोमीयंपशुमालभेतेत्यादिप्राकरणिकोविधिस्तुहिंसायाःक्रतूपकारकत्वमाह । अतोभिन्नविषयत्वेनसामान्यविशेषन्यायागोचरत्वाद्रव्यसाध्येषुसर्वेष्वपिकर्मसुहिंसादेःसंभवात्सर्वमपिकर्मत्याज्यमेवेति।तदुक्तम्। दृष्टवदानुश्रविकःसह्यविशुद्धिक्षयातिशययुक्तः। अस्यार्थः

उपायोज्योतिष्टोमादिःसोऽपिदृष्टोपायवत् गुरुपाठादनुश्रूयतइत्यनुश्रवोवेदस्तद्बोधितः तत्राविशुद्धिर्हिंसातयाक्षयोविनाशः अग्निहोत्रज्योतिष्टोमादिजन्यस्वर्गेषुतारतम्यंचवर्त्तते परोत्कर्षस्तुसर्वान्दुःखीकरोति । अपरेतुमीमांसकाः यज्ञादिकंकर्मनत्याज्यमितिप्राहुः । अयंभावः।क्रत्वर्थापिसतीयंहिंसापुरुषेणैवकर्तव्यासाचान्योद्देशेनापिकृतापुरुषस्यप्रत्यवायहेतुरेव । तथाहिविधिर्विधेयस्यतदुद्देशेनानुष्ठानंविधत्तेतादर्थ्यलक्षणत्वाच्छेषत्वस्य । नत्वेवंनिषेधोनिषेध्यस्यतादर्थ्यमपेक्षते प्राप्तिमात्रोपेक्षितत्वात् अन्यथाज्ञानप्रमादादिकृतेदोषाभावप्रसंगात् तदेवंसमानविषयत्वेनसामान्यशास्त्रस्यविशेषेणबाधान्नास्तिदोषवत्त्वमतोनित्यंयज्ञादिकर्मनत्याज्यमिति ॥३॥ एवंमतभेदमुपन्यस्य

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५ ॥
एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च॥कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥६॥

स्वमतंकथयितुमाह। निश्चयमिति । तत्रैवंविप्रतिपन्नेत्यागेनिश्चयंमेवचनाच्छृणु त्यागस्यलोकप्रसिद्धत्वात्किमत्रश्रोतव्यमितिमावमंस्थाइत्याह।हेपुरुषव्याघ्रपुरुषश्रेष्ठ ।त्यागोऽयंदुर्बोधः हियस्मादयंकर्मत्यागस्तत्त्वविद्भिस्तामसादिभेदेनत्रिविधःसम्यग्विवेकेनप्रकीर्त्तितः त्रैविध्यंच नियतस्यतुसंन्यासःकर्मणइत्यादिनावक्ष्यति॥४॥ प्रथमंतावन्निश्चयमाह।यज्ञदानेतिद्वाभ्याम्।मनीषिणांविवेकिनांपावनानिचित्तशुद्धिकराणि ॥५॥ येनप्रकारेणकृतान्येतानिपावनानिभवंतितंप्रकारंदर्शयन्नाह।एतानीति।यानियज्ञादिकर्माणिमयापावनानीत्युक्तम् एतान्येवक

र्तव्यानि । कथं संगंकर्तृत्वाभिनिवेशंत्यक्त्वाकेवलमीश्वराराधनतयाकर्तव्यानिफलानिचत्यक्त्वाकर्तव्यानीतिचनिश्चितंमेमतम् अतएवोत्तमम् ॥६॥ प्रतिज्ञातंत्यागस्यत्रैविध्यमिदानींदर्शयति।नियतस्येतित्रिभिः।काम्यस्यकर्मणोवंधकत्वात्संन्यासोयुक्तः।नियतस्यतुनित्यस्यपुनःकर्मणःसंन्यासस्त्यागोनोपपद्यतेसत्वशुद्धिद्वारामोक्षहेतुत्वात् । अतस्तस्यपरित्यागः उपादेयेऽपित्याज्यमित्येवंलक्षणान्मोहादेवभवेत् सचमोहस्यतामसत्वात्तामसःपरिकीर्तितः ॥ ७ ॥ राजसंत्यागमाह दुःखमिति यःकर्त्तात्मबोधंविनाकेवलंदुःखमित्येवंज्ञात्वाशरीरा

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ॥ मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्॥स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥८॥
कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन॥संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः॥९॥
न द्वेष्ट्यकुशलं कर्म कुशलेनानुषज्जते ॥ त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

यासभयान्नित्यंकर्मत्यजेदितियत्तादृशस्त्यागोराजसः दुःखस्यराजसत्वात् । अतस्तंराजसंत्यागंकृत्वा राजसःपुरुषस्त्यागस्यफलंज्ञानानिष्ठालक्षणंनैवलभतइत्यर्थः॥ ८ ॥सात्विकंत्यागमाह कार्यमिति कार्यमित्येवंबुद्ध्यानियतमवश्यकर्त्तव्यतयाविहितंकर्म संगंफलंचत्यक्त्वा क्रियतइतियत्सतादृशस्त्यागः सात्विकोमतः ॥ ९ ॥ एवंभूतसात्विकत्यागपरिनिष्ठितस्यलक्षणमाह नद्वेष्टीति सत्वसमाविष्टः सत्वेनसंव्याप्तः सात्विकत्यागी अकुशलंदुःखावहंशिशिरेप्रातःस्नानादिकंकर्मनद्वेष्टि कुशलेचसुखकरेकर्मणिनिदाघेमाध्याह्नस्नानादौनानुषज्जते

प्रीतिंनकरोति तत्रहेतुः मेधावीस्थिरबुद्धिः यत्रपरपरिभवादिमहदपिदुःखंसह्यते स्वर्गादिसुखंचत्यज्यते तत्रकियदेतत्तात्कालिकंसुखंदुःखंचेत्येवमनुसंधानवानित्यर्थः।अतएवाछिन्नःसंशयोमिथ्याज्ञानंदैहिकंसुखदुःखयोरुपादित्सापरिजिहीर्षालक्षणंयस्यसः ।१०।नन्वेवंभूतात्कर्मफलत्यागाद्वरंसर्वकर्मत्यागस्तथासतिकर्मविक्षेपाभावेनज्ञाननिष्ठासुखंसंपद्यतेतत्राह। नेति । देहभृतादेहात्माभिमानवता निःशेषेणसर्वाणिकर्माणित्यक्तुंनहिशक्यम्।तदुक्तं।नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृदित्यादिना । तस्माद्यस्तुकर्माणिकुर्वन्नेवकर्मफलत्यागीसएवमुख्यत्यागीत्यभिधीयते ॥ ११ ॥ एवंभूतस्यकर्मफलत्यागस्यफलमाह।अनिष्टमिति।अनिष्टंनारकित्वम् इष्टंदेवत्वम् मिश्रंमनुष्यत्वम् एवंत्रिविधंपापस्यपुण्यस्यचोभयमिश्रस्यकर्मणोयत्फलंप्रसिद्धंतत्सर्वमत्यागिनाम् सकामानामेवप्रेत्यपरत्रभवति तेषांत्रिविधकर्मसंभवत्वात् नतुसंन्यासिनांक्वचिदपिभवति संन्यासिशब्देनात्रफलत्यागसाम्यात्प्रकृताःकर्मफलत्यागिनोऽपिगृह्यंते।अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः॥ससंन्यासीचयोगीचेत्येवमादौकर्मफलत्यागिषुसंन्यासिशब्दप्रयोगदर्शनात् । तेषांसात्विकानांपापासंभवात् ।ईश्वरार्पणेनचपुण्यफलस्यत्यक्तत्वात्।त्रिविधमपिकर्मफलंनभवतीत्यर्थः॥१२॥ ननुकर्मकुर्वतःकर्मफलंकथंनभवेदित्याशंक्यसंगत्यागिनोनिरहंकारस्यसतःकर्मफले

नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥११॥
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं॥भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१२॥
पंचैतानि महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥१३॥

नलेपोनास्तीत्युपपादयितुमाह।पंचैतानीतिपंचाभिः।सर्वकर्मणांसिद्धयेनिष्पत्तयेइमानिवक्ष्यमाणानिपंचकारणानिमेवचनान्निबोधजानीहि। आत्मनःकर्तृत्वाभिमाननिवृत्त्यर्थमवश्यमेतानिज्ञातव्यानीत्येवंतेषांस्तुत्यर्थमाह।सांख्यइति।सम्यक्ख्यायतेज्ञायतेपरमात्मानेनेतिसांख्यं तत्त्वज्ञानंतस्मिन् कृतंकर्मतस्यांतःसमाप्तिरस्मिन्निनितिकृतांतस्तस्मिन्वेदांतसिद्धांतइत्यर्थः।यद्वा संख्यायंतेगण्यंतेतत्त्वान्यस्मिन्निनिसांख्यं कृतःअंतोनिर्णयोयस्मिन्निनितिकृतांतंसांख्यशास्त्रमेवतस्मिन्प्रोक्तानिअतःसम्यग्निबोधेत्यर्थः ॥ १३ ॥ तान्येवाह अधिष्ठानमितिअधिष्ठानं शरीरंकर्त्ता चिज्जडग्रंथिरहंकारः पृथग्विधमनेकप्रकारंकरणंचक्षुःश्रोत्रादिविविधाःकार्यतःस्वरूपतश्चपृथग्भूताश्चेष्टाःप्राणापानादीनांव्यापा

अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम् ॥ विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् ॥ १४ ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥ १५ ॥
तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः ॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

राःअत्रचैतेष्वेवपंचमदैवंचकारकंचक्षुराद्यनुग्राहकमादित्यादिसर्वप्रेरकोंऽतर्यामीवा।१४।एतेषामेवसर्वकर्महेतुत्वमाह।शरीरेति।यथोक्तैःपंचभिःप्रारभ्यमाणंकर्मत्रिष्वेवांतर्भाव्यम् शरीरवाङ्मनोभिरित्युक्तम्।शारीरंवाचिकंमानसंचत्रिविधंकर्मेतिप्रसिद्धेः शरीरादिभिर्यद्यत्कर्मधर्म्यं वाधर्म्यंवाकरोतिनरस्तस्यसर्वस्यकर्मणएतेपंचहेतवः ॥ १५ ॥ ततःकिमतआहतत्रेति तत्रसर्वस्मिन्कर्मणिएतेपंचहेतवइत्येवंसतिकेवलं निरुपाधिकमसंगमात्मानंतुयःकर्त्तारंपश्यंति शास्त्राचार्योपदेशत्यागेनासंस्कृतबुद्धित्वाद्दुर्मतिरसौसम्यक्नपश्यति ॥ १६ ॥

कस्तर्हिंसुमतिः यस्यकर्मलेपोनास्तीत्युक्तमित्यपेक्षायामाह।यस्येति।अहमितिकृतोऽहंकर्तेत्येवंभूतोभावोऽभिप्रायोयस्यनास्ति।यद्वा अहंकृतोऽहंकारस्यभावःकर्तृत्वाभिनिवेशोयस्यनास्ति शरीरादीनामेवकर्मकर्तृत्वालोचनादित्यर्थः अतएवयस्यबुद्धिर्नलिप्यते इष्टानिष्टबुद्ध्याकर्मसुनसज्जते सएवंभूतोदेहादिव्यतिरिक्तात्मदर्शीइमाँल्लोकान्त्सर्वानपिप्राणिनोलोकदृष्ट्याहत्वापिविविक्ततयास्वदृष्ट्यानहंति नचतत्फलैर्निबद्ध्यतेबंधनंनप्राप्नोति किंपुनःसत्वशुद्धिद्वारापरोक्षज्ञानोत्पत्तिहेतुभिःकर्मभिस्तस्यबंधशंकेत्यर्थः।तदुक्तम्।ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः।लिप्यतेनसपापेनेति॥ १७ ॥ हत्वापिनहंतिननिबद्ध्यतइत्येतदेवोपपादयितुंकर्मचोदनायाःकर्माश्रयस्यच

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स इमाँल्लोकान्न हंति न निबध्यते ॥१७॥
ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८॥

कर्मफलादीनांचत्रिगुणात्मकत्वान्निर्गुणस्यात्मनस्तत्संबंधोनास्तीत्यभिप्रायेणकर्मचोदनांकर्माश्रयंचाह । ज्ञानमिति । ज्ञानमिष्टसाधनमेतदितिबोधः ज्ञेयमिष्टसाधनंकर्म परिज्ञाताएवंभूतज्ञानाश्रयः एवंत्रिविधाकर्मचोदना चोद्यतेप्रवर्त्यतेऽनयेतिचोदना ज्ञानादित्रितयंकर्मप्रवृत्तिहेतुरित्यर्थः । यद्वा चोदनेतिविधिरुच्यते । तदुक्तंभट्टैः चोदनाचोपदेशश्चविधिश्चैकार्थवाचिनइति।ततश्चायमर्थः उक्तलक्षणंत्रिगुणात्मकंज्ञानादित्रयमवलंब्यकर्मविधिःप्रवर्ततइति । तदुक्तम् त्रैगुण्यविषयावेदाइति।तथाचकरणंसाधकतमम् कर्मचकर्तुरीप्सिततमम् कर्ताक्रियांनिर्वर्तकः कर्मसंगृह्यतेऽस्मिन्नितिकर्मसंग्रहः करणादित्रिविधंकारकंक्रियाश्रय।इत्यर्थः । संप्रदानादिकारकत्रयंतुपरंपरयाक्रियानि

वेर्तकमेवकेवलंनतुसाक्षात्क्रियायाआश्रयः अतःकरणादित्रितयमेवक्रियाश्रयइत्युक्तम्॥१८॥ ततःकिमतआह । ज्ञानमिति । गुणाःसम्यक्कार्यभेदेनख्यायंतेप्रतिपाद्यंतेऽस्मिन्नितिगुणसंख्यानंसांख्यशास्त्रं तस्मिन् ज्ञानंचकर्मचकर्ताच प्रत्येकंसत्वादिगुणभेदेनत्रिधैवोच्यते तान्यपिज्ञानादीनिवक्ष्यमाणानियथावच्छृणु त्रिधैवेत्येवकारोगुणत्रयोपाधिव्यतिरेकेणात्मनःस्वतःकर्तृत्वादिप्रतिषेधार्थः । चतुर्दशेऽध्याये तत्रसत्वंनिर्मलत्वादित्यादिनागुणानांबंधकत्वप्रकारोनिरूपितः । सप्तदशेऽध्याये यजंतेसात्विकादेवानित्यादिनागुणकृतात्रिविधस्वभावनिरूपणेनरजस्तमःस्वभावंपरित्यज्यसात्विकाहारादिसेवयासात्विकस्वभावःसंपादनीयइत्युक्तम् । इहतु क्रियाकारकफलादीनामात्मसंबं

ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः ॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥
सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥ २० ॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

धोनास्तीतिदर्शयितुंसर्वेषांत्रिगुणात्मकत्वमुच्यतइतिविशेषोज्ञातव्यः ॥ १९ ॥ तत्रज्ञानस्यसात्विकादित्रैविध्यमाह । सर्वभूतोष्विति । त्रिभिःसर्वेषुभूतेषुब्रह्मादिस्थावरांतेषुविभक्तेषुपरस्परंव्यावृत्तेषुअविभक्तमनुस्यूतमेकमव्ययंनिर्विकारंभावंपरमात्मतत्त्वंयेनज्ञानेनेक्षते आलोचयति तज्ज्ञानंसात्विकंविद्धि ॥ २० ॥ राजसंज्ञानमाह।पृथक्त्वेनेति पृथक्त्वेनतुयज्ज्ञानम् इत्यस्यैवविवरणं सर्वेषुभूतेषुदेहेषुनानाभावान्वस्तुतएवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखीत्यादिरूपेणविलक्षणान्येनज्ञानेनवेत्तितज्ज्ञानंराजसंविद्धि ॥ २१ ॥

तामसंज्ञानमाह।यत्त्विति एकस्मिन्कार्यैदेहे प्रतिमादौवा कृत्स्नवत्परिपूर्णवत्सक्तमेतावानेवात्माईश्वरोवेत्यभिनिवेशयुक्तम् । अहेतुकंनिरुपपत्तिकम् अतत्त्वार्थवत् परमार्थावलंबनशून्यम् अतएवाल्पंतुच्छम् अल्पविषयत्वादल्पफलत्वाच्च यदेवंभूतंज्ञानंतत्तामससमुदाहृतम् ॥ २२ ॥ इदानींत्रिविधंकर्माह।नियतमितित्रिभिः।नियतंनित्यतयाविहितम् संगरहितमभिनिवेशशून्यम् अरागद्वेषतः पुत्रादिप्रीत्यावाशत्रुद्वेषेणवा यत्कृतंनभवति फलंप्राप्तुमिच्छतीतिफलप्रेप्सुस्तद्विलक्षणेनानिष्कामेणकर्त्रायत्कृतंकर्मतत्सात्विकमुच्यते ॥२३॥रांजसंकर्माह।य

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ॥ अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२ ॥
नियतं संगरहितमरागद्वेषतः कृतम् ॥ अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥ २३ ॥
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ॥ क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥ २४ ॥
अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरुषम् ॥ मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५ ॥

त्त्विति।यत्तुकर्म कामेप्सुनाफलंप्राप्तुमिच्छता साहंकारेणवा मत्समःकोऽन्यःश्रोत्रियोऽस्तीत्येवंनिरुढाहंकारयुक्तेनचक्रियते यच्चपुनर्वहुलायासमतिक्लेशयुक्तम् तत्कर्मराजसमुदाहृतम् ॥२४॥ तामसंकर्माह अनुवंधमिति अनुवध्यतेइत्यनुवंधःपश्चाद्भाविशुभाशुभम् क्षयंवित्तव्ययम् हिंसांपरपीडांच पौरुषंस्वसामर्थ्यंवा अनवेक्ष्यअपर्यालोच्य केवलंमोहादेवयत्कर्मारभ्यतेतत्तामससमुच्यते ॥ २५ ॥

कर्त्तारंत्रिविधमाह । मुक्तसंगइतित्रिभिः।मुक्तसंगस्त्यक्ताभिनिवेशः अनहंवादी गर्वोक्तिरहितः धृतिर्धैर्यम् उत्साहउद्यमः ताभ्यांसमन्वितो युक्तःआरब्धस्यकर्मणःसिद्धावसिद्धौचनिर्विकारोहर्षविषादशून्यः एवंभूतःकर्तासात्विकउच्यते॥२६॥राजसंकर्तारमाह ।रागीति। रागीपुत्रादिप्रीतिमान्कर्मफलप्रेप्सुःकर्मफलकामी लुब्धःपरस्वाभिलाषी हिंसात्मकोमारकस्वभावः अशुचिर्विहितशौचशून्यः लाभालाभयोर्हर्षशोकाभ्यामन्वितःकर्त्ताराजसः॥२७॥तामसंकर्त्तारमाह।अयुक्तइति।अयुक्तोऽनवहितः प्राकृतोविवेकशून्यःस्तब्धोऽनम्रः शठःशक्तिगूहनकारी

मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः ॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते ॥ २६ ॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ॥ हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥ २७ ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ॥ विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८॥
बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥
प्रवृत्तिं च निवृत्तिंच कार्याकार्ये भयाभये ॥ बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥

नैष्कृतिकःपरावमानी अलसोऽनुद्यमशीलः विषादीशोकशीलः यदद्यवाश्वोवाकार्यंतन्मासेनापिनसंपादयतियःसदीर्घसूत्री एवंभूतःकर्त्ता तामसः कर्तृत्रैविध्येनैवज्ञातुरपित्रैविध्यमुक्तम् कर्मत्रैविध्येनचज्ञेयस्यापित्रैविध्यमुक्तंवेदितव्यम् बुद्धेस्त्रैविध्येनकरणस्याप्युक्तंभविष्यति॥२८॥इदानींबुद्धेर्धृतेश्चापित्रैविध्यंप्रतिजानीते।बुद्धेरिति।स्पष्टार्थः॥२९॥तत्रबुद्धेस्त्रैविध्यमाह।प्रवृत्तिंचेतित्रिभिः।प्रवृत्तिंचधर्मं निवृत्तिंचा

धर्मं यस्मिन्देशेकालेचयत्कार्यमकार्यंच भयाभयेकार्याकार्यनिमित्तावर्थानर्थौ कथंबंधःकथंमोक्षइतियाबुद्धिरंतःकरणंवेत्ति सासात्विकी ययापुमान्वेत्तीतिवक्तव्येकरणेकतृत्वोपचारःकाष्ठानिपचंतीतिवत् ॥३०॥राजसींबुद्धिमाह ययेति अयथावत्संदेहास्पदत्वेनेत्यर्थः स्पष्टमन्यत्॥३१॥तामसींबुद्धिमाह।अधर्ममिति । विपरीतग्राहिणीबुद्धिस्तामसीत्यर्थः बुद्धिरंतःकरणंपूर्वोक्तम् ज्ञानंतुतद्वृत्तिःधृतिरपितद्वृत्तिरेव । यद्वा अंतःकरणस्यधर्मिणोबुद्धिरप्यध्यवसायलक्षणावृत्तिरेव इच्छाद्वेषादीनांतद्वृत्तीनांबहुत्वेऽपिधर्माधर्मभयाभयसाधनत्वेनप्राधा

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अधर्मं धर्ममिति या मन्यते तमसावृता ॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ॥ ३३ ॥ यया तु धर्मं कामार्थान्धृत्या धारयतेऽर्जुन ॥ प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ यया स्वप्नं भयं शोकं विषादं मदमेव च ॥

न्यादेतासांत्रैविध्यमुक्तम् उपलक्षणंचैतदन्यासाम् ॥३२॥ इदानींधृतेस्त्रैविध्यमाह।धृत्येतित्रिभिः।योगेनचित्तैकाग्र्येणहेतुनाव्यभिचारिण्या विषयांतरमधारयंत्यायययाधृत्यामनसःप्राणस्येंद्रियाणांचक्रियाधारयतेनियच्छति साधृतिः सात्विकी ॥३३ ॥ राजासींधृतिमाह।ययात्विति । ययातुधृत्याधर्मार्थकामान्प्राधान्येनधारयते नविमुंचाति तत्प्रसंगेनफलाकांक्षीचभवति साराजसीधृतिः ॥३४॥ तामसींधृतिमाह ।

ययेति।दुष्टाअविवेकबहुलामेधायस्यसःदुर्मेधाः पुरुषः ययाधृत्यास्वप्नादीन्नविमुंचति पुनःपुनरावर्त्तयति स्वप्नोऽत्रनिद्रासाधृतिस्तामसी ॥ ३८ ॥ सुखस्यत्रैविध्यंप्रतिजानीते अर्धेन । सुखमिति । स्पष्टार्थः तत्रसात्विकंसुखमाह । अभ्यासादितिसार्द्धेन । यत्रयस्मिन्सुखे अभ्यासादतिपरिचयाद्रमते नतुविषयसुखइवसहसारतिंप्राप्नोति यस्मिन्रममाणश्चदुःखस्यांतमवसानंनितरांगच्छति प्राप्नोति ॥ ३६ ॥ कीदृशंतत् यत्तदिति।यत्तत्किमपि।अग्रेप्रथमंविषमिवमनःसंयमाधीनत्वाद्दुःखावहमिवभवति परिणामेत्वमृतसदृशम् आत्मविषयाबुद्धिरा

न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ॥ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ॥ ३६ ॥ यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ॥ तत्सुखंसात्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ॥ परिणामे विषमिव तत्सुखं राजसं स्मृतम्॥३८॥यदग्रे चानुबंधे च सुखं मोहनमात्मनः॥निद्रालस्यप्रमादोत्थं तत्तामससमुदाहृतम्॥३९॥

त्मबुद्धिस्तस्याःप्रसादेनरजस्तमोमलत्यागेनस्वच्छतयावस्थानंततोजातंयत्सुखंतत्सात्विकंप्रोक्तं योगिभिः॥३७॥राजसंसुखमाह।विषयेंद्रियेति।विषयाणामिंद्रियाणांचसंयोगाद्यत्तत्प्रसिद्धंस्त्रीसंगादिसुखम् अमृतमुपमायस्यतादृशंभवत्यग्रेप्रथमम्।परिणामेतुविषतुल्यम् इहामुत्रचदुःखहेतुत्वात् तत्सुखंराजसंस्मृतम् ॥३८॥ तामसंसुखमाह।यदिति ।अग्रेप्रथमक्षणे अनुबंधेचपश्चादपि यत्सुखमात्मनोमोहकरम् तदेवाह निद्राचालस्यंचप्रमादश्चकर्त्तव्यार्थावधानराहित्येनमनोराज्यमेतेभ्यउत्तिष्ठतियत्सुखंतत्तामससमुदाहृतम् ॥ ३९ ॥

अनुक्तमपिसंगृह्णन्प्रकरणार्थमुपसंहरति।नतदस्तीति।एभिःप्रकृतिसंभवैः सत्वादिभिर्गुणैर्मुक्तंहीनंसत्वंप्राणिजातमन्यद्वायत्स्यात्तत्पृथिव्यां मनुष्यलोकादिषुदिविदेवेषुचक्वापिनास्तीत्यर्थः ॥ ४० ॥ ननुचयद्येवंसर्वमपिक्रियाकारकफलादिकंप्राणिजातंचत्रिगुणात्मकमेव कथंतर्हिअस्यमोक्षइत्यपेक्षायाम् स्वस्वाधिकारविहितैःकर्मभिःपरमेश्वराराधनात्तत्प्रसादलब्धज्ञानेनेत्येवंसर्वगीतार्थसारंसंगृह्यप्रदर्शयितुंप्रकरणांतरमारभतेब्राह्मणेत्यादियावदध्यायसमाप्ति।हेपरंतपशत्रुतापन । ब्राह्मणानांक्षत्रियाणांविशांचशूद्राणांचकर्माणिप्रविभक्तानिप्रकर्षेणविभागतोविहितानि शूद्राणांस्वभावात्पृथक्करणंद्विजत्वाभावेनवैलक्षण्यात्।विभागोपलक्षणमाह।स्वभावःसात्विकादिःप्रभवतिप्रादुर्भवतियेभ्यस्तै

नतदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः॥ सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥
ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ॥ कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥
शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् ॥ ४२ ॥

र्गुणैरुपलक्षणभूतैः।यद्वा स्वभावःपूर्वजन्मसंस्कारस्तस्मात्प्रादुर्भूतैरित्यर्थः तत्रसत्वप्रधानाब्राह्मणाः सत्वोपसर्जनरजःप्रधानाःक्षत्रियाः तमउपसर्जनरजःप्रधानावैश्याः रजउपसर्जनतमःप्रधानाःशूद्राः ॥४१॥ तत्रब्राह्मणस्यस्वाभाविकानिकर्माण्याह।शमइति।शमश्चितोपरमः दमोवाह्येंद्रियोपरमः तपःपूर्वोक्तंशारीरादि शौचंबाह्याभ्यंतरम् क्षांतिःक्षमा आर्जवमवक्रता ज्ञानंशास्त्रीयम् विज्ञानमनुभवःआस्तिक्यमस्तिपरलोकइतिनिश्चयः एतच्छमादिब्राह्मणस्यस्वभावाज्जातंकर्म ॥ ४२ ॥

क्षत्रियस्यस्वाभाविकानिकर्माण्याह।शौर्यमिति।शौर्यपराक्रमः तेजःप्रागल्भ्यम् धृतिर्धैर्यम् दाक्ष्यंकौशलम् युद्धेचाप्यपलायनम् पराङ्मुखतादानमौदार्यम् ईश्वरभावोनियमनशक्तिः एतत्क्षात्रियस्यस्वभावजंकर्म॥४३॥वैश्यशूद्रयोःकर्माह।कृषीति । कृषिःकर्षणम् गारक्षतीतिगोरक्षस्तस्यभावोगोरक्ष्यम् पाशुपाल्यमित्यर्थः वाणिज्यंक्रयविक्रयादि एतद्वैश्यस्यस्वभावजंकर्म त्रैवर्णिकपरिचर्यात्मकंशूद्रस्यापिस्वभावजंकर्म ॥ ४४ ॥ एवंभूतस्यब्राह्मणादिकर्मणोज्ञानहेतुत्वमाह । स्वेस्वइति।स्वस्वाधिकारविहितेकर्मणिअभिरतः परिनिष्ठितोनरःसंसिद्धिं

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ॥ दानमीश्वरभावश्च क्षात्रं कर्मस्वभावजम्॥ ४३ ॥
कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्॥परिचर्यात्मकं कर्म शूद्रस्यापिस्वभावजम्॥४४॥
स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु॥ ४५ ॥
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः॥ ४६ ॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ ४७ ॥

ज्ञानयोग्यतांलभते कर्मणांज्ञानप्राप्तिप्रकारमाह । स्वकर्मेतिसार्द्धेन । स्वकर्मपरिनिष्ठितोयथायेनप्रकारेणतत्त्वज्ञानंलभते तंप्रकारंशृणु ॥ ४५ ॥ तमेवाह । यतइति । यतोऽतर्यामिणःपरमेश्वराद्भूतानांप्राणिनांप्रवृत्तिश्चेष्टाभवति येनात्मनासर्वमिदंविश्वंततंव्याप्तंतमीश्वरंस्वकर्मणाभ्यर्च्यपूजयित्वासिद्धिंलभतेमनुष्यः ॥४६ ॥ स्वकर्मणेतिविशेषणस्यफलमाह । श्रेयानिति।विगुणोऽपिस्वधर्मःसम्यगनुष्ठितादपिपर

धर्माच्छ्रेष्ठः नचवंधुवधादियुक्ताद्युद्धादेः स्वधर्माद्भिक्षाटनादिपरधर्मःश्रेष्ठइतिमन्तव्यम् यतःस्वभावेनपूर्वोक्तेनानियतंनियमेनोक्तंकर्मकुर्वन्किल्विषंनाप्नोति ॥ ४७॥ यदिपुनःसांख्यदृष्ट्यास्वधर्मेहिंसालक्षणंदोषंमत्वापरधर्मंश्रेष्ठंमन्यसे तर्हि सदोषत्वंपरधर्मेऽपितुल्यमित्याशयेनाह।सहजमिति । सहजंस्वभावविहितंकर्मसदोषमपिनत्यजेत् हियस्मात् सर्वेऽप्यारंभादृष्टादृष्टार्थानिसर्वाण्यपिकर्माणिदोषेणकेनचिदावृताव्याप्ताएव यथासहजेनधूमेनाग्निरावृतस्तद्वत् अतोयथाग्नेर्धूमरूपंदोषमपाकृत्यप्रतापएवतमःशीतादिनिवृत्तयेसेव्यते तथाकर्मणोऽपिदोषांशंविहायगुणांशएवसत्त्वशुद्धयेसेव्यतइत्यर्थः ॥४८॥ननुकथंकर्मणिक्रियमाणेदोषांशप्रहाणेनगुणांशएवसंपत्स्यतइत्यपेक्षायामाह।

सहजं कर्म कौंतेय सदोषमपि न त्यजेत् ॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥
असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ॥ नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥४९॥

असक्तेति।असक्तासंगशून्याबुद्धिर्यस्य जितात्मानिरहंकारः विगतास्पृहाफलविषयेच्छायस्मात्सएवंभूतेन।सत्यागः सात्विकोमतइत्येवंपूर्वोक्तेनकर्मासक्तितत्फलयोस्त्यागलक्षणेनसंन्यासेननैष्कर्म्यसिद्धिंसर्वकर्मनिवृत्तिलक्षणांसत्त्वशुद्धिमधिगच्छति । यद्यपिसंगफलयोस्त्यागेनकर्मानुष्ठानमपिनैष्कर्म्यमेव।कर्तृत्वाभिनिवेशाभावात् । तदुक्तम् नैवकिंचित्करोमीतियुक्तोमन्येततत्त्वविदित्यादिश्लोकचतुष्टयेन तथाप्यनेनोक्तलक्षणेनसंन्यासेनपरमांनैष्कर्म्यसिद्धिम् सर्वकर्माणिमनसासंन्यस्यास्तेसुखंवशीत्येवंलक्षणांपारमहंस्यचर्यांप्राप्नोति ॥ ४९ ॥

एवंभूतस्यपरमहंसस्यज्ञाननिष्ठयाब्रह्मभावप्रकारमाह । सिद्धिंप्राप्तइतिषड्भिः । नैष्कर्म्यसिद्धिंप्राप्तःसन्यथायेनप्रकारेणब्रह्मप्राप्नोतितथातत्प्रकारंसंक्षेपेणैवममेवचनान्निबोध ॥५०॥तदेवाह।बुद्ध्येति।उक्तेनप्रकारेणांविशुद्धयापूर्वोक्तयासात्विकबुद्ध्यायुक्तः धृत्यासात्विक्या आत्मानं कार्यकारणसंघातंतामेवबुद्धिंनियम्यनिश्चलांकृत्वाशब्दादीन्विषयांस्त्यक्त्वातद्विषयौरागद्वेषौचव्युदस्य बुद्ध्याविशुद्धयायुक्तइत्यादीनां ब्रह्मभूयायकल्पतइतितृतीयेनान्वयः॥५१॥किंच विविक्तेति।विविक्तसेवीशुद्धदेशावस्थायी लघ्वाशी मितभोजी एतैरुपायैर्यतवाक्कायमानसः संयतवाग्देहचित्तोभूत्वानित्यंसर्वदाध्यानेनयोयोगोब्रह्मसंस्पर्शस्तत्परःसन् । ध्यानाविच्छेदार्थंपुनःपुनर्दृढंवैराग्यंसम्यगुपाश्रितोभूत्वा ॥ ५२ ॥ किंच अहंकारमिति।ततश्चविरक्तोऽहमित्याद्यहंकारम् बलंदुराग्रहम् दर्पंयोगबलादुन्मार्गप्रवृतिलक्षणम् प्रारब्धवशात्प्राप्यमाणेष्वपिविषयेषुकामंक्रोधंपरिग्रहंचविमुच्याविशेषेणत्यक्त्वा बलादापन्नेषुनिर्ममः सन् शांतःपरामुपशांतिंप्राप्तोब्रह्मभूयायब्रह्माहमितिनैश्चल्येनावस्थानायकल्पतेयोग्योभवाति ॥ ५३ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ॥ समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥ बुद्ध्या
विशुद्धया युक्तो धृत्यात्मानं नियम्य च ॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥
अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

ब्रह्माहमित्येवनैश्चल्येनावस्थानस्यफलमाह।ब्रह्मभूतइति । ब्रह्मभूतोब्रह्मण्यवस्थितः प्रसन्नचित्तो नष्टंनशोचति नचाप्राप्तंकांक्षति देहाद्यभिमानाभावात् अतएवसर्वेष्वपिभूतेषुसमःसन् रागद्वेषादिकृतविक्षेपाभावात् । सर्वभूतेषुमद्भावनालक्षणांपरांमद्भक्तिंलभते॥५४॥ततश्चभक्त्यामामिति । तयाचपरयाभक्त्यातत्त्वतोमामाभिजानाति।कथंभूतम् यावान्सर्वव्यापीयश्चास्मिसच्चिदानंदघनस्तथाभूतम् ततश्चमामेवं तत्त्वतोज्ञात्वातदनंतरंतस्यज्ञानस्याप्युपरमेसति मांविशते परमानंदरूपोभवतीत्यर्थः॥५५॥स्वकर्मभिः परमेश्वराराधनादुक्तंमोक्षप्रकारमुपसंहरति । सर्वकर्माणीति । सर्वकर्माणिनित्यनैमित्तिकानिचकर्माणिपूर्वोक्तक्रमेणसर्वदाकुर्वाणःसन् मद्व्यपाश्रयः अहमेवव्यपाश्रयआश्रयणीयोनतुस्वर्गादिफलंयस्यसः ममप्रसादाच्छाश्वतमनादि अव्ययंनित्यंसर्वोत्कृष्टंपदंप्राप्नोति ॥५६॥यस्मादेवंतस्मात् चेतसेति सर्वकर्माणिचेतसामयिसंन्यस्यसमर्प्य । मत्परःअहमेवपरःप्राप्यःपुरुषार्थोयस्यसः व्यवसायात्मिकयाबुद्ध्यायोगमाश्रित्यसततंकर्मानुष्ठानकालेऽपिब्रह्मार्पणंब्रह्महविरितिन्यायेनमय्येवचित्तंयस्यसः तथाभूतोभव ॥ ५७ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति॥समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥५४॥ भक्त्या
मामभिजानाति यावान्यश्चास्मि तत्त्वतः॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम्॥ ५५ ॥
सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः॥ मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥ ५६ ॥
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥ ५७ ॥

ततोयद्भविष्यतितच्छृणु । मच्चित्तइति । मच्चित्तःसन्मत्प्रसादात्सर्वाण्यपिदुर्गाणिदुस्तराणिसांसारिकाणिदुःखानितरिष्यसि।विपक्षेदोषमा
ह।अथचेद्यदि।पुनस्त्वमहंकाराज्ज्ञातृत्वाभिमानान्मदुक्तमेतन्नश्रोष्यसि तर्हिविनंक्ष्यसि पुरुषार्थाद्भ्रंश्यसि॥५८॥कामंविनक्ष्यामि नतुबंधु
भिर्युद्धंकरिष्यामीतिचेत्तत्राह यदिति मदुक्तमनादृत्यकेवलमहंकारमवलंब्ययुद्धंनकरिष्यामीतित्वंयन्मन्यसेअध्यवस्यासिएषतेव्यवसायो
मिथ्यैव अस्वतंत्रत्वात्तव।तदेवाह प्रकृतिस्त्वांरजोगुणरूपेणपरिणतासतीनियोक्ष्यति युद्धेप्रवर्त्तविष्यत्येव॥५९॥किंच स्वभावेति । स्वभा

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ॥ अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे॥मिथ्यैषव्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥
स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा॥कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥६०॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ ६१ ॥

वःक्षत्रियत्वेहेतुः पूर्वकर्मसंस्कारस्तस्माज्जातेनस्वकीयेनकर्मणाशौर्यादिनापूर्वोक्तेननिबद्धोयंत्रितस्त्वंमोहाद्यत्कर्मयुद्धलक्षणंकर्त्तुंनेच्छसि
अवशोऽपितत्कर्मकरिष्यस्येव॥६०॥तदेवंश्लोकद्वयेनसांख्यादिमतेनप्रकृतिपारतंत्र्यंस्वभावपारतंत्र्यंकर्मपारतंत्र्यंचोक्तम्।इदानींस्वमतमा
ह । ईश्वरइतिद्वाभ्याम्।सर्वभूतानांहृदयमध्येईश्वरोंऽतर्यामीतिष्ठति किंकुर्वन् सर्वाणिभूतानिमाययानिजशक्त्याभ्रामयन्तत्तत्कर्मसुप्रवर्त्तय
न्यथादारुयंत्रमारूढानिकृत्रिमाणिभूतानिसूत्रधारोलोकेभ्रामयतितद्वत् । यद्वा यंत्राणिशरीराणि आरूढानिभूतानिदेहाभिमानिनोजीवान्

भ्रामयन्नित्यर्थः।तथाच श्वेताश्वतराणाम्मन्त्रः एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतान्तरात्मा॥कर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेति ॥ अंतर्यामिब्राह्मणंच यआत्मनितिष्ठन्नात्मानमंतरोयमयति यमात्मानंवेद यस्यात्माशरीरम् एषतेंऽतर्याम्यमृतइत्यादि ॥६१॥ तमिति। यस्मादेवंसर्वेजीवाःपरमेश्वरपरतंत्रास्तस्मादहंकारंपरित्यज्य सर्वभावेनसर्वात्मनातमीश्वरमेवशरणंगच्छ ततस्तस्यैवप्रसादात्परमामुपशांतिंस्थानंचपारमेश्वरंशाश्वतंनित्यंप्राप्स्यसि ॥६२॥सर्वगीतार्थमुपसंहरन्नाह।इतीति।इतिअनेनप्रकारेणतेतुभ्यं सर्वज्ञेनपरमकारुणिकेनमया ज्ञानमाख्यातमुपादिष्टम् कथंभूतम् गुह्यात् गोप्याद्रहस्यमंत्रयोगादिज्ञानादपिगुह्यतरम् एतन्मयोपदिष्टंगीताशास्त्रमशेष

तमेव शरणं गच्छ सर्वभावेन भारत ॥तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥
इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३ ॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥ इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्॥ ६४ ॥

तोविमृश्यपर्यालोच्यपश्चाद्यथेच्छसितथाकुरु एतस्मिन्पर्यालोचितेसतितवमोहोनिवर्तिष्यतइतिभावः ॥ ६३ ॥ अतिगंभीरंगीताशास्त्रमशेषतःपर्यालोचयितुमशक्नुवतःकृपयास्वयमेवतस्यसारंसंगृह्यकथयति।सर्वगुह्यतममितित्रिभिः । सर्वेभ्योऽपिगुह्येभ्योगुह्यतमंमेवचःतत्र तत्रोक्तमपिभूयःपुनरपिवक्ष्यमाणंशृणु । पुनःपुनःकथनेहेतुमाह । दृढमत्यंतंमेममत्वमिष्टःप्रियोऽसीतिमत्वा ततएवहेतोस्तेहितंवक्ष्यामि । यद्वात्वंममेष्टोऽसि मयावक्ष्यमाणंचदृढंसर्वप्रमाणोपेतमितिनिश्चित्यततस्तेवक्ष्यामीत्यर्थः । दृढमतिरितिकेचित्पठंति ॥ ६४ ॥

तदेवाह।मन्मनाइति।मन्मनाभव मच्चित्तोभव ममैवभक्तोभव मद्यजनशीलोभव मामेवनमस्कुरु एवंवर्त्तमानस्त्वंमत्प्रसादाल्लब्धज्ञानेनमामेवैष्यासि प्राप्स्यासि अत्रचसंशयंमाकार्षीः त्वंहिमेप्रियोऽसि अतःसत्यंयथाभवत्येवंतुभ्यमहंप्रतिजाने प्रतिज्ञांकरोमि॥६५॥ततोऽपिगुह्यतममाह सर्वेति मद्भक्त्यैवसर्वंभविष्यतीतिदृढविश्वासेनविधिकैंकर्यंत्यक्त्वामदेकशरणोभव एवंवर्त्तमानःकर्मत्यागनिमित्तंपापंस्यादितिमाशुचःशोकंमाकार्षीःयतस्त्वांमदेकशरणंसर्वपापेभ्योऽहंमोचयिष्यामि ॥६६॥एवंगीतार्थंतत्त्वमुपदिश्यतत्संप्रदायप्रवर्त्तनेनियममाह।इदमिति

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ ६५ ॥ सर्वधर्मांन्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ ६६॥ इदं ते नातपस्काय नाभक्ताय कदाचन॥नचाशुश्रूषवे वाच्यं नच मां योऽभ्यसूयति॥ ६७ ॥ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥६८ ॥ नच तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

इदंगीतार्थंतत्त्वंतेत्वयाऽतपस्कायस्वधर्मानुष्ठानहीनायनवाच्यम्।नचाभक्तायगुरौईश्वेरचभक्तिशून्याय कदाचिदपिनवाच्यं नचाशुश्रुषवेपरिचर्यामकुर्वतेंनवाच्यंमांपरमेश्वरंयोऽभ्यसूयतिमनुष्यदृष्ट्यादोषारोपेणनिन्दतितस्मैनवाच्यम् ॥ ६७॥ एतैर्दोषैर्विरहितेभ्योगीताशास्त्रोपदेष्टुःफलमाह।यइति।मद्भक्तेष्वभिधास्यतिमद्भक्तेभ्योयोवक्ष्यातिसमयिपरांभक्तिंकरोतिततोनिःसंशयःसन्मामेवप्राप्नोतीत्यर्थः॥६८॥किंच

नचेति तस्मान्मद्भक्तेभ्योगीताशास्त्रव्याख्यातुः सकाशादन्योमनुष्येषुमध्येकश्चिदपिममप्रियकृत्तमोऽत्यंतंपरितोषकर्त्तानास्ति नचकालान्तरेभविताभविष्यति ममापितस्मादन्यः प्रियतरोऽधुनाभुवितावन्नास्ति नचकालांतरेऽपिभविष्यतीत्यर्थः॥ ६९ ॥ पठतःफलमाह । अध्येष्यतइति।आवयोःकृष्णार्जुनयोःइमंधर्म्यंधर्मादनपेतंसंवादंयोऽध्येष्यतेजपरूपेणपठिष्यति तेनपुंसासर्वयज्ञेभ्यः श्रेष्ठेनज्ञानयज्ञेनाहमिष्टःस्यांभवेयमितिमतिः यदप्यसौगीतार्थमबुद्ध्यमानएवकेवलंजपति तथापिममतच्छृण्वतोमामेवासौप्रकाशयतीति बुद्धिर्भवति यथालोकेयदृच्छयाऽपिकश्चित्कदाचित्कस्यचिन्नामगृह्णाति तदासौमामेवायमाह्वयतीतिमत्वातत्पार्श्वमागच्छति यथाहमपितस्यसन्निहितोभवेयं

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७० ॥
श्रद्धावाननसूयश्च शृणुयादपि यो नरः ॥ सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥७१॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ॥ कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनंजय॥७२॥

अतएवअजामिलक्षत्रबंधुप्रमुखानांकथंचिन्नामोच्चारणमात्रेणप्रसन्नोऽस्मि तथैवास्यापिप्रसन्नोभवेयमित्यर्थः॥७०॥अन्यस्यजपतोयोऽन्यःकश्चिच्छृणोतितस्यापिफलमाह श्रद्धावानिति योनरःश्रद्धायुक्तःकेवलंशृणुयादपिश्रद्धावानपि कश्चित्किमर्थमुच्चैर्जपतिअबद्धंजपतीतिवादोषदृष्टिंकरोति तद्व्यावृत्त्यर्थमाह अनसूयश्च असूयारहितोयःशृणुयात् सोऽपिसर्वैःपापैर्मुक्तः सन् अश्वमेधादिपुण्यकृताँल्लोकान्प्राप्नुयात् ७१सम्यग्बोधानुत्पत्तौपुनरुपदेक्ष्यामीत्याशयेनाह।कच्चिदिति।कच्चिदितिप्रश्नार्थःअज्ञानसंमोहःतत्त्वाज्ञानकृतोविपर्ययः स्पष्टमन्यत्७२॥

कृतार्थःसन्नर्जुनउवाच।नष्टइति।आत्मविषयोमोहोनष्टः यतोऽयमहमस्मीतिस्वरूपानुसंधानरूपास्मृतिस्त्वत्प्रसादान्मयालब्धा अतःस्थितोऽस्मि युद्धायोत्थितोऽस्मि गतोधर्मविषयःसंदेहोयस्यसोऽहंतवाज्ञांकरिष्यइति ॥ ७३ ॥ तदेवंधृतराष्ट्रंप्रति श्रीकृष्णार्जुनसंवादंकथयित्वा प्रस्तुतांकथामनुसंधानःसंजयउवाच।इतीति रोमहर्षणंरोमांचकरं संवादमश्रौषंश्रुतवानहं स्पष्टमन्यत् ॥ ७४ ॥ आत्मनस्तच्छ्रवणेसंभावनामाह।व्यासप्रसादादिति।भगवताव्यासेनदिव्यंचक्षुःश्रोत्रादिमह्यंदत्तम् अतोव्यासस्यप्रसादादेतदहंश्रुतवानस्मि किंतदतआह परंयोगम्।परत्वमाविष्करोति योगेश्वराच्छ्रीकृष्णात्स्वयमेवसाक्षात्कथयतःश्रुतवानिति ॥ ७५ ॥ किंच राजन्निति हृष्यामिरोमांचितो भवामि हर्षंप्राप्नोमीतिवास्पष्टमन्यत् ॥ ७६ ॥ किंच तच्चेति विश्वरूपंनिर्दिशति स्पष्टमन्यत् ॥ ७७ ॥

अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ॥ स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥ संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥ व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥ राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ॥ केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ॥ विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥ ७७ ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाऽष्टादशोऽध्यायः॥१८॥

अतस्त्वंपुत्राणांराज्यादिशंकांपरित्यजेत्याशयेनाह।यत्रेति । यत्रयेषांपांडवानांपक्षेयोगेश्वरः श्रीकृष्णोवर्तते यत्रचपार्थोगांडीवधनुर्धरः तत्रैवश्रीराज्यलक्ष्मीः तत्रैवविजयः तत्रैवचभूतिरुत्तरोत्तराभिवृद्धिश्च तत्रैवनीतिः नयोऽपि ध्रुवानिश्चितेतिसर्वत्रसंबध्यते इतिममर्मातिर्निश्चयः अतइदानीमपितावत्सपुत्रस्त्वं श्रीकृष्णंशरणमुपेत्यपांडवान्प्रसाद्यसर्वस्वंचतेभ्योनिवेद्यपुत्रप्राणरक्षणंकुर्वितिभावः ॥ ७८ ॥ भगवद्भक्तियुक्तस्यतत्प्रसादात्मबोधतः । सुखंबंधविमुक्तिःस्यादितिगीतार्थसंग्रहः ॥१॥ तथाहि।पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया भक्त्या त्वनन्ययाशक्यअहमेवंविधोऽर्जुनेत्यादौभगवद्भक्तेर्मोक्षंप्रतिसाधकतमत्वश्रवणात् तदेकांतभक्तिरेवतत्प्रसादोत्थज्ञानावांतरव्यापारमात्रयुक्तामोक्षहेतुरितितेस्फुटंप्रतीयते ज्ञानस्यभक्त्यवांतरव्यापारत्वमेवयुक्तम् तेषांसततयुक्तानांभजतांप्रीतिपूर्वकम् ददामिबुद्धियोगंतं येनमामुपयांतिते मद्भक्तएतद्विज्ञायमद्भावायोपपद्यतइत्यादिवचनात् तत्त्वज्ञानमेवभक्तिरित्युक्तम् समःसर्वेषुभूतेषुमद्भक्तिंलभतेपराम्। भक्त्यामामभिजानातियावान्यश्चास्मितत्त्वतइत्यादौभेदेननिर्देशात् नचैवंसतितमेवविदित्वातिमृत्युमेति नान्यःपंथाविद्यतेऽयनायेत्यादिश्रुतिविरोधःशंकनीयः भक्त्यवांतरव्यापारत्वाज्ज्ञानस्य नहिकाष्ठैःपचतीत्युक्तेज्वालानामसाधनत्वमुक्तंभवति किंच यस्यदेवेपराभक्ति

र्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनाम् देहांतेदेवःपरंब्रह्मतारकंव्याचष्टे यमेवैषवृणुतेतेनलभ्यइत्यादि श्रुतिस्मृतिपुराणवचनान्येवंसतिसमंजसानिभवंति तस्माद्भक्तिरेवमोक्षहेतुरितिसिद्धम् तेनैवदत्तयामत्यातद्गीताविवृतिःकृता सएवपरमानंदस्तयाप्रीणातुमाधवः ॥ १ ॥ परमानंदपादाब्जरजःश्रीधारिणाधुना श्रीधरस्वामियतिनाकृतागीतासुबोधिनी॥२॥स्वप्रागल्भ्यबलाद्विलोड्यभगवद्गीतांतदंतर्गतंतत्त्वंप्रेप्सुरुपैतिकिंगुरुकृपापीयूषदृष्टिंविना ॥ अंबुस्वांजलिनानिरस्यजलधेरादित्सुरंतर्मणीनावर्तेषुनकिंनिमज्जतिजनःसत्कर्णधारंविना ॥ ३ ॥ इतिश्रीमन्महाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्वणिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णार्जुनसंवादे योगशास्त्रनिर्णयसंन्यासादितत्त्वनिर्णयेसुबोधिन्यांटीकायांश्रीधरस्वामिकृतौमोक्षयोगोनामाष्टादशोध्यायः ॥ १८ ॥

---

इयं सुबोधिनीटीकासमेता श्रीमद्भगवद्गीता मुंबापुर्यां श्रीकृष्णदासात्मज खेमराजेन स्वकीये
श्रीवेंकटेश्वराख्यमुद्रायंत्रालयेमुद्रिता ॥ ॥ ॥ शकाब्दाः १८१६ ॥ संवत् १९५१ ॥

# अच्युताष्टकम् ।

अच्युतंकेशवंरामनारायणंकृष्णदामोदरंवासुदेवंभजे ॥ श्रीधरंमाधवंगोपिकावल्लभंजानकीनायकंरामचंद्रंहरिम् ॥ १ ॥ अच्युतंकेशवंसत्यभामाधवंमाधवंश्रीधरंराधिकाराधनम् ॥ इंदिरामंदिरंचेतसासुंदरंदेवकीनंदनंनंदजंसंदधे ॥२॥ विष्णवेजिष्णवेशंखिनेचक्रिणेरुक्मिणीरागिणेजानकीजानये ॥ वल्लवीवल्लभायाजितायात्मनेकंसविध्वंसिनेवंशिनेतेनमः ॥ ३ ॥ कृष्णगोविंदहेरामनारायण श्रीपतेवासुदेवार्चित श्रीनिधे ॥ अच्युतानंतहेमाधवाधोक्षजद्वारकानायकद्रौपदीरक्षक ॥ ४ ॥ राक्षसक्षोभितःसीतयाशोभितोदंडकारण्यभुक्पुण्यताकारणम् ॥ लक्ष्मणेनान्वितोवानरैःसेवितोऽगस्तिनापूजितोराघवःपातुमाम् ॥ ५ ॥ धेनुकारिष्टकानिष्टकृद्वेषिणांकेशिहाकंसहृद्वंशिकावादकः ॥ पूतनाशोपकोसूरजाखेलनोबालगोपालकः पातुमांसर्वदा ॥ ६ ॥ वैद्युतद्योतकासंस्फुरद्वाससाप्रावृडंभोदवत्प्रोल्लसद्विग्रहम् ॥ वैजयंतीप्रभाशोभितोरःस्थलं लोहितांघ्रिद्वयंवारिजाक्षंभजे॥ ७ ॥ कुंचितैःकुंतलैर्भ्राजमानाननंरत्नमौलिंलसत्कुंडलंगंडयोः ॥ हारकेयूरिणंकंकणप्रोज्ज्वलंकिंकिणीमंजुलंश्यामलंभावये ॥ ८ ॥ अच्युतस्याष्टकंयःपठेदिष्टदंप्रेमतः प्रत्यहंपूरुषःसस्पृहम् ॥ सर्वतःसुंदरंकर्तृविश्वंभरस्तस्यवश्योहरिर्जायतेसत्वरम् ॥ ९ ॥ इत्यच्युताष्टकस्तोत्रं संपूर्णम् ॥

## पद्मपुराण समग्र सातो खण्ड।

श्रीमद्वेदव्यास प्रणीत ५५,००० हजार ग्रंथ बडी कठिनतासे अनेक राजा महाराजाओंकी पुस्तकोंके द्वारा शास्त्रियों शुद्धकराके स्वच्छतापूर्वक ग्रन्थाकार छापकर तयार किया है मूल्य केवल १८ रु० है।

## पंचदशी भाषाटीका सहित।

महाशयो! वेदान्तका ऐसा कठिन ग्रंथ होनेपरभी ऐसा सुगम भाषार्थ किया गया है जो सबको लाभदायक है सुन्दर जिल्दबँधी है कीमत केवल ४ रु० है॥

## हठयोगप्रदीपिका भाषाटीका सहित।

देखो! हठयोग योगशास्त्र मुमुक्षुओंके लाभार्थ सरल हिन्दी भाषामें भाषानुवाद कराय स्वच्छतापूर्वक छापा है सुन्दर जिल्दबंधी है मूल्य केवल २॥ रु० है।

## पातंजलि-योगदर्शन तथा सांख्यदर्शन भाषानुवाद सहित।

देखो! इसपातंजलि सूत्र मात्रका ऐसा बहुत और रुचिर भाषानुवाद किया गया है कि पढ़ते २ ग्रंथका आशय चित्तमें चुभ जाता है। मूल्य केवल योगदर्शनका १रु० और सांख्यदर्शनका २॥ रु० है॥

पुस्तक मिलनेका ठिकाना—

**खेमराज श्रीकृष्णदास.**

श्रीवेङ्कटेश्वर छापाखाना मुम्बई.

॥ इति श्रीधरकृतटीकासहिता श्रीमद्भगवद्गीता संपूर्णा ॥

४०३१

# ॥ अथशास्त्रसिद्धान्तलेशसङ्ग्रहसारप्रारम्भः ॥

॥ समाचार सुधावर्षण छापेमें छापा हुवा ॥

सि॰ले॰सा॰सं॰ ॥ श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ दुःखिनो यं समाश्रित्य सुखमीयुः सुदुर्लभम्। विभीषणाद्यो रामं तं वन्दे
१ सद्गुरुं पुनः ॥ १ ॥ शास्त्रसिद्धान्तलेशसङ्ग्रहनिवन्धस्थमतानां सुखं स्ववोधाय तत्पाठः क्वाप्यर्थांशस्य सङ्गृह्यते मया ।
यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि। सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता ॥ १ ॥ अकल्पितवस्तुप्रति
पत्त्युपायतया कल्प्यमानेषु पदार्थेषु विरोधो न दोषावहइति वार्त्तिकपरिमलोक्तदिशावक्ष्यमाणानां मतविशेषाणां
सर्वेषां निरवद्यत्वमूह्यम् ॥ अथ विधिवादः ॥ तदर्थस्य तत्त्ववुभुत्सुकथाएव मय्येऽपि । तत्रादावात्मावा अरे द्रष्टव्यः श्रोतव्य-
इत्यधीतसाङ्गवेदस्य वेदान्तैर्ज्जनितसामान्यज्ञानविषये ब्रह्माभिन्नात्मनि सञ्जातविशेषजिज्ञासस्य तज्ज्ञानाय वेदान्तश्र-
वणे प्रतीयमानो विधिः कीदृश इति विचार्य्यते। त्रयो हि विधेः प्रकाराः पूर्व्वमीमांसायां प्रसिद्धाः। अपूर्व्वविधिर्नियमविधिः
परिसंख्याविधिश्चेति । तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिरपूर्व्वविधिः । यथा व्रीहीन्प्रोक्षतीति। तद्वदत्रापि
पाण्डित्यशब्दितश्रवणेऽपूर्व्वविधिरत्यन्ताप्राप्तत्वात् नहि वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरित्यत्रान्वयव्यतिरेकप्रमाण १

मस्ति लोके कृतश्रवणस्यापि बहुशस्तदनुत्पत्तेरिति प्रकटार्थकारादयः सम्भाषन्ते ॥ १ ॥ पक्षे प्राप्तस्याऽप्राप्तांशपरिपूर्णफलको विधिर्नियमविधिः। यथा व्रीहीनवहन्तीति। तद्वदत्रापि वेदान्तश्रवणस्य नित्याऽपरोक्षब्रह्मसाक्षात्कारहेतुत्वं नाऽप्राप्तमपरोक्षवस्तुविषयत्वं ज्ञानस्यापरोक्षत्वं नत्विन्द्रियजन्यत्वमतोऽपरोक्षब्रह्मवस्तुविषयकत्वेनापरोक्षब्रह्मज्ञानजनकवेदान्तवाक्यप्रमाणस्य साक्षात्कारहेतुत्वप्राप्तेस्तथाचनापूर्व्वविधिः किन्तु नियमविधिरेवात्रश्रवणे तद्भावेहि अध्ययनगृहीतैर्वेदान्तैरुपदिष्टं निर्विशेषब्रह्मचैतन्यमाकर्ण्य तदवगमायदृश्यते त्वग्र्यया बुद्ध्येत्यादिश्रवणेन मनसो ब्रह्मसाक्षात्कारकरणत्वशङ्कया वेदान्तश्रवणइव कदाचिद्वेदान्तविचारमुपेत्य मनस ऐकाग्र्यएव वेदान्तश्रवणप्रवृत्तस्य मुमुक्षोः प्रवृत्तिः स्यात्तदा वेदान्तश्रवणे प्रवृत्तिः पाक्षिकी भवेत्तस्मात्तं त्वौपनिषदं पुरुषं पृच्छामीतिश्रुत्यनुरोधाद्वेदान्तविचारएव कर्त्तव्यो यथावहननवाक्यानुरोधेन तुषापकरणार्थमवहननमेव नतु नखविदलनं तद्वदिति ॥ यद्वा गुरुवेदान्तेषु श्रद्धावतः श्रवणाधिकारिणो भिन्नात्मविचाररूपशास्त्रश्रवणगुरुनिरपेक्षस्वप्रयत्नसाध्यवेदान्तविचाराऽद्वैतात्मविचारपरभाषाप्रबन्धवेदान्तमूलेतिहासपुराणप्रबोधचन्द्रोदयप्र

श्रुतिपौरुषेयप्रबन्धविचारयोगमार्गसगुणोपासनतपोविशेषादिष्वपि तत्त्वज्ञानसाधनतां बुद्ध्वा वेदान्तश्रवण इव प्रवृत्तिः स्यादिति तन्निवृत्तिफलको नियमविधिरेव सम्भवति । यथा यज्ञार्थं व्रीहितुषापकरणे प्रवृत्तस्य अद्वातिरेकेण पक्षे प्राप्तमप्यवहननमुपेक्ष्य नखैस्तुषविदलने प्रवृत्तिस्स्यात्तन्निवृत्तिफलकोऽवहननविधिस्तद्वदिति विवरणानुसारिणःकथयन्ति ॥ २ ॥ प्रथमं केवलाच्छब्दात्परोक्षज्ञानं जायते । मनननिदिध्यासनसहकृतात्तस्मादेवापरोक्षज्ञानमितिपूर्व्वमताद्विशेषमभिप्रेत्य नियमविधिरेवश्रवण इति विवरणैकदेशिन आहुः ॥ ३ ॥ निर्विचिकित्सशाब्दपरोक्षज्ञानार्थं श्रवणे नियमविधिर्मनननिदिध्यासनसंस्कृतमन्तःकरणमेवापरोक्षज्ञानसाधनं न तु शब्द इति चान्ये आहुः ॥ ४ ॥ द्रष्टव्य इति फलकीर्त्तनाद्ब्रह्मसाक्षात्कारसाधनमनःसहकारिश्रवणेऽपरोक्षज्ञानार्थत्वेनैवनियमविधिरितिचापरे वदन्ति ॥ ५ ॥ वेदान्ततात्पर्य्यनिर्णयद्वाराऽसम्भावनादिपुरुषापराधनिरासार्थं श्रवणे नियमविधिरिति सङ्क्षेपशारीरकानुसारिण आहुः ॥ ६ ॥ द्वयोः शेषिणोरेकस्य शेषस्यवा एकस्मिन् शेषिणि द्वयोःशेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिः परिसङ्ख्याविधिः ।

यथाइमामगृभ्णन्नसनामृतस्येत्यश्वाभिधानीमादत्त इतिविधिरिमामगृभ्णन्नितिमन्त्रोऽश्वरसनाग्रहण इव गर्दभरसनाग्रहणेऽप्यविशेषात्प्राप्नुयादितितन्निवृत्त्यर्थः । तद्वच्चापिवेदान्तश्रवणे ब्रह्मज्ञानार्थं प्रवृत्तस्यचिकित्साज्ञानार्थं चरकसुश्रुतादिग्रन्थश्रवणप्रवृत्तस्यैवमध्ये व्यापारान्तरेऽपिप्रवृत्तिः स्यादितितन्निवृत्तिफलकः श्रोतव्यइति परिसंख्याविधिः । नियमःपरिसंख्यावा विध्यर्थोऽत्रभवेद्यतः । अनात्मादर्शनेनैव परात्मानमुपास्महे ॥ इति वार्त्तिकानुसारिणः केचित्सङ्गिरन्ति ॥ ७ ॥ आत्मावा अरेश्रोतव्यइति मननादिवदात्मविषयकत्वेन निबध्यमानं श्रवणमात्मोपदेशजज्ञानमेव न तु वेदान्ततात्पर्य्यविचाररूपमनुष्ठेयक्रियात्मकमतो न तत्र कोऽपि विधिः सम्भवति । यदि च श्रवणादिक्रिया तावत्कर्त्तव्येह यत्नत इत्यादि वार्त्तिकोक्तरीत्या वेदान्ततात्पर्य्यविचाररूपं क्रियात्मकं श्रवणं तदा तस्य तात्पर्य्यनिर्णयद्वारा वेदान्ततात्पर्य्यभ्रमसंशयरूपप्रतिबन्धकनिरास एव फलं न प्रतिबन्धकान्तरनिरासो ब्रह्मावगमो वा भ्रमादिनिरासफलकत्वंच तस्य लोकतएव प्राप्तं साधनान्तरं च किञ्चिद्विकल्पेनसमुचित्यवानप्राप्तमिति न तत्र विधित्रयस्याप्यवकाशः । किमर्थं

तर्हि आत्मा वा अरे श्रोतव्य इत्यादीनि वचनानि अध्येतव्य इत्यादिविधितुल्यानीति चेत्स्वाभाविकप्रतिविषयविमुखीकरणार्थानीति ब्रूम इत्याचार्य्यवाचस्पतिपक्षानुसारिणः कथयन्ति ॥ ८॥ * ॥ इति विधिवादः ॥ * ॥ १ ॥ * ॥

अथ द्वितीयाधिकरणविषयवाक्यार्थे कारणत्ववादः ॥ विचार्य्यस्य ब्रह्मणो जगज्जन्मस्थितिलयकारणत्वं लक्षणं यतो वा इत्यादिश्रुत्यैवोक्तमत्र जगज्जन्मस्थितिलयेष्वेकैककारणत्वमप्यनन्यगामित्वाल्लक्षणं सम्भवेदिति चेत्सत्यम्। लक्षणत्रयमेवेदं परस्परनिरपेक्षमिति कौमुदीकार आह ॥ १ ॥ अन्ये तु घटोपादानमृदतिरिक्तकुलालादिवत्तथा पालनीयप्रजाद्युपादानातिरिक्तप्रजास्थेम्नि राजवच्च जगदुत्पत्तौ तत्स्थितौ चोपादानब्रह्मापेक्षयाऽन्यत्कर्तृरूपं नियन्तृतया स्थितिहेतुभूतं च निमित्तं भविष्यतीति तद्व्यवच्छेदेन लूतातन्त्वादिवदभिन्ननिमित्तोपादानत्वरूपमेकमेव लक्षणमिति ब्रह्मणश्चोपादानत्वं परमाणुप्रधानादेरिव नारम्भकत्वपरिणामिकरूपम्। किन्त्वविद्ययाऽऽकाशाद्यात्मना विवर्त्तरूपमिति वदन्ति ॥ २ ॥ ननु ब्रह्मतद्विवर्त्तयोरभेदः सिद्धान्त उपेयते। आरम्भवादे तु आरभ्य

मारम्भकादत्यन्तभिन्नमिति तद्भेदः स्पष्टः। सिद्धान्तइव सांख्यैरपि परिणामपरिणामिनोरभेदाभ्युपगमादतो विवर्त्तपरिणामयोर्भेदः कथमिति चेच्छृणु। उपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वे सति तदवस्थाविशेषत्वं तत्परिणामत्वम् उपादानत्वाभिमतवस्तुसत्ताविषमसत्ताकत्वे सति तदवस्थाविशेषत्वं तद्विवर्त्तत्वमिति सत्तात्रयाङ्गीकारवादिमतानुसारेण तयोर्भेदः। उपादानत्वाभिमतवस्तुसलक्षणत्वे सति तदवस्थाविशेषत्वं तत्परिणामत्वम्। उपादानत्वाभिमतवस्तुविलक्षणत्वे सति तदवस्थाविशेषत्वं तद्विवर्त्तत्वम्। कारणत्वाभिमतवस्त्वभिन्नत्वे सति तत्कार्य्यत्वं तत्परिणामत्वम्। उपादानत्वाभिमतवस्तुनः सकाशाद्वस्तुतो भेदाभेदाभ्यां दुर्निरूपत्वेसति तत्कार्य्यत्वं तद्विवर्त्तत्वमिति तु सत्तैक्यतत्त्वैविध्यवादिनोर्मते साधारण्येनलक्षणं तयोर्भेदज्ञापकमवेहि। ननु भवत्वेवं तथापि शुद्धंब्रह्मोपादानमिष्यते ईश्वररूपं वा जीवरूपं वा। अत्रशुद्धमेवोपादानं जन्मादिसूत्रतद्भाष्ययोरुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेरिति संक्षेपशारीरकानुसारिणः केचिज्जल्पन्ति ॥ २ ॥ यः सर्व्वज्ञइत्यादिश्रुतेर्विम्बत्वविशिष्टब्रह्मरूपमीश्वरएवोपादानं न तु मायासवलमिति विवरणा

नुसारिणः सङ्गिरन्ते ॥ ४ ॥ प्रतिविम्बत्वविशिष्टमायाश्रयेश्वरस्य वियदादिकारणत्वमन्तःकरणादिकं त्वीश्वराश्रितमायापरिणाममहाभूतसंसृष्टजीवाऽविद्याकृतभूतसूक्ष्मकार्य्यमितिजीवस्यापि कारणत्वमिति मायाविद्याभेदवादिनोविदुः ॥ ५ ॥ यथेश्वराश्रितमायाआकाशादिकारणमेवंजीवाश्रिताविद्यैवान्तःकरणाद्युपादानं नतु मायाकार्य्यमहाभूतान्यपीति तदेकदेशिनोवदन्ति ॥ ६ ॥ मायाऽविद्ययोरभेदवादिनोऽपिकेचिदऽविद्याऽभिन्नमायापरिणामवियदाद्युपादानेश्वरवज्जीवोऽपिस्वाध्यस्तान्तःकरणाद्युपादानमित्याहुः ॥ ७ ॥ अन्येतुस्वप्नदर्शिजीवात्मनि स्वरूपानुपमर्द्देनानेकस्वप्नसृष्टिवद्विवर्त्तोपादानेब्रह्मणि वियदादिसृष्टिरुपपद्यत इति ब्रह्मैवोपादानमित्याहुः ॥ ८ ॥ जीवएवस्वप्नद्रष्टृवत्स्वस्मिन्नीश्वरादिसर्व्वस्यकारणमित्यपरेवदन्ति ॥ ९ ॥ ब्रह्मविवर्त्तोपादानंमाया च परिणाम्युपादानं नच विवर्त्ताधिष्ठानेपारिभाषिकमुपादानत्वं कार्य्याधारत्वे सति कार्य्यजनिहेतुत्वमुपादानत्वमिति तल्लक्षणस्यविवर्ताधिष्ठानेऽप्यविशेषादिति पदार्थतत्त्वनिर्णयकारा आभाषन्त इति ॥ १० ॥ उपादानत्वलक्षणेतु विशेषमन्ये वदन्ति नतु प्रक्रियान्तरम् । तथाहि स्वाभिन्नकार्यजनकत्वमुपादानत्वमस्ति च प्रप

च्चस्वस्वरूपेणब्रह्मणाविवर्तमानेनजडेनाज्ञानेनपरिणामिनाचाऽभेदःसन्घटःजडोघटइतिसामानाधिकरण्यानुभवादतएवे
दंतुलक्षणविवर्तपरिणामोभयसाधारणमिति ॥ ११ ॥ संक्षेपशारीरककृतस्तुब्रह्मैवोपादानंकार्य्यानुगतजाड्यनिर्वाहार्थंमाया
तुद्वारकारणमित्याहुः ॥ १२ ॥ वाचस्पतिमिश्रास्तुजीवाश्रितमायाविषयीकृतंब्रह्मस्वतएवजाड्याश्रयप्रपञ्चाकारेणविवर्तमानत
योपादानमितिमायातुसहकारिमात्रंनकार्य्यानुगतंद्वारकारणमित्याहुः ॥ १३ ॥ मायैवमुख्यमुपादानंब्रह्मतुजगदुपादानमा
याधिष्ठानत्वेनोपचारादुपादानमितिसिद्धान्तमुक्तावलीकृतोवदन्ति ॥ १४ ॥ * ॥ इतिकारणवादः ॥ ※ ॥ २ ॥ ※ ॥ अथेश्वर
जीवस्वरूपनिर्णयवादः। अथकईश्वरःकोजीवइतिचेच्चिन्मात्राश्रितमायाप्रतिविम्बईश्वरोमायाप्रदेशरूपानन्ताविद्याप्रतिविम्बो
जीवइतिप्रकटार्थविवरणकारावदन्तिक्रियापदन्तुकर्तृपदोत्तरंयत्रनदृश्यतेतत्रसर्व्वत्राग्रेतदध्याहृत्ययोज्यम् ॥ १ ॥ शुद्धस
त्त्वप्रधानमायाप्रतिविम्बईश्वरोमलिनसत्त्वप्रधानाऽविद्याप्रतिविम्बोजीवइतितत्त्वविवेककाराः ॥ २ ॥ चिन्मात्राश्रितविक्षेप
शक्तिप्रधानमायाप्रतिविम्बईश्वरोमायाऽभिन्नावरणशक्तिप्रधानाऽविद्याप्रतिविम्बोजीवइतिकेचित् ॥ ३ ॥ अविद्याप्रतिविम्ब

ईश्वरअन्तःकरणप्रतिविम्बोजीवइतिसङ्क्षेपशारीरककाराः ॥ ४ ॥ घटावच्छिन्नाकाशाश्रितजलप्रतिविम्बवत्कूटस्थकल्पितान्तः
करणप्रतिविम्बितोजीवोमेघाकाशतुल्योमायाप्रतिविम्बईश्वरइतिपञ्चदशीकाराःएवमेतेप्रतिविम्बेश्वरवादिनां पञ्चभेदाद्दर्शि
ताः ॥ ५ ॥ विम्बचैतन्यमीश्वरअविद्याप्रतिविम्बोजीवइतिविवरणानुसारिणः ॥ ६ ॥ नीरूपस्यप्रतिविम्बायोगाद्गगनादेःप्रति
विम्बोव्यवहारस्यभ्रममात्रमूलकत्वाच्चघटाकाशवदन्तःकरणावच्छिन्नचैतन्यंजीवअविद्यावच्छिन्नमीश्वरइत्यवच्छेदवादिनोवाच
स्पतिमिश्रानुयायिनः ॥ ७ ॥ कौन्तेयस्यैवराधेयत्ववदविकृतस्यब्रह्मणएवाविद्ययाजीवभावोनप्रतिविम्बोनाप्यवच्छेदस्तस्यजी
वस्तथाजीवस्यैवस्वप्नकल्पितदेवतावत्स्वाविद्याकल्पितईश्वरइतिकेचित् ॥ ८ ॥ अवच्छेदपक्षेचकृतहानादिपरिहारार्थमविद्या
वच्छिन्नश्चेतनएकएवजीवअन्तःकरणाभाववच्छिन्नश्चेतनोनवच्छिन्नोवाईश्वरइतिविशेषोऽपिज्ञेयः ॥ * ॥ इतीश्वरजीवस्वरू
पनिर्णयवादः ॥ ※ ॥ ३ ॥ ※ ॥ अथजीवैकत्वनानात्ववादः ॥ अथायंजीवएकउताऽनेकइतिचेदेकएवजीवस्तेनचैकमेवशरीरं
सजीवमन्यानिशरीराणितुस्वप्नदृष्टशरीराणीवनिर्जीवानितदज्ञानकल्पितंसर्व्वजगदितिकेचिद्वदन्ति ॥ १ ॥ एकजीववादिष्वन्ये

तुहिरण्यगर्भएकोब्रह्मप्रतिविम्बोमुख्योजीवअन्येतुतत्प्रतिविम्बभूताश्चित्रितमनुष्यार्पितपटाभासवज्जीवाभासाइतिचाहुः॥ २॥
तेष्वपरेतुअविद्यायांब्रह्मप्रतिविम्बरूपोजीवएकःसएवसर्व्वंशरीरंस्वभोगार्थमधितिष्ठतीतिवदन्ति ॥३ ॥ अनेकजीववादिनस्तु
पूर्व्वमते वन्धमोक्षव्यवस्थाऽभावदर्शनेन स्वमतेतत्सिद्ध्यर्थमन्तःकरणाद्युपाधिकाननेकान्जीवानाहुः ॥४॥ तेषुकेचिदज्ञानस्यैक
त्वप्रयुक्तवन्धमोक्षव्यवस्थाभावं पूर्व्वमतेपश्यन्तस्तत्तदन्तःकरणादिपरिणाम्यज्ञानांशान्वहूनङ्गीकृत्यतत्सिद्ध्यर्थंजीवनानात्वमाहुः
॥ ५ ॥ अन्येत्वज्ञानसत्वेवन्धस्तन्नाशेमोक्षइतिपूर्व्वोक्तमतेऽज्ञाननानात्वरूपदोषंपश्यन्तस्तदेकत्वंस्वीकृत्यापियस्मिन्चैतन्यप्रदे
शेयन्मनःसत्वेनाज्ञानसम्बन्धसत्वमेवतस्यवन्धस्तन्नाशेनाज्ञानसम्बन्धनाशएवमोक्षइतिव्यवस्थायैजीवनानात्वमाहुः ॥ ६ ॥
अपरेतुजीवाश्रयंब्रह्मविषयमेकरूपमप्यज्ञानंयमाश्रयतेव्यक्तिंजातिरिवसजीवोवद्धस्तद्देवयमुत्पन्नविद्यंजहातिसमुक्तइतिजीव
नानात्वमाचक्षते ॥ ७ ॥ अन्येतुपूर्व्वमतेऽज्ञानस्यज्ञाननाश्यत्वप्रतिपादकश्रुतिस्मृतिभाष्यादिविरोधंपश्यन्तोऽविद्यानानात्व
मुररीकृत्याविद्यानुवृत्तिनिवृत्तिभ्यां वन्धमोक्षव्यवस्थार्थं जीवनानात्वमाहुः ॥ ८ ॥ अपरेतुपूर्व्वमतेसर्व्वाऽविद्याऽऽरव्धत्वेन

प्रपञ्चस्यैकाविद्यानाशेननाशापत्तिलक्षणदूषणंपश्यन्तोऽनेकतन्त्वारब्धपटस्यैकतन्तुनाशेनाशवत्तत्साधारणप्रपञ्चस्यनाशस्तदैव विद्यमानतन्त्वन्तरैःपटान्तरस्येवेतराविद्याभिःसकलेतरसाधारणप्रपञ्चान्तरस्योत्पादनमितिवदन्ति ॥ ९॥ इतरेतुतमेवदूषणंपश्यन्तःप्रपञ्चस्यसर्व्वाविद्याकार्य्यत्वेऽपितत्तत्प्रपञ्चस्यप्रतिपुरुषंभेदएवतत्तदज्ञानकृतप्रतिभासिकरजतेयथात्वयायदृष्टंरजतं तदेवमयाऽपिदृष्टमित्यैक्यभ्रमस्तद्वत्प्रपञ्चेऽप्यैक्यप्रत्यभिज्ञातुभ्रमएवेतिवदन्तिजीवबहुत्वञ्चाहुः ॥ १० ॥ परेतुनानाजीवाश्रिताविद्यानिवहाद्भिन्नामायैवेश्वराश्रिताप्रपञ्चकारणमतोनैकाविद्यानाशेसर्व्वप्रपञ्चनाशरूपसर्व्वमुक्तिप्रसङ्गइतिवदन्ति ॥११॥

॥ ※ ॥ इतिजीवैकत्वनानात्ववादः ॥ ※ ॥ ४ ॥ ※ ॥ उपादानत्वनिरूपणंसमाप्तम् ॥ ※ ॥ अथकर्त्तृत्वनिरूपणं ॥ अथकीदृशंकर्त्तृत्वमितिचेत्कार्य्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वंकर्त्तृत्वमितिकेचिदाहुः ॥ १ ॥ कार्य्यानुकूलज्ञानमात्रवत्त्वमितिचापरे ॥ २ ॥ स्रष्टव्यालोचनरूपज्ञानवत्त्वंकर्त्तृत्वमितिचान्ये ॥ ३ ॥ ※ ॥ इतिद्वितीयसूत्रगतकर्त्तृत्ववादः ॥ ※ ॥ ५ ॥ ※ ॥

अथतृतीयसूत्रगतशास्त्रयोनित्वेनेश्वरसर्व्वज्ञत्ववादः ॥ अथब्रह्मणःकथंसर्व्वज्ञत्वंसङ्गच्छतेजीववदन्तःकरणाभावेनज्ञातृत्वस्यैवा

योगादितिचेत्सकलधीवासनाप्रतिबिम्बितत्वेनेश्वरस्यसर्व्वज्ञत्वमितिपञ्चदशीकारावदन्ति ॥ १ ॥ प्रकटार्थकारास्त्वाहुःस्वोपाधि
मायापरिणामप्रतिबिम्बितैःस्फुरद्भिःसकलकालवर्त्तिसर्व्वप्रपञ्चगोचरापरोक्षज्ञानवत्त्वंसर्व्वज्ञत्वमिति ॥२॥ तत्त्वशुद्धिकारास्तुमायापरि
णामैःस्वप्रतिबिम्बैर्विद्यमानसर्व्वप्रपञ्चापरोक्षज्ञानवत्त्वेसत्यतीताऽनागतप्रपञ्चगोचरापरोक्षज्ञानवत्त्वम् ॥३॥ कौमुदीकृतस्तुस्व
रूपज्ञानेनैवब्रह्मणःस्वसंसृष्टसर्व्वावभासकत्वंसर्व्वज्ञत्वंवदन्ति ॥ ४॥ पूर्व्वमतेयःसर्व्वज्ञइतिज्ञानजननकर्त्तृत्वश्रुतिविरोधंपश्यन्त
स्तत्कार्य्यतादात्म्यापन्नमायालक्षणदृश्यावच्छिन्नचैतन्यरूपज्ञाप्रकृत्यर्थस्यज्ञानस्यब्रह्मकार्य्यत्वेनप्रत्ययार्थलक्षणतत्कर्त्तृत्व रूपं
सर्व्वज्ञत्वंब्रह्मणःसम्भवतीतिश्रुतिविरोधंसमादधतेवाचस्पतिमिश्राः ॥ ५ ॥ * ॥ इतीश्वरसर्व्वज्ञत्ववादः ॥ * ॥ ६ ॥ * ॥ अथ
जीवाल्पज्ञत्ववादः ॥ नन्वीश्वरवज्जीवोऽपिवृत्तिमनपेक्ष्यस्वरूपचैतन्येनैवकिमितिविषयान्नावभासयतीतिजीवस्यापिसर्व्वज्ञत्वापत्ति
वारणार्थंसमाधानत्रयं तथाहि । विवरणकाराआहुःयथाजगत्स्वोपादानेनब्रह्मणासंसृष्टंनतथास्वानुपादानाऽविद्याप्रतिबिम्बि
तजीवसंसृष्टमतोनयनादिद्वाराबहिर्निर्गतान्तःकरणवृत्तिद्वारैकस्यकस्यचिद्विषयस्यजीवसंसृष्टत्वाज्जीवस्य न सर्व्वविषयप्रकाशक

त्वरूपंसर्व्वज्ञत्वमिति॥ १ ॥ अन्तःकरणोपाधिकजीवस्यपरिच्छिन्नत्वेनतद्वृत्तिद्वारान्तःकरणसंसृष्टविषयावच्छिन्नब्रह्मचतन्या
भेदाभिव्यक्त्याकिञ्चिद्विषयप्रकाशकत्वेननसर्व्वज्ञत्वमित्याचार्य्यवाचस्पतिमिश्राआहुः ॥ २ ॥ पुनश्चाविद्याप्रतिविम्बोजीवइति
प्रथमपक्षमाश्रित्यप्रकारान्तरेणतएवाहुस्तथाहिजीवः सर्व्वगतोऽपिसर्व्वविषयसंसृष्टोऽपिस्वसर्व्वगतत्वावरकस्वाविद्यावृतत्वेननस
र्व्वानवभासयतिकिन्तुविषयनिष्ठवृत्त्युपरागेणनिवृत्ताविद्यःकिञ्चिदेवविषयंभासयत्यतोनसर्व्वज्ञइति ॥ ३ ॥*॥ इतिजीव
सर्व्वज्ञत्वाभाववादः ॥ ७ ॥ अथसम्बन्धवादः ॥ नन्वऽविद्यायांचित्प्रतिविम्बएवसर्व्वव्यापकोजीवइतिप्रथमपक्षेअन्तःक
रणवृत्तिर्जीवचिद्विषयसम्बन्धार्थेत्यत्रसम्बन्धस्सकइत्याशंक्यवृत्त्यधीनोविषयविषयिभावरूपइतिकेचिदाहुः ॥ १ ॥ अन्ये
तुविषयसंयुक्तवृत्त्यधिष्ठानत्वेनाविद्याप्रतिविम्बितजीवस्यविषयेणसहविषयसंयुक्तवृत्तितादात्म्यलक्षणः सम्बन्धोविवरणकारा
भिप्रेतइत्याहुः ॥ २ ॥ अपरेतुवृत्तितद्विषयरूपकार्य्याकार्य्यसंयोगजजीवविषयरूपकारणाकारणसंयोगरूपत्वेनविषयेणसाकं
जीवस्यसंयोगजसंयोगरूपःसम्बन्धआचार्य्याभिप्रेतइतिवदन्ति ॥ ३ ॥ एकदेशिनस्तुविषयावभासकजीवस्यविषयतादात्म्या

पन्नब्रह्माभेदाभिव्यक्तिहेतुवृत्त्यधीनोजीवविषययोःकल्पिततादात्म्यलक्षणःसम्बन्धआचार्याभिप्रेतइतिसङ्गिरन्ते ॥ ४ ॥ वस्तु
तस्तुविषयावभासकत्वेनाभिमतस्यजीवचैतन्यस्यविषयेण घटादिनासहव्यङ्ग्यव्यञ्जकभावस्तथाचान्तःकरणवृत्तिसंसर्गविषयत
त्प्रतिविम्बितजीवचैतन्ययोःक्रमेणव्यञ्जकव्यङ्गतालक्षणःसम्बन्धआचार्य्यसम्मतइति सिद्धान्तलेशसङ्ग्रहव्याख्याकारावदन्तीत्य
पिज्ञेयम् ॥ ※ ॥ इतिसम्बन्धवादः ॥ ※ ॥ ८ ॥ ※ ॥ अथाभिव्यक्तिवादः ॥ अन्तःकरणोपाधिकत्वेनपरिच्छिन्नोजीवइतिद्विती
यपक्षेचान्तःकरणवृत्तिर्जीवविषयतादात्म्यापन्नब्रह्मणोस्वाभेदाभिव्यक्त्यर्थेत्यत्राभिव्यक्तिश्चकेत्याऽऽशंक्यकेचिदाहुःकुल्याद्वारा
तटाकक्षेत्रजलयोरिवविषयावच्छिन्नचैतन्यरूपब्रह्मणावृत्तिद्वारान्तःकरणस्यविषयदेशस्थत्वेनतदवच्छिन्नतयाजीवस्यैकीभावो
ऽभेदाऽभिव्यक्तिरिति ॥ १ ॥ विषयसंसृष्टवृत्तिभागेविषयावच्छिन्नब्रह्मप्रतिविम्बस्यान्तःकरणावच्छिन्नजीवेनैकीभावअभिव्यक्ति
रितिमन्वानाःपूर्वमतेचब्रह्मणोजीवभावाऽपत्त्यादिकंदोषंचोद्घाटयन्तिकेचित् ॥ २ ॥ विम्बत्वप्रतिविम्बत्वोपलक्षितशुद्धेनान्तःकर
णावच्छिन्नजीवस्यविषयावच्छिन्नब्रह्मणैकीभावोऽभेदाभिव्यक्तिरितिचापरे ॥ ३ ॥ ※ ॥ इत्यभिव्यक्तिवादः ॥ ※ ॥ ९ ॥ ※ ॥

अथावरणाभिभववादः ॥ अविद्याऽऽवृतोविद्याप्रतिविम्बसर्व्वगतोजीवइतितृतीयपक्षेऽन्तःकरणवृत्तिरावरणाभिभवार्थेत्यत्र कोनामाऽऽवरणाभिभव अज्ञाननाशश्चेद्घटज्ञानेनैवाज्ञानमूलकःप्रपञ्चोनिवर्त्तेतइत्याऽऽशंक्याऽत्रकेचिदाहुः ॥ चैतन्यमात्रावरकस्याज्ञानस्यविषयावच्छिन्नप्रदेशेखद्योतादिप्रकाशेनमहान्धकारस्येव ज्ञानेनैकदेशेन नाशोवाकटवत्सम्वेष्टनंवाभीतभटवत्पलायनंवाऽभिभवइति ॥ १ ॥ अन्येतुपूर्व्वमतेनिःक्रियाऽज्ञानस्यापसरणसम्वेष्टनाद्यसम्भवात्मकंदोषंपश्यन्तोवृत्तिसंसृष्टावस्थविषयावच्छिन्नचैतन्यानावरकत्वमज्ञानस्यस्वाभाव्यमेवाभिभवइत्याहुः ॥ २ ॥ अपरेतुमूलाज्ञानादवस्थाऽज्ञानानिभिन्नानिवहूनिचतेषांतत्तद्घटादिज्ञानेननिवृत्तिरेववरणाभिभवइतिवदन्ति ॥ ३ ॥ ※ ॥ इत्यावरणाभिभववादः ॥※॥ १० ॥※॥

अथावस्थाऽज्ञानसादित्वानादित्ववादः ॥ अवस्थाज्ञानानिमूलाज्ञानवदज्ञानत्वादनादीनीतिकेचिदाहुः ॥ १ ॥ अपरेत्वज्ञानानादित्वपक्षेएकज्ञानेनसर्व्वाज्ञाननाशे सर्व्वावरणनाशापत्त्यापाश्चात्य तत्समानविषयज्ञानानामावरणानभिभावकत्वलक्षणदोषंपश्यन्तोनिद्रावत्सुषुप्तिवच्चावस्थाज्ञानत्वेनहेतुनाऽवस्थाज्ञानानिसर्व्वाणिसादीनितथाचैकेनज्ञानेनैकमज्ञानंनश्यत्यपरंचाऽ

ज्ञानंतज्ज्ञाननाशानन्तरमुत्पद्यतेएवञ्चतत्तद्ज्ञाननाशएवावरणाभिभवइतिमन्यन्ते ॥ २ ॥ नन्वनादित्वपक्षेघटेप्रथममुत्पन्नेनैव
ज्ञानेन सर्व्वेतद्ज्ञाननाशोभवेद्विनिगमनाविरहात्तदवच्छिन्नचैतन्यावरकसर्व्वाज्ञाननाशेचप्रथमज्ञानस्यविषयाप्रकाशकत्वंनाशे
तुपाश्चात्यज्ञानानामावरणानभिभावकत्वंतदवस्थमेवेतिचेदत्रकेचिदाहुःयथान्यायमतेज्ञानप्रागभावानामनेकेषांसत्त्वेप्येकज्ञा
नोदयेनैकएव प्रागभावो निवर्त्तते नतथाऽज्ञानान्तरसत्त्वेप्येकेनज्ञानेनैकमनाद्यज्ञानंनिवर्त्ततेऽन्योऽज्ञानान्तरैःप्रागभावतुल्यैर्विषय
स्यावृतत्वेऽपिनप्रथमज्ञानकालेविषयानवभासरूपोदोषोनापिज्ञानान्तराणामनभिभावकत्वमिति॥३॥अन्येतुपूर्व्वमतेआवृतस्याप
रोत्वभावरूपंदोषंमन्यमानाएवञ्चवदन्तियदायद्ज्ञानंविषयमावृणोतितदातेनज्ञानेन तस्यैवनाशःअन्यच्चसर्व्वमज्ञानंतदैवना
वृणोत्यतस्तदातन्नाशाभावेऽपिनविषयानवभासादिलक्षणोदोषः॥४॥ अपरेत्वज्ञानस्यस्वविषयस्वभावत्वादसतिप्रतिबन्धकेसर्व्व
मज्ञानंसर्व्वदाविषयमावृणोत्येवपूर्व्वमतेचकेषाञ्चिदज्ञानानामावरकत्वाभावलक्षणदोषं मन्यमानाएवमाहुस्तथाहि ॥ यथा
बहुजनसमाकुलेप्रदेशेकस्यचिच्छिरसिपतन्नश्मानिरितरानपसारयतितथाज्ञानमेकमज्ञानंनाशयत्यज्ञानान्तराणितिरस्करोत्यतो

नपूर्व्वोक्तदोषावकाश इति ॥ ५ ॥ * ॥ इत्यज्ञानानादित्ववादः ॥ * ॥ ११ ॥ * ॥ अथधारावाहिकद्वितीयादिज्ञानवैफल्यपरिहारवादः ॥ नन्वेवंधारावाहिकज्ञानस्थलेद्वितीयादिज्ञानानामावरणानभिभावकत्वेनवैफल्यंस्यात्प्रथमज्ञानेनैवानिवर्त्तनतिरस्काराभ्यामावरणमात्रस्याभिभवादितिचेदत्रकेचिदेवमाहुः ॥ प्रथमज्ञानतिरस्कृतमप्यज्ञानंतदुपरमेपुनस्तदेवविषयमावृणोत्यतःप्रथमज्ञानतिरस्कृतस्याज्ञानस्यपूर्व्ववदेवविषयानावरकत्वेनस्थापनार्थंद्वितीयादिज्ञानमतोनतद्वैफल्यंयथाप्रथमदीपतिरस्कृतंतमस्तद्दीपोपरमेतत्तमस्तंदेशमावृणोतितस्य तथैवानावरकत्वेन स्थापनार्थंतदव्यवहितोत्तरक्षणवर्त्तिदीपान्तरादिसाफल्यमिति ॥ १ ॥ अस्मिन्नेवाक्षेपेसतिन्यायचन्द्रिकाकृतस्त्वेवमाहुः केनचिज्ज्ञानेनकस्यचिदेकस्याऽज्ञानस्यनाशएवनत्वावरकाणामप्यज्ञानान्तराणांतिरस्कारस्तथाचकिञ्चिज्ज्ञानोदयेतत्कालीनविषयावरकाज्ञानस्यनाशाद्विद्यमानानांतत्तदज्ञानान्तराणामन्यकालेविषयावरकत्वान्नतत्कालीनेविषयावभासेकाचिदनुपपत्तिरितिनापिद्वितीयादिज्ञानानांवैफल्यंतत्तत्कालोपलक्षितविषयनिष्ठाज्ञानानांतत्रनिवर्त्तकत्वादिति ॥ २ ॥ ज्ञानमात्रमज्ञाननिवर्त्तकंनभवतिधारावाहिकद्वितीयादिज्ञानेव्यभिचा

रादित्यचान्येतुत्रेधासमाधानंकुर्वन्ति ॥ तथाहि ॥ प्रथमज्ञाननिवर्त्त्यमेवाज्ञानंस्वरूपावरकंद्वितीयादिज्ञाननिवर्त्त्यानिदेशका
लविशेषणान्तरविशिष्टविषयाणीतितत्तद्विषयकाज्ञाननिवर्त्तकत्वंतेषामतोनव्यभिचारइत्येकंसमाधानं। धारावाहनस्थलेप्रथ
मोत्पन्नायाएववृत्तेस्तावत्कालावस्थायित्वसम्भवेनवृत्तिभेदानभ्युपगमादतोन व्यभिचारइतिद्वितीयं समाधानं । प्रतिक्षणोद्य
दनेकवृत्तिसन्तानाभ्युपगमेऽपिद्वितीयादिवृत्तीनामधिगतार्थविषयतयाप्रमात्वाभावादेवतत्रनव्यभिचारइतितृतीयंसमाधानंत
थाच प्रमाज्ञानमज्ञाननिवर्त्तकंनज्ञानमात्रमज्ञाननिवर्त्तकमिति ॥ २ ॥ * ॥ इतिधारावाहिकस्थलेद्वितीयादिज्ञानसाफल्य
वादः ॥ * ॥१२॥ * ॥ अथपरोक्षज्ञानस्याज्ञाननिवर्त्तकत्वानिवर्त्तकत्ववादः ॥ ननुप्रमाज्ञानमात्रमज्ञाननिवर्त्तकमितिनियमोऽ
पिनसम्भवतिपरोक्षज्ञानस्यप्रमात्वेऽप्यज्ञानानिवर्त्तकत्वादितिचेदत्रकेचिदाहुरज्ञानंखलुद्विविधंविषयाश्रितत्वेसतिविषयावरक
मेकंरज्वादिविषयनिष्ठसर्पादिविक्षेपोपादानमपरञ्चपुरुषाश्रितंविषयमहंनजानामीत्यनुभवसिद्धमतोविषयाश्रिताज्ञाननाश
कत्वेऽपिपरोक्षज्ञानस्यपुरुषाश्रिताज्ञाननाशकत्वान्नतत्राव्याप्त्यानियमभङ्गइति ॥ १ ॥ अन्येतुनयनपटलवत्पुरुषाश्रितमेकमे

वाज्ञानंविषयावरणंतस्यैवपुरुषाश्रिताज्ञानस्यविषयावरकस्यएकदेशःपरोक्षज्ञानेन निवर्त्ततेविषयनिष्ठविक्षेपहेतुर्देशान्तरमनुवर्त्ततेऽतोनव्यभिचारइतिवदन्तिवस्तुतस्त्वप्रतिवद्धप्रमाज्ञानमज्ञाननिवर्त्तकमतोदूरदेशस्थवृक्षेमहत्परिमाणवतिकस्यचिदज्ञानादल्पपरिमाणोऽयंवृक्षइतिभ्रमोजातस्तस्यदूरेदृश्यमानोवृक्षःसन्निहितवृक्षवद्महानित्याप्तवाक्याज्ज्ञातमपिपरोक्षज्ञानंनाज्ञाननिवर्त्तकंदूरदेशत्वादिदोषप्रतिवद्धत्वादितिवोध्यं॥२॥ अपरेतुशुक्तिरजतादिपरिणामोपपत्त्यंजस्यादिविषयावगुण्ठनपटवद्विषयगतमेवाज्ञानं तदावरणंतन्निवर्त्तकंचाप्रतिवद्धापरोक्षज्ञानमेवातःपरोक्षज्ञानेव्यभिचारशङ्कैवनापरोक्षज्ञानस्यैवाज्ञाननिवर्त्तकनियमाभ्युपगमादित्याहुः ॥ ३ ॥ * ॥ इतिपरोक्षज्ञाननिष्ठाज्ञाननिवर्त्तकत्वानिवर्त्तकत्ववादः ॥ * ॥ १२ ॥ * ॥

अथसाक्षिस्वरूपनिर्णयवादः ॥ ननुनायमव्यवहितपूर्व्वोक्तोऽपिनियमःसम्भवतिअविद्याहङ्कारसुखदुःखाद्यहङ्कारधर्म्मप्रत्यक्षस्याज्ञाननिवर्त्तकत्वानभ्युपगमादितिचेन्नाविद्यादिप्रत्यक्षस्य साक्षिरूपत्वेनवृत्तिरूपापरोक्षज्ञानस्यावरणनिवर्त्तकत्वे नियमानपायात् अथकोऽयंसाक्षीजीवातिरेकेणव्यवह्रियतेअत्राहुःपञ्चदशीकारादेहद्वयाधिष्ठानभूतंकूटस्थचैतन्यंस्वावच्छेदकस्य देहद्वयस्य सा

साक्षिलक्षणान्निर्विकारत्वाच्चसाक्षीत्युच्यतेतथाचतैरेवकूटस्थदीपेसाक्षिस्वरूपंप्रदर्श्यपुनर्नाटकदीपेप्रदर्शितं ॥ तथाहि ॥ नृत्यशालास्थितोदीपःप्रभुंसभ्यांश्चनर्त्तकीं दीपयेदविशेषेणतदभावेऽपिदीप्यते । एवंजीवादिविवेचितोऽयंसाक्षीनजीवो नापीश्वरःकिन्तु तदुभयविभागहीनंचैतन्यंसाक्षीति ॥ १ ॥ तत्त्वप्रदीपिकायांचित्सुखाचार्य्यैरप्येवमुक्तम् ॥ तथाहि ॥ सर्व्वप्रत्ययसाक्षितंविशुद्धंब्रह्म चैतन्यं जीवाभेदेनसाक्षीतिसंज्ञांप्रतिपद्यतइति ॥ २ ॥ कौमुदीकारास्तुपरमेश्वरस्यैवकश्चिद्रूपविशेषःसाक्षीनामकुतोदेवत्वादिश्रुतेर्नत्वीश्वरविलक्षणःसाक्षीएकोदेवः सर्व्वभूतेषुगूढइत्यादिश्रुतिनिष्ठेश्वरासाधारणधर्म्मदेवत्वादिनासाक्षित्वस्य सामानाधिकरण्यविरोधादित्याचक्षते ॥ ३ ॥ तत्त्वशुद्धिकारास्तुयथेदंरजतमितिभ्रमस्थलेवस्तुतःशुक्तिकोट्यन्तर्गतोऽपीदमंशःप्रतिभासतोरजतकोटिस्तथेश्वरकोटिरेवसाक्षीप्रतिभासतोजीवकोटिरितिवदन्ति ॥ ४ ॥ केचित्त्वविद्योपाधिकःजीवएवसाक्षाद्द्रष्टृत्वात्साक्षीजीवस्यान्तःकरणतादात्म्यापत्त्याकर्त्तृत्वाद्यारोपभाक्त्वेऽपिस्वयमुदासीनत्वादेवेत्याहुः ॥ ५ ॥ अन्येतुसत्यंजीवएवसाक्षीनतुसर्व्वगतेनाविद्योपहितेनरूपेण साक्षीपुरुषान्तरान्तःकरणादीनामपिपुरुषान्तरंप्रतिस्वान्तःकरणभासकसाक्षिसंसर्गाविशेषेण

प्रत्यक्षत्वापत्तेस्तस्मादन्तःकरणोपधानेनजीवःसाक्षीतथाचप्रतिपुरुषंसाक्षिभेदात्पुरुषान्तरान्तःकरणादेःपुरुषान्तरसाक्ष्यसंसर्गा
द्वातद्योग्यत्वाद्वाऽप्रकाशउपपद्यतेसुषुप्तावपिसूक्ष्मरूपेणान्तःकरणसद्भावात्तदुपहितःसाक्षीतदाप्यस्त्येवनचान्तःकरणोपहि
तस्यजीवस्याऽविद्याप्रतिविम्बस्यप्रमातृत्वेन साक्षित्वंनसम्भवतिसुषुप्तौप्रमात्रभावेऽपिसाक्षिसत्वेनतयोर्भेदस्यावश्यंवक्तव्यइति
वाच्यमन्तःकरणविशिष्टःप्रमातातदुपहितःसाक्षीतिभेदोपपत्तेर्विशेषणत्वंचकार्य्यान्वयित्वेसतिव्यावर्त्तकत्वं । यथानीलमुत्पल
मानयेत्यादौनीलादेःकार्य्यानन्वयित्वेसतिव्यावर्त्तकत्वेसतियावत्कार्य्यंनियमेनविद्यमानत्वमुपाधित्वं। यथाश्रोत्रत्वोपाधिकरणशु
ष्कुल्याःकरणशुष्कुल्यवच्छिन्नंनभःश्रोत्रमित्यत्रोपाधिकत्वं। स्वधर्मासञ्जकत्वंवोपाधिकत्वंयथालोहितस्फटिकमानयेत्यादौज
पाकुसुमादेःस्फटिकादावुपाधित्वं तथाचप्रकृतेऽन्तःकरणस्योक्तोभयोपाधिलक्षणवत्त्वसम्भवेन तदुपहितत्वेनचजीवचैतन्यमात्रस्य
साक्षित्वेनानुपपत्तिरित्याहुः ॥६॥ ॥ इतिसाक्षिस्वरूपवादः॥ ॥१४॥ ॥ अथाविद्यादीनामावृतानावृतसाक्षिचैतन्यप्रकाश्यत्व
वादः॥ ननूक्तरूपस्यसाक्षिणःकृत्स्नचैतन्यमात्रावरकेणाज्ञानेनावरणमवर्ज्जनीयमितिकथमावृत्तेनाविद्याहङ्कारादिभानमि

तिचेद्राहुवदविद्यास्वावृतप्रकाशप्रकाश्येतिकेचिद्वस्तुतोऽविद्यान्तःकरणतद्धर्म्मावभासकं साक्षिचैतन्यंविहायैवाज्ञानंचैतन्यमावृ
णोतीत्यनुभवानुसारेणकल्पनान्नकश्चिद्दोषःसाक्षिचैतन्यस्यानावृतत्वेतत्स्वरूपभूतानन्दस्यापिप्रकाशापत्तिरितिचेन्नेष्टापत्तेरान
न्दस्वरूपात्मप्रकाशप्रयुक्तस्यात्मनि निरुपाधिकप्रेम्णोदर्शनाद्भासतएव परमप्रेमास्पदत्वलक्षणंसुखमितिविवरणोक्तेश्चेत्याहुः
॥१॥ स्यादेतदिदानीमप्यानन्दप्रकाशेमुक्तिसंसारयोरविशेषप्रसङ्गइतिचेदत्राहुरद्वैतविद्याचार्य्याःसंसारदशायांप्रकाशमाने
ऽप्यानन्देऽध्यस्तापकर्षतारतम्येनसातिशयत्वाद्दृष्टम्।विद्योदयेतुनिखिलापकर्षाध्यासनिवृत्तेरारोपितसातिशयत्वापायात्कृतकृत्य
तेतिविशेषोपपत्तिरिति ॥२॥ अन्येतुप्रकाशमानोऽप्यानन्दोनास्तिनप्रकाशतेइत्यावरणानुभवादावृतएवत्वदुक्तमर्थंनजानामी
त्यावरणानुभवादतोयदवच्छिन्नमज्ञानंप्रकाशतेतदेवावृतमितिप्रकाशमानेऽप्यज्ञानंयुज्यतेऽज्ञानञ्चयथासाक्ष्यंशंविहायचैतन्य
मावृणोतिएवमानन्दमपितत्तत्सुखरूपवृत्तिकवलीकृतंविहायैवावृणोतितथाचसंसारदशायांतारतम्येनानन्दोभवतिमोक्षदशाया
न्तुतारतम्यरहितआनन्दोभवतीतिसंसारमोक्षयोर्विशेषइत्याहुःसर्वथापिसाक्षिचैतन्यमनावृतमेवाहंकारादिप्रकाशकमितिज्ञेय

* ॥ इतिसाक्षिचैतन्यावृतत्ववादः ॥ * ॥१४॥ * अथाहङ्कारादिस्मृतिसिद्ध्यर्थंसंस्काराधानवादः ॥ नन्वेवंकथमहंकारा
१२ दीनामनुसन्धानंज्ञानसूक्ष्मावस्थारूपस्यसंस्कारस्यज्ञानेसत्ययोगेननित्येनसाक्षिणातदाधानासम्भवादत्र केचिदाहुः । यथाहङ्का
रस्याहङ्कारवच्छिन्नसाक्षिणाभास्यत्वंतथाघटपटादिविषयगोचरवृत्त्यवभास्यत्वमप्यस्त्यतोघटादिगोचरवृत्त्यवच्छिन्नसाक्षिचैतन्य
स्यानित्यत्वात्तेनयथाघटादौविषयेसंस्काराधानंसम्भवतितथातेनैववृत्त्यवच्छिन्नसाक्षिचैतन्येनाहंकारादावपिसंस्काराधानंस
म्भवतीतिनाहंकारगोचरसंस्कारार्थंवृत्त्यपेक्षेति ॥ १ ॥ अन्येतुसुप्तोत्थितस्याविद्याद्यनुसन्धानसिद्ध्येसुषुप्तौकल्पितामविद्यासुख
सुषुप्तिगोचरामविद्यावृत्तिमिवाहमर्थगोचरामविद्यावृत्तिमुररीकृत्याविद्यावृत्त्यवच्छिन्नसाक्षिचैतन्यनाशेनाहमर्थे संस्कारमुपपा
दयन्ति ॥ २ ॥ अपरेत्वहंकारगोचरान्तःकरणवृत्तिरेवेच्छादिवृत्तितुल्येऽत्यङ्गीकृत्याहमर्थगोचरवृत्तिनाशेन तत्रसंस्कारमुररीकु
र्वन्ति ॥ ३ ॥ इतरेत्वहमर्थगोचरान्तःकरणवृत्तिरपिज्ञानमेवमामहं नजानामीत्यनुभवात्तन्नाशेनाहंकारेसंस्कारमुपपादय १२
न्तिएवमहंकारगोचरापरोक्षवृत्त्यभ्युपगमे सति बाह्यविषयगोचरान्तःकरणापरोक्षवृत्तीनामेवावरणाभिभावकत्वनियमःपर्य्य

वसन्नइति ॥ ४ ॥ अथसंस्काराधानवादमध्येऽध्यासकारणवादः ॥ ननुनायंपूर्व्वोक्तोऽपिनियमःसम्भवतिशुक्तिरजतस्थलेइद
माकारवृत्तेरज्ञानानभिभावकत्वादन्यथोपादानाभावेनरजतोत्पत्त्ययोगादितिचेदत्राहुः केचिदिदमाकारवृत्त्येदमंशाज्ञाननिवृ
त्तावपिशुक्तित्वनीलपृष्ठत्वत्रिकोणत्वरूपविशेषांशाज्ञानानिवृत्तेस्तदेवप्रातिभासिकरजतोपादानमित्यतएवशुक्त्यंशोऽधिष्ठानमि
दमंशआधारः सविलासाज्ञानविषयोऽधिष्ठानमतद्रूपोऽपि तद्रूपेणारोप्यबुद्धौ स्फुरन्नाधारइति सङ्क्षेपशारीरके विवेचनादिति
॥ ५ ॥ अपरेत्विदंरजतमितीदमंशतादात्म्येनप्रतीयमानस्यरजतस्येदमंशाज्ञानमेवोपादानंतस्य चेदमंशाज्ञानस्येदमाकारवृ
त्त्यावरणशक्तिमात्रनिवृत्तावपिविक्षेपशक्तिमत्त्वेनानुवृत्तेर्नोपादानत्वासम्भवइत्याहुः ॥ ६ ॥ एवंमतद्वयेनवाह्यविषयगोचराप
रोक्षवृत्तीनांसर्व्वासामेवावरणाभिभावकत्वनियमस्यभ्रमस्थलीयेदमाकारवृत्तौयाव्यभिचारशंका सातत्रापीदमंशाज्ञाननिवर्त्त
कत्वस्येदमंशावरणमात्रनिवर्त्तकत्वस्यवासत्वादित्युपपादनेन निरस्ताकवितार्किकचक्रवर्त्तिनृसिंहभट्टोपाध्यायास्त्विदंरजत
मितिभ्रमात्पूर्व्वमिदमाकारवृत्तिरेवभ्रमस्थलेनास्त्यतोनतत्रव्यभिचारशंकावकाशस्तत्समाधानन्तुदूरतएव निरस्तमध्यासकारणन्तु

सि॰ ले॰ सा॰सं॰ वाह्यप्रातिभासिकाध्यासमात्रेलाघवाद्दुष्टेन्द्रियाधिष्ठानसम्प्रयोगएवरजतादेश्चाक्षुषत्वानुभवेचचक्षुःसंयुक्तातादात्म्यलक्षणःसन्निक
१२ र्षइत्युपपादयन्ति॥ ७॥ अन्येत्वधिष्ठानसामान्यज्ञानमध्यासकारणमितीदमाकारांवृत्तिमुपेत्यतदभिव्यक्तेनैवसाक्षिणातदध्यस्तर
जतस्यावभाससम्भवात्तदवभासकसाक्ष्यभिव्यञ्जकयातयेदंवृत्त्यारजतविषयसंस्काराधानोपपत्तेस्वरजताकारवृत्तिर्व्यर्थैतिमन्यन्ते
॥ ८॥ केचित्तुरजतभ्रमात्पूर्व्वमधिष्ठानगोचरेदमित्येकावृत्तिरध्यासकारणीभूताइदं रजतमितिद्वितीयावृत्तिरध्यस्तगोचरात
यैवचस्वगोचरवृत्त्यैवस्वगोचरसंस्काराधानमितिन्यायेनस्वविषयाध्यस्तरजतेसंस्काराधानमिति मन्यन्ते ॥ ९॥ अन्येतुयथेदमंशाव
च्छिन्नेचैतन्येरजतंस्वरूपेणाध्यस्तमिदंत्वञ्चतत्रस्वीयंनास्तिकिन्त्वधिष्ठानस्येदंत्वंसंसर्गेणतत्रप्रतीयतेतथारजतज्ञानमपीदमंशवि
षयवृत्तिज्ञानावच्छिन्नचैतन्येतदविद्ययाध्यस्तमेवनत्विदमंशवृत्तिवदनध्यस्तंतत्रेदमंशविषयत्वभानन्तुस्वाधिष्ठानभूतेदमंशविष
यज्ञानगतेदंविषयत्वसंसर्गाऽध्यासादेवेतिवदन्ति। अस्मिन्मतद्वयेचाध्यासकारणन्तुधर्म्मिज्ञानमेवेतिध्येयम्॥ १०॥ एवञ्चवाह्य १२
गोचरापरोक्षवृत्तीनामेवावरणाभिभावकत्वमितिनियमस्तु भ्रमस्थलीयेदमाकारवृत्तौव्यभिचारशंकायांसत्यांतद्वृत्त्यभ्युपगमानभ्यु

पगमाभ्यांतात्पर्य्यरिहृत्येदमितीदंरजतमिति च ज्ञानद्वयपक्षेवक्ष्यविचारस्तु सिद्धान्तलेशोक्तइत्यपिध्येयम्। इत्यध्यासकारणविचारेणसत्वस्मृतिसिद्ध्यर्थंसंस्काराधानवादःसमाप्तः॥*॥१६॥*॥ अथापरोक्षानुभूत्यर्थवृत्तिनिर्गमवादः॥ ननुसर्व्वपदार्थानांसाक्षिप्रसादादेवप्रकाशोपपत्तेःकिम्वृत्त्याघटादिविषयसंस्काराधानाद्युपपत्तयेतदपेक्षणेऽपिविवरणाचार्य्याद्युक्तजीवाल्पज्ञत्वादिविचारावसरेपूर्व्वोक्तविषयप्रकाशाद्यर्थं वृत्तिनिर्गमाभ्युपगमे।व्यर्थःपरोक्षस्थलइवानिर्गतवृत्त्यवच्छिन्नसाक्षिणैवघटादेःप्रकाशोपपत्तेर्नचतथासतिपरोक्षाऽपरोक्षयोर्वैलक्षण्यानुपपत्तिः। शाब्दानुमित्योरिवकारणविशेषप्रयुक्तवृत्तिवैजात्यादेवतदुपपत्तेरितिचेन्न केचित्प्रत्यक्षस्थलेविषयाधिष्ठानतयातदवच्छिन्नमेवचैतन्यंसाक्षात्तादात्म्येनस्वाध्यस्तविषयप्रकाशस्तदभिव्यक्त्यर्थं युक्तोवृत्तिनिर्गमइतिवदन्ति॥१॥ अन्येत्वहंकारसुखदुःखादिष्वापरोक्ष्यसाक्षाच्चैतन्यसंसर्गिषुक्लृप्तमितिपूर्व्वमतादधिकंवदन्तस्तदनुसारेणघटादावपितत्संसृष्टंचैतन्यमापरोक्ष्यहेतुरितितदभिव्यक्तयेवृत्तिनिर्गमंसमर्थयन्ते॥२॥ अपरेतुशब्दानुमानाद्यवगतेभ्यःप्रत्यक्षावगतेस्पष्टतातावदनुभूयतेऽतस्तत्रावरणाभिभवस्यावश्यकत्वेनेति तत्प्रतिपादनपूर्व्वकंविषयनिष्ठावरणाभिभवार्थंवृत्तिनिर्गमम

ङ्गीकुर्व्वन्तीति ॥ ३ ॥ अन्येतुवृत्तिनिर्गमानुपगमेज्ञानाज्ञानयोर्विरोधप्रयोजकमेवदुर्निरूप्यंननुयदज्ञानंयंपुरुषंप्रतियद्विषयावरकंतत्तदीयतद्विषयकज्ञाननिवर्त्त्यमित्येवज्ञानाज्ञानयोर्विरोधप्रयोजकंस्यात्किंवृत्तिनिर्गमाभ्युपगमेनेतिचेन्नतत्पुरुषीयपरोक्षज्ञानेनापिविषयगताज्ञाननिवृत्तिप्रसङ्गादपरोक्षत्वप्रवेशेतुतस्यापिजात्युपाध्यादिरूपविकल्पासहत्वादतोयदज्ञानंयंपुरुषंप्रतियद्विषयावरकंतत्तदीयतद्विषयतदज्ञानाश्रयचैतन्यसंसर्गनियतात्मलाभज्ञाननिवर्त्त्यमितिज्ञानाज्ञानयोर्विरोधप्रयोजकंवाच्यम् । तथाचपरोक्षज्ञानात्मकवृत्तिषुयदज्ञानंयंप्रतीत्याद्यंशसत्त्वेप्यज्ञानाश्रयविषयचैतन्यसंसर्गनियतस्वरूपविशेषणाभावान्नतास्वज्ञाननिवर्त्तकत्वरूपोऽतिप्रसङ्गस्तस्माद्वृत्तिज्ञानस्याऽज्ञानाश्रयविषयचैतन्यसंसर्गंविनाऽज्ञाननिवर्त्तकत्वासम्भवादज्ञानज्ञानयोर्निवर्त्त्यनिवर्त्तकत्वलक्षणविरोधनिर्वाहायवृत्तिनिर्गमआवश्यकइत्याहुरिति ॥ ४ ॥ अन्येतुविषयगताज्ञानस्यलाघवात्समानाधिकरणज्ञाननिवर्त्त्यत्वसिद्धौवृत्तिनिर्गमःफलतीत्याहुः ॥ ५ ॥ अपरेतुवाह्यप्रकाशस्यवाह्यतमोनिवर्त्तकत्वंसामानाधिकरण्येसत्येव दृष्टमिति दृष्टानुरोधाद्वृत्तिनिर्गमःसिद्ध्यतीत्याहुः ॥ ६ ॥ केचित्त्वावरणाभिभवार्थंप्रमातृचैतन्यस्यविषयप्रकाशकत्वचैतन्या

भेदाभिव्यक्त्यर्थंवातदपेक्षेत्याहुः ॥ ७ ॥ * ॥ इतिवृत्तिनिर्गमवादः ॥ * ॥ १७ ॥ * ॥ समाधानानांसंख्या ॥ * ॥ ९९ ॥ * ॥
इतिश्रीशास्त्रसिद्धान्तलेशसङ्ग्रहसारेसमन्वयाख्यःप्रथमःपरिच्छेदःसमाप्तः ॥ १ ॥ ननुकथमद्वितीयेब्रह्मणिवेदान्तानांसमन्वयःप्र
त्यक्षादिविरोधादितिचेन्नाहुस्तत्त्वशुद्धिकारादयोनप्रत्यक्षंघटादितत्त्वंवागृह्णातिकिन्त्वधिष्ठानत्वेन घटाद्यनुगतंसन्मात्रंत
थाचप्रत्यक्षमपिसद्रूपब्रह्माद्वैतसिद्ध्यनुकूलमेवघटादेश्चनाद्यगोचरत्वंक्षमैकविषयत्वादिति ॥ १ ॥ न्यायसुधाकृतस्तुघटादेरिन्द्रियज
न्यज्ञानविषयत्वेऽपिसन्घटइत्यादिघटादेःप्रतिभासोऽधिष्ठानसत्तासम्बन्धविषयकएवातोनप्रत्यक्षविरोधइतिवदन्ति ॥ २ ॥
सङ्क्षेपशारीरकाचार्य्यास्तुप्रत्यक्षस्यघटादिसत्वग्राहकत्वेपिपराग्विषयस्यप्रत्यक्षादेस्तत्वावेदकत्वलक्षणप्रमाण्याभावाद्ज्ञातबो
धकांश्चिंप्रमाणंजडत्वेनानावृतघटादिविषयत्वेनोक्तलक्षणहीनत्वाच्चनतेनाद्वैतश्रुत्यादिबाधावकाशइति सम्भाषन्ते ॥ २ ॥ केचि
त्तुघटादिसत्त्वग्राहिणःप्रत्यक्षस्यप्रमाण्येब्रह्मप्रमाणान्यूनतावगमेऽपितद्ग्राह्यंसत्वमनुगतप्रत्ययात्सत्ताजातिरूपं वा इहेदानींघ
टोऽस्तीतिदेशकालसम्बन्धप्रतीतेस्तत्तद्देशकालसम्बन्धरूपंवानास्तिघटइतिस्वरूपनिषेधप्रतीतेःघटादिस्वरूपंवापर्य्यवस्यतितच्च

प्रपञ्चगतं सत्त्वंनेतिनेत्यादिश्रुतिवोधितेनतद्गतपारमार्थिकसत्तानिषेधात्मकेन मिथ्यात्वेननविरुध्यतेतत्तयोर्नविरोधइत्याहुः

॥ ४ ॥ अन्येतुप्रत्यक्षस्ययावद्ब्रह्मज्ञानमवाध्यत्वरूपम्प्रपञ्चनिष्ठंसत्त्वम्विषयःश्रुतेस्तुब्रह्मज्ञानवाध्यत्वरूपमिथ्यात्वंविषयइत्यतस्तयोर्भिन्नविषयत्वेननविरोधइतिवदन्ति ॥ ५ ॥ एवम्प्रत्यक्षेणसत्वप्रपञ्चमिथ्यात्वप्रतिपादकश्रुतीनांभिन्नविषयत्वाद्विरोधोनास्तीति प्रतिपादितमिदानीमग्रिमपद्यैःप्रत्यक्षस्यकालत्रयावाध्यत्वरूपप्रपञ्चनिष्ठसत्वग्राहित्वात्तन्निष्ठमिथ्यात्वप्रतिपादकश्रुत्यासहैकविषयत्वेनविरोधेसत्यपिनश्रुतिप्रतिपादितप्रपञ्चनिष्ठमिथ्यात्वसिद्ध्यनुपपत्तिःश्रुत्याप्रत्यक्षस्यवाधोपपत्तेरितिप्रतिपाद्यतेतत्रतावत्कोविदाहुःतलवद्दृश्यतेव्योमखद्योतोहव्यवाडिवनतलंविद्यतेव्योम्निनखद्योतोहुताशनइत्यादिनारदस्मृत्युक्तप्रत्यक्षविषयनिष्ठसत्यत्वव्यभिचारेणाप्रामाण्यरूपदोषशंकाकलंकितात्प्रत्यक्षान्निर्दोषत्वादपच्छेदन्यायेनपरत्वाच्चश्रुतिरेववलीयसीप्रावल्यमागमस्यैवजात्यातेषुत्रिषुस्मृतमितिस्मरणाच्चजात्यागमत्वेनैवतेषुप्रकृतेषुप्रत्यक्षानुमानागमेषुस्मृतंनामवैदिकेषुप्रसिद्धमितितदर्थःउपलभ्याप्सुचेद्गन्धंकेचिद्ब्रूयुरनैपुणाःपृथिव्यामेवतंविद्यादपोवायुञ्चसंश्रितमित्यादिनाप्रत्यक्षादागमप्रावल्यस्यनिर्विशङ्कत्वाच्चतथाचगगने

त्यादिप्रत्यक्षवज्जलादिषु गन्धप्रत्यक्षवच्च घटादिद्वैतप्रत्यक्षमात्रं दुर्व्वलत्वात्प्रवलाद्वैतमिथ्यात्वप्रतिपादकश्रुतिवाध्यं न चैवमुपजीव्य
विरोधःआगमप्रमाणेनवर्णपदवाक्यादिस्वरूपांशप्रत्यक्षमुपजीव्यप्रवृत्तेनानुजीव्यतत्सत्यत्वांशोपमर्द्दनादिति॥६॥नन्वागमस्यप्रत्य
क्षाद्वलीयस्त्वेयजमानःप्रस्तरइत्यत्रप्रत्यक्षाविरोधाययजमानपदस्यप्रस्तरेगौणीवृत्तिर्नकल्पनीयातथासोमेनयजेतेत्यत्रसोमयजन
योःकारकक्रियारूपयोरभेदासम्भवेनतद्भेदगोचरप्रत्यक्षाविरोधायसोमवतायागेनेतिमत्वर्थलक्षणानकल्पनीयाउभयत्रापिसत्यपि
प्रत्यक्षविरोधेतदनादृत्यागमेनवलीयसाप्रस्तरेयजमानाभेदस्ययागेसोमाभेदस्यचसिद्धिसम्भवादितिचेद्नवाचरणानिमित्ताएवंस
माऊस्तात्पर्य्यवतीश्रुतिः प्रत्यक्षाद्वलवतीनश्रुतिमात्रमतोऽद्वैत श्रुतिरुपक्रमोपसंहारैक्यरूप्यादिषड्विधलिङ्गावगमिताऽद्वैततात्प
र्य्याप्रत्यक्षाद्वलवतीततःप्रत्यक्षस्यैववाधोनतदविरोधायश्रुतेरन्यथानयनंयजमानःप्रस्तरइत्यादिश्रुतिस्तुतद्भेदलक्षणेस्वार्थेतात्पर्य्या
भाववत्त्वेनदुर्व्वलत्वात्प्रत्यक्षवाध्येति ॥७॥ विवरणवार्त्तिककारास्तुतत्त्वमसिइतिवाक्यस्यजीवब्रह्माभेदप्रतिपादनेतात्पर्य्येऽपित्वं
पदवाच्यस्यतत्पदवाच्याभेदःप्रत्यक्षविरुद्धइतितदविरोधायमहावाक्येतत्त्वंपदयोर्लक्षणाश्रयणान्नतात्पर्य्यवत्त्वेनश्रुतेःप्रत्यक्षात्प्रा

वत्त्वमपितुसावकाशनिरवकाशयोर्निरवकाशंवलवदितिन्यायाद्यत्रयजमानःप्रस्तरइत्यादौतत्रेदम्प्रत्यक्षंनिरवकाशंतत्रतेनश्रुति
वाधःप्रकृतेचनेहनानास्तिकिञ्चनेत्याद्ययानिरवकाशयाऽद्वैतश्रुत्याद्वैतस्यतत्त्वरूपत्वावेदकंप्रत्यक्षंव्यवहारिकविषयेसावकाश
मितःस्वविषयात्प्रच्याव्यान्यत्रस्थाप्यते ननुयद्यप्येवंसमाधानंसम्भवतितथापिप्रत्यक्षेणश्रुतिवाधेयजमानःप्रस्तरःसोमेनयजेततत्त्व
मस्यादिवहून्युदाहरणानिसन्तिश्रुत्याप्रत्यक्षवाधेत्वद्वैतश्रुतिरेकैवोदाहरणमितिचेत्तर्हिपूर्व्वम्परमजातत्वाद्वाधित्वैवजायते
परस्यानन्यथोत्पादान्नाद्यावाधेनसम्भवइत्यपच्छेदन्यायेनैवप्रत्यक्षस्यवाधोस्तु नन्वपच्छेदन्यायएवकइतिचेच्छृणुयथाज्योतिष्टोमे
वहिष्यमानस्तोत्रमुद्दिश्यान्वारब्धतयागच्छतामृत्विजामुद्गातुरपच्छेदेसतियद्युद्गातापच्छिद्येतादक्षिणंयज्ञमिष्ट्वातेनपुनर्यजेतेति
श्रुतिनिरीक्षणेनजातोद्गात्रपच्छेदनिमित्तप्रायश्चित्तकर्त्तव्यतावुद्धिःपश्चात्तदैवप्रतिहर्त्रपच्छेदे सतियदिप्रतिहर्त्तापच्छिद्येतसर्व्व
वेदसन्दद्यादितिश्रुतिनिरीक्षणेनजातयातद्विरुद्धप्रतिहर्त्रपच्छेदनिमित्तप्रायश्चित्तकर्त्तव्यतावुद्ध्यावाध्यतेइत्यपच्छेदन्यायःकथ १६
मस्यात्रप्रवृत्तिरितिचेदित्थंतदत्रापिपूर्व्वंजातत्वाद्घटादिसत्यत्वप्रत्यक्षंपरतयातन्मिथ्यात्वप्रतिपादकश्रुतिजन्यवोधेनवाध्यते

एवमादिकंसमाधानंवदन्तोयथाप्रथमं प्रवृत्तंशुक्तिरजतप्रत्यक्षंनेदंरजतमित्याप्तोपदेशेनपाश्चात्येनबाध्यतइतिलौकिकोदाहर
णमपिभाषन्तइति ॥ ४ ॥ * ॥ इतिश्रुतिप्रत्यक्षयोःप्राबल्यदौर्बल्यवादः ॥ * ॥ १ * ॥ अथतयोरुपजीव्योपजीवकभावविरोध
परिहारवादः ॥ ननुतथाप्युपजीव्यत्वेनप्रत्यक्षस्यैवप्राबल्यंदुर्वारमपच्छेदशास्त्रयोर्हिनहिपूर्व्वम्परस्योपजीव्यमितियुज्यतेपा
श्चात्येनप्रथमबाधइहतुवर्णपदादिस्वरूपग्राहकतयामिथ्यात्वबोधकमागमम्प्रतिप्रत्यक्षस्योपजीव्यत्वादागमस्यैवतद्विरुद्धमिथ्या
त्वाऽवबोधकस्वविषयबाधोयुज्यतेनतुश्रुत्यावर्णपदादिरूपप्रपञ्चसत्यत्वांशमात्रप्रतिषेधेसतिनोपजीव्यविरोधइतिवाच्यं । नेव

नानास्तिकिञ्चनेत्यादिनास्वरूपेणैववर्णपदादिनिखिलप्रपञ्चाभावबोधनादितिचेदत्रकेचिदाहुः। वृषमानयेत्यादिवाक्यंश्रवणदोषाद्वृषभमानयेत्यादिरूपेणश्रुतवतोपिशाब्दप्रमितिदर्शनेनापिभ्रमप्रमासाधारणमेवशब्दप्रत्यक्षंशाब्दबोधोपजीव्यमितिवाच्यमस्माकन्तुनिषेधश्रुतिप्रामाण्यात्सर्व्वत्रभ्रमरूपमेवप्रत्यक्षशाब्दबोधव्यवहारेषुकारणमितिविशेषान्नोपजीव्यविरोधइति॥१॥

अन्येतुपूर्व्वमतेप्रत्यक्षज्ञानमात्रमुपजीव्यंविषयोवर्णपदादिरूपःप्रपञ्चोनोपजीव्यइत्युक्तम्तदयुक्तंनिर्विषयप्रत्यक्षज्ञानायोगाद्तोवर्णादिस्वरूपमप्युपजीव्यत्वेनस्वीकर्त्तव्यमेवातोनेहनानास्तिकिञ्चनेत्यादिश्रुत्यानिषेधेपियावद्ब्रह्मज्ञानमनुवर्त्तमानस्यार्थक्रि

यासमर्थस्यशशशृङ्गविलक्षणस्यवर्णपदादिस्वरूपस्याङ्गीकारान्नोपजीव्यविरोधोनचप्रपञ्चनिषेधतद्भावयोःकथमेकत्रस्थितिरि
तिवाच्यम् संयोगतदत्यन्ताभावयोरिवशुक्तिरजततदत्यन्ताभावयोरिवचैकत्रतयोरपिस्थितिसम्भवादित्याहुः ॥ २ ॥ अपरेतुने
हनानास्तीत्यादिश्रुतेःप्रपञ्चेसत्यत्वधर्म्ममात्रनिषेधेतात्पर्य्यंनतुप्रपञ्चस्वरूपधर्म्मिनिषेधेऽपितात्पर्य्यमतोनोपजीव्यविरोधोनाप्य
भावाधिकरणमात्रेप्रतियोगिस्थित्ययोगात्प्रपञ्चाधिकरणेब्रह्मणिप्रपञ्चतदभावयोरेकदाभ्युपगमलक्षणःपूर्व्वमतेइवात्रदोषइति
वदन्ति ॥ ३ ॥ अन्येतुपूर्व्वमतेब्रह्मप्रपञ्चशुक्तिरजतादिनिष्ठपारमार्थिकव्यवहारिकप्रातिभासिकसत्तात्रयस्वीकरणंनिःप्रमाणि

कमितिदोषंमन्यमानाःप्रपञ्चेस्वातंत्र्येणसत्यत्वप्रतीत्यभावाद्ब्रह्मनिष्ठपारमार्थिकसत्तायाएव सन्घटइत्यादिप्रतीतेर्घटादिप्रप
ञ्चेऽपिप्रसक्त्यासत्तायाएकत्वाङ्गीकारेणतत्रपारमार्थिकसत्तानिषेधेएवश्रुतेस्तात्पर्य्यंनतुवर्णपदादिप्रपञ्चप्रत्यक्षविषयस्यश्रुत्युपजी
व्यांशस्यनिषेधेऽतोनोपजीव्यविरोधोनाप्यप्रसक्तप्रतिषेधतेतिवदन्ति ॥ ४ ॥ * ॥ इत्युपजीव्यविरोधपरिहारवादः ॥ * ॥ २ ॥ * ॥
अथप्रतिविम्बस्यविम्बाभेदभेदाभ्यांसत्यत्वमिथ्यात्ववादः॥ननुयदिघटादिप्रपञ्चेब्रह्मसत्तयैवसत्वव्यवहारसिद्धै।प्रथक्सत्त्वंनकल्पते
तत्कल्पनेमानाभावाल्लाघवाच्चतर्हिव्यवहितसत्यरजतातिरेकेणशुक्तौरजताभासोत्पत्तिरपिकिमर्थमुपेयतेतत्सत्तयैवशुक्तिरज

तसत्तायाव्यवहारिकप्रपञ्चसत्ववन्निर्वाहादितिचेन्नव्यवहितस्यासन्नि कृष्टस्यापरोक्ष्यासम्भवात्तन्निर्वाहाय तदुपगमात् नन्वेवं
प्रतिविम्बभ्रमस्थलेऽपिग्रीवास्थमुखातिरेकेणदर्पणेमुखाभासोत्पत्तिरुपेयास्यात् नचविम्बातिरिक्तप्रतिविम्बाभ्युपगमेइष्टापत्तिर्ब्रह्म
प्रतिविम्बजीवस्यापिततोभेदेनमिथ्यात्वापत्तेरितिचेन्नविवरणानुसारिणःप्राञ्चःग्रीवास्थएवमुखेदर्पणोपाधिसन्निधानदोषाद्दर्प
णस्थत्वप्रत्यङ्मुखत्वविम्बभेदानामध्याससम्भवान्नदर्पणे मुखावभासः कल्पनीयोगौरवाद्दर्पणेमुखंनास्तीति संसर्गमात्रवाधान्मि
थ्यावस्थान्तरत्वेनेदंमुखमितिस्वरूपवाधापत्तेर्दर्पणेमममुखंप्रतिभातीतिस्वमुखाभेदप्रत्यभिज्ञानाच्चेतिनचप्रतिविम्बत्वाद्यधिष्ठा

सि॰ ले॰ सा॰ सं॰ नस्यग्रीवास्थमुखस्यापरोक्ष्यासम्भव उपाधिप्रतिहतनयनरश्मीनांपरावृत्त्यबिम्बग्राहकत्वस्यफलकल्प्यत्वादिति ॥ १ ॥ अद्वैतवि
१९ द्याकृतस्तुत्रिविधजीववादिनांविद्यारण्यादीनांमतमाश्रित्यैवमाहुः चैत्रमुखाद्भेदेनतत्सदृशत्वेनपार्श्वस्थितैः स्पष्टं निरीक्ष्यमाणं
दर्पणेतत्प्रतिबिम्बंततोभिन्नंस्वरूपतोमिथ्यैवस्वकरगताद्रजतादिवच्छुक्तिरजतंशुक्त्यवच्छिन्नस्यैव पारमार्थिकसत्यस्य जीवस्य
नतुव्यावहारिकप्रातिभासकयोरिति। यत्तुप्रतिबिम्बंदर्पणादिषुमुखच्छायाविशेषएवेतिकस्यचिन्मतंतन्नछायाहिनाममौक्ति १९
कमाणिक्यसुवर्णशरीरादेःशुक्लरक्तपीतादिरूपवतोपितत्तदवयवैरालोकैःकियद्देशव्यापिन्यवरुद्धेतत्तद्देशावच्छिन्नात्मकंतमएवप्रति

विम्बस्यचविम्बसदृशश्मश्रुकादिरूपवत्त्वान्नछायात्वं । ननुतर्हियथातमसःछायद्रव्यानन्तर्भावेसिद्धान्तेदशमद्रव्यत्वंतद्वत्प्रतिविम्बस्यापिद्रव्यान्तरत्वमस्त्वितिचेत्किन्तद्रव्यान्तरं प्रतीयमानरूपपरिमाणसंस्थानविशेष प्रत्यङ्मुखत्वादिधर्मायुक्तंतद्रहितंवास्याद्न्त्ये नतेनद्रव्यान्तरेणरूपविशेषादिघटितप्रतिविम्बोपलम्भनिर्वाहइतिव्यर्थंतत्कल्पनं । प्रथमेकथमेकस्मिन्नल्पपरिमाणेदर्पणेयुगपत्सङ्कीर्णतयाप्रतीयमानानांमहापरिमाणानामनेकमुखप्रतिविम्बानांसत्यतानिर्वाहः । कथञ्चनिविडावयवानुगतेदर्पणेपूर्ववदतिष्ठमानेतदन्तर्हनुनासाद्यनेकनिम्नोन्नतावयववतोद्रव्यान्तररूपप्रतिविम्बस्योत्पत्तिरतोनप्रतिविम्बस्यद्रव्यान्तरत्वसम्भ

सि॰ ले॰ सा॰ सं॰ तस्मादसङ्गतःप्रतिविम्बसत्यत्ववादः ॥ २ ॥ ननुप्रतिविम्बाध्यासेद्वितस्योपादानमज्ञानंवाच्यंतच्चनसम्भवतिसर्व्वात्मनादर्पणा
२० दिरूपाधिष्ठानगोचरसाक्षात्कारेणदर्पणाद्यवच्छिन्नचैतन्यनिष्ठाज्ञानस्यनिवृत्तत्वात्तादृशसाक्षात्कारेसत्येवानुवर्त्तमानस्यप्रति
विम्बाध्यासस्यतन्निवर्त्यत्वायोगात्तन्निवर्त्तकज्ञानान्तरानुपलम्भाच्चज्ञानैकनिवर्त्यत्वंविनातस्यमिथ्यात्वानुपपत्तेस्तस्मात्तन्मिथ्या
त्ववादोप्यसङ्गतइतिचेन्नकेचिद्यद्यपिसर्व्वात्मनाधिष्ठानज्ञानानन्तरमपिजायमानेप्रतिविम्बाध्यासेनाप्रतिविम्बस्याधिष्ठानाव २०
रणरूपमज्ञानमुपादानंनवाऽधिष्ठानविशेषांशज्ञानंनिवर्त्तकं

तथाप्यधिष्ठानाज्ञानस्यावरणशक्त्यंशेननिवृत्तावपिविक्षेपशक्त्यंशेनानुवृत्तिसम्भवात्तदेवोपादानंविम्बोपाधिसन्निधिनि
वृत्तिसचिवंचाधिष्ठानज्ञानंसोपादानस्यतस्यनिवर्त्तकमित्याहुः ॥३॥ अन्येतुपूर्वमतेषुचैत्रमुखेदर्पणस्थत्वादिकंनास्तीति
ज्ञानेनदर्पणेचैत्रमुखंनास्तीतिज्ञानेनवाऽवस्थाऽज्ञानस्यावरणविक्षेपशक्तिभ्यां सहनिवृत्त्यवश्यंभावेनतदुत्तरक्षणे चैत्रमु
खदर्पणयोःसन्निधानेसत्यधिष्ठानसाक्षात्कारवतोविष्णुमित्रस्यदर्पणेचैत्रमुखमितिभ्रमाभावप्रसङ्गरूपंदोषंमन्यमानाःमू
लाज्ञानंप्रतिविम्बाध्यासोपादानंनचाचाप्युक्तदोषतौल्यं ब्रह्मज्ञानस्यैवमूलाज्ञाननिवर्त्तकत्वेनतद्व्यतिरिक्तबाह्यविषयज्ञा
नानांस्वस्वविषयावच्छिन्नचैतन्यप्रदेशेमूलाज्ञानावरणशक्त्यंशाभिभावकत्वेपि तदीयविक्षेपशक्त्यंशानिवर्त्तकत्वात्तदुत्त
रकालेपिभ्रमःस्यादेवाऽवस्थाज्ञानस्यावरणविक्षेपशक्तिभ्यांसहनिवृत्तादपिमूलाज्ञानस्यताभ्यां सहविद्यमानत्वादविद्या
तिरिक्तविम्बोपाधिसन्निधिरूपदोषजन्यत्वेनप्रतिविम्बस्यनव्यावहारिकत्वापत्तिरपीत्याहुः ॥ ४ ॥ इतिप्रतिविम्बसत्य
त्वमिथ्यात्ववादः ॥ ३ ॥ अथस्वप्नाधिष्ठानवादः ॥ एवंस्वप्नाध्यासस्याप्यनवच्छिन्नचैतन्येऽहङ्कारोपहितचैतन्येवाऽवस्थारू

याज्ञानशून्येऽध्यासात्सुषुप्ताख्यं तमोज्ञानंयद्बीजंस्वप्नबोधयोरित्याचार्याणांस्वप्नजाग्रत्प्रपञ्चयोरेकाज्ञानकार्यत्वोक्तेश्चमू
लाज्ञानकार्यतयास्वोपादाननिवर्त्तकब्रह्मज्ञानैकबाध्यस्याविद्यातिरिक्तनिद्रादिदोषजन्यतयैव प्रातिभाषिकत्वमितिके
चिदाहुः ॥ १ ॥ अन्येतुस्वप्नस्यमूलाज्ञानकार्यत्वेपिबाध्यन्तेचैतेरथादयःस्वप्नदृष्टाःप्रबोधेइतिभाष्याद्युक्तेरुत्थितस्यस्वप्नमि
थ्यात्वानुभवाच्चजाग्रद्बोधस्यतत्कारणमूलाज्ञानानिवर्त्तकत्वेपिस्वप्नाध्यासस्यनिवर्त्तकत्वंसम्भवति॥ यथादण्डभ्रमस्यरज्ज्व
वच्छिन्नचैतन्याज्ञानानिवर्त्तकत्वेपिसर्पभ्रमनिवर्तकत्वमित्याहुः ॥ २ ॥ अपरेतुजाग्रद्भोगप्रदकर्मोपरमेसतिजाग्रत्प्रपञ्चद्र
ष्टारंप्रतिविम्बरूपंव्यावहारिकंजीवं तद्दृष्टंप्रपञ्चमप्यावृत्त्यजायमानोमूलाज्ञानस्यावस्थाविशेषएव स्वाप्नप्रपञ्चाध्यासस्य
स्वाप्नजीवस्यचोपादानंनतुमूलाज्ञानं तथाचपुनर्जाग्रद्भोगप्रदकर्मजन्येजागरणेसतिव्यावहारिकजीवजगतोःस्वरूपज्ञा
नात्स्वोपादाननिद्रारूपाज्ञाननिवर्त्तकादेवप्रातिभासिकयोःस्वाप्नजीवप्रपञ्चयोर्बाधइत्याहुः ॥ ३ ॥ नन्वनवच्छिन्नचैत
न्येअहङ्कारावच्छिन्नचैतन्येवास्वाप्नप्रपञ्चाध्यासइतिप्रागुक्तं पक्षद्वयमप्ययुक्तंआद्येस्वाप्नगजादेर्देहाद्बाह्यदेशस्थत्वंवक्तव्यं

तथाचतस्यकिंसाक्षिभास्यत्वमैन्द्रियकत्वंवा नाद्यः अहङ्कारोपहितसाक्षिणोऽवच्छिन्नदेशत्वेनसुखादिवदन्तःकरणवृत्तिमनपेक्ष्यतेनतत्प्रकाशस्यासम्भवात् नद्वितीयःतदानींचक्षुरादीनामुपरततयावृत्त्युदयासम्भवेनतत्संसर्गमपश्यतनापितत्प्रकाशनस्यचायोगात्द्वितीयेइदंरजतमितिवदहंगजइतिअहंसुखीतिवदहंगजवानितिवाध्यासप्रसङ्गाद्चकेचिदाद्यंपक्षमेवाहङ्कारानवच्छिन्नचैतन्यंनदेहाद्बहिःस्वाप्नप्रपञ्चस्याधिष्ठानमुपेयतेकिन्तुतदन्तरेव अतएवदृश्यमानपरिमाणोचितसम्पत्त्यभावात्स्वाप्नगजादीनांमायामयत्वंसमर्थयन्ते ॥ ४ ॥ अन्येत्वनवच्छिन्नब्रह्मचैतन्यनवृत्त्यऽभिव्यक्तंतत्स्वाप्नप्रपञ्चस्याधिष्ठानं अशब्दमूलकानवच्छिन्नचैतन्यगोचरवृत्त्युदयासम्भवात्अहङ्काराद्यवच्छिन्नचैतन्येएवाहमाकारवृत्त्युदयदर्शनात्तस्मात्स्वतोऽपरोक्षमहङ्काराद्यनवच्छिन्नजीवचैतन्यंतदधिष्ठानं अतएवसंक्षेपशारीरके अपरोक्षरूप्यविषयभ्रमधीरपरोक्षमास्पदमपेक्ष्यभवेत् मनसास्वतोनयनतोयदिवास्वप्नभ्रमादिषुतथाप्रथितेरित्याहुः ॥ ५ ॥ अपरेत्वहङ्कारोपहितमहङ्कारप्रतिविम्बरूपचतन्यमात्रंस्वप्नप्रपञ्चाधिष्ठानमतउपाधेरधिष्ठानकोटावप्रवेशान्नाहंगजइत्याद्यनुभवप्र

सङ्गच्छति अविद्यायांविम्बभूतब्रह्मचैतन्यस्यतस्यांप्रतिविम्बभूतजीवचैतन्यस्यवास्वप्नप्रपञ्चाधिष्ठानत्वमतेतयोः सर्वप्रमातृसाधारणत्वात्स्वप्नप्रपञ्चस्यापिसर्वसाधारण्यंस्यादितिदोषंपूर्वमतयोर्मन्यमानाअन्तःकरणप्रतिविम्बचैतन्यस्य तदधिष्ठानत्वेतुसाधारण्यप्रसङ्गदोषोनास्तीत्येवंद्वितीयंपक्षंसमर्थयन्ते ॥६॥ नन्वेवंशुक्तिरजतादेरसाधारण्यंनस्यात् तदधिष्ठानचैतन्यस्यसाधारणत्वादितिचेदत्रकेचित्शुक्तीदमंशसंसृष्टवृत्तौशुक्तीदमंशावच्छिन्नब्रह्मचैतन्यप्रतिविम्बेशुक्तिरजताध्यासइत्याहुः ॥ ७ ॥ केचित्त्वन्तःकरणवृत्तिप्रतिविम्बंप्रत्यविद्यावृत्तिप्रतिविम्बंप्रतिवाविम्बभूतेशुक्तीदमंशावच्छिन्नब्रह्मचैतन्यएवशुक्तिरजताध्यासःयद्रजतंयत्पुरुषीयाज्ञानोपादानकं तद्रजतन्तस्यैवपुरुषस्यप्रत्यक्षमतोनतस्यसर्वसाधारण्यमित्याहुः ॥८॥ इतिस्वप्नाधिष्ठानवादः ॥४॥ अथस्वप्नपदार्थानुभववादः ॥ ननुशुक्तिरजताध्यासेकवितार्किकोक्तरीत्यासाक्षाद्वाचाक्षुषत्वानुभवोस्तुअधिष्ठानद्वाराचक्षुषोऽपेक्षणाद्वाचाक्षुषानुभवोस्तुस्वाप्नगजादिचाक्षुषानुभवःकथंस्याद्व्यवहारिकेन्द्रियाणां तदानींस्वस्वगोलकादुपरतत्वेनतत्प्रकाशनसामर्थ्याभावात्तद्यतिरिक्तस्वाप्नसूक्ष्मेन्द्रियाद्यप्रसिद्धेश्चेतिचेदु

च्यते अथायंपुरुषःस्वयंज्योतिरितिश्रुत्यास्वयंज्योतिःसाक्षीरूपएवस्वाप्नगजाद्यनुभवः स्वाप्नगजादौचाक्षुषानुभवस्तुभ्रमएव
नचस्वप्नेऽन्तःकरणवृत्त्यभावेउत्थितस्यस्वप्नदृष्टगजाद्यनुसन्धानानुपपत्तिःसुषुप्तिकृतयाऽविद्यावृत्त्यातदुपपत्तेरित्येकेवद
न्ति ॥१॥ अथवातदेतत्सत्त्वंयेनपश्यतीत्यादिश्रुतेरस्तु स्वप्नेपिकल्पतरूक्तरीत्यास्वाप्नगजादिगोचरचक्षुराद्यनपेक्षान्तःक
रणवृत्तिरतोनसंस्कारानुपपत्तिः ननुस्वप्नेपिचक्षुरुन्मीलनेगजाद्यनुभवस्तन्निमीलनेनेतिजाग्रद्वदितिचेत् चक्षुषारजतंप
श्यामीत्यनुभववदयमपिकश्चित् स्वाप्नभ्रमोभविष्यति निद्राकारपरिणतयामाययाकेवलसाक्षिरूपेएवस्वाप्नपदार्थानुभवे
चक्षुराद्यनुविधानंतदनुविधायिनीवृत्तिर्वाध्यस्यतेइतिस्वाप्नानुभवोनचाक्षुषः अपितु तच्चाक्षुषत्वप्रतीतिर्भ्रमस्तस्माद्
जाग्रद्गजाद्यनुभवश्चक्षुरादिजन्योनस्वाप्नगजाद्यनुभवस्तज्जन्यइतिकेचिदाहुः ॥ २ ॥ दृष्टिसृष्टिवादिनस्तुजाग्रत्प्रपञ्चस्या
पिदृष्टिसमसमयांसृष्टिमुपेत्यघटादिदृष्टेःपूर्वंघटाद्यभावेनस्वाप्नानुभववद्जाग्रद्गजाद्यनुभवोपिनचाक्षुषानुभवः अपितु
साक्षिरूपइतीत्याहुः ॥३॥ इतिस्वप्नानुभववादः ॥५॥ अथसृष्टिकाल्पकवादः ॥ ननुदृष्टिसृष्टिमवलम्ब्यकृत्स्नस्यजाग्रत्प्रप

ञ्चस्यकल्पितत्वोपगमेकःकल्पकइतिचेदत्रकेचिदाहुः पूर्वपूर्वकल्पिताविद्योपहितःपरमात्माउत्तरोत्तराविद्यादिसृष्टिकल्पकःअनादित्वाच्चकल्प्यकल्पनाप्रवाहस्यनानवस्थितिरिति नचाऽनाद्यविद्यायाःशुक्तिरजतवत्कल्पितत्वेसाद्यनादिभेदानुपपत्तिरितिवाच्यंयथास्वप्नेकल्प्यमानंगोपुरादिकंकिञ्चित्पूर्वसिद्धत्वेनकिञ्चित्तदानीमुत्पाद्यत्वेनकल्प्यतेतथाजागरेपूर्वापूर्वाविद्योपहितेनात्मनाविद्यानादित्वेनकल्प्यतेतदितरत्सादित्वेनेत्येतावतासाद्यनादिविभागोपपत्तेरिति ॥१॥ अन्येतुवस्तुतोऽनाद्येवाविद्यादि तत्रदृष्टिसृष्टिर्नोपेयतेकिन्त्वविद्यादितोऽन्यत्रप्रपञ्चमात्रइत्याहुः ॥ नन्वेवमपिवियदादिसर्गतत्क्रमादेःकःकल्पकः नकोऽपिकल्पकः किमालम्बनातद्ध्यात्मनआकाशःसम्भूतइत्यादिश्रुतिः निःप्रपञ्चब्रह्मात्मैक्यावलम्बनेत्यवेहीति ॥ २ ॥ स्वप्रकाशज्ञानस्वरूपदृष्टिरेवसृष्टिरितिदृष्टिसृष्टिवादिनः सिद्धान्तमुक्तावलीकारास्तुदृश्यस्यदृष्टिभेदेप्रमाणाभावादृष्टेश्चस्वयंप्रकाशज्ञानस्वरूपत्वात्ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः अर्थस्वरूपंभ्राम्यन्तःपश्यन्त्यन्येकुदृष्टयइतिस्मृतेश्चेत्याहुः ॥३॥ सृष्टिदृष्टिवादिनस्तुपरमेश्वरएवप्रपञ्चकल्पकइतिवदन्ति तथाहि वियदादिसृ

ष्टिप्रतिपादकश्रुतिदर्शितक्रमेणपरमेश्वरसृष्टमज्ञातसत्तायुक्तमेवविश्वं तत्तद्विषयप्रमाणावतरणेतस्य दृष्टिसिद्धिरितित
स्यचपरमेश्वरसृष्टस्यशुक्तिरजतादिविलक्षणत्वेन व्यवहारिकसत्यस्यापिप्रपञ्चस्यज्ञानैकनिवर्त्यत्वेनसदसद्विलक्षणत्वे
नप्रतिपन्नोपाधौचैकालिकनिषेधप्रतियोगित्वेनचमिथ्यात्वमपिसिद्धमिति ॥ ४ ॥ नन्वेवमहङ्कारतद्धर्माणामप्युक्तरू
पमिथ्यात्वंवियदादिवत्कल्पितत्वाभावेपिसिध्यतीतिभाष्यटीकाविवरणेषु तदध्यासेकारण चितयसम्पादनादिश्रमोव्य
र्थइतिचेदहङ्कारादीनामपिकेवलसाक्षिवेद्यतयाशुक्तिरजतवत्प्रातिभासिकत्वमभिमतंतेषांनतुदृष्टिसृष्टिमवलम्ब्येतिचि
त्सुखाचार्याआहुः ॥ ५ ॥ अभ्युपेत्यवादमाचंतद्द्वितीयाधिष्ठानब्रह्मात्मप्रमाणस्यचैतन्यस्येत्यादितचत्यकारणचितय
सम्पादनग्रन्थस्यचैतन्यस्य प्रमाकरणत्वेवेदान्तकरणत्वादिकल्पनाभङ्गेनप्रौढिवादत्वस्यस्फुटत्वादितिरामाद्वयाचार्य्या
आहुः ॥ ननुदृष्टिसृष्टिवादेसृष्टिदृष्टिवादेचमिथ्यात्वसंप्रतिपत्तेःकथंमिथ्याभूतस्यार्थक्रियाकारित्वमितिचेत्स्वप्नवदि
ति ब्रूमइति ॥ ६ ॥ इतिसृष्टिमल्पकवादः ॥ ६ ॥ अथमिथ्याभूतस्यापिव्यवहारिकसत्यार्थक्रियाकारित्ववादः ॥ ननु

सि०ले०सा०सं स्वाप्नजलादिसाध्यास्नानादिरूपार्थक्रियाऽसत्या जाग्रज्जलादिसाध्यार्थक्रियातुसत्या अतोविषमोयंस्वप्नदृष्टान्तइतिचे
२४ च्छृणु जाग्रत्स्वप्नयोरुभयोरपितत्त्यजलादेः स्वसमानसत्ताकार्थक्रियाकारित्वस्यतुल्यत्वेननदृष्टान्तवैषम्यमितिकेचि
दाहुः अद्वैतविद्याचार्यास्त्वाहुः स्वाप्नपदार्थानांनकेवलंप्रवोधवाध्यार्थक्रियामात्रकारित्वंस्वप्नाङ्गनाभुजङ्गादीनांतद
वाध्यसुखभयादिजनकत्वस्यापिदर्शनात्स्वाप्नविषयजन्यस्यापिहिसुखभयादेःप्रवोधानन्तरंनवाधोनुभूयते प्रत्युत प्रवोधा
नन्तरमपिमनःप्रसादशरीरकम्पादिनासहतदनुवृत्तिदर्शनात्प्रागपिसत्त्वमेवावसीयतेऽतोनविषमोदृष्टान्तइति ॥ २ ॥
केचित्तुजागरेप्यसत्यार्थस्यव्यवहारिकसत्यार्थक्रियाकारित्वदर्शनान्नमिथ्याभूतप्रपञ्चस्यसत्यार्थक्रियाकारित्वप्रदर्शना
र्थंस्वप्नदृष्टान्तापेदेत्याहुः तथाहियथाघटादिप्रकाशनसमर्थंतत्त्यपुरुषान्तरंनिरीक्ष्यमाणाऽऽलोकवतिस्वल्पगृहेझटिति
प्रविष्टेनपुरुषान्तरेणकल्पितेनाप्यभिनवतमसाप्रसिद्धसन्तमसोचितघटाद्यावरणसदृशंतंपुरुषंप्रत्येवतत्त्यघटाद्यावरणं २४
व्यवहारिकंक्रियते दीपाद्यानयनेतुतमोऽपनयनमपिदृश्यतेतन्नयनेतु पुनरावरणमपिदृश्यतेतथामिथ्याभूतेनापिप्रपं

ञ्चेन व्यवहारिकसर्व्वार्थक्रियापिस्यादिति ॥ ३ ॥ अन्येतुपानावगाहनाद्यर्थक्रियायांजलादिस्वरूपमात्रमुपयोगिन
तन्नतंसत्यत्वंतस्यतत्कारणत्वतदवच्छेदकत्वयोरभावादतोमिथ्यात्वेप्यर्थक्रियाकारित्वसम्भवान्मिथ्यैवप्रपञ्चोनसत्यइत्या
हुः ॥ ४ ॥ ननु मिथ्यात्वस्यप्रपञ्चधर्मस्यसत्यत्वेब्रह्माद्वैतत्वक्षतेरतस्तस्यापिमिथ्यात्वंवक्तव्यमितिकुतःप्रपञ्चस्यसत्यत्वक्ष
तिर्मिथ्याभूतं ब्रह्मणःसप्रपञ्चत्वंननिःप्रपञ्चत्वविरोधीतित्वदुक्तरीत्यामिथ्याभूतमिथ्यात्वस्यप्रपञ्चनिष्ठसत्यत्वाविरोधि
त्वादत्राहुः अद्वैतदीपिकाकाराबियदादिप्रपञ्चसमानस्वभावंमिथ्यात्वं तच्चधर्मिणःसत्यत्वप्रतिक्षेपकंधर्मस्यस्वविरुद्ध
धर्मप्रतिक्षेपकत्वेहि उभयवादिसिद्धंधर्मिसमसत्वंतच्चंनपारमार्थिकत्वंअघटत्वादिप्रतिक्षेपकेघटत्वादावस्माकंपारमा
र्थिकत्वासंप्रतिपत्तेर्ब्रह्मणःसप्रपञ्चत्वंनधर्मिसमसत्ताकमितिननिःप्रपञ्चत्वप्रतिक्षेपकं ॥ ५ ॥ अथवायस्यस्वसाक्षात्का
रानिवर्त्त्योधर्मःसतत्रस्वविरुद्धधर्मप्रतिक्षेपकःएवञ्चमिथ्यात्वंकल्पितमपिप्रपञ्चसाक्षात्कारानिवर्त्त्यमितिसत्यत्वप्रतिक्षेप
कमेब्रह्मवणःसप्रपञ्चत्वंतुब्रह्मसाक्षात्कारनिवर्त्त्यमितिननिःप्रपञ्चत्वप्रतिक्षेपकमितिएतेनव्यवहारिकप्रपञ्चस्यमिथ्याभू

तस्यापिसत्त्वार्थक्रियाकारित्वस्यव्यवस्थापनेन शब्दगम्यस्यब्रह्मणः सत्यत्वेशब्दनिष्ठब्रह्मवोधनयोग्यतायाःशाब्दधीप्रामाण्यस्यचसत्यत्वंवक्तव्यमित्याशङ्कापिनिरस्ता शब्दनिष्ठव्यवहारिकयोग्यतादेरपिब्रह्मणःशाब्दवोधसम्भवादिति ॥ ६ ॥ इत्यर्थक्रियाकारित्ववादः ॥ ७ ॥ अथौपाधिकजीवभेदेनसुखदुःखासांकर्यव्यवस्थावादः ॥ नन्वारम्भणशब्दादिभिरचेतनस्यवियदादिप्रपञ्चस्यमिथ्यात्वसिद्धावपिचेतनानामपवर्गभाजांमिथ्यात्वायोगाददद्वितीयब्रह्मणिसमन्वयोनयुक्तोनचतेषांब्रह्माभेदःपूर्वोक्तोयुक्तः परस्परंभिन्नानांतेषामेकेनब्रह्मणाऽभेदसम्भवात् नचतद्भेदासिद्धिःसुखदुःखादिव्यवस्थयातत्सिद्धेरितिचेदत्रकेचिदाहुः सिध्यत्वेवान्तःकरणोपाधिभेदेनजीवस्यप्रमातुर्भेदात्तन्निष्ठसुखदुःखादिव्यवस्था एवंसुखदुःखाद्यनुभवात्मकसाक्षिव्यवस्थापिसिध्यति तत्तदन्तःकरणतादात्म्यापत्त्यातत्तदन्तःकरणभेदेनभेदवतएवसाक्षिणस्तत्तदन्तःकरणसुखदुःखाद्यनुभवरूपत्वेनतद्व्यवस्थायाअप्युपपत्तेरतोनपारमार्थिकजीवभेदइति ॥ १ ॥ अन्येतुजडस्य कर्तृत्वादिबन्धाश्रयत्वानुपपत्तेश्चिदाभासोबन्धाश्रयस्तस्यचप्रत्यन्तःकरणंभेदात्सर्वासुखित्वदुःखित्वादिव्यवस्थासिध्यतिमु

त्तयन्वयिंनिचपारमार्थिकजीवे वन्धाश्रयचिदाभासतादात्म्याध्यासाधिष्ठानत्वेन वन्धोपिसम्भवतीतिन वन्धमुक्तिवैयधिकरण्यमित्याहुः ।। २ ।। अपरेत्वन्तःकरणविशिष्टस्यसुखदुःखादिभोक्तृत्वश्रवणादन्तःकरणभेदेन तद्विशिष्टभेदात्तद्व्यवस्था नचैवंविशिष्टस्यवन्धः शुद्धस्यमोक्षइतिवैय्यधिकरण्यंविशिष्टस्यशुद्धानतिरेकादित्याहुः ।। ३ ।। इतरेतु अस्तु कैवलश्चेतनःकर्तृत्वादिवन्धाश्रयःस्फटिकलौहित्यन्यायेनान्तःकरणस्यतद्विशिष्टस्यवाकर्तृत्वाद्याश्रयस्यसन्निधानाच्चेतनेपिकर्तृत्वाद्यध्यासोपगमादित्याहुः ।। ४ ।। एकेत्वन्तःकरणरूपोपाधिभेदात्तदुपहितेसुखदुःखादिव्यवस्थासिद्धिर्मणिमुकुरकृपाणाद्युपाधिकल्पितभेदेनमुखेश्यामावदातवर्तुलदीर्घभावादिधर्माणांसंप्रतिपत्तेरित्याहुः ।। ५ ।। इतिसुखदुःखाद्यसांकर्यवादः ।। ८ ।। अथोपाधिस्वरूपवादः ।। एवमुपाधिवशाद्व्यवस्थोपपादनेसम्भावितेजीवानांपरस्परसुखाद्यननुसन्धानप्रयोजकउपाधिःकइतिनिरूपणीयमत्रकेचिदाहुः भोगायतनाभेदतद्भेदावनसन्धानाननसन्धानप्रयोजकावुपाधीशरीरावच्छिन्नवेदनायास्तदवच्छिन्नेनानुसन्धानात् चरणावच्छिन्नवेदनायाहस्तावच्छिन्नेनाननुसन्धानाद्धस्ता

वच्छिन्नोहं पादावच्छिन्नवेदनामनुभवामीत्यप्रत्ययाच्चरणलग्नकण्टकोद्धरणेहस्तव्यापारस्तुचरणशरीरयोरवयवावयवि
त्वेनाभेदादिति ॥ १ ॥ अपरेतुविश्लिष्टोपाधिभेदोननुसन्धानप्रयोजकःसंश्लिष्टस्तूपाधिभेदोनुसन्धानप्रयोजकः तथाच
हस्तावच्छिन्नस्यचरणावच्छिन्नवेदनानुसन्धानाभ्युपगमेपिनदोषइत्याहुः ॥ २ ॥ अपरेतुशरीरैक्यतद्भेदावनुसन्धानतद्
भावप्रयोजकोपाधीइत्याहुः ॥ ३ ॥ अपरेत्वन्तःकरणैक्यतद्भेदाभ्यांसुखदुःखादीनामनुसन्धानाननुसन्धानव्यवस्थामा
हुः ॥ ४ ॥ केचित्त्वज्ञानानिजीवोपाधिभूतानितदभेदभेदाभ्यामनुसन्धानाननुसन्धानव्यवस्थामाहुः ॥ ५ ॥ इत्युपाधि
स्वरूपवादः ॥ ६ ॥ अथजीवादिवास्तवभेदनिरासवादः ॥ अत्रकेचित्त्वंशोनानाव्यपदेशादित्यधिकरणे अदृष्टानिय
मात् अभिसन्ध्यादिष्वपिचैवंप्रदेशादितिचेन्नान्तर्भावादितिसूत्रतद्भाष्यरीतिमनुसृत्यैकस्मिन्नात्मन्युपाधिभेदेनव्यवस्था
नुपगमेकणभुगादिरीत्यात्मभेदवादेपिव्यवस्थानुपपत्तितौल्यमाहुः तथाहि चैत्रचरणलग्नकण्टकेनचैत्रस्यवेदनोत्पादन
समये अन्येषामप्यात्मनां कुतोवेदनानजायते सर्वात्मनांसर्वगतत्वेनचैत्रशरीरान्तर्भावाविशेषाददृष्टस्याप्यस्यैवेदमिति

नियमासिद्धेरहमिदंप्राप्नुयामित्यभिसन्ध्यादीनामपि सर्वात्मसाधारणमनःसंयोगादिनिष्पाद्यतयाव्यवस्थित्यसिद्धेः ननु स्वकीयमनःसंयोगएवाभिसन्ध्याद्यसाधारणंकारणमितिचेन्नात्मनांविभुत्वात्सर्वमनःसंयुक्तत्वेनास्यैवेदंमनोनान्यस्यस्वमितिनियन्तुमशक्यत्वात् नन्वात्मनांविभुत्वेप्येकस्मिन्शरीरएकस्यैवात्मनःप्रदेशोनात्मान्तराणामितिनियमादात्मप्रदेशानामेवसुखदुःखादिभाक्तेनवास्तवनानात्मवादेनसुखदुःखादीनामव्यवस्थेतिचेन्न यस्मिन्नासनप्रदेशेचैत्रःसुखाद्यनुभूयतस्मात्प्रदेशादपक्रान्तस्तस्मिन्नेवप्रदेशेमैत्रेसमागते तस्यापितत्रसुखदुःखादिदर्शनेनातस्तस्मिन्नेवासनेचैत्रशरीरापक्रमणेपि चैत्रात्मनःस्थिरत्वेनादृष्टतत्प्रदेशविशेषस्यापिमैत्रशरीरेन्तर्भावाच्चैत्रमैत्रात्मनोर्मैत्रशरीरेभोगसांकर्यप्रसङ्गस्तस्मादात्मभेदेपि व्यवस्थादुरुपपादेति ॥ १ ॥ सन्तुतर्ह्यणवएवात्मानोयदिविभुत्वेव्यवस्थानसुवचानैवमात्मनामणुत्वेकदाचित्सर्वाङ्गेषुसुखोदयस्यकरशिरश्चरणादियुगपत्प्रेरणस्यचानुपपत्तेरितिकेचिदाहुः ॥ २ ॥ ननूत्क्रान्तिगत्यागतिश्रवणान्यथानुपपत्त्याऽणुर्ह्येवैष आत्मेत्यादिश्रुतिषु साक्षादणुत्वश्रवणेनाणवएवात्मानःद्रोणंबृहस्पतेर्भागमित्यादिस्मृत्यनुसा

रेणजीवानामंशवत्त्वात्करशिरश्चरणानुगतेषु जीवांशेषुसुखदुःखादियौगपद्यंकायव्यूहगतेषुयोगिजीवांशेषु भोगवैचित्र्यं
चोपपद्यते एवञ्चजीवाणुत्ववादेएकस्मिनशरीरेकायव्यूहेच युगपत्सुखदुःखादिव्यवस्थामर्वाचीनाउपपादयन्तीतिचै
द्राद्वैतदीपिकाकाराआहुः तथाहि एवमपिकथंव्यवस्थासिद्धिः चैत्रस्यपादेमेदुःखंशिरसिमेसुखमितिस्वांशभेदगतसु
खदुःखाद्यनुसन्धानवन्मैत्रगतसुखदुःखानुसन्धानस्यापिदुर्वारत्वात्तुल्योहिचैत्रजीवात्स्वांशयोःकरशिरोगतयोर्मैत्रस्यच
भेदः कायव्यूहस्थलेचांशांशिनोस्त्वयाभेदाभेदाभ्युपगमादेकस्मिन्शरीरेपितथैवाङ्गीकर्त्तव्यत्वेनैकदेहेऽनेकभोक्तापत्त्याद
योदोषाअजह्याएवंशुद्धभेदाङ्गीकारस्यापिविकल्पासहत्वेनदुःसाध्यत्वमूह्यं तस्मात्प्रपञ्चस्यमिथ्यात्वेनजीवानांचब्रह्माभि
न्नत्वेनवेदान्तानामद्वितीयेब्रह्मणिसमन्वयस्यनकश्चिद्विरोधइति ॥ ३ । इतिवास्तवभेदवादिपक्षनिरासवादः ॥१०॥
समाधानसंख्या ॥ ५२ ॥ इतिश्रीशास्त्रसिद्धान्तलेशसारसङ्ग्रहेद्वितीयोऽविरोधाभिधः परिच्छेदःसमाप्तिमगात् ॥२॥
श्रीगणेशायनमः ननुकथंविद्ययैवब्रह्मप्राप्तिर्यस्मात्कर्मणामपिसाक्षात्तत्प्राप्तिहेतुत्वंस्मर्यते तत्प्राप्तिहेतुर्विज्ञानंकर्मचोक्तं

महामुनेइतिचेन्न नान्यःपन्था विद्यतेऽयनायेतिश्रुतेर्नित्यसिद्धब्रह्मावाप्तौविद्यातिरिक्तस्यसाधनत्वासम्भवाच्च क्वतर्हिकर्मणामुपयोगइतिचेदत्रवाचस्पतिमतानुवर्त्तिनआहुः तमेतंवेदानुवचनेनेत्यादिश्रुतेर्विद्योत्पादनद्वाराब्रह्मावाप्त्युपायभूतायांविविदिषायामुपयोगइति ब्रह्मप्राप्तौतुकर्मणांपरम्परयासाधनत्वेनात्पर्य्यंपूर्वोक्तस्मृतेरपीतिचाहुः ॥ १ ॥ विवरणानुसारिणस्त्वाहुःप्रकृतिप्रत्ययार्थयोःप्रत्ययार्थस्यप्राधान्यमितिसामान्यन्यायादिच्छाविषयतयाशाब्दबोध्य एवशाब्दसाधनतान्वयइतिस्वर्गकामादिवाक्योक्तन्यायविशेषस्यबलीयस्त्वात्प्रकृत्यभिहितायांविद्यायांयज्ञादीनामुपयोगमिति ॥ २ ॥ ननुकिमाश्रमकर्मणामयमुपयोगःश्रुत्याबोध्यतेकिंवान्येषामपीतिचेदत्रकेचिदाहुः वेदानुवचनेनेत्यादिश्रुतेर्ब्रह्मचर्याद्याश्रमकर्मणामेवविद्योपयोगइति ॥ ३ ॥ कल्पतरुकारास्तु अनाश्रमधर्माणामेवविद्योपयोगःकिन्तुवर्णिभिराश्रमिभिश्चकृतानिनित्यान्येवदुरितक्षयद्वाराविद्यायामुपयुज्यन्तेऽतएवरैक्वादीनांतत्त्वज्ञानंश्रुत्युक्तंसम्भाव्येतनत्वन्यथेत्याहुः ॥ ४ ॥ संक्षेपशरीरककारास्तनित्यानांकाम्यानांचकर्मणांसाधारण्येनविद्योपयोगोयज्ञादिशब्दाविशेषादित्याहुः

॥ ५ ॥ इतिकर्मोपयोगवादः ॥ १ ॥ अथविद्यार्थकर्माधिकारिवादः ॥ नन्वेवमपिकथंकर्मणैवहिसंसिद्धिमास्थिताजनकादयइत्यादिस्मरणनिर्वाहः नचतस्यविद्यार्थकर्मानुष्ठानपरत्वंविविदिषावाक्येब्राह्मणग्रहणेनब्राह्मणानामेवविद्यार्थकर्माधिकारप्रतीतेरतोजनकाद्यनुष्ठितकर्मणांसाक्षादेवमुक्त्युपयोगोवक्तव्यः मैवंविविदिषावाक्येब्राह्मणग्रहणस्यत्रैवर्णिकोपलक्षणत्वात् तदुक्तम्वार्त्तिके ब्राह्मणग्रहणंचात्रद्विजानामुपलक्षणं अवशिष्टाधिकारित्वात्त्रयाणामात्मबोधन इतिएवंचत्रैवर्णिकानांज्ञानार्थकर्मण्यधिकारइतिकेचिदाहुः ॥ १ ॥ अन्येत्वाहुःशूद्रस्याप्यस्त्येवविद्यार्थकर्माधिकारस्तस्यवेदानुवचनाद्यसम्भवेपिपञ्चाक्षरमन्त्रराजजपद्विजशुश्रूषानामकीर्त्तनतीर्थस्नानपाकयज्ञादावधिकारसम्भवादिति न च शूद्रस्यविद्यार्थित्वासम्भवःश्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतइत्यादीतिहासावगतविद्यामाहात्म्यस्यतस्यापि विद्यार्थित्वसम्भवादिति ॥ २ ॥ इतिविद्यार्थकर्माधिकारिवादः ॥ २ ॥ अथविद्यायांसन्न्यासोपयोगवादः नन्वस्तुकर्मणांचित्तशुद्धिद्वाराविद्योपयोगः सन्न्यासस्यकिंद्वाराविद्योपयोगइतिचेदत्रकेचिदाहुःविद्योत्पत्तिप्रतिबन्धकदुरितानामन

न्तत्वात्किञ्चिद्यज्ञाद्यनुष्ठाननिवर्त्त्यं किञ्चित्सन्न्यासापूर्वनिवर्त्त्यमितिकर्मवच्चित्तशुद्धिद्वारवसन्न्यासस्यापितदुपयोगस्तथाचसन्न्यासिनामेवंविद्यार्थविहितस्वाश्रमधर्माधिकारोगृहस्थादीनामपिकर्मच्छिद्रेषुश्रवणाद्यनुतिष्ठतां जन्मान्तरेसन्न्यासपूर्विकैवविद्याभविष्यतिजनकादीनांतुपूर्वजन्मकृतसन्न्यासाद्विद्येति ॥ १ ॥ अपरेतुशान्तोदान्तउपरतइत्यादिश्रुतौउपरतशब्दगृहीततयासन्न्यासस्यसाधनचतुष्टयान्तर्गतत्वात्त्यक्ताशेषक्रियस्यैवसंसारंप्रजिहासतः जिज्ञासोरेवचैकात्म्यंत्रय्यन्तेष्वधिकारिताइतिवार्त्तिकोक्तेश्चसन्न्यासापूर्वस्याधिकारिविशेषणत्वेनविद्योपयोगमाहुः सन्न्यासस्यापूर्वद्वारैवविद्योपयोगेप्रमाणकथनमात्रं पूर्वमतादत्रविशेषइतिज्ञेयम् ॥ २ ॥ परेतुश्रवणाद्यङ्गतयात्मज्ञानफलतासन्न्यासस्यसिद्धेतिविवरणोक्तेर्दृष्टद्वारसम्भवेऽदृष्टद्वारकल्पनानुपपत्तेश्च तथाच सन्न्यासस्यविक्षेपनिवर्त्तकत्वेनश्रवणाद्यङ्गतयाविद्याफलकत्वं नत्वदृष्टद्वारेतिसिद्धमित्याहुः ॥३॥ इतिसन्न्यासस्यविद्योपयोगवादः ॥ ३ ॥ अथश्रवणाधिकारवादः ॥ ननुसन्न्यासस्याधिकारिविशेषणत्वपक्षेश्रवणाङ्गत्वपक्षेचकथंक्षत्रियवैश्ययोर्वेदान्तश्रवणाद्यनुष्ठानं सन्न्यासस्यब्राह्मणाधिकारिकत्वा

ब्राह्मणोनिर्वेदमायात् ब्राह्मणोव्युत्थायब्राह्मणः प्रव्रजेदिति सन्न्यासविधिषुब्राह्मणग्रहणादितिवदन्त कश्चिद्यदिवेतरथा
ब्रह्मचर्यादेवप्रव्रजेद्गृहाद्वावनाद्वेत्यविशेषश्रुत्या ब्राह्मणःक्षत्रियोवापिवैश्योवाप्रव्रजेद्गृहात् त्रयाणांवर्णानांवेदमधीत्यच
त्वारआश्रमाइतिस्मृत्यनुगृहीतयाक्षत्रियवैश्ययोरपि सन्न्यासाधिकारतासिद्धेः श्रुत्यन्तरेषुब्राह्मणग्रहणंत्रयाणामुपलक्ष
णमतस्तयोरपिस्वमते सन्न्यासाधिकारदर्शनाच्छ्रवणाद्यनुष्ठानसिद्धिंसमर्थयन्ते ॥ १ ॥ अन्येत्वनेकेषु सन्न्यासविधिवाक्येषु
ब्राह्मणग्रहणादुदाहृतजाबालश्रुतौ सन्न्यासविधिवाक्येब्राह्मणग्रहणाभावेपि श्रुत्यन्तरसिद्धंब्राह्मणाधिकारमेवसिद्धंकृत्वा
ब्राह्मणस्यैव सन्न्यासाधिकारः एवञ्चब्राह्मणानामेवश्रवणाद्यनुष्ठाने सन्न्यासोङ्गंक्षत्रियवैश्ययोस्तन्निरपेक्षः श्रवणाधिकार
इतितयोःश्रवणाद्यनुष्ठाननिर्वाहइतिप्रतिपादयन्ति ॥ २ ॥ अपरेतु ब्रह्मसंस्थोऽमृतत्वमेतीतिश्रुत्युक्तायस्यब्रह्मणिसंस्था
समाप्तिरनन्यव्यापारत्वरूपंतन्निष्ठत्वंतस्यश्रवणादिषुमुख्योधिकारःसाचसर्वविक्षेपनिवृत्त्यासन्न्यासिनामेवातस्तेषांतच्चा
धिकारेनक्षत्रियवैश्ययोः सन्न्यासानधिकृतयोर्मुख्यःश्रवणाधिकारस्तत्कृतश्रवणंतुजन्मान्तरेब्राह्मणशरीरलाभेन सन्न्यास

पूर्वकंब्रह्मविद्याप्रदं नन्वेवंसन्न्यासाभावादेवब्रह्मलोकनिवासिदेवानामपिपुनर्ब्राह्मणजन्मलाभेन सन्न्यासपूर्विकैवमुक्ति
र्भविष्यति नचेष्टापत्तिस्तेषामनावृत्तिप्रतिपादकश्रुतिसूत्रस्मृतिविरोधादितिचेन्न वर्णाश्रमविभागस्यमनुष्यविषयत्वेन
विनापि सन्न्यासंतेषांमुख्याधिकाराभ्युपगमादित्याहुः ॥ ३ ॥ नन्वमुख्याधिकारिणाऽदृष्टफलरूपब्रह्मज्ञानार्थं न्यायादि
शास्त्रविचारवत्क्रियमाणोपि वेदान्तविचारःकथंजन्मान्तरीयविद्याऽवाप्तावुपयुज्यते नखल्वद्यकृतविचारस्यदिनान्तरीय
विचार्यज्ञानकारणत्वंयुज्यतेदूरेजन्मान्तरीयतद्धेतुत्वमितिचेदत्रकर्मणांविद्यायांविनियोगवादिनअमुख्याधिकारिणाप्यु
त्पन्नविविदिषेणक्रियमाणश्रवणंसम्पादनीयविद्याद्वारभूतविविदिषोत्पादकप्राचीनविद्यार्थयज्ञाद्यनुष्ठानजन्यापूर्वंजन्य
मतस्तदेवापूर्वंविद्यारूपफलपर्य्यन्तंव्याप्रियमाणंजन्मान्तरीयायामपिविद्यायांस्वजन्यश्रवणस्योपकारतांकरोतीतियथाश्र
वणादौविध्यभाववादिवाचस्पतिमतेसन्न्यासपूर्वंकृतस्यापिश्रवणस्यादृष्टानुत्पादकत्वात्सतिप्रतिवन्धे यज्ञाद्यपूर्वेणैवतस्यज
न्मान्तरीयविद्याहेतुत्वं यथाचश्रवणादौनियमविधिवादिविवरणाचार्यपक्षेश्रवणमभ्यस्ततोमुख्याधिकारिणोपिफलप्राप्तः

प्राक्करणेसतितत्रतंवुद्धिसंयोगंलभतइतिस्मृत्युक्तप्रकारेण जन्मान्तरीयश्रवणादिकंस्वाभ्यासजन्यनियमापूर्वंसहकृतंसद्विद्याहेतुतदस्मन्मतेऽमुख्याधिकारिणोपिक्षत्रियादेर्जन्मान्तरीयविद्योत्पत्तिव्यवस्थेत्याहुः॥ ४ ॥ केचित्तुदृष्टार्थस्यापिश्रवणस्य दिनेदिनेतुवेदान्तश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषयालब्धात्कृच्छ्राशीतिफलं लभेदित्यादिवचनप्रामाण्यान्मुख्यामुख्याधिकारिकृतवेदशिरोंशश्रवणस्यप्रतिवन्धनिवृत्तिरूपदृष्टफलवददृष्टोत्पादकत्वावगमेनामुख्याधिकारिणोः क्षत्रियवैश्ययोरपिवेदान्तश्रवणजन्यादृष्टद्वाराजन्मान्तरेमुक्तिर्भविष्यत्येवेत्याहुः॥ ५ ॥इतिश्रवणाधिकारवादः॥ ४ ॥ अथज्ञानकरणवादः। भारतीतीर्थास्तु निर्गुणोपासनमपिब्रह्मविद्यायाःश्रवणादिवत्साधनंप्रतिवन्धरहितस्यपुंसःश्रवणादिप्रणाल्याब्रह्मसाक्षात्कारोझटितिसिध्यतीतिसांख्यमार्गोमुख्यः उपास्यातुविलम्बेनेतियोगमार्गोऽमुख्यइत्याहुः ॥ १ ॥ अस्मिन्पक्षद्वयेपिप्रत्ययाभ्यासरूपत्वेननिदिध्यासनात्मकमुपासनात्मकंचप्रसंख्यानंक्रमेणसाक्षात्कारकरणंततस्तुतंपश्यतिनिष्कलंध्यायमानइतिश्रुतेरितिकेचिदाहुः ॥ २ ॥ अन्येतुएषोणुरात्माचेतसावेदितव्यः दृश्यतेत्वग्र्ययावुद्ध्याइत्यादिश्रुतेर्मनएव

प्रसंख्यानसहकृतंसत्करणमित्याहुः ॥ ३ ॥ अपरतु तद्वास्यविजज्ञौतंत्वौपनिषदंपुरुषंपृच्छामीत्यादिवाक्यप्रामाण्यादौप
निषदंमहावाक्यमेवब्रह्मसाक्षात्कारेकरणंनमनइत्याहुः॥ ४ ॥ ननुतथापिशब्दस्यपरोक्षज्ञानजनकत्वस्वभावस्यनापरोक्ष
ज्ञानजनकत्वंसङ्गच्छतइतिचेद्चकेचित्स्वतोऽसमर्थोपि शब्दःश्रवणमननपूर्वकप्रत्ययाभ्याससजनितसंस्कारप्रचयलब्धब्र
ह्मैकाग्र्यचित्तदर्पणानुगृहीतोदर्पणानुगृहीतचक्षुः प्रतिविम्बानुभवमिवापरोक्षज्ञानमुत्पादयतीत्याहुः ॥ ५ ॥ अन्येतु
भावनाप्रचयसाहित्येसतिवहिरसमर्थस्यापिमनसोनष्टवस्तुसाक्षात्कारजनकत्वदर्शनान्निदिध्यासनसाहित्येनशब्दस्याप्य
परोक्षज्ञानजनकत्वंयुक्तमितिदृष्टान्तानुरोधेनसमर्थयन्ते ॥ ६ ॥ इतिज्ञानकरणवादः ॥ ५ ॥ अथज्ञानार्थयोरपरोक्षत्व
वादः ॥ किंनामापरोक्षत्वमितिचेद्चकेचिदपरोक्षार्थविषयत्वंज्ञानापरोक्षत्वमर्थापरोक्षत्वञ्चतत्तत्पुरुषचैतन्याभेदस्त
स्यतस्यविषयस्य एवंचसर्वदासर्वपुरुषचैतन्याभिन्नत्वात् यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुत्यास्वतएवापरोक्षंब्रह्मेत्यपरोक्षार्थवि
षयत्वाच्छाब्दस्यापिब्रह्मज्ञानस्यापरोक्षत्वंयुक्तमित्याहुः ॥ १ ॥ अद्वैतविद्याचार्यास्तुयथातत्तदर्थस्यस्वव्यवहारानुकूल

चैतन्याभेदोऽर्थापरोक्षमेवंतत्तद्व्यवहारानुकूलचैतन्यस्यतत्तदर्थाभेदोज्ञानापरोक्ष्यमितिगदन्ति तथाच चैतन्यधर्मएवद
मापरोक्ष्यंनत्वनुमितित्वेच्छात्वादिवदन्तःकरणवृत्तिधर्मः नच घटाद्यैन्द्रियकवृत्तौतदनुभवविरोधः अनुभवस्यवृत्त्यव
च्छिन्नचैतन्यगतापरोक्षविषयत्वोपपत्तेरेवंचशब्दादुत्पद्यमानमपिब्रह्मज्ञानंसर्वोपादानभूतस्वविषयब्रह्मचैतन्यसंसृष्टमे
वोत्पद्यतइतितस्याज्ञाननिवर्त्तकत्वमज्ञाननिवृत्तौतन्मूलकभेदप्रविलयादापरोक्ष्यंचेत्युपपद्यतेतराम् ॥ २ ॥ इतिज्ञाना
द्यापरोक्ष्यवादः ॥ ६ ॥ अथाऽज्ञाननिवर्त्तकवादः ॥ ननु घटःसन्नित्यादिबुद्धिवृत्तेरपिसद्रूपब्रह्मविषयत्वस्यभवदभ्युपग
मात्कृतनिदिध्यासनस्य वेदान्तजन्यब्रह्मज्ञानेनेवघटादिज्ञानेनापि ब्रह्माज्ञाननिवृत्तिःकिंनस्यादितिचेदत्राहुराचार्याः
नचैतन्यंचक्षुरादिजन्यवृत्तिविषयंनसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चिदेनमित्यादिश्रुत्याब्रह्मणःपरमाण्वादि
वच्चक्षुराद्ययोग्यत्वोपदेशादौपनिषदमिति विशेषणाच्च तस्मान्नघटादिज्ञानेनब्रह्माज्ञाननिवृत्तिरिति ॥ १ ॥ अन्येतु
सिद्धान्तेघटादिजडवस्तुसर्वंयद्यपिनमूलाज्ञानाश्रयंतथापि तत्तदवस्थाज्ञानंतुतत्रैवतिष्ठति तथाच घटादिवृत्तीनांजडघ

टादिनिष्टावस्थाज्ञाननिवर्त्तकत्वमेवनतत्रब्रह्मनिष्ठमूलाज्ञाननिवर्तकत्वशङ्कावकाशइत्याहुः ॥ २ ॥ केचित्तुघटादिवृत्तीनांतत्तदवच्छिन्नचैतन्यविषयत्वमभ्युपगम्य सर्वमानप्रसक्तौचसर्वमानफलाश्रयात् श्रोतव्येतिवचःप्राहवेदान्तावरुरुत्सयेतिवार्त्तिकोक्तेःश्रोतव्यवाक्यार्थवेदान्तनियमविध्यनुसारेण वेदान्तजन्यमेवनियमादृष्टसहितंब्रह्मज्ञानमप्रतिबद्धंब्रह्माज्ञाननिवर्त्तकमितिनघटादिज्ञानात्तन्निवृत्तिप्रसङ्गइत्याहुः ॥ ३ ॥ अन्येतु तत्त्वमस्यादिवाक्यजन्यंजीवब्रह्माभेदगोचरमेवज्ञानंमूलाज्ञाननिवर्त्तकंमूलाज्ञानस्यतदभेदगोचरत्वादितिनचैतन्यस्वरूपमात्रगोचराद्घटादिज्ञानात्तन्निरासप्रसङ्गइत्याहुः ॥ ४ ॥ इत्यज्ञाननिवर्त्तकवादः ॥ ७ ॥ अथज्ञाननिवृत्तिवादः ॥ नन्वस्त्वेतदेवं पूर्वोक्तंसविलासाज्ञाननाशकमिदंब्रह्मज्ञानंतुकथंनश्येन्नाशकान्तराभावादितिचेन्नयथाकतकरजः सलिलेनसंयुज्यपूर्वरजोन्तरविश्लेषंजनयत्स्वविश्लेषमपिजनयति तथात्मन्यध्यस्यमानब्रह्मज्ञानंपूर्वाध्यस्तसर्वप्रपञ्चंनिवर्त्तयत्स्वात्मानमपिनिवर्त्तयतीतिकेचित् ॥ १ ॥ अन्येत्वन्यंनिवर्त्त्यस्वस्यापिनिवृत्तौदग्धलोहपीताम्बुन्यायमुदाहरन्ति ॥ २ ॥ अपरेत्वत्रदग्धतृणकूटदहनोदाहरणमाहुः

॥ ३ ॥ केचित्तुवृत्तिरूपंब्रह्मज्ञानंनाज्ञानतन्मूलप्रपञ्चनिवर्तकमज्ञानस्यप्रकाशनिवर्त्यत्वनियमेनजडरूपवृत्तिनिवर्त्त्य
त्वायोगात् किन्तुतदारूढचैतन्यप्रकाशस्तन्निवर्तकःस्वरूपेणतस्याज्ञानादिसाक्षितयातदनिवर्तकत्वेपि अखण्डाकारवृ
त्त्युपारूढस्यतस्यतन्निवर्तकत्वोपपत्तेः तृणादेर्भासिकाप्येषासूर्य्यदीप्तिस्तृणंदहेत् सूर्य्यकान्तमुपारुह्यतंन्यायंतत्रयोजयेत्
इत्यभियुक्तोक्तेः एवञ्च यथाकाष्ठमुपारुह्यनिखिलग्रामनगरादिकंदहन्वह्निर्दहत्येव तदपि काष्ठंतथाचरमवृत्त्युपारुह्य
निखिलप्रपञ्चमुन्मूलयनखण्डप्रकाशस्तन्निवर्तनेपिप्रकल्पतेइतिनतन्नाशेकाचिदनुपपत्तिरित्याहुः ॥ ४ ॥ अन्येतुब्रह्म
ज्ञानमज्ञानस्यैवनिवर्तकंज्ञानाज्ञानयोरेवसाक्षाद्विरोधाप्रपञ्चस्यतूपादाननाशेननाशइतिप्रपञ्चान्तर्गतस्यब्रह्मज्ञानस्या
पिततएवनाशः एवञ्चतत्त्वसाक्षात्कारोदयेपिजीवन्मुक्तस्यदेहादिप्रतिभास उपपद्यतेप्रारब्धकर्मणाप्रतिबन्धेन तत्त्वसा
क्षात्कारेणापिप्रारब्धकर्मतत्कार्यदेहादिप्रतिभासानुवृत्त्युपादानाविद्यालेशनिवृत्त्यनुपपत्तेरित्याहुः॥ ५ ॥इतिज्ञाननि
वृत्तिवादः ॥ ८ ॥ समाधानसंख्या ॥ ३२ ॥ इतिश्रीसिद्धान्तलेशसारसंग्रहेसाधनाभिधस्तृतीयःपरिच्छेदःसमाप्तः ३

अथाविद्यालेशवादः ॥ अथकोयमविद्यालेशोयदनुवृत्त्याजीवन्मुक्तिरितिचेदत्रकेचिदावरणविक्षेपशक्तिमत्यामूलाविद्यायाःप्रारब्धकर्मवर्त्तमानदेहाद्यनुवृत्तिप्रयोजकोविक्षेपशक्त्यंशएवेत्याहुः ॥ १ ॥ अपरेतुक्षालितलशुनभाण्डानुवृत्तलशुनवासनाकल्पोऽविद्यासंस्कारइतिवदन्ति ॥ २ ॥ अपरेतुदग्धपटन्यायेनानुवृत्त्यामूलाऽविद्यैवेतिसम्भाषन्ते ॥ ३ ॥ सर्वज्ञात्मगुरवस्तुविरोधिसाक्षात्कारोदयेलेशतोप्यविद्यानुवृत्त्यसम्भवाज्जीवन्मुक्तिशास्त्रं श्रवणादिविध्यर्थवादमात्रंशास्त्रस्यजीवन्मुक्तिप्रतिपादनेप्रयोजनाभावात् अतःकृतनिदिध्यासनस्यब्रह्मसाक्षात्कारोदयमात्रेणसविलाससवासनाऽविद्यानिवृत्तिरित्यपिकश्चित्पक्षमाहुः ॥ ४ ॥ इत्यविद्यालेशवादः ॥ १ ॥ अथाविद्यानिवृत्तिस्वरूपवादः ॥ अथकेयमविद्यानिवृत्तिरितिचेदात्मैवेतिब्रह्मसिद्धिकाराःवदन्तिसाचात्मरूपापिसाध्यलक्षणघटितत्वेनज्ञानसाध्याअतःसर्वमनवद्यंकथंतद्घटितत्वमितिचेदित्थं यस्मिन्सत्यग्रिमक्षणेयस्यसत्वंयद्व्यतिरेकेयदभावस्तत्तत्साध्यमितिलक्षणानुरोधेनज्ञानेसत्यग्रिमक्षणेआत्मरूपाविद्यानिवृत्तिसत्वं तद्व्यतिरेकेतत्प्रतियोग्यविद्यारूपस्तद्भावइतिचतएवाहुः ॥ १ ॥ आत्मन्येवाविद्यानिवृ

त्तिःसाचनसतीअद्वैतहानेर्नाप्यसतीज्ञानसाध्यत्वायोगान्नापिसदसद्रूपाविरोधात् नाप्यनिर्वाच्या अनिर्वाच्यस्यसादेरज्ञा
नोपादानकत्वनियमेनमुक्तावपितदुपादानाज्ञानानुवृत्त्यापत्तेःज्ञाननिवर्त्यत्वापत्तेश्च किन्तुमोक्षशास्त्रप्रामाण्यादप्रसिद्ध
पञ्चमप्रकाराइत्यानन्दबोधाचार्याःसंप्रतिपादयन्ति ॥ २ ॥ लोकप्रसिद्धघटादिध्वंसस्यक्षणिकभावविकाररूपत्ववदवि
द्यानिवृत्तिरपिब्रह्मसाक्षात्कारोदयानन्तरंक्षणवर्त्तीकश्चिद्भावविकारइतितस्याःमुक्तावनुवृत्त्यभावान्नतदनिर्वाच्यत्वेकश्चि
द्दोषइत्यद्वैतविद्याचार्याःसङ्गिरन्ते ॥ ३ ॥ इत्यविद्यानिवृत्तिवादः ॥ २ ॥ अथमुख्यामुख्यपुरुषार्थवादः ॥ नन्वेवमविद्यानि
वृत्तेःक्षणिकत्वेमोक्षःस्थिरपुरुषार्थोनस्यादितिचेद्भ्रान्तोसिनह्यविद्यानिवृत्तिःस्वयमेवपुरुषार्थइतिवदामः किन्त्वखण्डा
नन्दस्फुरणं संसारदुःखोच्छेदश्चस्वयमेवपुरुषार्थोभवतीतितदुपयोगितयातस्यास्तत्त्वज्ञानसाध्यत्वमुपेयतेइत्यमपितएवसं
भाषन्ते ॥ १ ॥ चित्सुखाचार्यास्त्वविद्यानिवृत्तेरनिर्वाच्यत्वेप्यनवच्छिन्नानन्दप्राप्तिरूपस्वतःपुरुषार्थशेषतयाज्ञानसाध्यत्व
मौपचारिकंतद्वत्संसारदुःखनिवृत्तेरपितच्छेषत्वेनतत्साध्यत्वंमुख्यपुरुषार्थस्त्वऽनवच्छिन्नानन्दप्राप्तिरेवातोनकोपिदोषश्च

ङ्काशूकइतिभाषन्ते ॥ २ ॥ इतिपरमपुरुषार्थस्वरूपवादः ॥ ३ ॥ अथानवच्छिन्नानन्दप्राप्तिवादः ॥ नन्वनवच्छिन्नानन्दः प्रत्यग्रूपतयानित्यमेवप्राप्तोऽतस्तत्प्राप्त्युद्देशेनतदुपायेषु प्रवृत्तिर्नस्यादितिचेदत्र केचिन्नित्यप्राप्तोप्यनवच्छिन्नानन्दस्स्वकण्ठगतविस्मृतकनकाभरणवत्प्राप्यतइवेत्यौपचारिकीतस्यप्राप्तिर्वक्तव्येतिससाधिमाहुः ॥१॥ अन्येतु यस्मिन्सत्यग्रिमक्षणे सम्बन्धोयस्यतत्तत्साध्यमितिन्यायानुरोधेनज्ञानेसत्यग्रिमक्षणेनिरतिशयानन्दसत्वंज्ञानाभावेममनिरतिशयानन्दो नास्तीतिसंसारावस्थायांनिरतिशयानन्दाभावसत्वमितितल्लक्षणसत्वान्निरतिशयानन्दस्यप्राप्तस्यापि मुख्यमेवप्राप्यत्वमित्याहुः ॥ २ ॥ अपरेत्ववेद्यस्यापुरुषार्थत्वात्संसारदशायांसदप्यनवच्छिन्नंसुखमापरोक्ष्याभावान्नपुरुषार्थोतस्तत्साक्षात्कारेसत्येवानवच्छिन्नानन्दापरोक्ष्यस्यपुरुषार्थस्यविद्याप्राप्यत्वंयुक्तमित्याहुः ॥ ३ ॥ अपरेत्वस्तुस्वव्यवहारानुकूलचैतन्याभेदमात्रमापरोक्ष्यंतथाप्यज्ञानमहिम्नाजीवभेदवच्चिदानन्दभेदोप्यध्यस्तइत्यतः संसारदशायांपुरुषान्तरस्यपुरुषान्तरचैतन्यापरोक्ष्याभाववदनवच्छिन्नसुखापरोक्ष्यमपिनास्तिअज्ञाननिवृत्तौतुचिदानन्दभेदप्रविलयात्तदापरोक्ष्यमितितस्य

विद्यासाध्यत्वमित्याहुः ॥ ४ ॥ इत्यानन्दावाप्तिवादः ॥ ४ ॥ अथमुक्तस्यब्रह्मभावापत्तिवादः ॥ जीवस्यस्वतत्त्वाज्ञानकल्पितजीवेश्वरादिनिखिलप्रपञ्चस्यस्ववास्तवस्वरूपविद्योदयेविलयान्निर्विशेषचैतन्यरूपेणैवावस्थानमेव शुद्धब्रह्मभावापत्तिरित्येकजीववादिनःसञ्जल्पन्ते ॥ १ ॥ अनेकजीववादिष्वपिकेचिज्जीवस्येवेश्वरस्यापिप्रतिविम्बत्ववादिनोमुक्तस्यविम्बभूतशुद्धचैतन्यरूपेणावस्थानं नतुप्रतिविम्बविशेषेश्वररूपेणावस्थानंप्रतिविम्बस्य प्रतिविम्बान्तराभेदाङ्गीकारेतुप्रतिविम्बत्वाविशेषान्मुक्तस्यबद्धजीवान्तराभेदापत्तेरितिसङ्गिरन्ते ॥ २ ॥ अपरेतु प्रतिविम्बोजीवःविम्बस्थानीयईश्वरःउभयानुस्यूतंशुद्धचैतन्यंमुक्तस्यतुयावत्सर्वमुक्तिस्तावत्सर्वज्ञत्वादिगुणगणागारेश्वरभावापत्तिरिष्यते यथानेकेषुदर्पणेष्वेकस्यमुखस्यप्रतिविम्बेसत्येकदर्पणापगमे तत्प्रतिविम्बोविम्बभावेनावतिष्ठतेनतुमुखमात्ररूपेणतदानीमपिदर्पणान्तरसन्निधानप्रयुक्तस्यमुखेविम्बत्वस्यानपगमात्तथैकस्यब्रह्मचैतन्यस्यानेकेषूपाधिषु प्रतिविम्बेसत्येकस्मिन् प्रतिविम्बेविद्योदयेतेनतदुपाधिविलयेतत्प्रतिविम्बस्यविम्बभावेनावस्थानावश्यंभावात् नच मुक्तस्याविद्याभावात् सत्यकामत्वादिगुणविशिष्टसर्वेश्वरत्वानुप

पत्तिः तदविद्याभावेपितदानींवद्धपुरुषान्तराविद्यासत्त्वात् नहीश्वरस्येश्वरत्वंसत्यकामादिगुणविशिष्टत्वंचस्वाविद्याकृतंत
स्यनिरञ्जनत्वात् किन्तु वद्धपुरुषाऽविद्याकृतमेवतत्सर्वमन्वेष्टव्यम् नचसगुणविद्याफलाविशेषापत्तिः सगुणोपासकानाम
खण्डब्रह्मसाक्षात्काराभावान्नाविद्यानिवृत्तिर्नवातन्मूलाहङ्कारादेर्विलयः आवरणानिवृत्तेर्नाखण्डानन्दस्फुरणंतेषांच
परमेश्वरेणाखिलभोगसाम्येपिनसकलजगत्सृष्टिसंहारादौस्वातन्त्र्यरूपंनिरङ्कुशमैश्वर्यंमुक्तानांतुसर्वात्मनेश्वरभावंप्राप्ता
नांतत्सर्वंसम्भवतीतिमहद्विशेषस्यसम्भवात् नचेश्वरस्यरामाद्यवतारेऽज्ञानित्वदुःखित्वादिश्रवणान्मुक्तानामीश्वरभावेपु
नर्वन्धापत्तिरीश्वरस्यनित्यमुक्तत्वेनभृगुशापादिसत्यत्वंज्ञापयितुं नटवदभिनयमात्रपरतयातच्छ्रवणोपपत्तेस्तस्माद्याव
त्सर्वमुक्तिपरमेश्वरभावोमुक्तस्येतिविम्बेश्वरभावे नकश्चिद्दोषः अयमेवपक्षःश्रुतिसूत्रभाष्यादिसम्मतइत्याहुः ॥ ३ ॥ अच्यु
तकृष्णानन्दतीर्थास्तुमुक्तस्येश्वरभावापत्तिर्नसिद्धान्तसम्मता किन्तुपूर्वोक्ताशुद्धभावापत्तिरेवेत्याहुः तथाहि यावत्सर्वमु
क्तीश्वरभावापत्तिर्मुक्तस्यस्वीकारेहिचरममुच्यमानस्यनिर्विशेषचिन्मात्रस्वरूपेणैवावस्थानलक्षणामुक्तिस्ततः प्राङ्मुच्यमा

नानांतुस्वतश्चिन्मात्ररूपेणावस्थितानामीश्वरभावापत्त्यानिरवग्रहैश्वर्यप्राप्तिरूपामुक्तिरितिपरमुक्तौवहूनामैश्वर्यप्राप्तिरेकस्यतन्नास्तीत्येकं वैषम्यंवहूनामैश्वर्यप्राप्तावपिक्रमेणमुच्यमानानांचिराचिरकालैश्वर्यलक्षणमपरंतारतम्यं तेषामेव किञ्चित्कालमैश्वर्यंपश्चात्तदभावइत्यादिरूपंतारतम्यं कल्पितं स्यात्तच्चतृतीयाऽध्यायान्तिमाधिकरणविरुद्धंतच्चहिसगुणविद्याफलभूतमुक्तौनारतम्यंनतुपरममुक्तावितिव्यवस्थापितं किञ्च यद्युच्येतसङ्कल्पादेवास्यपितरःसमुत्तिष्ठन्तीत्यादिश्रुतिप्रतिपादितसत्यसङ्कल्पत्वादिकंमुक्तस्येश्वरभावापत्तिंविनानसम्भवतीतिसास्वीकार्यातर्हिवक्तव्यं किंप्रतिविम्बत्वविशिष्टचैतन्यरूपजीवगतस्यमुक्तेःपूर्वमपिविद्यमानस्यसत्यसङ्कल्पादेर्मुक्तावाविर्भाव :किंवाविम्बत्वविशिष्टचैतन्यरूपेश्वरगतस्य नाद्यः ईश्वरगतसत्यसङ्कल्पत्वाद्यपेक्षयाजीवेपृथक्सत्यसङ्कल्पत्वादिसत्वेमानाभावान्नहीश्वरस्येवजीवस्यापिपृथक्तत्सत्वप्रतिपादकंशास्त्रमस्ति द्वितीयेपिसत्यसङ्कल्पत्वादिविशिष्टेश्वरस्याविद्यावृतत्वमस्तिनवेतिवक्तव्यमस्तीति चेन्न तस्यावृतत्वेमानाभावान्नास्तीतिचेत्तर्हि नाविद्ययातन्निष्ठसत्यसङ्कल्पत्वाद्यैश्वर्यस्यतिरोधानंसिध्येद् यदाविर्भावार्थंतत्त्व

ज्ञानेनेश्वरभावापत्तिरूपामुक्तिःस्वीकर्तव्यास्यादतःशुद्धाश्रयविषयाज्ञानमङ्गीकार्यं तत्त्वमस्यादिवाक्यजन्यतद्ज्ञानेनत
द्ज्ञाननिवृत्त्यातद्भावापत्तिरूपमुक्तिपक्षएवश्रेयान् किञ्च मुक्तस्येश्वरभावापत्तिस्वीकारेविश्वभूतेश्वरस्यसाधकानुग्रहा
र्थं मायामयशरीराङ्गीकारेणमुक्तोपिशरीर्य्यैवस्यादन्यथारतिक्रीडादिश्रुतिसिद्धैश्वर्यायोगात् तथाचाशरीरंवावसन्तं
नप्रियाप्रियेस्पृशतइतिश्रुत्यामुक्तस्याशरीरत्वप्रतिपादनंविरुध्येतकथमिदमशरीरत्वंसम्भवतीतिजिज्ञासायांविद्यासाम
र्थ्यात्परब्रह्मप्राप्तौसत्यांतत्सम्पद्यते नान्यथेति प्रतिपादनार्थमशरीरत्वप्रतिपादकवाक्यानन्तरंपरंज्योतिरुपपद्येतिवाक्यं
तदर्थप्रतिपादकज्योतिरधिकरणभाष्यंचविरुध्येतपरब्रह्मप्राप्त्यनन्तरमपि सशरीरत्वाभ्युपगमेनपरमुक्तावपितारतम्याभ्यु
पगमात् नचपरमुक्तौनवस्तुतःसशरीरत्वाभ्युपगमेनतारतम्यमभ्युपेयते किन्तु कल्पितमितिनकोपिविरोधइतिवाच्यंसि
द्धान्ते सगुणविद्याफलभूतावान्तरमुक्तावपिवास्तवतारतम्याभावेनसगुणमुक्तावेवतारतम्यंसशरीरत्वंचननिर्गुणविद्या
फलभूतपरमुक्तौतद्द्वयमितिव्यवस्थापनपरभाष्यादेर्विरोधात् किञ्च सर्वेश्वरभावंप्राप्तस्यमुक्तस्यतद्भावापत्तिदशायांसगु

णविद्याफलभूतेश्वरभावापत्तिदशायामिवयोहंपुरासंसार्यासंसोहमिदानीमीश्वरसम्पन्न इत्यनुसन्धानमभ्युपगम्यतेनवा नाद्यः पूर्वोपाधेर्निवृत्तत्वेनतथानुसन्धानाभावात् उपाध्यैक्यस्यानुसन्धानकारणत्वात् नद्वितीयः ईश्वरभावापत्तौकेवलस्वरूपावस्थानापेक्षयामुक्तस्यफलतोविशेषाभावेनतद्भावापत्त्युपपादनस्यानतिप्रयोजनत्वापत्तेः किञ्च यदुक्तश्रुतिसूत्रभाष्यादिसम्मतोयंपक्षइत्यादि तदपिन विद्वज्जनमनोहरं प्रौढिवादेनापीश्वरभावापत्तिप्रतिपादकसूत्रभाष्यादेरुपपत्तेस्तत्प्रतिपादकश्रुतेस्तुसगुणविद्याफलप्रतिपादनपरत्वेनाप्युपपत्त्यापरमुक्तिविषयेत्वर्थवादत्वात् उक्तंचसंक्षेपशारीरके ऐश्वर्यमज्ञानतिरोहितंसद्ध्यानादभिव्यजतइत्यवोचत् शरीरिणःसूत्रकृदस्ययत्तुतदभ्युपेत्योदितमुक्तहेतोरिति तस्मान्मुक्तस्येश्वरभावापत्तिप्रतिपादनंयत्रत्वस्येत्यादिश्रुतिविरुद्धंतदनुसारिबहुसूत्रभाष्यादिविरुद्धंप्रयोजन शून्यंचनोपेयं मुमुक्षुभिःन्यायरक्षामणौदीक्षितैरपिशुद्धभावापत्तिर्मुक्तस्योक्ता अतोनतेषामपीष्टोयंपक्षःसत्यसङ्कल्पत्वादिकंतुशुद्धभावंगतस्यविदुषोऽपिसर्वभावापन्नस्यतत्तद्धिरण्यगर्भेन्द्रादिदेहावच्छेदेनाप्युपपद्यते तस्माच्छुद्धभावापत्तिरूपामुक्तिरेवग्राह्या

तियद्यप्यत्रास्तिवहुवक्तव्यं तथापि ग्रन्थभूयस्त्वभयान्नेहप्रतन्यते ॥ इतिमुक्तस्यब्रह्मभावापत्तिवादः ॥ ५ ॥ समाधानसंख्या ॥ १६ ॥ ननुस्वकपोलकल्पितमपूर्वमेवेदं वादशब्दस्यपुनःपुनरत्राभ्यूहनमितिचेन्न चित्सुखाचार्यैःस्वकृतन्यायमकरन्दव्याख्यायांमूलेपूर्वविचारावसानेनोत्तरविचारप्रवृत्तौसाक्षाद्वादपदप्रयोगाभावेपिप्रथमवादेनेत्यादिनावादपदस्यतत्रतत्रावसरेसंलिखितत्वात्तथाचापितल्लेखनेनापूर्वाभ्यूहनलक्षणदोषाभावादिति नन्वस्त्वेतदेवं तथापिस्वयमभिनवनिवन्धनिर्माणासमर्थस्यस्ववैदग्ध्यख्यापनार्थंस्ववोधाये तिव्याजेनयाचितमखण्डितन्यायमाश्रित्यपरकीयनिवन्धात्तत्पाठतदर्थसंग्रहेप्रवृत्तस्यतेपिष्टपेषणवत्सिद्धसाधनन्यायपदवीमनुसरंस्तद्विषयकोयंप्रयत्नःसर्वथाप्युन्मत्तप्रवृत्तिवद्व्यर्थोऽपूर्वन्यायाप्रकाशकत्वेनविद्वन्मनोमोदानभिव्यञ्जकत्वाच्छास्त्रसिद्धान्तलेशसंग्रहाख्यनिवन्धार्थजिज्ञासूनामपि संक्षिप्तार्थविषयकत्वेनतज्जिज्ञासानुपशमकत्वात्तदितरेषांचप्राकृतानांत्वत्कृतनिवन्धार्थानभिज्ञत्वेनतद्विषयकत्वत्कृतप्रयत्नसाध्यप्रयोजनाभावाच्चेति चेद्यदाहाच्छमतिर्भवांस्तत्सत्यंत्वदुक्तविद्वन्मनोमोदादिप्रयोजनाभावेपि श्रवणविध्यादिरूपानेकार्थजात विषय

तत्तदाशङ्कारूपाऽघोपशमकश्रीभगवत्पूज्यपादवाग्रूपजाह्नवीव्याख्यानकौशलोपपन्नपूर्वाचार्यकृततत्तदाशङ्कासमाधान

गतसंख्याविषयकमद्विशयविषोपशमकत्वेनतदर्थमननलक्षणप्रयोजनस्यसत्त्वान्नवैयर्थ्यंमत्प्रयत्नस्येतिबोध्यं यत्तु स्वेत्यादि
व्याजेनेत्यन्तमुक्तंतदसम्यक्धियःशुद्ध्यैसङ्कलयामीत्यादिवदतामप्ययदीक्षितश्रीमधुसूदनसरस्वतिप्रभृतीनामाचार्यवरा
णांपूर्वेषामपितथात्वापत्तेः यत्तु स्वयमित्याद्यनुसरन्नित्यन्तंतदपिनरम्यंवाशिष्ठमहाभारतादिवृहन्निवन्धेभ्यःसंक्षिप्तपा
ठोद्धारकाणांषट्सहस्रीसंक्षिप्तवाशिष्ठसारेतिहाससमुच्चयादिकर्तृणांप्रयत्नस्यत्वदुक्तन्यायविषयतापत्तेः ननुतैस्तुपाठमा
त्रमेवोद्धृतमतोत्रतद्वत्पाठोद्धारांशेऽदोषेपितदर्थांशोद्धारेदोषस्तदवस्थइतिविषमोत्रतदृष्टान्तइतिचेत्तर्हिवृहद्वार्तिकात्तदु
भयमुद्धर्तुंवार्तिकसारनिर्मातुस्त्वदुक्तदोषापत्तेस्तत्रापितद्दोषदर्शनेनतवारुचिश्चेत्तर्हित्वद्धृन्निष्ठमत्सरलक्षणपित्तमेवतन्नि
दानमतस्तच्छान्त्यर्थंपरमशीतलमधुतरमहद्गुणचिन्तनलक्षणभेषजमेवपिव नत्वतिजल्पनंकुरुष्वेत्यलंवहुपल्लवितेन अ
त्रसर्ववादसंख्या मद्बुद्ध्यनुरोधेनचत्वारिंशदिति ॥ ४० ॥ तथासर्वसमाधानसंख्याचैकोनशतद्वयमितिज्ञेया ।१९९। श्रीरामं

मनसाध्यात्वाश्रीगुरुं संप्रणम्यच पाठंसिद्धान्तलेशस्यसमग्रहीच्छिवेनकः ॥ १ ॥ समाधिगणनायाचयन्मयासाहसंकृतम्
क्षन्तव्यंतद्बुधैःसर्वैःक्षमाशीलाहितेयतः ॥ २ ॥ तत्संख्यानंस्वबोधार्थंरामतुष्ट्यर्थमेवच जानन्तिहिस्वतस्तज्ज्ञानतदर्थं म
याकृतम् ॥ ३ ॥ यदितेवालबोधार्थं पश्येयुःसंग्रहंत्विमं तदातैरपिशोध्योयंनोपेक्ष्योह्युपकारिभिः ॥ ४॥ इतिश्रीशास्त्र
सिद्धान्तलेशसंग्रहसारेफलाभिधश्चतुर्थःपरिच्छेदःसमाप्तिमगात् ॥ ४ ॥ समाप्तश्चायंनिबन्धः ॥

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| ५ | १ | २ | लक्षण | लक्षणं |
| ५ | १ | ८ | शुद्धसत्व | शुद्धसत्त्व |
| ५ | १ | ८ | मलिनसत्व | मलिनसत्त्व |
| ५ | १ | ४ | प्रतिविंम्ब | प्रतिविम्ब |
| ६ | २ | ४ | पयुक्त | प्रयुक्त |
| ६ | १ | ५ | नेकाविद्या | नैकाविद्या |
| ८ | २ | ३ | महांधकारस्यव | महांधकारस्येव |
| ८ | २ | ६ | निवृत्तिरेव | निवृत्तिरेवा |
| ८ | २ | ९ | निदावत् | निद्रावत् |
| ९ | १ | २ | त्तद्प | त्तद्व |
| ९ | १ | ७ | लक्षणं | लक्षणो |
| ९ | २ | १ | पूवात्त | पूर्वोक्त |
| ९ | २ | ६ | नत्ववर | नत्वावर |
| ९ | २ | ८ | तत्तत्व ाली | तत्वत्काली |
| १० | २ | १ | निवर्त्तते | निवर्त्त्यते |
| १० | २ | ५ | मेवाजानं | मेवाज्ञानं |

| पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|
| २२ | १ | ५ | चैतन्य | चैतन्यं |
| २२ | १ | ५ | वृत्त्यभिव्यक्तंतत् | वृत्त्यभिव्यक्तंसत् |
| २३ | २ | २ | कल्प्यना | कल्पना |
| २४ | १ | ९ | मल्पकवादः | कल्पकवादः |
| २५ | १ | ६ | सत्वं | सत्त्वं |
| २५ | १ | ९ | ब्रह्मवणः | ब्रह्मणः |
| २६ | १ | ३ | वैय्यधिक | वैयधिकरण्यं |
| २६ | १ | ८ | वनसन्धानानन | वनुसन्धानाननु |
| २६ | २ | ५ | भ्रतानि | भूतानि |
| २६ | ३ | ८ | तौत्य | तौल्य |
| २७ | १ | ९ | बृहस्यते | बृहस्पते |
| २७ | २ | २ | एकस्मिन | एकस्मिन् |
| २७ | २ | ४ | त्तुत्यो | त्तुल्यो |
| २८ | १ | ९ | 'शरीरक | शारीरक |
| ३८ | २ | ६ | सम्धवे | सम्भवे |
| २९ | १ | १ | दारव | दारैव |

| शुद्धिपत्रं | पत्र | पृष्ठ | पक्ति | अशुद्ध | शुद्ध | पत्र | पृष्ठ | पक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|---|---|---|---|---|
| १ | ११ | १ | ७ | दष्टृत्वा | द्रष्टृत्वा | १५ | १ | ६ | प्रमाण्या | प्रामाण्या |
| | ११ | २ | ७ | चतन्य | चैतन्य | १५ | १ | ८ | प्रमाण्ये | प्रामाण्ये |
| | १२ | १ | ९ | आनन्दो | आनन्दौ | १५ | २ | ७ | पावल्य | प्राबल्य |
| | १२ | २ | ३ | हङ्कारवाच्छिन्न | हङ्कारावच्छिन्न | १५ | २ | ९ | केचिद्ब्रूय | केचिद्ब्रूयु |
| | १२ | २ | ५ | संस्कारर्थं | संस्कारार्थं | १६ | २ | ६ | वहिष्यमान | वहिष्यवमान |
| | १३ | १ | १ | इनि | इति | १६ | २ | २ | रुपत्वावदेकं | रुपत्वावेदकं |
| | १४ | २ | ५ | संसग | संसर्ग | २२ | १ | २ | मपक्ष्य | सपेक्ष्य |
| | १५ | १ | ४ | सद्रप | सद्रूप | २२ | १ | २ | तनापि | तेनापि |

| शुद्धिपत्र | पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध | पत्र | पृष्ठ | पंक्ति | अशुद्ध | शुद्ध | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| २ | २९ | २ | १ | दितिच | दितिचे | ३१ | २ | ३ | चेतन्य | चैतन्य | |
| | २९ | २ | १ | कचिद्यदि | केचिद्यदि | ३२ | २ | ६ | विरोधा | विरोधात् | |
| | ३० | १ | ९ | फलप्राप्तः | फलप्राप्तेः | ३४ | १ | ३ | कण्ट | कण्ठ | |
| | ३० | २ | ७ | उपास्या | उपास्त्या | ३५ | २ | ८ | मस्मि | मस्ति | |
| | ३१ | १ | १ | अपरतु | अपरेतु | ३६ | २ | २ | भावापत्तो | भावापत्तौ | २ |
| | ३१ | २ | १ | एवद | एवेद | ३६ | २ | ३ | भावापत्त्यु | भावापन्त्यु | |

नगरे कलिकत्ताख्ये फाल्गुने रविवासरे । कृष्णपक्षतृतीयायां वाणचन्द्रनवैकके ॥ १ ॥
शास्त्रसिद्धान्तलेशानां सारसङ्ग्रहनामकः । मुद्रायितोऽभूद्ग्रन्थोऽयं मुक्तिनाथेन भिक्षुणा ॥२॥

संस्कृतयन्त्रः । संवत् १९ १५ ।

8025

# वेदान्तपरिभाषासटीक

॥श्रीकाशीविश्वनाथपुरीमें महल्लाछोटीपीअरी पर्बाबुकौलेश्वरसिंहजीके मकानमें बाबुकिसुनदयालसिंहजीके छापाखानामे गणेशप्रभाकर छापाखानेमें यह वेदान्तपरिभाषासटीक बहुतशुद्धतापूर्वक छापागयाजिसकोलेनाहोयसो· नई सडकपर बाबुकौलेश्वर सिंहजीके दुकानपरमिलेगी· हस्ताक्षर बालाराव लेखक· शोधक बालशास्त्रीपंडितः॥ कारीगर रामदत्त सं·१९५०माघवद्य१

पपुंपालकंचक्रंकर्त्तारमित्यर्थः सहोराप्यंसहोरैःसाधुभिराप्तुंयोग्यमित्यर्थः बोधम्विमलंसकामैर्दुःखेनप्राप्तुमशक्यंहोरालग्नेपिराध्यईशास्त्रेरत्नाभिदोरपिहोराभिःशास्त्रैःस
हवर्त्ततेसहोरामणात्वविरत्नैराप्तुंयोग्यइतिसहोराप्यस्तेषामित्यर्थोवाअतसंअततीत्यतसः वायुरात्माचतंतंप्रसिद्धं॥ शिवमहंभजेइत्यन्वयः टिप्पनम्॥ ९ ॥ ६ ॥ ९ ॥
ॐ श्रीगणेशायनमः॥ पपुंचक्रंदेवंहरमचलमाराध्यममरैःसहोराप्यंबोधंखलजनदुरापंप्रभकारंपरेशंसर्वेषामतसममृतंसर्वमतुलंभजेहंतंविष्णुंशिवमखि
लवेदान्तविदितं १ नुमः श्रीबालगोपालतीर्थान् व्यासमुख्यान्मुनीन् विघ्नहर्तृन्गणेशादीन्पण्डितांश्च विमत्सरान् २ पितरंमातरंनत्वास्वीयनिबंधयंत्रितः करो
मिसुखबोधायपरिभाषार्थदीपिकाम् ३ श्रीमद्वेदान्तार्थनिर्णयात्मकंप्रकरणमारभमाणोधर्मराजाध्वरीन्द्रोग्रंथस्यनिर्विघ्नपरिसमाप्त्यादिप्रयोजनमवगीतशिष्टा
चारानुमितश्रुतिप्रमितकर्त्तव्यताकंमङ्गलमाचरन् प्रेक्षावत्प्रवृत्त्यंगभूतेविषयप्रयोजनेदर्शयतियदितिनतुशिष्टाचारःकिमाचारत्वेदमूलताकल्पयतिउतधर्म
त्वात् नाद्यः निष्ठीवनादेरपिवेदमूलतातत्कल्पकत्वप्रसंगात् नद्वितीयःधर्मत्वसिद्धौवेदमूलकत्वंवेदमूलत्वेचधर्मत्वमित्यन्योन्याश्रयादितिचेन्नशिष्टेधर्म

॥श्रीगणेशायनमः॥ यद्विद्याविलासेनभूतभौतिकसृष्टयः॥ तन्नौमिपरमात्मानंसच्चिदानंदविग्रहम्॥१॥ श्री ॥

बुद्ध्याऽनुष्ठीयमानस्याचारस्य तत्कल्पकत्वात् नचशिष्टासिद्धिः वैदिकार्थानुष्ठातॄणांशिष्टत्वात् तंपरमेश्वरंतत्पदवाच्यंनौमिपरंएवलक्षयितुंत
टस्थलक्षणमाह यदितियस्याविद्यायद्विद्यायदधिष्ठितायदधीनामायेत्यर्थः मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं देवीह्येषागुणमयीममामायादुरत्यये
तिश्रुतिस्मृतिभ्यांतस्याविलासःकार्यकारणपरिणामस्तेनभूतानांवियदादीनांसूक्ष्माऽसूक्ष्माणांभौतिकानांचराचराणांभूतकार्याणांचसृष्टयःसृष्टिग्रहणंस्थिति
प्रलययोरप्युपलक्षणम् सृष्टिस्थितिप्रलयाःभवंतीत्यआहारः अजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजाःसृजमानांसरूपाः मयाध्यक्षेणप्रकृतिःसूयतेसचरा
चरमितिश्रुतिस्मृतिभ्यांएवंतटस्थलक्षणमुक्त्वास्वरूपलक्षणमाह सदितिएतेनशून्यवादिनःसांख्यवैशेषिकादेश्चमतंनिराकृतंवेदितव्यंनतावत् शून्यंजग
त्कारणम् भवतिकथमसतःसज्जायेतइतितर्कानुगृहीतयाश्रुत्याऽसतस्तत्कारणत्वप्रतिषेधात् निरधिष्ठानभ्रमानुपपत्तेःसदेवसोम्येदमग्रआसीत्सन्मू
वेदमूलता॥पं·६

1

लाःसोम्येमाःप्रजाइत्यादिश्रुत्यासतएवजगत्कारणत्वावगमाच्चअसत्वाइदमग्रआसीत्इतिश्रुतिस्त्वासत्पदंतुअनभिव्यक्तनामरूपत्वेनगौण्यावृत्त्यासत्वे
वयोजनीयंसमाकर्षादितिन्यायात् प्रकृतस्यैवसत्यज्ञानादिलक्षणस्यसम्यक् नामरूपादिराहित्येनप्रतिपादनादितिसूत्रार्थः नापिप्रधानपरमाण्वादेर्जग
त्कारणत्वंसंगच्छते सोऽकामयतबहुस्यांप्रजायेय आनंदाद्ध्येवखल्विमानिभूतानिजायंते आनंदेनजातानिजीवंति॥आनंदंप्रयंत्यभिसंविशंतीत्यादिश्रुत्या
चिदानंदात्मकस्यैवतत्कारणत्वप्रतिपादनात् परमेश्वरस्यताटस्थ्यंवारयतिआत्मानमिति अंतर्यामिणमित्यर्थः एषतआत्मांतर्याम्यमृत इतिश्रुतेः ल
क्ष्यपक्षेतुतंपरंमायादिपरंतदसंसृष्टंशुद्धंतत्पदार्थंनौमितमेवलक्षयतियदितियत्तुयस्मिन् अविद्यायाअविलासोयस्मिन् तथाचयस्मिन्नविद्याविला
साभाववति भूतभौतिकसृष्टयोनैवसंतिनेहनानास्तिकिंचनेत्यादिश्रुतेः तत्त्वरूपंदर्शयतिसच्चिदानंदविग्रहमितिसदादिपदलक्ष्यत्वात् तदात्मकमि
त्यर्थः तस्यानात्मत्वंवारयतिआत्मानमिति त्वंपद वाच्यलक्ष्यार्थौवक्ष्यनेनश्लोकेनदर्शितौतथाहितमात्मानंनौमिदेहाद्यात्मवादिनांमतंनिराचष्टेपरमि
तितत्रनतावत् लोकायतिकेषुस्थूलोहंकृशोहमित्याद्यनुभवात् पृथिव्यादिभूतचतुष्टययोगजचैतन्यवान् स्थूलदेहएवात्मेतिकेषांचिदभिमतआत्मा
देहस्यस्वप्नसुषुप्तयोरभोक्तृत्वात् योहंबाल्येपितरौअन्वभूवंसोहंस्थविरेनप्तॄन् अनुभवामीतिप्रत्यभिज्ञानुपपत्तेः कृतहान्यकृताभ्यागमापत्तेश्चना
पिचपश्याम्यहं शृणोम्यहमित्यनुभवादिंद्रियाण्यात्माइत्यपरेषामभिमतः तेषांसंहतानामात्मत्वेएकविनाशेप्यात्मनाशप्रसंगात् प्रत्येकमात्मत्वेविरुद्धा
दिक्क्रियतयाशरीरोन्मथनतापातात् अक्रियत्वापाताच्चनाप्यशितपीतादिभोक्ताप्राणआत्मेत्यन्येषामभिमतः सत्यपिप्राणेसुषुप्तौतस्याभोक्तृत्वादर्शना
त् नापिसुख्यहं दुःख्यहमित्यनुभवात्सुखादिधर्मकंमनः आत्मेत्यपरेषामभिप्रेतः सर्वेन्द्रियानुग्राहकतयातस्यकारणत्वानुभवात् तथाबौद्धस्यापि
कर्तृरूपंविज्ञानमात्मातच्चक्षणिकंप्रदीपकलिकावदितियोगाचाराद्यभिमतो प्यात्मानसंभवतिउक्तप्रत्यभिज्ञाविरोधात् तदेतत्सर्वमभिप्रेत्योक्तंपरमितिदेहा
दिभ्योऽन्नमयादिकोशेभ्यःपरंव्यतिरिक्तमित्यर्थः एवंपरमितिविशेषणेनैवचंदनबिंदुवदेकदेशस्थत्वेपिसर्वांगीणशैत्योपलंभोपपत्तेरणुरनागंतुकसुखदुःखा
दिमानित्येकदेशिमतंदेहादिलक्षणोदेहपरिमितइत्यार्हतमतंचनिराकृतंवेदितव्यंपरंप्रकृष्टविभुमित्यर्थावगमात् आत्मनोऽणुत्वेचंदनबिन्दुशैत्यवत्स्वाश्र

Nepal Sanskrit University, Dang

विमतंविज्ञानंह्यगोचरसंवेदनविरहप्रयुक्तव्यवहाररहितंनभवतिएतावदुक्तेपरमतेव्यवसायज्ञानमादायबाधकत्वस्यवारणायस्वसमानकालेतिसंविद्विशेषणंप्रकृष्टां
तज्ज्ञानाभावमादायसिद्धसाधनतावारणायस्वसमानाश्रयेतिसंविद्विशेषणंपक्षीभूतविज्ञानशब्देनार्थान्तरतावारणायविमतेतिपक्षविशेषणम्॥टिप्पनपंक्ति १०॥ ७॥
यांशप्रसर्पणद्वारानिरंशायाआत्मोपलब्धेःसर्वांगसंगित्वासंभवेनगंगाह्रदनिमग्नस्ययुगपत्सर्वांगीणशैत्योपलंभाभावप्रसंगात्बालाग्रशतभागस्यश
तधाकल्पितस्यचजीवोभागःसविज्ञेयःसचानंत्यायकल्पतेअणोरणीयानित्याद्याश्रुतिस्तुमहतोमहीयानितिवाक्यशेषान्महानजइतिश्रुतेश्चनराञ्चात्मनोऽणुत्वस्य
त्वमात्रपरानापिदेहपरिमितएकस्यात्मनःक्रमेणगजमनुजमशकशरीरप्राप्तावयवोपचयापचयस्यावश्यकत्वेनानित्यत्वापातात्एवंदेहाद्यात्मवादिनो
निराकृत्यशून्यमात्मेतिवादिनोमाध्यमिकान्विभुत्वेपितत्तदात्ममनसांस्वस्वामिभावसंबंधवशेनतत्तदात्मनितत्तन्मनःसंयोगजसुखदुःखादिव्यवस्थोपप
त्तेरनेकोनित्योऽजोजडोपिबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्मादिगुणानामाश्रयःकर्त्ताभोक्ताचेतिवादिनस्तार्किकवैशेषिकप्राभाकरानहमनुभ
वस्याभयात्मत्वदर्शनात्जडबोधरूपइतिवादिनोभट्टांश्चनिराचष्टेसच्चिदानंदविग्रहमितिअस्तीत्येवोपलब्धव्यइत्यादिश्रुतेःनिरधिष्ठानकभ्रमाऽसं
भवात् स्तनपानादिप्रवर्तकजन्मांतरीयसंस्कारानुवृत्तिदर्शनाच्चसदात्मकमित्यर्थःएतेनशून्यवादिमतंनिरस्तम् अत्रायंपुरुषःस्वयंज्योतिःसत्यंज्ञान
मनंतंब्रह्मअयमात्माब्रह्मसर्वानुभूरित्यादिश्रुत्यास्वयंप्रकाशत्वेनस्वयंप्रकाशज्ञानात्मत्वेनचप्रतिपादनात् चिदात्मकमित्यर्थःननुविज्ञानस्यकथं
स्वप्रकाशतेतिचेन्नविषयात्मविज्ञानानांत्रयाणामपिजडत्वेजगदांध्यप्रसंगात् विज्ञानस्यविज्ञानांतरसापेक्षत्वेतस्याऽपिजडत्वेनाऽनवस्थापाताच्च
अत्रायंप्रयोगःविमतंविज्ञानंस्वसमानाश्रय।स्वसमानकालस्वगोचरसंवेदनविरहप्रयुक्तव्यवहाररहितंनभवतिविज्ञानत्वात्अनंतरव्यवह्रिय
माणविज्ञानवदिति विज्ञानमानंदंब्रह्मेत्यादिश्रुतौमत्वर्थीयाच्प्रत्ययप्रकल्प्यविज्ञानमस्यास्तीतिविज्ञानमितिव्याख्यानंतुनादरणीयंस्वरितस्व
रोच्चारणसंप्रदायविरोधात्आत्मनोविज्ञानात्मत्वेत्वयंप्रयोगःविज्ञातानस्वातिरिक्तविज्ञानाधीनप्रकाशःविज्ञानकर्मतामंतरेणअपरोक्षत्वात्संवेदनवत्

विज्ञानमानन्दमितिविज्ञायतेयतदितिविज्ञातिरितिवाविग्रहेविपूर्वाज्ज्ञानातेर्बाहुलकात्कर्मणिभावेवाल्युटिलितीतिसूत्रेणज्ञानातेराकारस्योदात्तत्वंतस्यचानादेशा
कारेणाकःसवर्णेदीर्घइतिसूत्रेणैकादेशेएकादेशउदात्तेनोदात्तइत्येकादेशस्योदात्तत्वअनादेशनकाराकारस्यत्वनुदात्तपदमेकंवर्जमित्यनुदात्तत्वंपुनश्चोदात्तादनु
दात्तस्यस्वरितइतितस्योदात्तात्परत्वेनस्वरितत्वमितिविज्ञानशब्दस्यस्वरितस्वरांतत्वंसंप्रदायसिद्धंविज्ञानशब्दस्याच्प्रत्ययांतत्वेतुइतिसूत्रेणप्रकृतिप्रत्ययसमुदा
यस्यांतोदात्तत्वंस्यादितिचितिप्रत्ययेसतिप्रकृतिप्रत्ययसमुदायस्यांतोदात्तोवाच्यइतितदर्थः॥टि॰पं॰२॥

१॥ ३

संवित्कर्मतामंतरेणअपरोक्षत्वात्॥टि·पं·१॥

यद्वाविज्ञातास्वप्रकाशस्तत्त्वात्तद्दितिआत्मापरमानंदस्वभावःपरप्रेमास्पदत्वात् व्यतिरेकेघटवदित्यादियुक्त्याआनंदोब्रह्मेत्यादिश्रुत्याचानंदात्मक
मित्यर्थःजडाजडात्मकत्वंतुविरोधादेवनसंभवतिएतेनतार्किकादिमतंपराकृतम् तत्त्वज्ञाननिवर्त्यत्वंबोधयितुंप्रपंचस्यजीवाश्रिताज्ञानकल्पितत्वंद
र्शयतियदितियदाश्रिताऽविद्याऽनाद्यज्ञानंतस्याविलासेनभूतभौतिकसृष्टयोभवंतीत्यर्थः लक्ष्यपक्षेतुतंपरमज्ञानादिसमस्तोपाधिविलक्षणमात्मानं।
नौमिपरमितिविशेषणेनाऽऽत्मानमित्येकवचनेनचतस्यभोक्तृत्वमनेकत्वंचवदतः सांख्याःपातञ्जलाश्चपराकृतावेदितव्याः शिष्टंतत्पदलक्ष्यवद्यो
जनीयम् अखंडार्थोप्यनेनश्लोकेनदर्शितः तथाहितंपरमात्मानंप्रत्यगभिन्नंपरमात्मानंनौमितज्ज्ञाननिवर्त्यत्वबोधनायतद्विषयकाऽज्ञानकल्पित।
त्वंनामरूपात्मकप्रपंचस्यदर्शयतियदितियदविद्यायद्विषयकमनाद्यऽनिर्वचनीयमज्ञानंतस्याविलासेनभूतभौतिकसृष्टयोभवंतीत्यर्थः समानम

यदन्तेवासिपंचास्यैर्निरस्ताभेदिवारणाः तंप्रणौमिनृसिंहाख्यंयतीन्द्रंपरमंगुरुम् २ श्रीमद्वंकटनाथाख्यान्वेलांगुडिनिवासि
नः जगद्गुरूनहंवन्देसर्वतंत्रप्रवर्त्तकान् ३ येनचिन्तामणौटीकादशटीकाविभञ्जिनीतर्कचूडामणिर्नामकृताविद्वन्मनोरमा॥४॥

न्यत तथाचाऽनेनश्लोकेनबंधस्याऽविद्यकत्वेनविद्यानिवर्त्यत्वंतत्त्वंपदाखंडार्थंचप्रदर्शयताजीवब्रह्मणोरैक्यमेवाऽज्ञातंसद्विषयोज्ञातंसत्प्रयोज
नमितिप्रवृत्त्यङ्गभूतेविषयप्रयोजनेप्रकाशिते॥१॥एकमिष्टदेवतांनमस्कृत्यगुरुप्रसादात् परमात्मलाभइत्यादिनागुरुप्रसादस्यविद्याप्राप्तिप्रत्यंतर
ङ्गत्वप्रतीतेर्गुरवोऽवश्यंपूज्याइत्यभिप्रायेणपरमगुरूनप्रथमंप्रणमतियदितिअंतेसमीपेवस्तुंशीलंयेषांतेऽन्तेवासिनःशिष्यास्तएवपंचास्याःसिं
हाःयस्यांतेवासिपंचास्यैर्भेदवादिलक्षणावारणाःगजानिरस्तास्तंयतीनांयत्नशीलानांपरमहंसपरिव्राजकानामिंद्रंनृसिंहसंज्ञकंपरमंगुरुंप्रणौमि
प्रकर्षेणमनःकायवाक्प्रणिधानेननौमीत्यर्थः २ एवंपरमगुरुंप्रणिपत्यसाक्षाद्विद्यागुरूनभिवन्दतेश्रीमद्वंकटनाथाख्यानिति ३ चिकीर्षितग्रंथ
स्योपादेयतासिद्धयेस्वकीर्त्यनुवृत्तयेचस्वस्यनानाविधग्रंथकर्तृत्वप्रदर्शनपुरस्सरंचिकी·

एकाग्र्येणकृत्वाइत्यर्थः॥टि·पं·२॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

वे·प·
टी·टी
३

र्पितंप्रतिजानीतेयेनेतिद्वाभ्याम्येनदृशटीकाविभञ्जिनीविद्वन्मनोरमातर्कचूडामणिसंज्ञिकाप्रसिद्धाचिंतामणौटीकाकृतातेनधर्मराजाध्वरींद्र
संज्ञकेनपरिभाषावितन्यतेइतियोजनाप्रयोजनंनिर्दिशतिबोधयतिमंदानांमंदबुद्धीनामलसानामितिवाबोधायतत्त्वज्ञानाययद्यपिबुद्धिमतामन
लसानांसूत्रभाष्यादिकंबोधसाधनमस्त्येवतथापिमन्दानुग्राहकोयंग्रंथइतिबोधनायमंदानामित्युक्तंबोधयोग्यतांदर्शयितुंविशिनष्टिवेदान्तेति
वेदांतानांश्रुतिमस्तकानामर्थानवलंवितुंशीलमस्याअस्तीतितथाएवंचाऽस्यसमस्तवेदांततात्पर्यार्थप्रतिपादकस्येतरसंक्षिप्तग्रंथैरगतार्थताइति।
बोध्यम्·एवंदेवतागुरुप्रणतिपुरस्सरंग्रंथकरणंप्रतिज्ञायइदानींकरिष्यमाणग्रंथस्यशारीरकमीमांसयासंगतिंद्योतयितुंग्रंथप्रतिपाद्यंदर्शयतिइहे
त्यादिनिरूप्यतेइत्यंतेनइहास्यांपरिभाषायांखल्वितिवाक्यालंकारेब्रह्मतज्ज्ञानंतत्प्रमाणंचसप्रपंचंनिरूप्यतेइतिसंबंधःकृतइत्यतआहधर्मेत्या।

तेनबोधायमंदानांवेदान्तार्थावलंविनी।धर्मराजाध्वरींद्रेणपरिभाषावितन्यते ५ इहखलुधर्मार्थकाममोक्षाख्येषुचतुर्विध
पुरुषार्थेषुमोक्षएवपरमपुरुषार्थः नसपुनरावर्ततइतिश्रुत्यातस्यनित्यत्वावगमात्इतरेषांत्रयाणांप्रत्यक्षेण॥तद्यथेहकर्मचि
तोलोकःक्षीयतएवमेवामुत्रपुण्यचितोलोकःक्षीयतेइत्यादिश्रुत्याचानित्यत्वावगमात्सचब्रह्मज्ञानादिति॥ दिनायद्वाइहलो।

केवेदेचखलुप्रसिद्धंधर्मार्थकाममोक्षसंज्ञकेषुचतुर्विधपुरुषार्थेषुपुरुषैरर्थ्यमानेषुमोक्षएवपरमउत्कृष्टःपुरुषार्थःपरमत्वंचनिरतिशयत्वेसति
क्षयशून्यत्वंतच्चमोक्षस्यैवास्तीत्यतउक्तम्एवेतिमोक्षस्यपरमपुरुषार्थत्वेश्रुतिबोधितंनित्यत्वंहेतुमाहनेतिसब्रह्मज्ञानेनमुक्तःपुनर्भूयोनाऽऽवर्त
तेपुनःपुनर्जन्ममरणलक्षणांसंसृतिंनभजतेइतिश्रुत्यामोक्षस्यैवनित्यत्वावगमात्एवंमोक्षस्यपरमपुरुषार्थत्वेहेतुमुक्त्वाधर्मादित्रयाणांतदभावे
प्रत्यक्षेणयत्कृतकंतदनित्यमितिसामान्यतोदृष्टानुमानाऽनुगृहीतश्रुत्याचावगतंतेषामनित्यत्वंहेतुमाहइतरेषामितिइतरेषांधर्मादित्रयाणाम्
॥तद्यथाइहास्मिन्लोकेकृष्यादिकर्मणाचितःसंचितःसस्यादिलोकःकृतकत्वात्क्षीयतेतद्वदेवअमुत्रपरलोकेपुण्यादृष्टेनसंचितःस्वर्गादिर्लोकः
॥ क्षीयतेइतिश्रुत्याचानित्यत्वावगमादत्रार्थकामयोःप्रत्यक्षेणश्रुत्याचधर्मस्यतुश्रुत्याइतिविभागःयद्वाप्रत्यक्षस्यकृतकत्वबोधन॥
परमपुरुषार्थत्वाभावे·पं·४॥

3

राम
३

ज्ञाताधर्मोनित्यत्वबोधनसामर्थ्यमित्यविरोधः तथाचतेषामपिपुरुषार्थत्वादिनानित्यत्वानुमानंपरार्थत्वादिनावन्ह्यनौष्ण्या नुमानवद्बाधितविषयंअपामसोमममृताअभूमअक्षय्यंहवैचातुर्मास्ययाजिनंसुकृतंभवतीत्याद्याश्रुतिश्चानुमानानुगृहीतोदाहृतश्रुतिविरोधेनप्रलयपर्यंतस्थायिफलाभिप्रायादितिभावः एवंमोक्षस्यपरपुरुषार्थत्वमस्याधनतरतिशोकमात्मवित्तमेवविदित्वाऽतिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेत्यादिश्रुत्यातस्यसाधनंब्रह्मज्ञानमित्याहसचेतिसचमोक्षःब्रह्मज्ञानादेवइत्येवकारोनुषज्यतेयतोमोक्षएवपरमपुरुषार्थःसचब्रह्मज्ञानादेवयतश्चभवतीतिहेतोर्मंदानांमुमुक्षूणामुपकारायब्रह्मज्ञानंतत्प्रमाणंचेतित्रितयंसपरिकरंनिरूप्यतेइत्यर्थःएवंग्रंथाभिधेयंप्रदर्श्यब्रह्मणस्तज्ज्ञानाधीननिरूपणत्वात्तस्यचतत्प्रमाणायत्तनिरूपणत्वात्प्रथमंप्रमाणनिरूपणमारभतेतत्रेत्यादिनातत्रतेषुब्रह्मतज्ज्ञानतत्प्रमाणेषुप्रमायाःकरणंप्रमाणंकरणत्वंचाऽसाधारणकारणत्वंस

ब्रह्मतज्ज्ञानंतत्प्रमाणंचसप्रपंचंनिरूप्यते तत्रप्रमाकरणंप्रमाणं तत्रस्मृतिव्यावृत्तंप्रमात्वं अनधिगताबाधितविषयज्ञानत्वस्मृतिसाधारणंत्ववाधितविषयकज्ञानत्वम्॥नीरूपस्यापिकालस्येंद्रियवेद्यत्वाभ्युपगमेनधारावाहिकबुद्धेरपिपूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविशिष्टविषयकत्वेननतत्राव्याप्तिः॥

९तिव्यापारवत्त्वंतेनपरामर्शादौसव्यापारेमनसिचनातिप्रसंगः प्रमायालक्षणंकिमित्याकांक्षायांतल्लक्षणमाहतत्रेतितत्रप्रमाकरणमित्यत्रस्मृतिव्यावृत्तंप्रमात्वमितितथाचतस्याअलक्ष्यत्वान्नतत्राव्याप्तिरितिभावःस्मृतावतिव्याप्तिवारणायानधिगतेतिविषयेविशेषणंशुक्तिरूप्यज्ञानादौतन्निरासायअबाधितेतिज्ञानपदंतुस्वरूपकथनार्थंइच्छादीनांआद्यविशेषणेनैवनिरासात् यद्वाचक्षुरादिष्वपिअतिव्याप्तिवारणार्थंज्ञानेतितेषामपिफलद्वाराघटादिविषयत्वाभ्युपगमात् ज्ञप्तिर्ज्ञानंतेननतत्करणेज्ञानेऽतिव्याप्तिःस्मृतावपिप्रामाण्यव्यवहारदर्शनादाहस्मृतीति·इच्छादिव्यावृत्त्यर्थंज्ञानपदम्·॥नन्वयंघटअयंघटइत्येवमादिरूपधारावाहिकबुद्धिस्थलेद्वितीयादिज्ञानानामधिगतविषयत्वात् प्रथमलक्षणंतत्राऽव्याप्तमितिचेत्तत्राह।नीरूपस्येतिइदानींघटोवर्त्ततेइत्येवंरूपानन्यथासिद्धप्रतीतिबलेनमहत्त्व

करणत्वस्यसाज्ञानशब्दवाच्यचक्षुरादौ॥आदिनाकृतिसंस्कारादीनांसंग्रहः॥टि·पं·

स्फुरणरूपं·॥टि·प·२

विशिष्ट-अ-टि-पं-२ रूपस्य

समानाधिकरणोद्भूतरूपवत्त्वस्य कालातिरिक्तद्रव्यचाक्षुषताप्रयोजकत्वकल्पनात् प्रयोजकानुसारेण प्रतीतिकल्पने तु नीरूपस्याऽचाक्षुषत्वापत्तेनीरूपस्यापि कालस्य प्रत्यक्षप्रमाणजन्यानुभवविषयत्वस्वीकारेण धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तदुत्तरक्षणविशेषविषयकत्वेनाऽधिगतविषयत्वाभावान्न तत्र धारावाहिकबुद्धिस्थलेऽव्याप्तिरित्यर्थः न चैवं शाब्दधारावाहिकद्वितीयादिज्ञानेऽव्याप्तिरिति शंक्यं आकांक्षायाः पदार्थज्ञानस्य चाभावेन तत्र धारावाहिकबुद्धेरेवासिद्धेः अत एव न धारावाहिकद्वितीयाद्यनुमितावव्याप्तिर्द्वितीयानुमितिक्षणे प्रथमानुमितेर्विनष्टत्वेन तस्या अनधिगतविषयत्वात् नन्वेवं तद्ध्याकाशे बलाकेति प्रतीतिबलादाकाशस्यापि प्रत्यक्षत्वं स्यान्न चेष्टापत्तिस्तत्सद्भावे शब्दलिंगकानुमानप्रमाणानुसरणाऽनुपपत्तेः अप्रत्यक्षे ह्याकाशे बालास्तलमलिनताद्यध्यस्यंतीति भाष्यकृद्वचनविरोधाच्च नीरूपस्य रूपस्य चाक्षुषत्वं त्वद्रूपत्वाविरुद्धम् तस्मात्सुरभि चंदनमित्यत्र यथा

किंच सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः किंतु यावद्घटस्फुरणं तावत् घटाकारान्तःकरणवृत्तिरेकैव न तु नाना वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात् तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशंकापि॥

११ सौरभ्यांशे परोक्षत्वं न तद्वत्कालांशे परोक्षत्वमेवाभ्युपेयं न चाक्षुषत्वम् तथा च नीरूपस्य न तल्लक्षणस्याऽचाक्षुषत्वात् धारावाहिकबुद्धावव्याप्तिस्तदवस्थैवेत्यरुचेराह किंचेति ननु कुतस्तत्र ज्ञानभेदो नास्तीति पृच्छति किंत्विति। यावत्कालमस्ति प्रकाशत इति घटस्य। स्फुरणं तावत्काले लाघवेन घटाकारान्तःकरणवृत्तेरेकत्वादित्युत्तरमाह यावदिति एवकारव्यावर्त्यमाह न त्विति गौरवादिति भावः॥ नन्वतिलाघवात् सुषुप्तिपर्यन्तमेकैव वृत्तिः कुतो नांगीक्रियते इत्याशंक्य स्वविरोधिवृत्त्युत्पत्तिकाले न तत्स्थितेरसंभवेन तस्यास्तत्पर्यन्तं स्थायित्वाभ्युपगमादित्याह वृत्तेरिति प्रकृतवृत्तेरित्यर्थः॥ ननु ज्ञानभेदनिरासार्थं वृत्तेरेकत्ववर्णनमयुक्तं सिद्धान्ते चैतन्यस्य ज्ञानत्वादित्याशंक्य वृत्तिप्रतिफलितस्यैतस्य घटादिज्ञानत्वेन तदेकत्वसिद्ध्या तत्प्रतिफलितचैतन्यरूपघटादिज्ञानस्याप्येकत्वसिद्धेरित्याशयेनाह तथा चेति वृत्तिभेदाभावे सिद्धे सति तत्र धारावाहिकस्थले यावत्का

4

राम
५

ननुप्रथमं घटवृत्तिजाता तदनन्तरं पटवृत्तिउदेति ततः पश्चात्पुनरपि
घटवृत्तिउदेति॥ अतएव अधिगत एव नैव अनधिगतः॥ टि॰ पं॰ १॥

लीनं घटस्फुरणं तावत्कालीनमेकमेवेति हेतोरव्याप्तिशंकापि नास्ति नन्वेवमपि विरोधिवृत्त्यनन्तरं पुनर्जायमानस्य घटादिज्ञानस्याधिगतविषयत्वेन तत्राव्याप्तिरिति चेन्नाऽनधिगतविषयपदेन स्वाऽन्यूनविषयकाऽनुभावाऽजन्यत्वस्य विवक्षितत्वात् ननु सिद्धान्ते घटादेः शुक्तिरूप्यवन्मिथ्यात्वेन बाधितत्वात्तज्ज्ञानस्याप्रमात्वेन लक्ष्यत्वाभावात्तत्राव्याप्तिशंकातन्निरासौ अनुपपन्नाविस्याशयेन शंकते नन्विति कथं प्रमाणं प्रमात्वेन लक्ष्यं न भवतीत्यर्थः समाधानं प्रतिजानीते उच्यत इति किं ब्रह्मसाक्षात्कारानन्तरं घटादीनां बाधः उत शुक्तिरूप्यवत् संसारदशायामिति विकल्प्य। आद्यमंगीकरोति। ब्रह्मेति। तत्र श्रुतिं प्रमाणयति यत्रेति यत्र यस्यां तत्त्वसाक्षात्कारदशायां अज्ञानावस्थावैलक्षण्यद्योतकस्तुशब्दः अस्य ब्रह्मसाक्षात्कारवतः सर्वमात्मैवाभूत् तत्तस्यां दशायां केन कारणेन कं विषयं पश्येत् सर्वस्यापि तत्त्वज्ञानेन बाधितत्वादित्यर्थः॥ द्वितीयं निरस्यति नत्विति अत्रापि श्रुतिं प्रमाणयति यत्रेति यत्र यस्यां

ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात् तज्ज्ञानं कथं प्रमाणमुच्यते ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति श्रुतेः॥ नतु संसारदशायां बाधः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति श्रुतेः तथा चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः तदुक्तं देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात्

ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः लौकिकमिति घटा॥ संसारदशायां द्वैतमिव भवति तत्तत्र स्यामितरः सन्नितरं पश्यतीत्यर्थः तथा च संसारदशायां घटादेरबाधितत्वेन तज्ज्ञानस्य लक्ष्यत्वात्तत्राव्याप्तिशंकातन्निरासावपेक्षितावेवेति भावः नन्वेवं सति घटादेः कालत्रयेऽबाधितत्वाभावादुक्तलक्षणं तत्राऽव्याप्तमिति चेत्तत्राह तथा चेति संसारदशायामबाधितत्वेन घटादिप्रमायाः लक्ष्यत्वे सति तत्राव्याप्तिनिरासायाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न तत्प्रमायामव्याप्तिरित्यर्थः स्वोक्तं घटादिज्ञानप्रामाण्यमभियुक्तवचनेन द्रढयितुमाह· तदुक्तमिति· आत्मनिश्चयस्य संसारदशायामपि सत्त्वादाह ब्रह्मेति लौकिकं प्रत्यक्षजन्यज्ञानमात्रमिति भ्रमव्यवच्छेदायाह घटादीति

आ

अरुनित्वापातात्॥टि·पं·६॥

इत्युक्तत्वेन प्रमातिरिक्तवस्तुज्ञानं सर्वं तेन ग्राह्यमित्यर्थः तेन स्वर्गेष्टसाधनतादिज्ञानंस्यालौकिकत्वेपि न क्षतिः एवंलक्षणलक्षितप्रमाकरणंप्रमाणं कतिविधमित्यपेक्षायामाह तानीति· प्रत्यक्षमेकमिति चार्वाकः प्रत्यक्षानुमाने इति काणादसुगतमतानुयायिनः शब्देन सह त्रीणीति सांख्याः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति नैयायिकाः अर्थापत्त्या सह पंचेति प्राभाकरास्तेषां निराकरणायोक्तं षडिति तानि कानीत्यपेक्षायामाह प्रत्यक्षेति तत्र प्रत्यक्षस्य सर्वप्रमाणोपजीव्यत्वाज्ज्येष्ठत्वाच्च तन्निरूपणमेव प्रथममारभते तत्रेति· तेषु प्रमाणेष्वित्यर्थः अनुमानादावतिव्याप्तिवारणाय प्रत्यक्षेति शुक्तिरूप्यज्ञानादिसाधने तन्निरासाय प्रमापदे प्रत्यक्षप्रमात्वमिंद्रियजन्यज्ञानत्वं ज्ञानाजन्यज्ञानत्वं वा ज्ञानाकरणकज्ञानत्वं वा नाद्यः सिद्धांते मनसो निरिन्द्रियत्वेन सुखादिप्रत्यक्षेऽव्यापकत्वात् न द्वितीयः मतांतरे प्रत्यक्षज्ञानमात्रस्यैवेश्वरज्ञानजन्यतया तत्राव्यापकतापातात् नापि तृतीयः॥ अनुभवस्य संस्कारेऽपक्षीणतया स्मृ

रिज्ञानमित्यर्थः॥ तानि च प्रमाणानि षट् प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धिभेदात् तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्॥ प्रत्यक्षप्रमा चात्र चैतन्यमेव यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः अपरोक्षादित्यस्यापरोक्षमित्यर्थः ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति उच्यते चैतन्यस्यानादित्वेपि तदभिव्यंजकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादि

त्यकरणत्वेन तत्रातिव्याप्तेः संस्कारद्वाराकरणत्वे प्रत्यभिज्ञायामव्याप्तेरित्येवं प्रत्यक्षप्रमाया दुरुपपादत्वात्तदुपपादः पक्षः आश्रयणीय इत्यभिप्रायवानाह प्रत्यक्षप्रमा चेति तत्र श्रुतिं प्रमाणयति· यदिति· प्रमाणद्वारकप्रत्यक्षत्वव्यावृत्त्यर्थं साक्षात्पदं अपरोक्षप्रमाणाद्ब्रह्मणः साक्षात्वमिति भ्रमनिरासायाह अपरोक्षादिति ननु चैतन्यस्याऽनादित्वेन करणाकांक्षाशून्यत्वात् चक्षुरादेस्तत्करणत्वेन प्रमाणत्वं कथमिति शंकते नन्विति तत्तस्मान् चैतन्यस्यानादित्वेपि चैतन्याभिव्यंजकांतःकरणवृत्तेरिंद्रियसन्निकर्षादिनाजन्यत्वेन तद्विशिष्टचैतन्यस्यादिमत्तायाः सुवचत्वेन चक्षुरादेस्तत्करणत्वसंभवेन प्रामाण्योपपत्तेर्मैवमिति परिहरति उच्यत इति अविशिष्टचैतन्यं प्रति चक्षुरादेरकरणत्वं त्विष्टमेव तस्य स्वप्रकाशत्वेन स्वात्मनि प्रमाणव्यापा

॥राऽनपेक्षत्वादिति

भावः ननुवृत्तिरेवप्रत्यक्षप्रमाकिंनस्यात् तस्यांज्ञानव्यवहारोपलब्धेः स्वरूपेणेंद्रियजन्यत्वोपपत्तेश्चइत्याशंक्यसत्यंज्ञानमित्यादिश्रुत्याचैतन्यस्यैवमुख्य
ज्ञानत्वावगमात् वृत्तेश्चजडांतःकरणधर्मत्वेनजडत्वाच्चतस्याःप्रत्यक्षप्रमात्वमपितुतस्यांचैतन्यरूपज्ञानावच्छेदकत्वात्तत्त्वोपचारइत्याशयेनाह।
ज्ञानेतिनन्विदंकेनाचार्येणोक्तमित्याकांक्षायामाह तदुक्तमितितथाचप्रकाशात्मसंज्ञकैराचार्यैर्विवरणाख्येग्रंथेऽभिहितत्वान्नायमपसिद्धांतइतिभा
वः॥नन्वंतःकरणंनपरिणामिनिरवयवत्वादाकाशवदित्यनुमानादंतःकरणस्यपरिणामात्मिकायावृत्तेरेवासंभवेनतद्वृत्तिविशिष्टंचैतन्यंज्ञानमितिवक्तुम
शक्यत्वेनाऽत्मभिन्नमेवज्ञानंतच्चेंद्रियजन्यत्वात्प्रत्यक्षमितिनैयायिकः शंकतेनन्वितिकथंकथमपिनास्तीत्यर्थः अंतःकरणंनिरवयवंनभवतिसादिद्र

नाजायते इतिवृत्तिविशिष्टंचैतन्यमादिमदित्युच्यते ज्ञानावच्छेदकत्वाच्चवृत्तौज्ञानत्वोपचारः तदुक्तंविवरणेअंतःकरणवृ।
त्तौज्ञानत्वोपचारादिति ननुनिरवयवस्यांतःकरणस्यपरिणामात्मिकावृत्तिः कथमित्यन्नतावदंतःकरणंनिरवयवंसादि।
द्रव्यत्वेनसावयवत्वात् सादित्वंचतन्मनोऽसृजतेत्यादिश्रुतेः वृत्तिरूपज्ञानस्यमनोधर्मत्वेचकामःसंकल्पोविचिकित्साश्र
द्धाअश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतिर्मानं धीशब्देन॥

व्यत्वात् घटवदित्यनुमानेनभवदुक्तहेतोरसिद्धत्वेनसादि
द्रव्यत्वहेतुनासिद्धेनसावयवत्वेनतत्परिणामित्वानुमानात्तत्परिणामात्मिकायाःवृत्तेःसंभवात्तद्विशिष्टमात्मचैतन्यमेवज्ञानंनतुतद्भिन्नमित्या
शयवान्परिहरतिद्रव्यमितिआत्मव्यभिचारनिरासायसादीतिरूपादौतद्धारणायद्रव्यत्वेतिनन्वंतःकरणस्यसादित्वेप्रमाणाभावाद्विशेषणासि
द्धोहेतुरितिचेन्नसादित्वेभगवत्याःश्रुतेःप्रमाणत्वादित्याहसादित्वंचेतिततत्ब्रह्ममनोंतःकरणमसृजदित्यर्थःएवमंतःकरणस्यसादित्वेप्रमाण
मुक्त्वातत्परिणामित्वेनकेवलमनुमानमेवप्रमाणमपितुभगवतीश्रुतिरपीत्याहवृत्तिरूपज्ञानस्येतिचकारादनुमानसमुच्चयः कामइच्छाविचिकि।
त्सासंशयः ननुश्रुतौज्ञानस्यानुक्तत्वात्तस्यमनोधर्मत्वेश्रुतेः कथंमानत्वमितिचेत्तत्राह धीशब्देनेति ननुधीशब्दाऽभिहितज्ञानमंतःकरणोपादानकंनभव

मानसप्रत्यक्षत्वात् कामनादिवत् न च श्रुतिविरोधः मनोजन्यत्वपरतयापि तदुपपत्तेरित्याशंक्य मृद्घटइत्यादिवत्तादर्थ्ये मन एवेति सामानाधिकरण्यश्रुतेरनुपादानपरत्वानुपपत्त्या कामादेरपि तदुपादानकत्वात् दृष्टांतस्य साध्यविकलत्वेन ज्ञानमंतःकरणोपादानकमेवेत्याशयेनाह अत एवेति सामानाधिकरण्यश्रुतेरेवेत्यर्थः॥ नन्वहमिच्छाम्यहं जानामीत्याद्यनुभवस्य कामादेरात्मधर्मत्वेनावगाहमानस्य विरोधात्तेषामंतःकरणधर्मत्वं नोपपद्यते श्रुतिस्तु आयुर्घृतमितिवत् हेतावुपचरितार्थेति शंकते नन्विति कामादेरन्तःकरणधर्मत्वमेवोक्तव्यवहारस्तु सुखाद्याकारपरिणाम्यंतःकरणैक्याध्यासादुपपद्यते यथायःपिंडस्य दग्धृत्वाभावेपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासादयो दहतीति व्यवहारस्तद्वदिति समाधत्ते उच्यत इति नन्वस्तु वह्न्ययःपिं

वृत्तिरूपज्ञानाविधानात् अत एव कामादेरपि मनोधर्मत्वम्॥ ननु कामादिरंतःकरणधर्मत्वे हमिच्छाम्यहं जानाम्यहं बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते उच्यते अयःपिंडस्य दग्धृत्वाभावेपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् यथा अयो दहतीति व्यवहारस्तथा सुखाद्याकारपरिणाम्यंतःकरणैक्याध्यासात् अहं सुखी दुःखीत्यादिव्यवहारः नन्वन्तःकरणस्येंद्रियतयातींद्रियत्वात्कथमहमिति प्रत्यक्षविषयतेति उच्यते न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति मनः॥ षष्ठानींद्रियाणीति भगवद्गीतावचनं प्रमाणमिति चेन्न· अनिन्द्रियेणापि मनसा षट्त्वसंख्यापूरणाविरोधात्॥ ((उयोरुभयोरपि प्रत्यक्षवि

षयत्वेन तादात्म्याध्यासादुक्तव्यवहार आत्मांतःकरणयोस्तु प्रत्यक्षविषयतद्विषययोस्तत्वाभावात्कथमुदाहृतव्यवहारो न चांतःकरणस्य प्रत्यक्षविषयतानस्येंद्रियतयातीन्द्रियत्वात् चक्षुरादीन्द्रियवदिति शंकते नन्विति अंतःकरणस्येन्द्रियत्वे प्रमाणाभावादतींद्रियत्वासिद्धा प्रत्यक्षविषयताऽभावासिद्धिरित्याशयेन परिहरति नेति षष्ठस्य मनस इन्द्रियत्वप्रतिपादकस्य भगवद्वाक्यस्य परमप्रमाणस्य सत्वान्मानं नास्तीत्ययुक्तमिति चोदयति मन इति अनींद्रियेणापि मनसेन्द्रियगतषट्त्वसंख्यापूरणाविरोधेनोदाहृतभगवद्वचसस्तदिन्द्रियत्वे प्रमाणत्वाभावान्नैवमित्याह नेति तथा च श्रुतेरनुपलंभात् स्मृतेश्चतदिंद्रियत्वाबो॥धकत्वान्नमानमस्तीति सुस्थम् न च मन इन्द्रियं इन्द्रियगतसंख्या॥

पूरकत्वादित्यनुमानेमानमितिशंक्यमनिंद्रियेणापितद्गतसंख्यापूरणाविरोधेनाप्रयोजकत्वात्किंचोक्तानुमानेयदिंद्रियगतसंख्यापूरकंतदिंद्रियमि
तिविशेषव्याप्तिर्मूलमुतयद्यद्गतसंख्यापूरकंततज्जातीयंयथापशौमतिप्रस्यात्षष्ठाऋत्विजइत्यत्रऋत्विक्गतसंख्यापूरकऋत्विज्जातीयइति
सामान्यव्याप्तिरितिविकल्प्यनोभयमित्याशयेनाहनहीतिदृष्टान्ताभावेनाद्यनिरासंमभिप्रेत्यद्वितीयोव्यभिचारान्नेत्याशयेनहेतुमाहयजमानेतितथाच
यजमानेऋत्विगतेसंख्यापूरकत्वंवर्ततेतज्जातीयत्वंनास्तीतिव्यभिचारइतिभावः॥एवंश्रुतौव्यभिचारंप्रदर्श्यस्मृतावपितंदर्शयन्तिवेदानितिअ
वेदेनापीतिपौरुषेयस्येतिहासत्वेनप्रसिद्धस्यवेदत्वाप्रसिद्धेरितिभावःयथानक्षत्राणामहंशशीतिवचनेनशशिनोनक्षत्रतायाप्रमाणंतथेंद्रिया।

नहींद्रियगतसंख्यापूरणमिंद्रियेणेवेतिनियमःयजमानपञ्चमाइडांभक्षयंतीत्यत्रऋत्विग्गतपंचत्वसंख्यायाअनृत्विजापि
यजमानेनपूर्णदर्शनात् वेदानध्यापयामाससमहाभारतपंचमानित्यत्रवेदगतपंचत्वसंख्यायाअवेदेनापिमहाभारतेनपूरणदा
दर्शनात् इन्द्रियेभ्यःपराह्यर्थाह्यर्थेभ्यश्चपरंमनःइत्यादिश्रुत्यामनसोनिंद्रियत्वावगमाच्च नचैवंमनसोनिंद्रियत्वेसुखादिप्रत्य
क्षस्यसाक्षात्वंनस्यादिंद्रियाजन्यत्वादितिवाच्यम् नहींद्रियजन्यत्वेनज्ञानस्यसाक्षात्वम्॥ १णां मनश्चास्मीतिभगवद्वाक्यमपिमनस

इन्द्रियत्वेनप्रमाणमित्यपिज्ञेयम् ननुमनसइन्द्रियत्वेबाधकाभावात्किमर्थमेवमुच्यतेइत्याशंकाव्यवच्छेदायहेत्वंतरमाह·इन्द्रियेभ्यइतिइन्द्रियपरा
र्थेभ्यःपरत्वप्रतिपादनेनमनसोनिन्द्रियत्वबोधकेत्यर्थः ननुमनोव्यतिरिक्तेन्द्रियेभ्यःपराह्यर्थाइतिव्याख्यानसंभवेननतस्यतत्वेबाधकमितिशंका
निरासायएतस्माज्जायतेप्राणोमनःसर्वेन्द्रियाणिचेत्येवमादिश्रुतिरादिपदेनसंगृहीतातथाचादिपदोपात्तश्रुत्येकवाक्यतामापन्नेयंश्रुतिरिंद्रियपरेभ्यः
परत्वंमनसःप्रतिपादयंतीतस्यानिंद्रियत्वंबोधयतीतिभावः ननुमनसोनिंद्रियत्वेप्रत्यक्षस्येंद्रियजन्यत्वाद निंद्रियमनोजन्यसुखाद्युपलब्धेःप्रत्यक्ष
त्वंनस्यात्तस्मात्तत्प्रत्यक्षत्वसिद्धयेतस्येंद्रियत्वमवश्यमभ्युपेयमित्याशंक्यनिराकरोति नचेतिहियस्मादिंद्रियजन्यत्वंज्ञानस्यप्रत्यक्षत्वेप्रयोजकं।
नभवतितस्मादिंद्रियाजन्यत्वेनसुखाद्युपलब्धेरप्रत्यक्षत्वंस्यादितिनचवाच्यमित्यर्थः तस्यतत्प्रयोजकत्वेकिम्बाधकमितिचेत्तत्राह॥ ७॥

वे·प·
टी·टी·
७

अनुमित्यादेरिति उक्तप्रयोजकानुसारेण सुखादिज्ञानस्य प्रत्यक्षत्वसिद्धये मनसोपींद्रियत्वाश्रयणान्मनोजन्यानुमित्यादेः प्रत्यक्षत्वापत्तिर्बाधिकेत्यर्थः नन्विं ------ द्रियत्वेनेंद्रियजन्यत्वमेव तत्प्रयोजकं अनुमित्यादेश्च मनस्त्वेन तज्जन्यत्वान्नातिप्रसंग इत्यत आह ईश्वरज्ञानस्येति एवं निरस्तस्वाभिमतप्रत्यक्षत्वप्रयोजकः सिद्धांतेपि प्रयोजकांतरमपश्यन्नाक्षिपति सिद्धांत इति किं न किमपीत्यर्थः सिद्धांते तत्प्रयोजकस्य सत्वादाक्षेपप्रतिक्षेपाय पृच्छति किमिति ज्ञानगतप्रत्यक्षत्वस्य तत्पृच्छामीति चेत्तत्राह आद्य इति नन्वद्वैतवादिनस्तव कथं चैतन्यभेदो येन प्रमाणचैतन्यविषयचैतन्येनाभेदस्य ज्ञानगतप्रत्यक्षत्वप्रयोजकत्वं भवेदित्याशंक्यौपाधिकं भेदमुपपादयति तथाहीति· नन्वंतःकरणस्य वृत्तेर्वासं

अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः ईश्वरज्ञानस्यानिंद्रियजन्यस्य साक्षात्त्वानापत्तेश्च सिद्धांते प्रत्यक्षत्वप्रयोजकं किमिति चेत् किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किं वा विषयगतस्य॥ आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः तथाहि त्रिविधं चैतन्यं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यं अंतःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यं अंतःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यं तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान्प्रविश्य तद्वदेव चतुःकोणाद्याकारं भवति तथा तैजसमंतःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते॥

((भवात् तदवच्छिन्नं चैतन्यं प्रमाणचैतन्यमित्युक्तिरयुक्ता न ह्यणुपरिमाणस्य तस्य वृत्तिः संभवति न च तस्य परममहत्परिमाणं प्राणश्रुत्या श्रूयमाणस्य तस्यैवोत्क्रान्तिगत्यादिश्रवणात् नापि मध्यमपरिमाणं तथात्वे देहवन्मदगनित्वेन झटिति विषयप्रतिभानानुपपत्तेः आंतरस्य तस्य वहिर्निर्गमनानुपपत्तेश्चेत्याशंक्यांतःकरणस्याणुत्वे देहव्यापिसुखाद्युपलब्ध्यनुपपत्तिं तस्य प्राणश्रुत्या श्रूयमाणस्य दूरवर्तिध्रुवादिपर्यंतगमनेन तदवच्छिन्नजीवस्यापि गतत्वेन देहस्य निर्जीवत्वापत्तिं चाभिप्रेत्य तस्य मध्यमपरिमाणत्वमाश्रित्योत्तरमाह तत्रेति तेनत्रिपूयाधिषित्यर्थः तैजसमित्यनेनाति॥ ७ ॥ ७ ॥ ७ ॥

7

राम
७

स्वच्छविरलतैजसद्रव्यतया सवितृकिरणवच्छीघ्रप्रसरोपपत्तिर्बोधिता ननु अनुमित्यादिस्थलेष्वंतःकरणस्य वह्न्यादिदेशागमनेन तद्वृत्त्यवच्छिन्नस्य तदवच्छिन्नाभेदाद्युक्तप्रयोजकं तत्रास्तीत्याशंक्याह अनुमितीति तत्र हेतुमाह वह्न्यादेरिति ननु प्रत्यक्षस्थलेपि वृत्तिघटयोर्भेदाद्भिन्नोपाधिकया प्रमाणप्रमेयचैतन्ययोर्भेदावश्यंभावादुक्तप्रयोजकं तत्राव्याप्तमित्यत आह तथा चेति चक्षुरादिसंनिकर्षस्थले मनोनिर्गमने सिद्धे सतीत्यर्थः समवधानात्तदावस्थानात् तदुभयावच्छिन्नं घटादितदाकारवृत्त्युपहितम्॥ ननु विशेषणयोरिवोपाध्योरेकदेशस्थितत्वेपि भेदजनकत्वात्कथमुपहितचैतन्यैकत्वमित्याशंक्योपाध्योर्भिन्नदेशस्थत्वेनैव भेदजनकत्वं न तु विशेषणयोरिव स्वरूपेणापीत्याशयेनाह विभाजकयोरपि भिन्नदेशस्थत्वेनोपधेयभेदप्रयोजकयोरपीत्यर्थः ननु लाघवात्स्वरूपेणैव भेदजनकत्वमुपाध्योरप्यस्त्वत आह अत एवेति एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वादेवेत्यर्थः एवं च प्रमाणिकत्वाद्गौरवं

अनुमित्यादिस्थले तु नान्तःकरणस्य वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसंनिकर्षात् तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नचैतन्यमेकमेव विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात् अत एव मठान्तर्वर्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते तथा चायं घट इति घटप्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्याभिन्नतया तत्र घटांशे प्रत्यक्षत्वं सुखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैवएकदेशस्थितोपाधिद्वयावच्छिन्नत्वात्

न दोषावहमिति भावः फलितमाह तथा चेति एकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वे सिद्धे सतीत्यर्थः तद्वृत्त्यवच्छिन्नचैतन्यस्य घटवृत्त्यवच्छिन्नचैतन्यस्य तत्रायं घट इति प्रत्यक्षस्थले ननु चक्षुराद्यसन्निकृष्टे सुखादौ अंतःकरणवृत्त्यनुदयात्कथं तदंशे प्रत्यक्षत्वमित्याशंक्य तस्यांतरत्वेन चक्षुरादिसंनिकर्षानपेक्षणादित्याशयेनाह सुखादीति नतसुखादिएकस्मिन्नंतःकरणरूपे देशे स्थितं यदुपाधिद्वयं सुखादितद्वृत्तिरूपं त

रवच्छिन्नत्वात् प्रत्यक्षत्वमितिसुखांशे इति शेषः नन्वेवमुपाध्योरेकदेशस्थत्वेन भेदाजनकत्वेऽहंपूर्वंसुखीत्यादेः स्ववृत्तिसुखादिस्मरणस्यापिसुखांशेप्रत्यक्षत्वंस्यादिति शंकते नन्विति नकेवलमुपाध्योरेकदेशस्थत्वमात्रमुपहिताभेदप्रयोजकमपित्वेककालीनत्वमपीतिनस्मृतावतिव्याप्तिस्तत्रोपाध्योर्भिन्नकालीनत्वादिति परिहरति नेति तत्र स्ववृत्तिसुखादिस्मरणे तत्र तयोः सुखतद्वृत्तिरूपयोरूपाध्योः तत्तदवच्छिन्नचैतन्ययोः सुखतद्वृत्त्यवच्छिन्नचैतन्ययोः उपधेयेति उपहितचैतन्येत्यर्थः॥ नन्वेवंतर्हि भिन्नकालीनयोरेकदेशस्थयोर्घटमठयोर्भेदकत्वापत्तिरुपधेयाभेदसमये उपाध्योरेककालत्वविवक्षायांत्वन्योन्याश्रयइत्यरुचेराह यदीति उपाध्योरित्यनुपज्यते· प्रमाणचैतन्यस्यविषयचैतन्याभेदइत्यत्रवर्त्तमानत्वंविष

नियमेनाहंसुखीत्यादिज्ञानस्यप्रत्यक्षत्वंनन्वेवंस्ववृत्तिसुखादिस्मरणस्यापिसुखांशेप्रत्यक्षत्वापत्तिरितिचेन्नतत्रस्मर्यमाणसुखस्यातीतत्वेनस्मृतिरूपांतःकरणवृत्तेर्वर्त्तमानत्वेनतयोरुपाध्योर्भिन्नकालीनतयातदवच्छिन्नचैतन्ययोर्भेदात्॥ उपाध्योरेकदेशस्थत्वेसत्येककालीनत्वस्यैवोपधेयाऽभेदप्रयोजकत्वात्· यदिचैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकंतदाहंपूर्वंसुखीत्यादिस्मृतावतिव्याप्तिवारणायवर्तमानत्वविषयविशेषणंदेयम्· नन्वेवमपिस्वकीयधर्माधर्मौवर्तमानौयदाशब्दादिनाज्ञायेतेतदातादृशशाब्दज्ञानादावतिव्याप्तिः तत्रधर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादिति·॥२॥

यविशेषणंदेयंतथाचस्मर्यमाणसुखादेरवर्तमानत्वेननस्मृतावतिव्याप्तिरित्यर्थः यद्यप्यवर्तमानस्यानुपाधित्वेनविषयावच्छिन्नेनैवोक्तातिव्याप्तिनिरासस्तथापिविषयस्योपलक्षणत्वनिरासद्वारोक्तातिव्याप्तिनिरासायवर्तमानत्वविषयविशेषणमपेक्षितमितिध्येयम् ननुवर्तमानविषयस्यविशेषणत्वेपिधर्माधर्मविषयकशाब्दादिज्ञानेतिव्याप्तिस्तयोर्वर्तमानत्वादितिशंकतेनन्वितिएकदेशस्थत्वंबोधयितुंस्वकीयेत्युक्तंभवान्धार्मिकस्त्वमधार्मिकइत्यादिशब्दः आदिशब्देनाहंसुकृतादृष्टवान्·सुखित्वादहंदुःकृतादृष्टवान् दुःखित्वादित्यनुमानादिकंग्राह्यंतत्र शाब्दज्ञानादौतद्धर्मादिप्रमाणचैतन्यस्ययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्न
उपधेयाभेदसिद्धावेककालीनोपाधिद्वयावच्छेदस्तस्माच्चोपधेयाभेदसिद्धिरितिपरस्पराश्रयः॥पं·१०॥

8

त्वमिति प्रत्यक्षत्वप्रयोजके योग्यत्वस्यापि विषयविशेषणत्वाद्धर्मादेश्चायोग्यत्वान्नातिव्याप्तिरिति परिहरति नेति योग्यत्वस्य प्रत्यक्षयोग्यत्वस्य ननु सुखादेर्धर्मादेश्चान्तःकरणधर्मत्वाविशेषात्कस्यचिद्योग्यत्वं कस्यचिन्नेत्यत्र किं नियामकमिति चेत्तत्राह अंतःकरणेति। विपक्षबाधकमाहाऽन्यथेति फलबलकल्प्यस्वभावस्याशरणत्व इत्यर्थः ननु योग्यत्वविशेषणदानेपि सुखवर्तमानतासमये त्वं सुखीति वाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादित्याशंक्येष्टापत्या परिहरति न चैवमिति। ननु त्वं सुखीत्यादिवाक्यं न स्वविषयापरोक्षज्ञानजनकं वाक्यत्वाज्ज्योतिष्टोमादिवाक्यवदित्यनुमानात्कथमुक्तवाक्यादपरोक्षज्ञानमिति चेत्। दशमस्त्वमसीत्यादिवाक्ये व्यभिचारान्नेत्याह दशम इति उक्तानुमाने सन्निकृष्टविषयत्वमुपाधिरपीत्याशयेनाह

चेन्न योग्यत्वस्यापि विषयविशेषणत्वात् अंतःकरणधर्मत्वाविशेषेपि किंचिद्योग्यं किंचिदयोग्यमित्यत्र फलबलकल्प्य स्वभाव एव शरणं अन्यथा न्यायमतेप्यात्मधर्मत्वाविशेषात् सुखादिवद्धर्मादेरपि प्रत्यक्षत्वापत्तिर्दुर्वारा न चैवमपि वर्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षता स्यादिति वाच्यम् इष्टत्वात् दशमस्त्वमसीत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात् अत एव पर्वतो वह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं पर्वतांशेऽपरोक्षं पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतांतःकरणवृत्त्यवच्छिन्नचैतन्याभेदात् वह्न्यंशे त्वंतःकरणवृत्तिनिर्गमनासंभवेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात् तथा चानुभवः ॥

सन्निकृष्टविषय इति नन्वेवं तर्हि पर्वतो वह्निमानित्याद्यनुमितेरपि प्रत्यक्षत्वं स्यादिति चेत्तन्न किं पर्वतांशे तदापाद्यते वह्न्यंशे वा नाद्यः इष्टत्वादित्याशयेनाह अत एवेति प्रमाणचैतन्यस्य योग्यवर्तमानविषयचैतन्याभेदस्य प्रत्यक्षत्वप्रयोजकत्वाभ्युपगमादेवेत्यर्थः द्वितीयं प्रत्याह वह्न्यंश इति आद्यहेतुमाह पर्वतादीति द्वितीये हेतुमाह वह्न्यंशे त्विति ननु सिद्धानुगममात्रं हि कर्तुमुक्तं परीक्षकैर्न सर्वलोकसिद्धस्य लक्षणेन निवर्तनेति भट्टपादैरुक्तत्वात् लक्षणेन प्रसिद्धस्यानुमितित्वस्य निवर्तनमयुक्तमिति चेत्तत्राह तथा चेति अनु

वे·प·
टी·टी·
१

ऽभावादित्यर्थः॥पं·५॥

इदञ्चन्दनखण्डं सुरभिचन्दनखण्डत्वात् चन्दनखण्डान्तरवत्॥टि·पं·४॥ सौरभ्यव्याप्यं चन्दनखण्डत्वमिति व्याप्तिज्ञानादिरूपं परोक्षज्ञानसामग्र्य भवोपीत्यर्थः तमेवावेदयति पर्वतमिति तथा च तस्याः प्रसिद्धेर्वैह्यंशाविषयत्वान्न तन्निवर्तनमस्माभिः क्रियत इति भावः एवं स्वपक्षे प्रसिद्धानुगमनं प्रदर्श्य परमते तदतिक्रमणमापादयति न्यायमतमिति स्वपक्षात्तत्पक्षे वैलक्षण्यद्योतकस्तु शब्दः पृथिवीपरमाणवो गन्धवन्तः पृथिवीत्वात् घटादिवदित्यादावसन्निकृष्टपक्षकानुमितौ पक्षसाध्ये च ज्ञानं परोक्षमेवेत्याह असन्निकृष्टेति ननु सुरभिचन्दनमित्यादौ सौरभ्यांशे ज्ञानं परोक्षमपरोक्षं वा नाद्यः तत्सामग्र्यभावाद्योग्यविषयत्वाच्च नद्वितीयस्तदाकारत्वस्याभावादित्याशंकायामाद्यपक्षमवलंब्याह सुरभीति आदिपदेन मधुरमाम्रफलमित्यादिपरिग्रहः परोक्षमिति· आघ्रातपूर्वं तत्सौरभं चेत् तर्हि तत्र ज्ञानं स्मृतिरनाघ्रातपूर्वं तर्हि· चन्दनखण्डत्वाल्लिङ्गादनुमितिरित्यर्थः ननु सौरभ्यस्यापि यो

पर्वतं पश्यामि वह्निमनुमिनोमीति न्यायमते तु पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः असंनिकृष्टपक्षकानुमितौ तु। सर्वांशेपि ज्ञानं परोक्षं सुरभिचंदनमित्यादिज्ञानमपि चंदनखंडांशे अपरोक्षं सौरभांशे तु परोक्षं सौरभ्यस्य चक्षुरिंद्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात् न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमेन तयोर्जातित्वं न स्यादिति वाच्यम् इष्टत्वाज्जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरतया अप्रामाणिकत्वात्॥ ऽग्यविषयत्वात्तदंशेपि ज्ञा

नमपरोक्षमेव किं न स्यादिति चेत्तत्राह सौरभ्यस्येति· तथा च तत्तदिन्द्रिययोग्यत्वघटितलक्षणस्याभावाददोष इत्यर्थः। नन्वसन्निकृष्टपक्षकानुमितिस्थले पक्षापरोक्षतायां पस्यासन्निकृष्टत्वबाधकं तथा सन्निकृष्टपक्षानुमितिस्थले सुरभिचन्दनमित्यादौ च परोक्षत्वापरोक्षत्वयोरभ्युपगमे प्रसिद्धजातिबाधकं सांकर्यप्रसंगो बाधकस्तथा च नेदं युक्तमित्याशंकां निराचष्टे न चेति एवमुक्तप्रकारेण जात्युपाध्युदासीनधर्ममात्रस्याभ्युपगमेन तयोर्जातित्वाभावस्येष्टत्वादिति हेतुमाह इष्टत्वादिति ननु घटत्वादिवत्परोक्षत्वापरोक्षत्वयोरपि प्रामाणिकतया प्रसिद्धस्यास्यानभ्युपगमेऽऽतिप्रसंग इति चेत्तत्राह जातित्वेति ननु नीलपटत्वादावुपाधित्ववद्दृष्टत्वा॥ ऽअपरोक्षत्वं विहाय परोक्षत्वं पृथिवीपरमाणवो गन्धवन्त इति ज्ञाने ऽस्ति परोक्षत्वं विहायापरोक्षत्वं घटोयमिति ज्ञानेस्ति· तदुभयञ्च सुरभिचन्दनखण्डमिति ज्ञानेस्ति· इत्यपरोक्षत्व·परोक्षत्वयोः सांकर्यमित्यर्थः॥टि·पं·३॥

९

राम
९

अनेकनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयतेत्यर्थः॥टि॰ ५॥ इहकपालेघटसमवायइतिविशिष्टशब्दार्थः॥टि॰ पं॰ ११॥
दौजातित्वंकुतोनप्रामाणिकमित्याशंकनिरासायोपाधित्वग्रहणंघटत्वादौजातित्वमित्येवंरूपापरिभाषातथानीलघटत्वादावुपाधित्वमित्येवंरू-
पायापरिभाषातयोर्द्वयोरपिसकलप्रमाणाविषयतयाप्रामाणिकत्वादितिपरिभाषायाएवोभयत्रसंबंधःअप्रमाणिकत्वाज्जातित्वोपाधित्वयोरिति
शेषःइतिकेचित् ननुकुतःसकलप्रमाणागोचरताघटोयमितिप्रत्यक्षगोचरत्वादित्याशंकायांतस्यतत्सद्भावएवोपक्षीणस्यतज्जातित्वसाधनउदासी-
नत्वादित्याहुः घटोयमितिननुप्रत्यक्षाभावेपि॰ घटत्वादिकंजातिःउपाधिभिन्नसामान्यधर्मत्वात्सत्तावदित्यनुमानमस्तुतत्रप्रमाणमित्याशंक्याह॰
जातित्वेतिजातित्वरूपस्यनित्यानेकसमवेतत्वलक्षणस्यसाध्यस्याप्रसिद्धौतदायतैव्याप्तिज्ञानोदयाभावेनानुमानानवसरादित्यर्थः॥नन्वेवंभूत
जातित्वाप्रसिद्धावपितद्घटकनित्यत्वैकत्वानेकसमवेतत्वानामस्त्यात्माकाशघटादिषुप्रसिद्धिरितितामादायतद्घटितजातित्वंघटत्वादेःसेत्स्यती

घटोयमित्यादिप्रत्यक्षंहि घटत्वादिसद्भावेमानंननुतस्यजातित्वेपिजातित्वरूपसाध्याप्रसिद्धौतत्साधकानुमानस्याप्यनवका
शात्॥समवायासिद्ध्याब्रह्मभिन्ननिखिलप्रपंचस्यानित्यतयाचनित्यत्वसमवेतत्वघटितजातित्वस्यघटत्वादावसिद्धेश्च॥ ६॥

त्याशंक्याह॰ समवायेतिननुरूपीघटोमृदिघटइतिप्रत्ययस्यसंयोगानवगाहितयापरिशेषात्समवायःसिद्ध्यतीति॰ चेन्नगुणगुणिनोरवयवावयविनो-
श्चात्यंतभेदेतत्संबंधस्यचतथात्वेदंडपुरुषादाविवशुक्लोघटोमहद्घटइतिसमानाधिकरणप्रत्ययानुपपत्तेःकिंचसमवायिभ्यांसंबद्धःसमवायो
विशिष्टप्रत्ययनियामकउतासंबद्धःनाद्यस्तस्यान्यस्तस्याप्यन्यःसंबंधःकल्प्यइत्यनवस्थाप्रसंगात् ननुसमवायिभिर्नित्यसंबद्धएवायंगृह्यतेइति
नोक्तदोषइतिचेत्तर्हिसंयोगोपिसंयोगिभिर्नित्यसंबद्धत्वात्संबंधांतरंनापेक्षेतार्थांतरत्वादपेक्षतइतिचेत्॰ तर्हिसमवायोपितथात्वात्कुतोनापेक्षतेसं-
योगोगुणत्वात्तथेतिचेन्नगुणपरिभाषायाअतंत्रत्वादपेक्षाकारणस्यचतुल्यत्वाच्चद्वितीयोऽतिप्रसंगात्किंचसअनेकएकोवाआ॥ ७ ॥
॥टि॰॥अन्यञ्चेत्यर्थः॥किञ्चेत्यस्यान्यञ्चेत्यर्थकाव्ययत्वात्॰पं॰ ॥विशेषितविषयकप्रत्ययेत्यर्थः॥पं॰ ॥भूतलादौघटाद्यभावेपिघटवद्भूतलमित्यादिप्रतीतिप्रसंङ्गादित्यर्थः॰प॰ | टि॰

अप्रामाणिकत्वे· पं·४ ॥ रूपादिनिष्ठाधेयत्वस्येत्यर्थः ॥ पं·२॥

घेऽपसिद्धांतो गौरवं च द्वितीये रूपज्ञानादिसमवायस्य वायुघटादिवृत्तिसमवायाभेदाद्रूपवान्वायुर्घटो ज्ञानवानिति प्रतीतिप्रसंगात्· न च तत्र रूपाद्यभावान्नोक्तप्रतीतिप्रसंग इति वाच्यम् तद्वृत्तिप्रयोजकसंबंधसत्ति तदभावव्यवहारस्य व्याहतत्वादित्येवं समवायासिद्धा प्रत्यक्षेण कार्यत्वब्रह्मभिन्नत्वलिंगकानुमानेन सदेव सौम्येदमग्र आसीदिति श्रुत्या च ब्रह्मभिन्नसकलप्रपंचस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्चेत्यर्थः अप्रामाणिकत्वमिष्टत्वे हेतुस्तत्र प्रत्यक्षस्य घटत्वादिर्जातित्वे मानाभावादिहेतुत्रयं न नूपाधित्वपरिभाषाया अप्यप्रामाणिकत्वं प्रतिज्ञाय कथं जातित्वपरिभाषाया एव तत्त्वे हेतूपन्यास इत्याशंक्योक्तहेतुभिरेव तस्या अप्यप्रामाणिकत्वसाधनस्य सुवचत्वादित्याशयेनातिदिशति एवमिति तथा च नीलघटत्वादेरुपाधित्वपरिभाषा न प्रामाणिकी नीलोयं घट इत्यादिप्रत्यक्षस्य नीलघटत्व सद्भावे मानतया तस्योपाधित्वेऽमानत्वात् उपाधि

एवमेवोपाधित्वमपि निरसनीयम् पर्वतो वह्निमानित्यादौ च पर्वतांशे वह्न्यंशे चांतःकरणवृत्तिभेदांगीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्यवृत्तौ न विरोधः तथा च तत्त दिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वं घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वं ननु कथं घटादेरंतःकरणा·॥

10

त्वरूपसाध्याप्रसिद्धेस्तत्साधकानुमानानवकाशात्समवायाद्यसिद्ध्योपाधित्वासिद्धेश्चेत्येवं निरसनीयमित्यर्थः नन्वेवमप्येकस्यैव चैतन्यस्य परोक्षत्वापरोक्षत्वात्मविरुद्धधर्माक्रान्तत्वं विरुद्धमित्याशंक्याह पर्वतवृत्तिचैतन्ये प्रमात्मकचैतन्ये एव सतीदं फलितमित्याह तथा चेति तत्तद्वृत्त्य वच्छिन्नचैतन्यस्य तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तस्मिंस्तस्मिन् ज्ञानांशे प्रत्यक्षत्वप्रयोजकमिति ज्ञानगतस्य प्रत्यक्षत्वस्य प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वमित्युक्तप्रयोजकेन विवक्षितमित्यर्थः एवं ज्ञानगतप्र॥ त्यक्षत्वस्य प्रयोजकमभिधाय प्रमेयगतस्य तस्य तदाह घटादेरिति तुशब्देनेन्द्रियज॥

नीलघटत्वादिकमुपाधिजातिभिन्नसामान्यधर्मत्वात् आकाशत्वादिवत्· पं·५

राम
१०

न्यज्ञानविषयत्वंविषयप्रत्यक्षत्वमित्यादितल्लक्षणनिरासः मनोरूपेन्द्रियजन्यानुमितिज्ञानविषयेतिव्याप्तेः प्रमात्रभिन्नत्वंघटादेर्विषयस्येत्यनुषज्यतेननुविषयस्यघटादेः प्रमात्रभिन्नत्वमुच्यतेतदवच्छिन्नचैतन्यस्यवानाद्यः तस्यजडत्वेनतत्वासंभवात् नद्वितीयः अहंमनुष्यइतिवदहंघटइतिप्रतीतिःस्यात् नचसोपलभ्यतेउपलभ्यतेचतद्विरुद्धाहमिमंपश्यामीतिभेदप्रतीतिरतः कथंविषयस्यप्रमात्रभेदइतिशंकतेनन्वितिप्रमात्रभेदोनामघटादेस्तदवच्छिन्नचैतन्यस्यचैक्यंनविवक्षितंयेनविरोधःस्यादपित्वन्यदेवतदभिन्नत्वमितिसमाधत्तेउच्यतइति प्रमातृसत्तेत्यस्यप्रमातृलक्षण

वच्छिन्नचैतन्याभेदः अहमिमंपश्यामीतिभेदानुभवविरोधादितिचेत् उच्यतेप्रमात्रभेदोनामनतदैक्यंकिंतुप्रमातृसत्तातिरिक्तसत्ताकत्वाभावः तथाचघटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततयाविषयचैतन्यसत्तैवघटादिसत्ताअधिष्ठानसत्तातिरिक्तायाआरोपितसत्तायाअनंगीकारात् विषयचैतन्यंचपूर्वोक्तप्रकारेणप्रमातृचैतन्यमेवेतिप्रमातृचैतन्यस्यैवघटाद्यधिष्ठानतयाप्रमातृसत्तैवघटादिसत्तानान्येतिसिद्धम् घटादेरपरोक्षत्वम् अनुमित्यादिस्थलेत्वंतःकरणस्यवह्न्यादिदेशानिर्गमनाभावेनवह्न्यवच्छिन्नचैतन्यस्यप्रमातृचैतन्यानात्मकतयावह्न्यादिसत्ताप्रमातृसत्तातोभिन्नेतिनातिव्याप्तिः नन्वेवमपिधर्माधर्मादिगोचरानुमित्यादिस्थलेधर्माधर्मयोः प्रत्यक्षत्वापत्तिः धर्माद्यवच्छिन्नचैतन्यस्यप्रमातृचैतन्याभिन्नतयाधर्मादि॥ ७॥

सत्तेत्यस्यार्थः नतुतन्निष्ठासत्ताजातिः प्रमातृप्रमेयनिष्ठसत्ताजातेरेकतयातन्निष्ठसत्तातिरिक्तसत्तायाअसिद्धेः तथाच प्रमात्रभेदस्योक्तलक्षणेसतीदंफलितमित्याह तथाचेतिप्रमातृचैतन्यमेवेत्यतः प्रमातृसत्तातिरिक्तसत्ताशून्यत्वंघटादेरपरोक्षत्वंसिद्धमित्यर्थः॥ अनुमेयवह्न्यादेश्चैतन्यसत्तातिरिक्तसत्ताशून्यत्वेपितस्यप्रमात्रनात्मकतयानातिव्याप्तिरितिचैतन्यपदंविहायप्रमातृपदोपादानमित्याशयेनाह अनुमित्यादीतिनन्वेवमप्यतिव्याप्तिरस्तीतिशंकतेनन्वितिप्रत्यक्षयोग्यत्वस्यापिविषयविशेषणत्वेनयोग्यविषयस्यप्रमात्रभिन्नत्वरूपलक्षणस्यधर्मादावभावान्नाति
व्याप्तिरित्याहनेति॥

परिमाणादेः तत्तद्रूप·रि

वे·प·
टी·टी·
११

ननुघटगतरूपप्रत्यक्षदशायांतद्गतपरिमाणादावतिव्याप्तिः रूपावच्छिन्नचैतन्यस्यैवपरिमाणाद्यवच्छिन्नचैतन्यरूपतयातस्यतदभिन्नप्रमातृसत्तातिरिक्तसत्ताकत्वाभावादितिशंकतेनन्वेवमपीति· परिमाणादेःप्रमातृसत्तातिरिक्तसत्ताशून्यत्वेपिपरिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यत्वाभावान्नातिव्याप्तिरितिसमाधत्तेनेतिननुपरिमाणादावतिव्याप्तिवारणायतत्तदाकारवृत्त्युपहितत्वस्यापिप्रमातृविशेषणत्वेवृत्तावव्याप्तिरितिशंकतेनन्वेवमितिअनवस्थाभयेनवृत्तिगोचरवृत्त्यनंगीकारेपिघटमहंजानामीतिवृत्तेः स्वविषयत्वाभ्युपगमात्स्वेतरवृत्त्यवच्छि

सत्तायाप्रमातृसत्तानतिरेकादितिचेन्नयोग्यत्वस्यापिविषयविशेषणत्वात् नन्वेवमपिरूपीघटइतिप्रत्यक्षस्थलेघटगत।परिमाणादेः प्रत्यक्षत्वापत्तिः रूपावच्छिन्नचैतन्यस्यपरिमाणाद्यवच्छिन्नचैतन्यस्यैकतयारूपावच्छिन्नचैतन्यस्यप्रमातृचैतन्याभेदेपरिमाणाद्यवच्छिन्नचैत—स्यापिप्रमात्रभिन्नतयापरिमाणादिसत्तायाः प्रमातृसत्तातिरिक्तत्वाभावादितिचेन्नत।त्तदाकारवृत्त्युपहितत्वस्यापिप्रमातृविशेषणत्वात् रूपाकारवृत्तिदशायांपरिमाणाद्याकारवृत्त्यभावेनपरिमाणाद्याकारवृ।त्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात् नन्वेवंवृत्तावव्याप्तिः अनवस्थाभियावृत्तिगोचरवृत्त्यनंगीकारेणतत्रस्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादितिचेन्न अनवस्थाभियावृत्तेर्वृत्त्यंतराविषयत्वेपिस्वविषयत्वाभ्युपगमेनस्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्यतत्रापिभावात् एवंचातः॥ ९ ॥ ६ ॥ ९ ॥

न्नचैतन्याप्रकाश्यतयास्वावच्छिन्नचैतन्यप्रकाश्यत्वेसतिप्रकाशमानत्वान्नाव्याप्तिरित्याशयेनाहनेति· यथावृत्तेर्वृत्त्यंतराविषयत्वेपि·स्वविषयत्वाभ्युपगमादव्याप्तिनिरासएवमंतःकरणस्यतद्धर्माणांकामादीनांचकेवलसाक्षिविषयत्वेपिवृत्तिविषयत्वस्वीकारान्नतत्राव्याप्तिरित्याह एवंचेतिआदिनाप्रातिभासिकरजतादिसंग्रहः ननुवृत्त्यादिव्यावर्तककेवलपदविरोधात्कथंवृत्तिविषयत्वमभ्युपगंतुंशक्य·॥ ८ ॥

राम
११

11

मित्याशंक्यपरिहरतिनचेतिकेवलपदंनवृत्तिनिरासार्थमपित्विन्द्रियानुमानादिप्रमाणव्यापारनिरस्त्यर्थमतोनतद्विरोधइत्याहनहीतिस्वोक्तार्थेपद्मपादाचार्यसंमतिमाह अतएवेतिय तोनवृत्तेःकेवलपदव्यावर्त्यत्वमतएवाहंवृत्त्यवच्छिन्नमेवांतःकरणंचैतन्यविषयभावमापद्यतइत्यहंकारटीकायामाचार्यैरहमित्याकारांतःकरणविषयावृत्तिरंगीकृतेत्यर्थः सांप्रदायिकैःसर्वज्ञमुनिप्रमुखैःअंतःकरणादीनांवृत्तिविषयत्वेनिर्विवादेसतिफलितमव्याप्तिंनिराकरणमुपसंहरतितथाचेति।श्रोतृसुखप्रतिपत्तयेदनैर्विशेषणैर्निष्पन्नलक्षणंनिष्कृष्यदर्शयतितदयमितितत्तस्यपूर्वोक्तस्या

करणतद्धर्मादीनांकेवलसाक्षिविषयत्वेपिनतदाकारवृत्त्यभ्युपगमेनोक्तलक्षणस्यतत्रापिसत्वान्नाव्याप्तिः नचांतःकरणतद्धर्मादीनांवृत्तिविषयत्वाभ्युपगमेकेवलसाक्षिविषयत्वाभ्युपगमविरोधइतिवाच्यम् नहिवृत्तिंविनासाक्षिविषयत्वंकेवलसाक्षिवेद्यत्वंकिंत्विन्द्रियानुमानादिप्रमाणव्यापारमंतरेणसाक्षिविषयत्वं अतएवाहंकारटीकायामाचार्यैरहमाकारान्तःकरणवृत्तिरङ्गीकृता अतएवचप्रातिभासिकरजतस्थलेरजताकाराविद्यावृत्तिः सांप्रदायिकैरंगीकृता तथाचांतःकरणतद्धर्मादिषुकेवलसाक्षिवेद्येषुवृत्त्युपहितत्वघटितलक्षणस्यसत्वान्नाव्याप्तिः॥तदयंनिर्गलितोर्थः स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वेसतियोग्यत्वंविषयस्यप्रत्यक्षत्वंतत्रसंयोगसंयुक्ततादात्म्यादीनांसन्निकर्षाणांचैतन्या॥

यंतत्तस्मादयमिति वास्तवविषयस्तदाकारातद्गोचरायावृत्तिस्तदुपहितंयत्प्रमातृचैतन्यंतद्रूपायासत्तातदतिरिक्तासत्तायस्यसतथातस्यभावस्तत्त्वंतेनशून्यत्वेसतितदतिरिक्तसत्ताकत्वरहितत्वेसतिप्रत्यक्षयोग्यत्वंप्रत्यक्षव्यवहारप्रयोजकमित्यर्थः।एवंज्ञानगतस्यज्ञेयगतस्यचप्रत्यक्षत्वस्यप्रयोजकमुक्तंतत्रतादृशवृत्त्यवच्छिन्नचैतन्यस्यतादृशविषयावच्छिन्नचैतन्याभिन्नत्वंज्ञानगतप्रत्यक्षत्वप्रयोजकंतादृशविषयस्यतथाभूतप्रमातृचैतन्याभिन्नत्वंविषयगतप्रत्यक्षत्वस्यप्रयोजकमितिविवेकस्तत्रप्रत्यक्षस्यविषयस्यप्रत्यक्षज्ञानंचैतन्यमेवतच्चानादीतिसंयोगादिसन्निकर्षाणांकविनियोगइत्यपेक्षायामाह·तत्रेति·

उक्तरीत्योभयप्रयोजके सिद्धेसति·संयोगःसंयुक्ततादात्म्यंसंयुक्ताभिन्नतादात्म्यमित्येवंरूपाणांसन्निकर्षाणांघटतद्गतरूपरूपत्वशब्दशब्दत्वावच्छिन्नचैतन्याभिव्यंजकवृत्त्युत्पादनेविनियोगइत्यर्थःयस्याजननेएतेषांविनियोगःसावृत्तिःकतिविधेत्यपेक्षायामाहसाचेतिसन्निकर्षजन्यवृत्त्यवच्छिन्नचैतन्यस्यप्रत्यक्षत्वाद्वृत्तेश्चांतःकरणपरिणामत्वात्तद्घटकवृत्तिमदंतःकरणनिरूपणंनप्रकृतासंगतमितिद्रष्टव्यंसंशयाकारानिश्चयाकारागर्वाकारास्मरणाकारेतिसंशयाद्याकारेणपरिणामरूपावृत्तिश्चतुर्धेत्यर्थः॥एवंसंशयादिविषयादिविषयाकारपरिणामविविधवृत्तिभेदेनैकमप्यंतःकरणंसंशयाकारवृत्तिमन्मनइत्याख्यायते निश्चयाकारवृत्तिमद्बुद्धिरित्युच्यतेगर्वाकारवृत्तिमदहंकारइत्यभिधीयतेस्मरणाकारवृत्तिमच्चित्तमितिव्यपदिश्यतेइत्यर्थः

भिव्यंजकवृत्तिजननेविनियोगः साचवृत्तिश्चतुर्विधा संशयोनिश्चयोगर्वःस्मरणमिति एवंविधवृत्तिभेदेन एकमप्यंतःकरणंमनइतिबुद्धिरिति· अहंकारइतिचित्तमितिव्याख्यायते तदुक्तंमनोबुद्धिरहंकारश्चित्तंकरणमांतरम् संशयोनिश्चयोगर्वःस्मरणंविषयाइमे तच्चप्रत्यक्षंद्विविधम्॥सविकल्पकनिर्विकल्पकभेदात् तत्रसविकल्पकंवैशिष्ट्यावगाहिज्ञानंयथाघटमहंजानामीत्यादिज्ञानंनिर्विकल्पकंतुसंसर्गानवगाहिज्ञानं· यथा॥सोयंदेवदत्तः तत्त्वमसीत्यादि॥ ७ ॥ ७ ॥

स्वोक्तविभागेपूर्वाचार्यसंमतिमाह तदुक्तमिति· वृत्तिभेदेनतत्तद्वृत्तिमतोभेदादंतःकरणंमनआदिभेदेनचतुर्विधंसंशयादयोमीविषयाएतेषांविषयत्वेएतदाकारवृत्तीनामप्येतन्नामकत्वान्नप्रकृतप्रतिकूलतेतिभावःप्रत्यक्षघटकवृत्तिस्वरूपमभिधायविषयावच्छिन्नचैतन्याभिन्नवृत्त्यवच्छिन्नचैतन्यरूपमुक्तंप्रत्यक्षंविभज्यदर्शयति·तच्चेति॥तत्रप्रथमोद्दिष्टत्वात्सकलवादिसंमतत्वादखिलव्यवहारप्रयोजकत्वादादौसविकल्पकंलक्षयतितत्रेतितत्रतयोर्मध्येविकल्पोवैशिष्ट्यंतेनसहवर्ततइति· सविकल्पकंविशिष्टविषयकमित्यर्थमभिप्रेत्याहवैशिष्ट्यावगाहीतितयात्वमिच्छादावतिव्याप्तमित्यतउक्तंज्ञानमितितत्वंतुनिर्विकल्पकेऽतिव्याप्तमित्यतउक्तंवैशिष्ट्यावगाहीतिउदाहरणमाह·यथेति·॥

12

घटमहंजानामीत्यादिज्ञानंघटविशेषणविशिष्टज्ञानावगाहिज्ञानत्वाद्वैशिष्ट्यावगाहीत्यर्थः·निर्गतोविकल्पोयस्मादितिनिर्विकल्पकमित्यर्थो
मभिप्रेत्यद्वितीयंलक्षयति·निर्विकल्पकंत्विति·संसर्गोविशेषणविशेष्यसंबंधोवैशिष्ट्यमितियावत् उदाहरणमाह·यथेति·देशकालोपलक्षित
देवदत्तलक्षणाभेदविषयेसोयंदेवदत्तइतीन्द्रियजन्यैक्यप्रत्यक्षेसन्निकर्षवशादुपलक्षकदेशकालादेरपिभानसंभवात् शाब्देतुज्ञानेतात्पर्यवि
षयस्यैवभाननियमात्·अभेदमात्रविषयत्वाच्छाब्दमेवैतदुदाहरणमित्यभिप्रेत्याह·वाक्यजन्येति·प्रकृष्टप्रकाशश्चन्द्रः सत्यंज्ञानमनन्तंब्रह्मेत्या
द्यवांतरवाक्यमादिशब्दार्थः॥ननुनिर्विकल्पकप्रत्यक्षंलक्षयित्वावाक्यजन्यज्ञानस्यतल्लक्ष्यत्वाभिधानमत्यंतासंगतमित्याशयेनशंकतेनन्विति·
शाब्दज्ञानस्यइन्द्रियाजन्यत्वेपिनिरुक्तप्रत्यक्षत्वप्रयोजकसत्वात्सन्निहितविषयकवाक्यजन्यज्ञानस्यापिप्रत्यक्षत्वाभ्युपगमान्नासंगतिरि।

वाक्यजन्यज्ञानम् ननुशाब्दमिदंज्ञानंनप्रत्यक्षमिन्द्रियाजन्यत्वादितिचेन्ननहीन्द्रियजन्यत्वंप्रत्यक्षत्वेतंत्रंदूषित
त्वात् किंतुयोग्यवर्तमानविषयकत्वेसतिप्रमाणचैतन्यस्यविषयचैतन्याभिन्नत्वमित्युक्तम् तथाचसोयंदेवदत्तइति
वाक्यजन्यज्ञानस्यसन्निकृष्टविषयतयावहिर्निसृतांतःकरणवृत्त्यभ्युपगमेनदेवदत्तावच्छिन्नचैतन्यवृत्त्यवच्छिन्नचै
तन्ययोरभेदेनसोयंदेवदत्तइतिवाक्यजन्यज्ञानस्यप्रत्यक्षत्वम्॥एवंतत्वमसीत्यादिवाक्यजन्यज्ञानस्यापि॥ ७ ॥

त्याशयेनाह नहीति·इन्द्रियजन्यत्वस्यमनोरूपेन्द्रियजन्यानुमित्यादावतिव्याप्त्यादिप्रदर्शनेनदूषितत्वात्·उक्तंविस्मृत्यपृच्छति·किंत्विति·प्रो
क्तंस्मारयति·योग्येति·यद्यपिप्रमाणचैतन्यस्ययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वंपूर्वमुक्तम्· तथापितत्वे· योग्यवर्तमानविष
यकत्वेसतिप्रमाणचैतन्यस्यविषयावच्छिन्नचैतन्याभिन्नत्वेचविशेषाभावादेवमुक्तंतथाचप्रमाणचैतन्यस्ययोग्यवर्तमानविषयावच्छिन्न
चैतन्याभिन्नत्वंपूर्वमुक्तमितिभावः।तथाचेन्द्रियजन्यत्वस्याप्रयोजकत्वेनिरुक्तस्यप्रयोजकत्वेचसतीदंफलितमित्याह·तथाचेति·॥नन्वेवं
लौकिकोदाहरणसंभवेपिवैदिकंनसंभवतिविज्ञातारमरेकेनविजानीयादित्यादिश्रुत्याप्रमातुर्विषयत्वनिरासात्तत्पदार्थभिन्नत्वंपदार्थप्रमा
तृचैतन्यस्यविषयावच्छिन्नचैतन्यत्वाभावान्निरुक्तप्रयोजकस्यासत्वादित्याशंक्याह॥एवमितितत्त्वमसीत्यादिवाक्य॥ ७ ॥
॥योग्यवर्तमानविषयकत्वेसतिप्रमाणचैतन्यस्यविषयचैतन्याभिन्नत्वमुक्तम्·टि·मू·९॥

जन्यज्ञानस्यापि सन्निकृष्टतत्त्वंपदलक्ष्यविषयतयोक्तवाक्यजन्यांतःकरणवृत्त्यभ्युपगमेन लक्ष्यचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्याभेदेन प्रत्यक्षत्वमित्यर्थस्तत्र तस्मिन्ज्ञाने प्रमातृपदेन लक्ष्यं ग्राह्यं त्वंपदलक्ष्यात्तत्पदलक्ष्यस्याभिन्नत्वादेवमुक्तेः श्रुतिस्तु फलव्याप्यत्वनिषेधपरा न तु सोयं देवदत्त इत्यादिवाक्यजन्यज्ञानं संसर्गावगाहि वाक्यजन्यज्ञानत्वाद्गामानयेति वाक्यजन्यज्ञानवदुक्तवाक्यजन्यज्ञानं न निर्विकल्पकं संसर्गावगाहित्वात्तद्वदित्याशयेन शंकते· नन्विति भवेदेवं यदि वाक्यजन्यज्ञानविषयत्वे पदार्थसंसर्गत्वं तंत्रं भवेन्न तु तथा· तथात्वे हि भोजनप्रकरणे सैंधवमानयेत्यत्रानभिमतस्याश्वादिसंसर्गस्यापि तत्त्वापत्तेरित्याशयेनाह· उच्यत इति· ननु पदार्थसंसर्गत्वस्य तत्र तंत्रत्वाभावे किं तत्र तंत्रमिति पृच्छति यत्तात्पर्यविषयः स·

तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्वात् ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम् उच्यते वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तंत्रम् अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः किंतु तात्पर्यविषयत्वं प्रकृते च सदेव सोम्येदमग्र आसीदित्युपक्रम्य तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्याविषयं संसर्गमवबोधयेत् इदमेव तत्त्वमस्यादिवाक्यानामखंडार्थत्वम् यत्संसर्गानवगाहियथार्थज्ञानजनकत्वमिति तदुक्तं संसर्गासंगि सम्यग्धीहेतुता या गिरामियं॥ १ ॥ १ ॥ ६ ॥ १ ॥ ९ ॥

एव वाक्यजन्यज्ञानगोचरः स च संसर्गोऽसंसर्गो वेति· विशेषो नादर्तव्य इत्याह तात्पर्येति· प्रकृते तु पिंडमात्रे लौकिकवाक्यस्येवोपक्रमोपसंहारादितात्पर्यलिंगैस्तत्त्वमस्यादिवेदान्तवाक्यानामद्वितीये विशुद्धे ब्रह्मणि तात्पर्यावधारणादसंसर्गस्यैव तात्पर्यगोचरत्वात्सोयमित्यादिवाक्यानां तात्पर्याविषयसंसर्गावगाहित्वं बाधितमित्याशयेनाह प्रकृते इति ननु तत्त्वमस्यादिवाक्यानां प्रसिद्धमखंडार्थत्वं विहाय कथं संसर्गानवगाहिज्ञानजनकत्वमपूर्वमुक्तमित्याशंक्याह· इदमेवेति एवकारोप्यर्थस्तेन च प्रातिपदिकार्थमात्रपरत्वमखंडार्थत्वमित्यस्य समुच्चयस्तत्राचार्यसंमतिमाह॥ तदुक्तमिति॥ ७॥

चित्सुखाचार्य्यैरिति शेषः गिरां तत्वमस्यादिवाक्यानां संसर्गासंगिसम्यक्धीहेतुता या सेयमखंडार्थतोक्ता तदनवगाहियथार्थज्ञानहेतुत्वं यत्तदिद
मखंडार्थत्वमुक्तमित्यर्थः तासां प्रातिपदिकार्थताखंडार्थतोक्तेति लक्षणस्य संसर्गपरे वाक्ये व्यभिचारस्तत्रापि प्रातिपदिकार्थप्रतिपादकत्वसत्वादि
त्याशंकयाह प्रातिपदिकेति· तथा च तत्र तन्मात्रप्रतिपादकत्वाभावान्नातिव्याप्तिरिति भावः उक्तप्रत्यक्षज्ञानस्य साक्षिद्वैविध्येन द्वैविध्यमाह तच्चेति·
संसर्गावगाहित्वानवगाहित्वभेदेपि ज्ञानं चैतन्यरूपमेकमेव तच्च जीवसाक्षीश्वरसाक्षिभेदेन द्विविधमित्यर्थः यत्तु साक्षिपदं तज्जन्यपरं तथा च जीव
साक्षिजन्यमीश्वरसाक्षिजन्यमिति द्विविधमित्यर्थः इति केचित्· तन्नोपादेयं ज्ञानस्य चैतन्यरूपत्वप्रतिपादनात्तत्र जीवसाक्षिनिरूपणस्य जीवनिरूप

उक्ताखंडार्थता यद्वा तत्प्रातिपदिकार्थता प्रातिपदिकार्थमात्रपरत्वं चाखंडार्थत्वमिति चतुर्थपादार्थः तच्च प्रत्यक्षं पुनर्द्विवि।
धं जीवसाक्षि ईश्वरसाक्षि चेति· तत्र जीवो नामांतःकरणावच्छिन्नं चैतन्यं तत्साक्षि तु अंतःकरणोपहितं चैतन्यम् अंतःकरण
स्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः विशेषणं च कार्यान्वयि व्यावर्तकं उपाधिश्च कार्य्यानन्वयी व्यावर्तको वर्तमानश्च रूपवि
शिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणं कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः अयमेवोपाधिर्नैयायि।
कैः परिचायक इत्युच्यते· ॥ १(णाधीनत्वाज्जीवस्वरूपनिरूपणपूर्वकं तत्साक्षिस्वरूपं लक्षयति तत्रेति जीवसाक्षीश्वरसाक्षिणोर्मध्ये अ

न्तःकरणस्यावच्छेदकत्वे चैतन्यस्य जीवत्वं तस्योपाधित्वे तस्य तत्साक्षित्वमिति तयोर्भेद एतदेव स्फोरयति अन्तःकरणस्येति· विशेषणोपाध्यो
र्वर्तमानत्वे सति व्यावर्तकत्वं यद्यपि समानं तथापि कार्यान्वयित्वतदनन्वयित्वभेदात्तद्विशिष्टतदुपहितचैतन्ययोरपि भेद इत्याशयेनाह· विशेष।
णं चेति कार्यान्वयि व्यावर्तकं वर्तमानं चेत्यपि बोध्यम् तथा च· कार्यान्वयित्वे सति· वर्तमानत्वे सति व्यावर्तकत्वं विशेषणत्वम् कार्यानन्वयित्वे सति
यथोक्तत्वमुपाधित्वं कार्यपदमात्रावच्छेद्यान्वययोग्यपरं विशेषणोदाहरणमाह रूपेति· रूपस्य कार्यान्वयित्वादिमत्वाद्विशेषणत्वं उपाध्युदाह।
रणमाह· कर्णेति· कर्णशष्कुल्याः कार्यानन्वयित्वादिमत्वादुपाधित्वम्· स्वोक्तोपाधेर्नैयायिकैर्व्यवह्रियमाणां संज्ञामाह अयमेवेति· ॥ ७ ॥

विशेषणत्वे॥पं५॥

अतिव्याप्ति॥१४।पं·॥

नन्वस्तुकर्णशष्कुल्यादेरुपाधित्वमन्तःकरणस्यतुतत्त्वंप्रयोजनशून्यंनहिप्रमाताविषयभासनायस्वसाक्षिणमपेक्षतेचक्षुरादिजन्यवृत्त्यवच्छिन्नचैतन्येनैवविषयप्रकाशसंभवादित्याशंक्यांतःकरणस्यजडतयाविषयभासकत्वायोगाद्वृत्तीनांनानात्वेनतदवच्छिन्नचैतन्यस्याप्यनेकतयासमस्तविषयानुसंधातृत्वानुपपत्तेःप्रमातुश्चांतःकरणावच्छिन्नत्वेनविषयानुसंधानार्थमन्यापेक्षत्वात्तदनन्वितस्यब्रह्माभिन्नस्यसाक्षिणआवश्यकत्वात्तदुपाधित्वमंतःकरणस्यावश्यमभ्युपेयमित्याशयेनाह प्रकृतइति· ननुजीवसाक्षिणोब्रह्माभेदेनस्वयंप्रकाशत्वेनसर्वविषयानुसंधातृत्वाभ्युपगमेब्रह्मणएकत्वात्तदभिन्नसाक्षिणोपिएकत्वाच्चैत्रावगतेमैत्रस्याप्यनुसंधानप्रसंगादित्याशंक्योपाधिभेदेनतस्यनानात्वस्वीकाराददोषइ।

प्रकृतेचांतःकरणस्यजडतयाविषयभासकत्वायोगेनविषयभासकचैतन्योपाधित्वम् अयंचजीवसाक्षीप्रत्यात्मन्नाना एकत्वेमैत्रावगतेचैत्रस्याप्यनुसंधानप्रसंगः ईश्वरसाक्षित्वमायोपहितचैतन्यंतच्चैकम् तदुपाधिभूतमायायाएकत्वा।त् इन्द्रोमायाभिःपुरुरूपईयतेइत्यादिश्रुतोमायाभिरिति· बहुवचनस्यमायागतशक्तिविशेषा भिप्रायतयामायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतयावोपपत्तेः॥

त्याह अयंचेति· एवंजीवसाक्षिणंनिरूप्येश्वरसाक्षिणंनिरूपयतिईश्वरसाक्षीति· तदपिजीवसाक्षिवन्नानाकिंचैकमित्यपेक्षायामाह तच्चैकमिति· तत्रहेतुमाह· तदिति· अनाद्यनिर्वचनीयत्वेसतिविपर्ययोपादानभूताविक्षेपशक्तिप्रधानामाया नतुतस्याएकत्वंमायाभिरितिश्रुतिविरुद्धमित्याशंक्याह· इन्द्रइति इन्द्रोनिरंकुशैश्वर्यःपरमात्मामायाभिःपुरुरूपोबहुरूपईयतेप्रतीयतेयथावह्न्यादेर्दाहकत्वप्रकाशकत्वादिकार्यदर्शनात्तदनुकूलाशक्तिविशेषाःकल्प्यन्तेतथाजगद्रूपविचित्रकार्यदर्शनान्मायायास्तेकल्प्यंत इति· तदभिप्रायतयेत्यर्थः ननुमुख्यार्थपरित्यागेकिंकारणमित्याशंक्यानेकश्रुतिस्मृतिगतैकवचनसिद्धतदेकत्वनिश्चयएवेत्याह· मायांत्विति·

॥ नन्विदमेकवचनंजात्यभिप्रायंकिंनस्यादित्याशंक्यैतच्छंकानिवर्तकैकपदयुक्तांश्रुतिंपठति॥ ७॥

14

अजामिति·जन्मशून्यामनादिभूतांस्वसमानजातीयेतरप्रकृतिशून्यामेकांलोहितशुक्लकृष्णांरजःसत्वतमोमयींबह्वीःप्रजास्समानरूपास्त्रिगुणात्मिकाःसृजमानांएकोऽजन्माजीवोजुषमाणःसेवमानोऽनुशेतेतत्तादात्म्यापन्नोभवतिजहात्येनांभुक्तभोगामजोऽन्यईश्वरइत्यर्थः॥माययाएकत्वश्रुतितात्पर्यसिद्धमितिकथंज्ञातंश्रुतितात्पर्यस्यदुरूहत्वादित्याशंक्यस्मृतिकारानुसारेणत्याशयेनपराशरस्मृतिंपठतितरतीति·यस्मिन्परात्मनिहृदिनिवेशितेवृत्यारूढज्ञानेयोगीअविद्यांतरतितस्मैज्ञानस्वरूपायामेयायवृत्यवच्छिन्नचैतन्यागोचरायनमःअविद्यांविशिनष्टिविततामिति·प्रपंचाकारेणपरिणत्वात्सर्वत्रव्याप्तामित्यर्थः ननुतन्निवृत्तावपिनानर्थनिवृत्तिःसर्वानर्थभूतायामायायाअवशिष्टत्वादित्याशंक्याह·मा

मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरंअजामेकांलोहितशुक्लकृष्णांबह्वीःप्रजास्सृजमानांसरूपाःअजोह्येकोजुषमाणोऽनुशेतेजहात्येनांभुक्तभोगामजोऽन्यः।तरत्यविद्यांविततांहृदियस्मिन्निवेशितेयोगीमायाममेयायतस्मैविद्यात्मनेनमइ।त्यादिश्रुतिस्मृतिषुएकवचनबलेनलाघवानुगृहीतेनमायायाएकत्वंनिश्चीयतेततश्चतदुपहितचैतन्यंईश्वरसाक्षितच्चानादितदुपाधेर्मायायाअनादित्वान्मायावच्छिन्नंचैतन्यंपरमेश्वरः॥

यामिति·स्वाश्रयाव्यामोहकत्वव्यामोहकत्वविशेषेपिवस्तुतोनतयोर्भेदइत्याशयः ननुस्मृतावपिजातावेकवचनस्यसंभवादेकपदस्यामुख्यार्थकतायाअपिसुवचत्वात्कथंतदेकत्वनिश्चय।इत्याशंक्याहलाघवेति· अविद्यायामंतरेवर्तमानाःमममायादुरत्ययेत्यादिश्रुतिस्मृतीनांआदिपदेनसंग्रहः उपसंहरति·ततश्चेति·यथोपाधिभूतमायायाएकत्वात्तस्यैकत्वंतथातस्याअनादित्वात्तस्यानादित्वमपीत्याह·तच्चेति·तच्चैतन्यमनाद्यपीत्यर्थः ईश्वरसाक्षिज्ञानस्येश्वरज्ञानापेक्षत्वादाह·मायेति·पूर्ववदत्रापिमायायाविशेषणत्वोपाधित्वाभ्यामीश्वरत्वसाक्षित्वयोर्भेदइत्याह·॥मायायाइति॥तथाचयथानास्तिपाचकपाठकयोर्भेदः किंतुपाचकत्वपाठकत्वयोस्तद्वन्नेश्वरतत्साक्षिणोर्भेदोऽपित्वीश्वरत्वसाक्षित्वयोरित्यर्थः ननुमायायाएकत्वाद्यथेश्व॥रसाक्षिणएकत्वंतथातदवच्छिन्नस्याप्येकत्वावश्यंभावात्कथंतस्यब्रह्मादिरूपेणभेदस्तस्य॥

विशेषणभेदमूलत्वात्तद्भेदे च· तस्यैवोपाधितया तदुपहितस्याप्यनेकत्वौचित्यात्कथं तदेकतेत्याशंकायां यथा मायोपाधिगतगुणभेदाभिप्रायेण·॥ तदनेकत्वव्यपदेशस्तथा तद्गतगुणावच्छेदेनेश्वरभेदो न तु वस्तुत इत्याशयेनाह· सचेति· उपाधिपदमत्र विशेषणपरं तथा च मायावच्छिन्नेश्वरचैतन्यमेवोद्भूतसत्वगुणमायावच्छिन्नं पालयितृ विष्णुनारायणादिशब्दवाच्यतां भजते तदेवोद्भूतरजोगुणमायावच्छिन्नं स्रष्टृ ब्रह्मविधात्रादिशब्दप्रतिपाद्यतां लभते· तदेवोद्भूततमोगुणमायावच्छिन्नं संहर्तृ· महेश्वररुद्रादिशब्दाभिधेयता मधिगच्छति अथ यो ह खलु वावास्य राजसोंशो ऽसौ स यो यं ब्रह्मा अथ यो ह खलु वावास्य तामसोंशो ऽसौ स यो यं रुद्रः अथ यो ह खलु वावास्य सात्विकोंशो ऽसौ स यो यं विष्णुरिति मैत्रेयोपनिषदि त

मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः न तु धर्मिणोरीश्वरतत्साक्षिणोः स च परमेश्वर एकोपि स्वोपाधिभूतमायानिष्ठसत्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वर इत्यादिशब्दवाच्यतां लभते·। नन्वीश्वरसाक्षिणोऽनादित्वे तदैक्षत बहुस्यां प्रजायेयेत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागन्तुकमीक्षणमुच्यमानं कथमुपपद्यते उच्यते यथा विषयेंद्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदाः जायंते· तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषाः इदमिदानीं स्रष्टव्यमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यमित्या

शेषावगतेरित्यर्थः॥ उपास्यं तु त्रिगुणमायावच्छिन्नमेव विष्णुमहेशगणेशदिनेशदुर्गादिरूपेण स्थितं न त्वेकैकगुणप्रधानमायाविशिष्टमुपास्तं निरंकुशैश्वर्यवत्वश्रवणादित्यादि द्रष्टव्यम्॥ नन्वीक्षणस्येश्वरसाक्षिणः सृष्टिपूर्वकालीनत्वप्रतिपादनात्तस्यानादित्वं बाधितं तस्य सादित्वे ईश्वरस्याप्यनादित्वं बाधितमिति शंकते नन्विति यथाभिव्यंजकान्तःकरणवृत्तेः सादित्वेन तत्प्रतिबिंबितजीवसाक्षिस्वरूपज्ञानस्यापि सादित्वं तथेक्षणाद्यभिव्यंजकमायावृत्तेः सादितया तत्प्रतिबिंबितेश्वरसाक्षिचैतन्यस्येक्षणादिज्ञानस्वरूपस्यापि सादित्वमतो न तयोः स्वतोऽनादित्वे ॥ बाधकमित्याशयेनाह· उच्यत इति·॥ ॥ ॥

15

ए·
१·

एवंसाक्षिद्वैविध्यप्रतिपादनात्तस्यैवतत्तद्वृत्त्यनुगतस्यज्ञानत्वात्प्रत्यक्षज्ञानद्वैविध्यमपिसिद्धमित्याहएवमितिएवंसाक्षिद्वैविध्यनिरूपणाज्जीवेश्वरसाक्षिजन्यप्रत्यक्षभेदेनप्रत्यक्षज्ञानस्य द्वैविध्यसिद्धमितिनरम्यंज्ञप्तिगतंप्रत्यक्षत्वंचित्त्वमेवेत्युत्तरग्रंथविरोधात् कंचिद्विशेषमभिधातुंवृत्तमनुवदतिप्रत्यक्षत्वमितितत्रज्ञेयगतज्ञप्तिगतप्रत्यक्षत्वयोर्मध्येनन्वनुमित्यादावतिव्याप्तिरित्याशंक्यसर्वत्रापितत्तदाकारवृत्त्युपहितचैतन्यस्यस्वात्मांशेप्रत्यक्षत्वेनसर्वस्यापिज्ञानस्यलक्ष्यत्वान्नातिव्याप्तिरित्याहपर्वतइति· यत्साक्षादपरोक्षाद्ब्रह्मेत्यादिश्रुत्याचेत्त्वस्यैवप्रत्यक्षत्वाभिधानाच्चिद्रूपस्यज्ञानस्यस्वात्मांशेस्वप्रकाशतयासर्वस्यापिज्ञानस्यप्रत्यक्षत्वादित्यर्थः नन्वनुमित्यादौप्रत्यक्षत्वव्यवहारःकुतोनास्तीत्याशंक्यतत्तद्विषयांशनिरूपितप्रत्यक्षत्वप्रयोजकस्यपूर्वोक्तस्याभावादित्याशयेनाहतत्तदितिननुयोग्यविषयस्यस्वगोचरवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यस्यशुक्तिरूप्यादेर्ज्ञानेऽतिव्याप्तिरित्याशंक्याहतस्येतिप्रत्यक्षप्रमाणनिरूपणेभ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनमनुपपन्नंमत्वाह· यदेति·प्रत्यक्षप्रमायाज्ञेयगतस्ययथार्थप्रत्यक्षस्येत्यर्थः नन्वबाधितत्वंपारमार्थिकत्वंउतसत्वमात्रंनाद्यः घटादिज्ञानेऽव्याप्तेः नद्वितीयः शुक्तिरूप्यादिज्ञानेतिव्याप्तेः॥

जायंतेतासांचवृत्तीनांसाक्षित्वात्तत्प्रतिबिम्बचैतन्यमपिसाक्षीत्युच्यते एवंसाक्षिद्वैविध्येनप्रत्यक्षज्ञानद्वैविध्यंप्रत्यक्षत्वंचज्ञेयगतंज्ञप्तिगतंचेतिनिरूपितंतत्रज्ञप्तिगतप्रत्यक्षत्वस्यसामान्यलक्षणंचित्त्वमेवपर्वतोवह्निमानित्यादावपिवह्न्याद्याकारवृत्त्युपहितचैतन्यस्यस्वात्मांशेस्वप्रकाशतयाप्रत्यक्षत्वात्ततत्विषयांशेप्रत्यक्षत्वंतुपूर्वोक्तमेवतस्यचभ्रान्तिरूपप्रत्यक्षेनाऽतिव्याप्तिःभ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेनतस्यापिलक्ष्यत्वात् यदातुप्रत्यक्षप्रमायाएवलक्षणम् वक्तव्यंतदापूर्वोक्तलक्षणोऽबाधितत्वविषयविशेषणंदेयम्शुक्तिरूप्यादिभ्रमस्यसंसारकालीनबाधविषयप्रातिभासिकरजतादिविषयकत्वेनोऽक्तलक्षणाभावान्नातिव्याप्तिः ननु॥

त्वादवस्थादित्याशंक्य संसारदशायामबाधितत्वविवक्षितमित्याह शुक्तीति· भ्रमस्य भ्रांतिज्ञानस्य प्रातिभासिकत्वं प्रतीतिकालमात्रवृत्तित्वमिति
यावत् तथा च तदानीमनिर्वचनीयरजताद्युत्पद्यते तस्य शुक्तिज्ञानबाध्यत्वात् तत् ज्ञानस्य बाधितविषयकत्वमिति भावः इदमसहमानोन्यथाख्याति
वादी शंकते नन्विति यद्यपि विसंवादिप्रवृत्त्या भ्रांतिज्ञानं सिध्यति तस्य च विषयं विनानुपपत्तिः तद्विषयं साधयति तथापि स विषयः प्रातिभासिकस्त
त्कालोत्पन्न इत्यत्र नास्ति प्रमाणमित्याह विसंवादीति यद्विषयकप्रवृत्तिस्तस्य लाभे तस्याः संवादित्वमलाभे तु विसंवादित्वं तच्च भ्रांतिजन्यप्रवृत्तेरित्य
र्थः ननु विषयांतरानुपपत्तिस्तत्र प्रमाणमित्याशंक्याह देशांतरीयेति· असन्निकृष्टदेशांतरीयं वस्तु न प्रत्यक्षविषयत्वयोग्यमिति दूषयति नेति· अस
न्निकृष्टस्य भ्रमे भानं नोपपद्यते प्रत्यक्षसामग्र्याः सन्निकर्षघटितत्वेन तद्रहितस्य प्रत्यक्षविषयत्वायोगादिति भावः नन्वस्तु अलौकिकः सन्निकर्ष

विसंवादिप्रवृत्त्या भ्रांतिज्ञानसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे न प्रमाणं देशांतरीयरजतस्यल्कृ
हस्यैव तद्विषयत्वसंभवादिति चेन्न तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् न च ज्ञानं तत्र प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे
तत एव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः ननु रजतोत्पादकानां रजतावयवानामभावे शुक्तौ कथं तत्रापि रजत
मुत्पद्यते इति चेत्॥ ९ इत्याशंक्य स च किं सामान्यात्मकः किं वा ज्ञानरूप इति विकल्प्य नाद्यः तत्र प्रमाणाभावात् सन्निकृष्टधूमादिकमेव प्र
त्यक्षविषयीभूतं न तु तन्मात्रं येन सामान्यं प्रत्यासत्तिरिति· कल्पनास्यादिति प्रथमपक्षपरिहारं मनसि निधाय द्वितीयं पक्षं परिहरति न चेति तत्र भ्रां
तिप्रत्यक्षविषये ज्ञेयेन रजतादिना ज्ञानमेव सन्निकर्ष इति न च प्रमाणाभावादिति भावः विपक्षे बाधकं हेतुमाह ज्ञानस्येति· तत एव ज्ञानलक्षणप्र
त्यासत्तेरेव अलौकिकापि प्रत्यक्षसामग्र्या अनुमितिसामग्रीतो बलवती लाघवादिति भावः। नन्वेवं तर्हि अपूर्वरजतोत्पत्तिपक्षोप्यसंगतो रजतोपा
दानलौकिकतदवयवाभावात् अलौकिकानां तथा तेषां तदुपादानत्वे प्रमाणाभावादिति शंकते नन्विति अन्यथोपपत्त्यभावात्पारिशेष्याद्रजतो
त्पत्त्यंगीकारस्यावश्यकत्वात् तदनुकूला तत्सामग्री कल्पनीयेति समाधानं प्रतिजानीते उच्यते इति· लौकिकोपादानाभावात् रजतोत्पत्तिर्न संभवतीति न

16

॥ श्रीः ॥

उपादानोपादेययोः सादृश्यावश्यंभावादलौकिकरजतोत्पादनेन लौकिकसामग्र्यपेक्षेत्याह नहीति· तत्व्यतिरिक्तसामग्र्यभावात् पृच्छति किंत्विति यथा प्रातिभासिकं रजतं लौकिकरजतविलक्षणं तथा तदुत्पादिका सामग्र्यपि लोकप्रसिद्धसामग्रीतो विलक्षणैवेत्युत्तरमाह· विलक्षणेति· तर्हि तत्स्वरूपं वक्तव्यमित्यपेक्षायां प्रतिज्ञातमर्थमुपपादयति· तथाहीति· तत्र चैतन्ये प्रतिबिंबिते सति पूर्वोक्तरीत्या तदाकारकमित्याद्युक्तरीत्या ततश्च त्रिविधचैतन्याभेदसंपत्त्यनंतरं च अविद्या रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमत इत्यन्वयः ननु अविद्याया एवाकाशादिप्रपंचोपादानत्वाभ्युपगमात्प्रतिज्ञाहानिरित्याशंकानिरासाय प्रमातृचैतन्येत्यादिविशेषणद्वयं ननु यथोक्ताविद्या सर्वदा यथोक्ताकारेण कुतो न परिणमत इति चेत् निमित्तकारणविरहादि

नहि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किंतु विलक्षणैव तथाहि· काचकामलादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदंतःकरणवृत्तिरुदेति तस्यां च वृत्ताविदमवच्छिन्नचैतन्यं प्रतिबिंबते तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमवच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाविद्या चाकचिक्यादिसादृश्यसंदर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते परिणामो नाम उपादानसमसत्ताककार्यापत्तिः विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः॥

त्यभिप्रेत्य निमित्तकारणमाह· रजतसंस्कारेति यद्यपि संस्कारोऽपि सर्वदा वर्तते· तथाप्युद्बोधितस्य निमित्तत्वेत्यभिप्रेत्योक्तम् चाकचिक्यादीति चाकचिक्यादेः सादृश्यस्य संदर्शनेन समुद्बोधितो रजतसंस्कारस्तल्लक्षणया सामग्र्या सहकृता ननु चाकचिक्यादिसादृश्यसंदर्शने नीलपृष्ठत्रिकोणताऽदर्शने च किंनिमित्तमित्यपेक्षायामाह काचादीति नेत्रनिष्ठकाचादिदोषसंयुक्ता परिणमत इत्युक्तम्· तत्र किंलक्षणः परिणाम इत्यपेक्षायां तल्लक्षणमाह परिणाम इति यदभिन्नकार्यमुत्पद्यते तदुपादानकारणं॥ तेन समा सत्ता यस्य कार्यस्य तथाभूतकार्यस्यापत्तिः यथोक्तकार्यकारेणाद्भवो यथा व्यावहारिकसत्ताकदुग्धेन तत्समसत्ताकदधिरूपकार्यापत्तिरित्यर्थः विवर्त्तेऽतिव्याप्तिवा[illegible]ापसमसत्ताकेति· समसत्ताकपदव्या

वर्त्यत्वात्· वक्ष्यमा·

णोपयुक्तत्वाच्च विवर्तं लक्षयति विवर्तो नामेति । उपादानाद्विषमसत्ताकस्य कार्यस्य तदापत्तिः परिणामेःति व्याप्तिनिर्णयविषमसत्ताकेत्युक्तं प्रातिभासिकरजतादेः परिणामत्वविवर्तत्वं चास्तीत्याह प्रातिभासिकेति नन्वविद्यापरिणामस्य रजतस्याविद्यायां तादात्म्यसंबंधेन वर्तमानस्य चैतन्ये तत्संबंधेनावर्तमानत्वाच्चैतन्योपादानकत्वासंभवात् कथमुक्तविवर्तेनारजतस्येत्याशंक्याविद्यापरिणामस्य तदधिष्ठानाश्रितत्वनियमान्नोक्तदोष इत्याह अविद्येति । नन्वेवं तर्हि पुरोवर्तितादात्म्यप्रत्ययानुपपत्तिं शंकते । नन्विति । अविद्यापरिणामस्याविद्याधिष्ठानाश्रितत्ववच्चैतन्याध्यस्तस्य रजतादेः तदवच्छेदकपुरोवर्तितादात्म्यप्रत्ययोपपत्तिरित्याशयेन समाधत्ते उच्यत इति । ब्राह्मणोहं सुखी मम देहः सुखीत्येवं शरीरनिष्ठत्वेन देहस्यात्मनिष्ठु ।

प्रातिभासिकरजतं चाविद्यापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति चोच्यते । अविद्यापरिणामरूपं च तद्रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते अस्मन्मते सर्वस्यापि कार्यस्योपादानाधिष्ठानाश्रितत्वनियमात् ननु चैतन्यनिष्ठस्य रजतस्य कथमिदं रजतमिति पुरोवर्तितादात्म्यम् । उच्यते । यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलंभः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात् तथा चैतन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेनेदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्यय उपपद्यते तस्य च विषयचैतन्यस्य तदंतःकरणोपहितचैतन्याभिन्नतया विषयचैतन्याध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यं सुखादिवदनन्यवेद्यमिति चोच्यते ननु ॥

((खाद्युपलब्ध्यवच्छेदकत्ववदिदमंशे तस्य रजताध्यासस्यावच्छेदकत्वादुक्तप्रत्यय उपपद्यत इत्याह तथा चैतन्येति नन्विदमवच्छिन्नचैतन्याध्यस्तरजतादेः साक्षिण्यनध्यस्ततया तस्य केवलसाक्षिवेद्यता सुखादेरिवानन्यवेद्यता च सांप्रदायिकैरुच्यमाना कथमुपपद्यत इत्याशंक्याह तस्य चेति । ननु सुखादीनामवच्छेदकशरीरनिष्ठत्वेनोपलंभो न सर्वदा अहं सुखीत्यात्मनिष्ठत्वेनाप्युपलंभदर्शनात् तथा रजतादेरप्यतः साक्षिण्यध्यस्तत्वाभ्युपगमादहं मनुष्य इतिवदहं रजतमहं सुखीतिवदहं रजतवानित्येवं वा प्रत्ययः कदापि कुतो न भवतीत्याशंकते नन्विति । न हि यत्र यदध्यासस्तस्य तन्निष्ठाविद्याकार्यत्वमप्युक्तं तन्निष्ठतयैव भानमिति नियमः संभवति सुखादेर्घटादिवत् । शुद्धचैतन्याध्यस्तत्वेप्यहं सुखीति प्रत्ययदर्शनात् । इत्याशयेन समाधत्ते उच्यत इति ।

चैतन्यमात्रस्य रजतं प्रति न अधिष्ठानता किन्तु इदमवच्छिन्नचैतन्यस्य रजतं प्रति अधिष्ठानता॥ पृ॰ पं॰ ११॥

तर्हि घटादेः सुखादेः शुक्तिरूप्यादेश्च तत्तत्प्रतीतिविषयत्वे पृथक्पृथक् नियामकमनेकमिति पृच्छति· किंत्विति· नानानियामकाभ्युपगमे गौरवादनुगतैकनियामकस्वीकार उचित इत्युत्तरमाह· यस्येति· उक्तनियामकं सर्वत्र योजयति· तथाचेति· निरुक्तानुगतनियामके सति अयं घटः अहमितीदमाकारानुभवस्याहमाकारानुभवस्य च स्पष्टत्वमभिप्रेत्योभयविधाकारानुभवमावेदयति· तथाचेति· यस्योभयविधानुभवस्य विषयत्वं देहेंद्रियादेः स चोभयविधानुभवं एवमित्यर्थः निरुक्तनियामकं प्रकृते योजयति· प्रकृते चेति· यद्यपि शुक्तिरूप्यादेः प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याका

साक्षिण्यध्यस्तत्वेऽहं रजतमिति तद्वानिति वा प्रत्ययः स्यात् अहं सुखीतिवदिति चेदुच्यते न हि सुखादीनामंतःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तं अहं सुखीति ज्ञानं सुखादीनां घटादिवत्तु इदंचैतन्य एवाध्यासात् किंतु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वं तस्य· तदाकारानुभवविषयत्वमित्येवानुगतनियामकम् तथा च· इदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वात् घटादेरिदमाकारानुभवविषयत्वमहमाकारानुभवाहितसंस्कारसहिताविद्याकार्यत्वादंतःकरणादेरहमाकारानुभवविषयत्वं शरीरेंद्रियादेरुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वादुभयविधानुभवविषयत्वम् तथा चोभयविधानुभवः इदं शरीरमहं देही अहं मनुष्यः अहं ब्राह्मणः इदं चक्षुरहं काणः इदं श्रोत्रमहं बधिर इति प्रकृते च प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमंशावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वेपि इदं रजतमिति सत्यस्थलीयेदमंशाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता न त्वहं रजतमित्यहमाकारानुभवविषयतेत्यनुसंधेयम् नन्वेवमपि॥ ७ ॥

र्यत्वमस्ति तथापि तत्सहकारिकारणं इदं रजतमित्यादिसत्यरजतस्थलीयेदमाकारानुभवाहितसंस्कारः तत्तस्येदमाकारानुभवविषयत्वं न त्वहमनुभवविषयत्वमिति भावः नन्वस्तु शुक्तिरूप्यस्येदमाकारानुभवविषयत्वं तथापि न तद्विषयाविद्यावृत्तिराश्रयणीया तस्य साक्षादनावृत्तसाक्षिसंबंधितया परोक्षभानसंभवादिति स्वयूथ्यः शंकते नन्वेवमपीति· यद्यपि साक्ष्यध्यस्तरजतस्य साक्षिचैतन्याभिन्नसत्ताक॥ ७ ॥

वे.प.
टी.टी.
१८

ज्ञानद्वयंस्मरणानुभवात्मकम्॥पं.३॥

त्वमस्ति तथापि·न तस्यापरोक्षत्वं संभवति साक्षिचैतन्यस्य रजतगोचरवृत्त्युपहितत्वाभावात्तस्मात्तदपरोक्षतार्थमविद्यावृत्तेरावश्यकतेति समाधत्ते ने
ति·चैतन्यभिन्नसत्ताकत्वाभावस्य चैतन्याभिन्नसत्ताकत्वस्य नन्वेवमेकं संधातुं प्रवृत्तस्यापरं हीयत इति न्यायापातः रजतापरोक्षतासिद्धयेऽविद्यावृत्त्य
भ्युपगमे प्राभाकरमतवद्विशिष्टज्ञानानभ्युपगमप्रसंगेन रजतज्ञानस्य भ्रमत्वहानात् प्राभाकरमते हीदं रजतमित्यत्र ज्ञानद्वयमंगीकृतम् तत्रेदमिति
पुरोवर्त्तिविषयमनुभवात्मकं ज्ञानं रजतमित्यसन्निकृष्टरजतविषयं स्मरणात्मकं अनोर्वस्तुद्वयतादात्म्यावगाहि विशिष्टज्ञानं कापि नास्तीति सर्वमपि।
ज्ञानं यथार्थमेवेति·भ्रमज्ञानासिद्धिस्तद्वन्मतेपि वृत्तितद्विषयभेदाभ्युपगमे वस्तुद्वयतादात्म्यावगाह्येकज्ञानानभ्युपगमात् भ्रमज्ञानं न सिध्यतीति

मिथ्यारजतस्य साक्षात्साक्षिसंबंधितया भानसंभवे रजतगोचरज्ञानाभासरूपाया अविद्यावृत्तेरभ्युपगमः किमर्थ इति चेन्न स्व
गोचरवृत्त्युपहितचैतन्यभिन्नसत्ताकत्वाभावस्य विषयापरोक्षत्वरूपतया रजतस्यापरोक्षत्वसिद्धये तदभ्युपगमात् नन्विदंवृत्ते रजता
कारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवत् विशिष्टज्ञानानभ्युपगमे कुतो भ्रमज्ञानसिद्धिरिति चेन्न वृत्तिद्वयप्रतिबिंबितचैतन्य
स्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात् अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानि
यमात् अप्रामाण्योक्तिः संप्रदायिकानाम् ननु सिद्धांते देशांतरीयरजतमप्यविद्याकार्यमभ्युपेतं चेति कथं शुक्तिरूप्यस्य ततो वैल
क्षण्यमिति चेत् न त्वन्मते सत्यत्वाविशेषेपि केषांचित् क्षणिकत्वं केषांचित् स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशे
((षादिकं ममा

सएवशंकते· नन्विदमिति· वृत्तिभेदेपि नास्ति ज्ञानभेदस्तयोरेकदेशस्थत्वेन तत्प्रतिबिंबितचैतन्यस्यैकत्वान्नैवमित्याह नेति·यत्र
एकस्यैव साक्षिज्ञानस्य सत्यासत्यवस्तुविषयत्वमत एव तस्याप्रामाण्योक्तिः सांप्रदायिकानां संगतेत्याह अत एवेति॥ नन्वेवं महता प्रयासेन शुक्तिरू
प्यस्याविद्याकार्यत्वाभ्युपगमस्तत्साधनं देशांतरीयरजताद्वैलक्षण्यसिध्यर्थं तच्च न संभवति भवत्सिद्धांते देशांतरीयरजतादेरपि तथात्वाभ्युपगमात्
तथा चोपलभ्यमानवैलक्षण्ये को हेतुरिति नैयायिकः शंकते· ननु सिद्धांत इति· त्वन्मते सत्यत्वाविशेषेपि शब्दज्ञानेच्छादीनां क्षणिकत्वं घटादीनां
॥ स्थायित्वमिति वैलक्षण्ये यन्नियामकं तदेव ममाप्यस्त्विति परिहरति नेति का॥

राम.
१८

18

दंरजतमितिज्ञानंत्वनुवादः शुक्तित्वप्रकारकज्ञानस्यरजतादिभेदाज्ञाननिवर्तकत्वात् तदुक्तंपंचपादिकायांशुक्तित्वज्ञानमेववाधकंनेदंरजतमित्यनु
वादइतिरजतस्यवाधः उपादानेनसहनाशः तूलाविद्याश्चमूलाज्ञानस्यैवावस्थाविशेषास्तदुक्तंविवरणेमूलाज्ञानस्यैवावस्थाभेदारजताद्युपादानानि
शुक्तिकादिज्ञानैःसहाध्यासेननिवर्तन्तेइतिमूलाविद्याकार्यत्वपक्षेतुस्वप्नगजादिवनिवृत्तिरित्याहमूलाविद्येतिनन्वस्मिन्पक्षेशुक्तिरूप्यज्ञानेप्रमात्व
प्रसंगः संसारदशायामवाधितत्वघटितस्यलक्षणस्यसत्वादितिचेन्नावाधितपदेनागंतुकदोषाजन्यस्यविवक्षितत्वात् ननुशुक्तिरजतस्याविद्या
कार्य्यत्वात् प्रतिभाससमयेसत्वस्वीकारेनेदंरजतमिति· त्रैकालिकनिषेधानुपपत्तिरिति· शंकते· ननुशुक्ताविति· विषयभेदादविरोधइति· परि

मूलाविद्याकार्यत्वपक्षेतुमूलाविद्याया ब्रह्मतत्वसाक्षात्कारमात्रनिवर्त्यतयाशुक्तित्वज्ञानेनानिवर्त्यतयारजतस्यनतत्रशुक्ति-
ज्ञानान्निवृत्तिमात्रंमुशलप्रहारेणघटस्येवनतुशुक्तौरजतस्यप्रतिभाससमयेप्रातिभासिकसत्वाभ्युपगमेनेदंरजतमिति त्रै-
कालिकनिषेधज्ञानंनस्यात् किंत्विदानीमिदंनरजतमिति· इदानींघटः श्यामोनेतिवदितिचेन्न नहितत्ररजतत्वावच्छिन्नप्र-
तियोगिताकाभावोनिषेधधीविषयः किन्तुलौकिकपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकः व्यधिकर
णधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमात्· ननुप्रातिभासिकेरजतेपारमार्थिकत्वमवगतंनवाऽनवगमेप्रतियोगिता
वच्छेदकावच्छिन्नरजततत्वज्ञानाभावादभावप्रत्यक्षानुपपत्तिः॥ हरति· नेति· हियस्मात्तत्रनेदंरजतमिति· त्रैकालिकनिषेध

ज्ञानेरजतत्वावच्छिन्नप्रतियोगिताकाभावोनिषेधज्ञानविषयोनभवतितर्हिकीदृशोभावस्तद्विषयइतिपृच्छति· किंत्विति· व्यावहारिकत्वावच्छिन्न
प्राति भासिकरजतप्रतियोगिताकोभावोनिषेधबुद्धिविषयः तत्रहेतुमाह· व्यधिकरणेति· विरुद्धंव्यावहारिकरजताद्यधिकरणंयस्यसव्यधिकरणः।
सचासौधर्मश्चलौकिकपारमार्थिकत्वंतदवच्छिन्नाप्रातिभासिकरजतप्रतियोगितायस्यतादृशाभावस्याभ्युपगमात्· नन्विदमनुपपन्नंव्यधिकरण
॥ धर्मस्याऽवगमेऽनवगमेचानुपपत्तेरितिशंकतेनन्विति अवगमपक्षमवलं·॥

पुरोवर्तिवस्त्वधिष्ठानंतथास्वप्नरथादेरप्यधिष्ठानंवक्तव्यं·तत्किंचैतन्यमुतदेशविशेषः आद्येपितत्किंशुद्धमुतांतःकरणावच्छिन्नंनोभयमपितयोर
धिष्ठानत्वेनाप्रतीतेः द्वितीयेपिसकिंबाह्यउत स्वाप्निकः नाद्यः तस्यासन्निकृष्टतयाप्रत्यक्षज्ञानविषयत्वायोगात्· नद्वितीयः अधिष्ठानतयोपलभ्यमान
स्यापितस्यसन्निकृष्टतयाप्रातिभासिकत्वावश्यंभावेनाधिष्ठानसापेक्षतयातत्त्वायोगादित्याशयेनशंकते ननुस्वप्नेति·तदास्वप्नावस्थायांरथाद्यधि
ष्ठानतयोपलभ्यमानदेशविशेषस्यापिसन्निकृष्टतयानिर्वचनीयप्रातिभासिकदेशोभ्युपगन्तव्यइत्यन्वयः प्रथमपक्षमवलंब्यपरिहरतिनेति·ननुचैत
न्यस्यपुरोवर्तिवत्इत्यवच्छिन्नज्ञानविषयत्वाभावात्कथमधिष्ठानताइत्याशंक्याहस्वयंप्रकाशेति·स्वप्रकाशपरप्रकाश्यसाधारणंज्ञायमानत्वमेवा
धिष्ठानत्वप्रयोजकंलाघवादितिभावः ननुस्वयंप्रकाशस्यापितस्यनतदाचिद्रूपेणभानंरथादिजडाद्यधिष्ठानत्वनिर्वाहकंप्रतिकूलरूपत्वान्नाप्यानंद

तथाचरथाद्यध्यासः कुत्रेतिचेन्न· चैतन्यस्यस्वयंप्रकाशस्यरथाद्यधिष्ठानत्वात्प्रतीयमानरथाद्यस्तीत्येवप्रतीयते इतिसद्रूपेण
प्रकाशमानंचैतन्यमेवाधिष्ठानंदेशविशेषोपिचिरध्वस्तः प्रातिभासिकः रथादाविन्द्रियग्राह्यत्वमपिप्रातिभासिकंतदासर्वे
न्द्रियाणामुपरमात्· अहंगजइत्यादिप्रतीत्यापादनंतुपूर्ववन्निरसनीयम् स्वप्नगजादयः साक्षान्मायापरिणामाइतिकेचित्·

19

रूपेणतस्यमूलाज्ञाननिवृत्तिंविनाभानासंभवादित्याशंक्याह·प्रतीयमानेतिअत्रायंरथइत्यधिष्ठानतयाप्रतीयमानस्यापिदेशविशेषस्यप्राति
भासिकत्वान्नाधिष्ठानतेत्याहदेशविशेषोपीतिकिंचइन्द्रियाण्यपितत्रकल्पितानीत्याहइन्द्रियेतितत्रहेतुमाह·तदेति·ननुस्वप्नगजाद्यधिष्ठानं·य
द्यपिचैतन्यंतथापितस्यांतःकरणावच्छिन्नमस्त्येवसधीः स्वप्नोभूत्वेमंलोकमनुसंचरेदित्यादिश्रुतेः तथाचाहंगजइतिप्रतीत्यापत्तिरित्याशंक्याह
अहंगजइतिपूर्ववदितियथाशुक्तिरजतादेरिदमाकारानुभवाहितसंस्कारसहकृताविद्याजन्यत्वादहंरजतमिति·प्रतीत्यापादनमयुक्तंतद्वदहंगज
इतिप्रतीत्यापादनमपीत्यर्थः॥ननुस्वप्नगजादेस्तत्कालोत्पन्नत्वमनुपपन्नंतेषामुपादानासंभवात् नतावच्चैतन्यंतदुपादानंतस्यापरिणामित्वात्
नापिमूलाविद्यातस्यास्तत्तदवयवसापेक्षायाः साक्षात्तदुपादानत्वासंभवात्· नापितूलाविद्यातस्याबाह्यदेशावच्छिन्नचैतन्या॥ ७ ॥

राम
१९-२

गु

२२-१

२८-१

श्रितायास्तत्त्वादित्याशंक्याह स्वप्नगजादयइतिमायापरिणामामूलाविद्योपादानकाः स्वप्नगजादीनांप्रातिभासिकत्वान्नलौकिकावयवापेक्षान
चैवंसुषुप्तौतत्प्रतिभासापत्तिरितिवाच्यम् रागद्वेषादिवन्निमित्तकारणस्यांतःकरणस्यतदानीमभावात् अन्तःकरणस्यनिमित्तकारणत्वकल्पनापेक्ष
यालद्वाराविद्यापरिणामित्वकल्पनैववरं इत्यभिप्रायवतांपक्षमाह अन्तःकरणेतिनन्वध्यस्तस्याधिष्ठानसाक्षात्कारनिवर्त्यत्वनियमात् तत्साक्षात्काराभा
वात्· जागरणेतेषामनुवृत्तिप्रसंगोदुर्वारइतिशंकतेननुगजादेरिति· यद्यप्यधिष्ठानसाक्षात्कारंविनाऽध्यस्तस्यवाधोनसंभवतितथापितंविनापि· त
न्निवृत्तिसंभवात्· ननदनुवृत्तिप्रसंगइति· समाधानंप्रतिजानीते।उच्यतेइति· वाधरूपनाशाभावेपिनिवृत्तिरूपनाशंप्रकृतेदर्शयितुंनाशद्वैविध्यमा

अंतःकरणद्वारातत्परिणामइत्यन्ये ननुगजादेःशुद्धचैतन्याध्यस्तत्वेइदानीम धिष्ठानसाक्षात्काराभावेनजागरणेपिस्वप्नो
पलब्धगजादयोनुवर्तेरन् उच्यतेकार्यविनाशोहिद्विविधः कश्चिदुपादानेनसहकश्चिद्विद्यमानएवोपादाने आद्योवाधःद्वि
तीयस्तुनिवृत्तिः आद्यस्यकारणमधिष्ठानतत्वसाक्षात्कारः तेन विनोपादानभूतायाअविद्याया अनिवृत्तेःद्वितीयेविरोधिवृ
त्त्युत्पत्तिर्दोषनिवृत्तिश्चतदिहब्रह्मसाक्षात्काराभावात् स्वप्नप्रपञ्चोमावाधिष्टमुशलप्रहारेणघटादेरिवविरोधिप्रत्ययांतरो
दयेनस्वप्नजनकीभूतनिद्रादिदोषनाशेनवागजादिनिवृत्तौकोविरोधः॥ एवञ्चशुक्तिरूप्यस्यशुक्त्यवच्छिन्नचैतन्यनिष्ठतू
लाविद्याकार्यत्वपक्षेशुक्तिरितिज्ञानेनतदज्ञानेनसहरजतस्यवाधः॥ ((ह कार्यविनाशोहीतिउपादानेनाज्ञानेन· आद्यस्यवाधसंज्ञस्य

उपादानेनसहनाशस्यतत्तस्मान्नाशस्यद्वैविध्याद्धेतोरिहजागरणेब्रह्मसाक्षात्काराभावात्· स्वप्नप्रपंचोमावाधिष्टगजादिनिवृत्तौकोविरोधइत्यन्व
यः तत्रहेतुमाहविरोधीति· यथोपादानसत्त्वेपिमुशलप्रहारेणघटादिनिवृत्तिर्भवति· तथाविरोधिवृत्त्यंतरोदयेनगजादेरपिनिवृत्तिरुपपद्यतेस्वप्न।
एवअश्वादिप्रत्ययेगजादिनिवृत्तिदर्शनात् विरोधिवृत्त्यंतरनिवृत्तौपुनरुत्पत्तिमाशंक्यहेत्वंतरमाहस्वप्नजनकीभूतेति· स्वप्नप्रतीतिजनकीभूते
त्यर्थः आदिपदेनादृष्टादिसंग्रहः ननुशुक्तिरूप्यस्यवाधोनिवृत्तिर्वेत्यपेक्षायामाह एवंचेति· कार्यनाशस्यद्वैविध्यसिद्धेसति॥शुक्तिरितिज्ञानेनेतिने॥ ॥

म

२९-२

वे·प·
टी·टी·
२०
१८-१

लांतरोपलंभानुपलंभादिकमादिपदेन गृह्यते तथा च प्रत्यक्षद्वयेपि दोषपरिहारयोः समत्वादेकस्य नियोगोनुपपन्न इति भावः ममत्वन्यदपि वैलक्षण्यनियामकमित्याशयेनाह· यद्वेति अतएवागंतुकदोषजन्यत्वस्य प्रातिभासिकत्वप्रयोजकत्वादेव ननु स्वप्नोपलब्धरथादीनां प्रातिभासिकत्वाभ्युपगमेतेषां तात्कालिकोत्पत्तिरायाता सा चानुपपन्ना स्मरणमात्रेण लब्धव्यवहारोपपत्त्या सृष्टिकल्पनानौचित्यादित्यख्यातिवादी शंकते ननु स्वप्नेति· प्रतीति। विरोधान्नैवमित्याह नेति· स्वप्नेरथादेः स्मरणमात्रमस्तीत्ययुक्तं रथं पश्यामि गीतं शृणोमीत्याद्यनुभवविरोधात् ननु दोषवशात् स्मरामीत्यस्य प्रमोषात्पश्यामीत्याद्याकारा प्रतीतिरित्याशंक्याह ॥ स्वप्न इति ॥ दोषनिवृत्तिकालेपि· स्वप्ने रथमद्राक्षमित्येव प्रतीतिर्न तु स्मृतवानिति प्रतीतिरत उक्तप्रत्ययव्यवहा

यद्वा घटाद्यध्यासे अविद्यैव दोषत्वेनापि हेतुः शुक्तिरूप्याद्यध्यासे तु काचादयो दोषा अपि तथा चागंतुकदोषजन्यत्वं प्रातिभासकत्वे प्रयोजकं अतएव स्वप्नोपलब्धरथादीनामागंतुकनिद्रादिदोषजन्यत्वात्प्रातिभासिकत्वम् ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादिति चेन्न रथादेः स्मरणमात्राभ्युपगमे रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः अथ रथान् रथयोगान् पथः सृजते इति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च तस्माच्छुक्तिरूप्यवत् स्वप्नोपलब्धरथादयोपि प्रातिभासिकाः यावत्प्रतिभासमुपतिष्ठंते ननु स्वप्नरथाद्यधिष्ठानतयोपलभ्यमाने देशविशेषस्यापि तदासंन्निकृष्टतयानिर्वचनीयप्रातिभासिकदेशोभ्युपगंतव्यः॥

रस्य न स्मृतिमात्रादुपपत्तिरिति भावः अत्रानुभवपदं प्रतीतिपरं न तु जाग्रत्कालीनप्रतीतिरपि न विरुद्ध्यते स्वप्ने स्मृतेरनुभवाकारतयोत्पन्नत्वेन तथैव परामर्शौचित्यात् तस्माद्गौरवग्रस्तरथादिसृष्टिर्न कल्पनीयेत्याशंक्याह अथेति· जाग्रद्भोगप्रदकर्मोपरमे स्वाप्नभोगप्रदकर्माभिव्यक्त्यनंतरं रथान्· रथयोगान् तदुपकरणभूतानश्वादीन्· तद्योग्यमार्गांश्च सृजत इति· तत्सृष्टिप्रतिपादकश्रुत्या गौरवस्य प्रामाणिकतयोक्तप्रतीतेरन्यथानयनमयुक्तमिति भावः॥ उक्तश्रुतिविरोधादन्यथाख्यातिरप्ययुक्तेति मनसि निधायोपसंहरति· तस्मादिति· प्रातिभासिकपदविवरणं यावत्प्रतिभासमवतिष्ठंत इति प्रतिभासनियतसत्ताका इति यावत्· ननु शुक्तिरूप्यादेर्यथा॥ ९ ॥

20

राम
२० १८-१

२०२

लौकिकपारमार्थिकत्वस्य अधिष्ठानशुक्तितन्निष्ठस्यशुक्तिनिष्ठरजततस्मिन्रजतेसन्निकृष्टेनपारमार्थिकत्वस्यप्रतितीसंभवेनरजतनिष्ठपारमार्थिकत्वोत्पत्यनभ्युपगमात्·टि·पं
स्यपरिहरतिनेति नन्वत्रलौकिकपारमार्थिकत्वोत्पत्तिःकुतोनाभ्युपगम्यतइत्याशंक्याहयत्रेति·यतएवमतएवयत्रारोप्यसन्निकृष्टंनतत्रप्रातिभासि
कवस्तूत्पत्तिःस्वीक्रियतइत्याह अतएवेतिनतुसन्निकृष्टमपिजपाकुसुमंहस्तादिद्रव्यांतरव्यवधानादसन्निकृष्टंतत्रस्फटिकेनिर्वचनीयलौहित्योत्प
त्तिरंगीकार्येतिशंकतेनन्विति दृष्टापत्त्यापरिहरतिनेति नन्विंद्रियसन्निकृष्टप्रभायाःस्फटिकेभानसंभवादनिर्वचनीयलौहि—त्योत्पत्तिरनुपपन्नेति·चेन्न
स्वच्छद्रव्यस्यजपाकुसुमस्यप्रभायाएवासिद्धेतदुक्तंपंचपादिकायांयथापद्मरागादिप्रभानिराश्रयाप्युन्मुखोपलक्ष्यतेनतथाजपाकुसुमादेरितितथाचा
सन्निहितस्यपरत्रावभासोध्यासइत्यध्यासलक्षणंनक्वापिव्यभिचरितमितिभावः ननुशुक्त्यादौरजताध्याससंभवेप्यहंकारादेरात्मनिसनसंभवति·तस्याधि

अवगमेऽपरोक्षावभासस्यतत्कालीनविषयसत्तानियतत्वात् रजतेपारमार्थिकत्वमप्यनिर्वचनीयंरजतवदेवोत्पन्नमि
तितदवच्छिन्नरजतसत्वेतदवच्छिन्नाभावस्तस्मिन्कथंवर्ततेइतिचेन्न पारमार्थिकत्वस्याधिष्ठाननिष्ठस्यरजतेप्रतिभाससंभ
वेनरजतनिष्ठपारमार्थिकत्वोत्पत्त्यनभ्युपगमात् यत्रारोप्यमसन्निकृष्टंतत्रैवप्रातिभासिकवस्तूत्पत्त्यंगीकारात् अतएवेंद्रि
यसन्निकृष्टजपाकुसुमगतलौहित्यस्यस्फटिकेभानसंभवात् नस्फटिकेनिर्वचनीयलौहित्योत्पत्तिः नन्वेवंयत्रजपाकुसु
मंद्रव्यांतरव्यवधानादसन्निकृष्टंतत्रलौहित्यप्रतीत्याप्रातिभासिकलौहित्यंस्वीक्रियतामितिचेन्न·इष्टत्वात्॥ ((ष्ठानत्वानुपपत्तेःअ
धिष्ठानंह्यध्यस्यमानसदृशमंशद्वयवत्परिच्छिन्नमध्यस्यमानेनसहैकज्ञानविषयत्वयोग्यंचदृष्टमितिचेदुच्यते·अहंकारादिकार्य्यंह्यज्ञानविक
ल्पितएवाध्यस्यतेकार्य्यंस्वकारणावच्छिन्नएवाध्यासोचित्यात्·नचैतावतासमानाश्रयत्वभंगःबिंबप्रतिबिंबयोरेकत्वेनतद्भंगाभावात्तस्मादहंकारा
द्यधिष्ठानचैतन्यस्याभिधेयत्वादिसंभवात्प्रतीतितोघटादिव्यावृत्तत्वाकारेणाप्यहंकारादिभिरात्मनःसादृश्यसंभवादविद्यायांसांशत्वविषयत्वपरिच्छिन्नत्वा
नामपिसंभवादात्माधिष्ठानंभवत्येवनापिप्रमाणदोषाभावःअविद्याया एवदोषत्वात् नचात्मनोविषयत्वादिसमाश्रयणेऽपसिद्धांतःशंकाःअमुख्यस्येनस्य
ननावश्यमेकांतेनाविषयोस्मत्प्रत्ययविषयत्वादित्यादिवदद्भिर्भाष्यकारैरेवसमाश्रितत्वात् किंचाव्यवधानेनप्रकाशमानत्वमेवाधिष्ठानत्वप्रयोजकंन।
त्वाधिष्ठानस्यविषयत्वमपिगौरवात्·नचविषयत्वंविनाधि॥ ((अविद्यावच्छिन्नस्यविषयत्वमस्तिनतुशुद्धस्य॥पं·२॥ ॥अज्ञानप्रतिबिंबे॥टि·पं·५॥ ज्ञानस्य·२॥ ॥

स्वरूपत्वानङ्गीकारेऽभेदभ्रान्त्यनुदयाऽऽपातात्प्राप्यत्वात्(टी·पं·४॥

ष्ठानस्याव्यवधानेनप्रकाशमानत्वमेवनदुष्टमितिवाच्यम्·यथाधिष्ठानस्यापरोक्षत्वंपरमतेकश्चिन्मनसाक्वचिन्नेत्राभ्यांतथास्मन्मतेस्वतोपीत्यत्र
बाधकाभावात्· ननुस्वतोऽपरोक्षेकस्याध्यासोदृष्टइतिचेद्ज्ञानशोकमोहस्वप्नादेरितिगृहाणतथाचपरैर्यथाक्षिगम्यशुक्तिकादौरजतादिविभ्रमःस्वी
कृतस्तथास्वतोऽपरोक्षआत्मन्यहंकारादिविभ्रमेपिनास्तिबाधकम्·।ननुस्वयंप्रकाशस्यात्मनोज्ञाताज्ञातांशासंभवात्·कथमधिष्ठानतेतिचेदुच्यतेदू
रस्थयोर्वृक्षयोर्वृक्षत्वेनप्रतीयमानयोरपितावन्मात्रस्वरूपोभेदोनज्ञायत इत्यंगीकार्यम् अन्यथाऽभेदभ्रान्त्यनुदयापातादेवंज्ञातेप्यात्मन्यज्ञातत्वसं
भवात्तस्याधिष्ठानत्वमुपपद्यतेभेदोहिवस्तुनःस्वरूपंनधर्मःअन्योन्याश्रयापातादित्यन्यत्रविस्तरः॥उक्तमर्थमन्यत्राप्यतिदिशति॥एवमितिप्रत्यक्षभ्रा

एवंप्रत्यक्षभ्रमांतरेष्वपिप्रत्यक्षसामान्यलक्षणानुगमोयथार्थप्रत्यक्षलक्षणासद्भावश्चदर्शनीयः·उक्तप्रत्यक्षंप्रकारांतरेणद्विविधं
इंद्रियजन्यंतदजन्यंचेति·तत्रेन्द्रियाजन्यंसुखादिप्रत्यक्षंमनसइन्द्रियत्वनिराकरणात्इन्द्रियाणिपंचघ्राणरसनाचक्षुःश्रोत्र
त्वगात्मकानिसर्वाणिचेंद्रियाणिस्वस्वविषयसंयुक्तान्येवप्रत्यक्षज्ञानंजनयंति·तत्रघ्राणारसनत्वगिन्द्रियाणिस्वस्थानस्थिता
न्येवगंधरसस्पर्शोपलंभान्जनयंतिचक्षुःश्रोत्रेतुस्वतएवविषयदेशंगत्वास्वस्वविषयंगृह्णीतः·श्रोत्रस्यापिचक्षुरादिवत्परि
च्छिन्नतयाभेर्यादिदेशगमनसंभवात् अतएवानुभवोभेरीशब्दोमयाश्रुतइति·वीचीतरंगादिनान्यायेनकर्णशष्कुली॥ ७॥

मान्तरेषुपीतःशंखस्तिक्तोगुडइत्यादिषुप्रत्यक्षसामान्यलक्षणंचित्त्वंप्रमाणचैतन्यस्याबाधितयोग्यवर्तमानविषयविच्छिन्नचैतन्याभिन्नत्वंयथार्थप्र
त्यक्षलक्षणंचउक्तंप्रत्यक्षंपुनर्विभजतेउक्तमितितथाचेन्द्रियजन्यमित्यत्रेन्द्रियशब्देनज्ञानेन्द्रियाणिपंचगृह्यंतेनतुनैयायिकवत्षड्नापिदशकर्मेन्द्रि
याणांज्ञानाजनकत्वादित्याशयेनाहइन्द्रियाणिपंचेति·तान्यपिकानीत्यपेक्षायामाहघ्राणेतितत्सद्भावेचरूपादिज्ञानानिसकरणकानिक्रियात्वाच्छिदि
क्रियावदित्यनुमानंप्रमाणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंतीत्यादिश्रुतिश्चमानंइन्द्रियाण्यप्राप्यकारीणीतिसौगतास्तान्निराकर्तुमाह· सर्वाणिचेति·।
तत्रापिफलबलकल्प्यस्वभावविशेषमाश्रित्याहतत्रेति·ननुचक्षुषस्तत्संभवेपिकर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रस्यविषयदेशागमनंनसंभवतीत्
((त्याशं॥

क्याह श्रोत्रस्यापीति· आकाशादुत्पन्नं श्रोत्रमपिचक्षुरादिवत्परिच्छिन्नमितिभावः·यतः श्रोत्रस्यशब्ददेशगमनमतएवनैयायिकप्रक्रियानुगौरवग्रस्त
त्वादुपेक्ष्येत्याह·वीचीति·यथावीचेस्तरंगस्ततोपिवीच्यंतरं ततोपितरंगांतरमितिन्यायवत्भेरीदंडसंयोगान्नभस्युत्पन्नाच्छब्दादसमवायिकारणाच्छब्दांत
रस्योत्पत्तिस्ततोन्यस्येतिपरंपरयांऽत्यशब्दस्यश्रोत्रसंबंधकल्पनागौरवंकदंबमुकुलन्यायआदिपदाद्ग्राह्यः प्रदेशेप्रदेशसंबंधार्थंपरमप्रकृतमुपसंहरति
॥तदेवमिति॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तविरचिता
यांवेदान्तपरिभाषार्थदीपिकायांप्रत्यक्षपरिच्छेदःसमाप्तः॥ ॥श्रीगणाधीशायनमः॥ एवंसर्ववादिसंमतंज्येष्ठंप्रत्यक्षप्रमाणंप्रथमंनिरूप्यबहु
वादिसंमतत्वात्तदनंतरं अनुमाननिरूपणंप्रतिजानीतेअथेति अनुमीयतेअनेनेत्यनुमानंअनुमितिकारणमिति· व्युत्पन्नमनुमानपदंलक्षणम्

प्रदेशेऽनंतशब्दोत्पत्तिकल्पनागौरवम् भेरीशब्दोमयाश्रुतइतिप्रत्यक्षस्यभ्रमत्वकल्पनागौरवंचस्यात् तदेवंव्याख्यातंप्रत्य
क्षम्॥इतिप्रत्यक्षंप्रमाणम्॥ ॥श्रीगणाधीशायनमः॥अथानुमानंनिरूप्यतेअनुमितिकरणमनुमानं॥अनुमितिश्चव्या
प्तिज्ञानत्वेनव्याप्तिज्ञानजन्या॥१॥ अनुत्पन्नंलक्ष्यमित्याशयेनानुमानंलक्षयतिअनुमितीतिअनुमानलक्षणघटकानुमितेर्लक्षणमाहअ
नुमितिश्चेति व्याप्तिज्ञानत्वेननतुविषयत्वादिनाव्याप्तिश्चवक्ष्यमाणातज्ज्ञानंचव्यभिचारज्ञानविरोधिज्ञानमिति वक्ष्यति नन्वत्रव्याप्तिपदंव्यभिचार
ज्ञानविरोधिपरंनतुग्रंथकृदभिमतव्याप्तिपरंतेनतज्जनकेऽत्यंताभावगर्भसाध्याभाववदवृत्तित्वादिरूपव्याप्तिज्ञानेऽन्योन्याभावगर्भसाध्यवत्प्रति
योगिकान्योन्याभावासामानाधिकरण्यादिरूपव्याप्तिज्ञानंचकारणतावच्छेदक — त्वादनुमितिर्भवतिइदानींतुनस्यादितिचेन्न अत्यन्ताभावा
दिगर्भव्याप्तिज्ञानस्यापिव्यभिचारज्ञानविरोधिज्ञानएवपर्यवसानात्वस्तुतोव्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वस्यवक्ष्यमाणत्वाच्चतादृशा
वच्छेदकाविवक्षायाःफलमावेदयति·व्याप्तिज्ञानेति·त्वत्वेनव्याप्तिज्ञानत्वेन· आदिपदंतज्जन्यस्मृतिशाब्दज्ञानादिसंग्रहार्थं· ॥अनुव्यवसाय
स्मृतिशाब्दज्ञानादिष्वविषयत्वस्यसमानविषयानुभवत्वपदार्थज्ञानत्वादिनाहेतुत्वान्नत्वेनाहेतुत्वमित्यर्थः॥ ७ ॥ ६ ॥ ७ ॥

अनुमिति·पं·५॥ ॥व्याप्तिज्ञानत्वरूपस्यावच्छेदकस्यसत्वात्·॥पं·४॥

ननुव्याप्तिज्ञानस्यकिमनुमितिजनकत्वमात्रमुततत्करणत्वमित्यपेक्षायामाह·अनुमितिकरणंचेति·एतेनव्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यंज्ञानमनुमितिः·तत्करणमनुमानंतच्चलिंगपरामर्शइतियदुक्तम्व्याप्तिज्ञानस्यैवतत्करणत्वसंभवेतदतिरिक्तपरामर्शांगीकारस्यानौचित्यात्· नाप्यनुमितौलिंगंकरणमयोग्यलिंगकानुमितौपरामर्शस्यव्यापारत्वासंभवेनतत्करणत्वासंभवतयाव्यभिचारात् तस्मादनुमितिकरणत्वाद्व्याप्तिज्ञानमेवानुमानशब्दाभिधेयंनतुलिंगतत्परामर्शौवितिभावः॥ननुव्याप्तिज्ञानस्यकारणत्वेतद्व्यापारोवक्तव्यःव्यापारवदसाधारणकारणस्यकरणत्वादित्यपेक्षायामाह·तत्संस्कारइति·व्याप्तिज्ञानसंस्कारइत्यर्थः ननुमहानसादौधूमादिज्ञानंप्रथमंपक्षेततोद्वितीयंततोव्याप्तिंस्मृत्वापक्षेधूमादिपरामर्शात्मकंतृतीयंततोवह्न्याद्यनुमितिरितितृतीयलिंगपरामर्शात्मकज्ञानमनुमितिकरणमितिवदंतिनैयायिकाःअतोभवद्भिरपितथैवकिमिति· नाभ्युपगम्यतेइत्याशं।

व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेनतज्जन्यत्वाभावान्नानुमितित्वं·अनुमितिकरणंचव्याप्तिज्ञानं॥तत्संस्कारोऽवांतरव्यापारःनतुतृतीयलिंगपरामर्शोऽनुमितौकरणंतस्यानुमितिहेतुत्वासिद्ध्यातत्करणत्वस्यदूरनिरस्तत्वात्संस्कारजन्यत्वेनानुमिति·स्मृतित्वापत्तिःस्मृतिप्रागभावजन्यत्वस्यसंस्कारमात्रजन्यत्वस्यवास्मृतित्वप्रयोजकतयासंस्कारध्वंससाधारणसंस्कारज

क्याह नतुतृतीयेति व्याप्तिविशिष्टपक्षधर्म्मताज्ञानंपरामर्शःप्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यंताभावप्रतियोगि ((न्यत्वस्यप्रयोजतावच्छेदकावच्छिन्नंयन्नभवति· तेनसमंतस्यसामानाधिकरण्यंव्याप्तिव्याप्यस्यपक्षवृत्तित्वंपक्षधर्म्मता·तथाचवह्निव्याप्यधूमवानयमित्यादिज्ञानमुक्तलक्षणपरामर्शात्मकंतत्तुनानुमितिकरणमित्यर्थःतत्रहेतुमाह·तस्यानुमितीति·पक्षधर्म्मताज्ञानद्वारोद्बुद्धेसंस्कारेव्याप्तिज्ञानस्यान्वयव्यतिरेकाभ्यामनुमिति·जनकत्वाभ्युपगमस्यावश्यकतयातद्रहितस्यपरामर्शस्यतद्धेतुत्वासिद्ध्यातत्करणत्वस्यदूरनिरस्यत्वमित्यर्थःउपलक्षणमिदंअनुमितिकरणंलिंगंतत्परामर्शोवांतरव्यापारइतिवैशेषिकामन्वतेःतन्नसाधुविनष्टस्यानागतस्यचलिंगस्यतदानीमभावेनततोऽनुमित्यनापत्तेरित्यपिद्रष्टव्यम् ननुसंस्कारजन्यंज्ञानंहिस्मृतिरितिस्मृतिलक्षणंतस्यचानुमित्यावप्यनुगमात्· तस्यापिस्मृतित्वापत्तिरित्याशंक्यपरिहरतिनचे

धूम·पं·६॥प्रतियोगितावच्छेदकंघटत्वादिकंतदव॰ च्छिन्नंघटादिकंतद्भिन्नंवह्निरूपंसाध्यम्·पं·६॥वह्निनासमं·पं·५॥धूमस्य·पं·५॥अन्वयव्यतिरेकरहितस्य·पं·३॥

॥अनुमित्यात्मकज्ञानस्यापि·॥टि·पं·१॥

तत्रहेतुमाह स्मृतीति· नन्वेवंतर्हि· नतत्प्रागभावजन्यत्वरूपप्रयोजकस्य सर्वत्रसुलभात्॥ तत्र तत्रप्रयोजकांतराभ्युपगमोनर्थकः स्यादित्यरुचेः प
क्षांतरमाह· संस्कारमात्रेति· ननु व्याप्तिस्मरणादनुमितिस्थले संस्कारजन्यत्वं व्यभिचरितं व्याप्तिस्मृत्या संस्कारनाशादित्याशंकापरिहरति· नचेति·
व्याप्तिस्मृतिजन्यानुमितिस्थलेपि संस्कारनाशानभ्युपगमेन व्यभिचाराभावादित्याह व्याप्तिस्मृतीति· स्मृतिधारादर्शनात्स्मृतेः संस्कारनाशकत्वनि
यमोनास्तीत्याह· नहीति· ननु संस्कारस्यैवानुमितिहेतुत्वेनुद्बुद्धादपि तस्मादनुमितिप्रसंग इत्याशंकापरिहरति· नचेति· तदुद्बोधस्य पक्षधर्म्मताज्ञान
जन्यस्य संस्कारोद्बोधस्य फलितमाह· एवंचेति· व्याप्तिज्ञानस्य करणत्वे व्याप्तिज्ञानसंस्कारस्य तद्व्यापारत्वे पक्षधर्म्मताज्ञानजन्यसंस्कारोद्बोधस्य सह

जनितः·३

नचयत्रव्याप्तिस्मरणादनुमितिस्तत्रकथं संस्कारोहेतुरितिवाच्यम् व्याप्तिस्मृतिस्थलेपितत्संस्कारस्यैवानुमितिहेतु
त्वात् नहिस्मृतेः संस्कारनाशकत्वनियमः स्मृतिधारादर्शनात् नचानुद्बुद्धसंस्कारादप्यनुमित्यापत्तिः तदुद्बोधस्यापि सहका
रित्वात्· एवंचायंधूमवानितिपक्षधर्मताज्ञानेन धूमोवह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधेचसति वह्निमानित्यनुमितिर्भ
वति· ननु मध्ये व्याप्तिस्मरणं तज्जन्यवह्निव्याप्यधूमवानित्यादिविशेषणविशिष्टज्ञानंवाहेतुत्वेनकल्पनीयं गौरवात् मा॰।
भावाच्च तत्रव्याप्तिज्ञानंवह्निविषयकज्ञानांश एवकरणं नतुपर्वतविषयकज्ञानांश इति· पर्वतोवह्निमानितिज्ञानस्य वह्न्यंश
एवानुमितित्वंनपर्वताद्यंशे तदंशेप्रत्यक्षत्वस्योपपादितत्वात्· व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरू चि

कारित्वे च सिद्धे सति पर्वतोवह्निमानित्येकमेवज्ञानमनुमित्यात्मकमिति येऽभिमन्यंते तेनानिराकर्तुमाह तच्चेति· सन्निकृष्टपक्षकानुमितिस्थले ज्ञा
नद्वयस्योपपादितत्वादित्याह पर्वतइतिपर्वतंपश्यामिवह्निमनुमिनोमीत्यनुभवबलाज्ज्ञानद्वयस्यावश्यकतयाजानिकोपाधित्वपरिभाषायाश्च
प्रामाणिकत्वात्· ज्ञानस्यांशभेदेनपरोक्षत्वापरोक्षत्वयोरुपपादितत्वादित्यर्थः· नन्वनुमितिकरणव्याप्तिज्ञानेंकाव्याप्तिरित्यपेक्षायां व्याप्ति
स्वरूपमाह· व्याप्तिश्चेति अशेषंतत्तत्साधनंचतस्याश्रयस्तदाश्रितयत्साध्यंतेनसमंहेतोःसामानाधिकरण्यरूपंयस्याःसा साधनतावच्छेद
कावच्छिन्नसाधनाश्रयाश्रितसाध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकर॥ मीलते·३पं·

ण्यरूपेति यावत् एवं च यत्किंचिद्द्रव्यादिसाधनाश्रयाश्रितयत्किंचिद्धूमादिसाध्यसमानाधिकरण्यमादाय पर्वतो धूमवान् वह्नेरित्याद्यसद्धेतौ नातिप्रसंगः ॥ नन्वेवंभूता व्याप्तिः केन गृह्यते न तावत्तर्केण व्याप्यारोपेण व्यापकारोपरूपस्य तस्य व्याप्त्यधीनत्वात् नापि सहचारदर्शनेन सकृद्दर्शने भूयोदर्शने च तस्मिन्क्वचिद्व्यभिचारोपलंभादित्याशंक्याह साचेति· तच्च सकृद्दर्शनं भूयोदर्शनं वा इत्यपेक्षायामाह तच्चेति गृहीतसहचारस्य व्याप्तिग्रहदर्शनादगृहीतसहचारस्य व्याप्तिग्रहदर्शनाच्चेत्यन्वयव्यतिरेकाभ्यां सहचारदर्शनस्य· हेतुत्वसिद्धा लाघवात् तस्यैव प्रयोजकत्वं न तु तद्विशेषस्येत्याह· सहचारेति ए। व्याप्तिज्ञानस्यानुमितिकरणत्वेनानुमानत्वं प्रसाध्येदानीमनुमानत्रैविध्यमपि· नैयायिकादिवदस्मन्मते नास्तीत्याशयेनाह· तच्चानुमानमिति· ननु केवलान्वयिकेवलव्यतिरेकान्वयव्यतिरेकिभेदात्त्रिविधमित्यर्थः॥ अन्वयिरूपं अन्वयमुखव्याप्तिज्ञानरूपं न तु परोक्तभेदानां जागरूकत्वे कथमनुमानस्यैकरूप।

सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते तच्च सहचारदर्शनं भूयोदर्शनं सकृद्दर्शनं वेति विशेषो नादरणीयः सहचारदर्शनस्यैव प्रयोजकत्वात्तच्चानुमानमन्वयिरूपमेकमेव न तु केवलान्वयि सर्वस्यापि धर्मस्यास्मन्मते· ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेनात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेर्नाप्यनुमानस्य व्यतिरेकिरूपत्वं· साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात्· कथं तर्हि· धूमादावन्वयव्याप्तिमविदुषापि व्यतिरेकव्याप्तिज्ञाना ॥ मूलं ॥

त्वमित्याशंक्याद्यभेदं निराचष्टे न त्विति तदत्यंताभावाप्रतियोगिसाध्यकम् न चास्मन्मते ब्रह्मातिरिक्तं किंचिदप्यत्यंताभावाप्रतियोगि नेह नानास्ति किंचनेत्यादिश्रुत्या सर्वस्यापि ब्रह्मनिष्ठात्यंताभावप्रतियोगित्वावधारणादिति तथाभूतकेवलान्वयित्वस्यासिद्धेरित्याह सर्वस्यापीति एवं प्रथमभेदं निराकृत्य केवलव्यतिरेकिरूपद्वितीयभेदं निराचष्टे नाप्यनुमानस्येति· व्यतिरेकिरूपत्वं केवलव्यतिरेकिरूपत्वं साधनेन हि साध्यमनुमीयते· तत्र च साध्यसाधनयोर्व्याप्तिज्ञानमुपयुज्यते न तु साध्याभावसाधनाभावयोरित्याह साध्याभावेति तथा च पृथिवी इतरेभ्यो भिद्यते गंधवत्वात् यदितरेभ्यो न भिद्यते न तद्गंधवद्यथा जलादीत्याद्युदाहरणानि त्वर्थापत्तेर्गंधवत्वस्येतरभेदोपपादकत्वादिति भावः नन्वन्वयव्याप्तिज्ञानरहितस्य व्यतिरेकव्याप्तिज्ञानादनुमितिर्भवति

यत्रविरोधिवृत्तिमदत्यंताभावनामघटात्यंताभाववर्त्तते तत्रैवाप्रतियोगित्वेनअभिधेयत्वप्रमेयत्वोभवतः॥टि·पं·४॥ एकदेशिवेदान्तिशंक्यते·॥टि·पं·४ ॥घट·॥टि·पं·४

भवन्मतेसाकथमुपपद्यतेइतिशंकते·कथंतर्हीति·तस्यार्थापत्तिप्रमाणाद्वह्न्यादिज्ञानंनत्वनुमानादतोनोक्तदोषइत्याह·अर्थापत्तीति·वक्ष्यमाणरीत्या अर्थापत्तिप्रमाणस्यावश्यकतयाव्यतिरेकानुमानस्यतदंतर्भावसंभवेतत्पृथक्त्वस्याभ्युपगमोनयुक्तइतिभावः·तृतीयभेदंनिराकरोति·अतएवेतियतो व्यतिरेकव्याप्तिज्ञानस्यनानुमितिजनकत्वमतएवेत्यर्थः·अन्वयव्यतिरेकिरूपत्वन्वयव्याप्तिज्ञानस्यैवानुमितिजनकत्वेव्यतिरेकव्याप्तिज्ञानस्यतज्जनकत्वाभ्युपगमस्यैवैयर्थ्यादित्याहव्यतिरेकेति·अत्रकेचित्·स्ववृत्तिविरोधिवृत्तिमदत्यंताभावाप्रतियोगित्वम्·साध्यस्यकेवलान्वयित्वंतत्साधकत्वंकेवलान्वयिलिंगलक्षणंप्रमेयत्वादेश्चस्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यंताभावप्रतियोगित्वेपिस्ववृत्तिविरोधिवृत्तिमदत्यंताभावाप्रतियोगित्वात्केवलान्वयित्वंनचश्रुतिविरोधःशंक्यस्तस्याअपिपारमार्थिकत्वावच्छिन्नद्वैताभावपरत्वात् तदुक्तंविवरणेआगमेनचाद्वैतस्यतत्त्वांशाबाधादिति॥ नचलक्षणेस्ववृत्तिविरोधीति·व्यर्थंतस्याव्याप्यवृत्तिकपिसंयोगात्यंताभावादिसंग्रहार्थत्वात्·नचब्रह्मणःस्वप्रकाशत्वेनतत्रस्वरूपेणापि·प्रमेयत्वाभावात्कथंकेवलान्वयित्वमितिवाच्यम्·ब्रह्मणोपिवृत्तिलक्षणप्रमाविषयत्वात्·नचैतावतास्वप्रकाशत्वविरोधःअनुपहितस्यैवतथात्वात्·नचैवमपिनाभिधे

अर्थापत्तिप्रमाणादितिवक्ष्यामः अतएवानुमानस्यनान्वयव्यतिरेकिरूपत्वं· व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात्॥६॥

यत्वकेवलान्वयिब्रह्मणोनभिधेयत्वादितिवाच्यम्·ब्रह्मणोलक्ष्यतयावाच्यत्वाभावेपिपदजन्यज्ञानविषयत्वाद्वाच्यत्वस्यापिग्रंथकृतावक्ष्यमाणत्वाच्च। नचैवंप्रमेयत्वादिविरोधिवृत्तिमदत्यंताभावास्याप्रसिद्धत्वात्तत्रलक्षणाव्याप्तिः·स्ववृत्ति·विरोधिवृत्तिमदत्यंताभावप्रतियोगिनोघटादयःप्रसिद्धास्तदन्यत्वस्यप्रमेयत्वादावपिसत्वात्·एवंधूमादावन्वयव्याप्तिमविदुषोपिव्यतिरेकव्याप्तिज्ञानाद्वह्निज्ञानमित्यविवादम्।नचानुमीतिरेववह्निमनुमिनोमीत्यनुव्यवसायात्·नचक्लृप्तकारणव्याप्तिज्ञानस्याभावात् कथमनुमितिरित्युक्तमितिवाच्यम्·व्यतिरेकव्याप्तिज्ञानस्यसत्वात्।नचैतदनुमित्यकरणमितिवाच्यम्·स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वेनव्याप्तिज्ञानस्यानुमितिहेतुत्वात्·अस्यचव्यतिरेकव्याप्तिज्ञानसाधारणत्वात्·नन्वेवमनुमानस्यव्यतिरेकितयापिप्रामाण्याभ्युपगमेतत्रैवार्थापत्तेरंतर्भावापत्तौसापृथक्प्रमाणमितिराद्धांतोभज्येतेतिचेत्तर्ह्यनुमानस्यप्रामाण्येसंशयात्तदुत्तरप्रत्यक्षस्थलेचक्षुरादेःप्रामाण्यंनस्यात्तत्रानुमितिसामग्रीसत्त्वेनानुमितेरेवोत्पत्तेः तथाशाब्दस्थलेपिशाब्दोनप्रमाणंस्यात्॥ स्वपदेनप्रमेयत्वंयद्वाभिधेयत्वंगृह्यते

स्वात्यंताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वम्॥टि·पं·१०॥इतराप्रकाशत्वेसतिप्रकाशत्वंस्वप्रकाशत्वन्तेनस्वप्रकाशत्वेन॥पं·१०॥धूम·॥पं·३॥नन्वित्यनेनमुख्यवेदान्तिशंकी

((इत्यन्वयव्याप्तिस्फुरणमित्यर्थः॥टी·पं·

वे·प·
टी·टी·
२५

यत्रधूमस्तत्राग्निरित्यन्वयसहचारेणवह्निव्याप्योधूमइत्यन्वयव्याप्तिस्फुरणमित्यर्थः॥यत्रवह्निर्नास्तितत्रधूमोपिनास्तीतिव्यतिरेकसहचारेणवह्निव्याप्योधूम
एतेपदार्थास्तात्पर्यविषयपरस्परसंसर्गवंतः आकांक्षादिमत्पदकदम्बस्मारितत्वादित्यनुमानेनैव[illegible]प्रमाणभावेनतात्पर्यविषयसंसर्गप्रतीतेःसंभवात्यदिस्या
णंसाक्षात्करोमिशब्दादस्यमर्थंजानामीत्यनुव्यवसायात्प्रत्यक्षशब्दयोःपृथक्प्रामाण्यंतदाव्यतिरेकव्याप्तिज्ञानादिघटिकायामनुमितिसामग्र्यांसत्यामपिवह्निं
ज्ञानानंतरंधूमेनवह्निंकल्पयामीतियदानुव्यवसायःतदाधूमस्यार्थापत्तिविधयाप्रामाण्यमितितुल्यं·यद्वानिरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेवगृह्यते·
इतिव्यतिरेकिण्यप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुःनचैवंसत्यन्वयव्यतिरेकिणोर्भेदोनस्यादितिवाच्यम्·व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीर्यत्रा
नुमितिहेतुःसव्यतिरेकीतियत्रान्वयसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीरनुमितिहेतुःसोन्वयीयत्रोभयसहचारज्ञानजन्यान्वयव्याप्तिधीरनुमितिहेतुःसोन्व
यव्यतिरेकीतिविभागोपपत्तेःअस्मिंश्चपक्षेयदान्वयसहचारेणैवान्वयव्याप्तिस्फुरणंतदाधूमस्यकेवलान्वयितयागमकत्वम्यदाव्यतिरेकसहचारेणैवान्वयव्या
प्तिस्फुरणम्· तदाकेवलव्यतिरेकितयायदान्वयव्यतिरेकसहचारेणान्वयव्याप्तिस्फुरणंतदान्वयव्यतिरेकितयायदाव्यतिरेकसहचारेणव्यतिरेकव्याप्तेरेवज्ञा
नंतदार्थापत्तिविधयाधूमस्यप्रामाण्यं·नचव्यतिरेकानुमानस्यपृथक्प्रमाणत्वेऽप सिद्धांतःमूलग्रंथेशुक्तिरूप्यमिथ्यात्वादौतत्रतत्रव्यतिरेकानुमानस्या
पिप्रमाणत्वेनोपन्यासात्तस्मात्त्रिविधमेवानुमानमितियुक्तमितिवदंति·तत्रेदंवक्तव्यम्॰नतावदौपनिषदमतेऽनुमानस्यकेवलान्वयित्वंसंभवति·सर्व
स्यापिप्रपंचस्यब्रह्मनिष्ठात्यंताभावप्रतियोगित्वाभिधानात् ब्रह्मणिप्रपंचात्यन्ताभावोव्यावहारिकइतिपक्षेस्य इतिविरोधिवृत्तिमदत्यंताभावप्रतियो
गित्वंप्रमेयत्वादेरायातिनतुतदप्रतियोगित्वं·नन्वेवंतर्हिनिषेधस्यबाध्यत्वेनपारमार्थिकसत्त्वाविरोधित्वादर्थांतरमितिचेन्न॥स्वाप्नार्थस्यस्वाप्ननिषे
धेनबाध्येनापिबाधदर्शनात्· नचनिषेधस्यबाध्यत्वंपारमार्थिकसत्त्वाविरोधित्वेतंत्रंकिंतुनिषेध्यापेक्षयान्यूनसत्ताकत्वंप्रकृतेचतुल्यसत्ताकत्वाद्वि
रोधित्वमविरुद्धंतत्रहिनिषेधस्यनिषेधेप्रतियोगिसत्त्वमायातियत्रनिषेधस्यनिषेधबुद्ध्याप्रतियोगिसत्त्वं॰॥व्यवस्थाप्यतेनिषेधमात्रंतुनिषेध्य
तियथारजतेनेदंरजतमितिप्रतीत्यनंतरमिदंनारजतमितिज्ञानेनरजतंव्यवस्थाप्यतेतन्निषेधमात्रंतुनिषिध्यतेयत्रतुप्रतियोगिनिषेधयोरु
भयोरपिनिषेधस्तत्रनपंक्तिप्रतियोगिसत्त्वम्॥यथाध्वंससमयेप्रागभावप्रतियोगिनोरुभयोर्निषेधःतथाचप्रकृतेपिनिषेधस्यबाध्यत्वेपिप्रपं
चस्यनतात्त्विकत्वंनिषेधबाधकेनप्रतियोगिनःप्रपंचस्यतन्निषेधस्यचबाधनात् उभयोरपिनिषेध्यतावच्छेदकस्यदृश्यत्वादेस्तुल्यत्वात्नचातात्त्वि

॥निरुक्तोभयसहचारेणनिरुक्तान्वयव्याप्तिस्फुरणंयदातदान्वयव्यतिरेकीतिभावः॥टी· तयागमकत्वं॥पं· ((क्तनिषेधबोधकत्वाच्छ्रुतेरप्रामाण्यंपरं॥

24

१)वैग्रस्यपदर्शीत्यर्थः॥पं·१०

सुषुप्तिश्चात्रानुभवः॥पं·७॥ अविचारविलसितमित्यर्थः॥ अनुपदंवक्ष्यमाणहेतुना॥पं· ॥बोधशब्देनबौद्धाःप्रत्ययाउच्यंते· सर्वेप्रत्ययाविषयाभवंति:॥यस्यतत्तथास

कंब्रह्मभिन्नस्यतात्त्विकत्वंबोधयतःशास्त्रस्याप्रामाण्यायोगात् एतन्निषेधप्रतियोगित्वंचस्वरूपेणैवनतुसद्विलक्षणंस्वरूपानुपमर्दिनपारमार्थि
कत्वाकारेणस्वरूपेणत्रैकालिकनिषेधप्रतियोगित्वस्यप्रपंचेशुक्तिरजतादौचाभ्युपगमात्·रजतभ्रमानंतरमधिष्ठानसाक्षात्कारेरजतस्यरजतंनास्ति
नासीत् नभविष्यतीतिस्वरूपेणैवनेहनानेतिश्रुत्याचप्रपंचस्यस्वरूपेणैवनिषेधप्रतीतेः॥नचतत्रलौकिकपारमार्थिकरजतमेवस्वरूपेणनिषेधप्र
तियोगीतिवाच्यम्· भ्रमबाधयोर्वैयधिकरण्यापत्तेःअप्रसक्तप्रतिषेधापत्तेश्च॥नचैवंविवरणाचार्यवाक्यविरोधइतिवाच्यम्·तस्यपक्षांतरपरत्वात्।अ
न्यथाःबाध्यत्वरूपपारमार्थिकत्वस्यबाध्यत्वरूपमिथ्यात्वनिरूप्यत्वेनान्योन्याश्रयापातात्· किंचनात्ररजतमितिप्रतीतौयथारजतस्यस्वरूपेणपार
मार्थिकत्वेनचनिषेधोविषयस्तथानेहनानास्तिकिंचनेत्यत्रापिप्रपंचस्यस्वरूपेणपारमार्थिकत्वेनचनिषेधोविषयभिन्नविभक्तयंतोपस्थापितेधर्मि
णिप्रतियोगिनिचनञःसंसर्गाभावबोधकत्वनियमस्यसुषुप्तिसिद्धत्वात्· अस्तुवापारमार्थिकत्वाकारेणैवनिषेधस्तथापिप्रमेयत्वादिब्रह्मरूपधर्मि।

तच्चानुमानंस्वार्थपरार्थभेदेनद्विविधम्· तत्रस्वार्थन्तूक्तमेवपरार्थन्तुन्यायसाध्यं·॥ ६ ॥

न्यूनसत्ताकत्वेकथंकेवलान्वयित्वंतत्त्वेचसमसत्ताकत्वावश्यंभावात्·कथंबाध्यत्वंतस्माद्ब्रह्मातिरिक्तंसर्वंमिथ्येतिवादिनःकेषांचिद्धर्माणांकेव
लान्वयित्वकथनंकेवलसाहसविजृंभितं· एतेनब्रह्मणिअभिधेयत्वस्थापनमपिनिरस्तम्·॥यद्वाचानभ्युदितंयेनवागभ्युद्यते· तदेवब्रह्मत्वंवि
द्धिअविज्ञातंविजानतांप्रतिबोधविदितंमतमित्यादिश्रुत्याब्रह्मणिवाच्यत्वादेर्निषिद्धत्वात्॥नचग्रंथकृतातत्रवाच्यत्वंवक्ष्यमाणमितिभ्रमितव्यं
लक्षणांविनाशक्त्यापिमहावाक्येनाखंडार्थोबोधयितुंशक्यते·इत्येतस्योत्तरग्रंथस्यब्रह्मणिवाच्यत्वमस्तीत्येतत्कथनपरत्वाभावात्॥यदपिव्यतिरे
क्यनुमानोपपादनंतदप्यसंगतम्·अर्थापत्तिवादिनांतदावश्यकत्वेतद्वादिनामर्थापत्तेरावश्यकत्वापत्तेः यत्तुप्रत्यक्षशब्दयोर्यथापृथक् प्रामाण्यंतथा
र्थापत्तेरपीत्यादितदपिनव्यतिरेकव्याप्तेरेवार्थापत्तेः॥प्रमाणत्वेनद्वयोःसामग्रीभेदाभावेनवैषम्यात्·तथाचव्यतिरेकव्याप्तिज्ञानेयत्रवह्न्यादिज्ञानंत
त्रवह्निंकल्पयामीत्याकारकानुव्यवसायोपलंभात्· तत्करणमर्थापत्तिरेवनत्वनुमानंतस्यानुमित्यहेतुत्वात्·यत्तुव्यतिरेकसहचारमात्रं·ज्ञान

सतीतिशेषः॥पं·६॥ व्यतिरेक्यनुमानवादिनांअर्थापत्तिव्यतिरेक्यनुमानयोः॥पं·३॥ व्यतिरेकव्याप्तेः॥पं·३॥ ७ ॥१)जन्यान्वयव्याप्तिधीर्यत्रानुमितिहेतुःसम

मेक  तस्मानुमानस्य।।पं·२।।

तिरेकीत्यादितदपिनअन्वयसहचारदर्शनस्यान्वयव्याप्तिज्ञानजनकतायाःव्यतिरेकसहचारदर्शनस्यव्यतिरेकव्याप्तिज्ञानजनकतायाःसर्वे
लोकानुभवसिद्धत्वान्नहिरुद्धकार्यकारणभावव णेनानौचित्यात् तथाचनास्त्यर्थापत्तिर्व्यतिरिक्तंव्यतिरेक्यनुमानएतेनतैस्यान्वयव्यतिरेकिरू
पत्वमपिप्रत्युक्तम्·तस्मादनुमानमन्वयिरूप्यमेवेति·सुष्ठूक्तंमूलकृद्भिरन्यथापसिद्धांतापातः सांप्रदायिकग्रंथेषुकेवलान्वयिकेवलव्य
तिरेक्यन्वयव्यतिरेक्यनुमानानांक्वाप्यनुपन्यासात्क्वचित्प्रयोगस्तुपरमतानुसारेणद्रष्टव्यइत्यास्तांतावत्।।अथोक्तानुमानस्यप्रकारांतरेणद्वैवि
ध्यमाह·।।तच्चेति·तत्रद्विविधेस्वार्थस्वविवादगोचरार्थसाधकंउक्त मेवव्यभिचारादर्शनेसतिसहचारदर्शनेनगृह्यतइत्युक्तातायानिरुक्तव्याप्तेर्ज्ञा
नमेवपरार्थंपरविवादविषयार्थसाधकंन्यायसाध्यंन्यायप्रयोज्यंन्यायशब्दार्थमाह·न्यायोनामेति·वक्ष्यमाणावयवघटितवाक्यं·अवयवसमुदायः।
तथाचानुमानप्रयोजकवाक्यार्थज्ञानजनकवाक्यत्वंन्यायत्वंतादृशन्यायजन्यज्ञानप्रयोज्यंव्याप्तिज्ञानंपरार्थानुमानमित्यर्थः·अवयवाश्चक

न्यायोनामावयवसमुदायः अवयवाश्चत्रयएवप्रसिद्धाःप्रतिज्ञाहेतूदाहरणरूपाःउदाहरणोपनयनिगमनरूपावानतुपंचावयव
रूपाः अवयवत्रयेणैवव्याप्तिपक्षधर्म्मतयोरुपदर्शनंसंभवेनाधिकावयवद्वयस्यव्यर्थत्वात् एवमनुमाने निरूपिते· ((तीत्यपेक्षाया

माह अवयवाश्चेति।।साध्यतावच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वेसतिप्रकृतपक्षेप्रकृतसाध्यबोधकजनकमहा
वाक्यैकदेशत्वम्·प्रतिज्ञावयवत्वम्·।।यथापर्वतोवन्हिमानित्यादिःसाध्यतावच्छेदकावच्छिन्नसाध्यान्वितस्वार्थकतादृशैकदेशत्वंहेत्ववयवत्वं
यथाधूमादित्यादिःसाधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोक्तावयवत्वमुदाहरणावयवत्वंयथायोयोधूमवान्ससोग्निमान्यथामहानसइत्यादिप्र
कृतोदाहरणोपदर्शितव्याप्तिविशिष्टपक्षबोधजनकन्यायैकदेशत्वमुपनयावयवत्वंयथावह्निव्याप्यधूमवांश्चायंतथाचायमितिव्याप्तिविशिष्टप
क्षधर्मेहेतुज्ञाप्यसाध्यविशिष्टपक्षबोधकन्यायैकदेशत्वंतादृशसाध्यबोधकन्यायैकदेशत्वंवानिगमनावयवत्वंयथातस्मादग्निमानित्यादि
नतुप्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाःपंचावयवाइतिवदतांनैयायिकानांपक्षमनादृत्याध्वरमीमांसकानांपक्षाभ्युपगमेकोहेतुरित्यत

पंचम्याज्ञाप्यत्वंधूमज्ञानजन्यज्ञानविषयः।।पं·४।।  हेतुवाक्यार्थकम्।।पं·५।। ((आहअवयवत्रयेणैवेति·तथाच·

25

प्रथमपक्षेउपनयनिगमनकृत्यंहेतुप्रतिज्ञाभ्यांद्वितीयपक्षेहेतुप्रतिज्ञाकृत्यंताभ्यांकर्तुंशक्यमनुमित्युपयोगिज्ञानंचसर्वावयवकृत्यमितिभावःनिरू
पितानुमानस्यप्रकृतेउपयोगमाह· एवमिति·तस्मादनुमानात्कीदृशतदनुमानमित्यपेक्षायामाह·तथाहीति·पूर्वोक्तपक्षद्वयेप्रथमपक्षोऽस्मत्संमतइ
तिद्योतयितुंप्रतिज्ञाद्यवयवत्रयात्मकंवाक्यमाह॥ब्रह्मेति·शुक्तिरूप्यादौसिद्धसाधनवारणायसर्वमिति· ब्रह्मणिबाधनिरासायब्रह्मभिन्नमिति·र
ज्जुसर्प्यादौसाध्यसिद्धावपिनसिद्धसाधनपक्षतावच्छेदकनानात्वाभावात्पक्षतावच्छेदकनानात्वएवतदभ्युपगमात्तएवानित्येवाङ्मनसेद्रव्य
त्रअंशतस्सिद्धसाधनस्यपरैरप्यङ्गीकृतत्वात् नचसिद्धोपदृष्टांतः तन्मिथ्यात्वेप्रमाणाभावात् अनुमानांतरस्यतत्रप्रमाणत्वेऽनवस्थापातादित्याशंक्यप
रिहरति· तस्यदृष्टांतस्यसाधितत्वात्· प्रत्यक्षपरिच्छेदेसाधितत्वात्· नन्विदमनुमानमप्रयोजकंसत्यत्वेपिब्रह्मभिन्नत्वोपपत्तेरित्याशंक्यपरिहरति·

तस्माद्ब्रह्मभिन्ननिखिलप्रपंचस्यमिथ्यात्वसिद्धिः तथाहि· ब्रह्मभिन्नं सर्वंमिथ्याब्रह्मभिन्नत्वाद्यदेवंतदेवंयथाशुक्तिरू
प्य· नचदृष्टांतासिद्धिः तस्यसाधित्वात्· नचाप्रयोजकत्वंशुक्तिरूप्यरज्जुसर्प्यादीनांमिथ्यात्वेब्रह्मभिन्नत्वस्यैवलाघवेनप्रयो
जकत्वात्·॥मिथ्यात्वंचस्वाश्रयत्वेनाभिमतयावन्निष्ठात्यंताभावप्रतियोगित्वं अभिमतपदंवस्तुतःस्वाश्रयाप्रसिद्ध्या असंभ
ववारणाययावत्पदमर्थांतरवारणायतदुक्तं सर्वेषामेवभावानांस्वाश्रयत्वेनसम्मते॥१ नचेति।शुक्तिरजतादिनामिथ्यात्वेनावि

द्यातिरिक्तदोषजन्यत्वंप्रयोजकमपितुब्रह्मभिन्नत्वंलाघवात्· तथाचलाघवरूपानुकूलतर्कसत्वान्नाप्रयोजकत्वमितिभावःननुशुक्तिरूप्यादौ
किंलक्षणंमिथ्यात्वंप्रत्यक्षसिद्धंयदनुमानेनप्रपंचेसाध्यतइत्यपेक्षायांमिथ्यात्वलक्षणमाहमिथ्यात्वंचेति·स्वाश्रयत्वेनाभिमतेयावतिनिष्ठितोऽत्यं
ताभावस्तत्प्रतियोगित्वम् ननुस्वाश्रययावन्निष्ठात्यंताभावप्रतियोगित्वमित्येतावदेवास्त्वित्याशंक्याह अभिमतेति· यावतिस्वाश्रयेस्वात्यंताभावा
संभवस्तद्वारणायतदावश्यकम् तथाचवस्तुतोऽस्वाश्रयेपिशुक्त्यादौस्वाश्रयत्वेनाभिमतेवर्तमानोयोत्यंताभावस्तत्प्रतियोगित्वंशुक्तिरूप्यादे
॥रस्तीतितत्सार्थक्यमितिभावः ननुएतावतैवनिर्वाहेयावत्पदव्यर्थमित्यतआह यावदिति· तथाच्चयावत्पदा·॥

धर्म्मीनवच्छिन्नेति·॥

तंतुषु पटत्वावच्छिन्नपटोवर्त्ततेघटत्वावच्छिन्नपटस्यात्यंताभावोऽस्तितस्मिन्पटएकेसामानाधिकरण्यंसिद्धेसत्वितद्वत्रसाध्येनैवगाह्यम् किं ग्राह्यमस्तितदेवकथयति अधिकरण
भावेकपिसंयोगाश्रयत्वेनाभिमते· वृक्षमूलावच्छेदेनवर्तमानोयस्तदत्यंताभावस्तत्प्रतियोगित्वंशाखावच्छेदेनस्थितस्यकपिसंयोगस्यास्तीतिसामाना
धिकरण्यरूपार्थांतरसिद्धिस्तद्वारणायतदावश्यकम्· तद्दानेतु· स्वाश्रयत्वेनाभिमतेयावतिशाखादौतदत्यंताभावासत्वान्नदोषइत्यर्थः॥ अस्मन्म
ते तस्माद्वाएतस्मादात्मनः आकाशः संभूतइत्यादिश्रुत्याआकाशादेरपिजन्यत्वावगमात्तस्यापिस्वकारणाश्रितत्वावश्यंभावात्· नतत्राव्याप्तिः॥
स्वोक्तलक्षणेचित्सुखाचार्य्यसम्मतिमाह· तदुक्तमिति· एवंप्राचीनोक्तमनुमानप्रयोगमुपपाद्यनवीनोक्तमनुमानप्रयोगमाह यद्वेति· तादात्म्यसंब
धेनैकावच्छेदेनेत्यपिद्रष्टव्यम् तथाचपूर्ववन्नार्थांतरताएवंव्यधिकरणधर्म्मा॥ ६ ॥ ६ ॥ ७ ॥ ६ ॥ ६ ॥

प्रतियोगित्वमत्यंताभावंप्रतिमृषात्मतेतियद्वाअयंपटएतत्तंतुनिष्ठात्यंताभावप्रतियोगीपटत्वात्· पटांतरवदित्याद्यनुमानं
मिथ्यात्वेप्रमाणम्· ननुक्तेअंशिनःस्वांशगात्यंताभावस्यप्रतियोगिनःअंशित्वादितरांशीवदित्येषेवगुणादिषुइतिनचघटादे
र्मिथ्यात्वेसन्घटइतिप्रत्यक्षेणबाधः अधिष्ठानब्रह्मसत्तायास्तत्रविषयतयाघटादेःसत्यत्वासिद्धेः नचनीरूपस्यब्रह्मणःक
थंचाक्षुषादिज्ञानविषयतेतिवाच्यम् नीरूपस्यापिरूपादेःप्रत्यक्षविषयत्वात्· नचनीरूपस्य·द्रव्यस्यचक्षुराद्ययोग्यत्व

॥ ॐ ॥

॥ ७ ॥नवच्छिन्नप्रतियोगिताकत्वमत्यंताभावविशेषणंदेयंतेनतमादायनार्थांतरंतथाएतद्दोषवारणायैतत्कालीनत्वमपितद्विशेषणमदेय
म् नचैवंतंतुषुपटस्यसमवायइतिप्रत्यक्षबाधइतिवाच्यम्· तस्यप्रत्यक्षस्यभ्रमप्रमासातयाचंद्रप्रादेशिकत्वप्रत्ययवदप्रमाण्यशंकास्कंदितत्वे
नबाधितत्वात्· अत्रापिचित्सुखाचार्य्यसम्मतिमाहतदुक्तमिति· दिगेषैवएषएवमार्गः रूपंरूपिनिष्ठात्यन्ताभावप्रतियोगिगुणत्वात्· स्पर्शवदित्ये
वक्रियादिष्वप्यूहनीयंननूक्तं मिथ्यात्वानुमानंसन्घटइत्यादिप्रत्यक्षबाधितमित्याशंकांपरिहरति· नचेति ननुरूपादिहीनस्यब्रह्मणश्चाक्षुषादिज्ञा
नविषयत्वमनुपपन्नमित्याशंकांनिषेधति· नचनीरूपस्येति· नीरूपस्यप्रत्यक्षविषयत्वंनास्तीति·॥ ७ ॥ श्री ॥ ७ ॥
समवायसंबंधेनतंतौपटवर्त्ततेसंयोगसंबंधेनतंतौपटात्यंताभावोऽस्तितेनसामानाधिकरण्यसिद्धंतंतावेकदेशेपटोवर्त्ततेपटांतरस्थावच्छेदेनपटस्यात्यंताभावो
ऽस्तितेनसामानाधिकरण्यसिद्धंततएकावच्छेदेनेतिपदंसाध्येग्राह्यंततःतादात्म्यसंबंधेःसाध्येग्राह्यम्·॥पं·

नियमस्य व्यभिचारमाह· नीरूपस्यापीति· विशेषनियममाशंक्य परिहरति· नचेति· नियमशरीरस्योक्तरूपत्वेपि नास्त्यस्माकं क्षतिरित्याहं मन्मत इति· ननु कथं ब्रह्मणो द्रव्यत्वं नास्तीति चेत्तत्र तल्लक्षणद्वयाननुगमादित्याह· गुणेति· निर्गुणस्य साक्षी चेताः केवलो निर्गुणश्चेत्यादिश्रुत्या निर्गुणत्वेन बाधितस्य· अस्तु यथा कथञ्चित् ब्रह्मणोपि द्रव्यता तथापि न दोष इत्यभ्युपेत्याप्याह अस्तु वेति· अस्मिन्काले घटो नास्तीति प्रतीतिबलात्कालस्येंद्रियवेद्यत्वम्· यथा स्वीकृतमध्वरमीमांसकैस्तथा तद्वदनन्यथासिद्धप्रतीतिबलात् ब्रह्मणश्चाक्षुषत्वमस्माभिरप्यंगीक्रियते· तथा च ब्रह्मव्यतिरिक्त चाक्षुषतायामेव महत्वे सत्युद्भूतरूपवत्वं प्रयोजकमिति भावः नन्वेवं तर्ह्याकाशे बलाकेति प्रतीतिबलादाकाशस्यापि चाक्षुषता स्यादित्यरुचेराह यद्वेति पारमार्थिकत्वव्यावहारिकत्वप्रातिभा

मन्मते ब्रह्मणो द्रव्यत्वासिद्धेः गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमिति तेभिमतं नहि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता समवायासिद्धेः अस्तु वा द्रव्यत्वं ब्रह्मणस्तथापि नीरूपस्य कालस्येव चाक्षुषादिज्ञानविषयत्वेपि न विरोधः यद्वा त्रिविधं सत्वं पारमार्थिकं व्यावहारिकं प्रातिभासिकं च पारमार्थिकं सत्वं ब्रह्मणः व्यावहारिकं सत्वमाकाशादेः प्रातिभासिकं सत्वं शुक्तिरजतादेः तथा च घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्वविषयत्वेन प्रामाण्यमस्मिन्पक्षे च घटादेर्ब्रह्मणि निषेधो न स्वरूपेण किंतु पारमार्थिकत्वेनैवेति न विरोधः अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्वमात्यंताभाव इति विशेषणं द्रष्टव्यम् तस्मादुपपन्नं मिथ्यात्वानुमानमिति इत्यनुमानपरिच्छेदः॥ ॥समाप्तः॥ ॥ ॥

सिकत्वभेदात्त्रिविधं विषयभेदादविरोधादित्याह· तथा चेति· सत्वत्रैविध्ये सतीत्यर्थः। ननु। अस्मिन्पक्षे निषेधप्रतियोगिनोः सामानाधिकरण्यं सिध्यति न तु घटादिमिथ्यात्वमित्याशंक्याह॥ अस्मिन्निति· स्वरूपेण व्यावहारिकत्वेन रूपेण· तथा चैतत्पक्षे मिथ्यात्वलक्षणे इदं विशेषणमदेयमित्याह· अस्मिन्निति· मिथ्यात्वानुमानोपपादनमुपसंहरति॥ तस्मादिति॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकृ।
॥मारसुतधनपतिसूरिसुतशिवदत्तविरचितायां परिभाषार्थदीपिकायामनुमानपरिच्छेदः॥ ॥समाप्तोयं॥ ॥

अथक्रमप्राप्तमुपमाननिरूपणंप्रतिजानीते· अथेति· अनुमाननिरूपणानंतरमित्यर्थः तत्रेति· अनुमाननिरूपणानंतरनिरूपणविषयीभूतोपमानेसती
त्यर्थः अत्राप्युपमीयतेनेनेत्युपमानमितिव्युत्पत्त्याउपमानशब्दोलक्षणंअस्मिन्नेत्तुलक्ष्येमित्याशयेनाह· सादृश्येतिसादृश्यप्रमायाउपमितिप्रमायाःक
रणमसाधारणकारणमुपमानमित्यर्थः॥ ननूपमानस्यप्रत्यक्षाद्यंतर्भावान्नपृथक्प्रमाणतेति· सांख्यादिभिरुक्तत्वात्कथमुपमानस्यसादृश्यज्ञान
करणतेत्याशंक्याह· तथाहीति· यथोपमानस्यसादृश्यप्रमाकरणत्वंतथाप्रदर्श्यतेइत्यर्थः॥ गोसदृशः गोभिन्नत्वेसतिगोगतभूयोधर्म्मवान् तत्रनि
श्चयप्रत्यक्षेः यःपिंडोगोसदृशइति· गोनिरूपितगवयपिंडनिष्ठसादृश्यज्ञानंकरणंअनेनसदृशीमदीयागौरितिगवयपिंडनिरूपितगोनिष्ठसादृश्य
ज्ञानंफलं· प्रथमाज्ञानेजातेसतिद्वितीयज्ञानस्योपदर्श          नात्तद्विनातदभावादित्यन्वयव्यतिरेकाभ्यांप्रथमज्ञानस्योपमानत्वंद्वितीयज्ञान

अथोपमानंनिरूप्यते· तत्रसादृश्यप्रमाकरणमुपमानं· तथाहि· नगरेषुदृष्टगोपिण्डस्यपुरुषस्यवनंगतस्यगवयेन्द्रियसन्नि
कर्षेसतिभवतिप्रतीतिरयंपिंडोगोसदृशइति· तदनंतरंभवति· निश्चयः अनेनसदृशीमदीयागौरिति· तत्रान्वयव्यतिरेकाभ्यां
गवयनिष्ठगोसादृश्यज्ञानंकरणंगोनिष्ठगवयसादृश्यज्ञानंफलम्· नचेदंप्रत्यक्षेणसंभवतिगोपिंडस्यतदेन्द्रियासन्निकर्षा
त्· नाप्यनुमानेनगवयनिष्ठगोसादृश्यस्यातल्लिंगत्वात् नापिमदीयागौरेतद्गवयसदृशीएतन्निष्ठसादृश्यप्रतियोगित्वात्· ॥

स्योपमितित्वमित्यर्थः नचास्यप्रत्यक्षेणगतार्थतेत्याह· नचेति· इदंगवयप्रतियोगिकगोनिष्ठसादृश्यज्ञानंतदागवयपिण्डेनेन्द्रियसन्निकर्षसमये
तथाचेन्द्रियासन्निकृष्टगोपिंडनिष्ठसादृश्यज्ञानंनप्रत्यक्षप्रमाणफलमित्यर्थः एतेन· यत्तुगवयस्यचक्षुःसन्निकृष्टस्यगोसादृश्यज्ञानंतत्प्रत्यक्षमेवा
तएवस्मर्यमाणायांगविगवयसादृश्यज्ञानंप्रत्यक्षंनह्यन्यद्गविसादृश्यमन्यच्च· गवयेभूयोवयवसामान्ययोगाजात्यंतरवर्तीजात्यंतरसादृश्यमुच्य
ते· सामान्ययोगश्चैकः सचेद्गवयेप्रत्यक्षोगव्यपितथेति· नोपमानस्यप्रमाणांतरत्वमस्तीतिप्रत्युक्तम्· प्रोक्तविधयासादृश्यैकत्वेपिप्रतियोगिधर्मिभे
देनभेदाभ्युपगमादिन्द्रियसन्निकृष्टगवयनिष्ठसादृश्यज्ञानस्यप्रत्यक्षत्वेपितदसन्निकृष्टगोनिष्ठस्यतस्यप्रत्यक्षत्वासंभवात्नाप्यनुमानेनास्यगतार्थते
त्याह· नापीति· नहिमदीयागौरेतन्निरूपितसा॥

27

दृश्यवतीगोनिरूपितसादृश्यवत्वादस्येत्यनुमातुं शक्यं गोनिरूपितगवयनिष्ठसादृश्यस्य गव्यवर्तमानत्वेन पक्षावृत्तितया तल्लिंगत्वाभावादित्याह
गवयनिष्ठेति अनुमानांतरेण तत्संभवमाशंक्य परिहरति· नापीति तत्संभवः गवयनिरूपितगोनिष्ठसादृश्यप्रमासंभवः अस्त्वेवं यथाकथंचिदनुमानोत्था
नं तथापि गोनिष्ठसादृश्यं नानुमानप्रमेयं तथाभूतानुमानानुत्थानेपि निरुक्तज्ञानस्य सर्वानुभवसिद्धत्वादनुमानस्यान्वयव्यतिरेकाभ्यां तत्कारणतासि
द्धेः अन्यथा यत्र यत्रानुमानावतरणसंभवस्तस्य तस्यानुमानप्रमेयत्वे प्रत्यक्षसिद्धस्य घटादेरपि तत्प्रमेयतया तत्सिसाधयिषया सर्वत्रायं घटः कंबुग्री
वादिमत्वात्· घटांतरवदित्येवमादिनानुमानसंभवात्प्रत्यक्षप्रमाणस्याप्यनुमानेंतर्भावः स्यादित्याशयेनाह· एवंविधेति· अनुव्यवसायादपि सादृश्य
ज्ञानमुपमानफलमित्याह· उपमिनोमीत्यनुव्यवसायाच्चेति· एतेनयोप्ययं गोसादृशस्य गवयशब्दो वाचक इति· प्रत्ययः सोप्यनुमानमेव यो हि शब्दो

यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः यथा मैत्रनिष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यम्
एवंविधानुमानानवतारेप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वादुपमिनोमीत्यनुव्यवसायात्तस्मादुपमानं मानांत
रम् अथागमो निरूप्यते· यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानांतरेण न बाध्यते·॥ ((यत्र वृद्धैः प्रयुज्यते· सोसति वृत्त्यंतरे तस्य

वाचको यथा गोशब्दो गोत्वस्य प्रयुज्यते· चैष गवयशब्दो गोसदृश इति· तस्यैव वाचक इति प्रत्युक्तम्· अत एव न तद्ज्ञानमागमस्यापि फलं गवयसदृशी
मदीया गौरिति वाक्यमश्रुतवतोपि· तथाभूतज्ञानोत्पत्तिदर्शनात्तस्मादुपमानेन प्रत्यक्षाद्यन्तरगतमित्युपसंहरति· तस्मादिति॥ इति श्रीपरमहंसपरिव्राज
काचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायां वेदांतपरिभाषार्थदीपिकायामुपमानपरिच्छेदः समाप्तः
श्रीमंगलमूर्तये नमः॥ क्रमप्राप्तमागमनिरूपणं प्रतिजानीते·॥ अथेति·॥ उपमाननिरूपणानंतरं शब्दो निरूप्यत इत्यर्थः॥ तत्रागमप्रमाणं लक्षयति· यस्येति·
मानांतराबाधिततात्पर्यगोचरीभूतपदार्थसंसर्गबोधकवाक्यं शब्दप्रमाणमित्यर्थः॥ शब्दसमानार्थके प्रमाणांतरेतिव्याप्तिवारणायोक्तम्· वाक्यस्येति· वह्नि
नासिंचेदिति वाक्यस्य प्रमाणतानिरासायोक्तम्· मानांतरेण न बाध्यत इति स प्रजापतिरात्मनो वपामुदखिददित्यादावव्याप्तिवारणाय तात्पर्यविषयीभूत इत्युक्तम्·

गवयशब्दो गोसादृशस्य वाचको असति वृत्त्यंतरे तत्र वृद्धैः प्रयुज्यत्वान्यथा गोशब्दो गोत्वस्य वाचकः॥ पं· ॥उक्तानुव्यवसायेन॥ पं· ॥

नाव्याप्तिः पं।२॥ वक्ष्यमाणप्रकारेण॥पं॥२॥

मानांतरेणेत्यस्य सजातीयप्रमाणांतरेणेत्यर्थः॥ साजात्यंच व्यावहारिकतत्वावेदकत्वेन बोध्यम्· तेन पारमार्थिकतत्वावेदकैः नेह नानास्ति किंचनेति वेदांतैः घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य च बाधेऽपि न क्षतिः॥ एतेनानुमानात्पृथक्शब्दमनंगीकुर्वन्तो वैशेषिकाः पराकृता वेदितव्याः ते हि लौकिकानि गामानयेत्यादीनि वैदिकानि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादीनि तात्पर्यविषयपदार्थसंसर्गप्रमापूर्वकाणि योग्यतासतिमत्पदकदंबकत्वात् घटमानयेत्यादिवदित्याद्यनुमानेनैव शब्दार्थसिद्धेः शब्दो न पृथक्प्रमाणमिति वदंति· कथमागमोनुमानात्पृथक्प्रमाणमित्याशंक्य योग्यतादिसहकारिजनितज्ञानस्यानुमानफलत्वाभावात्तथाभूतज्ञानजनकं वाक्यं पृथक्· प्रमाणमवश्यमभ्युपेयमित्याशयेनाह: वाक्यजन्यज्ञाने चेति तथा चासत्यपि व्याप्तिज्ञाने विद्यमाने प्याकांक्षादिसंसर्गज्ञानोपलंभान्नागमस्यानुमानेऽन्तर्भावः क्लृप्तेनानुमानप्रमाणेनैव निर्वाहे पृथक्प्रमाणं न कल्पनीयमिति·

तद्वाक्यं प्रमाणं· वाक्यजन्यज्ञाने च आकांक्षा योग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि कारणानि· तत्र पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यमाकांक्षा· क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः करणश्रवणे इतिकर्तव्यतायाश्च जिज्ञासाविषयत्वादजिज्ञासोरपि वाक्यार्थबोधात्योग्यत्वमुपात्तम्·॥

((यद्याग्रहस्तर्हि मनसैव क्लृप्तेन प्रत्यक्षप्रमाणेन निर्वाहादनुमानमप्यतिरिक्तप्रमाणं नाभ्युपेयं· यद्यनुमिनोमीत्यनुव्यवसायबलादभ्युपेयते तर्हि शब्दादमुमर्थं जानामीत्यनुव्यवसायबलादागमोवश्यमभ्युपगंतव्य इति भावः: तात्पर्यज्ञानस्य बहुवादिभिरनंगीकारात्पृथगुपादानं· क्रमेणाकांक्षादिस्वरूपमाह· तत्रेति· आकांक्षादिषु चतुर्षु कारणेषु मध्ये कुत एतद्वित्याशंक्य क्रियादिश्रवणे कारकादेर्जिज्ञासाविषयत्वोपलंभात्पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वमाकांक्षास्वरूपमित्याह· क्रियेति· आनयेति क्रियायाः श्रवणे घटमिति कारकस्य जिज्ञासाविषयत्वं घटमिति कारकस्य श्रवणे आनयेति क्रियायाः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति स्वर्गकरणश्रवणे समिधो यजति इडो यजतीत्यादीतिकर्तव्यतायास्तच्छ्रवणे करणस्य चेत्यर्थः॥ ननु लाघवादावश्यकत्वाच्च विषयत्वपर्यंतमेवाकांक्षालक्षणमस्तु किं योग्यत्वोपादानेनेति चेत्तत्राह· अजिज्ञासोरपीति· तथा च· जिज्ञासारहितस्य वाक्यजन्यज्ञाने पदार्थानां परस्परजिज्ञासाविषयत्वाभावेऽपि तद्योग्यत्वसत्त्वान्नाव्याप्तिरित्यर्थः॥

आकांक्षासहितेषु॥पं·२॥ अर्थविप्र· अर्थव्यवधानात्॥पं·८

ननुअत्रसास्तीत्याकांक्षाग्राहकं तादवच्छेदकं किमित्याकांक्षायामाह· तदिति· तथाचगौरश्वइत्यादौक्रियात्वादेस्तदवच्छेदकस्याभावादाकांक्षाऽसत्वा
न्नातिव्याप्तिरित्यर्थः॥ननुतत्सहितेषुनीलमुत्पलंतत्त्वमसीत्यादिवाक्येष्वाकांक्षावच्छेदकराहित्यादव्याप्तिरित्याशंक्याह० अभेदान्वयइति॥अभेदे
नान्वयापन्नतत्त्वमस्यादिवाक्येऽवच्छेद्ययोग्यत्वलक्षणाकांक्षाया अनुगतत्वादवच्छेदकाऽननुगमोनदोषावह इतिमंतव्यम्· नन्वन्वयबोधाभावए
वाकांक्षाकिंनस्यात्तस्याःप्रागभावात्मकतयाशाब्दज्ञानकारणत्वेनक्लृप्तत्वादित्याशंक्यैवंविधाकांक्षाभिप्रायेणैवमीमांसकैः श्रुतिलिंगादिबलाबला
धिकरणआकांक्षायाव्यवहृतत्वात्तैवमित्याह· एतादृशेति· तथाचतृतीयाध्यायतृतीयपादस्थजैमिनिसूत्रं· श्रुतिलिंगवाक्यप्रकरणस्थानसमा
ख्यानांसमवायेपारदौर्बल्यमर्थविप्रकर्षादिति· अत्रश्रुत्यादीनामेकविषयत्वसमवायेनविरोधेसति।कस्यप्राबल्यंकस्यदौर्बल्यमितिचिंत्यते· तत्र

तदवच्छेदकंचक्रियात्वकारकत्वादिकमितिनातिव्याप्तिर्गौरश्वइत्यादौ अभेदान्वयेचसमानविभक्तिकपदप्रतिपाद्यत्वंतदवच्छे
दकमितितत्त्वमस्यादिवाक्येषुनाव्याप्तिः एतादृशाकांक्षाभिप्रायेणैवबलाबलाधिकरणेसावैश्वदेव्यामिक्षावाजिभ्योवाजिन।
मित्यत्रवैश्वदेवयागस्यामिक्षान्वितत्वेननवाजिनाकांक्षेत्यादिव्यवहारः॥ निरपेक्षोरवःश्रुतिःयथाव्रीहीनवहंतीत्यत्रक्रियाफलभा
गित्वंकर्मत्वंबोधयंतीद्वितीयाश्रुतिर्निरपेक्षैवव्रीहीणामवघातशेषत्वम्· प्रतिपादयति· अर्थविशेषप्रकाशनसामर्थ्यंलिंगंयथा।बर्हिर्देवसदनंदा
मीत्यस्यमंत्रस्यलवनार्थप्रकाशकतयाबर्हिर्लवनेविनियोगः परस्पराकांक्षावशात्क्वचिदेकस्मिन्नर्थेपर्यवसितानिपदानिवाक्यंयथादेवस्यत्वासवि
तुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नयेजुष्टंनिर्वपामीत्यत्रलिंगेननिर्वापेविनियुज्यमानस्यसमवेतार्थभागस्यैकवाक्यबलेनदेवस्यत्वेत्यादि
भागस्यविनियोगः॥लब्धवाक्यभावानांपदानांकार्यांतरापेक्षायावाक्यांतरेणसंबंधेआकांक्षापर्यवसन्नंप्रकरणम्· यथासमिधोयजतीत्यादेर्दर्शपूर्ण
मासकथंभावाकांक्षायांपठनाच्छेषत्वम्·॥क्रमःस्थानमनेकस्याम्नातस्यसन्निधिविशेषाम्नानंयथादधिरसीत्यत्राग्नेयाग्नीषोमीयोपांशुयागाःक्रमेण
ब्राह्मणेविहितामंत्रभागेपिक्रमेणमंत्रत्रयंपठितंतत्राग्नेयाग्नीषोमीययोर्लिंगेनैवद्वयोर्विनियोगसिद्धिः दधिरसीत्यत्रतुनलिंगादिविनियोजकमस्ति·
समवेतार्थभागस्यलिंगेननिर्वापेविनियुज्यमानस्याग्नयेजुष्टंनिर्वपामीतिमंत्रस्यसंबंधीयोदेवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामितिभाग॥ किंतुयस्मिन्मंत्रेयो·॥

स्तस्यैकवाक्यत्वबलेनविनियोगइति॥टि·पं·१॥

आम्नाणेउपांशुयागविधानंतस्मिन्नेवप्रदेशेमंत्रेप्यस्यपाठइतिक्रमादुपांशुयागानुमंत्रणेस्यविनियोगः योगबलंसमाख्याययथाहौत्रंऔद्गात्रमित्यादौहोतुरिदंहौत्रमित्यादियोगबलेनहौत्रादिसमाख्यानिकर्माणिहोत्रादिभिरनुष्ठेयानिप्रकृतेश्रुतिवाक्यविरोधेवाक्यदौर्बल्योदाहरणं·तप्तेपयसिदध्यानयतिसावैश्वदेव्यामिक्षावाजिभ्योवाजिनमिति· तत्रवाजिनस्यकिं·विश्वेदेवांगत्वं· किंवावाजिसंज्ञकदेवतांगत्वमितिसंशयेवाजमन्नमामिक्षातदेषामस्तीति· उक्तत्वावाजिपदस्यविश्वेदेवपरत्वात्· वाजिभ्योवाजिनमिति· वाक्याद्वाजिनस्यविश्वेदेवांगत्वमवगम्यतेनचामिक्षयावाजिनबाधः किंतुतयासहविकल्पःसमुच्चयोवेति· प्राप्तेसिद्धांतः नतावद्वाजिनस्यविश्वेदेवांगत्वंवैश्वदेवीति· तद्धितश्रुत्यामिक्षयातेषांसंबंधस्योचित्वादस्येतिसर्वनामार्थेतद्धितस्यस्मृतत्वात्सर्वनाम्नश्चसन्निहितविशेष्यसमर्पकत्वादामिक्षायाःश्रुतत्वेननतद्धितवाच्यत्वात्॥एवंचनविकल्पसमुच्चयोक।

ननुतत्रापिवाजिनस्यजिज्ञासाऽविषयत्वेपितद्योग्यत्वमस्त्येवप्रदेयद्रव्यत्वस्ययागनिरूपितजिज्ञासाविषयतावच्छेदकत्वादितिचेन्नस्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैवतदवच्छेदकत्वेनवाजिनद्रव्यस्यस्वसमानजातीयामिक्षाद्रव्यान्वयबोधसहकृतत्वेनतादृशावच्छेदकाभावात्॥आमिक्षायांतुनैवंवाजिनान्वयस्यतदानुपस्थितत्वात्॥उदाहरणांतरेष्वपिदुर्बलत्वप्रयोजकआकांक्षाविरहएवद्रष्टव्यः॥

त्यो विश्वेदेवसंबंधवत्यामिक्षयावाजिनाकांक्षाभावादिति·ननुभवदभिमतस्याकांक्षालक्षणस्यवाजिनेपिसत्वात्कथमुक्तनैराकांक्ष्यव्यवहारोभवदुक्ताकांक्षासंवादीत्याशयेनशंकते·नन्विति· तत्रापिसावैश्वदेव्यामिक्षेत्यादावपियागनिरूपितजिज्ञासाविषयतावच्छेदकस्यप्रदेयद्रव्यत्वस्यसत्वादित्याह· प्रदेयेति· प्रदेयद्रव्यत्वस्यतदवच्छेदकत्वंजनितान्वयबोधादपिवाक्यात्पुनरन्वयबोधापत्तेः स्वसमानजातीयेत्यादिविशेषणविशिष्टस्यतस्यतत्वांगीकाराद्वाजिनेतदसत्वादुक्तलक्षणासंगमान्नोक्तदोषइत्याशयेनपरिहरतिनेतिस्वसमभिव्याहृतपदेनस्मारितोयः स्वसमानजातीयः स्वसदृशःपदार्थस्तदन्वयबोधविरहेणसहकृतंयत्प्रदेयद्रव्यत्वंतस्यैवतदवच्छेदकत्वेनयागनिरूपितजिज्ञासाविषयतावच्छेदकत्वेनवाजिनद्रव्यस्यस्वसदृशामिक्षापदार्थान्वयबोध॥ छ ॥

सहकृतत्वेनतद्विरहसहकृतप्रदेयद्रव्यत्वरूपावच्छेदकाभावादित्यर्थः॥ नन्वस्तुवाजिनपदार्थेनैवान्वयबोधस्तथाचामिक्षायामेवतादृशावच्छेदकाभावः किंनस्यादित्याशंक्याह· आमिक्षायांत्विति· प्रथमश्रुतामिक्षान्वयबोधकालेवाजिनान्वयबोधस्योत्थानाभावादितिहेतुमाह· वाजिनेति· यथाश्रुतिवाक्यविरोधेवाक्यदौर्बल्यप्रयोजकआकांक्षाविरहस्तथोदाहरणांतरेष्वपिसएवेत्यतिदिशति॥ उदाहरणांतरेष्वपीति·॥ तत्रश्रुतिलिंगविरोधेलिंगदौर्बल्यम्॥ यथाऐंद्र्यागार्हपत्यमुपतिष्ठतइतिश्रूयते· तत्रसंशयः किंकदाचनस्तरीरसिनेंद्रसश्चसिदाशुषेइत्यस्याऋगैंद्रीतेनैंद्रमंत्रेणेंद्रउपस्थेय· उतगार्हपत्यइति· भोइंद्रकदाचिदपिघातकोनभवसिकिंत्वाहुतिदत्तवतेयजमानायप्रीयसेइतिः॥ ❁ ॥ इन्द्रप्रकाशनसामर्थ्याल्लिंगादिंद्रउपस्थेयइतिप्राप्तेसिद्धांतः गार्हपत्यमिति· प्रत्यक्षश्रुत्यागार्हपत्योपस्थानेविनियुक्तस्यमंत्रस्यपुनर्विनियोगाकांक्षायाअनुदयाद्धिनियोजकंलिंगंनप्राप्नोति· येनैंद्रोपस्थानेमंत्रोविनियुज्येतेति· लिंगवाक्ययोर्विरोधेवाक्यदौर्बल्यम्· यथादर्शपूर्णमासयोःश्रूयते॥ स्योनंतेसदनंकृणोमिघृतस्यधारयासुशेवंकल्पयामितस्मिन्सीदामृतेप्रतितिष्ठव्रीहीणांमेधसुमनस्यमानइति·॥ भोपुरोडाशतवसमीचीनंस्थानंकरोतितत्रस्थानेघृतस्यधारयासुष्ठुसेवितुंयोग्यंकल्पयामिभोव्रीहिसारभूतत्वंसमाहितमनस्कस्तस्मिन्समीचीने। स्थानेउपविश्यतत्रस्थिरोभवेत्यर्थः॥ तत्रायंसर्वोपिमंत्रः॥ स्थानकरणेपुरोडाशस्थापनेचविनियुज्यते· किंवाद्वेद्वयमुभयत्रव्यवस्थितमितिसंशयेतस्मिन्नित्यनेनतच्छब्देनप्रकृतवाचिनापूर्वोत्तरार्द्धयोरेकवाक्यत्वेसतिमंत्रद्वयाभावात्सर्वोप्ययंमंत्रःस्थानकरणस्यपुरोडाशस्थापनस्यचांगंतत्रसर्वेणानेनमंत्रेणस्थानंकर्तव्यमितिविनियोजिकाश्रुतिःकल्पनीयातयासर्वेणमंत्रेणपुरोडाशः॥ ६ ॥

वे·प·
दी·टी·
३०

स्थापनीय इत्यपि कल्पनीयः सदनंगतत्वस्य प्रतिष्ठापनंगतत्वस्यापि तद्वाक्यबोधितत्वादिति प्राप्ते राद्धांतः पूर्वोत्तरार्द्धयोः परस्परान्वयेन संपन्नस्यैकवाक्यस्योत्तरार्द्धस्य सदनकरणे शक्तिमकल्पयित्वा सर्वमंत्रस्य सदने विनियोक्तुमनर्हत्वात्पूर्वार्द्धस्य स्थापने शक्तिमकल्पयित्वा स्थापने सर्वमंत्रस्य विनियोक्तुमनर्हत्वाच्च लिंगकल्पनव्यवधानेन श्रुतिं प्रति वाक्यं विप्रकृष्यते।। प्रत्यक्षं तु लिंगद्वयं सन्निकृष्यते· तथा च लिंगेन वाक्यबाधाद्द्वयमप्युभयत्रव्यवस्थितमिति अत्राप्याकांक्षाविरह एव वाक्यस्य दौर्बल्यप्रयोजक इति·।। वाक्यप्रकरणयोर्विरोधे प्रकरणदौर्बल्यम्।। यथा सूक्तवाके श्रूयते।। अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातामिन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातामित्यादि।। तत्र संशयः देवतापदैकवाक्यतामूलानीदं हविरजुषेतामित्यादीनि यानि पदानि तानि किंततो विच्छिद्यान्यत्रापि प्रकरणाविशेषात्प्रयोक्तव्यानि· उत तत्तद्देवतापदैकवाक्यतया तद्देव व्यवस्थितानीति· तत्र देवतावाचकाग्नीषोमादिपदं पौर्णमास्यादिकाले यथादैवतं विभज्य प्रयुज्यते।। यत्त्विदं हविरित्यादिकमवशिष्टं पदजातं तदग्नीषोममंत्रगतमप्यमावास्यामग्नीषोमपदपरित्यागेन पठनीयम् तथा इन्द्राग्नीमंत्रगतमपि पौर्णमास्यामिंद्राग्नीपदपरित्यागेन पठनीयम्।। तथा सत्येषां मंत्रभागानां सर्वशेषत्वबोधकाद्दर्शपूर्णमासपाठोऽनुगृह्यत इति प्राप्ते सिद्धांतः अग्नीषोममंत्रशेषस्येंद्राग्नीपदान्वयाश्रवणात्प्रकरणेन प्रथमं तदन्वयरूपं वाक्यं कल्पनीयम् तेन च वाक्येनेन्द्राग्नीप्रकाशनसामर्थ्यरूपं लिंगं कल्प्यते तेन चानेन मंत्रभागेनेंद्राग्नीविषया क्रियाऽनुष्ठेयेति· विनियोजिका श्रुतिः कल्प्यते ततः प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानं भवति अग्नीषोमपदान्वयरूपं वाक्यं श्रूयमाणत्वाल्लिंगश्रुतिभ्यामेव व्यवधीयते तस्माद्वाक्येन प्रकरणस्य बाधितत्वात् शेषस्तत्रैव व्यवतिष्ठते अत्रापि विच्छिद्यान्यत्राप्रयोगे आकांक्षाविरह एव कारणम्।। स्थानप्रकरणयोर्विरोधे स्थानदौर्बल्यम्।। यथा राजसूये बहवः पश्विष्टिसोमयागाः सर्वे फलवन्तः समप्रधानाः तत्राभिषेचनीयो नाम सोमयागः तत्सन्निधौ विदेवनादयः समाम्नाताः।। अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेपमाख्यापयति इति जिनाति जयति बह्वृचब्राह्मणे समाम्नातं शुनःशेपविषयमाख्यानं शौनःशेपं तत्र संशयः ते विदेवनादयः किं सर्वस्य राजसूयस्यांगमु ताभिषेचनीयस्यैवेति· तत्र सन्निधिवशाद्विदेवनादयोऽभिषेचनीयांगमिति प्राप्ते राद्धांतः राजसूयस्य कथंभावाकांक्षायामनुवृत्तायां विहिता विदेवनादयः प्रकरणेन राजसूयशेषाः राजसूयश्च बहुयागात्मक इति तत्रस्य सर्वयागशेषभूतं विदेवनादिकम्·

30

राम
३०

पुरोडाशंकपालेपरिपक्वान्नविशेषमधिकृत्यप्रवृत्तंकांडंमंत्ररूपंपौरोडाशिकंपौरोडाशि
कशब्दरूपसमाख्यावाच्योदर्शपूर्णमासकांडेदर्शपूर्णमाससंबंधिमंत्ररूपेइत्यर्थः·पं·२मेप्र·१ प्रकृतिविकृतिकर्तव्याइति·पं·१॥ दधिदुग्धपात्रविशेषः॥पं·२मेद्वि·२॥

नचाभिषेचनीयस्यकाचिदाकांक्षाविदेवनादिष्वस्तिज्योतिष्टोमविकृतित्वेनातिदिष्टैःप्राकृतांगैरेवतदाकांक्षानिवृत्तिरिति:स्थानसमाख्ययोर्विरो
धेसमाख्यादौर्बल्यं·यथापौरोडाशिकसमाख्यातेदर्शपूर्णमासकांडेसान्नाय्यपात्रशुंधनंसमाख्यातम्·तत्रशुंधध्वंदैव्यायकर्मणेदेवयज्यायाइति
मंत्रोदाहरणंसकिंपुरोडाशपात्रांगमुतसान्नाय्यपात्रांगमितिसंशयःपौरोडाशिकमितिसमाख्यानेकांडेपठितत्वात्समाख्ययापुरोडाशकांडांगानामु
लूखलजुह्वादीनामपिशोधनेंगमितिप्राप्तेसिद्धांतः॥पौरोडाशिकमितिसमाख्यायांप्रकृतिःपुरोडाशमभिधत्तेतद्धितप्रत्ययश्चकाण्डम्·नचैतावताकृ
त्स्नपुरोडाशपात्राणांसन्निधिरत्रप्रत्यक्षोस्ति·किंत्वर्थात्प्रकल्प्यस्तस्मात्कांडसमाख्ययासन्निधिंपरिकल्प्यतत्सन्निध्यन्यथानुपपत्त्यापरस्पराकांक्षारूप
कृत्स्नपात्रप्रकरणंकल्पयित्वावाक्यलिंगश्रुतीःपरिकल्प्यतयाश्रुत्याविनियोगइतिसमाख्यायांविप्रकर्षःसान्नाय्यपात्राणांशोधनमंत्रसन्निधिस्तुप्र

> योग्यताचतात्पर्यविषयीभूतसंसर्गाबाधः वह्निनासिंचतीत्यादौतादृशसंसर्गबाधान्नयोग्यतासप्रजापतिरात्मनोवपामुदखि
> दहित्यादावपितात्पर्यविषयीभूतपशुप्राशस्त्याबाधात्॥योग्यतातत्त्वमस्यादिवाक्येष्वपिवाच्याभेदबाधेपिलक्ष्यस्वरूपाभेद
> बाधाभावात्· योग्यताआसत्तिश्चाव्यवधानेनपदजन्यपदार्थोपस्थितिः॥मानांतरोपस्थापितपदार्थस्यान्वयबोधाभावात्पदजन्ये
> ति·अतएवाश्रुतपदार्थस्थलेतत्तत्पदाध्याहारःद्वारमित्यादौपिधेहीति॥

((त्यक्षःइध्माबर्हिःसम्पादनस्यप्रभृतिर्निर्वापस्यचान्तरालेसान्ना
य्यपात्राणांदेशउक्तः:मंत्रश्चेध्माबर्हिर्निर्वापविषययोर्मंत्रानुवाकयोर्मध्येमनुवाकेपठ्यतेतेनचप्रत्यक्षसन्निधिनाप्रकरणादीनांचतुर्णामेवकल्पना
त्· सन्निधिःसन्निकृष्यते·तस्मात्क्रमेणसमाख्यांबाधित्वासान्नाय्यपात्रशोधनांगमेवमंत्रः॥स्थानंसन्निधिक्रमइत्यनर्थांतरमिति·योग्यतालक्षयति
॥योग्यतेति॥एतावल्लक्षणाभिधानफलमाह॥वह्निनेति·॥तथाप्यस्तुसंसर्गाबाधोयोग्यतेत्याशंक्याह॥सप्रजापतिरिति·॥एवंचसांप्रदायिकत
त्वमस्यादिवाक्यार्थोप्युपपन्नइत्याह॥तत्त्वमस्यादौ ति·क्रमप्राप्तामासत्तिंलक्षयति·आसत्तिश्चेति·पदजन्येत्यस्यप्रयोजनमाह·मानांतरेतिय
तोमानांतरोपस्थापितपदार्थस्यान्वयबोधोनास्त्यतएवाश्रुतपदार्थस्थलेऽन्वयबोधयोग्यपदार्थोपस्थापकपदाध्याहारःसंगच्छतइत्याह·॥६॥

हेतुरोडाशाजरूपयास्या। वचनादागतः पं.२ । स्वातंत्र्येणप्रकृतार्थबोधकत्वेनतुल्यमंत्रेषु। संहितायामिषेत्वोर्ज्जेत्वेत्यादिमंत्राणामग्रेदृष्टार्थैकैकमंत्रोऽस्ति
तथाप्रयस्वरहिमात्र। अन्वितः पं.१ । मंत्रभेदः पं.१॥ मिथःसंबंधोयस्य पं.३ । सएवावधिस्तन्मंत्रस्यावधेःप्रागित्यर्थः पंक्तिः२॥ मंत्रभेदः॥पं.४
इतिपंक्ति५॥ एकमंत्र ३॥ यजुरंतरमितिमंत्रांतरं पं.३। यत्परिमाणकं पं.२ हेशाखेइषेऽन्नायत्वांछिनद्मिइति.

वे.प.
टी.टी.
३१

अतएवेति· अतएववेदेपिताहशपदाध्याहारइत्याह॥ः॥अतएवेति·द्वितीयाध्यायेचिंतितंसमेषुवाक्यभेदः॥यत्रकर्मसमवेतार्थप्रकाशकंनिर्वपामीत्यादिपदमस्तितत्रसुगमंपरिमाणम्· यत्रतुसमवेतार्थपदाभावेनलौकिकविनियोगाभावेवाचनिकोविनियोगःस्वरूपतोगम्यते· यथाइषेत्वोर्ज्जेत्वेति· तत्रसंशयः किंमग्रेदृष्टार्थमंत्रावधेरेकमंत्रत्वमुतयावदेवमिथःसंबंधमिषेत्वेति· तावदेकंयजुरन्यच्च· यजुरंतरमिति· इषेत्वोर्ज्जेत्वेत्यत्रसोयंपदसमुदायएकोमंत्रः तस्यादृष्टार्थत्वेनैकस्यैवादृष्टस्यकल्पनेलाघवात् नचोरुप्रथस्वेत्यादि।मंत्रवदनुष्ठेयार्थस्मारकतासंभवति।क्रियापदाभावेनतदर्थप्रतीत्यभावादितिप्राप्तेराद्धांतइषेत्वोर्ज्जेत्वेत्यादौयजुर्भेदः इषेत्वेतिछिनत्तिऊर्ज्जेत्वेत्यनुमार्ष्टीतिपलाशशाखायाःछेदनमार्ज्जनयोर्विनियोगात्ततस्तदनुसारेणछिनद्मिअनुमा

सोयंपागादिषु

अतएवेषेत्वेत्यादिमंत्रेछिनद्मीतिपदाध्याहारः अतएवविकृतिषुसूर्यायजुष्टंनिर्वपामीतिपदप्रयोगः पदार्थश्चद्विविधःशक्योलक्ष्यश्चेति· तत्रशक्तिर्नामपदानामर्थेषुमुख्यावृत्तिः यथाघटपदस्यपृथुबुध्नोदराद्याकृतिविशिष्टेवस्तुविशेषेवृत्तिः।साचशक्तिःपदार्थांतरम्· सिद्धांतेकारणेषुकार्यानुकूलशक्तिमात्रस्यपदार्थान्तरत्वात्॥ ७ ॥ ७ ॥ ७ ॥

31

र्ज्मीत्यर्थभेदइति॥अतएवमानांतरेत्याद्युक्तहेतोरेवनवमाध्यायप्रथमेपादेस्थितंगुणशब्दस्तथेतिचेदिति·देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नयेजुष्टंनिर्वपामीतिमंत्रेसवित्रश्विपूषशब्दानांविकृतिषूहाभावःउक्तस्तत्राग्निशब्दोपिकिमसमवेतवचनोनोहितव्यउतसमवेतवचनऊहितव्यइतिसंशयेदेवतांतरवाचिसवित्रादिशब्दवदग्निशब्दस्यापिनिर्वापस्तावकत्वेनपाठान्नोहनीयइतिप्राप्तेराद्धांतःसवित्रादिशब्दानांकर्मण्यसम

गुणशब्दःजुष्टशब्दार्थेगुणभूताग्न्यादिवाचकःशब्दः तथासवित्रादिशब्दवत्तावकः जुषधातोःकर्मणिभूतार्थेनिष्ठाविहितातथाचजुषधातोर्भक्षणमार्थः॥अग्नयेइतितादर्थ्येचतुर्थी॥अग्निकर्तृकभूतकालीनभक्षणकर्मीभूतहविःकर्मकनिर्वापंभावयामीतिवाक्यार्थोवाच्यःसचबाधितःनिर्वापकालेऽग्निकर्तृकभक्षणस्यभूतत्वाभावादतःस्तुत्यर्थइतिविकृतौतस्या

राम ३१

भोपुरोडाशाग्नयेऽग्निदेवतायैत्वांजुष्टंप्रीतिपूर्वकं यथास्यात्तथानिर्वपामिसंपादयामिप्रक्षिपामि॥

वेतार्थत्वेनाग्निशब्दस्यचाग्नेयेकर्म्मणिसमवेतार्थत्वेनदृष्टांतवैषम्याद्दूहनीयइति· ननुनिर्वापात्पूर्वंहविषोजुष्टत्वाभावात्तद्योगादग्निशब्दोपिनस्यादितिचेन्नजुष्टंयथाभवति-तथानिर्वपामीतिक्रियाविशेषणत्वेनभविष्यज्जोषणपरत्वेसतिसमवेतार्थत्वात्तस्मात्सौर्ययागेसूर्य्यायजुष्टंनिर्वपामीत्येवमूहनीयमिति।पदजन्यपदार्थोपस्थितिरित्युक्तम्·तत्रपदार्थःकतिविधइत्यपेक्षायामाह·पदार्थश्चेति· पदनिष्ठशक्तिविषयःशक्यःपदवृत्तिलक्षणाविषयोलक्ष्यः गौण्यावृत्तेःलक्षितलक्षणायामन्तर्भावस्यवक्ष्यमाणत्वाद्वृत्तेर्द्वैविध्यात्पदार्थद्वैविध्यम् केवललक्षणायाश्चगौण्यन्तर्भावाच्छक्योलक्ष्यश्चेतिविभागइतिभावः तयोःशक्तिलक्षणानिरूपणायत्तनिरूपणत्वाच्छक्यस्वरूपावगमार्थमादौशक्तिंनिरूपयतितत्रेति· तयोःशक्यलक्ष्ययोःशक्यविशेषणीभूताशक्तिरित्यर्थः॥ अर्थेष्ववृत्तिः॥ अर्थविषयिणीवृत्तिःपदानांकार्य्यान्वितेष्ववार्थेषुवृत्तिमिच्छतांप्रभाकराणांनिराकरिष्यमाणत्वादाह॥अर्थेष्विति॥लक्षणायामतिव्याप्तिवारणायाह।मुस्येति·उदाहरतियथेति· पृथुविपुलंचतद्बुध्नंचवर्त्तुलंचयदुदरंतदादिर्यस्यग्रीवादेस्तदाकृतिविशिष्टद्रव्य

साचतत्तत्पदजन्यपदार्थज्ञानरूपकार्य्यानुमेयातादृशशक्तिविषयत्वंशक्यत्वंतच्चजातेरेवनव्यक्तेःव्यक्तीनामानंत्येनगुरु॥ः

र्थःशक्तिःसंकेतःसचपरमेश्वरेच्छा अनेनपदेनायमर्थोबोधव्यइत्येवंरूपानतुपदार्थांतरंमानाभावादिति· नैयायिकास्तान्निराचष्टेसाचेतियेषांमतेशक्तिमात्रस्यपदार्थांतरत्वात्तेषांमतेपदनिष्ठाशक्तिःपदार्थांतरमिति· किमुवक्तव्यमित्याह· सिद्धांतइति· तथाचशक्तेःपदार्थांतरत्वेदाहादिलक्षणकार्य्यानुपपत्तिरेवप्रमाणंप्रतिबंधकाभावस्यत्वभावतयानहेतुत्वंदाहादिकार्य्यंवह्निनिष्ठस्वानुकूलशक्तिपूर्वकंकार्य्यत्वाद्घटवदितिभावः॥उपलक्षणमेतत् परास्यशक्तिर्विविधैवश्रूयते· शक्तयःसर्वभावानामचिंत्या· ज्ञानगोचराइत्यादिश्रुतिस्मृतिवचनान्यपिपृथक्शक्तिसद्भावेमानमित्यर्थः· ननुतत्कारणेषुकार्यानुमेयाशक्तयःप्रकृतेकेनकार्य्येणपदनिष्ठाशक्तिरनुमीयतइत्यपेक्षायामाह।साचेति॥पदार्थज्ञानंपदनिष्ठस्वानुकूलशक्तिपूर्वकंपदजन्यपदार्थज्ञानरूपकार्य्यत्वादित्येवमनुमेयेत्यर्थः·एवंशक्तिंनिरूप्यशक्यंलक्षयति· तादृशेति· उक्तलक्षणशक्तिविषयत्वंतच्चशक्यत्वंजातेर्व्यक्तेर्वा॥ इत्यपेक्षायामाह· तच्चेति· जातिरत्रानुगतोधर्मः परैर्जातिशब्देनव्यवह्रियमाणस्तेनजातित्वोपा॥

धित्वपरिभाषायाः सर्वप्रमाणागोचरत्वोक्तिविरोधो न शंक्यः तत्र हेतुमाह· व्यक्तीनामिति। अनन्त्वनुगतधर्मस्य शक्यत्वाभ्युपगमे गामानय पशुमालभेदि
त्यादौ गवादिपदाद्व्यक्तिभानं न स्यादित्याशंकते कथमिति· यद्यपि जातिरेव शक्या तथापि धर्म्मनहतोस्तादात्म्यादेकसंवित्तिवेद्यत्वाद्व्यक्तिसमानसंविति
संवेद्यजातिभानसमये व्यक्तिभानमविरुद्धमित्याह जातेरिति नतु पदाद्व्यक्तिसंविदेव दुर्लभा तत्प्रयोजकशक्तिरभावादित्यरुचेराह· यद्वेति· स्वरूपस
तीस्वरूपेणैव वर्त्तमाना व्यक्तिबोधकगवादिपदनिष्ठसामर्थ्यस्वरूपमस्त्येवेत्यर्थः व्यावर्त्यमाह· नन्विति· गवादिपदाद्व्यक्तिभानार्थं गवादिपदानां व्यक्तौ
शक्तिरस्तीति· ज्ञाने नापेक्षितमित्यर्थः एतदेव स्पष्टयति· जाताविति· गवादिपदानां जातौ शक्तिरिति ज्ञाता जातिभानहेतुरित्यर्थः व्यक्तिभाने शक्तिः का
रणं न तु तज्ज्ञानमपीत्याह· नेति तत्र हेतुमाह गौरवादिति उभयत्र शक्तिज्ञानस्य कारणत्वकल्पने गौरवात्· नन्वावश्यकत्वाद्गौरवं न दोषावहमित्या

त्वात् कथं तर्हि गवादिपदाद्व्यक्तिभानमिति चेत्· जातेर्व्यक्तिसमानसंवित्संवेद्यत्वादिति ब्रूमः यद्वा गवादिपदानां व्यक्तौ शक्तिः
स्वरूपसती न तु ज्ञाता हेतुः जातौ तु ज्ञाता न व्यक्त्यंशे शक्तिज्ञानमपि कारणं गौरवात्· जातिशक्तिमत्त्वज्ञाने सति व्यक्तिशक्तिम।
त्त्वज्ञानं विना व्यक्तिधीविलंबाभावाच्च अत एव न्यायमतेप्यन्वये शक्तिः स्वरूपसतीति सिद्धान्तः ज्ञायमानशक्तिविषयत्वमेव
वाच्यत्वमिति जातिरेव वाच्या अथवा व्यक्तेर्लक्षणयावगमः यथा नीलो घट इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे॥ ७ ॥

शंकामाह· जातीति· यतः शक्तिज्ञानं विनैव यस्य ज्ञानं न तज्ज्ञानार्थं शक्तिज्ञानकल्पनमनुचितम् अत एव नैयायिकैर्गवादिपदार्थस्य पदार्थान्तरान्व
ये शक्तिः स्वरूपसती स्वीकृतेत्याह· अत एवेति· नन्वेवं तर्हि व्यक्तिरपि शक्या शक्तिविषयत्वं शक्यत्वमित्युक्तत्वाद्व्यक्तौ च शक्तेः स्वीकारात्तथा च जाते।
र्व्यक्तेश्च शक्यत्वे गौरवमित्याशंक्यास्मिन्पक्षे ज्ञायमानशक्तिविषयत्वं न तु शक्तिविषयत्वमतो नोक्तदोष इत्याह· ज्ञायमानेति· ननु व्यक्तिरशक्यत्वे
तत्र शक्तिकल्पनमपि स्यात्तज्ज्ञानस्य लक्षणयैव संभवादन्वयस्य च वाक्यगम्यत्वेन पदशक्त्यविषयत्वादित्यरुचेः पक्षान्तरमाह· अथवेति· त
था च गवादिपदस्य जातौ शक्तिः न हि शिष्टव्यक्तौ लक्षणेति भावः॥ केवलस्य शक्तिगम्यत्वविशिष्टस्य लक्षणागम्यत्वं क्व दृष्टमित्यपेक्षायामाह· य

32

अत्रमीमांसकसम्मतिमाह· तदुक्तमिति· अनन्यलभ्योलक्षणादिनालभ्योयोनभवति· सशब्दार्थः शब्दशक्तिगम्यइत्यर्थः शक्यनिरूपणमुप
संहरति· एवमिति· लक्ष्यस्यशक्यनिरूपणायत्तन्निरूपणत्वात्तन्निरूपणानंतरंलक्ष्यपदार्थनिरूपणंप्रतिजानीते॥ अथेति· तत्रशक्यनिरूपणानन्त
रनिरूपणविषयीभूतेलक्ष्येसतितथाभूतनिरूपणविषयीभूतोलक्ष्योलक्षणाविषयइतिवालक्ष्यज्ञानस्यलक्षणाज्ञानाधीनत्वात्तांनिरूपयति· लक्ष
णेति· तत्रकेवललक्षणालक्षितलक्षणयोर्मध्येउदाहरणमाह· यथेति· यथागंगायांघोषइत्यस्मिन्वाक्येगंगापदवाच्यप्रवाहेणसाक्षात्संबंधवति
तीरेगंगापदस्यकेवललक्षणांवृत्तिःलक्षितलक्षणंलक्षयति· यत्रेति· शक्यपरम्परासंबंधोलक्षितलक्षणेत्यर्थः एतदुदाहरणमाह· यथेति· यथाद्विरेफप

लक्षणातथाजातिवाचकस्यतद्विशिष्टेलक्षणातदुक्तं अनन्यलभ्योहिशब्दार्थइति· एवंशक्योनिरूपितः अथलक्ष्यपदार्थो
निरूप्यते· तत्रलक्षणाविषयोलक्ष्यः लक्षणाचद्विविधाकेवललक्षणालक्षितलक्षणाचेति· तत्रशक्यसाक्षात्संबंधः केवल
लक्षणा· यथागंगायांघोषइत्यत्रप्रवाह साक्षात्संबंधिनितीरेगंगापदस्यकेवललक्षणा· यत्रशक्यपरम्परासंबंधेनार्थान्तर
प्रतीतिस्तत्रलक्षितलक्षणायथाद्विरेफपदस्यरेफद्वयेशक्तस्यभ्रमरपदघटितपरम्परासंबंधेनमधुकरेवृत्तिः गौण्यपिलक्षि
तलक्षणैवयथासिंहोमाणवकइत्यत्रसिंहशब्दवाच्यसंबंधिक्रौर्यादितत्संबंधेनमाणवकस्यप्रतीतेः॥ प्रकारान्तरेणलक्षणा
त्रिविधाजहल्लक्षणाअजहल्लक्षणाजहदजहल्लक्षणाचेति· तत्रशक्यमनन्तर्भाव्ययत्रार्थान्तरप्रतीतिस्तत्र॥ ७ ॥ ७ ॥

दस्यशक्यरेफद्वयघटितभ्रमरपदद्वारातदर्थेवृत्तिरित्यर्थः ननुपदार्थस्यद्विविधइत्युक्तत्वाद्वृत्तिद्वैविध्यनिरूपणमयुक्तंगौण्याख्यवृत्तेर्विद्यमानतया
वृत्तेस्त्रैविध्येनपदार्थस्यत्रैविध्यादित्याशंक्यगौण्यावृत्तेर्लक्षितलक्षणान्तर्भावान्नोक्तदोषइत्याशयेनाह· गौण्यपीति· तल्लक्षणंगौण्यांयोजयति·
सिंहइतिप्रकारान्तरेणलक्षणांविभजते· प्रकारान्तरेणेति· तत्रतिसृषुलक्षणासुमध्येयत्रयस्मिन्पदेवाक्येवाशक्यार्थमनन्तर्भाव्यार्थान्तरस्यभानं· त
त्रजहल्लक्षणाशक्यसंबंधमात्रविषयावृत्तिरित्यर्थः यद्यपिगंगायांघोषः प्रतिवसतीत्यत्रगंगापदेशक्यार्थप्रवाहरूपमनन्तर्भाव्य॥ ७ ॥

मधुकरे·पे·५

तीररूपस्यार्थान्तरस्यप्रतीतिरस्त्वतोगंगापदंजहल्लक्षणोदाहरणंतथापितस्यसर्वैरुदाहृतत्वात्सिद्धवत्कृत्यावाक्यमुदाहरति·यथेति·अत्रास्मिन्वाक्ये अजहल्लक्षणांलक्षयतियत्रेति·शक्यार्थविशिष्टविषयावृत्तिरजहल्लक्षणेत्यर्थः॥उदाहरतियथेतितृतीयांलक्षयति·यत्रहीति·शक्यैकदेशमात्रवृत्तिरित्यर्थः॥उदाहरणमाह·यथेति·तत्वमसीत्यादिकमपिजहदजहल्लक्षणोदाहरणंसांप्रदायिकैराश्रितमित्याह॥यथावेति·वयंतुलक्षणांविनैवे

जहल्लक्षणायथाविषंभुंक्ष्वेत्यत्रस्वार्थंविहायशत्रुगृहेभोजननिवृत्तिर्लक्ष्यते· यत्रशक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिस्तत्रा। जहल्लक्षणायथाशुक्लोघटइत्यत्रहिशुक्लशब्दःस्वार्थशुक्लगुणमन्तर्भाव्यैवतद्वतिद्रव्येलक्षणयावर्तते· यत्रहिविशिष्टवाचकः शब्दः एकदेशंविहायएकदेशेवर्ततेतत्रजहदजहल्लक्षणायथासोयंदेवदत्तइति· अत्रहिपदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्यापदद्वयस्यविशेष्यमात्रपरत्वम् यथावातत्वमसीत्यादौतस्यसर्वज्ञत्वादिविशिष्टस्यत्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगादेकस्मिन्नर्थस्वरूपेलक्षणेतिसांप्रदायिकः वयन्तुब्रूमः सोयंदेवदत्तः तत्वमसीत्यादौविशिष्टवाचकपदानामेकदेशपरत्वेपिनलक्षणाशक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौविशेष्ययोः॥शक्त्युपस्थितयोरेवाभेदान्वयाविरोधात्· यथाघटोऽनित्यइत्यत्रघटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपियोग्यघटव्यक्त्यासहानित्यत्वान्वयः यत्रपदार्थैकदेशस्यविशेषणतयोपस्थितिः तत्रैवस्वातंत्र्येणोपस्थितयेलक्षणाभ्युपगमः यथाघटोनित्यइत्यत्रघटपदाद्घटत्वस्यशक्त्यास्वातंत्र्येणानुपस्थित्यातादृशोपस्थित्यर्थंघटपदस्यघटत्वेलक्षणाएवमेवतत्वमसीत्यादिवाक्येपिनलक्षणाशक्त्यास्वातंत्र्येणोपस्थितयो॥

(( कस्मिन्नर्थमेवंब्रूमइत्याह· वयंत्विति· ननुलक्षणामृतेएकदेशपरत्वंकुतइत्यतआह·शक्तीति·नन्विदंक्वदृष्टमित्यपेक्षायामाह·यथेति· स्वतंत्रस्यैवान्वययोग्यतायत्रपदार्थैकदेशस्यशक्त्यैवस्वातंत्र्येणोपस्थितिः नतत्रलक्षणायत्रतुतस्यशक्त्याविशेषणतयोपस्थितिस्तत्रतस्य ॥स्वातंत्र्योपस्थितयेलक्षणास्वीक्रियतइत्याह· यत्रेति· उक्तमर्थंप्रकृतेयोजयति·एवमिति·विपक्षेबाधकमाह·॥

अन्वयेति· तर्हितत्त्वमस्यादिवाक्ये किमित्याचार्यैर्लक्षणास्वीकृतेत्याशंक्याह· तत्त्वमसीति· तर्हिजहदजहल्लक्षणोदाहरणाभावात्किंनैवाभ्युपेयेत्याशंक्याह।।जहदजहल्लक्षणेतिवृत्तिणांयांतीत्यादिकमादिपदार्थः।। ननुशक्यैकदेशमात्रवृत्तित्वंचेत्तल्लक्षणंतच्चात्रनायातिश्वादेःकाकैकदेशत्वाभावादित्याशंक्यास्मन्मतेनेदमेतल्लक्षणंकिंतुशक्याशक्यगोचरवृत्तित्वंतच्चाकोदाहरणेस्तीत्याह· शक्येति· अन्येतुलक्षणांविनावाच्यैकदेशमात्रपरत्वापदानांनसंभवति।गेहेघटइत्यादावपिआधाराधेयाभावेनान्वितयोर्गेहघटयोस्तदवच्छेदकत्वेनगेहत्वघटत्वयोरन्वयात्।तत्त्वमस्यादिवाक्येपि

स्तत्त्वंपदार्थयोरभेदान्वयेबाधकाभावात्।।अन्यथागेहेघटःघटेरूपंघटमानयेत्यादौघटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतयातत्रापिघटादिपदानांविशेष्यमात्रपरत्वंलक्षणयैवस्यात्· तस्मात्तत्त्वमसीत्यादिवाक्येषुआचार्याणांलक्षणोक्तिरभ्युपगमवादेनबोध्या· जहदजहल्लक्षणोदाहरणंतुकाकेभ्योदधिरक्ष्यतामित्याद्येवतत्रशक्यकाकपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेणकाकेऽकाकेपिकाकशब्दस्यप्रवृत्तेःलक्षणाबीजंतुतात्पर्यानुपपत्तिरेवनत्वन्वयानुपपत्तिःकाकेभ्योदधिरक्ष्यतामित्यत्रान्वयानुपपत्तेरभावात्· गंगायांघोषइत्यादौतात्पर्यानुपपत्तेरपिसंभवात्· लक्षणाचनपदमात्रवृत्तिःकिंतुवाक्यवृत्तिरपि यथागंभीरायांनद्यांघोषइत्यत्रगम्भीरायांनद्यामितिपदद्वयसमुदायस्यतीरेलक्षणाननुवाक्यार्थस्याशक्यतयाकथंशक्यसंबंधरूपालक्षणा·।।

॥साक्षाद्-वच्छेदकत्वेनवान्वयस्यावश्यकतयाखण्डार्थत्वासिद्धिरित्याहुःसम्प्रतिलक्षणाबीजमाह·लक्षणेति·नन्वन्वयानुपपत्तेस्तद्बीजत्वाभावेकथंगंगायांघोषइत्यत्रलक्षणेत्याशंक्याह·गंगायामिति·।।यथाशक्तिःपदमात्रवृत्तिस्तथावृत्तित्वाल्लक्षणापीतिनैयायिकास्तान्निराचष्टेलक्षणाचेति·उक्तानुमानेशक्तित्वमुपाधिस्तथाचगंभीरायांनद्यांघोषइत्यादौनद्यादिपदमात्रेलक्षणायांविनिगमकाभावेनसमुदायएवलक्षणायास्त्वयाप्यवश्यमंगीकार्यत्वात्पदमात्रवृत्तित्वेवृत्तित्वंननियामकंअपितुशक्तित्वसतिवृत्तित्वंगुरुभूतमपीत्याशयेनाह।।यथेति· ननुपदस्यैवशक्तत्वेनतदर्थस्यशक्यतयातत्संबंधिनएवलक्ष्यत्वात्कथंवाक्यवृत्तिलक्षणाविषयत्वंवाक्यार्थसंबंधिनइत्याशंकते·नन्विति

॥शक्यशब्देनेहपदनिष्ठशक्ति।

पक्षः इतिसाध्यः इतिहेतुः इतिदृष्टांतः यत्रयत्रवृत्तित्वंतत्रतत्रशक्तित्वंइतिव्याप्तिर्सर्वत्रैनैवघटते॥ लक्षणायांवृत्तित्वमस्तिपरन्तुनास्ति·॥
लक्षणा परमात्रवृत्ति स्त्यावृत्तित्वात् यथाशक्तिः शक्तित्वमशक्तित्वंकेवलपदेवर्त्ततेःतएवसोपाधिकोहेतुः॥

ज्ञाप्योविवक्षितः।सचपदार्थद्वारावाक्यार्थोपीति·तत्संबंधिन्यपिलक्षणानविरुध्यतेइत्याहउच्यतेइतिपदेनस्वनिष्ठशक्त्यायज्ज्ञाप्यतेतत्संबंधोलक्षणातथाचेदंलक्षणमुभयसाधारणत्वादावश्यकमित्याह·शक्तिज्ञाप्यश्चेति·यथालोकेतथावेदेपिबोध्यमित्याह·एवमिति·वायुर्वै क्षेपिष्ठादेवतेत्यादीनामर्थवादवाक्यानांननुतत्रपदानांलक्षणाकृतोनस्यादित्यतआह·अर्थवादेति·तथाचार्थवादवाक्यस्यविधिनैकवाक्यत्वेपदैकवाक्यत्वव्यवहारस्तनैवफलितइत्याह·एवञ्चेति·नन्वर्थवादपदसमुदायस्यपदस्थानीयत्वेतस्यविधिवाक्येनैकवाक्यतायदिपदैकवाक्यतातर्हिक्ववाक्यैकवाक्यतेति·

उच्यते·शक्त्यायत्पदसंबंधेनज्ञाप्यतेतत्संबंधोलक्षणाशक्तिज्ञाप्यश्चयथापदार्थःतथावाक्यार्थोपीति·नकाचिदनुपपत्तिःएवमर्थवादवाक्यानांप्रशंसारूपाणांप्राशस्त्येलक्षणासोरो दीदित्यादिनिंदार्थवाक्यानांनिन्दितत्वेलक्षणाअर्थवादगतपदानांप्राशस्त्यादिलक्षणाभ्युपगमेएकेनपदेनलक्षणयातदुपस्थितिसंभवेपदांतरवैयर्थ्यंस्यात् एवंचविध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्यपदस्थानीयतयाविधिवाक्येनएकवाक्यत्वंभवतीत्यर्थवादपदानांपदैकवाक्यताक्वतर्हिवाक्यैकवाक्यतायत्रप्रत्येकंभिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकांक्षावशेनमहावाक्यार्थबोधकत्वंयथादर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यादिवाक्यानांसमिधोयजतीत्यादिवाक्यानांचपरस्परापेक्षितांगांगीबोधकवाक्यतयैकवाक्यता·।तदुक्तंभट्टपादैः स्वार्थबोधेसमाप्तानामंगांगित्वाद्यपेक्षयावाक्यानामेकवाक्यत्वंपुनःसंहत्यजायतेइति·एवंहिविधावपिपदार्थोनिरूपितःतदु

=पस्थितिश्चासति·॥

प्रसंगात्पृच्छति·केति·अर्थवादवाक्यानांस्वार्थेतात्पर्याभावेनप्राशस्त्यावबोधकतयास्वार्थावबोधकवाक्यत्वाभावाद्वाक्यैकवाक्यताऽयोग्यत्वेपिवाक्यार्थावबोधकयोर्वाक्ययोर्यत्रैकवाक्यत्वंतत्रवाक्यैकवाक्यत्वमित्याह·यत्रेतितदुदाहरणमाह·यथेति·एकवाक्यताप्रयोजकमाह·परस्परेति·दर्शपूर्णमासाभ्यामित्यादिवाक्यानामंग्यवबोधकत्वंसमिधोयजतिइडायजतीत्यादिवाक्यानामंगावबोधकत्वंतदवबोधकत्वादाकांक्षाविषयत्वंतत्त्वादेकवाक्यतेत्यर्थःस्वोक्तेऽर्थेभट्टपादाचार्यवाक्यंसंवादयति·तदुक्तमिति·॥

१( पदसंबंधेनशक्त्या=पदनिष्ठार्थसंबंधरूपयाशक्त्यायज्ज्ञाप्यते=स्वज्ञानजन्यज्ञानविषयीक्रियतेतत्संबंधोलक्षणेत्यर्थः॥पं·सू·११॥ पदार्थविषयकबोधजनकत्वरूपपदकार्यकारित्वेनपदरूपत्वमित्यर्थः॥मू·पं·

प्रथमंस्वार्थबोधेपर्य्यवसानंप्राप्तानांवाक्यानामंगांगिभावाद्यपेक्षयापुनर्मिलित्वावाक्यैकवाक्यत्वंसंपद्यतइत्यर्थःपदार्थनिरूपणमुपसंहरति· एवा।
मिति·क्रमप्राप्तामासत्तिंलक्षयति·तदिति·पदजन्यपदार्थस्मृतिरित्यर्थः॥ननुशाब्दबोधउक्तासत्तिर्हेतुरुततज्ज्ञानमित्यपेक्षायांसैवहेतुर्नतज्ज्ञानमित्या
ह·साचेति· अत्रकिंप्रमाणमित्यतआह· तथैवेति·परस्परान्वययोग्यपदार्थोपस्थितिसत्त्वेशाब्दबोधोभवति तदभावेनेत्यन्वयव्यतिरेकदर्शनात्·य
द्यामासत्त्वासत्तिः शाब्दबोधहेतुःकास्तितिरित्याशंक्याह·साचेति·अत्रमानमाह·तथैवेति·यथाशाब्दबोधे आकांक्षादिकंकारणमेवमाकांक्षादिनाज्ञातो
वान्तरवाक्यार्थबोधोमहावाक्यार्थज्ञानेकारणमित्याह· एवमिति·यतोऽवान्तरवाक्यार्थबोधसत्त्वेमहावाक्यार्थबोधोभवति· तदभावेशाब्दबोधोनेत्य

साचशाब्दबोधेहेतुः तथैवान्वयव्यतिरेकदर्शनात्· एवंमहावाक्यार्थबोधेऽवांतरवाक्यार्थबोधोहेतुः तथैवान्वयाद्यवधार
णात्·॥क्रमप्राप्तमतात्पर्य्यंनिरूप्यते·तत्रतत्प्रतीतीच्छयोच्चरितत्वंनुतात्पर्य्यम्· अर्थज्ञानशून्येनपुरुषेणोच्चरिताद्वेदादर्थ।
प्रत्ययाभावप्रसंगात्· अयमव्यापकोऽप्यन्नइतिविशेषदर्शनेनतत्रतात्पर्य्यभ्रमस्याप्यभावात्· नचेश्वरीयतात्पर्य्यज्ञाना
त्· तत्रशाब्दबोधइतिवाच्यम् ईश्वरानंगीकर्तुरपितद्वाक्यार्थप्रतिदर्शनात् उच्यतेतत्प्रतीतिजननयोग्यत्वंतात्पर्य्यम्·॥ ६॥

न्वयव्यतिरेकाववधार्य्येतअतःसहेतुरित्याह तथैवेति·क्रमप्राप्तंतात्पर्य्यनिरूपणंप्रतिजानीते·क्रमेति·तत्रनिरूपणविषयीभूते·तात्पर्य्येसतिमो
निश्लोकेऽव्याप्तिदोषंसिद्धवत्कृत्याव्याप्तेरुदाहरणांतरमाह·अर्थेति· ननुतस्यार्थज्ञानरहितत्वेप्यनेनतदर्थप्रतीतीच्छयाएतद्वेदवाक्यमुच्चारित
मितितदीयतात्पर्य्यभ्रमात्तदर्थज्ञानंभविष्यतीत्याशंक्याह· अयमिति·विशेषदर्शनेनभ्रमविरोधव्यापकनिष्ठाप्युत्पत्तिज्ञानेननजुमास्तुतात्स
र्य्यज्ञानादेववाक्यार्थबोधईश्वरीयतात्पर्य्यज्ञानात्संभविष्यतितस्यसाक्षात्प्रेरकत्वाभावेपिप्रेरकतामात्रेणोच्चारयितृत्वसम्भवादित्याशंकापरिहर
ति·नचेति·ईश्वरानंगीकर्तुरपिसांख्यमीमांसकादेर्वैदिकवाक्यार्थप्रत्ययोपलब्धेरित्याह·ईश्वरेति·तर्हिकीदृशंतात्पर्य्यंभवतांविवक्षितमित्यपे

अर्थज्ञानशून्यपुरुषवाक्येत्यर्थः॥ पं·६ ॥ अर्थज्ञानशून्यपुरुषेणोच्चारितवेदादिवाक्यश्रोतरिपुरुषे· मू· पं ७ ॥ ((क्षायामाह उच्यतइति·॥

शुनकः इत्यस्मात् स्थानात्॥पं·१॥शाब्दप्रतीतिमात्रेत्यर्थः।पं·११॥शाब्दनिष्ठयोग्यतायाः॥पं·१२॥

पदार्थसंसर्गानुभवजननयोग्यत्वमित्यर्थः अतएवयद्यत्संसर्गप्रतीतिजननयोग्यंवाक्यंप्रयुज्यतेतत्तत्परमेवव्यवह्रियतइत्याह·गेहेघटइति·उक्त
तात्पर्यलक्षणस्यानेकार्थपरप्रयोगेतिव्याप्तिंशंकते·नन्विति·श्वेतोगच्छतीत्यादिवाक्यमादिपदार्थः॥विशेषणप्रदानेनदोषोद्धारान्नेत्याह·नेति
विशेषणप्रदानेफलितंतात्पर्यलक्षणमाह·तथाचेति एवंचसैंधवमानयेतिवाक्यमश्वप्रतीतिजननयोग्यमपिभोजनप्रकरणप्रयुक्तत्वाल्लवणा
न्यप्रतीतीच्छयानुच्चरितत्वेननाश्वसंसर्गज्ञानेजनकमितिभावः पूर्वोक्ताव्याप्तिदोषग्रस्तत्वमप्यस्यलक्षणस्यनास्तीत्याह·शुकादीति·ननूभयप्र
तीतीच्छयोच्चरितेलवणान्यप्रतीतीच्छयानुच्चरितत्वाभावादव्याप्तिरित्याशंक्यपरिहरति·नचेति·उभयप्रतीतीच्छयोच्चरितत्वेनतदन्यमात्रप्र

गेहेघटइतिवाक्यंगेहघटसंसर्गप्रतीतिजननयोग्यंनतुपटसंसर्गप्रतीतिजननयोग्यमिति·तद्वाक्यंघटसंसर्गपरंनतुप
टसंसर्गपरमित्युच्यते·ननुसैंधवमानयेत्यादिवाक्यं·यदालवणानयनप्रतीतीच्छयाप्रयुक्तंतदाश्वसंसर्गप्रतीतिजनने
स्वरूपयोग्यतासत्वाल्लवणपरत्वज्ञानदशायामप्यश्वादिसंसर्गज्ञानापत्तिरितिचेन्न·तदितरप्रतीतीच्छयानुच्चरितत्वस्या
पितात्पर्यप्रतिविशेषणत्वात्·तथाच·यद्वाक्यंयत्प्रतीते जननस्वरूपयोग्यत्वेसति यदन्यप्रतीतीच्छयानोच्चरितंतद्वाक्यंतत्सं
सर्गपरमित्युच्यते·शुकादिवाक्येऽप्युत्सन्नोच्चरितवेदवाक्यादौचतत्प्रतीतीच्छायाएवाभावेनतदन्यप्रतीतीच्छयोच्चरितत्वा
भावेनलक्षणसत्वान्नाव्याप्तिः नचोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वस्यविवक्षितत्वात्·
उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिकाशक्तिः अस्माकंतुमतेसर्वत्रकारणतायाःशक्तेरेवावच्छेदकत्वान्नकोपिदोषः॥

तीतीच्छयानुच्चरितत्वस्यसत्वादित्याह·तदन्यमात्रेति·तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वमुभयप्रतीतीच्छयोच्चरितत्वमेवेतिभावः नचैवमेकप्रती
तीच्छयोच्चरितेऽव्याप्तिरितिवाच्यम्· तदन्ययावत्प्रतीतीच्छयानुच्चरितत्वमित्यर्थस्यतदानींविवक्षितत्वात्·ननूक्तप्रतीतिजननयोग्यतायाः किमव
च्छेदकंतत्प्रतीतीच्छयोच्चरितत्वमितिचेन्न·अप्युत्सन्नोच्चरितवेदवाक्यादावव्याप्तेरित्याशंक्याह·उक्तेति· नचशक्तिकल्पनेगौरवंशंक्यंसर्वत्रतस्याएवा
स्मन्मतेतुक्लृप्तत्वादित्याह·अस्माकंत्विति·॥

पं·६मू·॥तदन्यदेवतदन्यमात्रंतदन्यस्यैवप्रतीतीच्छयानुच्चरितत्वस्येत्यर्थः यत्तुभाभ्यांतच्छब्दाभ्यांलवणस्यैवग्रहणंतदाश्वलवणोभयपरसैंधवमानयेतिवाक्येऽव्याप्तिशंकोपपन्ना
तन्निराकरणंचोपपन्नंभवतियदितूभाभ्यांतच्छब्दाभ्यांप्रकृताश्वलवणयोर्ग्रहणंतदासैंधवमानयेतिवाक्येऽश्वलवणोभयपरत्वदशायामव्याप्तिशंकादिकमनुपपन्नमितिभावः॥मू·पं·६॥

तथाचयथावह्न्यादिनिष्ठदाहादिजनकतावच्छेदकाशक्तिरेवतथातात्पर्य्यनिष्ठशाब्दजनकतावच्छेदिकाशक्तिरेवेतिनकोपिविरोधइत्य
र्थः ननुतात्पर्य्यस्यशाब्दज्ञानहेतुत्वेतन्निरासपरविवरणवाक्यविरोधइत्याशंक्योक्तरीत्यातात्पर्य्यज्ञानस्यशाब्दज्ञानहेतुत्वसिद्धौतद्वाक्यम
न्यथानेयमित्याह·एवमिति·विपक्षबाधकमाह·अन्यथेति·तद्वाक्यस्यास्मदुक्ततात्पर्य्यनिराकरणपरत्वे·अभेदरत्नकृन्मतमाह·केचित्त्विति·शा
ब्दज्ञानमात्रंप्रतिनहेतुरित्यर्थः॥शाब्दज्ञानविशेषंप्रतितु·हेतुरेवेत्याह·तात्पर्येति·तादृशशाब्दज्ञानंप्रतीतस्यहेतुत्वमन्वयव्यतिरेकसिद्धमि
त्याह॥इदमिति॥केचित्पदेनास्मिन्मतेस्वस्यानभिमतिःसूचितातद्बीजंतुशाब्दज्ञानेतात्पर्य्यज्ञानजन्यतावच्छेदकेशाब्दज्ञानत्वेलाघवंता॥

एवंतात्पर्य्यस्यतत्प्रतीतिजनकत्वरूपस्यशाब्दज्ञानजनकत्वेसिद्धेचतुर्थवर्णकेतात्पर्य्यस्यशाब्दज्ञानहेतुत्वनिराकरणवाक्यं
तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यनिराकरणपरम्· अन्यथातात्पर्य्यनिश्चयफलकवेदान्तविचारवैयर्थ्यप्रसंगात्· केचित्तु
शाब्दज्ञानत्वावच्छेदेननतात्पर्य्यज्ञानंहेतुरित्येवंपरंचतुर्थवर्णकवाक्यंतात्पर्य्यसंशयविपर्य्ययोत्तरशाब्दज्ञानविशेषेचतात्प
र्यज्ञानंहेतुरेव·इदंवाक्यमेतत्परमुतान्यपरमितिसंशयेतद्विपर्ययेचतदुत्तरवाक्यार्थविशेषनिश्चयस्यतात्पर्य्यनिश्चयंवि
नानुपपत्तेरित्याहुः· तच्चतात्पर्य्यंवेदेमीमांसापरिशोधितन्यायादेवावधार्य्यतेलोकेतुप्रकरणादिना॥तत्रलौकिकवाक्यानांमाना
न्तरावगतार्थानुवादकत्वंवेदेतुप्रमाकार्थस्यापूर्वतयानानुवादकत्वं॥

त्पर्य्यसंशयविपर्ययोत्तरशाब्दज्ञानत्वेगौरवम्·तादृशतात्पर्य्याव
धारणंकिंवेदेलोकेवाएकमेवोतपृथगित्यपेक्षायामाह·तच्चेति·मीमांसापूजितविचारःपूर्वोत्तरभेदेनद्विविधःआदिपदेनोपपदादिकंग्राह्यं·लोकवेद
योर्विशेषान्तरमप्याह·तत्रेतिलोकवेदयोर्मध्येवाक्यार्थस्यापूर्वतयामानान्तरानवगमतयातद्वाक्यानांनानुवादकत्वंअथलोकवेदयोःसाम्यांशमाहुः

चतुर्थसूत्रस्ययाभाष्यव्याख्यातदुपरियापंचपादिकातदुपरियद्विवरणंतत्रेत्यर्थः॥पं·मू·८॥ ॥तात्पर्यसंशयविपर्ययविरोधिज्ञानरूपतात्पर्यज्ञानोत्तरशाब्दज्ञानविशेषे·पं·६
तर्कात्मकमानसव्यापारविशेषाभिन्नमीमांसयापरिशोधितोनिर्दुष्टःसहकृतोवायोन्यायोऽनुमानंतस्मादित्यर्थः॥पं·४॥ एतद्वाक्यस्यनास्तितात्पर्य्यमितितद्विपर्य्ययमस्ति·पं·५
शाब्दज्ञानत्वमवच्छेदःकार्यतावच्छेदकंयस्मिञ्छाब्दज्ञानेतत्तथातेननिरूपितत्वंतृतीयार्थःतथाचशाब्दज्ञानत्वावच्छिन्नजन्यतानिरूपितहेतुतावत्तात्पर्यज्ञानमित्यर्थः॥पं·मू·६॥

लौकिकवाक्यानामर्थानांघटपटादीनांउपासनाप्रत्यक्षप्रमाणादिभिर्ज्ञायते = अतएवतेषामनुवादकं·पं·३॥

तत्रेति·लोकेवेदेचेतितत्रपदविवरणं गामानयपशुमालभेतेत्यादिकानांकार्य्यपराणांकार्य्यान्वितेस्वार्थेशक्तानांयथाप्रामाण्यंतथासिद्धवस्तुपरा
णामपिप्रामाण्यंनतुप्राभाकराणामिवकार्यपराणामेवेत्यर्थः तत्रहेतुमाह·पुत्रइति·अन्यथावेदान्तवाक्यानांब्रह्मणिप्रामाण्यंनस्यादित्याहअतए
वेति·यतएवसिद्धार्थानांवाक्यानांप्रामाण्यमतएवेत्यर्थः।नन्वस्तुकार्य्यपराणामेवप्रामाण्यंवेदान्तानामपिप्रतिपत्तिविधिपरत्वेनतद्भविष्यतित
स्मात्किमर्थंक्लिष्टकल्पनयासिद्धार्थेपदानांसामर्थ्यमास्थीयतइत्याशंक्याह·यथाचैतदिति·सिद्धार्थेपदानांसामर्थ्यावधारणात्·यथाकार्य्यसं
स्पर्शमन्तरेणब्रह्मणिवेदान्तानांप्रामाण्यंतथेत्यर्थः॥स्वाभिमतंवेदप्रामाण्यंदर्शयितुंनैयायिकमीमांसकयोर्मतंदर्शयति·तत्रेतिलोकवेदयो

तत्रलोकेवेदेचकार्य्यपराणामिवसिद्धार्थानामपिप्रामाण्यं पुत्रस्तेजातइत्यादिषुसिद्धार्थेपिपदानांसामर्थ्यावधारणात्·अ
तएववेदान्त·वाक्यानांब्रह्मणिप्रामाण्यंयथाचैतत्तथाविषयपरिच्छेदेवक्ष्यतेतत्रवेदानांनित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन
प्रामाण्यमितिनैयायिकाःवेदानांनित्यत्वेननिरस्तसमस्तपुंदूषणतयाप्रामाण्यमित्यध्वरमीमांसकाः अस्माकंतुमतेवेदान
नित्याउत्पत्तिमत्वात्· उत्पत्तिमत्वंचास्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदइत्यादिश्रुतेः नापिवेदानांत्रिक्षणावस्थायि
त्वंयएववेदोदेवदत्तेनाधीतःसएववेदोमयाधीतइत्यादिप्रत्यभिज्ञाविरोधात्·अतएवगकारादिवर्णानामपिनक्षणिकत्वं

प्रत्यभिज्ञाविरोधात्

36

र्मध्येकर्तृदोषादप्रामाण्यप्रसक्तिमाशंक्योक्तं·सर्वज्ञेति·सर्वज्ञत्वंमन्वादीनामप्यस्त्यतउक्तंनित्येतिप्रणीतत्वाभिधानेन ((सोयंगकारइति
स्वमताद्वैलक्षण्यंबोधितुंस्वमतेवेदस्योत्पत्तिमत्वेपिवेदःकल्पान्तरीयानुपूर्वीविजातीयानुपूर्वीकईश्वरप्रणीतइत्यनंगीकारात्·नित्यत्वेनेति·वे
दानामनित्यत्वाभ्युपगमेपुंप्रणीतत्वावश्यंभावात्तस्येश्वरत्वेपिभक्तपक्षपातादिसंभवाद्दोषद्दप्रणीतागमवद्वेदेपिदोषप्रसंगात्तस्यनित्यत्वेननिरस्त
समस्तपुंदूषणतयाप्रामाण्यमित्यर्थः स्वमतमाह·अस्माकंत्विति·तुशब्दउक्तपक्षाभ्यांवैलक्षण्यद्योतनार्थः।तत्वंचानित्यत्वेपिप्रलयकालपर्यन्तावस्था
यित्वेसतिपुंदोषविनिर्मुक्तत्वं।तच्चश्रुतिसिद्धमतोनस्वरूपासिद्धोहेतुरित्याह·उत्पत्तिमत्वंचेति·ऋचःसामानिजज्ञिरेतस्मादित्यादिश्रुतिरादिपदार्थः·वेदान

वेदवाक्यार्थपूर्वः अज्ञातत्वेसतिवेदाध्ययनानन्तरार्थज्ञानत्वंभवतिअतएववेदवाक्यार्थस्यअपूर्वता॥ ॥उत्पत्तिमत्वंच॥२॥ ((नित्यइत्युक्तेः॥नैयायिकाभि॥१॥

मतत्रिक्षणावस्थायित्वंवेदानांकिंतवाप्यनुमतमित्यपेक्षायांयथायादृशम् मीमांसकाभिमतंवेदानामतेषांनित्यत्वंयथास्मदनुमतंतथानैयायिकाभिमतेतद्भिन्नंतत्रिक्षणावस्थायित्वमपितथात्वमपीत्याह॥नापीति·वर्णसमुदायगर्भवेदस्यस्वरूपतःक्षणिकत्वमपाकृत्यवर्णद्वारापितन्निराकरोति·अतएवेति·यतःप्रत्यभिज्ञाविरोधाद्वेदानामक्षणिकत्वम्·अतएवसोयमित्यादिप्रत्यभिज्ञाविरोधाद्वर्णानामक्षणिकत्वमित्यर्थः॥नन्वेवंतर्हिकथंवेदानामुत्पत्तिमत्वंतच्चानित्यत्वमित्याशंक्याह·तथाचेति·वेदानांस्वरूपतोवर्णद्वाराचक्षणिकत्वाभावेसतिनन्वेवंतर्हिसर्वदावर्णानामभिव्यक्तिःकुतोनेत्याशंक्याहानुच्चारणेति·ननूत्पन्नोगकारोनष्टोगकारइतिप्रत्ययान्मध्येऽप्युत्पत्त्यादिकंकथंनास्थीयतइत्याशंक्यपरिहरतिउत्पन्नइति·वर्णेति·प्रा

तथाचवर्णपदवाक्यसमुदायस्यवेदस्यवियदादिवत्·सृष्टिकालीनोत्पत्तिमत्वंप्रलयकालीनध्वंसप्रतियोगित्वंचनतुमध्येवर्णानामुत्पत्तिविनाशावनन्तगकारकल्पनेगौरवात्·अनुच्चारणदशायांवर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यंजकाभावान्नविरुध्यते·अन्धकारस्थलेघटानुपलंभवदुत्पन्नोगकारइत्यादिप्रत्ययःसोयंगकारइतिप्रत्यभिज्ञाविरोधादप्रमाणंवर्णाभिव्यक्तिजनकध्वनिगतोत्पत्तिनिरूपितपरम्परासंबंधविषयत्वेनप्रामाणंवा·तस्मान्नवेदानांक्षणिकत्वं·ननुक्षणिकत्वाभावेपिवियदादिप्रपंचवदुत्पत्तिमत्वेनपरमेश्वरकर्तृकतयापौरुषेयत्वादपौरुषेयत्वंचवेदानामिति·तत्रसिद्धान्तोभज्येतेति·चेन्न।न हितावत्पुरुषेणोच्चार्यमाणत्वंपौरुषेयत्वंगुरुमतेपि·अध्यापकपरंपरयापौरुषेयत्वापत्तेः नापिपुरुषाधीनोत्पत्तिकत्वंपौरुषेयत्वम्·

सोघटोनष्टोरक्तो·घटउत्पन्नइति·प्रतीतिवदुत्पत्तिविनाशवद्ध्वनिसंबंधादुक्तप्रत्ययःपरम्परासंबंधविषयत्वात्प्रमाणंचेत्यर्थः उपसंहरति·तस्मादिति·अथापसिद्धान्तंमीमांसकःशंकते·नन्विति·अस्माकंमतेवेदानामुत्पत्तिमत्वेपिपौरुषेयत्वाभावान्नापसिद्धान्तइत्याशयेनाह·नेति·किंविधं·पौरुषेयत्वमभिप्रेत्यास्मन्मते·तदापाद्यते·किंपुरुषेणोच्चार्यमाणत्वं·किंवापुरुषाधीनोत्पत्तिकत्वमिति·विकल्प्याद्यम् निराकरोति·नहीति·मौनिश्लोकादेरपौरुषेयत्वापत्तिरपिबोध्या·द्वितीयप्रत्याह·नापीति·वेदाःपौरुषेयावाक्यत्वाद्भारतादिवदितिनैयायिकाभिमतेपौरुषेयत्वानुमानेऽस्मदाद्यभ्युपेतपौरुषे

यत्वसाधनादस्मदादिनासिद्धसाधनत्वापत्तेरित्याह· नैयायिकेति· तर्हिकिंविधंपौरुषेयत्वंयदभावाद्भवतांमतउत्पत्तिमतांवेदानामपौरुषेयत्वंसिद्धतीत्याशंकांपरिहरति· किंत्विति· सजातीयोच्चारणस्यानपेक्षायस्यतत्तथाविधोच्चारणस्यविषयत्वमित्यर्थः॥ तथाचोक्तविधपौरुषेयत्वेसतिइतिउक्तहेतोर्नोक्तपौरुषेयत्वंवेदस्येत्यर्थः॥ अस्तिचपौरुषेयेष्वेतल्लक्षणमित्याह· भारतादीनांत्विति॥ इतिश्रीपरमहंसपरिव्राजकाचार्य्यबालगोपालतीर्थश्रीपादशिष्यदलवंशावतंसरामकुमारसूनुधनपतिसूरिसू तशिवदत्तविरचितायांवेदान्तपरिभाषार्थदीपिकायामागमपरिच्छेदः॥ ४॥ ४ ॥ अथागमनिरूपणानंतरमर्थापत्तिनिरूपणंप्रतिजानीते इदानीमिति·॥ तत्रार्थापत्तेरागमनिरूपणानंतरनिरूपणविषयत्वेसतिप्रमाकरणस्यप्रमाणत्वात्प्रमारूपार्थो

नैयायिकाभिमतपौरुषेयत्वानुमानेऽस्मदादिनासिद्धसाधनत्वापत्तेः किंतुसजातीयोच्चारणानपेक्षोच्चारणविषयत्वम्· तथाचसर्गाद्यकालेपरमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकंवेदंरचितवान्· नतुतद्विजातीयंवेदमितिनसजातीयोच्चारणानपेक्षोच्चारणविषयत्वंवेदानां· भारतादीनांतुसजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति· तेषांपौरुषेयत्वम् एवंपौरुषेयापौरुषेयभेदेनागमोद्विधानिरूपितः॥ ४ ॥ इतिवेदान्तपरिभाषायामागमपरिच्छेदः॥ ४ ॥ इदानीमर्थापत्तिर्निरूप्यते· तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः॥ तत्रोपपाद्यज्ञानंकरणंउपपादकज्ञानंफलं॥ येनविनायदनुपपन्नंतत्तत्रोपपाद्यं· यस्याभावेयस्यानुपपत्तिस्तत्तत्रोपपादकम्॥ यथारात्रिभोजनेनविनादिवाऽभुंजानस्यपीनत्वमनुपपन्नमितितादृशपीनत्वमुपपाद्यं॥ यथावारात्रिभोजनस्याभावेतादृशपीनत्वस्यानुपपत्तिरितिरात्रिभोजनमुपपादकं· रात्रिभोजनकल्पनारूपायां।

ति·षष्ठीसमासेन॥

पत्तेर्लक्षणमाह· उपपाद्येति· उपपादकज्ञानंकरणमुपपाद्यज्ञानंफलमितिभ्रमव्यासत्यर्थमाह॥ तत्रेति· तयोर्ज्ञान प्रमितावर्थस्यापत्तिःकल्पने योर्मध्येउपपादकाभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वमित्युपपाद्यलक्षणमाह· येनेति· तत्रेति· तेनेत्यर्थः उपपाद्याभावव्याप्याभावप्रतियोगित्वमित्युपपादकलक्षणमाह· यस्येति· तत्रेतितस्येत्यर्थः॥ उपपाद्योदाहरणमाह·॥ यथेति· उपपादकोदाहरणमाह·॥ यथावेति· प्रमितावर्थापत्तिशब्दप्रवृत्ति

रात्रिभोजनेति· १ निमित्तमाहरात्रीतितत्करणेत न्निमित्तमाह·॥

कल्पनेति· एवंलक्षणलक्षितांतांविभजे· साचेति अर्थापत्तिनिरूपणस्यप्रपंचमिथ्यात्वादिसिद्ध्यर्थत्वात्तदनुरूपमुदाहरणंवक्तव्यमित्याशयेनाह· दृष्टार्था
पत्तियथेति· प्रतिपन्नस्यप्रतीतस्यतत्रैवपुरोवर्तिन्येवसत्यत्वेरजतस्येतिसंबध्यते अनुपपन्नमितिहेतो· निषिध्यमानत्वंरजतस्यमिथ्यात्वंकल्पयति· किंतदि
त्यतआह· सद्भिन्नत्वमिति· मीमांसकमतानुसारेणाह· यथावेति· तत्रद्वयोर्मध्येपदाध्याहारमतमनुसृत्याह· यथेति· वैदिकोदाहरणमाह· यथावेति· चतुर्थी

अर्थापत्तिशब्दोवर्ततेकल्पनाकरणपीनत्वादिज्ञानेत्वर्थस्यापत्तिःकल्पनायस्मादितिबहुव्रीहिसमासेनवर्त्ततेइतिफलकर
णयोरुभयोस्तत्रप्रयोगः साचार्थापत्तिर्द्विविधादृष्टार्थापत्तिःश्रुतार्थापत्तिश्चेतिः तत्रदृष्टार्थापत्तिर्यथाइदंरजतमितिपुरोवर्त्तिनि
प्रतिपन्नस्यरजतस्यनेदंरजतमिति· तत्रैवनिषिध्यमानत्वंसत्यत्वेऽनुपपन्नमिति· रजतस्यसद्भिन्नत्वंसत्यत्वात्यंताभाववत्त्वंवामि
थ्यात्वंकल्पयतीति· श्रुतार्थापत्तिर्यथायत्रश्रूयमाणवाक्यस्यस्वार्थानुपपत्तिमुखेनार्थांतरकल्पनंयथातरतिशोकमात्मविदित्यत्र
श्रुतस्यशोकशब्दवाच्यबंधजातस्यज्ञाननिवर्त्यत्वस्यान्यथानुपपत्त्याबंधस्यमिथ्यात्वंकल्प्यतेयथावाजीवीदेवदत्तोगृहेनेतिवा·
क्यश्रवणानंतरंजीविनोगृहासत्त्वंबहिःसत्त्वंकल्पयति· श्रुतार्थापत्तिश्चद्विविधाअभिधानानुपपत्तिरभिहितानुपपत्तिश्च· तत्रयत्रा
वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्यान्वयाभिधानोपयोगिपदांतरंकल्प्यतेतत्राभिधानानुपपत्तिर्यथाद्वारमित्यत्रपिधेहीत्यस्य
ध्याहारः यथावाविश्वजितायजेतेत्यत्रस्वर्गकामपदाध्याहारः ननुद्वारमित्यादावन्वयाभिधानात्पूर्वमिदमन्वयाभिधानंपिधानोप
स्थापकपदंविनानुपपन्नमिति· कथंज्ञानमितिचेन्न· अभिधानपदेनकरणव्युत्पत्त्यातात्पर्यस्यविवक्षितत्वात्· तथाचद्वारकर्मकपि

धानक्रियासंसर्ग·॥

ध्यायस्येतः स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादितिसूत्रेस्वर्गकामपदाध्याहारस्यदर्शितत्वादितिभावः ननुद्वारकर्मकंपिधानमित्यन्वयाभिधानात्प्राक्पिधानो
पस्थापकंपदंविनाद्वारकर्मकं पिधानमित्यन्वयाभिधानेनोपपद्यतइतिकथंज्ञानमितिशंकतेनन्विति· अत्रभावव्युत्पत्तिर्नाभिप्रेतेतिपरिहरति· नेति· अ
भिधीयतेनेनेतिकरणव्युत्पत्त्याभिधानपदेनता त्पर्यस्यविवक्षितत्वात्· तात्पर्यस्यविवक्षितत्वेसतीदंसमाधानंफलितमित्याह· तथाचेति· द्वारकर्मक·

ज्ञानस्य·पं·४

क्रियासंसर्गावबोधनतात्पर्येणानेन द्वारमित्युच्चरितमिति ज्ञानवतोन्वयाभिधानात्पूर्वावस्थायामपि तथाज्ञानं संभाव्यत इत्यर्थः॥ द्वितीयाक्ष दृष्टेत्यपेक्षाया माह·अभिहितेति·तत्रापि कुत्रेत्यत आह·यथा स्वर्गकाम इति·नैयायिकमतमाशंक्य परिहरति·न चेति·अर्थापत्तेरन्वयिन्यंतर्भावः किंवा व्यतिरेकिणीति विकल्प्याद्यमस्याह·अन्वयेति·द्वितीयं निराचष्टे·व्यतिरेकिण इति·अनुमिनोमीत्यनुव्यवसायाभावोपि व्यतिरेकिणोनुमानत्वेनुपपन्न इत्याह·अत एवेति·यतो व्यतिरेकिणोनुमानता नास्त्यत एव कीदृशात्तस्यानुव्यवसाय इत्याशंक्याह·किं त्विति·तथा चार्थापत्तेरावश्यकत्वान्न गौरवमाशंकनीयमिति भावः॥ नन्वि-

परत्वं पिधानोपस्थापकपदं विनानुपपन्नमिति ज्ञानं तत्रापि संभाव्यते· अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोर्थोनुपपन्नत्वेन ज्ञातः सन्नर्थांतरं कल्पयति तत्र द्रष्टव्या यथा स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यत्र स्वर्गसाधनत्वस्य क्षणिकतया साक्षात् यागगतस्यानुपपत्त्यामध्यवर्त्यपूर्वं कल्प्यते· न चेयमर्थापत्तिरनुमानेंतर्भवितुमर्हति अन्वयव्याप्यज्ञानेनान्वयिन्यंतर्भावात्· व्यतिरेकिणश्चानुमानत्वं प्रागेव निरस्तं· अत एवार्थापत्तिस्थलेऽनुमिनोमीति नानुव्यवसायः किंतु अनेनेदं कल्पयामीति· नन्वर्थापत्तिस्थले इदमनेन विनानुपपन्नमिति ज्ञानं करणमित्युक्तं· तत्र किमिदं तेन विनानुपपन्नत्वं तदभावव्यापकाभावप्रतियोगित्वमिति ब्रूमः एवमर्थापत्तेर्मानांतरत्वसिद्धौ व्यतिरेकिनानुमानांतरं पृथिवीतरेभ्यो भिद्यते इत्यादौ गंधवत्त्वमितरभेदं विनानुपपन्नमित्यादिज्ञानस्य करणत्वात्· अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति॥३॥

इदमनेन विनानुपपन्नमिति ज्ञानं व्यतिरेकव्याप्तिज्ञानमेव उक्तं स्यात्· आद्ये तस्यानुमितिमतिक्लृप्तकरणत्वे नानुमानत्वापत्तिः न द्वितीयस्तस्य निरूपयितुमशक्यत्वादित्याशयेनाशंकते·नन्विति·अस्तु वा व्यतिरेकव्याप्तिज्ञानमेव तत् तथापि तथाविधानुव्यवसायबलादर्थापत्तिकरणत्वमविरुद्धं तस्यानुमितिकरणत्वं दूषितं चेत्याशयेनाह·तदभावेति· एवमर्थापत्तेरावश्यकत्वाद्व्यतिरेकिणोनुमानत्वं न कल्पनीयमित्याह· एवमिति· तर्हि तदुदाहरणे का गतिरित्याशंक्य हेतुमाह·पृथिवीति·पृथिवी॥तरेभ्यो भिद्यते गंधवत्त्वाद्यन्नैवं तन्नैवं यथा जलमित्यादौ अत्राप्यर्थापत्तिस्साधकोऽनुव्यवसाय इत्याह·अत एवेति॥४॥

व्यतिरेकव्याप्तिज्ञानस्य·पं·३

38

भावपदार्थाघटादयःतेषामनुभवकरणचक्षुरादिरस्ति चक्षुरादिकरणमस्तिपरन्तुज्ञानस्वरूपताकरणत्वंनास्तिचक्षुरादेःज्ञानत्वव्यवहारस्तावप्यस्ति

॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिसुतशिवदत्तकृतायांवेदान्तपरिभाषार्थदीपिकायामर्थापत्तिपरिच्छेदः॥अथक्रमप्राप्तानुपलब्धिप्रमाणनिरूपणंप्रतिजानीतेइदानीमितितल्लक्षणमाह·ज्ञानेति·अजन्यांतंज्ञानकरणाजन्येतिपदंभावानुभवकरणेचक्षुरादावतिव्याप्तिवारणायाभावपदमित्यभिप्रेत्यासाधारणपदआवश्यमाह·अदृष्टादाविति· ननुज्ञानपदंविहायानुभवपदप्रदानेकिंफलमित्याशंक्याह·अभावेति·अजन्यांतस्यवैयर्थ्यमाशंक्यपरिहरति·नचेति·अभावग्राहकयोग्यानुपलब्धेरभावानु

॥इतिश्रीवेदांतपरिभाषायामर्थापत्तिपरिच्छेदः॥५॥इदानींषष्ठंप्रमाणंनिरूप्यते·ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपंप्रमाणंअनुमानजन्यातींद्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यांतंपदम्·अदृष्टादौसाधारणकारणेतिव्याप्तिवारणायासाधारणेतिपदं· अभावस्मृत्यसाधारणहेतुसंस्कारेतिव्याप्तिवारणायानुभवेतिविशेषणम्· नचातींद्रियाभावानुमितिस्थलेप्यनुपलब्ध्यैवाभावोगृह्यतांविशेषाभावादितिवाच्यं·धर्माधर्माद्यनुपलब्धिसत्वेपितदभावानिश्चयेनयोग्यानुपलब्धेरेवाभावग्राहकत्वात्· ननुकेयंयोग्यानुपलब्धिः·किंयोग्यस्यप्रतियोगिनोऽनुपलब्धिरुतयोग्याधिकरणेप्रतियोग्यनुपलब्धिः नाद्यःस्तंभेपिशाचादिभेदस्याप्रत्यक्षत्वापत्तेः·नांत्यः·आत्मनिधर्माधर्माद्यभावस्यापिप्रत्यक्षतापत्तेरितिचेन्न·योग्याचासावनुपलब्धिश्चेतिकर्मधारयाश्रयणात्· अनुपलब्धेर्योग्यताचतर्कितप्रतियोगिसत्वप्रसंजितप्रतियोगिकत्वंयस्याभावोगृह्यतेतस्ययःप्रतियोगीतस्यसत्वेनाधिकरणेतर्कितेनप्रसंजनयोग्यमापादनयोग्यंयत्प्रतियोग्युपलब्धिस्वरूपंयस्यानुपलंभस्य।तदनुपलब्धेर्योग्यत्वमित्यर्थः।

मितिस्थलेऽभावादित्याह·धर्मेति·षष्ठीसप्तमीसमासयोःसंभवादुभयत्रचदोषसद्भावाच्छंकते·नन्विति·कर्मधारयसमासमाश्रित्यपरिहरति·योग्येति·अनुपलब्धियोग्यत्वंकिमित्यपेक्षायामाह·अनुपलब्धेरिति·यद्यत्रघटःस्यादितितर्कितेनप्रतियोगिसत्वेनतर्ह्युपलभ्येतेति· प्रसंजितःघटोपलंभलक्षणःप्रतियोगीयस्यानुपलंभस्यसतथातस्यभावस्तत्वमित्यभिप्रेत्यैतदर्थमाहयस्येति॥ छ ॥

नै·प·
ती·टी·
९६

तादात्म्येन· पं·    प्रत्यक्षत्वापादनसंभवेन· पं· ६

अथोदाहरणप्रत्युदाहरणाभ्यामुक्तं स्फुटयति· तथाहीति· स्फीतो विशालः पक्षद्वयोक्तदोषाभावमाह॥ अत एवेति· यत एवंभूतयोग्यानुपलब्धिसमाश्रयणमत एवेत्यर्थः नैयायिकः शंकते· नन्विति· तत्र तादृशस्थले क्लृप्तसंभवे पूर्वकल्पनमन्याय्यं गौरवादित्यर्थः इन्द्रियसत्वेऽभावज्ञानतदभावेनऽभावद्वयस्यान्वयव्यतिरेकयोरनुविधानादनुरोधात्॥ नास्ति मम गौरवं प्रत्युत तवैव महद्गौरवमित्याशयेन समाधत्ते· नेति· संयुक्तविशेषणतासंबंधस्यानंगीकारात्प्रमाणशून्यत्वाच्चेत्यभिप्रेत्याह· इन्द्रियस्येति· ननु सन्निकर्षाभावप्रयुक्तहेतुत्वाभावोऽसिद्ध इन्द्रियान्वयव्यतिरेकबलेन तस्य कल्प्यत्वा((दित्याशंक्याह· इन्द्रियेति· अन्यथासि

तथाहि स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलंभः स्यादित्यापादनसंभवात्तादृशभूतले घटाभावोऽनुपलब्धिगम्यः अंधकारे तु तादृशापादनासंभवान्नानुपलब्धिगम्यता· अत एव तादात्म्येन स्तंभे पिशाचसत्वे स्तंभवत्प्रत्यक्षतापत्त्या तदभावोऽनुपलब्धिगम्यः आत्मनि धर्मादिसत्वेप्यस्यातींद्रियतया निरुक्तोपलंभापादनासंभवात्· न धर्माद्यभावस्यानुपलब्धिगम्यत्वम्·। ननूक्तरीत्याधिकरणेन्द्रियसन्निकर्षस्थलेऽभावस्यानुपलब्धिगम्यत्वं त्वदनुमतं तत्र क्लृप्तेन्द्रियमेवाभावाकारवृत्तावपि करणं इन्द्रियान्वयव्यतिरेकानुविधानादिति चेन्न· तत्रापि योग्यानुपलब्धेरपि· अभावग्रहे हेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात्· इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्· इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः ननु भूतले घटो नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत्तद्घटाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेपीति चेत्· सत्यं अभावप्रतीतेः प्रत्यक्षत्वेपि तत्करणस्यानुपलब्धेर्मानांतरत्वात्॥

द्धेः सन्निकर्षादिविनैव सार्थक्यात्· आदिपदेन प्रतियोगिज्ञानसंग्रहः। अभावेन समं सन्निकर्षाभावेऽयं हेतुः ननु भवन्मते सिद्धांतेप्यभावप्रमायाः प्रत्यक्षत्वमेव समायात्यतः कथं तत्करणानुपलब्धिरिति शंकते· नन्विति· आदिपदेन स्तंभे पिशाचो नेत्यादिसंग्रहः॥ तत्रातादृशस्थले तन्निष्ठो भूतलनिष्ठ अभावप्रतियोग्यज्ञानस्य- अपिशब्दोदृष्टार्थः तथाच तवमते इन्द्रियस्याभावग्रहहेतुत्वं यथा क्लृप्तं तद्वदित्यर्थः॥ पं· ६    ((इंगीकारेण परिहरति· सत्यमिति· यद्यप्य

॥ अन्यथासिद्धेरिति हेतुः॥ पं· २॥

३७

राम
३९

अभावस्यप्रत्यक्षत्वयोगित्वमंगीकृत्याभावज्ञानप्रत्यक्षत्ववादः॥पं·२॥ नुपलब्धि·पं·३॥ नाभावज्ञानस्यः॥पं·२॥ अभावप्रतीते·पं·२॥ समी पं·३॥ प्रमाणभेदस्य·पं·३

भावस्यप्रत्यक्षत्वयोग्यत्वाभावाच्छब्दजन्यस्वनिष्ठधर्मादिज्ञानवत्प्रत्यक्षत्वंप्रत्यक्षलक्षणेयोग्यत्वस्यापिविषयविशेषणत्वेनोक्तत्वात् तथाप्यभावज्ञानप्रत्यक्षाप्रत्यक्षत्वयोर्नतद्योग्यायोग्यत्वेतंत्रेकिंतुप्रतियोगियोग्या--योग्यत्वे·तथाचानुपदमेवास्यार्थस्यस्पष्टीकृतत्वात्·अभावज्ञानप्रत्यक्षत्वेनाभ्युपेत्यैवाद्आश्रयणीयः ननुतस्याः प्रत्यक्षत्वेकथंतत्करणस्यमानांतरत्वमितितत्राह· नहीति॥ननुप्रमाणभेदस्यफलभेदायत्तत्वात्कथंतंविनातस्यासिद्धि

नहिफलीभूतज्ञानस्यप्रत्यक्षत्वेतत्करणस्यप्रत्यक्षप्रमाणतानियतत्वमस्तिदशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्यप्रत्यक्षत्वेपितत्करणस्यवाक्यस्यप्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात्॥फलवैजात्यंविनाकथंप्रमाणभेदइतिचेन्न· वृत्तिवैजात्यमात्रेणप्रमाणवैजात्योपपत्तेः तथाच· घटाद्यभावाकारवृत्तिर्नेन्द्रियजन्याइंद्रियस्यविषयेणासन्निकर्षात्· किंतुघटानुपलब्धिरूपमानांतरजन्याइतिभवत्यनुपलब्धेर्मानांतरत्वम्· नन्वनुपलब्धिरूपमानांतरपक्षेप्यभावप्रतीतेःप्रत्यक्षत्वेघटवतिघटाभावभ्रमस्यापिप्रत्यक्षत्वापत्तौतत्राप्यनिर्वचनीयघटाभावोभ्युपगम्येतनचेष्टापत्तिः तस्यमायोपादानकत्वेभावत्वानुपपत्तेः मायोपादानकत्वाभावेमायायाः सकलकार्योपादा--नत्वानुपपत्तिरितिचेन्न· घटवतिघटाभावभ्रमोनतत्कालोत्पन्नघटाभावविषयकः किंतुभूतलरूपादौविद्यमानोलौकिकोघटाभावोभूतलेआरोप्यतइत्यन्यथाख्यातिरेवारोप्यसन्निकर्षस्थलेसर्वत्रान्यथाख्यातेरेवव्यवस्थापनात्· असतुवाप्रतियोगिमतितदभावभ्रमस्थलेतदभावस्यानिर्वचनीयत्वम्·॥

इदानीं

रित्याशंक्यते· फलेति· प्रत्यक्षत्वेनफलस्यसाजात्येपिभूतलाकारवृत्तेरिन्द्रियजन्यत्वादभावाकारवृत्तेस्तदजन्यत्वाद्वृत्तिवैजात्यमात्रेणतदुपपत्तेर्नैवमित्याह· नेतिफलितमाह· तथाचेति· वृत्तिवैजात्यमात्रेणप्रमाणवैजात्ये· अथाभावभ्रमेदोषमाशंकते· नन्विति· तत्रानिर्वचनीयघटाभावोनाभ्युपगम्यतेतोनोक्तदोषइत्याह· नेति· नन्वेवंतर्हिकथंघटाभावभ्रमस्यप्रत्यक्षत्वमित्याशंकते· किंत्विति· तद्विषयस्यसन्निहितत्वेनतत्संभवान्नैवमित्याह· भूतलेति· आदिपदेनक्रियादिसंग्रहः अपसिद्धांतमाशंक्याह· आरोप्येति· ननुघटाधिकरणभूतलरूपादिनिष्ठघटाभावादेरिन्द्रियासन्निकृष्टत्वात्कथंनहृत॥ ७॥

आरोप्यस्यभ्रांतिज्ञानविषयस्यकिंचित् अनङ्गि·कारेस्यसन्निकर्षःसानिध्यंयत्राधारेसतथातादृशाधारे·॥पं·६॥निष्ठघटाभावादे·पं·१॥ भूतलनिष्ठरूपादिलन्निष्ठनामरूपादिनिष्ठघटाभाव

सिद्धिःप्रत्यक्षफलकाभावात्·पं·४॥ प्रमाणस्यफलभेदंविना·पं·३॥

अभावोत्रारोप्यत इत्याशंक्यानिर्वचनीयत्वमंगीकृत्य समाधत्ते · अस्तुवेति प्रोक्तदूषणमुद्धरति · नहीति · ननु तयोः सर्वाकारेण साजात्याभावेपि यत्किंचित्साजात्यमवश्यमभ्युपेयम् · अन्यथोपादानोपादेयत्वव्याघातादित्याशंक्याह · यत्किंचिदिति · अन्यथाऽभावस्य मायोपादानासंभवे · नन्वेवं ब्रह्मण एव जगदुपादानत्वसंभवात्किमर्थं माया कल्प्यत इत्याशंकापरिहरति · नचेति · किं ब्रह्मणो जगदुपादानत्वमनिष्टमापाद्यते · किं वा मायावैयर्थ्यमिति विकल्प्याद्यं प्रत्याह · प्रपंचेति · द्वितीयं प्रत्याह · परिणामित्वरूपस्येति · तथाच · निरवयवे ब्रह्मणि परिणामस्यानुपपन्नत्वे · प्रासंगिकसमाप्यानुपलब्धिप्रमाणविषयमभावं विभज

तथापि तदुपादाने मायैव नह्युपादानोपादेययोरत्यंतसाजात्यं तंतुपटयोरपि तंतुत्वपटत्वादिना वैजात्यात् · यत्किंचित्साजात्यस्य मायाया अनिर्वचनीयस्य घटाभावस्य च मिथ्यात्वधर्मस्य विद्यमानत्वात् · अन्यथा व्यावहारिकघटाद्यभावं प्रति कथं मायोपादानमिति कुतो नाशंकेथाः नच विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यम् · प्रपंचविभ्रमाधिष्ठानत्वरूपेण तस्येष्टत्वात् परिणामित्वरूपस्योपादानत्वस्य निरवयवब्रह्मण्यनुपपत्तेः तथाच · प्रपंचस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धांत इत्यलमतिप्रसंगेन सचाभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति · तत्र मृत्पिंडादौ कारणे कार्यस्य घटादेरुत्पत्तेः पूर्वं योभावः स प्रागभावः सच भविष्यतीति प्रतीतिविषयः तत्रैव घटस्य मुद्गरपातानंतरं योऽभावः स प्रध्वंसाभावः ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव · नचैवं घटोन्मज्जनापत्तिः घटध्वंसध्वंसस्यापि ·

रते · सचेति · तत्रनेष्ठकार्यसमवायिकालान्यावृत्तित्वे सति कार्योत्पत्तिपूर्वकालीनत्वं प्रागभावलक्षणमभिप्रेत्याह · मृत्पिंडेति · तद्विषयकप्रत्ययस्वरूपमाह · सचेति · प्रागभावः घटो भविष्यतीति प्रत्ययः घटप्रागभावं विषयीकरोति द्वितीयं लक्षयति · तत्रैवेति तत्र मृत्पिंडादौ कार्यसमवायिकालान्यावृत्तिप्रतियोग्यजनकः । ध्वंसाभावः सच विनष्ट इति · प्रत्ययगोचर इत्यपि ज्ञेयम् · तस्यानंतत्वं तार्किकमतं निरासायाह · ध्वंसस्यापीति · नाशकाभावमाशंक्याह · स्वेति · नच प्रागभावध्वंसानाधारकालस्य प्रतियोगिकालत्वानियमात् · घटोन्मज्जनप्रसंग इत्याशंकापरिहरति · नचेति · तत्र हेतुमाह · घटध्वंसेति · ॥ छ ॥

समवायिकारण · पं · ५

घटध्वंसध्वंसस्यापिघट=प्रतियोगिकत्वात्·टि·पं·११ घटध्वंसध्वंकालस्य॥ पं·१ ॥ घटकालत्वाभाववत्त्वान्·॥पं·१॥ घटध्वंसध्वंसस्यप्रतियोगिकत्वं ॥

घटध्वंसकालस्यघटकालत्वाभाववतत्प्रतियोगिकध्वंसकालस्यापितथात्वादित्यर्थः नतुध्वंसजनकस्यतत्प्रतियोगित्वनियमात्कथमजनकस्यघट
स्यतत्प्रतियोगित्वमित्याशंक्य·घटध्वंसध्वंसेपि·नष्टोघटइतिप्रतीतिसद्भावात्·घटध्वंसध्वंसस्यापिघटजन्यत्वोपचारात्तत्प्रतियोगिकत्वमास्थेयमन्य
थातिप्रसंगइत्याहान्यथेति·उक्तानंगीकारेणघटोन्मज्जनापत्तौनतुसर्वस्यापिध्वंसस्यानित्यत्वमुतयस्यकस्यचित्·नाद्यः·नित्याधिकरणस्यनाश[illegible]
ज्ञानइतिध्वंसस्यानित्यत्वासिद्धेः·नद्वितीयः·नित्याधिकरणकध्वंससामान्यात्सर्वस्यापिनित्यत्वाप्रयणोचित्यादित्याशंक्यपरिहरति·नचेति·नन्वि
त्याधिकरणमाकाशादिकिंवाचैतन्यमितिविकल्प्याद्यंप्रत्याह·तादृशेति·द्वितीयेपिकिमनारोपितंवस्तुप्रतियोगिकिंवारोपितंनाद्यःनेहनानास्ति

घटप्रतियोगिकध्वंसत्वात्·अन्यथाप्रागभावध्वंसात्मकघटस्यविनाशेप्रागभावोन्मज्जनापत्तिः नचैवमपियत्रध्वंसाधिकर
णंनित्यंतत्रकथंध्वंसनाशइतिवाच्यम्·तादृशाधिकरणंयदिचैतन्यव्यतिरिक्तंतदातस्यनित्यत्वमसिद्धंब्रह्मव्यतिरिक्तस्यसर्व
स्यब्रह्मज्ञाननिवर्त्यतायावक्ष्यमाणत्वात्· यदिचध्वंसाधिकरणंचैतन्यंतदासिद्धिः आरोपितप्रतियोगिकध्वंसस्याधिष्ठान
प्रतीयमानस्याधिष्ठानमात्रत्वात्·तदुक्तंअधिष्ठानावशेषोहिनाशःकल्पितवस्तुनइति·एवंशुक्तिरूप्यविनाशोपीदमवच्छि
न्नचैतन्यमेवयत्राधिकरणेयस्यकालत्रयेप्यभावःसोत्यंताभावः यथावायोरूपात्यंताभावःसोपिघटादिवत्ध्वंसप्रतियोग्येव·इ दमिदंनेति·प

किंचनेत्यादिश्रुत्याप्रतीयमाननिषेधाभिधानेनसर्वस्यानारोपितत्वाभावाभिधानात्·द्वितीयेतादृशध्वंसस्याधिकरणमात्रत्वान्नतवेष्टसिद्धिरित्या
शयेनाह·यदीति·असिद्धिः·ध्वंसस्यचैतन्यातिरेकेणनित्यत्वासिद्धिः तत्रसुरेश्वराचार्यसंमतिमाह· तदुक्तमितिउक्तन्यायंशुक्तिरूप्यनाशेतिदिशति
एवमिति·तथाचाधिष्ठानचैतन्यातिरिक्तध्वंसाभ्युपगमेप्रमाणाभावाद्गौरवाच्चतदसिद्ध्यासुतरांतन्नित्यत्वासिद्धिरितिभावः तृतीयंलक्षयति·यत्रा
ति·असंदिग्धमुदाहरणमाह·यथेति· तार्किकमतंनिरासायाह·सोपीति· अत्रेदंनेतिप्रत्ययविषयइत्यर्थः चतुर्थंलक्षयति·इदमिति·॥तादात्म्य
संसर्गावच्छिन्नप्रतियोगिताकइत्यर्थः॥ विभागपृथक्त्वयोःपदार्थांतरत्वनिरासायाह॥

यथाघटध्वंसकालस्यघटकालत्वनास्तितथाघटध्वंसध्वंसकालस्यापिघटकालत्वनास्ति॥पं· ॥

अनभिमतस्यसिद्धिरर्थांतरमिति·टी·पं· ॥अतात्विकत्वंकथंस्यात्·पं· ॥ब्रह्मणिप्रपंचप्रतियोगिकभेदस्यांगीकारेऽद्वैतविरोधःस्यात्॥

अयमिति· एतस्यसादित्वमनादित्वंचव्यवस्थयाह·अयंचेति· ब्रह्मवन्निवृत्तस्वभावमाशंक्याह·द्विविधोपीति·अनादित्वेप्याविद्यकत्वादित्याह·अविद्येति· प्रकारान्तरेणान्योन्याभावंविभजते·पुनरिति· उपाधिसत्तायाव्याप्यासत्तायस्यभेदस्यतस्यभावस्तत्त्वंयत्रयथाकाशादिभेदसत्तातत्रघटाद्युपाधिसत्तेति·भेदोपाधिसत्तयोर्व्याप्यव्यापकभावः नन्वब्रह्मणोजडत्वव्यावृत्तयेतत्रप्रपंचप्रतियोगिकोभेदोऽभ्युपेयस्तथात्वेचाद्वैतविरोधइत्याशंक्याह·नचेति·यथावियदादिकमतात्विकत्वान्नाद्वैतविघातकंतद्वद्भेदोपीत्याह·तात्विकेति·नन्वियदादिप्रपंचस्यैवतात्विकत्वेनतथात्वंकथमित्यतआह·प्रपंचस्येति·प्रपंचस्यब्रह्मणिकल्पितत्वांगीकारेवार्तिककारसम्मतिमाह·तदुक्तमिति· नन्वभावस्यचातुर्विध्यवर्णनंसिद्धांताननुरोधिनृसिंहाश्रमैरद्वैत।

प्रतीतिविषयोऽन्योन्याभाव·अयमेवविभागोभेदःपृथक्त्वंचेतिव्यवह्रियते·भेदातिरिक्तविभागादौप्रमाणाभावात्· अयंचान्योन्याभावोधिकरणस्यसादित्वेसादिः यथाघटेपटभेदःअधिकरणस्यानादित्वेनादिरेवयथाजीवेब्रह्मभेदःब्रह्मणिवाजीवभेदः द्विविधोपिभेदोध्वंसप्रतियोग्येव·अविद्यायानिवृत्तौतत्परतंत्राणांनिवृत्त्यवश्यंभावात्· पुनरपिभेदोद्विविधःसोपाधिकोनिरुपाधिकश्चेति· तत्रोपाधिसत्ताव्याप्यसत्ताकत्वंसोपाधिकत्वंतच्छून्यत्वंनिरुपाधिकत्वंतत्राद्योयथाएकस्यैवाकाशस्यघटाद्युपाधिभेदेनभेदः यथावाएकस्यसूर्यस्यजलभाजनभेदेनभेदः तथाचएकस्यैवब्रह्मणोऽन्तःकरणभेदाद्भेदः निरुपाधिकभेदो यथाघटेपटभेदः नचब्रह्मण्यपिप्रपंचभेदाभ्युपगमेऽद्वैतविरोधः तात्विकभेदादेरनभ्युपगमेनवियदादिवदद्वैताव्याघातकत्वात्· प्रपंचस्याद्वैतेब्रह्मणिकल्पितत्वाङ्गीकारात्· तदुक्तंसुरेश्वराचार्यैः·असमाभवतःकेयंसाधकत्व॥ ७ ॥

दीपिकायांतस्यनिराकृतत्वादित्याशंक्यप्राचीनैर्व्यवहृतत्वात्तत्प्रतिपादनंनसर्वथासिद्धांतविरुद्धमित्याशयेनाह·अतएवेति·यतोऽभावस्यचातुर्विध्यमतएवेत्यर्थः॥ तथाचानुमानम् विवादगोचरापन्नप्रमाणज्ञानंस्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकंभवि

उपाधिसत्ताव्याप्यसत्ताकत्वात्यंताभाववत्त्वमित्यर्थः॥मू·पं· ॥ब्रह्मणिमुमुक्षुत्वकल्पनेजगद्धेतुत्वकल्पनेवाश्रवणादिसाधकत्वकल्पनेवा॥मू·पं· ॥तुमर्हति·

आत्मवस्त्वतिरिक्तवस्त्वितितदर्थः॥टि·पं·

41

योग्यानुपलब्ध्याअभावानांप्रतीतौसत्यामित्यर्थः॥मू·पं· ॥घटाद्यभावमनुपलंभयामीतिटी·पं· ॥अभावज्ञानकरणत्वस्य॥पं· ॥संयुक्तविशेषणतासंबंधस्यानंगीकारे·पं· ॥अदृष्टादेः
भोगेनक्षीयतेनप्रमाणज्ञानेननाशःप्रमाणज्ञानस्य॥पं·२॥घटज्ञानात्पटज्ञाननिवर्त्यपूर्वं।पं· ॥नन्विंद्रियाभावयोःसंबंधोभावएवेंद्रियनिष्ठाभावज्ञानकरणत्वेबाधकइत्याशंक्याहइन्द्रियेति·पं·

अप्रकाशितार्थप्रकाशितार्थप्रकाशकत्वात् अंधकारेप्रथमोत्पन्नप्रदीपप्रभावदितिवस्तुपूर्वकमित्युक्त्वावात्मवस्तुपूर्वकतयार्थांतरत्वंतदर्थंवस्त्वंतरेति·॥
चक्षुरादिव्यापारस्यार्थंस्वदेशगतेति· अङ्कुरादिकव्यावर्तनायस्वनिवर्त्येति उत्तरज्ञाननिवर्त्यपूर्वज्ञानव्यावृत्त्यर्थंस्वविषयावरणेतिप्रागभावव्यावृत्त्यर्थंस्वप्रा
गभावेति· तत्वप्रदीपिकायांचित्सुखाचार्यकृतायांअविद्यालक्षणेअनादिभावरूपत्वसतिज्ञाननिवर्त्यत्वमविद्यात्वमित्येवंरूपेउपसंहरति· एवमिति· ननु॥
किमनुपलब्धेरभावप्रमायांकरणांतरानुपपत्त्यामानांतरत्वमास्थीयते· अनुभवबलाद्धानाद्यःक्लृप्तप्रमाणभावस्येंद्रियस्यैवतत्करणत्वस्यसंभवान्नचेंद्रिया
भावयोःसंबंधानिरूपणम्· संयुक्तविशेषणतासंबंधस्यैवसत्वात्· नचात्रप्रमाणभावःभूतलेघटाभावइत्याधाराधेयभावसंबंधप्रतीतेःघटाभावज्ञानंसंबं॥
धविषयकंविशिष्टज्ञानत्वाद्दंडीपुरुषइतिज्ञानवदित्यनुमानाच्च· अन्यथाभावस्यनिरधिकरणत्वापत्तेःध्वंसस्यस्वाधिकरणकपालनाशेनेत्यादिवर्णनम्॥

प्रकल्पनेकिन्नपश्यसिसंसारंतत्रैवाज्ञानकल्पितमिति· अतएवविवरणेऽविद्यानुमानेप्रागभावव्यतिरिक्तविशेषणंतत्वप्रदीपि
कायामविद्यालक्षणेभावत्वविशेषणंचसंगच्छते।एवंचतुर्विधाभावानांयोग्यानुपलब्ध्याप्रतीतिःतत्रानुपलब्धिर्मानांतरम्·॥६॥

अधिकरणस्यसादित्वइत्यादिनाभेदस्यद्वैविध्यनिरूपणंचविरुध्येतससंबंधःस्वरूपसंबंधोऽन्योवेत्यन्यदेतत्· नचद्वितीयःनिर्घटंभूतलंपश्यामीतिवि
परीतानुव्यवसायोदन्यथापर्वतंपश्यामि· वन्हिमनुमिनोमीतिवद्भूतलाभावयोर्विलक्षणानुव्यवसायापत्तिःकिंचप्रत्यक्षप्रमायांप्रत्यक्षप्रमाणंकरण॥
मित्युत्सर्गःसचबलवताबाधकेनापोद्यते·प्रकृतेचाभावज्ञानंप्रत्यक्षमेवेत्युभयसिद्धं· तत्रप्रत्यक्षप्रमाणमिन्द्रियमेवकरणंबाधकाभावादिन्द्रियाभा
वयोःसंबंधस्यचसाधितत्वाततश्चकथमनुपलब्धिर्मानांतरमितिचेदुच्यते· नतावदिंद्रियंतत्करणंसंबंधानिरूपणात्· नचसंयोगादिस्तस्यासंभवात्·नच
संयुक्तविशेषणतातत्रप्रमाणाभावादुक्तप्रतीतेरनुमानस्यचाधाराधेयभावसंबंधसाधकतयाइन्द्रियाभावसंबंधासाधकत्वान्नचोक्तमूलविरोधस्ता ॥

अनुपलब्ध्याघटाभावविशिष्टभूतलंजानामीत्याकारेकानुव्यवसायाद्विलक्षणानुव्यवसायात्·पं· ॥घटाभाविशिष्टज्ञानं॥ ॥सामान्यंकरणं॥पं· ॥अभावज्ञाने·पं· ॥आत्मश्र
वणादिविधानवैयर्थ्यापत्तिरुपबाधकेनदशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्यप्रत्यक्षत्वेऽपितत्करणवाक्यस्यप्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमरूपबाधकेनचबाध्यते·पं·
अभावस्यभूतलादौसंबंधानंगिकारे·॥पं· ॥अनुपलब्ध्याघटाभावंजानामिभूतलंपश्यामीत्याकारकविलक्षणानुव्यवसायापत्तिः॥पं· ॥अभावज्ञानस्येंद्रियजन्यत्वेतुकिं

विद्याबाधकंनास्तीतिशेषः॥पं· ॥९

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः, नैयायिकास्ते परतः, सौगताश्चरमं स्वतः,
प्रथमं परतः प्राहुः, प्रामाण्यं वेदवादिनः प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्॥

इन्द्रियाभावयोःसंबंधाभावकथनस्य॥टि·पं· ॥संयुक्तविशेषणतासंबंधे॥पं· ॥उपरिष्टात्·पं· ॥तस्मिन्समये॥पं· ॥अधीनत्वं।पं· ॥

इत्यसंबंधाभावकथनस्याधाराधेयभावसंबंधकथनपरेणग्रंथेनविरोधाभावात्·नाप्यनुव्यवसायविरोधःफलीभूतंज्ञानंप्रत्यक्षमित्युक्तत्वात्·यद्यपिकिं
चेत्यादितदपिनसन्निकर्षाभावस्यप्रबलतरबाधकस्यसत्वात्·किंचकिंमभावस्यविशेषणतामात्रसन्निकर्षइन्द्रियसन्निकृष्टाधिकरणविशेषणतावाकिंवा
यत्राधिकरणेप्रतियोगिसत्वमनुपलब्धिविरोधिस्यात्तद्विशेषणतानाद्यःभित्यादिव्यवहितभूतलादिवृत्तिघटाद्यभावेपिविशेषणतामात्रस्यविद्यमानत्वेन
प्रत्यक्षतापत्तेःनद्वितीयःपरमतेकारणबलयावच्छिन्ननभसएवश्रोत्रेंद्रियत्वात्तस्यैवस्वग्राह्यशब्दाभावाधिकरणत्वात्तेनस्वस्यासन्निकर्षादधिकरणेंद्रि
यसन्निकर्षाभावेनशब्दाभावस्याप्रत्यक्षत्वप्रसंगात्·तृतीयेपि·अनुपलब्धिविरोधित्वमुपलभ्यमानत्वंतस्यकिंयदाकदाचिद्वावोपेक्षितउतनियमेनआ
द्येव्यवहितेप्यभावाधिकरणेकदाचिदुपलंभसंभवात्प्रतियोगिनस्तुव्यवधानसमयेप्यभावःप्रत्यक्षःस्यात्·नद्वितीयःश्रोत्रदेशेभूतलादौवाशब्दस्यघ
टादेर्वासत्वेपिसामग्र्यभावादिनानुपलंभसंभवेननियमेनतदुपलंभायोगात्तत्रतदभावस्याप्रत्यक्षतापत्तेरित्यन्यत्रविस्तरः·एवमुक्तानांप्रमाणानांकी

एवमुक्तानांप्रमाणानांप्रामाण्यंस्वतएवोत्पद्यतेज्ञायतेचतथाहिस्मृत्यनुभवसाधारणंसंवादिप्रवृत्त्यनुकूलंतद्वतितत्प्रकारकज्ञा
नत्वंप्रामाण्यंतच्चज्ञानसामान्यसामग्रीप्रयोज्यंनत्वधिकंगुणमपेक्षते·प्रमामात्रेऽनुगतगुणाभावात्·नापिप्रत्यक्षप्रमायांभूयोवयवे
न्द्रियसन्निकर्षःरूपादिप्रत्यक्षेआत्मप्रत्यक्षेचतदभावात्·सत्यपितस्मिन्पीतःशंखइतिप्रत्यक्षस्यभ्रमत्वाच्च·अतएवनस॥ दृशंप्रामाण्यमि

त्यपेक्षायामाह·एवमिति·ननुपरतस्त्वप्रमाण्यवादिनितार्किकेजाग्रतिकथमेवंवक्तुंशक्यमित्यतआह·तथाहीति·इच्छावृत्तिप्रामाण्याऽतिप्रसंगवार
णायज्ञानत्वमितिभ्रमेतन्निरासायतद्वतीतिस्मृत्यनुभवसाधारणंसंवादिप्रवृत्त्यनुकूलंप्रामाण्यंतद्वतितत्प्रकारकज्ञानत्वमित्यर्थः·नन्वेवंभूतेप्रामाण्ये
किंस्वतस्त्वंनतावत्स्वोत्पाद्यत्वमात्माश्रयादित्यतआह·तच्चेति·ज्ञानजनकसामान्यसामग्र्यतिरिक्तकारणप्रयोज्यत्वंपरतस्त्वंनैयायिकाद्यभिमतंनिषे
धति·नत्विति·प्रमामात्रेऽनुगतगुणसत्वेप्रमाणाभावादित्याहप्रमामात्रइति·ननु·प्रमामात्रइत्युक्तमयुक्तंप्रत्यक्षप्रमायांगुणस्यसत्वादित्याशंक्यनिरासा
याह·नापीति·उक्तगुणस्यानुगतत्वाभावादित्याह·रूपादीति·व्यतिरेकव्यभिचारमुक्त्वान्वयव्यभिचारमाह·सत्यपीति·अतएवान्वय॥ छ ॥

इयंधूलिपटलःधूमत्वात्महानसवत्इत्यादिस्थलेऽग्निप्राप्तिर्भवतीत्यत्रव्यतिरेकव्यतिवारं॥मू·प·७॥

असाधारणंकारणं·पं·६ आगंतुकभावकारण·।।पं·५।। असाधारणत्वेन।।पं· ।।प्रथमक्षणे॰ यंपाषाणःगंधवान् पृथवीत्वात्पुष्पवत्·पं· ।। तद्वागंधानुमितिरप्रमात्वात्।।

व्यतिरेकव्यभिचारादेवआदिपदंयोग्यतादिसंग्रहार्थंसत्यपिसल्लिंगपरामर्शेगंधप्रागभाववच्छेदेनगंधानुमितेरप्रमात्वादन्वयव्यभिचारंमनसिनिधायव्यतिरेकव्यभिचारंदर्शयति·असल्लिंगेति· ननुभ्रमस्यापितादृशसामग्रीप्रयोज्यत्वाविशेषाद्भ्रमप्रमाव्यवस्थापकंकिमित्याशंकानिरासायाह·नचेति·प्रतिबंधकाभावस्यकार्यमात्रंप्रतिहेतुत्वेनक्लृप्तत्वाद्दोषाभावस्यापितथात्वेनांगीकारात्·नचायंगुणत्वेनहेतुःप्रमाणाभावादित्यर्थः अपसिद्धान्तापत्तिमाशंक्यनिरासायाह· नचेति· अदृष्टादिसापेक्षत्वादागंतुकेति·दोषाभावसापेक्षत्वादाह भावेति·तथाचागंतुकभावकारणानपेक्षज्ञानसामान्यसामग्रीप्रयोज्यत्वंस्वतस्त्वमित्यंगीकारेणतादृशकारणसहकृतज्ञानसामान्यप्रयोजकप्रयोज्यत्वरूपपरतस्त्वापातोनास्तीति

लिंगपरामर्शादिकमप्यनुमित्यादिप्रमायांगुणः असल्लिङ्गपरामर्शादिस्थलेऽपिविषयाबाधेनानुमित्यादेःप्रमात्वात्· नचैवमप्रमापिप्रमास्यात्· ज्ञानसामान्यसामग्र्या अविशेषादितिवाच्यम् दोषाभावस्यापिहेतुत्वांगीकारात्· नचैवंपरतस्त्वमिति· आगंतुकभावकारणापेक्षायामेवपरतस्त्वात्॰।।ज्ञायतेचप्रामाण्यंस्वतः स्वतोग्राह्यत्वंचदोषाभावेसतियावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वंस्वाश्रयोवृत्तिज्ञानंतद्ग्राहकंसाक्षिज्ञानंतेनापिवृत्तिज्ञानेगृह्यमाणेतद्गतंप्रामाण्यंगृह्यते· नचैवंप्रामाण्यसंशयानुपपत्तिः तत्रसंशयानुरोधेनदोषस्यापिसत्त्वेनदोषाभावघटितस्वाश्रयग्राहकाभावेनतत्रप्रामाण्यस्यैवाग्रहात्· यद्वायावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वंस्वतस्त्वंसंशयस्थलेप्रामाण्य।।

((भावः।।एवंप्रामाण्योत्पत्तौस्वतस्त्वमभिधायतस्यज्ञप्तौतदावेदयति·ज्ञायतेचेति·तद्वतितत्प्रकारकज्ञानत्वलक्षणप्रामाण्यमुत्पन्नंसज्ज्ञायतेचस्वतइत्यर्थः ज्ञायतइत्यस्यगृह्यतइत्यर्थमभिप्रेत्याहःस्वतोग्राह्यत्वंचेति·परतस्त्ववादिनानुमानादिकंतद्ग्राहकमंगीकृतमतस्तद्वारणाययावदितिस्वाश्रयग्राहकविशेषणंयावत्स्वाश्रयग्राहकसामग्रीजन्यग्रहणगोचरत्वंतेनांगीक्रियतइत्यर्थः दोषवशादप्रामाण्यनिश्चयेसंशयेचसत्त्वाप्तिवारणायदोषाभावेसतीति·तथाचदोषवशात्तादृशसामग्र्यातद्ग्रहेपिनदोषइतिभावः स्वाश्रयेत्याद्युपपादयति·स्वाश्रयइति·।।((सामान्यज्ञानसामग्र्याज्ञानतत्विषयत्वं·पं· ।।निखिलसामग्रीकिंतत् लिख्यतेनैयायिकमतेआत्ममनसंयोगादिवेदान्तेसाक्षिग्राहकादि·पं·

निखिल=प्रमात्वस्याश्रयोवृत्तिज्ञानंवृत्तिज्ञानस्यग्राहकंसाक्षिज्ञानंसाक्षिनिष्ठग्राह्यत्वंनाममविषयत्वस्ययोग्यतासैवसाक्षिनिष्ठविषयत्वमित्यर्थः।।पं·।।

ज्ञान　　　　　　अगृहीतत्वेन

तेनापिनत्वनुमानेनैवसत्वंतपरतस्त्वमाशंक्यदर्शयति· नचेति· सत्वंतमप्रदायापिदोषंपरिहरति· ॥यद्वेति॥एवमुत्पत्तिज्ञप्त्योःप्रामाण्यस्यस्वत
स्त्वमुपपाद्यतदप्रामाण्यस्यपरतस्त्वंवर्णयति· अप्रामाण्यमिति· विसंवादीति· इदंशुक्तिरजतार्थिप्रवृत्तिःप्रामाण्यशून्याविसंवादिप्रवृत्तिजनकत्वादि
विसंवादिप्रवृत्त्यादिलिंगिकानुमितिग्राह्यम्· आदिपदेनानाप्तवचनजन्यत्वादिसंग्रहः द्वितीयादिपदश्चाद्ज्ञानादिसंग्रहार्थम्·॥ ६ ॥ ७ ॥
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिविरचितायांवेदांतपरिभाषार्थदीपिकायाम

स्योक्तयोग्यतासत्त्वेपिदोषवशेनाग्रहात्· नसंशयानुपपत्तिः· अप्रामाण्यंतुनज्ञानसामान्यसामग्रीप्रयोज्यंप्रमायामप्यप्रामा
ण्यापत्तेः किंतुदोषप्रयोज्यम्· नाप्यप्रामाण्यंयावत्स्वाश्रयग्राहकग्राह्यं· अप्रामाण्यघटकतद्भाववत्त्वादेर्वृत्तिज्ञानाऽनुपनीतत्वेन
साक्षिणाग्रहीतुमशक्यत्वात्· किंतुविसंवादिप्रवृत्त्यादिलिंगिकानुमित्यादिविषयइति· परतएवाप्रामाण्यमुत्पद्यतेज्ञायतेचेति
॥इत्यनुपलब्धिपरिच्छेदः॥ ॥एवंनिरूपितानांप्रमाणानांप्रामाण्यंद्विविधंव्यावहारिकतत्त्वावेदकत्वंपारमार्थिकतत्त्वावे
दकत्वंचेति· तत्रब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानांसर्वप्रमाणानामाद्यंप्रामाण्यंतद्विषयाणांव्यवहारदशायांबाधाभावात्·
द्वितीयंतुजीवब्रह्मैक्यपराणांसदेवसोम्येदमग्रआसीदित्यादीनांतत्त्वमसीत्यंतानां तद्विषयस्यजीवपरैक्यस्यकालत्रयाबाध्य
त्वात्· तच्चैक्यंतत्त्वंपदार्थज्ञानाधीनज्ञानमिति· प्रथमंतत्पदार्थोलक्षणप्रमाणाभ्यांनिरूप्यते· तत्रलक्षणंद्विविधम्· स्वरूपलक्ष
णंतटस्थलक्षणंचेतितत्रस्वरूपमेवलक्षणंस्वरूपलक्षणं· यथा· सत्यंज्ञानमनंतंब्रह्मेति· अत्रसत्यादिकंस्वरूपलक्षणम्· ननु

नुपलब्धिपरिच्छेदः॥अथप्रमेयंनिरूपयितुमुपक्रमते· ॥एवमिति·॥ प्रामाण्यंयथाभूतार्थज्ञानजनकत्वंतत्त्वंयथार्थत्वं· तथाच· तद् स्वस्य॥
वाक्यप्रतिपाद्यंतत्प्रतिपादनंपदार्थप्रतिपादनाधीनमतः पदार्थोनिरूप्यतइत्याह· तच्चैक्यमिति· इतिहेतोः प्रथमोपात्तत्वात्स्वपक्षाद्यगोचरत्वादभ्यर्हि
तत्वाच्चादौतत्पदार्थोनिरूप्यतइत्यर्थः॥तत्रलक्षणप्रमाणयोरसाधारणधर्मोलक्षणंस्वरूपंसद्व्यावर्तकमिति· मुख्यत्वात्स्वरूपलक्षणंलक्षयति·त
॥त्रेति· तत्पदार्थलक्षणस्यप्रकृतत्वाल्लौकिकम्· प्रकृष्टप्रकाशश्चंद्रइत्यनुदाहृत्यैवे॥　　　　पुज्यत्वात्

43

दिकमेतदुदाहरति· यथेति·आदिपदेनज्ञानानंतसंग्रहः सच्चिदानंदात्मकमेकमेवलक्षणमितिकेचित्·सत्यादिकंप्रत्येकलक्षणमित्यन्ये·ननुअसा
धारणधर्मस्यलक्षणत्वात्स्वस्यचस्ववृत्तिधर्मत्वाभावात्कथंसत्यादिकंस्वरूपंलक्षणमितिशंकते॥नन्विति॥धर्मेपारमार्थिकत्वविवक्षणेगौरवान्मेवा
मित्याह·नेति·स्वोक्तेपद्मपादाचार्यसंमतिमाह·तदुक्तमिति·द्वितीयंलक्षयति·॥तटस्थेति·स्वरूपलक्षणेऽतिप्रसंगनिरासायसत्यन्तम्·लक्ष्यावृत्तिता
दृशधर्मेतिव्याप्तिनिराकरणायव्यावर्तकमितिस्पष्टप्रतिपत्त्यर्थंलौकिकमप्युदाहरति।यथेति·परमतेनाह·महाप्रलयइति·उभयमतेनाह उत्पत्तिका

स्ववृत्तित्वाभावेकथंलक्षणत्वमिति·चेन्न·स्वस्यैवस्वापेक्षयाधर्म्मिधर्मभावकल्पनयालक्ष्यलक्षणत्वसंभवात् तदुक्तं॥आनं
दोविषयानुभवोनित्यत्वंचेतिसन्तिधर्माः अपृथक्त्वेपिचैतन्यात्पृथगिवावभासन्तइति॰ तटस्थलक्षणंयावल्लक्ष्यकालमनवस्थि
तत्वेसतियद्व्यावर्तकंतदेवयथागन्धवत्वंपृथिवीलक्षणं· महाप्रलयेपरमाणुषुउत्पत्ति कालेघटादिषुगंधाभावात्·ब्रह्मणिप्रकृ
तेचजगज्जन्मादिकारणत्वंअत्रजगत्पदेनकार्यजातंविवक्षितंकारणत्वंचकर्तृत्वमतोविद्यादौनातिव्याप्तिः कर्तृत्वंच·तत्तदुपादा
नगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वंईश्वरस्यतावदुपादानगोचरापरोक्षज्ञानसद्भावेचयःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपःत
स्मादेतद्ब्रह्मनामरूपमन्नंचजायतइत्यादिश्रुतिर्मानंतादृशचिकीर्षासद्भावेसोकामयतबहुस्यांप्रजायेयइत्यादिश्रुतिर्मानंतादृ
शकृतौचतन्मनोकुरुतइत्यादि॥

लइति·प्रकृतब्रह्मणस्तत्किमित्यतआह·प्रकृतइति·मायादेरपिजगदंतःपातित्वादाह·कार्येतिकृ
लालादावतिव्याप्तिवारणायजातमितिकार्यमात्रमित्यर्थः कारणत्वमपिप्रधानादिसाधारणमित्यतआह· कारणत्वंचेतिएवमपिकथंनिरासइत्याह
कर्तृत्वंचेति·अत्रप्रमाणाकांक्षायामाह·ईश्वरस्येतिसर्वज्ञःसामान्यतःसर्वविद्विशेषतःब्रह्मकार्यंब्रह्महिरण्यगर्भःनामघटइत्यादिरूपंशुक्लादिअ
न्नंव्रीहियवादियःकालकालोगुणीसर्वविद्यइत्यादिश्रुति रादिपदार्थःयस्मादाकाशादिःसआत्माकामितवानिच्छांकृतवान्बहुधाभवेयंकथमेकस्य
बहुधाभवनमित्यतआह·प्रजायेयेति·उत्पद्येयंतदैक्षतेत्याद्याश्रुतिरादिनोपादेयातद्ब्रह्मसप्राणमसृज्यतइत्याद्याश्रुतिरादिनोपादेया॥ ७ ॥

सर्वज्ञत्वादि

त्रितयमिति·तत्रउपादानगोचरापरोक्षज्ञानवत्त्वंनादृष्टचिकीर्षावत्त्वंनादृष्टकृतिमत्त्वमित्येवमित्यर्थः॥एकमेवलक्षणंकुतोनेत्याह अन्यथेति
लक्षणत्रितयाविवक्षणेइत्यर्थः·यतएकलक्षणेविवक्षणेविशेषणवैयर्थ्यमतोविशेषणवैयर्थ्यादेवजन्माद्यन्यतमस्यैवलक्षणेप्रवेशइत्याह॥
अतएवेतिफलितमाह·एवंचेतिकार्यजातजन्मगोचरापरोक्षज्ञानवत्त्वंतत्स्थितिविषयतद्वत्त्वंतल्लयगोचरतद्वत्त्वसमस्तकार्यगोचरचिकीर्षा
श्रयत्वंतत्स्थितिविषयकचिकीर्षावत्त्वंतल्लयगोचरचिकीर्षास्पदत्वंकार्यमात्रजन्मगोचरकृतिमत्त्वंतत्स्थितिविषयककृत्याश्रयत्वंतल्लय
गोचरकृत्यास्पदत्वमित्येवंरूपाणीत्यर्थः·ब्रह्मणोजगज्जन्मादिहेतुत्वेपिप्रमाणाकांक्षायामाह·ब्रह्मणइति·प्रयंतिप्रलयंगच्छंतिसंतियत्राविशंति·

वाक्यंज्ञानेच्छाकृतीनांमध्येऽन्यतमगर्भलक्षणत्रितयमिदंविवक्षितम्· अन्यथाव्यर्थविशेषणत्वापत्तेः।अतएवजन्मस्थि
तिध्वंसानामन्यतमस्यैवलक्षणेप्रवेशः एवंचप्रकृतेलक्षणानिनवसंपद्यंते·ब्रह्मणोजगज्जन्मादिकारणत्वेचयतोवाइमा
निभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीत्यादिश्रुतिर्मानम्·॥यद्वानिखिलजगदुपादानत्वंब्रह्मणोलक्ष
णंउपादानत्वंचजगदध्यासाधिष्ठानत्वम्·जगदाकारेणविपरिणममानमायाधिष्ठानत्वंवाएतादृशमेवोपादनत्वमभि
प्रेत्येदंसर्वंयदयमात्मासच्चात्यच्चाभवत्·बहुस्यांप्रजायेयेत्यादिश्रुतिषु॥ ((सर्वाणिहवाभूतानिआकाशादेवसमुत्पद्यंतआका
शंप्रत्यस्तंयंतीत्याद्याश्रुतिरादिनोपादेयानतुन्निमित्तस्योपादानत्वसूचनादेकस्यैवलक्षणप्रवेशोलंनसिध्यतीत्यरुच्याह·यद्वेतिउपादानंच
यदभिन्नंकार्यमुत्पद्यतेतत्तदभेदश्चापृथक्सत्ताशून्यत्वंतच्चाविद्याब्रह्मणोःसमानंब्रह्मण्यध्यस्तस्यपृथक्सत्ताशून्यत्वादित्याशयेनाह·उ
पादानत्वंचेति·तथाचकल्पितविकारसंबंधस्यवास्तवनिर्विकारत्वाविरोधादुपादानत्वेपिविकारशून्यत्वंब्रह्मणइतिभावः·विपरिणममाना।
मेवोपादानमितियद्याग्रहस्तर्हिस्तूपादानंमायातथापितस्याधिष्ठानंब्रह्मविनातस्यास्तथात्वाभावात्तदधिष्ठानस्याप्युच्यमानमुपादानत्वम
विरुद्धमिति·तथाभूतमायाधिष्ठानत्वमेवलक्षणमस्त्वित्याशयेनाह·जगदिति·ननुजगतोमायापरिणामत्वेमानाभावःमायांतुप्रकृतिंविद्या
उपादानत्वम्· ((तुमायाध्यक्षेणप्रकृतिः॥

44

शुक्तिरूप्ये

सूयते सचराचरं जगन्मायापरिणामं कार्य्यत्वाच्छुक्तिरूप्यवदिति प्रमाणसत्वात्· नच बाध्यत्वमुपाधिः साधनव्यापकत्वात्· यद्वा जगज्जडोपादानकं कार्य्यत्वात्संमतवत्तच्चैकं लाघवात्तदपि श्रुतिस्मृ तिप्रामाण्यात्स्यविशेषादज्ञानं माया अविद्या अज्ञानमित्यनर्थान्तरं ननु श्रुतिषु जगद्ब्रह्मणा तादात्म्यव्यपदेशाज्जगदाकारेण विपरिणममानत्वमुपादानत्वमित्येव तल्लक्षणं ब्रह्मणो नांगीक्रियत इत्याशंक्य चेतनस्य जडाकारेण परिणामायोगात्· कूटस्थनित्यत्वश्रुतिविरोधाच्चाज्ञानोपादानत्वाभिप्रायेणैव तास्तु तथा व्यपदेश इत्याह· एतादृशमेवेति· यदिदं सर्वं हिरण्यगर्भादिस्तंबपर्यन्तं तदयमात्मेति यश्चोरः सस्थाणुरितिवत्तादात्म्यव्यपदेशः सन्मूर्तं पृथ्व्यादिभूतत्रयं त्यदमूर्तं वाय्वाकाशे तद्रूपमभवदित्यर्थः बहुस्यां बहुतादात्म्यवान्भवेयं स्वप्नद्रष्टुः स्वाप्नपदार्थ·

ब्रह्मप्रपंचयोस्तादात्म्यव्यपदेशः घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोपि सच्चिदानंदरूपब्रह्मैकाध्यासात्·— नन्वानंदात्मकचिदाध्यासाद्घटादेरिष्टत्वव्यवहारे दुःखस्यापि तत्राध्यासात्तत्रापीष्टत्वव्यवहारापत्तिरिति चेन्न· आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमेन दुःखादौ सच्चिदंशाध्यासेप्यानंदांशाध्यासाभावात्· जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसंबंधात्· तदुक्तं अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति अथ जगतो जन्मक्रमो निरूप्यते· तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपंचवैचित्र्यहेतुप्राणि॥ ((तादात्म्यवदिति विवेकः आदिपदेन सर्वं खल्विदं ब्रह्म एतदात्म्यमिदं सर्वमित्याद्याः श्रुतय उपादेयाः एवं लौकिकोपि तादात्म्यव्यपदेशोऽध्यासकृत एवेत्याह· घटः सन्निति· अतिप्रसंगं शंकते नन्विति· घटादिष्विष्टत्वव्यवहारदर्शनादानंदाध्यासस्तत्र वर्ण्यते· तददर्शनान्न दुःख आनंदांशाध्यास इत्याह· नेति आदिपदं दुःखसाधनपरं सच्चिदंशाध्यासेपि· तत्तादात्म्याध्यासेपि· एवमग्रेपि· एवं प्रपंचे नामरूपव्यवहारः किंकृत इत्यत आह· जगतीति· स्वोक्तेभियुक्तवाक्यमुदाहरति· तदुक्तमिति· एवं स्वरूपतटस्थलक्षणाभ्यां तत्पदार्थं लक्षयित्वा जगदुत्पत्तिनिरूपणं प्रतिजानीते· अथेति· आकालेष्वेदमित्थमि त्यालिख्य परमेश्वरे वैषम्यनिरासार्थमुक्तं सृज्यमानेति· ननु तस्य कूटस्थत्वात्कथं तत्र संकल्पादिक॥

पंचीकृतभूतनिष्ठाः शब्दादिगुणाः कारणपूर्वकाः कार्यत्वात् घटरूपवत् ३

मित्याशंकानिवृत्त्यर्थमुक्तमपरिमितेत्यादिप्रमाणमाह तदैक्षत तन्मनोकुरुतेत्यादिश्रुतिरादिपदग्राह्युपादेयानतरईक्षणसंकल्पप्रयत्नानंतरं वियदधिक
रणंमनसिनिधायाह॰ आकाशादीनीति तथा च श्रुतिः॥ तस्माद्वा एतस्मादात्मनः आकाशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीति
अपंचीकृतभूतानामेव पुराणादिषु तन्मात्रपदप्रतिपाद्यतादृत्याशयेनाह॰ तन्मात्रेति॰ पंचीकृतभूतेषु शब्दादिगुणोपलब्धेरपंचीकृतेष्वनुमानसि
द्धांस्तानाह॰ तत्रेति॰ अपंचीकृताकाशादिभूतेषु नैयायिकमतं निरस्यति॰ न चेति॰ पंचीकृतवाय्वादौ तदुपलंभादपंचीकृतवाय्वादावपि तदुप

कर्मसह कृतोऽपरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपंचं प्रथमं बुद्धावाकलय्येदं क
रिष्यामीति संकल्पयति॰ तदैक्षत बहु स्यां प्रजायेयेति सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुतेः तत आकाशादीनि पंचभूता
नि अपंचीकृतानि तन्मात्रपदप्रतिपाद्यानि उत्पद्यंते॰ तत्राकाशस्य शब्दो गुणः वायोस्तु शब्दस्पर्शौ॰ तेजसस्तु शब्दस्पर्शरूपा
णि॰ अपां तु शब्दस्पर्शरूपरसाः। पृथिव्यास्तु शब्दस्पर्शरूपरसगंधाः न च शब्दस्याकाशमात्रगुणत्वे वाय्वादावपि तदुपलं
भात्॰ न चासौ भ्रमः बाधकाभावात्॰ इमानि भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि॰ गुणास्तु सत्त्वरजस्तमांसि॰॥ एतेभ्यः सत्त्व
गुणोपेतैः व्यस्तैः पृथक् पृथक् क्रमेण पंचभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पंच ज्ञानेंद्रियाणि जायंते एतेभ्यः पुनराकाशादि
गतसात्त्विकांशेभ्यः मिलितेभ्यः मनोबुद्ध्यहंकारचित्तानि जायंते॰ श्रोत्रादीनां पंचानां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठात
देवताः मनआदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशंकराच्युताः अधिष्ठातृदेवताः॥

लंभ इति भावः ननु जलादावपि गंधोपलंभा
त्कथं तस्य पृथिवीमात्रगुणत्वमिति चेन्न॰ तस्य पंचीकृतपृथिव्यंशसंबंधकृतत्वेन जलादेः॥ पृथिव्यकार्यत्वेन बाधकसद्भावेन च भ्रमत्वात्॥
एतेषां त्रिगुणात्मकत्वेऽपि सत्त्वगुणप्रधानेभ्य एभ्यो यदुत्पद्यते तदाह तैश्चेति एतैरपंचीकृतैः मनमसः स्थानं गलांतरं बुद्धेर्वदनं अहंकारस्य हृद
यं चित्तस्य नाभिरिति॰ शारीरकोपनिषदि मनआदिगोलकान्युक्तानि दिग्वातार्कप्रचेताश्वीति भागवतमनुसृत्याह॰ श्रोत्रादीनामिति॰ यद्य
॥ पिस्तु बालोपनिषदि घ्राणस्य पृथिवी देवतोक्ता तथापि पृथिव्यभिमानिन्या देवता॥

याअम्ब्यात्मनातरधिष्ठातृत्वादविरोधः रजःप्रधानानामेषांकार्य्यमाह·एतैरेवेति·तेषुपंचवायुषुप्राणंलक्षयति प्राणितिसर्वदोर्द्ध्वगतिमानित्यर्थः ते नोत्क्रांतिसमयउदानस्योर्द्ध्वगतिमत्वेपिनातिप्रसंगः वायुःप्राणोभूत्वानासिकेप्राविशदित्यैतरेयश्रुतिमनुसृत्याह·नासादीति·नाभ्यादिनासिकापर्य्यंतानिस्थानान्यादिपदार्थः अपानंलक्षयति·॥अवागिति·॥अधोगमनवान्· नाभ्यादि पायुपर्यंतस्थानान्यादिशब्दार्थः तथाचैतरेयश्रुतिः॥मृत्युरपानोभूत्वानाभिंप्राविशति· व्यानंलक्षयति·विष्वगिति·।विष्वग्गमनवान्सर्वतोगमनवान् उदानलक्षणमाह·उर्द्ध्वमिति·प्राणेऽतिप्रसंगमाशंक्याह·उत्क्रामणेति।लोकांतरयात्राकालऊर्द्ध्वगमनवानित्यर्थः॥अथैकयोर्द्ध्व उदानःपुण्येनपुण्यंलोकंनयतीत्यादिप्रश्नोपनिषद्वाक्यमत्रप्रमाणंवेदायन्

एतैरेवरजोगुणोपेतैःपंचभूतैर्व्यस्तैर्यथाक्रमंवाक्पाणिपादपायूपस्थाख्यानिकर्मेन्द्रियाणिजायन्ते·तेषांचक्रमेणवह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताःरजोगुणोपेतपंचभूतैरेवमिलितैःपंचवायवःप्राणापानव्यानोदानसमानाख्याजायन्ते·तत्रप्राग्गमनवान्·वायुःप्राणःनासादिस्थानवर्ती·अर्वाग्गमनवानपानःपाय्वादिस्थानवर्तीविष्वग्गतिमान्व्यानःअखिलशरीरवर्ती ऊर्ध्वगमनवानुत्क्रमणवायुरुदानःकंठस्थानवर्ती· अशितपीतान्नादिसमीकरणःसमानःनाभिस्थानवर्तीतैरेवतमोगुणोपेतैरपंचीकृतभूतैः पंचीकृतानिजायंते·तासांत्रिवृतंत्रिवृतमेकैकांकरवाणीतिश्रुतेः॥पंचीकृतोपलक्षणार्थत्वात्·॥ ७ ॥

पीताशितपानीयान्नाद्युत्सारक्रियोक्रमणंतद्धेतुत्वेदर्थमूर्द्ध्वगमनवानित्यर्थः॥समानंलक्षयति·अशितेति·अस्यसकलशरीरवर्तित्वेपिमुख्यस्थानमाह·नाभीति·प्राणादीनांलक्षणान्युक्तानिमैत्रेयोपनिषदि अथयोयमूर्द्ध्वमुत्क्रामत्येषवावसप्राणःयोयमवांचंसंक्रामतियेनैताःशिराअनुव्याप्ताःयो यंपीतमशितमुद्गिरतियोयस्यविष्टमन्नधातुमपानेस्थापयति· अथियंवांगेसमानयतीति·तमोगुणप्रधानानामेषांकार्यमाह·तैरेवेति· ननुत्रिवृत्करणस्यश्रुतिमूलकत्वात्त्रिवृत्कृतभूतानीतिवक्तव्येपंचीकृतभूतानीतिश्रुतिविरुद्धमित्यतआह·तासामिति·तेजोवन्नरूपाणांमध्ये एकंतेजोभूतंद्विधाविभज्यतयोरेकंपुनर्द्विधाविभज्यतयोरंशयोरवन्नयोःसंयोजनंतथाजलंद्विधाविभज्यतयोरेकंभागंपुनर्द्विधाविभज्यतयोरंश

मैत्रेयोपनिषच्छ्रुतिमनुसृत्यमूलस्योदानलक्षणवाक्यंलक्षणान्तरपरत्वेनबोधयतिमद्देति॥दि·पं·५ उत्क्रमणार्थे॥११

योस्तेजःपृथिव्योः संयोजनमेवं पृथिवीं द्विधा विभज्य तयोरेकं भागं पुनर्द्विधा विभज्य तयोरंशयोर्जलतेजसोः संयोजनमित्येवं त्रिवृतं करवाणीति · यद्यपि छान्दोग्ये त्रिवृत्करणमुक्तम् · तथापि · तद्वाक्यस्योक्तभूतपंचात्मत्वानुसारित्वात्तस्याश्च पंचभूतोत्पत्तिपरत्वेन सूत्रकारैः सिद्धांतितत्वात्त्रिवृत्करणस्यापि पंचीकरणोपलक्षणार्थत्वं न्याय्यमिति भावः ॥ ६ ॥ ननु पंचानामपि पंचात्मकत्वे कथं पृथिवीयमिदं जलमित्यादिव्यपदेश इत्याशंक्याह · पृथिव्यादिष्विति · अत्र द्वितीयाध्यायान्तर्गतं भगवतो व्यासस्य सूत्रं प्रमाणमित्याह · तदुक्तमिति · तु शब्दः शंकानिरासार्थः · विशेषस्य भावो वैशेष्यं तस्मात्स्वस्वभागस्य भूयस्त्वात्तद्वादः पृथिवीयमिदं जलमित्यादिव्यपदेशस्तद्वादपदाभ्यां साध्यायसमाप्तिसूचनार्थः · एतेन पंचीकरणं संप्रदायाप्रसिद्धमपिनादर

पंचीकरणप्रकारश्चेत्थं · ॥ आकाशमादौ द्विधा विभज्य तयोरेकभागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनं एवं वायुं द्विधा विभज्य तयोरेकं भागं चतुर्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनं एवं तेज आदीनामपि तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति · पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहारः तदुक्तं वैशेष्यात्तु तद्वादस्तद्वाद इति पूर्वोक्तैरपंचीकृतैर्लिङ्गशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपंचककर्मेन्द्रियपंचकप्राणादिपंचकसंयुक्तं जायते · ॥

((णीयं तन्मूलभूतश्रुतिसूत्रयोरभावादन्यथा गगनपवनयोश्चाक्षुषत्वापत्तेरिति · यत्तूक्तम् · श्रुतिसूत्रयोरुपलक्षणार्थत्वादन्यथा पुराणवाक्यानां निरालंबनतापातादपंचीकृतेतरभूतगुणानामितरस्मिन्पंचीकृतेप्यनुपलब्धेस्तथा च यथापंचीकृततेज आदावपंचीकृतस्वगुणानामेवभानं न तु पंचीकृतस्वेतरगुणानां तथाकाशवाय्वोरपीति · सर्वथा संप्रदायसिद्धपंचीकरणमादरणीयमिति भावः । तेषामेव गुणत्रयोपेतानां मन आदिसमुदायात्मकं लिंगशरीरं कार्यमित्याह · पूर्वोक्तैरिति · ननूपलभ्यमानस्थूलशरीरेणैव समस्तकार्यनिर्वाहात्किमर्थकमेतदित्यत आह · परलोकेति ॥ तस्य मोक्षप्यभावाभावमाशंक्याह · मोक्षेति · आत्यन्तिकप्रलयपर्यन्तंस्थायीत्यर्थः ॥ तेषां समुदायः शरीरमित्यादिमैत्रेयश्रुतिमूलकमभियुक्तवाक्यमत्र प्रमाणमित्याह ॥

((अपंचीकृतेतरभूपृथिवीजलम् ॥ ॥

तदुक्तमिति · सूक्ष्मांगं सूक्ष्मशरीरं तत्र ब्रह्मांडव्यापित्वादाद्यं परं देहमात्रव्यापित्वाद्द्वितीयमपरमित्याशयेनाह · तत्रेति ॥ सुबालश्रुतौ संन्यासविधा।
प्यारण्यकश्रुतौ च चतुर्दशभुवनात्मकब्रह्मांडोत्पत्तिरभिहिता तदनुसृत्याह · एवमिति · शरीरजैः कर्मदोषैर्याति स्थावरतां नर इत्यादिवचनमनुसृ।
त्याह · वृक्षादीनामिति · नन्वशरीरस्य परमात्मनः शरीरसाध्यब्राह्मणादिकार्यं प्रति कथं हेतुत्वमित्याशंकायां कालत्रपरंपरयेति दर्शयति · तत्रेति · कार्यकर्तृ
वेलिंगशरीरस्य द्विविधस्य यो वै ब्रह्माणं विदधाति पूर्वमित्यादिश्रुतिर्हिरण्यगर्भस्य साक्षाद्ब्रह्मकार्यत्वे प्रमाणं आदिपदं मरीच्यादिसंग्राहकं हिरण्यग

तदुक्तम् · पंचप्रमाणमनोबुद्धिदशेन्द्रियसमन्वितम् · अपंचीकृत भूतोत्थं सूक्ष्मांगं भोगसाधनमिति · तच्च द्विविधं परमपरं च तत्र
परं हिरण्यगर्भलिंगशरीरं अपरमस्मदादिलिंगशरीरं तत्र हिरण्यगर्भलिंगशरीरं महत्तत्वम् · अस्मदादिलिंगशरीरमहंकार इत्या।
ख्यायते · एवं तमोगुणयुक्तेभ्यः पंचीकृतभूतेभ्यो भूम्यंतरिक्षस्वर्महर्जनस्तपःसत्यात्मकस्योर्ध्वलोकसप्तकस्य अतलवितलसुत
लातलातलरसातलमहातलपातालाख्याधोलोकसप्तकस्य ब्रह्मांडस्य जरायुजांडजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणा
मुत्पत्तिः तत्र जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादिशरीराणि अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादिशरीराणि स्वेदजानि
स्वेदाज्जातानि यूकामशकादीनि उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादीनि · वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्व।
म् तत्र परमेश्वरस्य पंचतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिंगशरीरोत्पत्तौ च · हिरण्यगर्भस्थूलशरीरोत्पत्तौ साक्षात्कर्तृत्वं द्वा
तरं निखिलप्रपंचोत्पत्तौ हिरण्यगर्भादिद्वारा हंताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति
श्रुतेः हिरण्यगर्भो नाम मूर्तित्रयादन्यः प्रथमो जीवः स वै शरीरी प्रथमः॥ ((र्भादिद्वारा परेशस्य कर्तृत्वे श्रुतिं प्रमाणयति · हंतेति · देवताः तेजो

बन्नरूपाः ननु हिरण्यगर्भस्य परेशमूर्तित्रयांतरगतत्वेन कथं जीवत्वमित्याशंक्याह · हिरण्यगर्भ इति · अत्र प्रमाणमाह · स इति · शरीरीति · श्रु।
त्या तस्य जीवत्वावधारणान्मूर्तित्रयान्यत्वे श्रुतिः प्रमाणमिति भावः॥ ब्रह्मा देवानां प्रथमः संबभूवेत्याद्या श्रुतिरादिपदादेयासृष्टिमिति पादेनोपसंहा

निश्चयेनेत्यर्थः॥ पं ५ मूलमे

रःपूर्वकं प्रलयनिरूपणं प्रतिजानीते· एवमिति·भूर्लोकेऽधोलोकेऽधोलोकानामन्तर्भावः स्वर्लोके तदुपरिष्टानामिति त्रिलोकीपक्षे स प्रलयः नित्यादिभेदेन त्रिविधिः चतुर्दशलोकीपक्षे स नैमित्तिकद्वैवतस्य चातुर्विध्यमभिप्रेत्याह· स चेति·प्रलयो नाम विनाश इति पाठः स्पष्टः तत्राद्यं लक्षयति तत्रेति·नित्यप्रलयः प्रतिदिनं प्रविलयः सुषुप्तिकाले सकले विलीन इति कैवल्यश्रुतिमनुसृत्याह· तस्या इति· नन्वेवं तर्हि सुखादिहेतोः धर्मादेः स्मृतिहेतोः संस्कारस्य च तदानीं प्रविलयादुत्थितस्य कथं सुखादिभेदभोगः पूर्वपदार्थस्मरणं चेत्याशंक्याह·धर्माधर्मेति·कारणात्मनाऽविद्यात्मना स्वका

स वै पुरुष उच्यते· आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तते हिरण्यगर्भः समवर्तताग्रे भूतस्य इत्यादिश्रुतेः। एवंभूतभौतिकसृष्टिः। निरूपिता इदानीं प्रलयो निरूप्यते· प्रलयो नाम त्रैलोक्यनाशः स च चतुर्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति तत्र नित्य· प्रलयः सुषुप्तिः तस्याः सकलकार्यप्रलयरूपत्वात्· धर्माधर्मपूर्वसंस्काराणां च तदा कारणात्मनावस्थानम्· तेन सुषुप्तोत्थितस्य न सुखदुःखाद्यनुभवानुपपत्तिः न वा स्मरणानुपपत्तिः न च सुषुप्तावन्तःकरणस्य विनाशे तदधीनप्राणादिक्रियानुपपत्तिः वस्तुतः श्वासाद्यभावेपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात्· सुप्तशरीरोपलम्भवत् न चैवं सुप्तस्य परेतादविशेषः सुप्तस्य हि लिंगशरीरं संस्कारात्मनात्रैव वर्तते परेतस्य तु लोकान्तर इति वैलक्षण्यात्· यद्वा अंतःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न क्रियाशक्तिविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धं यदा सुप्तः स्वप्नं न कंचन पश्यति· अथास्मिन्प्राण एवैकधा भवति·॥

॥( र्यं कारणात्मनाज्ञानं नन्वंतःकरणस्यापि तदानीं कारणात्मनावस्थानात् कथं तदधीनप्राणादिक्रियेत्याशंक्य देहहेतुधर्मादेर्विनाशेपि देहस्थितिवत्तत्क्रियोपलब्धिरपि नानुपपन्नेत्याह·न चेति· ननु कारणाभावे दृष्टसंनिधिविरुद्धमित्यपरितोषादाह· वस्तुत इति· सुप्तस्य मृतादविशेषमाशंक्य परिहरति· न चेति जाग्रदवस्थायामप्येतस्य लिंगशरीरं जन्मान्तरीयतत्तत्पदार्थसंस्कारजन्यतत्तत्पदार्थाकारात्मना लोकान्तरे स्थितं सुप्तस्य तु तादृशसंस्कारात्मनात्रैवेत्यर्थः ननु पुरुषान्तरस्य देहः प्राणक्रियाश्चभ्र॥ ॥ ॥

धर्माधर्माद्यभावे सुखाद्यनुभवस्मरणे विरुद्धम्॥

कर्मेन्द्रियव्यापारादिकं कथं प्रमान्न प्रतीयते·पं·१

नात्मलीयते न कर्मेन्द्रियव्यापारादिकमिति वैषम्ये नियामकाभावमाशंक्याह· यद्येति· आदिपदमपानादिसंग्राहकं देहावस्थानं तु मृतशरीरावस्थानवद्विरुद्धमिति भावः। अत्र प्रमाणमाह·। यदेति· अथ तदानीमस्मिन्सुप्ते सति एकधा एकः एनं प्राण अप्येति· प्रविशति कौषीतकिश्रुतिमुदाहृत्य च्छान्दोग्यश्रुतिमुदाहरति सतेति हे सौम्य तदा सुषुप्तौ सता तत्सद्रूपेण ब्रह्मणा जीवः संपन्नोऽभेदं गतो भवति स्वमपीतो विलीनस्तिरोहितोपाधिर्भवतीत्यर्थः॥ सतिसंपद्य न विदुरित्याद्या श्रुतिरादिपदेन ग्राह्या· एवं नित्यप्रलयमभिधाय प्राकृतं निरूपयति· प्राकृतेति सकलकार्यविनाशः प्राकृतो लयः सुषुप्तस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यविनाशरूपत्वाभावान्न तत्रातिव्याप्तिः प्रागेवोत्पन्नपरब्रह्मसाक्षात्कारस्य हिरण्यगर्भस्य ब्रह्माण्डाधिकारनिर्वाहकप्रारब्धकर्मपरिसमाप्तौ स

अथैनं वाक् सर्वैर्नामभिः सहाप्येति। सता सोम्य तदा संपन्नो भवति स्वमपीतो भवतीत्यादिश्रुतिरुक्तसुषुप्तौ मानम्· प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाशः यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यं ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति श्रुतेः॥ ॥ एवं स्वलोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्वर्तिनिखिललोकतदन्तर्वर्तिस्थावरादीनां भौतिकानां। भूतानां च प्रकृतौ मायायां च लयः न तु ब्रह्मणि बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात्· अतः प्राकृत इत्युच्यते॥ ७ ॥

त्यां यदा विदेहकैवल्यात्मिका परममुक्तिस्तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह तथाभूतमुक्तिरित्यर्थः· उक्तार्थे श्रुतिं प्रमाणयति· ब्रह्मणेति· प्रतिसंचरे प्राकृतप्रलये संप्राप्ते सति परस्य हिरण्यगर्भस्यान्ते मुक्तिसमये ते सत्यलोकवासिनः कृतात्मानः प्राप्ततत्त्वसाक्षात्काराः सर्वे ब्रह्मणा सह परं पदं विदेहकैवल्यं प्रविशन्तीत्यर्थः॥ नन्वेवं तर्हि ब्रह्मण्येवायं प्रलयो न प्राकृत इत्याशंक्य तत्त्वविदां ब्रह्मप्रवेशेऽप्यतत्त्वविदां प्रकृतौ प्रवेशात्प्राकृत इत्याह· एवमिति· मायायां लयो निवृत्तिः तत्र हेतुमाह· बाधेति· ब्रह्मनिष्ठत्वाद्ब्रह्मधर्मत्वाद्ब्रह्मणि तदात्मना स्थितत्वादिति॥ ७ ॥

वानैमितिकंतंदर्शयति·कार्येति·त्रैलोक्यंभूर्भुवःस्वरितिलोकत्रयंब्रह्मदिवसस्यकिंप्रमाणमित्यपेक्षायामाह·ब्रह्मणइति·नैमितिकप्रल॥
यकालोप्येतावानेवेत्याह·प्रलयेति·आत्यंतिकंचतुर्थंप्रलयंनिरूपयति·तुरीयेति·सर्वमोक्षअज्ञानेनसहकार्य्यविनाशःतुरीयप्रलयेश्रुतिं
प्रमाणयतिसर्वइति·यत्रतुसर्वमात्मैवाभूत्तत्केनकंपश्येदितीत्याद्याश्रुतिरादिपदेनादेयालयेत्वाविशेषेपिविशेषमाह॰तत्रेति॰तत्रच

कार्यब्रह्मणोदिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलयःनैमितिकप्रलयःब्रह्मणोदिवसश्चतुर्युगसहस्रपरिमितकालःच
तुर्युगसहस्राणिब्रह्मणोदिनमुच्यते·इतिवचनात्·॥प्रलयकालोदिवसकालपरिमितःरात्रिकालस्यदिवसकालतुल्यत्वात्·॥
प्राकृतप्रलयेनैमितिकप्रलयेच· पुराणवचनानि· द्विपरार्द्धेत्वतिक्रांतेब्रह्मणःपरमेष्ठिनःतदाप्रकृतयःसप्तकल्पंतेप्रल
यायहिएषप्राकृतकोराजन् प्रलयोयत्रलीयतेइतिवचनंप्राकृतप्रलयेमानंएषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृक्शे
तेनंतासनेनित्यमात्मसात्कृत्यचाखिलमितिवचनंनैमित्तिकप्रलयमानम् तुरीयप्रलयस्तु·ब्रह्मसाक्षात्कारनिमित्तकःस
र्वमोक्षःसचैकजीववादेयुगपदेवनानाजीववादेतुक्रमेणसर्वएकीभवन्तीत्यादिश्रुतेःतत्राद्यास्त्रयोपिलयाःकर्मोपरतिनि
मित्ताः तुरीयस्तुज्ञानोदयनिमित्तःलयोज्ञानेनसहैवेतिविशेषः॥एवंचतुर्विधःप्रलयोनिरूपितःतस्येदानींक्रमोनिरूप्यते·
भूतानांभौतिकानांचनकारणलय क्रमेणलयःकारणलयसमयकार्य्याणामाश्रयांतराभावेनावस्थानानुपपत्तेःकिंतुसृ
ष्टिक्रमविपरीतक्रमेण· तत्तत्कार्यनाशेतत्तज्जनकादृष्टनाशस्यैवप्रयोजकतयाउपादाननाशस्याप्रयोजकत्वात्॰॥ ॥
अन्यथा॥ ॥तुर्यप्रलयेषुप्रलयनिरूपणमुपसंहरंस्तत्क्रमेविप्रतिपत्तेस्तन्निरूपणंप्रतिजानीते·एवमिति·स्वसिद्धांतंवक्तुमादौन्यायमतंदूषय

ति·भूतानामिति·तर्हिकेनक्रमेणलयइतिपृच्छतिकिंत्विति·उत्तरमाह·सृष्टीति·सृष्टिक्रमविपरीतक्रमेणलयइत्यनुषज्यते·तत्रहेतुमाह
तत्तत्कार्यनाशइति·अनुगतंहिप्रयोजकमस्त्वननुगतत्वादप्रयोजकत्वमित्याशयः विपक्षेदोषमाह· अन्यथेति·॥ ७ ॥

उपादाननाशस्यप्रयोजकत्वे सृष्टिक्रमविपरीतक्रमं दर्शयति· तथाचेतिकार्यावस्थानानुपपत्तेरननुगमाच्चोपादाननाशस्याप्रयोजकतयाऽदृष्ट
नाशस्यप्रयोजकत्वे सति हिरण्यगर्भाहंकारे महतत्वे· अत्रप्रमाणमाह· तदुक्तमिति· अत्रेन्द्रियादिद्वाराव्यक्तेलयोद्रष्टव्य आकाशमिन्द्रियेषु इं
द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयंत इति सुबालोपनिषद्वचनानुसारात्· नचेदमप्रासंगिकं तत्पदार्थलक्षणस्य प्रलयपदार्थनिरूप
णं विना तद्बोधादित्याशयेनाह· एवंविधेति· ननूक्तमिदं तत्पदार्थलक्षणं यथार्थं किंवाऽयथार्थं· आद्ये ब्रह्मणः सप्रपंचत्वापत्तिः न द्वितीयस्तत्प्र
तिपादकश्रुत्यादिवाक्यानामप्रामाण्यापत्तेरिति शंकते। नन्विति।। यथा शाखाग्रसंलग्नस्यापि चंद्रस्य तदग्रसंलग्नत्वं प्रकल्प्य शाखाग्रे चंद्र इति· तट

न्यायमते महाप्रलये पृथिवीपरमाणुगतरूपरसादेर्विनाशापत्ते तथाच पृथिव्याः आप्सु अपां तेजसि तेजसो वायौ वायोरा
काशे आकाशस्य जीवाहंकारे तस्य हिरण्यगर्भाहंकारे तस्य चाविद्यायामित्येवंरूपाः प्रलयाः तदुक्तम्· विष्णुपुराणे जगत्प्रति
ष्ठा देववर्षे पृथिव्यप्सु प्रलीयते· तेजस्यापः प्रलीयंते तेजो वायौ प्रलीयते· वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते· अव्यक्तं पुरु
षे ब्रह्मन् निष्कले संप्रलीयते· इति।। एवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणः तटस्थलक्षणं· ननु वेदांतैर्ब्रह्मणि जगत्का
रणत्वेन प्रतिपाद्यमाने सति सप्रपंचब्रह्म स्यादन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तेरिति चेन्न· नहि सृष्टिवाक्यानां सृष्टौ तात्पर्यं
किंतु अद्वितीये ब्रह्मण्येव· तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः।। स्थलक्षणम्।। तथा मिथ्याभूतस्य प्रपंचस्य ब्रह्मसंबंधेपि· श्रुतिप्रतिबोधनाय जग

ज्जनकत्वं प्रकल्प्य तल्लक्षणाभिधानान्नैवमित्याशयेनाह· नेति· नेह नानास्ति किंचन न निरोधो न चोत्पत्तिरित्यादिश्रुतिबाधितेर्थे नास्ति सृष्टिश्रुतिवा
क्यानां तात्पर्यं येन तेषामप्रामाण्यं भवेदित्याह· नहीति ननु प्रतीयमानेर्थे तात्पर्याभावे क्व तर्हि तात्पर्यमिति पृच्छति· किंत्विति· विषं भुंक्ष्वेति वाक्य
स्याप्तवाक्यत्वाद्बाधिते प्रतीयमानेर्थे तात्पर्याभावेन शत्रुगृहभोजननिषेधपरत्वम्· यथा तथोक्तवाक्यानामपि श्रुतिबाधितप्रतीयमानार्थे तात्पर्या
योगेनाद्वितीयब्रह्मपरत्वेन तस्यैव प्रतिपादकत्वं यत्परः शब्दः स शब्दार्थः।। इत्यभिप्रेत्योक्तेरित्युत्तरमाहाद्वितीय इति· ननु शत्रुगृहभोजनादरं विषभ
।। क्षणमिति प्रतीयमानार्थस्य यथा तादृशभोजननिषेधप्रतिप·।।

तौविनियोगस्तथात्रकथंसृष्टेरद्वितीयब्रह्मावबोधनेविनियोगःप्रपंचनिषेधपरैरेवतत्प्रतिपत्तेःस्पष्टतयाप्रतीयमानान्यार्थकैर्वाक्यैस्तद्बोधनस्यव्यर्थत्वादित्याशयेनशंकते·नद्विति·यस्मिन्ब्रह्मणिप्रपंचनिषेधस्तद्ब्रह्मैवजगदुपादानमतस्तस्यान्यत्रावस्थानाशंकाभावेननिःसंशयतयामिथ्यात्वसिद्धेरद्वितीयब्रह्मसिद्ध्यतीत्येवंतत्प्रतिपत्तौप्रतीयमानार्थविनियोगइतिसमाधत्ते·इत्थमिति·निर्विचिकित्संसंशयरहितं·नन्वेवंसृष्टिवाक्यानामद्वितीयब्रह्मबोधकत्वेपिनिर्विचिकित्समद्वितीयत्वंनसिध्यति·यएषोन्तरादित्येहिरण्मयःपुरुषइत्यादिवाक्यैःसगुणब्रह्मप्रतिपादनादित्याशं

इत्थंयदिसृष्टिमनूद्यतस्यनिषेधोब्रह्मणिप्रपंचस्यप्रतिपाद्येततदाब्रह्मणिनिषिद्धस्यप्रपंचस्यवायौप्रतिषिद्धस्यरूपस्येवब्रह्मणोन्यत्रावस्थानशंकायांननिर्विचिकित्समद्वितीयत्वंप्रतिपादितंस्यात्ततःसृष्टिवाक्याद्ब्रह्मोपादेयत्वज्ञानेसत्युपादानंविनाकार्यस्यान्यत्रसद्भावशंकायांनिरस्तायांनेतिनेतीत्यादिनाब्रह्मण्यर्पितस्यासत्त्वोपपादनेप्रपंचस्यतुच्छत्वावगमेनिरस्ताखिलद्वैतविभ्रममखंडसच्चिदानंदैकरसंब्रह्मसिद्ध्यतीतिपरंपरयासृष्टिवाक्यानामप्यद्वितीयब्रह्मण्येवतात्पर्यम्०॥उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानांचोपासनाविध्यपेक्षितगुणारोपमात्रपरत्वंनगुणपरत्वंनिर्गुणप्रकरणपठितानांसगुणवाक्यानांतुनिषेधवाक्यापेक्षितनिषेध्यसंपादकत्वेनविनियोगइति·नकिंचिदपिवाक्यमद्वितीयब्रह्मप्रतिपादनेनविरुध्यते·तदेवंस्वरूपतटस्थलक्षणलक्षितंतत्पदवाच्यमीश्वरचैतन्यंमायाप्रतिबिंबितमितिकेचित्·॥तेषामयमाशयः॥ ७ ॥

क्वाहोपासनेति·योषिद्वावगौतमाग्निरित्यादिवदारोपितगुणेनाप्युपासनासंभवेनकेवलोनिर्गुणश्चेत्यादिश्रुतिविरुद्धार्थपरत्वमुक्तवाक्यानामयुक्तंतथाचसगुणब्रह्मवाक्यानिचित्तैकाग्र्यद्वाराद्वितीयब्रह्मबोधकानीतिभावः·मूर्तंचामूर्तंचमर्त्यंचामृतंचेत्यादिवाक्यानांविनियोगमाहनिर्गुणेति·अथातआदेशोनेतिनेतीत्यादीनिनिषेधवाक्यानिकर्मकांडवाक्यानामपिव्यावहारिकप्रामाण्यवतांसंयोगपृथक्त्वन्यायेनाद्वितीयब्रह्मप्रतिपत्तौविनियोगमभिप्रेत्याह·नकिंचिदपीति·ननुकिंतल्लक्ष्यंयस्येदंलक्षणद्वयमुच्यतइत्याकांक्षायामाह·तदेवमितिनन्वविद्यातोमायाभेदाभावात॥ ७ ॥

कर्मकांडवाक्यानामपिप्रयोजनेनामसंयोगःस्वर्गेऽस्तिनेतिनेतीत्यादिवाक्यानांप्रयोजनंप्रपंचनिषेधोऽस्तिततःस्वर्गात्पृथक्करणायनेतिनेतीत्यादिवाक्यानांप्रयोजनमितिस्वर्गनिषेधेतात्पर्यमस्तीत्येवंरूपोसंयोगपृथक्त्वन्यायः॥ २॥

त्प्रतिबिंबितस्य च जीवित्वात्कथं मायायां प्रतिबिंबितं चैतन्यमीश्वर इत्याशंक्याह· तेषामिति· तन्मते जीवेश्वरविभागमाह तदिति· एवं विधानेक
जीववादे दूषणाभिधानपूर्वकं मतांतरमवतारयति· एतन्मतइति· अस्मिन्पक्षे मतद्वयमाह· बिंबप्रतिबिंबेति· नन्वस्मिन्मते पूर्वोक्तदोषाभावेपि।
दोषांतरमस्तीति शंकते· नन्विति· बिंबस्य प्रतिबिंबदेशावर्तित्वनियमादिति भावः उक्तनियमस्याकाशे व्यभिचारात्परिच्छिन्नबिंबस्य तथात्वमप

जीवपरमेश्वरसाधारणं चैतन्यमात्रं बिंबं तस्यैव बिंबस्याऽविद्यात्मिकायां मायायां प्रतिबिंबमीश्वरचैतन्यमंतःकरणेषु प्र
तिबिंबं जीवचैतन्यं कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुतेः एतन्मते जलाशयगतशरावगतसूर्यप्रतिबिंबयोरिव जीव
परमेश्वरयोर्भेदः अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वं· अंतःकरणस्य परिच्छिन्नतया तदुपाधिकजी
वस्यापि परिच्छिन्नत्वं· एतन्मतेऽविद्याकृतदोषा जीव इव परमेश्वरेपि स्युरुपाधेः प्रतिबिंबपक्षपातित्वादित्यस्वरसात्· बिंबात्मक
मीश्वरचैतन्यमित्यपरे· तेषामयमाशयः एकमेव चैतन्यं बिंबत्वाक्रांतमीश्वरचैतन्यं प्रतिबिंबत्वाक्रांतं जीवचैतन्यं· बिंबप्रति
बिंबकल्पनोपाधिश्चैकजीववादे अविद्या अनेकजीववादे तु· अंतःकरणान्येवाऽविद्यांतःकरणरूपोपाधिप्रयुक्तो जीवपरभेदः।
उपाधिकृतदोषाश्च प्रतिबिंबे जीव एव वर्तंते न तु बिंबे परमेश्वरे उपाधेः प्रतिबिंबपक्षपातित्वात्· एतन्मते च गगनसूर्यस्य जला
दौ भासमानप्रतिबिंबसूर्यस्येव जीवपरयोर्भेदः। ननु ग्रीवास्थमुखस्य दर्पणप्रदेश इव बिंबचैतन्यस्य परमेश्वरस्य जीवप्रदे
शेऽभावात्तस्य सर्वांतर्यामित्वं न स्यादिति चेन्न· साभ्रनक्षत्रस्य आकाशस्य जलादौ प्रतिबिंबितत्वे बिंबभूतमहाकाशस्यापि जला
दिप्रदेशासंबंधदर्शनेन परिच्छिन्नबिंबस्य प्रतिबिंबदेशासंबंधित्वेप्यपरिच्छिन्नब्रह्मबिंबस्य प्रतिबिंबदेशसंबंधाविरोधात्·

रिच्छिन्नबिंबस्य तथात्वाभावान्मैवमित्याह· नेति जलादिष्वाकाशमेव भातीति शंकानिरासार्थमुक्तम्· साभ्रेति· नन्वभ्रादिकमेव तत्र प्रतीबिंबते नाका
शं तस्य रूपरहितत्वाद्रूपवत एव प्रतिबिंबितत्वदर्शनात्तथा च नीरूपस्य ब्रह्मणो न प्रतिबिंबसंभव इत्याशंक्य परिहरति· न चेति· किं रूपवत एव प्रति।
बिम्बउत रूपवतो द्रव्यस्येति विकल्प्याद्यं प्रत्याह·॥

नीरूपस्यापीति· द्वितीयमनुद्यदूषयति· नचेति· यतः समवायिकारणं गुणाश्रयो वा द्रव्यमत आत्मनस्तु निर्गुणत्वात्समवायाप्रसिद्धेश्च द्रव्यत्वाभावस्यो
क्तत्वादित्यर्थः॥ तथा च नीरूपस्य द्रव्यस्याकाशादेः प्रतिबिंबानभ्युपगमेपि नीरूपस्याद्रव्यस्य ब्रह्मणो रूपवत्प्रतिबिंबसंभवस्त्येवेति भावः॥ द्रव्यत्वाभ्यु
पगमेपि दोषाभाव इत्यभिप्रेत्य हेत्वंतरमाह एकधेति· एकधा ईश्वररूपेण एकः बहुधा: जीवात्मना नानारूप आदिपदेन उपाधिना क्रियते भेदरूपो देवः स्वेने
षेवमजोयमात्मेति वाक्यशेषो ग्राह्यः ब्रह्मप्रतिबिंबाभावानुमानस्य ब्रह्म न प्रतिबिंबत्वमर्हत्यचाक्षुषत्वाद्गंधादिवदित्येवंरूपस्यानुमानस्य· तथा
च भगवतो बादरायणस्य सूत्रं· आभास एव च· अत एव चोपमा सूर्यकादिवदिति· अत्र विस्तरभयात् मूलकृत्सतोवच्छेदवादोपि द्रष्टव्यः तथा हि घटाकाश
वदंतःकरणावच्छिन्नं चैतन्यं जीवस्तदनवच्छिन्नं तदीश्वरः आलोकप्रतिबिंबे गगनप्रतिबिंबितत्वव्यवहारस्य भ्रममात्रमूलकतया बिंबस्य प्रतिबिंबा

न च रूपहीनस्य ब्रह्मणो न प्रतिबिंबसंभवः रूपवत एव तथात्वदर्शनादिति वाच्यम्· नीरूपस्यापि रूपस्य प्रतिबिंबदर्शनात्· न च नी
रूपस्य द्रव्यस्य प्रतिबिंबाभावनियमः आत्मनो द्रव्यत्वाभावस्योक्तत्वात्· एकधा बहुधा चैव दृश्यते जलचन्द्रवत्· यथा ह्ययं ज्योतिरा
त्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्नित्यादिवाक्येन ब्रह्मप्रतिबिंबाभावानुमानस्य॥ ((स्थानावस्थानाभावनियमस्य भंगाभावाद्ब्रह्मप्र

तिबिंबो न युक्तः ननु ब्रह्मांडांतरवर्तिनस्तदंतःकरणोपाधिभिस्तदंतर्वर्तिचैतन्यस्य सर्वात्मना जीवभावेनावच्छेदात्तदवच्छेदरहितचैतन्यात्मकस्येश्व
रस्य ब्रह्मांडांतरसत्वापत्तिरत्रापि समानेति चेन्न· अविद्याश्रयत्वांतःकरणसंवलितत्वाद्युपाधिकाज्जीवाद्भिन्नस्याविद्याविषयत्वांतःकरणासंवलि
तत्वाद्युपाधिकस्यांतर्यामिण ईश्वरस्य ब्रह्मांडांतरवस्थानसंभवात्· न च कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति वाक्यविरोधः तस्य पक्षद्वये
पि तुल्यत्वात्· कारणावच्छिन्नस्य कार्यानवच्छिन्नत्वे बाधकाभावान्न चास्मिन्पक्षे श्रुतिसूत्रविरोधः भाष्यकारैरेतात एव चेति· सूत्रं व्याख्याय सूर्यादि
वदात्मनः प्रतिबिंबो न युज्यत इति· न दाक्षेपकत्वेनांबुवदग्रहणात्तु न तथात्वमिति सूत्रं व्याख्याय वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवमिति
सूत्रे· उक्तानुपपत्तिमंगीकृत्यैव श्रुत्युक्तदृष्टांतस्य सोपाधिकस्यात्मनो वृद्धिह्रासादिभाक्त्वं न निरुपाधिकस्येति प्रदर्शनार्थत्वेन चात्माप्र॥ छ ॥

50

लिबिंबतदूत्यभिहितत्वात्· बृहदारण्यकभाष्यादौ प्रतिबिंबरूपेणप्रवेशेनासंभवतीत्युक्तत्वाच्चेति· संक्षेपः। विस्तरस्त्वन्यत्रद्रष्टव्यः· मूलकर्तुरप्ययमे
वपक्षोभिप्रेतः प्रत्यक्षपरिच्छेदे ईश्वरसाक्षीत्वादिप्रकरणएतस्यपक्षस्यस्वसंमतत्वेनसूचितत्वात्तत्पदार्थनिरूपणमुपसंहरंस्त्वंपदार्थनिरूपणंप्रतिजा
नीते· तदेवमिति· तत्रैकजीववादेतत्त्वरूपमाहैकेति· अविद्यायायाएकत्वेनतत्प्रतिबिंबस्यजीवस्याप्येकत्वौचित्यादितिभावः॥ तद्योयोदेवानांप्रत्य
बुद्ध्यतसएवतदभवत्तथाऋषीणांतथामनुष्याणांयथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंति एवमेवैतस्मादात्मनःसर्वेएतआत्मानइत्यादिश्रुतेः मामेवयेप्रपद्यंते
मायामेतांतरंतितेइत्यादिस्मृतेः भोगेनत्वितरेक्षपयित्वासंपद्यतइत्यादिसूत्रात्सचस्वात्मभूतानिवघटाकाशस्थानीयानविद्योपस्थापितनामरूपकृ
तकार्यकारणसंघातानुरोधिनोजीवाख्यान् विज्ञानात्मनः प्रविष्टइत्यादिभाष्यादनंतजीवनिर्भासास्पदमेकरसंब्रह्मेतिपद्मपादाचार्योक्तेश्चैकजीवा॥

बाधितत्वाच्च· तदेवंतत्पदार्थोनिरूपितः इदानींत्वंपदार्थोनिरूप्यते· एकजीववादेऽविद्याप्रतिबिंबोजीवः अनेकजीववादेअंतः
करणप्रतिबिंबः सचजाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् तत्रजाग्रद्दशानामेन्द्रियजन्यज्ञानावस्था· अवस्थांतरेइन्द्रियाभावान्ना
तिव्याप्तिः इन्द्रियजन्यज्ञानंचांतःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात्· साचान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकंमतं· तथा
हि· अविद्योपहितचैतन्यस्यजीवत्वपक्षेघटाद्यधिष्ठानचैतन्यस्यजीवरूपतयाजीवस्यसर्वदाघटादि॥ १ वादेऽयुक्तइत्यभिप्रेत्याहाने

केति· इदमुपलक्षणमविद्यावच्छिन्नोजीवइतिमतस्यापिमायाभिरितिबहुवचनादविद्यायास्तच्छक्तेर्वानानात्वाज्जीवनानात्वंअजामित्येकवचनंतु
जात्यभिप्रायकं· नचकार्योपाधिरयंजीवइतिवाक्यविरोधःसमाहितत्वात्· स्वमपीतोभवतीति· श्रुतिस्तुतदानीमन्तःकरणलयेकर्तृत्वाद्यभावादुपप
न्नागत्यादिकमप्यातिवाहिकशरीरगमनादिप्रयुक्तमित्यविरोधः। तस्योपाधिगतावस्थावत्त्वमाह· सचेति· तुरीयावस्थातूपाधितादात्म्याध्यासनिवृत्तिका
लीनातदुपहितचैतन्यस्यजीवस्यजाग्रदाद्यवस्थात्रयवत्वलक्षणमुक्तम्॥ तत्रजाग्रदवस्थांलक्षयति· जाग्रदिति· इन्द्रियजन्यज्ञानयोग्यसमयइत्य
र्थः। इन्द्रियजन्येति· पदकृत्यमाहावस्थांतरइति· स्वप्नसुषुप्त्यावस्थयोरित्यर्थः॥ इन्द्रियजन्यज्ञानस्य॥ १ विज्ञानात्मनःजीवान्प्रतिसद्ममात्मासृष्टेनागप्रेरितान्·पं·
अनंतजीवानांनिर्भासनामप्रतीतिरास्पदंनामाधिकरणमधिष्ठानमित्यर्थः॥पं·१॥ आत्मास्वमपिस्वस्मिन्स्वरूपेअपिइतिनिश्चयेनइतःनामप्राप्नोति·॥टि·पं·

रूपमकिमित्याकांक्षायामाहेन्द्रियजन्येति·चैतन्यरूपंज्ञानंकुतोनेत्यतआह·स्वरूपेति·ननुस्वरूपज्ञानेनैवसर्वदासिद्धेनविषयप्रकाशसिद्धौतज्जन्या
वृत्तिःकिमर्थेत्यतआह·साचेति·नन्वावरणभंगोपिचैतन्येनैवभविष्यतीत्याशंक्याह·तथाहीति·अविद्योपहितस्यतत्प्रतिबिंबस्यतदवच्छिन्नस्यवा
सर्वदाभानप्रसक्तिवारणायावरणरूपमूलाज्ञानशक्तिविशेषस्यावश्यकत्वेतद्भंगंविनाकदापिभानंनस्यादतस्तद्भंगआवश्यकइत्यर्थः॥आवर
णभंगोपिचैतन्येनेत्यत्रकिंचैतन्यमात्रेणकिंवोपहितचैतन्येनेति·विकल्प्याद्यमत्याह·नेति·तद्भासकस्यनतत्सत्तास्फूर्तिप्रदस्यतस्यतन्निवर्तक
त्वेकदाप्यावरणस्यावस्थानंनस्यादेतेनतृणादिप्रकाशकस्याप्यग्नेस्तन्नाशकत्वदर्शनान्नभासकत्वनिवर्तकत्वयोर्विरोधइतिप्रत्युक्तंवह्नेस्तृणादेःस

भानप्रसक्तौघटाद्यवच्छिन्नचैतन्यावरकमज्ञानंमूलाविद्यापरतंत्रमवस्थापदवाच्यमभ्युपगन्तव्यम्·एवंसतिघटादेर्नसर्व
दाभानप्रसंगः अनावृतचैतन्यसंबंधस्यैवभानप्रयोजकत्वात्तस्यचावरणस्यसदातनत्वेकदाचिदपिघटभानंनस्यादिति·त
द्भंगेवक्तव्येतद्भंगजनकंनचैतन्यमात्रंतद्भासकस्यतदनिवर्तकत्वात् नापिवृत्त्युपहितचैतन्यंपरोक्षस्थलेपितन्निवृत्त्यापा
तेरितिपरोक्षवृत्तिव्यावृत्तवृत्तिविशेषस्यतदुपहितचैतन्यस्यवावरणभंगजनकत्वमित्यावरणाभिभवार्थावृत्तिरित्युच्यतेऽत्रै
कंमतंसंबंधार्थावृत्तिरित्यपरंमतम्·तत्राविद्योपाधिकोऽपरिच्छिन्नोजीवःसचघटादिप्रदेशेविद्यमानोपिघटाद्याकारापरोक्ष
वृत्तिविरहदशायांनघटादिकमवभासयतिघटादिनातस्यसंबंधाभावात् तदाकारवृत्तिदशायांतुभासयतितदासंबंधसत्वात्·

तास्फूर्तिप्रदत्वरूपभासकत्वाभावात् द्वितीयंनिरस्यति·नापीति·वृत्तिविशेषस्यघटाद्याकारायास्तद्वृत्तेःवृत्तेर्जडत्वात्कथंतयावरणनिवृत्तिरिति
चेतत्राह·तदुपहितेति·तादृशवृत्तेरभिव्यंजिकाया आवश्यकत्वेनवृत्तिरेवतदर्थेत्याहेतीति·इत्येकंमतमित्युक्तिसूचितंद्वितीयंमतंदर्शयति·संबंधा
र्थेति·तत्रतस्मिन्मते·अविद्योपाधिकोऽपरिच्छिन्नोजीवइतिमतेइत्यर्थः॥ननुसंबंधाभावःसंबंधप्रयोजकाभावादुच्यते·किंचात्मनोसंगत्वान्नाद्यः
परिच्छेदशून्यस्यघटादिसंबंधेप्रयोजकाकांक्षाभावान्नद्वितीयःवृत्त्यनंतरमपितस्यदुर्घटत्वादितिशङ्कते·॥ ७ ॥ ७ ॥ ७ ॥

51

राम
५१

नन्विति·असंगत्वेति·असंगोनहिसज्यतइतिश्रुत्युक्तपारमार्थिकासंगत्वदृष्टेरित्यर्थः॥त्वदापादितसंबंधसामान्यंनास्माकंनिषेध्यमतोनास्मदुक्तिरसंगतेत्याह·नहीति·पृच्छतिकिंतर्हीतिउत्तरमाह·घटादीति·निषेधामइत्यनुषज्यते·ननुसचसंबंधःसंयोगःसमवायोवानाद्यःअपरिच्छिन्नेजीवेघटादेःसर्वदासंयुक्तत्वेनसर्वदाभानप्रसंगात्·नद्वितीयःअनंगीकारादंगीकारेचतस्यनित्यत्वेनोक्तदोषादित्याशंक्याह·सचेति·घटाद्याकारवृत्तिसमयेतदुपहितजीवचैतन्यस्यव्यंग्यत्वंनहिविषयस्यघटादेर्व्यंजकत्वमितिनादृशावृत्तिरेवनत्रकारणमित्यर्थः॥ननुघटादेरस्वच्छस्यस्वाकारवृत्ति

नन्वविद्योपाधिकस्यापरिच्छिन्नस्यजीवस्यस्वतएवसमस्तवस्तुसंबंधस्यवृत्तिविरहदशायांसंबंधाभावाभिधानमसंगतम्असंगत्वदृष्ट्यासंबंधाभावाभिधानेवृत्त्यनंतरमपिसंबंधोनस्यादितिचेत्·उच्यतेनहिवृत्तिविरहदशायांजीवस्यघदिनासह टा संबंधसामान्यंनिषेधामःकिंतर्हिघटादिभानप्रयोजकंसंबंधविशेषंसचसंबंधविशेषोविषयस्यजीवचैतन्यस्यव्यंग्यव्यंजकतालक्षणःकादाचित्कःतत्तदाकारवृत्तिनिबंधनःतथाहितैजसमंतःकरणंस्वच्छद्रव्यत्वात्·स्वतएवजीवचैतन्याभिव्यंजनसमर्थंघटादिकंतुनतथाअस्वच्छद्रव्यत्वात्·स्वाकारवृत्तिसंयोगदशायांतुवृत्त्यभिभूतजाड्यधर्मकतयावृत्त्युस्यादितिचैतन्याभिव्यंजनयोग्यताश्रयतयावृत्त्युत्थानानंतरंचैतन्यमभिव्यनक्ति·तदुक्तंविवरणे·अंतःकरणंहिस्वस्मिन्निवस्वसंसर्गिण्यपिघटादौचैतन्याभिव्यक्तियोग्यतामापादयतीति·इत्थंचास्वच्छद्रव्यस्यापिस्वच्छद्रव्यसंबंधदशायांप्रतिबिंबग्राहित्वम्·यथाकुड्यादेर्जलादिसंयोगदशायांमुखादिप्रतिबिंबग्राहिता॥

((दशायामपिकथमभिव्यंजकत्वमित्यपेक्षायामाह·नतथाहीति·नतथास्वतःजीवचैतन्याभिव्यंजनसमर्थंनभवति·कथंतर्हितत्समर्थमितितत्राह·स्वाकारेति·वृत्त्याअभिभूतस्तिरस्कृतोजाड्यधर्मोयस्यतथावृत्त्याउत्पादितायाचैतन्याभिव्यंजनयोग्यतातदाश्रयतयाचेत्यर्थः॥अभिव्यनक्तिघटादिकमितिकर्तृपदमनुषज्यतेमत्रसंमतिमाह·तदुक्तमितिनन्वस्वच्छद्रव्यस्यप्रतिबिंबग्राहित्वंनदृष्टचरमित्याशंक्याह·इत्थंचेति·ननुघटादेरस्वच्छद्रव्यस्यचैतन्याभिव्यंजकत्वदृष्टांतस्यवक्तव्यत्वप्रतिबिं

॥ बग्राहिकुड्यादिनिदर्शनप्रदानमसंगतमित्याशंक्याह·॥

वे·प·
टी·टी·
५२

घटादेरिति·इदंचवृत्तिंविनानसिद्ध्यतीतितादृशसंबंधप्रयोजकतातस्मादित्याहेवमिति ननुवृत्तेरेवंविधसंबंधार्थाभ्युपगमेकथंघटादेरपरोक्षत्वंविष
यस्यप्रमातृचैतन्याभिन्नत्वमपरोक्षत्वमित्युक्तत्वादित्याशंक्याहेतन्मतइति·इदमुपसंहरन्मतांतरंसंबंधार्थत्वोपपादनंप्रतिजानीते·एवमिति·अंतः
करणोपाधिकस्तत्प्रतिबिंबस्तदवच्छिन्नोवातर्ह्यस्मिन्मतेघटाद्युपादानंकिमितिपृच्छति·किंत्विति·उत्तरमाह·ब्रह्मैवेति· ननुतस्यव्यापकत्वेपिके

घटादेरभिव्यंजकत्वंचतत्प्रतिबिंबग्राहित्वंचैतन्याभिव्यक्तत्वंचतत्रप्रतिबिंबितत्वम्·एवंविधाभिव्यंजकत्वसिद्ध्यर्थमेववृत्तेरप
रोक्षस्थलेबहिर्निर्गमनांगीकारःपरोक्षस्थलेतुवह्न्यादेर्वृत्तिसंसर्गाभावेनचैतन्यानभिव्यंजकतयानवह्न्यादेरपरोक्षत्वम्·एत
न्मतेचविषयाणामपरोक्षत्वंचैतन्याभिव्यंजकत्वमितिद्रष्टव्यम्·एवंजीवस्यापरिच्छिन्नत्वेपिवृत्तेःसंबंधार्थत्वंनिरूपितंइदा
नींपरिच्छिन्नत्वपक्षेसंबंधार्थकत्वंनिरूप्यते· तथाहि·अंतःकरणोपाधिकोजीवःतस्यनघटाद्युपादानताघटादिदेशासंबंधात्·किं
तुब्रह्मैवघटाद्युपादानंतस्यमायोपहितस्यसकलघटाद्यन्वयित्वात् अतएवब्रह्मणःसर्वज्ञतातथाचजीवस्यघटाद्यधिष्ठान
ब्रह्मचैतन्याभेदमंतरेणघटाद्यवभासासंभवेप्राप्तेतदवभासायघटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थंघटाद्याकारवृत्तिरिष्य
ते।ननुवृत्त्यापिकथंप्रमातृचैतन्यविषयचैतन्योरभेदःसंपाद्यतेघटांतःकरणरूपोपाधिभेदेनतदवच्छिन्नचैतन्ययोरभेदासंभ
वादितिचेन्नवृत्तेर्बहिर्देशनिर्गमनांगीकारेणवृत्त्यंतःकरणविषयाणामेकदेशस्थत्वेनतदुपधेयभेदाभावस्योक्तत्वात्· एवमप
रोक्षस्थलेवृत्तेर्मतभेदेनविनियोगःउपपादितः इन्द्रियाजन्यविषयगोचरापरोक्षांतः॥ केवलस्यासंगितयाकथंघटादिदेशसंबंधइत्या

शंकाकेवलस्यतदसंभवेपिमायोपाधिकस्यमायाद्वारकसंबंधसंभवादित्याह·तस्येति·मायोपहितस्यतदवच्छिन्नस्यतत्प्रतिबिंबस्यवातद्बिंबस्यवा
तदधिष्ठातृत्वंतद्विषयस्यवा·एतेनप्रकृतेकिमायातमित्यतआह·तथाचेति·अंतःकरणोपाधिकचैतन्यस्यघटादिदेशानवस्थितस्यतदधिष्ठानचैत
न्याभिन्नत्वाभावेउक्तविस्मृत्याशंकते·नन्विति·प्रोक्तंस्मारयति·वृत्तेरिति·वृत्तिविनियोगोपपादनमुपसंहरति·एवमिति·॥ ॥

52

सा
५२

अथस्वप्नावस्थांलक्षयति·इन्द्रियेतिइन्द्रियाजन्याविषयगोचराअंतःकरणवृत्तिर्यस्मिन्समयेसातथाभूतवृत्त्यवस्थासुषुप्तिंलक्षयति·सुषुप्तिरिति
अविद्याऽज्ञानंसागोचरोविषयोयस्याःसाक्षादविद्यावृत्तेस्तदवस्थाअविद्यापरंनित्यसुखस्याप्युपलक्षणम्·ननुमरणमूर्छयोरपिनिरूपणीयत्वात्कि
मित्यवस्थात्रयमेवनिरूपितमित्याशंक्याहात्रेति·अवस्थानिरूपणप्रसंगेभवत्संमतंकिमित्यपेक्षायामाह·।तत्रेति·तयोर्मतयोरित्यर्थअवस्थात्र
यवाञ्जीवइत्युक्तंतत्रावस्थारूपमभिधायतद्वान्जीवएकउतानेकइत्यपेक्षायामाह·तस्येति·तस्योक्तावस्थावतोजीवस्यतथाचविभुर्मध्यमपरि

करणवृत्त्यवस्थास्वप्नावस्थाजाग्रदवस्थाव्यावृत्त्यर्थंइन्द्रियाजन्येति·अविद्यावृत्तिमत्त्वात्सुषुप्तौअतिव्याप्तिवारणायांतःकर
णेतिसुषुप्तिर्नामाविद्यागोचराविद्यावृत्त्यवस्थाजाग्रत्स्वप्नयोरविद्याकारवृत्तेरंतःकरणवृत्तित्वान्नतत्रातिव्याप्तिःअत्रकेचिन्मर
णमूर्छयोरवस्थांतरत्वमाहुःअपरेतुसुषुप्तावेवतयोरंतर्भावमाहुः।।तत्रतयोरवस्थात्रयांतर्भावबहिर्भावयोस्त्वंपदार्थनिरूप
णेउपयोगाभावान्नतत्रप्रयत्यते·तस्यचमायोपाध्यपेक्षयैकत्वमन्तःकरणोपाध्यपेक्षयाचनानात्वंव्यवह्रियते·एतेनजीवस्या
णुत्वमप्युक्तम्·बुद्धेर्गुणेनात्मगुणेनचैवआराग्रमात्रोह्यवरोपिदृष्टइत्यादौजीवस्यबुद्धिशब्दवाच्यांतःकरणपरिमाणोपाधि
कपरिमाणश्रवणात् सचजीवःस्वयंप्रकाशःस्वप्नावस्थामधिकृत्यात्रायंपुरुषःस्वयंजोतिरितिश्रुतेःअनुभवरूपश्चप्रज्ञानघ
नइत्यादिश्रुतेः।।अनुभवामीतिव्यवहारस्तु·।।२ माणोवाजीवइत्यर्थः।एतेनजीवस्यविभुत्वादिप्रदर्शनेनाणुत्वंरामानुजाद्युक्तंननुबालाग्रश

तभागस्यशतधाकल्पितस्यचजीवोभागःसविज्ञेयःसचानंत्यायकल्प्यतइत्यादिश्रुतिविरोधस्स्यादित्याशंकामहतोमहीयानित्यादिश्रुत्यासर्वांगी
णसुखाद्युपलब्ध्याचसूक्ष्मदुर्लक्ष्यत्वाभिप्रायमेवाणुत्वंसोपाधिकस्यत्वंतःकरणवृत्त्युपाधिकृतमित्यविरोधइत्याशयेनाह·बुद्धेरिति·नैयायिकादि
मतनिरासायाह·सचेति·तत्रबृहदारण्यकश्रुतिंप्रमाणयति·स्वप्नावस्थामिति·अयंपुरुषइत्यनेननपरमात्माभिहितइतिभ्रमव्यवच्छेदार्थमुक्तम्·स्व
प्नेति·इत्यादिवज्जडत्वमाशंक्याहाऽनुभवरूपश्चेति·अत्रापिप्रमाणमाह·प्रज्ञानेति·विज्ञानमूर्तिरित्यर्थः·योयंविज्ञानघनइत्यादिश्रुति रादिपदादेषआत्मनः
स्वप्रकाशत्वेज्ञानरूपत्वंच।।

पुण्यत्वावच्छिन्नस्वादु यथाभवति तथात्तिनामभक्षतिजीवेत्यर्थः॥पं· ॥ ॥त्रिवारंअग्निभिर्नाचिकेताभिः संपादिताग्नैः तेत्रिणाचिकेताः कर्मिणइत्यर्थः॥पं· ॥ पुण्यंनामसुकृतं

साधितमाद्यपद्यविवरणे· ननुतस्यानुभवरूपत्वेऽनुभवामीत्यनुभवाश्रयत्वव्यपदेशानुपपत्तिरित्याशंक्याहानुभवामीति· त्वंपदार्थनिरूपणमुपसंहर न्नखंडार्थप्रतिपादनंप्रतिजानीते· एवमिति· प्रज्ञानंब्रह्म अहंब्रह्मास्मि तत्त्वमसि अयमात्माब्रह्मेत्येवंरूपैर्ऋग्वेदादिमहावाक्यैर्महत्त्वंतु सत्यंज्ञानमनंतं ब्रह्मेत्याद्यवांतरवाक्यापेक्षयाप्रतिपाद्यंतात्पर्यविषयत्वेनबोधनीयंतत्प्रतिपादनार्थमादौशंकामुद्भावयति· नन्विति· आदिपदेनदुःख्यहंसंसार्यहमित्या दिप्रत्यक्षसंग्राह्यंनत्वंपदार्थोनपरस्याभिन्नोविरुद्धधर्माश्रयत्वाद्विरुद्धस्वभावत्वाच्चतेजस्तिमिरवत्· द्वासुपर्णासयुजासखायासमानंवृक्षंपरिष स्वजातेतयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति· ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धेछायातपौब्रह्मविदोवदंति· पंचा ग्नयोयेचत्रिणाचिकेताउत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः।सत्यंभेदंविनानुपपद्यमानमुपलभ्यमानंजीवस्यसंसारित्वंश्रूयमाणंचेश्वरस्यसंसा

रित्वंप्रतिबिंबचैतन्यमादायोपपद्यते· एवंत्वंपदार्थोनिरूपितः।अधुनातत्त्वंपदार्थयोरैक्यंमहावाक्यप्रतिपाद्यमभिधीयते· ननु। नाहमीश्वरइत्यादिप्रत्यक्षेणकिंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माश्रयत्वादिलिंगेनद्वासुपर्णेत्यादिश्रुत्याद्वाविमौपुरुषौलोकेक्षरश्चा क्षरएवचक्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते· इत्यादिस्मृत्याचजीवपरभेदस्यावगतत्वेनतत्त्वमस्यादिवाक्यमादित्योयूपोयज मानःप्रस्तरइत्यादिवाक्यवत् उपचरितार्थमेवेति· चेन्नभेदप्रत्यक्षस्यसंभावित·॥

रित्वम्· सत्यंभेदंकल्पयतियदिजीवस्यपरमात्मनाभेदः स्यात्· तर्ह्युपलभ्येतनोपलभ्यतेऽतोनास्तीतिनिश्चीयतइतिप्रत्यक्षादिप्रमाणैर्जीवेश्वरभेदस्यावगतत्वात्तत्त्वमस्यादिवाक्यमुपचरितार्थंगौणार्थमे वादित्योयूपःयजमानःप्रस्तरइत्यादिवाक्यवत्· यथाऽनादित्येयूपेआदित्यत्वस्ययजमानभूतायांदर्भमुष्टौचयजमानत्वस्योपचारस्तद्वत् व्यवहारि कभेदावेदकप्रत्यक्षादिप्रमाणैस्तात्त्विकाभेदावेदकश्रुतिविरोधायोगान्मैवमित्याह· नेति· स्याद्विरोधस्तथापिश्रुत्याप्रत्यक्षादेर्बाधः· इत्याशयेनादोषप्र त्यक्षस्यबाध्यत्वयोग्यतामाह· भेदेति· संभाविताःकरणानामिंद्रियाणामपाटवत्वादयोदोषायस्मिन्· सतथातस्येत्यर्थः ननुज्येष्ठेनप्रत्यक्षेणैवत द्बाधउचितइत्याशंक्यज्येष्ठत्वंहिबाध्यत्वेहेतुर्नतुबाधकतायांकनीयसाशुक्तिज्ञानेनज्येष्ठस्यरजतज्ञानस्यबाधदर्शनादन्यथा॥

दि४ सविशेषणेहिविधिनिषेधौविशेषणमुपसंक्रामतःसतिविशेष्यबाधे॥टि·पं· ॥

तदुत्पत्त्यसंभवाच्चन्द्रादिपरिमाणग्राहिशास्त्रबाधापत्तेश्चेत्याशयेनाहान्यथेति· नचोपजीव्यविरोधः धर्मभेदबोधकप्रत्यक्षस्य धर्म्मिभेदज्ञानं प्रत्युपजीव्यत्वादित्याशयेनाह· ॥पाकेति॥ तथाचैवंभूतज्ञानेसत्यपिधर्म्मिभेदमादायसोयंघटइतिज्ञानंयथाऽविरुद्धंतद्वन्नाहमीश्वरइतिज्ञानानन्तरमहंब्रह्मेतिज्ञानमित्यर्थः॥ यतःसर्वप्रमाणोपजीव्यस्यज्येष्ठस्यप्रत्यक्षस्यबाध्यत्वाद्वेदेऽप्रमाणता· अतएवानुमानस्यापीत्याहातएवेति· आगमेनतत्वमस्यादिनाबाधात्· मेरुःपाषाणमयःपर्वतत्वाद्विंध्यादिवदित्याद्यनुमानंयथासर्वतःसौवर्णःकुलगिरिराजोमेरुरित्याद्यागमेनबाधितंतद्वदित्यर्थः आगमविरोधोपिनास्तीत्याह·नापीति· मेरस्यप्रत्यक्षादिप्रमाणैर्ज्ञातत्वाच्छास्त्रस्यवाज्ञातज्ञापकत्वाद्वेदवाद्यागमस्यतत्रतात्पर्याभावेनातत्परत्वात्तस्य

करणदोषस्यासंभावितदोषवेदजन्यज्ञानेनबाध्यमानत्वात्· अन्यथाचंद्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्यचन्द्रप्रादेशग्राहिप्रत्यक्षेणबाधापत्तेः पाकरक्तेघटेरक्तोयंनश्यामइतिवत्सविशेषणेहीतिन्यायेनजीवपरभेदग्राहिप्रत्यक्षस्यविशेषणीभूतधर्मभेदविषयत्वाच्च· अतएवचनानुमानमपिप्रमाणंआगमबाधात्· मेरुपाषाणमयत्वानुमानवत्· नाप्यागमान्तरविरोधः तत्परातत्परवाक्ययोःतत्परवाक्यस्यबलवत्वेनलोकसिद्धभेदानुवादिद्वासुपर्णादिवाक्यापेक्षयाउपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्यतत्वमस्यादिवाक्यस्यप्रबलत्वात्· नचजीवपरैक्येविरुद्धधर्माश्रयत्वानुपपत्तिःशीतस्यैवजलस्योपाधिकौष्ण्याश्रयत्ववत् स्वभावतोनिर्गुणस्यैवजीवस्यान्तःकरणाद्युपाधिककर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः यदिचजलादावौष्ण्यमारोपितंतदात्मकर्तृत्वेपितुल्यम्· नचसिद्धान्तेकर्तृत्वस्य॥

॥((राभेरवाद्यागमादेर्दौर्बल्यादित्याहतत्परेति· नचार्थापत्तिविरोधइत्याह·नचेति·औपाधिकविरुद्धधर्माश्रयत्वेनान्यथासिद्धत्वादित्याह·शीतस्यैवेति· नन्वग्निधर्मस्यौष्ण्यस्यजलादावारोपात्प्रतीतिरत्रकस्यधर्म्मस्येत्याशंक्याह·यदेति अन्तः करणधर्मस्यकर्तृत्वादेर्भानसंभवात्मकर्तृत्वेप्येतत्तुल्यमित्यर्थः नन्वात्मतादात्म्यापन्नस्यैवान्तःकरणस्यापिकर्तृत्वादिधर्मकत्वात्। तद्व्यति॥रिक्तेऽनात्मनिक्वापिकर्तृत्वादेरप्रमितत्वात्कथमारोपइत्याशंक्यपरिहरति· नचेति· यथासूर्यादिकिरणसंपर्कात्प्रतीयमान॥

मपिजलादिकं घटादिनिष्ठं न तु सूर्यादिनिष्ठं तथात्मसंबंधात्प्रतीयमानमपि कर्तृत्वादिकमंतःकरणनिष्ठमेव न त्वात्मनिष्ठं तस्य कूटस्थत्वात् ततः पृथक्त्वाप्यप्रमितस्य कर्तृत्वादेरात्मन्यारोपे नास्ति बाधकम्· तत्रारोप्यगोचरसंस्कारमात्रस्यैव हेतुत्वादित्याह· लाघवेनेति· नन्वस्त्वस्मिन्कर्तृत्वारोपे पूर्वप्रतीतकर्तृत्वादिसंस्कारो हेतुस्तत्रापि· तथाभूतस्तत्रापि तथाभूतस्तथापि प्राथमिकारोपो दुर्घट इत्याशंक्य परिहरति· न चेति· प्राथमिकारोपकापि गतिर्नास्तीति न चेत्यर्थः· कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वेन कस्याप्यारोपस्य प्राथम्यासिद्धातत्र पृथग्गतेरवक्तव्यत्वादित्याह· कर्तृत्वेति· नन्वस्त्वेवं तथापि कथं विरुद्धधर्माक्रांतयोर्जीवेश्वरयोरैक्यमित्याशंक्याह· तत्त्वमिति· यतो लक्ष्यस्वरूपैक्यमत एव सोयं देवदत्तः प्रकृष्टप्रकाशश्चंद्र इत्यादि॥

क्वचिदप्यभावाद्वारोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यम्· लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात्· न च प्राथमिकारोपकागतिः कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्· तत्त्वंपदवाच्ययोर्विशिष्टयोरैक्यायोगेपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव· अतएव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थत्वं सोयमित्यादिवाक्यवत्· न च कार्यपराणामेव प्रामाण्यं चैत्रपुत्रस्ते जात इत्यादौ सिद्धेपि संगतिग्राहात्·॥ एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीती॥ १ ॥ ६ ॥ १ ॥

54

क्यवत्· तत्त्वमसि सत्यं ज्ञानमनंतमित्यादिवाक्यानामखंडार्थत्वमिति· न चास्त्यनुपलब्धिविरोधस्तमसावृतस्य घटस्यानुपलब्धेस्तदभावानिश्चायकत्ववद्ज्ञानवताऽभेदस्यानुपलंभस्य तदभावानिर्णायकत्वादित्यपि द्रष्टव्यम्· ननु सिद्धे प्रयोजकप्रवृत्त्यादेरभावात्संगतिग्राहायोगात्क्रियान्वितस्वार्थपराणामेव प्रामाण्यान्न सिद्धं ब्रह्म वेदांतप्रमेयमिति· प्रभाकरमतमाशंक्य परिहरति· न चेति· पुत्रपदांकितवसनं चैत्रपुरतो निधाय हे चैत्र पुत्रस्ते जात इत्युक्ते विकसितवदनकमलं चैत्रमवलोक्यास्य पुत्रपदस्य सुतरूपेर्थे संगतिं तटस्थो गृह्णातीति पुत्रस्ते जातः कन्या ते गर्भिणी इत्यादौ संगतिग्राहादित्यर्थः। उपसंहरति· एवमिति· उक्तप्रकारेण सर्वैः प्रत्यक्षादिप्रमाणैरविरुद्धं तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्यादिश्रुतिभिः स्वतंत्रं।

चापिमांविद्धिसर्वक्षेत्रेषुभारतेत्यादिस्मृतिभिःसर्वभूतांतरस्थायनित्यशुद्धचिदात्मनेप्रत्यक्चैतन्यरूपायमह्यमेवनमोनमः इत्यादीतिहासैःविभेदजनकेऽज्ञानेनाशमात्यंतिकंगते· आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यतीत्यादिपुराणैश्चतात्पर्यतयाप्रतिपाद्यम्०॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसुतधनपतिसूरिसूरिसुतशिवदत्तविरचितायांपरिभाषार्थदीपिकायांविषयपरिच्छेदःसमाप्तः ॥श्रीगणेशायनमः॥अथप्रयोजननिरूपणंप्रतिजानीते· इदानीमिति· यज्ज्ञानंतन्ममेदंस्यादितिस्वसंबंधितयेष्यते तत्प्रयोजनं· तद्विभजते· तच्चेति· तत्रतयोर्द्वयोर्मध्येतदन्यतरसाधनंतयोःसुखदुःखाभावयोरन्यतरस्यसुखस्यदुःखाभावस्यवासाधनंसुखादिरूपप्रयोजनगुणत्वाद्गौणंसुखस्यापिद्वैवि-

हासपुराणप्रतिपाद्यंजीवपरैक्यंवेदांतशास्त्रस्यविषयइतिसिद्धम्·॥इतिश्रीवेदांतपरिभाषायांविषयपरिच्छेदः॥समाप्तः॥इदानींप्रयोजनंनिरूप्यते॥यदवगतंसत्स्ववृत्तितयेष्यतेतत्प्रयोजनंतच्चद्विविधंमुख्यंगौणंचेतितत्रसुखदुःखाभावौमुख्यंप्रयोजनम् तदन्यतरसाधनंगौणंप्रयोजनं·सुखंचद्विविधंसातिशयंनिरतिशयंचेतितत्रसातिशयंसुखंविषयानुषंगजनितांतःकरणवृत्तितारतम्यकृतानंदलेशाविर्भावविशेषः॥एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीत्यादिश्रुतेः।निरतिशयंसुखंचब्रह्मैव ॥आनंदोब्रह्मेतिव्यजानात् इतिश्रुतेः॥१

ध्यमाह·सुखंचेति·उपलक्षणमेतत्दुःखाभावोपिद्विविधःयत्किंचिद्दुःखाभावोयावद्दुःखाभावश्चेति·तत्रसंसारदशायामाद्योमोक्षावस्थायांद्वितीयइत्यपिबोध्यं·विषयेति·विषयतारतम्याद्विषयेंद्रियसन्निकर्षजनितांतःकरणवृत्तितारतम्यंतत्कृतानंदलेशाविर्भावविशेषस्तथाभूतवृत्त्याविषयावच्छिन्नाज्ञाननिवृत्तौतदवच्छिन्नानंदस्यैवप्रतिबिम्बनादानंदसमुद्रस्यब्रह्मणआनंदलेशाविर्भावविशेषइत्यर्थः॥अत्रश्रुतिंप्रमाणयति·॥एतस्यैवेति·आदिपदेनएषह्येवानंदयातीत्याद्याश्रुतिरुपादेया द्वितीयंसुखंलक्षयति॥निरतिशयसुखमिति·चकारात्सातिशयसुखस्यानंदात्मब्रह्मलेशात्मकत्वात्·ब्रह्मैवेत्यर्थः॥अत्रापिश्रुतिंप्रमाणयति·आनंदइति·भवत्वानंदात्मकंब्रह्मप्रकृतेकिमायातमित्याशंक्याऽऽनंदरूपब्रह्मावाप्तिःसमूलसर्वानर्थनिवृत्तिश्चमोक्षइत्यवगतोमोक्षःसममभूदितिस्वरूपनिति॥ ७ ॥

वे·प·
टी·टी·
५५

येष्यतेइति·तस्यप्रयोजनत्वमित्याहानंदेति·शोकशब्दःसकारणबंधपरःउभयत्रप्रमाणमाहःब्रह्मवेदेति॥तरति·अपनयति·आदिपदेनब्रह्मविदाप्नोतिपरंतरत्यविद्यामित्याद्याश्रुतिरादेया।तांत्रिकमतनिरासायाह।नत्विति·तस्याःस्वतःपुरुषार्थत्वाभावादाह·॥तज्जन्येति·तयालोकांतरावाप्त्याजन्येत्यर्थः॥उभयमोक्षत्वाभावेहेतुमाह॥तस्येति·उभयविधमोक्षस्यननुत्वदभिमतोमोक्षःसादिरनादिर्वा·आद्येकृतकत्वेनानित्यत्वेमुक्तस्यपुनरावृत्तिलक्षणोदोषस्तुल्यःद्वितीयेश्रवणादिवैयर्थ्यमितितांत्रिकःशंकते·नन्विति·द्वितीयपक्षमवलंब्यपरिहरति·नेति·नन्वानंदरूपस्यब्रह्मणःसिद्धत्वेनतत्प्राप्तेस्तथात्वेप्यनर्थनिवृत्तेरभावरूपायाःकथंसिद्धत्वमित्याशंक्याहानर्थनिवृत्तिरपीति·ननुसिद्धस्यपुरुषार्थत्वादर्शनादेवंविधस्यमोक्षस्य

आनंदात्मकब्रह्मावाप्तिश्चमोक्षःशोकनिवृत्तिश्च॰ब्रह्मवेदब्रह्मैवभवतीतितरतिशोकमात्मविदित्यादिश्रुतेः॥ननुलोकांतरावाप्तिः तज्जन्यवैषयिकानंदावामोक्षःतस्यकृतकत्वेनानित्यत्वेमुक्तस्यपुनरावृत्त्यापतेः ननुत्वन्मतेप्यानंदावाप्तेरनर्थनिवृत्तेश्चसादित्वेतुल्योदोषः अनादित्वेमोक्षमुद्दिश्यश्रवणादौप्रवृत्त्यनुपपत्तिरितिचेन्न· सिद्धस्यैवब्रह्मस्वरूपस्यमोक्षस्यासिद्धत्वभ्रमेणतत्साधनेप्रवृत्त्युपपत्तेः अनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्मस्वरूपतयासिद्धैवलोकेपिप्राप्तप्राप्तिपरिहृतपरिहारयोःप्रयोजनत्वंदृष्टमेव· यथाहस्तगतविस्मृतसुवर्णादौतवहस्तेसुवर्णमित्याप्तोपदेशादप्राप्तमिवप्राप्नोति· यथावावलयितचरणायांरज्जौसर्पत्वभ्रमवतोनायंसर्पइत्याप्तवाक्यात् परिहृतस्यैवसर्पस्यपरिहारः एवंप्राप्तस्याप्यानंदस्यप्राप्तिःपरिहृतस्याप्यनर्थस्यनिवृत्तिःमोक्षःप्रयोजनंसचज्ञानैकसाध्यः॥

पुरुषार्थेतानभविष्यतीत्याशंक्याह·लोकेपीति·उक्तस्यपेक्षायामुदाहरति·यथेतिदृष्टांतो।कंप्रकृतेयोजयति·एवमिति·सचमोक्षःकिंकर्मसाध्यःकिंवोपासनासाध्यआहोस्विदेतत्समुच्चयसाध्यउतकर्मज्ञानसमुच्चयसाध्यःकिंवोपासनाज्ञानसमुच्चयसाध्यःकिंवाकेवलज्ञानलभ्यइतिविचिकित्सायांसचब्रह्मज्ञानादिति·प्रतिज्ञातमुपपादयति·सचेति·तमेवात्मानमेवविदित्वातंविदित्वैवेतिवा·मृत्युंजन्ममरणलक्षणंसंसृतिमत्येति· अतिक्रामति· अन्यः कर्मादिरूपोऽयनायमोक्षायपंथामार्गोनविद्यते·॥

55

राम
५५

हिरण्यदाअमृतत्वंभजंतइत्यादिश्रुतेःकर्मसाध्यस्वर्गफलस्यप्रलयपर्यंतस्यापित्वाभिप्रायत्वादितरवाक्यानामपिपरंपर्याकर्मादेर्मोक्षसाधनत्वाभिप्राय
त्वाच्चेतिभावः।मुक्तिमप्याहाज्ञाननिवृत्तेरितिननुतज्ज्ञानंभेदविषयंतत्साधनंकिंवाभेदगोचरमितिविचिकित्सायामाह·तच्चेति·॥तत्रश्रुतिंप्रमाणयति·॥
अभयमिति·स्मृतिंप्रमाणयति·तत्त्वमस्यादीति·ब्रह्मात्मैक्यगोचरमपितज्ज्ञानंपरोक्षमपरोक्षंवेतिविचिकित्सायामाह·तच्चेतितज्ज्ञानंकिंवाक्या
दुत्पद्यतउतान्तःकरणादितिसंशयेपद्मपादाचार्यगदितमाह·तच्चेति·वाचस्पतिमिश्रमतमाह·मननेति·ननुकथंवाक्यादपरोक्षज्ञानमित्याशंक्या
ह·तत्रेति·उपपादितंप्रत्यक्षपरिच्छेदेऽस्माभिरितिशेषस्तथाचज्ञानापरोक्षत्वस्यप्रमेयविशेषनिबंधनत्वेसतिसन्निकृष्टविषयंशब्दजन्यमपिज्ञान

तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेतिश्रुतेः।अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्चतच्चज्ञानंब्रह्मात्मैक्य।
गोचरम्·अभयंवैजनकप्राप्तोसि तदात्मानमेवावेदहंब्रह्मास्मीतिश्रुतेः।तत्त्वमस्यादिवाक्योत्थंज्ञानंमोक्षस्यसाधनमिति·नारदी
यवचनाच्च·तच्चज्ञानमपरोक्षरूपंपरोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः॥तच्चापरोक्षज्ञानंतत्त्वमस्यादिवाक्यादितिकेचित्·॥
मनननिदिध्यासनसंस्कृतांतःकरणादेवेत्यपरे·तत्रपूर्वाचार्याणामयमाशयः संविदापरोक्ष्यंनकरणविशेषोत्पत्तिनिबंधनम्·किं
तुप्रमेयविशेषनिबंधनमित्युपपादितम्·॥तथाचब्रह्मणःप्रमातृजीवाभिन्नतयातद्गोचरंशब्दजन्यज्ञानमप्यपरोक्षंअतएव·प्रत

मपरोक्षमेवेत्युक्तंजीवगोचरज्ञानवत्तदभिन्नब्रह्मविषयमपितदपरोक्षमेवात्रप्रमाणाकांक्षायांशास्त्रदृष्ट्यातूपदेशोवा॥र्दनाधिकरणप्रर्दनंप्र
मदेववदितिसूत्रस्यभाष्यंप्रमाणमित्याशयेनाह।अतएवेति·शब्दजन्यज्ञानस्यापरोक्षत्वादेवप्रतर्दनाधिकरणेप्राणस्तथानुगमादित्यस्मिन्प्राणोस्मी
त्यादिर्विषयवाक्यंतस्मिन् तत्रविषयसंशयपूर्वपक्षसमाधानफलाख्यपंचांगन्यायस्याधिकरणेतिसंज्ञाप्रतर्दनोहवैदैवोदासिरिंद्रस्यप्रियंधामोप।
जगामयुद्धेनपौरुषेणचेत्यस्यांकौषीतकिब्राह्मणोपनिषदाम्नाताख्यायिकायांप्राणोस्मीत्यादिश्रूयमाणवाक्यंविषयस्तत्रप्राणशब्देनकिंवायुरभिप्रेतःकिं
॥वाइन्द्रिउतजीवआहोस्वित्परमात्मेतिसंशयः॥वाय्वादिरभिप्रेतइतिपूर्वपक्षः·परमात्मेतिसिद्धांतः·वाय्वाद्युपासनंपूर्वपक्षे॥

फलंपरमात्मोपासनमुत्तरपक्षेप्राणःपरमात्मातथानुगमात्पौर्वापर्यालोचनयावाक्यस्यतत्परत्वावगमादिति·प्राणशब्दस्यब्रह्मपरत्वेनिश्चितेसतिमा
मित्यस्मच्छब्दानुपपत्तिमाशंक्यतदुत्तरत्वेनप्रवृत्तेयथाशास्त्रदृष्ट्याहंसूर्योभवमहंमनुरिति·वामदेवस्यगर्भस्थस्यमुनेरुक्तिस्तथाशास्त्रदृष्ट्यामामितीं
द्रोपदेशोपीत्यर्थकसूत्रेइत्यर्थः·अथान्येषांवाचस्पतिमिश्राणामाशयमाविष्करोति·अन्येषामिति·सूक्ष्मवस्तुनिवर्णादौइन्द्रियजन्यत्वस्यइन्द्रियत्वेनेन्द्रि
यजन्यत्वस्यानुमितिज्ञानस्यमनस्त्वेनतज्जन्यत्वान्नतत्रातिव्याप्तिः॥अस्मिन्पक्षेइन्द्रियेभ्यःपराह्यर्थाइ तिश्रुताविन्द्रियेभ्यःइत्यस्यबाह्येन्द्रियेभ्यइ
त्यर्थःमनःसर्वेन्द्रियाणिचेतिश्रुतावपिसर्वाणिबाह्येन्द्रियाणीत्यर्थःसाक्षात्कारस्येन्द्रियजन्यत्वेब्रह्मसाक्षात्कारेपिमनएवकरणमित्याह॥ब्रह्मेति॥सर्वेदान

प्राणोस्मिप्रज्ञात्मातंमामायुरमृतमुपास्स्वेतींद्रप्रोक्तवाक्येप्राणशब्दस्यब्रह्मपरत्वेनिश्चितेसतिमामुपास्स्वेत्यस्मच्छब्दानुपपत्तिमा
शंक्यतदुत्तरत्वेनप्रवृत्तेशास्त्रदृष्ट्यातूपदेशोवामदेववदित्यत्रसूत्रेशास्त्रीयादृष्टिःशास्त्रदृष्टिरितितत्त्वमस्यादिवाक्यजन्यमहंब्रह्मे
तिज्ञानंदृष्टिशब्देनोक्तमिति·अन्येषांत्वयमाशयःकरणविशेषनिबंधनमेवज्ञानानांप्रत्यक्षत्वम्·नविषयविशेषनिबंधनंए
कस्मिन्नेवसूक्ष्मवस्तुनिपटुकरणापटुकरणयोःप्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात्। तथाचसंवित्साक्षात्वेइन्द्रियजन्यत्व
स्यैवप्रयोजकतयानशब्दजन्यज्ञानस्यापरोक्षत्वं·ब्रह्मसाक्षात्कारेपिमनननिदिध्यासनसंस्कृतंमनएवकरणं·॥ छ ॥

दापत्तिमाशंक्याह·मननेति· तत्रप्रमाणमाह· मनसैवेति·दृश्यतेत्वग्र्ययाबुद्ध्येत्याद्याश्रुतिरादिपदार्थः·ननुयतोवाचोनिवर्तंतेअप्राप्यमनसासहेत्या
दिश्रुतेः॥ कागतिरित्याशंक्याह मनइति· ननुतंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतिबोधितमुपनिषन्मात्रगम्यत्वम्·विरुद्धमित्याशंक्यपरिहरति·॥नचे
ति·किंतदनुपजीव्यमानांतरगम्यत्वंतदनुपपत्तिकृततदुपजीव्यमानांतरगम्यत्वंवाद्यःइष्टापत्तेःनद्वितीयःअपूर्वस्यतदुपजीव्यानुमानार्थापत्तिगम्यत्वे
पिवेदगम्यत्वाभ्युपगमादित्याशयेनाहास्मदिति· मनननिदिध्यासनसहकृतस्यमनसःअस्मिन्पक्षेशास्त्रदृष्टिसूत्रविरोधंपरिहरति·॥ छ ॥

शास्त्रेति·तथाचतत्रशास्त्रदृष्टिपदेनमानसंप्रत्यक्षमेवतस्ययोग्यत्वादुच्यतइत्यर्थः॥वाचस्पतिमिश्राणामिदंमतमित्यत्रकल्पतरुकारसंमतिमाह॥
तदुक्तमिति·शास्त्रार्थध्यानजाप्रमाशास्त्रदृष्ट्यातूपदेशोवामदेववदिति·सूत्रेशास्त्रदृष्टिशब्देनाभिमतातांतथाभूतांशास्त्रदृष्टिंवाचस्पतिर्जानातिय
तःपरःसर्वोत्कर्षःतथाभूताप्रमैवशास्त्रदृष्टिरित्यत्रकोहेतुरित्याशंक्याक्तमपीति·अपिसंराधनेप्रत्यक्षानुमानाभ्यामितिसूत्रात्·अपिचैनमात्मानं
निरस्तसमस्तप्रपंचमित्युक्तम्·संराधनस्यभक्तिध्यानप्रणिधानाद्यनुष्ठानस्यकालेयोगिनःपश्यंति·तत्रहेतुः॥प्रत्यक्षानुमानाभ्यांश्रुतिस्मृतिभ्यां
तथाचश्रुतिः॥ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तुतंपश्यतिनिष्कलंचध्यायमानइत्याद्यास्मृतिश्चयंविनिद्राजितश्वासाःसंतुष्टाःसंयतेंद्रियाःज्यो

मनसैवानुद्रष्टव्यइत्यादिश्रुतेःमनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषयानचैवम्·ब्रह्मणऔपनिषदत्वानुपपत्तिः॥अस्म
दुक्तमनसोवेदजन्यज्ञानानन्तरमेवप्रवृत्ततयावेदोपजीवितत्वात्·वेदानुपजीविमानांतरगम्यत्वस्यैववेदगम्यत्वविरोधि
त्वात्·॥शास्त्रदृष्टिसूत्रमपिब्रह्मविषयमानसप्रत्यक्षस्यशास्त्रप्रयोजकत्वादुपपद्यते·॥तदुक्तंअपिसंराधनेसूत्राच्छास्त्रा
र्थध्यानजाप्रमाशास्त्रदृष्टिर्मतातांतुवेति·वाचस्पतिःपरइति·तच्च·ज्ञानंपापक्षयात्सचकर्मानुष्ठानादितिपरंपरयाक
र्मणांविनियोगः।अतएवतमेतंवेदानुवचनेनब्रह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेनेत्यादिश्रुतेःकषायेकर्मभिः
पक्वेततोज्ञानंप्रवर्ततइत्यादिस्मृतिश्चसंगच्छते·एवंश्रवणमनननिदिध्यासनान्यपिज्ञानसाधनानिमैत्रेयीब्राह्मणे॥ ६ ॥

तिःपश्यंतियुंजानास्तस्मैयोगात्मनेनमइत्याद्यातादृशज्ञानस्यकिंसाधनमित्यपेक्षायामाह·तच्चेति·॥सचपापक्षयः॥इत्येवंपरंपरातत्वाज्ञानेक
र्मणांविनियोगः॥अतएवपरंपरयाविनि योगादेवतंपूर्वोक्तमेतमनंतरोक्तंपरमात्मानंब्राह्मणावेदानुवचनादिभिर्विदितुमिच्छंतिवेदानुवचनंवेदाध्य
यनं·अनाशकमनाशनेहितमितमेध्याशनं·तत्रप्रत्ययार्थतयाप्रधानभूतायाउत्कटेच्छायावेदानुवचनादीनांसाधनतेतिवाचस्पतिमिश्राः·अश्वेन
जिगमीषतीत्यादाविवधात्वर्थस्यवेदनस्यैवप्राधान्यमाश्रित्यज्ञानेनैषांसाधनत्वमितिविवरणाचार्याःयस्यैतेचत्वारिंशत्संस्काराइत्यादिश्रुतिःतपसा

कल्मषंहंतीत्याद्यास्मृतिश्चादिपदादेयाः यथाकर्मणांतत्वज्ञानेविनियोग स्तथाश्रवणादीनामपीत्याहैवमिति· तत्रबृहदारण्यकश्रुतिंप्रमाणयति·
मैत्रेयीब्राह्मणइति·याज्ञवल्क्यस्यस्वभार्ययामैत्रेय्यासंवादस्यप्रकरणेनतत्रश्रवणादिकंलक्षयति।तत्रेति।तत्र किंत्रयाणामपिसाक्षात्कारसाधनत्वम्
तान्यतमस्यतत्रापिकस्येत्याकांक्षायामाह· तत्रेति· ततस्तुतंपश्यतिनिष्कलंध्यायमानइत्याद्याश्रुतिरादिपदोपादेया·निदिध्यासनस्यमननापतत्वा

आत्मावाअरेद्रष्टव्यइतिदर्शनमनूद्यतत्साधनत्वेनश्रोतव्योमंतव्योनिदिध्यासितव्यइतिश्रवणमनननिदिध्यासनानांविधा
नात्· तत्रश्रवणंनामवेदांतानामद्वितीयेब्रह्मणितात्पर्यावधारणानुकूलमानसीक्रियामननंनामश्रुतार्थावधारितेऽर्थेमानांत
रविरोधशंकायांतन्निराकरणानुकूलतर्कात्मज्ञानजनकोमानसोव्यापारः निदिध्यासनंनामअनादिदुर्वासनयाविषयेष्वाकृष्य
माणचित्तस्यविषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलोमानसोव्यापारः।तत्रनिदिध्यासनंब्रह्मसाक्षात्कारेसाक्षात्कारणं
तेध्यानयोगानुगताअपश्यन्·।देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतेः॥निदिध्यासनेचमननंहेतुः अकृतमननस्यार्थ
दार्ढ्याभावेनतद्विषयेनिदिध्यासनायोगात्· मननेचश्रवणंहेतुःश्रवणाभावेतात्पर्यानिश्चयेनशाब्दज्ञानाभावेनश्रुतार्थवि
षयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्· एतानित्रीण्यपिज्ञानोत्पत्तौकारणानीति·केचिदाचार्याऊचिरे·अपरेतु
श्रवणंप्रधानंमनननिदिध्यासनयोस्तुश्रवणात्पराचीनयोरपिश्रवणफलब्रह्मदर्शननिर्वर्तकतयाआरादुपकारकांगत्वमि
त्याहुः तदप्यंगत्वंनतार्तीयशेषत्वरूपंतस्यश्रुत्याद्यन्यतमप्रमाणगम्यस्यप्रकृतेश्रुत्याद्यन्यतमभावेऽसंभवात्· तथाहि·व्रीहि
भिर्यजेतदध्नाजुहोतीत्यादाविवमनननिदिध्यासनयोरंगत्वेनकाचित्तृतीयाश्रुतिरस्तिनापिवर्हिर्देवसदनंदामीत्यादिमं

[illegible]

तस्यचश्रवणाधीनत्वात्त्रीण्यपिसाक्षात्परंपरयाचज्ञानोत्पत्तिसाधनानीत्याचार्यवाचस्पतिमिश्रमतमुपसंहरति·एतानीति·अपरेविवरणाचा
र्यास्तुपराचीनयोरनन्तरभाविनोःआरात्सामीप्यात्· नन्वंगत्वमपिकिंतार्तीयशेषत्वरूपमुतमृत्पिंडादिकार्येघटादौचक्रादीनामिवसहकारि॥ ६॥

कारणत्वरूपमित्याशंक्यद्वितीयमा   अपितुमाद्यंनिराकरोति· तदङ्गत्वमिति· तार्तीयंतृतीयाध्यायस्थंश्रुत्याद्यभावंस्फुटयति· तथाहीति· प्रकरणाभावोनास्तीतिशंकते· नन्विति· अविशेषेणसाधनतयाश्रूयमाणेषुश्रवणादिषुकिंप्रधानंसाधनमित्याकांक्षायांश्रुत्यन्तरबलान्निदिध्यासनस्यैवप्रधानत्वापत्त्याश्रवणस्यप्रकरणित्वासिद्धिरित्याह· तद्भूतिः नन्वस्यांश्रुतावात्मदर्शनानन्तरंविधीयमानंश्रवणमेवप्रकरणिश्रुत्यंतरंस्यैतदनुसारिव्याख्यानसंभ

खंडनप्रकाशनसामर्थ्यवत्· किंचिल्लिंगमस्तिनापिप्रदेशान्तरपठितप्रवर्ग्यस्याग्निष्टोमेप्रवृणक्तीतिवाक्यवच्छ्रवणानुवादेनमनननिदिध्यासनयोःविनियोजकंकिंचिद्वाक्यमस्तिनापिदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिवाक्यावगतफलसाधनताकदर्शपूर्णमासप्रकरणेप्रयाजादीनामिवफलसाधनत्वेनावगतस्यश्रवणस्यप्रकरणेमनननिदिध्यासनयोराम्नानं   ननुद्रष्टव्यइतिदर्शनानुवादेनश्रवणेविहितेसतिफलवत्तयाश्रवणप्रकरणेतत्संनिधावाम्नातयोर्मनननिदिध्यासनयोःप्रयाजन्यायेनप्रकरणादेवांगतेतिचेन्नतेध्यानयोगानुगताअपश्यन्नित्यादिश्रुत्यन्तरेध्यानस्यदर्शनसाधनत्वेनावगतस्यांगाकांक्षायांप्रयाजन्यायेनश्रवणमननयोरेवांगतापत्तेःक्रमसमाख्येचदूरनिरस्तेकिञ्च· प्रयाजादावंगत्वविचारःसप्रयोजनःपूर्वपक्षेविकृतिषुनप्रयाजाद्यनुष्ठानंसिद्धान्तेतुतत्रापितदनुष्ठानमिति· प्रकृतेतुश्रवणंनकस्यचित्प्रकृतिःयेनमनननिदिध्यासनयोस्तत्राप्यनुष्ठानमंगत्वविचारफलंभवेत्· तस्मान्नतार्तीयशेषत्वंमनननिदिध्यासनयोःकिंतुयथाघटादिकार्येमृत्पिंडादीनांप्रधानकारणताचक्रादीनांसहकारिकारणतेतिप्राधान्याप्राधान्यव्यपदेशः   तथाश्रवणमनननिदिध्यासनानामपीतिमतंव्यसूचितंचैतद्विवरणाचार्यैःशक्तितात्पर्यविशिष्टशब्दावधारणंप्रमेयावगमंप्रत्यव्यवधानेनका॥

वादित्याशंक्याह· किंचेति· विकृतिषुसौर्यादिषु· ननुमनननिदिध्यासनयोस्तार्तीयशेषत्वंनकिंतुश्रवणसहकारित्वमितीदमेवविवरणाचार्याभिमतमितिकथंज्ञातमित्यतआह· सूचितंचेति· केस्यपेक्षाया॥माद्यवर्णकस्यम्तद्वाक्यंपठति· शक्तीत्यादि·॥   ७   ॥

अंगीक्रियेतइत्यतंश्रवणादौकस्याधिकारइत्यपेक्षायामाह·श्रवणादिष्विति·मोक्षरूपफलकामनयाक्रियमाणश्रवणादिकमपिकाम्यमितिभावः॥नित्या
नित्ययोरात्मानात्मनोर्वस्तुनोर्विवेकस्यनित्यानित्ययोर्वस्तीतिनित्यानित्यवस्तुनयोर्नित्यत्वानित्यत्वधर्मयोर्वाविवेकस्यशमादींल्लक्षयति·अंतरिति·श्रव
णादिव्यतिरिक्ताधिकारानुपयुक्तविषयेभ्योमनसोनिग्रहःशमस्तादृशविषयेभ्योबहिरिंद्रियाणांश्रोत्रादीनांनिग्रहोदमःगृहस्थादीनांश्रवणादावन

रणंभवतिप्रमाणस्यप्रमेयावगमंप्रत्यव्यवधानात्·मनननिदिध्यासनेतुचित्तस्यप्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेका
ग्रवृत्तिकार्यद्वारेणब्रह्मानुभवहेतुतांप्रतिपद्येतेइतिफलम्·प्रत्यव्यवहितकरणस्यविशिष्टशब्दावधारणस्यव्यवहितेमनननिदि
ध्यासनेतदंगेऽगीक्रियेतेइति·श्रवणादिषुचमुमुक्षूणामधिकारः॥काम्यकर्मणिफलकामस्याधिकारित्वात्·मुमुक्षायांचनित्यानि
त्यवस्तुविवेकस्येहामुत्रार्थफलभोगविरागस्यशमदमोपरतितितिक्षासमाधानश्रद्धानांचविनियोगः॥अंतरिंद्रियनिग्रहःशमः
बहिरिन्द्रियनिग्रहोदमः विक्षेपाभावउपरतिः शीतोष्णादिद्वंद्वसहनंतितिक्षाचित्तैकाग्र्यंसमाधानंगुरुवेदान्तवाक्येविश्वासःश्रद्धा·
अत्रोपरमशब्देनसंन्यासोऽभिधीयते·तथाचसंन्यासिनामेवश्रवणाधिकारइतिकेचित्·अपरेतुउपरमशब्दस्यसंन्यासवाच
कत्वाभावाद्विक्षेपाभावमात्रस्यगृहस्थेष्वपिसंभवात्·जनकादेरपिब्रह्मविचारस्यश्रूयमाणत्वात्सर्वाश्रमसाधारणंश्रवणादिवि
धानमित्याहुः सगुणोपासनमपिचित्तैकाग्र्यद्वारानिर्विशेषब्रह्मसाक्षात्कारेहेतुः तदुक्तम्·निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्व
राः।येमंदास्तेऽनुकंप्यंतेसविशेषनिरूपणैः वशीकृतेमनस्येषांसगुणब्रह्मशीलनात्·तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पन
मिति॥सगुणोपासकानांचार्चिरादिमार्गेणब्रह्मलोकगतानां((धिकारंमन्यमानानांकेषांचित्संन्यासिनांमतमाहात्रेति·शमादिष्वित्यर्थः॥

वाचस्पतिमिश्रमतमाहापरेत्विति· ननुसगुणोपासनाया अपिमुक्तिफलदातृत्वश्रवणात्क्वश्रवणादिसमासादिततत्त्वज्ञानमेवमोक्षसाधनमितिकथमित्या
शंकयाह·सगुणेति·निदिध्यासनात्मकचित्तैकाग्र्यद्वारातंत्रांतस्तद्धर्मोपदेशादितिसूत्रस्थकल्पतरुवचनमुदाहरति·तदुक्तमिति·॥((टिप्पनी॥यएषोंतरादित्येहि
रण्मयःपुरुषोदृश्यते·इत्यादिवाक्येयएषोंतरादित्येयएषोंतरक्षिणीतिचश्रूयमाणःपरमेश्वरएवनसंसारीकुतस्तद्धर्मोपदेशात्·॥तस्यपरमेश्वरस्ययेधर्मास्सर्वपाप्माविद्धत्वादिरूपास्तेषामस्मिन्वाक्येउप
देशादित्यर्थः॥टि·२१

येमंदा अकृतसगुणोपासनत्वादवशीकृतचित्ताः नतु येषां सगुणोपासकानामत्र श्रवणाद्यभावात्साक्षात्कारो न जातस्तेषां का गतिरित्याशंक्याह ॥ सगुणेति ॥ आदिपदं महरादिसंग्राहकं अर्चिराद्यभिमानिदेवतोपर्व्यारूढ्येन मार्गेण गम्यलेतेनैवमग्रेपीत्यर्थ कर्मिणां तु नैवमित्याह · कर्मिणामिति · आदिपदेन रात्र्यादिसंग्रहः ब्रह्मादि · ब्राह्मणादि रमणीयं चरणमाचरणं येषां तेन तथा सुकृतकर्माणो रमणीयां योनिमापद्यंते · ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्य

तत्रैव श्रवणाद्युत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मोक्षः ॥ कर्मिणां तु धूमादिमार्गेण पितृलोकगतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुःकृतानुसारेण ब्रह्मादिस्थावरांतेषु पुनरुत्पत्तिः । तथा च श्रुतिः । रमणीयचरणा रमणीयां योनिमापद्यंते · कपूयचरणाः कपूयां योनिमापद्यन्ते · इतिमतिषिद्धानुष्ठायिनां तु · रौरवादिनरकविशेषेषु · ततस्तापोपचिततीव्रदुःखमनुभूय श्वशूकरादितिर्यग्योनिषु · स्थावरादिषु चोत्पत्तिरिति · अलमतिप्रसंगेन · निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकांतरगमनं न तस्य प्राणा उत्क्रामंतीति श्रुते · किंतु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते · ॥ ननु क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुत्या ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेत्यादिस्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेन्न · तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्ये इत्यादिश्रुत्या नाभुक्तं क्षीयते कर्मेत्यादिस्मृत्या चेत्यादितत्कार्यकर्मव्यतिरिक्तानां संचितकर्मणामेव ज्ञानविनाश्यत्वावगमात् · संचितं द्विविधं सुकृतदुःकृतं चेति ॥ योनिं वा कपूयं कुत्सि

तं चरणं येषां ते तथा दुःकृतकर्माणः कपूयां योनिमापद्यंते · श्वयोनिं वा चांडालयोनिं वा शूद्रयोनिं वेति नहि ज्ञानप्राप्त्युत्तरक्षणे तस्य विदेहकैवल्यं स्यादित्याशंकते · किंत्विति · अपवृज्यते मुच्यते ॥ प्रारब्धकर्मावस्थानं श्रुतिस्मृतिविरुद्धमिति शंकते नन्विति · आदिपदं तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वे पाप्मानः प्रदूयंते इत्यादिश्रुतिसंग्राहकं । इतरश्रुतिस्मृत्यनुरोधात्प्रारब्धातिरिक्तकर्मणां नाश इत्याह तस्येति · यावन्न विमोक्ष्ये प्रारब्धकर्मणा ॥ न विमोक्ष्यते · अथ प्रारब्धकर्मविमुक्तानंतरं संपत्स्ये संपत्स्यते · विमुक्तश्च विमुच्यते · अत्रश्यमे ॥

वभोक्तव्यं कृतं कर्म शुभाशुभमित्याद्याः श्रुतिस्मृतय आदिपदादेयाः नन्वेवमेवं हास्य सर्वे पाप्मानः प्रदूयंत इत्यादिश्रुत्यनुसारेण संचितानामपि पापकर्मणा
मेवानाश इति भ्रममपुदासायाह· संचितमिति· दायं धनादिविभागं साधुकृत्यां सुकृतं· ननु श्रुत्यादावुक्तमपि प्रारब्धकर्मावस्थानं मुक्तियुक्तं न भवतीति शं
कते· नन्विति· अज्ञानस्य तदुपादानभूताया अज्ञानशक्तेः प्रतिबंधकापगमे ज्ञाने नाज्ञाननिवृत्त्या सर्वमुक्तिप्रसंग इति शंकते नन्विति· इन्द्रः परमा

तथा च श्रुतिः तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति· ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रा
रब्धकर्मणोपि निवृत्तिः कथं ज्ञानिनो देहधारणमुपपद्यत इति चेन्न· अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरू
पप्रतिबंधकदशायामज्ञाननिवृत्तेरनंगीकारात्· नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ सर्वमुक्तिः स्यात्· अविद्याया एकत्वेन त
न्निवृत्तौ क्वचिदपि संसारायोगादिति चेन्न· इष्टापत्तेरित्येके· अपरे त्वेतद्दोषपरिहाराय इन्द्रो मायाभिरिति· बहुवचनश्रुत्यनुगृही
तमविद्यानानात्वमंगीकर्तव्यमित्याहुः॥ अन्ये त्वेकैवाविद्या नस्या एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नानात
थाच॥ यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः॥ ७ ॥

त्मा मायाभिरविद्याभिः पुरुरूप ईयते बहुरूपः प्रतीयते· अस्मिन्पक्षे गौरवमभिप्रेत्य मतांतरमाहान्ये त्विति· अस्मिन्पक्षे मायाभिरित्यस्य मायाशक्तिभिरि
त्यर्थः कैः सिद्धांतितमित्यपेक्षायामाह· तदुक्तमिति· इदमेव मतं सम्यगिति द्योतनायाहि तच्चेति· यस्मादेवं तस्मात्· अवस्थाबद्धमुक्तव्यवस्थापरिच्छेदांचे

निगमयतितदेवमिति·मूलकृत्सूत्रेनाऽस्यकंपरित्यक्तंचविस्फुटंव्याख्यातंदूषितंतेनमयेदंचविभूषितं१गोचारेडनकेडिरेडभित्रतोगोत्रात्मजेडाखि
लेड् व्याडेडाम्रतनुःकवीडनुगतह्रिट्चण्डभेरुण्डहा॥गोराट्छुद्धियाधिकल्विडमलसीरोत्थविभ्राडजः सस्पादभ्रुड्डाभ्रबाडभृद्रंदेवोदह्रोमे
मृडः॥२॥स्वजनवदनचारीपापसंघापहारीस्वजनसदनकारीप्रोल्लसज्ज्ञात्रधारीविकचवदनसारीज्योत्स्निकानंदकारीमदनसुषमकारीसोस्तुमेह

नत्वन्यंप्रतिब्रह्मस्वरूपावरणंशक्तिविशिष्टाविद्यानाशादस्यभ्युपगमात्·नैकमुक्तौसर्वमुक्तिः॥अतएवयावदधिका
रमवस्थितिरधिकारिकाणामित्यस्मिन्नधिकरणेधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनांदेहधारणानुपपत्ति
माशंक्याधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरंविदेह कैवल्यमितिसिद्धांतितम्·तदुक्तमाचार्य्यवाचस्पतिमिश्रैःउ
पासनादिसंसिद्धितोषितेश्वरचोदितंअधिकारंसमाप्यैतेप्रविशंतिपरंपदमिति·एतच्चैकमुक्तौसर्वमुक्तिरितिपक्षेनोप
पद्यते·तस्मादेकाविद्यापक्षेपिप्रतिजीवमावरणभेदोपगमेनव्यवस्थोपपादनीयातदेवंब्रह्मज्ञानान्मोक्षश्चानर्थनिवृ
त्तिर्निरतिशयब्रह्मानंदावाप्तिश्चेतिसिद्धम्·प्रयोजनम्॥इतिश्रीधर्म्मराजदीक्षितविरचितायांवेदान्तपरिभाषायामष्टम
॥परिच्छेदः॥समाप्तः॥

ह्विहारी॥३॥गोत्रांगवसुतारेप्रमितेसंवत्सरेशुभे॥फाल्गुनेसितसप्तम्यांहर्षेसिद्धाग्रराविदम्॥४॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यबालगोपाल
तीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनप तिसूरिसूनुशिवदत्तकृतायांवेदान्तपरिभाषार्थदीपिकायामष्टमःपरिच्छेदः॥८॥समाप्तोयंग्रंथः

वे·प
टी·स
६०

इस्तिहार दिया जाता है ग्राहक लोगोंको कि बम्बई· कलकत्ता· लखनऊ· आगरा· दिल्ली मेरठ· इलाहाबाद· पूना· बनारस और कई एक छापेकी पुस्तकें हमारे इहां मौजूद हैं जिन महाशयोंको लेना होय तो आध आनेका टिकट भेजके संस्कृत और भाषा सूचीपत्र मंगाय लेवें उसमे सब पुस्तकोंका नाम और दर लिखा है· इस कार्यके सम्पादक बाबू कोलेश्वर सिंह बनारस·

60

राम·
६०

४०२५

श्री ५ को

# अथतन्त्रानुसन्धानमद्वैतकौस्तुभटीकोपेतंप्रारभ्यते॥

ध । १

॥ ॐश्रीगणेशायनमः॥ श्रीगुरुभ्योनमः॥ पूर्वीच्युतोग्रहेरम्बगुहापर्णादिनिर्जरैः॥ संस्तुतोऽसंस्तुतोरामोरामो विजयतेतराम्॥ १॥ गुह्याशयागौरवभावमाप्तानैसर्गतः सर्वजनाभिमान्याः॥ योगेश्व
रामामगुणांपुनन्तुश्रीनानकाद्यानरकान्तकाये॥ २॥ नत्वादेशकपादाब्जंगण्डाक्षिं हेनसाधुना॥ नायनेटिप्पणी क्काचिद्गुह्यशब्दार्थबोधनी॥ ३॥ मूर्ध्नाऽहं विदुषांप्रणम्यपरितःपादारविंदं प्रार्थये॥ यन्मोह्या
न्मदतोऽर्थतश्चगलितंस्याद्त्रयद्यन्मया॥ तत्तत्सर्वमिदंसुशोध्यकृपयापश्यन्तुसन्तोऽनघाः॥ दोषान्मेऽविगणय्यदूषणानिधेर्दोषेगुणारोपिणः॥ ४॥ तत्वपदार्थयोरत्रवाच्यलक्ष्यादिभेदतः॥ व्याख्यानत्स्वसु
गुरूणामिष्टसिद्ध्येकसाधनम्।५॥ यःपरमात्मेति॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुत्यायःपरमेश्वरःप्रपञ्चंनिर्मायपुनस्तत्रप्रविष्टवान्तंकृष्णंगोपीमनोहरंमनसात्मानमहं वन्देइतियोजना गोपीमनोहरस्यकृष्णा
स्यप्रत्यगात्मत्वंनसम्भवतीत्यतोऽद्वयानन्देपरात्मनिगोपीमनोहरपदस्यलक्षणाकार्यातथाचनानुपपन्नंप्रत्यगात्माभिन्नत्वमिति॥ अथवागोपायतिरक्षतिकारणरूपेणकार्यजातमितिगोपीमूलप्रकृतिः म
नस्तस्याआद्यंकार्यंतदुपलक्षितसर्वोऽपिकार्यवर्गोग्राह्यःगोपीचमनश्चगोपीमनसीतेकारणकार्यकलापेहरतिमोक्षदशायांस्वस्मिन्निवेशयतीतिगोपीमनोहरस्तम्॥ छ ॥ छ ॥ छ ॥

॥ ॐश्रीगणेशायनमः॥ यःपरमात्माजगत्सृष्ट्वाप्रविवेशपुनःस्वयं तंकृष्णंप्रत्यगात्मानंवंदेगोपीमनोहरं॥ १॥ यस्यप्रसादादहमद्वयात्माविश्वंसमस्तंमयिकल्पि
तंचतंसर्वलोकैकगुरुंसदाश्रीस्वयंप्रकाशंगुरुमानतोस्मि॥ २॥ गुरूणांचरणांभोजंप्रणिपत्यनिरंतरंतत्कृपालेशतोऽद्वैतचिंताकौस्तुभमारभे॥ ३॥ प्रारिप्सित
इतिमयाविज्ञानमितिशेषः॥ २॥ कर्तुमिच्छाविषयिभूतस्य॥ १॥

ॐपरमात्मनेनमः ॐब्रह्माहंयत्प्रसादेनमयिविश्वंप्रकल्पितम्॥ छ ॥ छ ॥

हेयोपादेयगोचराबुद्धिःप्रेक्षातद्वान्॥ १॥
स्वग्रंथस्यनिर्विघ्नसमाप्तिकामनयागुरुप्रसादलभ्यतत्वानुसंधानलक्षणंमंगलमाचरन्नर्थात्प्रेक्षावत्प्रवृत्त्यंगमभिधेयादिसूचयन् यस्यदेवेपराभक्तिर्यथादेवे
तथागुरौतस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्यादिश्रुत्यागुरुभक्तेस्तत्वानुसंधानंप्रत्यंतरंगसाधनत्वावगमात्तद्गुरुंनमस्करोति ब्रह्मेति यस्यगुरोःप्रसा
देनब्रह्माहंतंगुरुंप्रणौमीतिसंबंधः अत्रब्रह्मशब्देनमायाविनिर्मुक्तमखंडंचैतन्यमभिधीयते अहंशब्देनस्थूलसूक्ष्मकारणशरीरविनिर्मुक्तप्रत्यक्चैतन्यं।
लक्षणयाप्रतिपाद्यते ब्रह्माहंशब्दयोःसामानाधिकरण्यात् ब्रह्मात्माभेदस्तत्वमस्यहं ब्रह्मास्मीत्यादिमहावाक्यार्थःप्रकरणप्रतिपाद्योविषयःसूचितःतज्ज्ञाना
दज्ञाननिवृत्तिद्वारानंदावाप्तिःप्रयोजनंतत्कामोधिकारी प्रतिपाद्यप्रतिपादकभावःसंबंधश्चेति ब्रह्माहमिति तत्वानुसंधानमेवमंगलंतथाचस्मृतिःस्मृतेःसकलक
ल्याणभाजनंयस्यजायतेपुरुषस्तमजंनित्यंव्रजामिशरणंहरिं॥ १॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलंयेषांहृदिस्थोभगवान्मंगलायतनोहरिः २ अशुभा
निनिराचष्टेतनोतिशुभसंततिंस्मृतिमात्रेणयत्पुंसांब्रह्मतन्मंगलंविदुः ३॥ हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः ४॥
तस्यमहात्मनः एतेप्रकृतमोक्ताअर्थाःस्वमेवप्रकाशन्तेइत्यर्थः ६॥ यस्यहरेःस्मरणात्पुरुषःसकलकल्याणपात्रंभवतितंहरिंशरणंरक्षकं व्रजामिइत्यर्थः॥ ३ ॥ ३ ॥

61

एकवारम्१॥ क्रियावल्ली३॥ तेनपुरुषेणमोक्षप्राप्त्यर्थंप्रगाढगात्रिकावन्धोवधइत्यर्थः१॥ मंगलंविनापिसमाप्तेर्दर्शितत्वात्५॥ यथाकथञ्चित५॥ स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगिकार्य्यकत्वमन्वयव्यभिचारत्वम् कार्य्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वं गिकत्वव्यभिचारत्वम्॥३॥

सकृदुच्चरितं येन हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ५ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादि ननु ग्रंथारंभे मंगलाचरणमनुपपन्नं प्रमाणप्रयोजनयोरभावात् तथाहि न तावदत्र प्रत्यक्षं प्रमाणं मंगलाचरणकर्तव्यतायाः अतीन्द्रियत्वात् किंच नास्तिकादिग्रंथस्य मंगलाचरणाभावेपि समाप्तिदर्शनात् कृतेपि मंगले क्वचिद्ग्रंथस्यसमाप्त्यदर्शनात् तस्मादन्वयव्यतिरेकव्यभिचारान्मंगलस्य प्रत्यक्षेण निर्विघ्नसमाप्तिकारणत्वमवगंतुमशक्यं नाप्यनुमानं लिंगाभावात् न च शिष्टाचारात्तदनुमानमिति वाच्यं तस्यानिर्वचनात् नाप्यागमः प्रत्यक्षस्य तस्याऽभावात् अनुमानाऽसंभवोक्त्यानुमेयागमस्याप्यसंभवात् नाप्यर्थापत्तिः अन्यथोपपत्तेर्दर्शितत्वात् तस्मान्मंगलाचरणे न प्रमाणमस्ति नापि प्रयोजनं पश्यामः ग्रंथसमाप्तेस्तेन विनापि संभवेनैतत्प्रयोजनत्वानुपपत्तेः विघ्नध्वंसस्य तु स्वतःसिद्धविघ्नविरहस्थलेऽसंभवेनैतत्प्रयोजनत्वानुपपत्तेः तस्मात्प्रयोजनप्रमाणयोरभावान्मंगलाचरणमनुपपन्नमिति अत्रोच्यते ग्रंथारंभे मंगलाचरणमवश्यं कर्तव्यं न च न तत्र प्रमाणाभावः अनुमितश्रुतेरेव प्रमाणत्वात् न चानुमानासंभवः शिष्टाचारत्वेन तदनु-

ग्रंथसमाप्तेः विघ्नध्वंस

शिष्टाचारत्वस्य४ मंगलप्रतिपादकवेदस्य४॥ हेतुना१

श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम् ॥ १ ॥ छ ॥ छ ॥

प्रमाऽविषयत्वंविधिमंतरारागादितोऽप्राप्तत्वमितिभावः२॥ अनिरतु२ आद्यनिर्वचनंनास्तिकेऽतिप्रसक्तमतोद्वितीयमाहवेदेति॥

मानात् तथाहि मंगलं वेदबोधिताभीष्टोपायताकं अलौकिकाविगीतशिष्टाचारत्वाद्दर्शादिवत् मंगलत्वं नाम विघ्नोत्सारणासाधारणकारणत्वं अतो नाश्रयासिद्धिः। अलौकिकत्वं नाम अन्वयव्यतिरेकाप्रमापितत्वं अविगीतत्वं नाम बलवदनिष्टाननुबंधीष्टसाधनत्वं शिष्टत्वं नाम क्षीणदोषपुरुषत्वं वेदप्रामाण्याभ्युपगंतृत्वं वा ततो न स्वरूपासिद्धिः व्यभिचारो वा एवं च निर्विघ्नसमाप्तिकामो मंगलमाचरेदित्यनुमितया श्रुत्या मंगलस्याभीष्टनिर्विघ्नपरिसमाप्तिफलकत्वं निश्चीयते तस्मान्नास्तिकादीनां मंगलाचरणाभावेपि जन्मांतरीयमंगलाद्ग्रंथसमाप्तिरुपपद्यते यत्र कृतेपि मंगले समाप्त्यभावस्तत्र विघ्नप्राचुर्यं बलवत्तरविघ्नो वा बोध्यः तन्निवृत्तिस्तु मंगलप्राचुर्याद्बलवत्तरमंगलाचरणाद्वा भवत्यतो नान्वयव्यतिरेकव्यभिचारः अथवा मंगलाचरणस्य विघ्नध्वंस एव फलं तत्र स्वतःसिद्धविघ्नविरहवता कृतस्य मंगलस्य फलाभावेन तत्साधनताबोधकश्रुतेरप्रामाण्यप्रसंग इति वाच्यं स्वतःसिद्धपापविरहवता पापभ्रान्त्या कृतस्य प्रायश्चित्तस्य पापनिवृत्तिलक्षणफलाभावेपि प्रायश्चित्तविधायकशास्त्रस्येवास्यापि प्रामाण्योपपत्तेः न च फलव्यभिचारशंकया मंगलाचरणे प्रवृत्तिर्न स्यादिति वाच्यं संशयादपि प्रवृत्त्युपपत्तेः एवमग्रे प्रतिपत्तव्यं यथाप्रतिपत्ति

शिष्टस्यद्वितीयनिर्वचनात्तत्स्वरूपासिद्धेः अलौकिका वृष्टीनेत्रिपदयुगान्नभोजनादौ रात्रिश्राद्धादौ च व्यभिचार इत्यर्थः॥ व्यभि२॥ पूर्वोक्तानुमानेस्वबोधितकर्तव्यताकत्वसम्बन्धेन श्रुतेरेवसाध्यताश्रुतिसिद्धो च मङ्गलकर्त्तव्यं श्रुतिप्रतिपाद्यसमाप्तेकफलकत्वादित्यनुमानादपिप्रकृतेष्टसिद्धिः॥५॥

वारवारकाणामिवस्वरूपासिद्धिवारकाणामपिविशेषणानां हेतुकुक्षिप्रविष्टत्वेनासाधकत्वमितिपक्षधर्मिश्रादिसम्मतत्वान्नदोषः५॥ अर्थापत्तिः२॥ विपर्ययः२॥

मङ्गलजन्यविघ्नध्वंससत्त्वेपि सामग्र्यन्तराभावात्समाप्त्यभावोऽतो विघ्नध्वंस एव मङ्गलफलमिति तन्नामणिकृन्मतमाह अथवेति॥ प्रत्यक्षदृष्टफलम्॥३॥

अनुमानासिद्धेरिति२॥

अ॰कौ॰
प्र॰प्र॰
२

संशयः १॥ ब्रह्मस्वरूपत्वे सति ४॥ उत्तरस्फूर्तिः १ संयुक्तत्वात् २

विप्रतिपत्त्यादिनिवृत्तिः शिष्टाचारः प्रतिभा चेत्येवमादीनि बहूनि फलानि मंगलस्य संति एवं मंगलाचरणेन विघ्ने निवृत्ते बुद्धिप्रतिभादि। दृष्टकारणकलापाद्ग्रंथस्य समाप्तिर्भवति तस्मात्प्रमाणप्रयोजनयोः संभवात् ग्रंथारंभे मंगलाचरणमवश्यं कर्त्तव्यमिति ननु ब्रह्मात्मनोरैक्यमनुपपन्नं विरुद्धधर्माक्रांतत्वात् तथाहि श्रुत्यादिभिर्जगत्कल्पनाधिष्ठानं सर्वज्ञं ब्रह्मावगम्यते जीवस्तद्विपरीतः कथं तयोरैक्यं स्यादित्याशंक्य जीवस्याहंपदवाच्यस्य वैपरीत्येप्यंतःकरणोपलक्षितस्य मायोपलक्षितेन नाममात्रादृते भेदाभावात्तस्यापि जगत्कल्पनाधिष्ठानत्वसंभवेन विरोधाभावादैक्यं संभवतीत्यभिप्रेत्याह मयीति मय्यंतःकरणोपलक्षिते तत्साक्षिणि विश्वं गिरिनद्यादिभेदभिन्नं ब्रह्मांडांतं अध्यस्तं अध्यासं निरूपयिष्यति तथा च श्रुतिः मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहमित्यंतःकरणोपलक्षिते प्रतीचि सर्वकल्पनां दर्शयति एतेन प्रपंचस्य मिथ्यात्वमपि सूचितं तत्रानुमानमपि व्यावहारिकः प्रपंचो मिथ्या दृश्यत्वात् शुक्तिरूप्यवत् इत्यादि मिथ्यात्वसाधकं द्रष्टव्यं शुक्तिरूप्यमग्रे निरूपयिष्यते ततश्च ब्रह्मात्मैक्यमुपपन्नमिति भावः अहंशब्दार्थविवेकपूर्वकं पूर्वमनुसंधितं ब्रह्मात्मतत्वं इष्टदेवतावाचकशब्देन निर्दिश्य पुन

इतिश्रुतिः कृष्ण

देहोनाहं श्रोत्रवागादिकानो ॥ ॥ ६ ॥

त्तदनुसंदधाति देह इति स्वप्ने स्थूलदेहप्रतीतेरभावात् स्थूलदेहो न भवामीत्यर्थः ननु स्थूलोहं कृशोहमित्यादि अनुभवात्तदतिरिक्तस्यात्मनोऽननुभवात्स्वप्नेपि स्थूलोऽहमित्यनुभवस्य सार्वजनीनत्वात् स्थूलदेह एव आत्मेति चेन्न स्थूलशरीरस्योत्पत्तिविनाशवत्वेनाऽनात्मत्वं आत्मत्वे कृतहानि अकृताभ्यागमप्रसंगात् स्थूलोहमित्याद्यनुभवस्य भ्रमत्वेन तस्यात्मत्वासाधकत्वात् देहातिरिक्तस्यात्मनः श्रुतिस्मृतीतिहासपुराणयुक्तिविद्वदनुभवसिद्धत्वेन तस्यापलापायोगात्स्वप्ने स्थूलोहमित्यनुभवस्य जाग्रद्वासनाजन्यतयांतर्विषयत्वात् अन्यथा वाराणस्यां सुप्तः रामसेतौ रामनाथमनुभवन् प्रबुद्धस्तत्रैवावतिष्ठेत तस्मात्स्थूलशरीरस्य स्वप्नेऽभावादात्मनः स्वप्नेप्यहमित्यनुभवात् अहं स्थूलदेहो न भवामि अस्तु तर्हींद्रियाण्यात्मा काणोहं मूकोहमित्यनुभवदर्शनात् प्राणसंवादादिषिंद्रियाणां चेतनत्वावगमाच्चेति चेन्न करणत्वेन वास्यादिवदिंद्रियाणामात्मत्वायोगात् करणकर्तृत्वयोर्विरुद्धत्वात् बहूनामिंद्रियाणामात्मत्वे विरुद्धाभिप्रायतया सद्यः शरीरपातप्रसंगात् योहमद्राक्षं सोहं स्पृशामीत्यात्मैक्यबाधप्रसंगाच्च प्राणसंवादस्याभिमानिनी देवताविषयत्वेनेंद्रियाणामात्मत्वासाधकत्वाच्च उत्पत्तिविनाशवत्वेन पूर्वोक्तदोषप्रसंगात् काणोहमि

राम:
२

स्थूलदेहस्य ४॥ प्राणैः सह य इन्द्रियाणां संवादस्तस्य तदभिमानिनी देवताविषयत्वमित्यर्थः १॥ शरीरस्यात्मत्वे तस्य विनाशवत्वेन कृतानां श्रौतस्मार्तकर्मणां विनाशः स्यात्॥ उत्पत्तिमत्वेन चाकृतानामेव फलजसपात्वं स्यादित्यर्थः॥ ६॥ कृतहान्यादिः १

62

त्याद्यनुभवस्य भ्रमरूपत्वाच्छ्रुत्यादिभिस्तदतिरिक्तात्मप्रतिपादनादिंद्रियाण्यनात्मा अस्तु तर्हि प्राण आत्मा क्षुत्पिपासावानहमित्यनुभवदर्शनात् अन्योंतरात्मा प्राणमय इति श्रुतेः जाग्रदाद्यवस्थास्वनुवर्तमानत्वाच्चेति चेन्न तस्य वायुविकारत्वादनात्मत्वमित्यभिप्रेत्याह श्रोत्रमिति श्रोत्रमिति ज्ञानेंद्रियाणामुपलक्षणं वागिति कर्मेंद्रियाणामुपलक्षणं आदिशब्देन मुख्यप्राणो गृह्यते तथा च ज्ञानेंद्रियकर्मेंद्रियमुख्यप्राणा न भवामीति तेषां स्वप्नसुषुप्त्योर्लयदर्शनात् यद्यपि परदृष्ट्या प्राणोऽनुवर्तते स्वप्नादौ तथापि स्वदृष्ट्यानुपलंभात् प्राणस्य लयाभिधानं द्रष्टव्यं तानि यदा गृह्णाति अथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवतीत्यादिश्रुतेः अन्यथा पूर्वोक्तदोषाऽनपायात् एतेन क्षुत्पिपासावानहमिति प्राणस्यात्मत्वानुभवो भ्रमतया परास्तः तस्मात्प्राणादीनामनात्मत्वमिति भावः अस्तु तर्हि विज्ञानमात्मा कर्ता भोक्ताहमित्यनुभवदर्शनात् अन्योंतरात्मा विज्ञानमय इति श्रुतेरित्यत आह बुद्धिरिति बुद्धिरंतःकरणवृत्तिः इदं मनःकरणस्याप्युपलक्षणं तथा चाहं मनःकरणं नहि निश्चेतुभयं न भवामि तस्य भौतिकत्वेन जडत्वात् सुषुप्तौ लयदर्शनाच्च कर्ता भोक्ताहमित्यनुभवस्य भ्रमत्वेन तस्यात्मसाधकत्वा

नाहं बुद्धिर्नाहमध्यासमूलं नाहं सत्यानंदरूपश्चिदात्मा मायासाक्षी कृष्ण एवाहमस्मि ॥ २ ॥

योगात् श्रुतेस्तत्र तात्पर्याभावात् अन्योंतरात्मानंदमय इत्यतिरिक्तात्मश्रुतेः तथा चांतःकरणं नहि तच्चानात्मेति भावः एतेन मनोमयकोशस्याप्यात्मत्वं परास्तं अस्तु तर्हि सर्वाध्यासमूलमानंदमयशब्दवाच्यमज्ञानमात्माहमज्ञ इत्यनुभवादित्यत आह अध्यासमूलमिति अध्यासो विपर्ययो मिथ्याज्ञानं अतस्मिंस्तद्बुद्धिरिति यावत् । अयं विस्तरेणाग्रे निरूपयिष्यते तेन तस्याध्यासस्य मूलं कारणमज्ञानं तथा चाहमध्यासकारणमज्ञानं न भवामि तस्य ज्ञाननिवर्त्यत्वाज्जडत्वात्समाधावप्रतीयमानत्वादज्ञोहमित्यनुभवस्य भ्रांतित्वात् ब्रह्म पुच्छं प्रतिष्ठेत्यानंदमयकोशाधिष्ठानस्य तत्साक्षिणोऽतिरिक्तस्य प्रतिपादनेन श्रुतेरानंदमयस्यात्मत्वे तात्पर्यायोगाच्चाज्ञानमनात्मेति भावः कस्तर्ह्यात्मा यस्य ब्रह्मत्वमनुभवस्यऽहं ब्रह्मास्मीति तत्राह सत्येति अज्ञानतत्कार्यसाक्षी आत्मा स एवाहमित्यनुभूयते तस्यैव ब्रह्मत्वमनुभवाम्यहं ब्रह्मास्मीति किं तद्ब्रह्मेत्यत आह कृष्ण इति कृष्णः परं ब्रह्म कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति स्मरणात् कृष्ण एवाहमस्मि इत्यभिप्रायः अयं भावः तत्सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि स एष इह प्रविष्ट आप्रणखाग्रेभ्य इत्यादिश्रु

इतिवाक्येन२ भ्रांतित्वा४ आनन्दः२॥ स एषः पूर्वोक्तः परमात्मा इह अस्मिन् शरीरे नखाग्रपर्य्यन्तं प्रविष्टोस्तीत्यर्थः॥१॥

तयः अविक्रियोनित्यशुद्धबुद्धमुक्तस्वभाव आत्माऽनाद्यनिर्वचनीयमायाशक्त्याकाशादिस्थूलशरीरांतं सृष्ट्वा तदनुप्रविश्य तत्साक्षीभूत्वाऽविवेकात्तदीयधर्मानाऽऽत्मन्यारोप्याहं कर्ताभोक्तेति संसारमनुभवति श्रुत्याचार्यप्रसादेन विवेकात्तं परित्यज्य स्वात्मसाक्षात्कारेण मायां विनाश्य परमानंदस्वरूपमनुभवतीति वदंति ततोनकोपि विरोधः एतच्चाग्रे स्फुटतरं व्युत्पादयिष्यते साक्षात्कर्तव्यस्य ब्रह्मणः स्वरूपतटस्थलक्षणे दर्शयति सत्येत्यादिना मायासाक्षित्वं तटस्थलक्षणं मायां साक्षादीक्षते भासयतीति मायासाक्षी मायां व्युत्पादयिष्यति अन्यत्स्वरूपलक्षणं कालत्रयाबाध्यः सत्य आनंदः सुखं निरतिशयसुखस्वरूप इत्यर्थः चिदात्मा ज्ञानस्वरूपः सत्यमिति मिथ्यावस्तुतादात्म्यं व्यावर्तयति आनंद इति दुःखतत्साधनतादात्म्यं व्यावर्तयति चिदात्मेति जडतादात्म्यं व्यावर्तयति तथाच सत्यज्ञानानंदस्वरूपः सर्वसाक्षी परमात्माहमस्मि तत्त्वमस्यहं ब्रह्मास्मीति श्रुतेरिति भावः अथातो ब्रह्मजिज्ञासेत्यत्र साधनचतुष्टयसंपत्त्यनंतरं ब्रह्मजिज्ञासासूचिता तत्र विचारितत्त्वमस्यादिवाक्यजन्यमवगतिपर्यंतं ब्रह्मात्मैक्यगोचरं फलीभूतं ज्ञानमिच्छाकर्म तच्च पदार्थज्ञानाधीनं अविदितपदार्थस्य पुरुषस्य वाक्यार्थज्ञानानुदयात् तदपि पदार्थज्ञानं विचाराधीनमित्यर्थो हि विचारकर्तव्यता सूचिता सच विचारो द्विविधः प्रधानविचारस्तत्सहकारिविचारश्चेति ज्ञानेनाप्तुमिष्टात्मत्वाद्ब्रह्मप्रधानं तद्विचारः प्रधानविचारः समन्वयादिविचारैर्विना ब्रह्मविचारासंभवात्समन्वयाविरोधसाधनफलविचारास्तत्सहकारिणः समन्वयो नाम ब्रह्मात्मैकत्वप्रतिपादकत्वेन वेदांतवाक्यानां समनुगतत्वं तात्पर्यमिति यावत् तद्विचारः शारीरके प्रथमाध्याये कृतः श्रुतिविरोधे स्मृत्यादीनां प्रत्यक्षादीनां च आभासत्वाद्वेदांतसमन्वयस्य प्रमाणांतरेणविरोधाभावोऽविरोधः सोपि द्वितीयाध्याये विचारितः द्विविधमपि साधनं तृतीये विचारितं द्विविधमपि फलं चतुर्थे विचारितं साधनमध्ये वाक्यार्थविचारस्य ज्ञानं प्रत्यंतरंगसाधनत्वात्तत्सहकारित्वेन पदार्थविचारस्याप्यंतरंगसाधनत्वात्पदार्थविचारं सप्रयोजनं प्रतिजानीते अथेति साधनचतुष्टयसंपत्त्यनंतरं तत्पदार्थं निरूपयाम इति संबंधः ननु काकदंतपरीक्षावत्पदार्थनिरूपणस्य प्रयोजनशून्यत्वात्तन्निरूपणमसंगतमित्याशंक्याह तदर्थमिति पदार्थज्ञानार्थं प्रथमं तत्पदार्थं निरूपयामः क्रमेण त्वंपदार्थमपीति भावः ननु पदार्थज्ञानस्य सुखप्राप्तिदुःखनिवृत्त्योरन्य

अथमोक्षस्य वाक्यार्थज्ञानाधीनत्वात् तस्य च पदार्थज्ञानाधीनत्वात् तदर्थं तत्पदार्थं निरूपयामः ॥

॥ ~ ॥

63

विचारयामः२॥

भावपदार्थोद्वितीयोनापेक्षितइत्येव४॥ श्रुति४॥ अविद्याप्रतियोगिकायस्याः५॥ वाक्यार्थज्ञानंप्रतिपदज्जन्यपदार्थोपस्थितेःकारणत्वमित्यर्थः॥२

नत्वाभावेनकथंपुरुषार्थत्वमित्याशंक्याह तस्येति तस्येतिवाक्यार्थज्ञानं परामृश्य तेनतत्त्ववाक्यार्थज्ञानस्यपदार्थज्ञानाधीनत्वाद्विदितपदार्थस्यवाक्यार्थ।
ज्ञानासंभवात्तदर्थंपदार्थज्ञानंसंपादनीयं हेतुःपदार्थबोधोहिवाक्यार्थावगतेरिहेत्यादिवचनादितिभावः॥ वाक्यार्थज्ञानस्यवाकथंप्रयोजनवत्त्वंतस्मिन्सत्यपि
संसारोपलंभादित्यतआह मोक्षस्येति ननुकोयंमोक्षः अज्ञाननिवृत्तिर्ब्रह्मभावोवानाद्यः अज्ञाननिवृत्तेर्ब्रह्मस्वरूपापेक्षयाभिन्नत्वे अद्वैतश्रुतिविरोधापत्तेः न
चश्रुतेर्भावोऽद्वैतपरत्वान्नोक्तदोषइतिवाच्यं संकोचेमानाभावात् किंचब्रह्मव्यतिरिक्तस्यकल्पितत्वनियमेनाविद्यानिवृत्तेरपिकल्पितत्वेनमिथ्यात्वापत्त्यामो
क्षस्यानित्यत्वप्रसंगेनाऽविद्यायाःकल्पितत्वेनतत्प्रतियोगिकनिवृत्तेस्तत्सत्ताधीनसत्ताकतयासत्यत्वायोगेनमोक्षस्यानित्यत्वंस्यान्नचतदिष्टंसर्वैर्मोक्षवादि।
भिर्मोक्षस्यनित्यत्वाभ्युपगमादन्यथामुक्तानांपुनरुत्पत्तिप्रसंगात् नद्वितीयः मोक्षस्यज्ञानसाध्यत्वंनस्यात् तस्मान्मोक्षस्यानिरूपणाद्वाक्यार्थज्ञानस्यतत्सा
धनत्वेनप्रयोजनवत्त्वंदुर्निरूप्यमिति अत्रोच्यते अविद्यानिवृत्तिरेवमोक्षःसाचाधिष्ठानब्रह्मस्वरूपैवकल्पितप्रतियोगिकाभावस्याधिष्ठानव्यतिरेकेण

अविद्यो३

तत्पदार्थस्यलक्षणंद्विविधंतटस्थलक्षणंस्वरूपलक्षणंचेति सृष्टिस्थितिलयकारणत्वंतटस्थलक्षणं॥

अथवेतिमतान्तरेणपूर्वपक्षएव४ श्रवणमनननिदिध्यासनानां४ उपासना६

दुर्निरूपत्वात् नचमोक्षस्यज्ञानसाध्यत्वंनस्यादितिवाच्यं नहिसाध्यत्वंनाममोक्षस्यजन्यत्वंब्रह्मभावस्यानादिसिद्धत्वेनोत्पत्तेरनिरूपणात् किंतर्हि अभि
व्यक्तिमात्रं अभिव्यक्तिर्नामज्ञानेनभ्रमतिरस्कारः अखंडैकरसानंदस्फूर्तिरिति यावत् तस्माद्वाक्यार्थज्ञानस्यमोक्षसाधनत्वमुपपन्नं ननुतस्मिन्सत्यपिसंसा
रोपलंभात् कथंमोक्षसाधनत्वं तस्माच्छास्त्रेणब्रह्मनिश्चित्ययावज्जीवंकर्मानुतिष्ठन् ब्रह्मध्यानाभ्यासंकुर्यात्ततश्चध्यानाभ्यासकर्मभ्यांमरणकालेशुद्धेमन
स्यभ्यासपाटवेनचरमप्रत्ययःसाक्षात्कारउदेतिततोमोक्षोभवति अथवाप्रसंख्यानंकर्तव्यंप्रसंख्यानंनामशब्दयुक्तिप्रत्ययानामावृत्तिः तेनाऽसंसृष्टाऽद्विती
यब्रह्मसाक्षात्कारोभवति तदुक्तं शब्दयुक्तिप्रसंख्यानैरात्मनाचमुमुक्षवः पश्यंति मुक्तमात्मानंप्रमाणेनचतुष्टयेति तस्माद्वाक्यार्थज्ञानान्मोक्ष इतिमनोरथमा
त्रं किंतुयथोक्तप्रकारेणैवब्रह्मसाक्षात्कारान्मोक्षः तथाचविद्यांचाविद्यांचयस्तद्वेदोभयंसह अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुते तमेवधीरोविज्ञायप्रज्ञांकुर्वी
तब्राह्मणइत्येवमाद्याःश्रुतयोऽनुगृहीताभवंति तस्मान्मोक्षस्यवाक्यार्थज्ञानाधीनत्वमनुपपन्नमित्यत्रोच्यते चरमसाक्षात्कारात्कीदृशोमोक्षोभवतीतिविवेक्त।

सिद्धांतेनुवाक्यार्थज्ञानार्थंमननादिकं एतन्मतेतुवाक्यार्थज्ञानादूर्ध्वं अपिइतिभेदः२॥ उपासना२॥ कर्म२॥ ॥३ चत्वारिपदानियस्मिन्इत्यर्थभूतेनप्रमाणेनास्मिन्नेवश्लोकेउक्तेनइ॥

Nepal Sanskrit University [illegible] Kathmandu

अ॰ कौ॰
प्र॰
४

वेदइत्यपिपा२ ज्ञानिनः३

व्यं अविद्यानिवृत्तिर्वाब्रह्मभावोवानाद्यःचरमप्रत्ययाद्विद्यानिवृत्तिर्भवतिप्रथमप्रत्ययान्नेत्यत्रकोहेतुःप्रत्ययत्वाविशेषात्। संसारोपलंभएवज्ञापकइतिचेन्न
तस्यसाक्षात्कारोत्तरमपिप्रारब्धवशादुपपत्तेः किंचब्रह्मविद्ब्रह्मैवभवति। तरतिशोकमात्मविदित्यादिश्रुतिषुज्ञानमात्रस्यमोक्षहेतुत्वंश्रूयतेनतुज्ञानोत्तरंकिं
चित्कर्तव्यमवगम्यते ततश्चरमस्यैवमोक्षहेतुत्वंनप्रथमस्येतिकल्पनायांमानाभावात् ज्ञानेनाज्ञाननिवृत्तौतत्कृतकर्तृत्वाद्यभिनिवेशस्यापिनिवृत्तत्वात्तस्यवि
धिकिंकरत्वायोगेनध्यानकर्मप्रवृत्त्यऽसंभवात् ब्रह्मणःप्रत्यग्रूपत्वेननित्यापरोक्षतयाप्रथमंपरोक्षज्ञानंपश्चादपरोक्षज्ञानमितिकल्पनायांमानाभावाच्च अ
तएवनद्वितीयोपिचरमज्ञानेनेवप्रथमज्ञानेनापिब्रह्मभावाभिव्यक्तेःसंभवात् तस्मात्प्रथमोवामध्यमोवाचरमोवाऽसंदिग्धाविपर्यस्तोवाक्यजन्यप्रत्ययोमो
क्षहेतुः अतएवनप्रसंख्यानविधिरपिविद्यांचाविद्यांचेतिवाक्यस्योपासकविषयत्वात् तमेवधीरोविज्ञायेतिवाक्यस्यसाक्षात्कारोद्देशेननिदिध्यासनवि
धिपरत्वात्तस्मान्मोक्षस्यवाक्यार्थज्ञानाधीनत्वमुपपन्नमेवातोवाक्यार्थज्ञानंसंपादनीयमितिभावः लक्षणप्रमाणाभ्यांवस्तुसिद्धिरितिन्यायात्ताभ्यांतत्प

यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतिइतिश्रुतेः ॥

दार्थंनिरूपयितुंलक्षणंविभजते तत्पदार्थस्येति द्वैविध्यमाह तटस्थेति कादाचित्कत्वेसतिव्यावर्तकत्वंतटस्थलक्षणं यथापृथिवीलक्षणस्यगंधवत्त्वस्य।
तस्यपृथिव्यांमहाप्रलये उत्पत्तिक्षणेचाभावात् सकलकार्यविनाशस्यैवप्रलयत्वात् न्यायमते उत्पन्नंद्रव्यंक्षणमगुणंनिष्ठुतीतिप्रथमक्षणेतद्द्रव्यस्यनि
र्गुणत्वस्वीकारात् तस्मात्कादाचित्कत्वात् व्यावर्तकत्वाच्चपृथिव्यागंधवत्त्वंतटस्थलक्षणमेवंब्रह्मणोपीत्युदाहरति सृष्टीति सृष्टिरुत्पत्तिःस्थितिःपरिपाल
नंलयकारणत्वमित्युक्ते ब्रह्मणउपादानत्वमेवस्यात् यत्कार्यंयत्रलीयतेतत्कार्यंप्रतितस्योपादानत्वनियमान्निमित्तकारणमन्यदेवस्यात् तथाचाद्वैतश्रुतिविरो
धःस्यात्तदर्थमुक्तं स्थितीति स्थितिलयकारणत्वमितिउक्तेउत्पत्तिकारणंदंडादिवन्निमित्तकारणमन्यदेवस्यात्तथाचपूर्वोक्तदोषस्तद्व्यावृत्त्यर्थमुक्तं सृष्टीति सृ
ष्टिस्थितिकारणत्वमित्युक्तेकुलालादिवद्ब्रह्मणोनिमित्तकारणत्वमेवस्यादुपादानकारणमन्यदेवस्यात्तथाचसिद्धांतविरोधः अतउक्तंलयेति सृष्टिस्थितिलयकार
णत्वंतटस्थलक्षणमित्युक्त्याब्रह्मणोऽभिन्ननिमित्तोपादानत्वंसिद्ध्यति एवंच प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरोधादितिसिद्धांतोनविरुध्यते तथाचलक्षणस्यायंनि
ब्रह्मप्रकृतिरुपादानंचकारणंसोऽकामयतेतिश्रुत्याकामयितृत्वश्रवणाच्चनिमित्तमपि१॥ प्रत्यज्ञादृष्टांतयोःसामंजस्यात् येनाश्रुतंश्रुतंभवतीतिप्रतिज्ञा१॥१यथासौम्यैकेनमृत्पिंडेनसर्वंमृण्मयंविज्ञातंस्यादितिदृष्टान्त इति॥ शा॰॥ सू॰॥

राम:
४

कर्तृत्वं५ कर्तृत्वे२

पक्षः जगत्कर्तृत्वेसतिजगदुपादानत्वंतटस्थलक्षणंब्रह्मणइतिजगदुपादानत्वंतटस्थलक्षणमित्युक्तेमायायामतिव्याप्तिःमायाविशिष्टस्यजगदुपादानत
याविशेषणीभूतमायाया अप्युपादानत्वावश्यंभावात् कार्यान्वितस्यैवविशेषणत्वात् मायांतुप्रकृतिंविंद्यादित्यादिश्रुत्यामायायाःतदुपादानत्वावगमाच्चत
त्रातिव्याप्तिवारणायजगत्कर्तृत्वेसतीत्युक्तंलक्षणस्यत्रीणिदूषणानिभवंत्यव्याप्त्यतिव्याप्त्यसंभवाश्चेति लक्ष्यैकदेशेलक्षणस्यावर्त्तनमव्याप्तिः अलक्ष्येल
क्षणगमनमतिव्याप्तिःलक्ष्येक्काप्यवर्त्तनमसंभवः तत्रातिव्याप्तेरपिदूषणत्वाद्विशेषणमर्थवत् कर्तृत्वंनाम उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वंत
च्चेतनस्यैवसंभवतीतिनमायायामतिव्याप्तिः तावत्युक्तेनैयायिकाभिमततटस्थेश्वरेऽतिव्याप्तिस्तस्यवेदांतासंमतत्वेनाऽलक्ष्यत्वात्तद्व्यावृत्त्यर्थमुत्तरदलंपर
माणवोजगत्समवायिकारणमीश्वरोजगत्कर्तेतिजगदुपादानजगत्कर्त्रोर्नैयायिकैर्भेदाभ्युपगमादस्माभिरभिन्ननिमित्तोपादनत्वांगीकारान्नातिव्याप्तिः ननु ए
कस्योपादानत्वंकर्तृत्वंचविरुद्धंतथालोकेऽदर्शनात् नहिघटकर्ताकुलालोघटोपादानंघटोपादानभूतोवामृत्पिंडोघटकर्ताकिंतुमृत्पिंडउपादानंकुलालःक

## तदुक्तं भगवता सूत्रकारेण ॥

ज०३०२

अभिन्ननिमित्तोपादानत्वं

र्ताएवमीश्वरोपिजगत्कर्तातदन्यदुपादानं अन्यथादृष्टविरोधापत्तेः दृष्टपूर्वकत्वाददृष्टकल्पनायाः ननुवयंनकल्पयामः तदैक्षतबहुस्यांप्रजायेयेत्यादिश्रुति
रेवबोधयतीतिचेन्न दृष्टविरोधे श्रुतेरर्थांतरसंभवात्तस्मादभिन्ननिमित्तोपादानत्वमनुपपन्नमित्यत्रब्रूमः। तदैक्षतबहुस्यांसोऽकामयतबहुस्यांप्रजायेयेत्यादि
श्रुत्याबहुभवनकामयितृत्वश्रवणेनचेतनस्यब्रह्मणएवोपादानत्वंजगत्कर्तृत्वंचावगम्यते नचतद्बाधितुंयुक्तं उपक्रमोपसंहारप्रभृतितात्पर्यलिंगैरद्वितीये
ब्रह्मणिवेदांततात्पर्येनिर्णीतेसामान्यतोदृष्टानुमानेनश्रुत्यर्थबाधाऽयोगात् श्रुतिविरोधेप्रमाणांतराणामाभासत्वात् यदपिलोकेऽदर्शनादुपादाननिमित्त
योर्भेदोऽभ्युपेयइति तदसत् ऊर्णनाभ्यादेरभिन्ननिमित्तोपादानत्वस्यदृष्टत्वात् किंचयथानैयायिकादिभिर्जीवात्मनोज्ञानादिकंप्रत्युपादानत्वंनिमित्तत्वंचाभ्यु
पगम्यतेतथाब्रह्मणस्तदुपपत्तेर्नकोपिविशेषः तस्मादभिन्ननिमित्तोपादानत्वंब्रह्मणइतिसिद्धम् ब्रह्मणःसृष्ट्यादिकारणत्वेश्रुतिमुदाहरति यतोवेति तत्रसूत्रसं
मतिमाह तदुक्तमिति ॥ ॥

सामान्यतोदृष्टञ्चाविज्ञातासाधारणधर्मकम् यथारूपादिज्ञानंकरणवत् क्रियात्वात् छिदादिवदित्यनुमानम् प्रकृतेचकार्यंसावयवकारणकंकार्यत्वात्घटवदितिसामान्यतोदृष्टानुमानेनतच्छ्रुतेर्बाधइतिभावः ३॥

॥उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्॥ अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णये॥४॥

समर्थ्यंयतिइतिपाठांतरं४॥ संशयः३ अथातोब्रह्मजिज्ञासेत्यस्मिन्नधिकरणेशास्त्रमनारंभणीयमिति पूर्वपक्षप्रयोजनमब्रह्मणोऽज्ञातत्वेनविषयत्वंज्ञातत्वेप्रयोजनं अतः शास्त्रमारंभणीयम् ६॥

उत्पत्तिंचविनाशंचभूतानामागतिंगतिंवेत्तिविद्यामविद्यांचसवाच्योभगवानितिश्लोकोक्तलक्षणोभगवांस्तेनबह्वर्थसूचनात्सूत्रं यथाहुः लघूनिसूचितार्थानिलघ्वक्षरपदानिचसर्वतःसारभूतानिसूत्राण्याहुर्मनीषिणइतिसूत्रंकरोतीतिसूत्रकारस्तेनबादरायणाचार्येणेतियावत् समन्वयलक्षणेस्थितमधिकरणमनुक्रमते तल्लक्षणंच विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरंप्रयोजनंचपंचैतेप्रांचोधिकरणंविदुरितिवदंति यतोवाइमानीत्यादिवाक्यंविषयःब्रह्मणोलक्षणंसमर्थयतिनवेतिसंशयःनसमर्थयतीतिपूर्वपक्षः तथाहिजगतोऽनित्याशुचिदुःखजडपरिच्छिन्नत्वेनब्रह्मणस्तद्विलक्षणत्वेनतत्कारणत्वायोगान्नतटस्थलक्षणंभवतीति तथाब्रह्मणःस्वरूपलक्षणंचनसंभवतिनित्यशुद्धत्वादीनामप्रसिद्धत्वादिति वास्तवकारणत्वासंभवेपिकल्पितसर्पादेरज्वादेरिवाध्यस्तजगज्जन्मादिकारणत्वंमायिकंब्रह्मणोनविरुध्यतेइत्युत्तरंभवति तस्माल्लक्षणंसंभवतीतिसिद्धांतः अस्याधिकरणस्यलक्षणविचारात्मकत्वेनपूर्वाधिकरणपूर्वपक्षसिद्धांतयोर्यत्प्रयोजनंतदेवद्रष्टव्यं तदुक्तं आक्षेपेचापवादेचप्राप्तौलक्षणकर्मणिप्रयोजनंनवक्तव्यंयत्रकृत्वाप्रवर्तनइतिजन्मा

जन्माद्यस्ययतइति सत्यज्ञानानंदाःस्वरूपलक्षणं सत्यंज्ञानमनंतंब्रह्म आनंदोब्रह्मेतिव्यजानादित्यादिश्रुतेः॥ २ ॥

असाधारणधर्मोलक्षणमिति४

दिसूत्रस्यायमर्थः अस्यनामरूपाभ्यांव्याकृतस्याकाशादिप्रपंचस्य जन्मादिर्यस्यततथाजन्मस्थितिभंगंयतःसर्वज्ञात्सर्वशक्तेःकारणाद्भवतितद्ब्रह्मेत्यनुषंगेनयोजनासृष्टिस्थितिलयकारणत्वंब्रह्मणस्तटस्थलक्षणमितिफलितोर्थः स्वरूपलक्षणाऽपरिज्ञानेनतटस्थलक्षणमात्रेण ।ब्रह्मज्ञातुमशक्यमितिस्वरूपलक्षणमाह सत्येतिस्वरूपसद्व्यावर्तकंस्वरूपलक्षणंयथापृथिव्याःपृथिवीत्वंजातिव्यक्त्योस्तादात्म्याभ्युपगमात् पृथिवीस्वरूपसत्पृथिवीत्वंपृथिवीमितरेभ्योव्यावर्तयत्यतःपृथिव्याःपृथिवीत्वंस्वरूपलक्षणंएवंसत्यज्ञानानंदादयःब्रह्मणःननुलक्ष्यलक्षणभावस्यभेदगर्भत्वात् ब्रह्मणोऽखंडैकरसत्वेनकथंसत्यादेर्लक्षणत्वमिति चेन्नैषदोषःकाल्पनिकभेदाभ्युपगमेनतदुपपत्तेः तदुक्तम् आनंदोविषयानुभवोनित्यत्वंचेतिसंतिधर्माःब्रह्मणोऽपृथक्त्वेपिपृथगिवावभासंतइतिनचापृथक्त्वेतेषांपृथक्त्वावभासःकिंप्रयुक्तइतिवाच्यंअंतःकरणतद्धर्मोपाधिवशात्पृथक्त्वावभासोपपत्तेः॥ २ ॥ ६ ॥ ६ ॥

अनुपपत्तिबोधनमाक्षेपः उत्सर्गबाधकोऽपवादः पूर्वप्रकृतार्थाःप्राप्तिःलक्षणाभिधानंलक्षणकर्मअभ्युपगमवादः कृत्वाचिन्ता इत्येतेषुपञ्चसुप्रयोजनंनवक्तव्यमेतेषांपूर्वप्रयोजनेनैवप्रयोजनवत्वात् शेषाविषयाद्यस्तुव

गौडपादाचार्येण

ऽकृत्याएवेत्यर्थः ८॥

65

सुषुप्तौज्ञानप्रसंगवारणाययद्वेतितत्रापिसूक्ष्मरूपेणवृत्तेःसत्वात्१॥ प्रीत्यादौकार्यतावच्छेदकगौरववारणायानुकूलेति१॥

तथाहि वाधाभावविशिष्टं सत्यं वृत्त्यवच्छिन्नं चैतन्यं ज्ञानं प्रीत्यादिवृत्त्यवच्छिन्न आनंदः यद्वा व्यंजकवृत्त्युपहितं चैतन्यं ज्ञानं अनुकूलवृत्त्युपहितमानंदस्तत्तत्तेषां ब्रह्मणश्चवास्तवभेदाभावेप्यौपाधिकभेदसत्वाल्लक्ष्यलक्षणभावउपपद्यते एवंच सत्यं ब्रह्मेत्युक्ते नैयायिकाभिमतसत्तासामान्येऽतिव्याप्तिर्लक्ष्यस्य ब्रह्मणो जडत्वप्रसंगश्च अतउक्तं ज्ञानमिति नावत्युक्ते पराभिमतात्मसमवेत ज्ञानेऽतिव्याप्तिर्लक्ष्यब्रह्मणोऽनित्यत्वापुरुषार्थत्वप्रसंगश्च तन्निरसनायोक्तमानंदेति न चैवमप्यपुरुषार्थत्वाभावे ब्रह्मणोऽनित्यत्वं दुष्परिहरमिति वाच्यं सत्यमिति विशेषणेन तत्परिहारसंभवात् आनंदो ब्रह्मेत्युक्ते विषयसुखेऽतिव्याप्तिर्लक्ष्यस्य जडत्वप्रसंगश्च तन्निवारणाय ज्ञानमित्युक्तं लक्ष्यस्यानित्यत्वपरिहाराय सत्यमित्युक्तं ननु सत्यज्ञानानंदादिशब्दानां भिन्नार्थत्वेनाऽनंतादिगुणकं ब्रह्मैव लक्षणवाक्येन प्रतिपाद्यते ततश्च कथमखंडैकरसत्वं ब्रह्मण इति चेन्नैवं सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति व्यजानात् विज्ञानमानंदं ब्रह्मेत्येवमादिवाक्येषु सत्यज्ञानानंदादिशब्दानाम भिन्नार्थत्वेनानंदादिशब्दानां सामानाधिकरण्येनाऽखंडैकरसानंदब्रह्मबोधकतया गुणगुणिभावकल्पनायां मानाभावात् न चैतेषामेका

उक्तंच आनंदादयः प्रधानस्येति तत्पदार्थः॥ छ ॥

गिरोपलक्षितपदानां ५॥ लक्षणासद्भावस्यातिव्याप्तिनिराकरणस्य ४ घटमानयेत्यत्र घटकर्मताकसंसर्गकज्ञानयुक्तं नीलोत्पलमित्यत्र नीलविशिष्टमुत्पलमितिवत्१॥ चैतन्ये वाच्यशक्तिसंपन्नानां २॥

कार्थप्रतिपादकत्वे पर्यायतास्यादिति वाच्यं वाच्यभेदस्योक्तत्वात् नन्वेवमपि लोके वाक्यस्य संसर्गविशिष्टान्यतरप्रतिपादकत्वदर्शनेन कथमखंडव्यक्तिप्रतिपादकत्वमिति चेन्न घटः सन् द्रव्यं पृथिवी प्रकृष्टप्रकाशश्चंद्र इत्यादिवाक्यानां लक्षणयाऽखंडव्यक्तिप्रतिपादकत्वदर्शनेन प्रकृतेपि तत्संभवात् विशिष्टे शक्तानां सत्यादिपदानां अखंडचैतन्ये भागलक्षणया स——त्यादिपदान्यखंडैकरसानंदव्यक्तिं बोधयंति न चैकेन पदेन तद्बोधसंभवे पदांतरवैयर्थ्यमिति वाच्यं पदस्य सारकत्वेन वाक्यस्यैवानुभावकत्वात् प्रयोजनांतरस्यापि प्रतिपादितत्वाच्च अन्यथा ब्रह्मणोऽद्वितीयत्वं न सिद्ध्येत् इदमेव वाक्यस्याखंडार्थत्वम्॥ तदुक्तं संसर्गाऽसंगिसम्यग्धीहेतुतायागिरामियं उक्ताखंडार्थता यद्वा तत्प्रातिपदिकार्थतेति प्रातिपदिकार्थमात्रपरत्वं अखंडार्थत्वमिति चतुर्थपादार्थः तस्मात्सत्यज्ञानानंदाः स्वरूपलक्षणं ब्रह्मण इत्यनवद्यं तत्र श्रुतिमुदाहरति सत्यमित्यादिना अंतः परिच्छेदो न विद्यते यस्य तदनंतं त्रिविधपरिच्छेदशून्यमित्यर्थः तथा चोक्तं नव्यापित्वाद्देशतोंतो ८ नित्यत्वान्नापि कालतः नवस्तुतोपि सार्वात्म्यादानंत्यं ब्रह्मणि त्रिधेति आदिशब्देन विज्ञानमानंदं ब्रह्मेत्यादीनां ग्रहणं आनंदादीनां ब्रह्मलक्षकत्वे व्याससूत्रं संवादयति

पदानां ३॥ यथाछत्रिणोगच्छंति६॥ गिरामपर्यायशब्दानां या संसर्गाविषयत्वे सति सम्यग्धीहेतुता सेयमखंडार्थतोक्ता अथवा तेषामेव शब्दानां तत्प्रातिपदिकार्थतातदिति४॥

स्नावानाड्यायस्मिन्नविद्यन्ते इत्यर्थः शुद्धं निर्मलं अपापविद्धं धर्माधर्मादिपापवर्जितमित्यर्थः ॥२॥ इति संशयः ३॥ आक्षेपस्य ४॥

उक्तं चेति तृतीये गुणोपसंहारे स्थितं सत्यं ज्ञानमनंतं ब्रह्मेति तैत्तिरीयके तत्रैवात्मन आकाशः संभूत इति विज्ञानमानंदं ब्रह्मेति स वा एष महानज आत्मा असंगो ह्ययं पुरुष इत्यादि बृहदारण्यके अस्नाविरं शुद्धमपापविद्धमिति ईशावास्ये एवं तत्र तत्र श्रूयते तत्र संशयः यस्यां शाखायां ब्रह्मणो यावद्गुणजातं श्रुतं तावदेव ध्यातव्यं आहोस्वित् शाखांतरस्थगुणोपसंहारेण समग्रं ब्रह्म ध्यातव्यं इति तत्र यस्यां यावच्छ्रुतं तच्छाखिभिस्तावदेव ब्रह्म ध्यातव्यं न शाखांतरीयगुणोपसंहारेण तावता निर्गुणब्रह्मसाक्षात्कारसंभवादितरोपसंहारे प्रयोजनाभावादिति प्राप्ते सिद्धांतः प्रधानस्य ब्रह्मणः आनंदादयः सर्वे सर्वत्रोपसंहर्तव्याः लक्षकत्वेन यद्यानंदात्मादिभिर्ब्रह्म न लक्ष्येत तर्ह्यनात्मत्वाऽनानंदत्वादिव्यावृत्तिर्न सिद्ध्येत् ततश्चानंदात्मकब्रह्मसाक्षात्कारो न भवेत् अतस्तदर्थमानंदादीनां ब्रह्मलक्षणतया सर्वोपसंहारेण ब्रह्मानुसंधेयं ननु तर्हि सत्यकामत्वादीनामप्युपसंहारः स्यादिति चेन्न तेषां कारणलक्षणत्वेन निर्गुणब्रह्माऽलक्षकत्वेनानुसंधानानुपयोगात् तस्मान्निर्गुणप्रकरणपठितानामानंदादीनां ब्रह्मलक्षकत्वेनोपसंहारेण ब्रह्मानुसंधेयमिति ननु सृष्टिस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षण-

अथवा ५

स च द्विविधः वाच्यार्थो लक्ष्यार्थश्चेति ॥ ७ ॥

मित्युक्तं तदनुपपन्नमसंभवात् तथाहि न तावदुपादानकारणत्वं ब्रह्मणः विकल्पाऽसहत्वात् तथाहि किमारंभकत्वेनोपादानत्वं विवक्षितमुत परिणामित्वेन आहोस्विद्विवर्ताधिष्ठानत्वेन नाद्यः अद्वितीयत्वेन ब्रह्मणोऽनारंभकत्वात् न द्वितीयः केवलो निर्गुणश्च निष्कलं निःक्रियं शांतमविकार्योयमुच्यते इत्यादिश्रुतिस्मृतिभिर्गुणक्रियाशून्यत्वनिरवयवत्वप्रतिपादनेन ब्रह्मणः परिणामित्वायोगात् न तृतीयः घटः सन् पटः सन्निति सत्यत्वेनानुभूयमानस्य प्रपंचस्य ब्रह्मविवर्ततया मिथ्यात्वकल्पनायां मानाभावात् तस्माद्ब्रह्मण उपादानकारणत्वं दुर्निरूप्यं नापि जगत्कर्तृत्वेन कारणत्वं ब्रह्मणः कर्तृत्वं नामोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं तच्च ब्रह्मणो न संभवति ज्ञानचिकीर्षाकृतीनां नित्यत्वे सर्वदा जगत् उत्पत्तिप्रसंगात् ततश्च प्रलयप्रतिपादकशास्त्रविरोधः तेषामनित्यत्वे कार्यतया ब्रह्माश्रयत्वायोगात् ब्रह्मणोऽपरिणामित्वस्योक्तत्वादनादिभावस्यानित्यत्वायोगात् अत एव नोभयात्मकं कारणत्वं ब्रह्मणः तस्मात्सृष्टिस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षणमित्यसंगतं कथं तर्हि जगदुत्पत्तिः शृणु सत्वरजस्तमोगुणात्मिकात्प्रधानान्महदादिक्रमेण जगदुत्पद्यते तस्य परिणामित्वाज्जगज्ज-

उपादाननिमित्तत्वं २॥ चिकिर्षादीनां ३॥

उपादानत्वं३॥

न्यादिकारणत्वं भवति पुरुषस्त्वसंगो निर्विकारी एवमाशंकमानसांख्यादीन्निराकर्तुं तत्पदार्थं विभजते सच्चेति द्वैविध्यमाह वाच्यार्थ इति शक्त्यागम्यमानो वाच्यार्थः लक्षणयागम्यमानोन्त्यस्यार्थः कौतौ वाच्यलक्ष्याविन्याशंकायामाह माययेत्यादि एतदुक्तं भवति यद्यपि शुद्धस्यापरिणामित्वेन नोपादानत्वं तथापि मायोपहितस्य तत्त्वं भवत्येव तदपि विवर्ताधिष्ठानत्वेन अतत्त्वतोऽन्यथाभावो विवर्तस्तदधिष्ठानत्वं मायोपहितस्य न विरुध्यते न च घटः सन्निति सत्यत्वानुभवेन प्रपंचस्य ब्रह्मविवर्ततया मिथ्यात्वानुपपत्तिरिति वाच्यं अनुभवस्याधिष्ठानसत्यत्वविषयतया मिथ्यात्वे बाधकाभावात् नहि प्रपंचस्य स्वतः सत्तासंबन्धः संभवति नेह नानास्ति किंचनेत्यादिशास्त्रेण तस्य प्रतिषेधात् नापि मिथ्यात्वे प्रमाणाऽभावः वाचारंभणश्रुतेरेव प्रमाणत्वात् मिथ्यात्वनिरुक्तिरग्रे वक्ष्यते किंच जगदुपादानत्वं ब्रह्मणोऽवश्यमभ्युपगंतव्यं यत्प्रयंत्यभिसंविशंतीति तस्मिन् लयश्रवणात् यस्य यत्र लयस्तत्तस्योपादानमिति व्याप्तेर्घटादेः कारणे मृदादौ दृष्टत्वात् बहुस्यां प्रजायेयेति ब्रह्मणो बहुभवनश्रवणाच्च न ह्यनुपादानस्य बहुभवनं संभवति अपिच प्रत्युत प्रधानस्यैव जगदुपादानत्वं न भव

मायोपहितं चैतन्यं तत्पदस्य वाच्यार्थः मायाविनिर्मुक्तं चैतन्यं तत्पदस्य लक्ष्यार्थः ॥ ६ ॥

ति तस्याऽप्रामाणिकत्वात् नहि क्वचिच्छ्रुतौ प्रधानस्य त्रिगुणात्मिकस्योपादानत्वमवगम्यते सर्वत्र श्रुतिषु आत्मनः आकाशः संभूत इत्यादिषु चेतनस्य ब्रह्मण एवोपादानत्वावगमात् न चोदाहृतश्रुतिष्वात्मन एवोपादानत्वमवगम्यते न ब्रह्मण इति वाच्यं तत्सृष्ट्वा तदेवानुप्राविशदिति जीवभावेन ब्रह्मणः प्रवेशश्रवणात्। ब्रह्मण एवात्मतयोपादानत्वोपपत्तेः किंच तदैक्षत सोऽकामयत बहुस्यां प्रजायेयेति बहुभवनकर्तुः कारणस्य सर्वत्र कामयितृत्वेक्षितृत्वश्रवणात् ब्रह्मण एवोपादानत्वं न प्रधानस्य ईक्षितृत्वादेरसंभवात् तस्य चेतनधर्मत्वात् मुख्ये संभवति गौणस्याऽन्याय्यत्वात् तस्माद्ब्रह्मण एवोपादानत्वं न प्रधानस्येति सिद्धं एवं मायोपहितस्य जगत्कर्तृत्वमपि संभवति तच्च पूर्वोक्तमेव ज्ञानेच्छाकृतयो मायोपहितस्येश्वरस्य जन्या अनित्याश्चापरिणामित्वेन शुद्धस्य तदाश्रयत्वाभावेऽपि मायोपहितस्य तदाश्रयत्वं संभवत्येव तस्य सर्वविवर्ताधिष्ठानत्वान्नोक्तदोषः तस्मादुभयात्मकं सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणं संभवतीति सिद्धं मायास्वरूपं पृच्छत्ययेति किम् शब्दः प्रश्नार्थे मायाकीदृशीत्यर्थ आक्षेपार्थे वा किंशब्दः माया न संभवतीति स्वरूपलक्षणप्रमाणनिरूपणात् तथाहि किं माया सत्या मिथ्या वा ॥

निमित्तत्वं३॥

ननु कूलंपिपतिष्यतीतिवत् प्रधानस्यापि गौणेच्छावत्त्वेनोपादानत्वाविरोध इत्यत आह मुख्ये इति ४॥

अखण्डाद्वैतस्वीकर्तॄणां वेदान्तिकानां मायायाः सत्वेन पृथक्स्वीकृते द्वैतापत्तिर्ह्यपसिद्धान्तः॥१॥ भवद्भिः२ मिथ्यावा३मायोपहितत्वेन

अ॰कौ॰ प्र॰ ७

आद्ये ब्रह्मभिन्नात्तद्भिन्नाद्वानाद्यः अपसिद्धान्तप्रसंगात् किंच ब्रह्मणोऽसंगत्वेन केनाप्यसंबंधान्मायोपहितत्वमनुपपन्नमेव न तावद्ब्रह्मणो मायया संयोगः संभवति संयोगस्याव्याप्यवृत्तित्वेन सावयवधर्मतया निरवयवत्वेन ब्रह्मणो मायया संयोगायोगात् नापि समवायस्संभवति अनंगीकारात् नापि तयोस्तादात्म्यं भिन्नयोस्तादात्म्यायोगात् नापि तयोर्भेदाभेदो विरुद्धत्वात् तस्माद्ब्रह्मणो मायोपहितत्वमनुपपन्नं न द्वितीयः जडाजडयोरभेदायोगात् नाद्यद्वितीयेः ईश्वरस्य मिथ्यात्वप्रसंगात्तच्च न दृष्टं मोक्षशास्त्राप्रामाण्यप्रसंगात् नहि मिथ्यावस्तुज्ञानेन मोक्षः संभवति एवं मायास्वरूपं दुर्निरूपमत एव तल्लक्षणमपि दुर्निरूप्यं सति धर्मिणि धर्माश्चिन्त्यन्त इति न्यायात् धर्मिणो दुर्निरूपत्वेन तद्धर्मलक्षणस्यापि सुतरां दुर्निरूपत्वादत एव तत्र प्रमाणमपि दुर्निरूपं निर्विषयप्रमाणप्रवृत्तेरयोगात् तस्मान्मायाया दुर्निरूपत्वात्तदुपहितस्य तत्पदवाच्यत्वमनुपपन्नमिति समाधत्ते शृणु इति मायास्वरूपं निरूप्य तदुपहितचैतन्यमीश्वरः स एव तत्पदवाच्यार्थः तस्य जन्मादिकारणत्वं तटस्थलक्षणमिति वक्तुं तदुपोद्घातत्वेन परमात्मनि सदृष्टान्तमध्याससामान्यमाह यथेति प्रतिपाद्यमर्थं बुद्धौ सं

अथ केयं माया शृणु यथा शुक्त्यादौ रजतादि कल्पितं तथा चेतने अचेतनं कल्पितं ॥ छ ॥ छ ॥

गृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः अचेतनमज्ञानमज्ञानतत्कार्यं कल्पितमध्यस्तमित्यर्थः चेतने ब्रह्मण्यचेतनस्य कल्पितत्वे श्रुतार्थापत्तिं प्रमाणमाह इदं सर्वमित्यादिना॥ इदं सर्वमित्यनेन प्रमाणोपस्थितमाकाशादिजडजातं प्रतिपाद्यते आत्मशब्देनाद्वितीयः सर्वसाक्षी प्रत्यग्भूतः परमात्मा प्रतिपाद्यते जडचेतनयोरैक्यायोगात् आत्मसर्वशब्दयोः सामानाधिकरण्यं बाधायां योऽयं चोरः स स्थाणुरितिवत् तथा च यथा दृष्टान्तवाक्ये स्थाणुव्यतिरेकेण चोराभावः। चोरस्थाणुशब्दयोः सामानाधिकरण्यादवगम्यते तथा दार्ष्टान्तिकेऽपि श्रुतिवाक्ये आत्मव्यतिरेकेण कृत्स्नजडाभावः आत्मसर्वशब्दयोः सामानाधिकरण्यादवगम्यते सत्ताभावः स्वप्रतियोगिनः प्रपंचस्य ब्रह्मणि कल्पितत्वमंतरेणानुपपन्नः सन् तस्य कल्पितत्वं कल्पयति इयं तु श्रुतार्थापत्तिः अनयाऽचेतनस्य चेतने कल्पितत्वमवगम्यत इति भावः एवमयमर्थो वाक्यान्तरेष्वपि समानः पूर्णत्वात्पुरुषः परमात्मा तेनेन किंचनाऽनावृतं नैतेन किंचनाऽसंवृतमिति श्रुत्यंतरात्सर्वेषु भूतेषु वसति सर्वभूतानि चास्मिन् वसंतीति वासुदेवः सर्वान्तर्यामी परमात्मा तथा चोक्तं सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततस्स वासुदेवाख्यो विद्वद्भिः परि

राम: ७

67

० उपोद्घातसङ्गत्येत्यर्थः॥ अनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वं सङ्गतित्वम् तच्च षड्विधम्॥ सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा॥ निर्वाहकैक्यकार्यैक्ये षोढासङ्गतिरिष्यतइति॥७॥ अस्मिन्वसति१ अप्रकाशितं२

आपो नारा इति शब्देनोच्यन्ते अप्सु नाराशब्दस्याप्रसिद्धेस्तदर्थमाह यतस्ता नरस्य परमात्मनः सूनवोऽपत्यानि तस्येदमित्यण्प्रत्ययः यद्यपि अणि कृते ङीप्प्रत्ययः प्रसक्तस्तथापि छान्दसलक्षणैरपि स्मृतिषु व्यवहारात्सर्वे विधयश्छन्दसि विकल्प्यन्ते इति पाक्षिको ङीप्प्रत्ययस्तस्याभावपक्षे सामान्यलक्षणप्राप्ते टापि कृते नारा इति रूपसिद्धिः आपोऽस्य परमात्मनो ब्रह्मरूपेणावस्थितस्य पूर्वमयनमाश्रय इत्यसौ नारायण इत्यागमेष्वाम्नात इति ॥ ३॥

पठ्यत इति नराज्जातं नारं तत्त्वायनं यस्य स नारायणः सर्वान्तर्यामीत्यर्थः तदुक्तं महाभारते नाराज्जातानि तत्त्वानि नाराणीति ततो विदुः तानि तस्यायनं पूर्वं तेन नारायणः स्मृत इति अस्यार्थः प्रत्यगभिन्नात्परमात्मनो नरात्तु सञ्जातानि तत्त्वानि चतुर्विंशतिः तानि भगवता दर्शितानि महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रियगोचरा इति अथवा नारमुदकमयनमस्येति वा विग्रहः तथा च मनुनोक्तं आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ननु सर्वात्मशब्दयोः सामानाधिकरण्यान्नीलोत्पलादिवत्तादात्म्यमेवास्तु न च नीलोत्पलयोर्गुणगुणिभावात्तादात्म्येपि प्रकृते तदभावाज्जडयोर्विरुद्धस्वभावत्वाद्भिन्नाभिन्नलक्षणं तादात्म्यं कथमिति वाच्यं तर्हि मृद्घटयोरिव कार्यकारणभावसंभवेन तयोस्तत्संभवात् अथवा शाखिशाखयोरिव जडाजडयोरभेदो वास्तु इत्याशंक्याह चेतनेति अयंभावः चेतनाचेतनयोर्विरुद्धस्वभावत्वान्न तादात्म्यं न च मृद्घटयोरिव कार्यकारणभावेन तत्संभवति अपरिणामित्वेन कार्यकारणभावस्य निरस्तत्वात् विवर्तत्वेन तदुपगमेऽचेतनस्य कल्पितत्वमागतमेव वृक्षशाखयोरवयवावयविभावसंभवेन

कार्यकारणभावोपगमे॥१ सर्वात्मशब्दयोस्तादात्म्यसंभवादित्यर्थः॥३॥

इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं पुरुष एवेदं विश्वं सर्वं खल्विदं ब्रह्म वासुदेवः सर्वमिति नारायणः सर्वमिदं पुराण इत्यादि
श्रुतिस्मृतिवाक्यशतैः अचेतनस्य चेतनव्यतिरेकेणाभावप्रतिपादनात् चेतनाचेतनयोरभेदायोगाच्च ॥ २२

भेदाभेदे सत्यपि चेतनस्य ब्रह्मणो निरवयवत्वेन विभुत्वेन च चेतनाचेतनयोरवयवावयविभावायोगात् अभेदो न भवति एकमेवाद्वितीयमिति श्रुत्या ब्रह्मणोऽद्वितीयत्वावगमात् अनयोः पारमार्थिकोऽभेदो न संभवति तस्मादात्मैवेदं सर्वमिति बाधायां सामानाधिकरण्येनात्मव्यतिरेकेण कृत्स्नजडप्रपंचाभावप्रतिपादनेनाऽचेतनं सर्वं चेतने कल्पितमिति किं तच्चेतनं किं तदचेतनमित्याकांक्षायां चेतनाचेतनस्वरूपमाह चेतनमिति कार्येन तादात्म्यं व्यावर्तयति नित्यमिति आकाशवत्सर्वगतश्च नित्य इत्यादिश्रुतेः परस्य नित्यत्वं अचेतनधर्मतादात्म्यं व्यावर्तयति शुद्धमिति अस्नाविरं शुद्धमपापविद्धमित्यादिश्रुतेः परस्य शुद्धत्वं रागद्वेषादिराहित्यं कारणीभूताज्ञानतादात्म्यं वारयति बुद्धमिति ज्ञानैकरसं प्रज्ञानघनश्रुतेरित्यर्थः अज्ञानकृतावरणादितादात्म्यं निरस्यति मुक्तमिति बन्धरहितं विमुक्तश्च विमुच्यत इति श्रुतेरित्यर्थः अनन्तत्वं निराकरोति सत्यमिति कालत्रयाबाध्यं सत्यं सत्यं ज्ञानमनन्तं ब्रह्म सदेव सोम्येदमग्र आसीदिति श्रुतेः तस्य पुरुषार्थत्वमाह आनंदेति आनंदो ब्रह्मेति व्यजानात् विज्ञानमानंदं ब्रह्मेति श्रुतेः तस्याखंडैकरसतामाह अद्वयमिति न विद्यते द्वयं यस्य तदद्वयं पंचविधभेदशून्य॥

प्रतियोगिसमानकालत्वायोगादेव॥२॥ ३॥ नजानामीत्येतस्यापि ज्ञानत्वाविशेषेण ज्ञानसमानकालत्वम्॥१॥३॥ ज्ञानसामान्यविरोधित्वादेवस्वीयभेदस्य स्वाधिकरणेऽपि सत्वाज्ज्ञानान्योऽन्याभावोऽज्ञानमिति स्वीकारे तयोरेकाधिकरणवृत्तित्वेन परस्परविरोधो न स्यादिति भावः ४॥

मिति यावत् ते च जीवानां परस्परभेदः जीवेश्वरयोर्घटादीनां च भेदः ईश्वरस्य च जीवस्य जडानां च एवं प्रतियोगिभेदेन भेदाः पंचविधाः तच्छून्यं तेषां कल्पितत्वात् अथवा त्रिविधभेदशून्यमद्वयं विजातीयभेदः सजातीयभेदः स्वगतभेदश्चेति त्रिविधो भेदस्तद्रहितं एकमेवाद्वितीयं ब्रह्मेति श्रुतेः ननु किमिदमज्ञानं न तावत् ज्ञानाभावः प्रागभावस्य प्रतियोगिसमानकालत्वायोगात् अज्ञानस्य प्रतियोगिसमानकालत्वेन न जानामीत्यनुभूयमानत्वात् अतः प्रागभावो नाज्ञानं अत एव न ध्वंसः॥ नात्यंताभावोपि प्रतियोगिव्यधिकरणत्वात् विशेषाभावस्य ज्ञानसामान्याविरोधित्वात् अज्ञानं तु ज्ञानसामान्यविरोधि अत एव नान्योन्याभावोपि तस्मात् ज्ञानसामान्यविरोधिभावरूपमज्ञानमवश्यमंगीकर्तव्यं ननु किं लक्षणमज्ञानं न तावत् ज्ञाननिवर्त्यत्वं तस्य घटादावतिव्याप्तेः प्रतियोगिप्रत्यक्षस्य ध्वंसप्रतिकारणत्वान्नाप्यनिर्वचनीयत्वं तेनैव तस्य निर्वचनात् तस्माल्लक्षणाभावाद्भावरूपाज्ञानमनुपपन्नं नापि तत्र प्रमाणं पश्यामः न तावत्प्रत्यक्षं प्रमाणं तस्योभयवादिसंमतप्रागभावविषयत्वान्नाप्यनुमानं लिंगाभावात् न च सर्गाद्यकालीनं कार्यं जडोपादानं कार्यत्वात् घटवदित्यनुमानं प्रमाणमिति वाच्यं तस्यार्थांत

अनिर्वचनीयत्वेनैव२ ध्वंसत्वे३ परमाण्वादेः संभवात् सांख्याभिमतप्रकृतेश्च १॥

चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानंदानंताद्वयं ब्रह्म अचेतनमज्ञानादिजडजातमज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं

परमाण्वादेः२ भ्रांतिज्ञाने३ कार्यज्ञाने =ं जायमानत्वे३

रत्वात् न चाज्ञानेनावृतं ज्ञानमित्यागम एव तत्र प्रमाणमिति वाच्यं आगमस्य भ्रांतिज्ञानविषयत्वात् नाप्यर्थापत्तिस्तत्र प्रमाणं दृश्यमानकार्यस्यान्यथाप्युपपत्तेः तस्माल्लक्षणप्रमाणयोरभावाच्चेतनेऽज्ञानादिकल्पितमित्यनुपपन्नमित्यत आह अज्ञानमिति त्रयो गुणाः सत्त्वरजस्तमांस्याऽत्मानो यस्य तत्तथा एतेन मिथ्याज्ञानतत्संस्काररूपाऽविद्यैव जगद्धेतुरिति प्रत्युक्तं आगंतुकत्वेन तस्याः सोपादानत्वनियमेन ब्रह्मणोऽपरिणामित्वेन तत्वायोगात् अनागंतुकत्वेऽपसिद्धांतप्रसंगात् तस्मात् यत्किंचिदेतत् अज्ञानलक्षणमाह सदसद्भ्यामिति भावप्रधानोयं निर्देशः सत्वेबाधो न स्यात् असत्वे प्रत्यक्षविषयत्वं न स्यात् प्रत्यक्षेण ब्रह्म न जानामीत्यनुभूयते अतो असत्वेनानिर्वचनीयं ब्रह्मज्ञानेन बाध्यमानत्वात्सत्वेनाप्यनिर्वचनीयं एतदुक्तं भवति सदसद्विलक्षणमज्ञानमिति असद्विलक्षणमित्युक्ते सत्यतिव्याप्तिः अत उक्तं सद्विलक्षणमिति तावत्युक्ते असत्यतिव्याप्तिरत उक्तमसद्विलक्षणमिति अभ्युपत्येदमुक्तं असतो निःस्वरूपत्वेनातिव्याप्तिशंकाऽनवकाशादसन्नाम किंचिदस्ति चेदसत्वव्याघातः नास्ति चेत्कुत्रातिव्याप्तिः कथं तर्ह्याचार्योक्तिः सदसद्भ्या

॥ ज्ञाननिवर्त्यं ॥

उपादानत्वायोगात्४॥ वेदांत्यभिमताज्ञानस्य सिद्धत्वात् भवदुक्तं यत्किंचित्४॥ एकदेश्यभिमतं५॥ शशशृंगादौ२॥

ब्रह्मवदाचरतीति५॥

मनिर्वचनीयमितिशिष्यबुद्धिसमुत्पादनमात्रेतात्पर्यादाचार्याणां अहृदयवाचामहृदयमेवोत्तरमितिन्यायेनवादिनिराकरणमात्रतात्पर्याद्वा असद्विलक्षणोक्तिः कालयाबाध्यत्वंसत्त्वंतद्भिन्नत्वमनित्यत्वमितिफलितार्थः नन्विदंलक्षणंकार्यप्रपंचेप्यस्तीत्यतिव्याप्तिः नैषदोषः अनादित्वेसतीतिविशेषणात् नन्वेवमपीश्वरादावतिव्याप्तिस्तस्यानादित्वेनकल्पितत्वेनचोक्तलक्षणसद्भावात् तदुक्तं श्रुत्या जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीति जीवईशोविशुद्धाचित्तस्याभेदस्तयोर्द्वयोः अविद्यातच्चितोर्योगः षडस्माकमनादयइतिसांप्रदायिकवचनात् मायाभासेनजीवेशौकरोतीतिश्रुतत्वः कल्पितावेवजीवेशौताभ्यांसर्वप्रकल्पितमितिविद्यारण्योक्तेश्चातिव्याप्तिर्वज्रलेपायितेत्यत आह ज्ञाननिवर्त्यमिति यतोज्ञानमज्ञानस्यैवनिवर्तकमिति पंचपादिकाचार्यैरुक्तत्वादज्ञानमेवज्ञाननिवर्त्यं तथाचायमर्थः संपद्यतेसद्विलक्षणमनादिज्ञाननिवर्त्यमज्ञानमिति अथवा अनाद्युपादानंज्ञाननिवर्त्यमज्ञानंप्रा

अहंब्रह्मनजानामीत्यनुभवात् तेध्यानयोगानुगता अपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिश्रुतेः अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनइतिस्मृतेश्च तच्चाज्ञानंद्विविधम् मायाविद्याभेदात् शुद्धसत्त्वप्रधानंसन्मायेत्युच्यते मलिनसत्त्वप्रधानंसदविद्येत्युच्यते जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीतिश्रुतेः ॥१॥ २। घभावेतिव्याप्तिपरिहारायोपादानमिति

स्वगतरूपश्रुतिउपादाने१

घटादावतिव्याप्तिनिवारणाय अनादीति ब्रह्मण्यतिव्याप्तिवारणाय ज्ञाननिवर्त्यमित्युक्तंभवति ज्ञानाभावोऽज्ञानमित्याशंकानिरासार्थमाह भावरूपमिति अज्ञानसद्भावेप्रत्यक्षादिप्रमाणान्युपन्यस्यति अहमित्यादिना देवश्चासावात्माचदेवात्मातस्यशक्तिंस्वगुणैःसत्त्वादिभिर्निगूढांब्रह्मध्यानपरायणाः ब्रह्मविदः अपश्यन्नितियोजना तेनावृतत्वेनमुह्यंतिसंसरंति शास्त्राचार्यप्रसादजनितज्ञानेनयेषामज्ञानंनिवृत्तंतेषामहंब्रह्मास्मीतिज्ञानंपरंब्रह्मप्रकाशयतीत्युत्तरेणान्वयः ज्ञानाभावस्यब्रह्मस्वरूपावरकत्वायोगादनिच्छतापितार्किकबलीवर्देनानयास्मृत्याभावरूपमज्ञानमेष्टव्यं एतेनसत्त्वरजस्तमोगुणात्मकमचेतनंस्वतंत्रंपारमार्थिकंपरिणामिनित्यंप्रधानमितिसांख्यमतंप्रत्युक्तं ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनइतिभगवद्वचनविरोधात् ननुबुद्धिधर्मीज्ञानविषयतयाभगवद्वचनमन्यथासिद्धमितिवाच्यं बुद्धिधर्मीज्ञानस्यमिथ्याज्ञानरूपत्वेनचैतन्यावरकत्वायोगादज्ञानेनावृतंज्ञानमित्यावरकत्वस्मरणात् अचेतना

भ्रांतिज्ञान१

अभावस्यावरकत्वनास्ति३॥

स्वंप्रमाणज्ञानंयदाश्रयंयद्विषयकंप्रमाणज्ञानंतदाश्रयंतद्विषयकमज्ञानंनिवर्तयति

नस्यरथादेश्चेतनाधिष्ठितस्यैव प्रवृत्तिदर्शनेन प्रधानस्य स्वातंत्र्यायोगात् परिणामिनः सावयवतया क्षीरादेरनित्यत्वदर्शनेन प्रधानस्य नित्यत्वकल्पनायां मानाभावाद्दृष्टपूर्वकत्वाददृष्टकल्पनायाः एतेन मिथ्याज्ञानमेवाज्ञानमिति प्रत्युक्तं तस्मात्सर्वोपादानमनाद्यनिर्वचनीयं भावरूपमज्ञानमेष्टव्यं एवंच सत्यद्वैतश्रुतिर्नविरुध्यते सांख्यादिस्मृतेरेवश्रुतिविरुद्धत्वेनाऽप्रमाणत्वात् चकारोऽनुक्तानुमानप्रमाणसमुच्चयार्थः तथाहि विवादगोचरापन्नं प्रमाणज्ञानं स्वसमानविषयस्वसमानाधिकरणानादिविरोधिनिवर्तकं प्रमाणज्ञानत्वात् शुक्तिज्ञानवत् नच प्रागभावेनार्थान्तरत्वं प्रागभावस्याप्रमाणिकत्वात् अस्तु वा प्रागभावस्तथापि तस्य समानाश्रयत्वेपि समानविषयत्वासंभवेन तन्निवारणादज्ञानस्यैव सविषयत्वात् नचानुमित्यादेरज्ञाननिवर्तकत्वानंगीकारेणानुमानस्य तत्र व्यभिचार इति वाच्यं असत्वापादकस्यैवाज्ञाननिवृत्तेरेवानुमित्यादिनाभ्युपगमेन तदसंभवात् अथवा पक्षहेत्वोरपरोक्षत्वं विशेषणं देयं नचैवं दृष्टान्ते साध्यवैकल्यं शुक्तिज्ञानेन तन्निवृत्तेरनुभवसिद्धत्वात् ननु शुक्त्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाज्ञानं तदन्यद्वा नाद्यः इदानीं ब्रह्मसाक्षात्काराभावेन तन्निवृत्त्योक्तदोषः स्यादेव

अथवाऽज्ञानस्य शक्तिर्द्विविधा ज्ञानशक्तिः क्रियाशक्तिश्चेति रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानशक्तिः सत्त्वात्संजायते ज्ञानं इति स्मृतेः सत्त्वेनानभिभूते रजस्तमसी क्रियाशक्तिः क्रियाशक्तिर्द्विविधा आवरणशक्तिर्विक्षेपशक्तिश्चेति रजःसत्त्वाभ्यामनभिभूतं तमः ॥ ६ ॥

न द्वितीयः अनंताज्ञानकल्पनायां गौरवप्रसंगादिति चेन्नैष दोषः शुक्त्यवच्छिन्नचैतन्यावरकाज्ञानं मूलाज्ञानमेव इदानीं ब्रह्मसाक्षात्काराभावेन तन्निवृत्त्यभावेप्यज्ञानं नष्टमित्यनुभवानुरोधेन शुक्तिज्ञानेन तत्कृतावरणनिवृत्तेः संभवान्नोक्तदोषः अथवाऽज्ञानं द्विविधं मूलाज्ञानं तूलाज्ञानं च ब्रह्मावरकमज्ञानमाद्यं विषयचैतन्यावरकमज्ञानं तूलाज्ञानं तच्च प्रतिविषयं नाना शुक्त्यवच्छिन्नचैतन्यावरकमज्ञानं यावद्विषयभावि एकं एव शुक्तिज्ञानेन तत्कृतमावरणमेव निवर्ततेनतु तदज्ञानं ज्ञानेनाज्ञानं निवृत्तमित्यावरणनिवृत्तिरेवानुभूयते इति केचित् वस्तुतस्त्वेकैकस्मिन्विषयेऽनंताज्ञानानि मूलाज्ञानपरतंत्राणि तिष्ठंति एकैकज्ञानेनैकैकं निवर्तते ज्ञानेनाज्ञानं निवृत्तमित्यनुभवस्य सर्वसंमतत्वेनावरणनिवृत्तिविषयतया संकोचे मानाभावात् नचाज्ञानानंत्याभ्युपगमे कल्पनागौरवमिति वाच्यं प्रमाणवतो गौरवस्यादोषत्वात्तस्माद्दृष्टान्ते साध्यसंभवात् अनवद्यं अज्ञानं विभजते तस्येति द्वैविध्यमाह मायेति एकमेवाज्ञानं सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽवि

शुक्तिज्ञानाज्ञानयोर्भिन्नविषयकत्वेनभिन्नाधिकरणत्वेनचसाध्यवैकल्यमितिशंकांशुक्त्यवच्छिन्नचैतन्यस्यांतःकरणोपहितचैतन्याभिन्नतयातयोःसमानविषयकत्वेनसामानाधिकरण्येनचास्तिनिवर्त्यनिवर्तकभावइत्यभिप्रायेणोत्तरम्॥१०

कार्यजननसामर्थ्यं४॥ यत्पात्रवत्५॥

द्याचेतिद्विधाजातमित्याह शुद्धेतिरजस्तमोभ्यामतिरस्कृतंशुद्धंतद्विपरीतंमलिनंतत्रश्रुतिप्रमाणमाह मायाचेति स्वयमेवयथोक्तप्रकारेणमायाविद्याचेतिद्विधाभवतिताभ्यांमायाविद्याभ्यामेकमेवचैतन्यंजीवेश्वररूपेणद्विधाजातमित्याह जीवेशाविति आभासेनप्रतिबिंबरूपेणेत्यर्थः अयंभावः मायाप्रतिबिंबितंचैतन्यमीश्वरः अविद्याप्रतिबिंबितंचैतन्यंजीवइतिप्रकारांतरेणमायाविद्याभेदंचवक्तुमज्ञानस्यशक्तिंविभजते अथवेत्यादिना कार्यानुकूलकारणनिष्ठसामर्थ्यंशक्तिः ज्ञानशक्तिंव्युत्पादयति रजइति अनभिभूतमतिरस्कृतंइदंकुतोवगम्यते इत्यत आह सत्वादिति आवरणशक्तिमाह रजइति तत्रभाष्यकारसंमतिमाह तदुक्तमिति चमसवदऽविशेषादित्यत्रपूर्वपक्षेऽजामेकांलोहितशुक्लकृष्णामित्यस्याजामंत्रस्यव्याख्यानावसरेकृष्णशब्देनतमोगुणः प्रतिपाद्यतेनतमोगुणस्यावरणात्मकत्वादिति तस्यावरकत्वंप्रतिपादितंभाष्यकारेणातोयथोक्तलक्षणावरणशक्तिरित्यर्थः तस्यलक्षणमाहसाचेति पूर्वंस्वरूपंव्युत्पादितंइदंतुलक्ष

आवरणशक्तिः तदुक्तंकृष्णंतमः आवरणात्मकत्वादिति साचनास्तिनप्रकाशत इतिव्यवहारहेतुः तथाचोक्तम्। नभातिनास्तिकूटस्थः
इत्यापादनमावृतिरिति तमःसत्वाभ्यामनभिभूतंरजोविक्षेपशक्तिः रजसोलोभ एवचेतिस्मृतेः लोभादीनांविक्षेपकत्वंप्रसिद्धमेवसाच
आकाशादिप्रपंचोत्पत्तिहेतुः उक्तंच॥ विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंजगत्सृजेदिति तथाचपूर्वोक्ताऽज्ञानंआवरणशक्तिप्रधानंसद
विद्येत्युच्यते ज्ञानशक्तिप्रधानंसन्मायेत्युच्यते एतदभिप्रायास्मृतिरपि॥२१

णमितिविशेषः अर्थोनास्तिनप्रकाशतइतिव्यवहारकारणमज्ञानशक्तिरिति तल्लक्षणंज्ञेयंतत्रसंमतिमाह तथाचोक्तमिति कूटवन्निर्विकारेणतिष्ठतीतिकूटस्थः परमात्मासनास्तिनप्रकाशतइत्यापादनमापादनकारणमावृतिरावरणशक्तिरित्यर्थः विक्षेपशक्तिमाह तमइति ननुरजसोलोभहेतुत्वमुदाहृतस्मृतावगम्यते नतुविक्षेपहेतुत्वमित्याशंक्याह लोभादिनेति आदिशब्देनमदमात्सर्यादयोग्राह्याः विक्षेपशक्तेः कृत्यमाह साचेति सजातीयविजातीयव्यावर्तकत्वादिदमेवास्यालक्षणंतत्रसमतिमाह उक्तंचेति समष्टिव्यष्टिसूक्ष्मशरीरंलिंगं आदिशब्देनपंचीकृतभूतानिगृह्यंते ननुभवत्वेवंप्रकृतेकिंमायातमित्यत आह तथाचेति तच्चवैपरीत्येकिंविनिगमकमितिवाच्यंस्वाश्रयाऽव्यामोहकरीमायास्वाश्रयव्यामोहकरी अविद्येतिमायाविद्यालक्षणप्रसिद्धेः आवरणशक्तेर्मोहकारित्वात् तत्प्रधानमज्ञानमविद्येत्युच्यते विक्षेपा

विक्षेपशक्तिप्रधानंइतिवापाठः६॥

एकविधमेवलक्षणंकर्तव्यं२॥

फलव्याप्त्यभावात्७॥ तथाचेश्वरेआवरणशक्तिर्नास्तीतिभावः९॥

दिशक्तेरन्यथात्वात्तत्प्रधानमज्ञानंमायेत्युच्यते तथाचतद्वैपरीत्यमितिभावः ननु नरत्यविद्यामितिश्लोके घटकलशादिवन्मायाविद्याशब्दयोः पर्यायत्वमवगम्य
ते तत्कथंतयोर्भेदसिद्धिरित्यत आह एतदभिप्रायास्त्रनिरपीति अत्राप्यावरणशक्तिंनिमित्तीकृत्याविद्याशब्दः प्रकृतिंव्युत्पादयति विक्षेपादिशक्तिंनिमित्तीकृ
त्यमायाशब्दोपीति एषोभिप्रायो यस्याः सा एतदभिप्राया सा तथोक्ता योगो ब्रह्मसाक्षात्कारोस्यास्तीति योगी ब्रह्मनिष्ठ इतियावत् यस्मिन्सर्वान्तर्यामिणि सर्वाधिष्ठाने
वासुदेवे हृदि अंतःकरणे निवेशिते ऽहंब्रह्मास्मीति साक्षात्कृते सति कार्याकारेण विष्कृतामावरणशक्तिप्राधान्येनाविद्याशब्दवाच्यां विक्षेपशक्तिप्राधान्येन मायापदवा
च्यां प्रकृतिं तरति नाशयति तस्मै नमः इति संबंधः कीदृशाय नमः विद्या चैतन्यमात्मा यस्य स तथोक्तः तस्मै पुनः कस्मै अमेयाय तनमेयोऽमेयः अप्रमेयायेत्यर्थः
ननु पूर्वं साक्षात्कारविषयत्वं ब्रह्मणः प्रतिपादितं इदानीमप्रमेयत्वमुच्यते तथाच पूर्वोत्तरव्याघातः उच्यते वृत्तिविषयत्वमुक्तं साक्षात्कृते सतीति अप्रमेया
येति चैतन्याविषयत्वमुच्यते यतो वाचो निवर्त्तंते अप्राप्य मनसा सह तं त्वौपनिषदं पुरुषं पृच्छामि इत्यादिश्रुतिभ्यः अतो न व्याघात इत्यर्थः मायाविद्याविभाग

नरत्यविद्यां विनतां हृदि यस्मिन्निवेशिते योगी मायाममेयाय तस्मै विद्यात्मने नमः इत्येवंरूपा द्रष्टव्या एवं च मायोपहितचैतन्यं ईश्वरो
जगत्कारणमंतर्यामीत्युच्यते स एव तत्पदवाच्यार्थः ॥ २९

निरूपणफलमाह एवंचेति एष सर्वेश्वर एष सर्वज्ञ एषोंतर्यामी एष योनिः सर्वस्ये
त्यादिश्रुत्योच्यते इति शेषः ततः किं तत्राह स एवेति स ईश्वरः तत्त्वमसिवाक्ये तत्पदस्य वाच्यार्थः नन्वविद्यायाः कुत्र तदुपयोग इत्याशंकायां सुषुप्तस्थान एकीभूतः
प्रज्ञानघन एवानंदमयो ह्यानंदभुगित्यादिश्रुत्या ऽविद्योपहितचैतन्यं जीवः प्राज्ञ इति चोच्यते स एव त्वंपदस्य वाच्यार्थः इत्यभिप्रेत्य प्रसंगाज्जीवस्वरूपं व्युत्पादयति
अविद्योपहितमिति उक्तश्रुत्येति शेषः उक्तेऽर्थे वृद्धसंमतिमाह तदुक्तमिति सच्चिदानंदब्रह्मप्रतिबिंबसमन्वितास्तत्त्वरजस्तमोगुणात्मिका प्रकृतिरेकैव अजा
मेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः ततो विद्रावयति इमाः जज्ञानाऽन्यद्युष्माक
मंतरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति इत्यादिश्रुतिभ्यः नन्विन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतौ मायाभिरिति बहुवचनसाम
र्थ्याल्लिंगादज्ञानस्य नानात्वावगमात्कथमेकत्वमवधार्यते न चाजामंत्रेण तदवगम्यते इति वाच्यं श्रुत्यंतरविरोधे तदधारणायोगात् न च परस्परविरोधादु

हेलोकाः यूयं तं न विदाथ जानीथ तं कं यः इमा अनेकयोनिजजातान् उत्पादितवान् तत्राज्ञाने को हेतुः यद्यस्मात्कारणात् युष्माकं तेन ब्रह्मणा सहांतरं भिन्नत्वं बभूव अत एव भवंतश्चरंति पुनः पुनर्जन्ममरणादिकं प्राप्नुवंति नीहारेण मोहाधकारेण
प्रावृताः नित्यमात्मानं त्यक्त्वा अनित्यं परं देहं आत्मानं मन्यमानाः अत एव जल्प्याः निंद्याः अत एव असुतृप उदरभरणमात्रेप्सवः उक्थशासः वेदोक्तविधिनिषेधरज्जुभिर्बद्धः इत्यर्थः ॥३॥

70

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादित्ययं न्यायः ३॥

भयोरप्रामाण्यापत्तिरिति वाच्यं बहुवचनसामर्थ्याद्ज्ञाननानात्वे निश्चितेऽजामंत्रस्याज्ञानसमष्टिपरत्वोपपत्तेस्तस्मात्प्रकृतिरेकैवेत्यवधारणमनुपपन्नमिति मैवं श्रौतार्थस्य बलवत्त्वात्प्रकृतेरेकत्वावधारणोपपत्तेः तथा हि अजामंत्रे एकामिति श्रुत्या एकवचनसामर्थ्येन च लिंगेन प्रकृतेरेकत्वं निश्चीयते इंद्रो मायाभिरित्यस्मिन्मंत्रे बहुवचनसामर्थ्याद्ज्ञाननानात्वमवगम्यते तत्र श्रुतिलिंगयोः श्रुतेः बलीयस्त्वाच्छ्रौतार्थप्रकृत्येकत्वमभ्युपगंतव्यं अन्यथा न्यायविरोधापत्तेः किंच इंद्रो मायाभिरित्यत्र केवललिंगाद्ज्ञाननानात्वमवगम्यते अजामंत्रे श्रुतिलिंगाभ्यामज्ञानैकत्वमिति तदेवावश्यमभ्युपगंतव्यं तर्हीं इंद्रो मायाभिरिति मंत्रस्याप्रामाण्यप्रसंग इति चेन्न अर्थांतरत्वेन प्रामाण्योपपत्तेः तथा हि इंद्रो मायाभिरित्यत्र मायाशब्देन प्रज्ञाविशेषो मिथ्याभिमानो वाभिधीयते तेन तथेंद्रः परमात्मा तैरन्यतरैर्वा हिरण्यगर्भादिभिर्नानारूपः सन्चेष्टते इत्यर्थांतरत्वेन प्रामाण्यमुपपद्यते नाऽज्ञाननानात्वप्रतिपादने तात्पर्यं मंत्रस्य अ

कार्यविद्या२ सदेह३

अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते तदुक्तं तमोरजस्सत्त्वगुणा प्रकृतिर्द्विविधा च सा सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इत्येवमादयः श्रुतयः उक्ताभिप्रायाः द्रष्टव्याः ॥२॥ यद्वा यथा एक एव देवदत्तः क्रियानिमित्तवशेन पाठकः पाचकः इति व्यपदिश्यते ॥

ऽजामंत्रस्य त्वऽज्ञानैकत्वप्रतिपादने तात्पर्यादर्थांतरत्वायोगाच्चाज्ञानमेकमेव तस्मात्प्रकृतिरेकैवेत्यवधारणमुपपन्नं सा सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्याभेदेन द्विविधा तद्वैचित्र्यान्मालिन्यवैचित्र्यादनेकधा अनेकप्रकाराऽविद्या इति शेषः अयं भावः शुद्धसत्त्वप्रधाना माया एकैव तदुपहित ईश्वरः मलिनसत्त्वप्रधाना अविद्या मालिन्यवैचित्र्यादनेकधा तदुपहितो जीवोपि तथैव अस्मिन्पक्षे नानाजीवः उक्तार्थः श्रुत्यंतरसंमतमित्याह अस्मादिति अस्मादुक्तान् मायी मायोपाधिकः परमात्मा एत कुत्यादिप्रमाणेनावगम्यमानं विश्वमाकाशादिब्रह्मांडांतं जगत्सृजते उत्पादयति तस्मिन्सृष्टेऽन्योऽविद्योपाधिकः मायया पूर्वोक्तया देहादिष्वहंममेत्यभिमानेन संनिरुद्धो बद्धः प्रकृतिर्जगदुपादानकारणं मायिनं मायोपाधिकं विद्यादित्युभयत्र संबध्यते अयं भावः मायोपाधिकः परमात्मा स्वोपाधिमायाप्राधान्येन जगदुपादानकारणं स्वप्राधान्येन निमित्तमिति इममेवार्थमग्रे व्युत्पादयिष्यति अज्ञा

दाशाः कैवर्ताः ७॥ दासाभृत्याः ७॥ कितवाः द्यूतकृतो धूर्ताः ७॥

नस्यैकत्वेपिमायाऽविद्याभेदं ततोजीवेश्वरभेदंचोक्त्वेदानीमज्ञानमेकमेवमायाऽविद्याभेदोनास्ति बिंबप्रतिबिंबभावेनजीवेश्वरयोर्भेदः जीवोप्येकएवेत्यभिप्रेत्यपक्षांतरमाह यद्वेति व्यपदिश्यतेइति तथाचमायाविद्याशब्दौपर्यायवंतौनमायाविद्ययोर्भेदइत्यर्थः कथंतर्हिजीवेश्वरभेदस्तत्राह तथाचेति अविद्यायाप्रतीयमानमविद्याप्रतिबिंबितं परमात्मनोनीरूपत्वेनसूर्यादिवत्प्रतिबिंबायोगात् अविद्योपाधिकमविद्योपहितंनचतत्रप्रमाणाभावइत्याह आभासएवचेत्यादिना द्वितीयेस्थितं मंशोनानाव्यपदेशादन्यथाचापिदाशदासकितवादित्वमधीयतएके तत्रपूर्वाधिकरणेजीवेश्वरयोरुपकार्योपकारकभावउक्तः स किंस्वामिभृत्ययोरिवाहोस्विदग्निविस्फुलिंगयोरिवेतिसंशयः तत्रानियमइत्येकः पूर्वपक्षः द्वितीयस्तुभेदश्रुत्यनुरोधात् स्वामिभृत्यवदेवजीवपरयोरुपकार्योपकारकभावइतिप्राप्ते इदमाह परस्यांशइवांशआभासरूपोजीवः कुतः नानाव्यदेशात् यआत्मनितिष्ठन्नित्यादिना अन्यथाचापिपरमात्माभिन्नश्चाजीवः ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमेकितवाउततत्त्वमस्यादिश्रुतिभिरभेदप्रतिपादनात् जीवेश्वरयोरत्यंतैक्ये अहरहः संध्यामुपासीतगृहस्थः सदृशीं

तथाएकमेवाज्ञानंविक्षेपावरणशक्तिनिमित्तभेदेनमायाऽविद्येतिचव्यपदिश्यते तथाच अविद्याप्रतिबिंबितंचैतन्यंजीवः अविद्योपहितंचैतन्यमीश्वरः आभासएवच ॥

१भार्यामुपेयात् ब्राह्मणोनहंतव्यः मिश्रीभावः गुर्वंगनांनोपगच्छेदित्यनुज्ञापरिहारयोरानर्थक्यप्रसंग इतिचेत्वदेहाभिमानादर्थत्वोपपत्तेस्तयोः नन्वेवमपिकर्मफलव्यतिकरः स्यादिति चेन्नजीवस्यपरिच्छिन्नत्वान्नकर्मफलव्यतिकरः जीवस्यपरमात्माभिन्नतयाकथंपरिच्छिन्नत्वमित्याशंक्याह सूत्रकारः आभासएवचेति जलादिप्रतिबिंबितसूर्यादिवदाभासएवप्रतिबिंबरूपएवजीवः कस्तत्रप्रतिबिंबोपाधिरितिचेत् अत्रकेचित् अंतःकरणविशिष्टकर्तृत्वादिसंसारस्यानुभूयमानत्वात् कार्योपाधिरयंजीवइतिवचनाच्च अंतःकरणंप्रतिबिंबजीवोपाधिरितिवदंति अपरेतु अंतःकरणस्याज्ञानकार्यतयास्वातंत्र्यायोगेनजीवपरमात्मभेदकत्वायोगात् नांतःकरणंजीवोपाधिः किंत्वज्ञानंस्वातंत्र्यात् तदपिनानातत्प्रतिबिंबोजीवः सोपिनानातदुपाधेरज्ञानस्यनानात्वात् तथाचब्रह्मण्यारोपितानामज्ञानानांपरिच्छिन्नतयातत्प्रतिबिंबरूपाणांजीवानामपिपरिच्छिन्नत्वादितरेतरव्यावृत्तत्वान्नकर्मफलव्यतिकरः इतिसूत्रार्थः। इतिनानाजीववादिनामभिप्रायमाहुः अन्येतुजीवेश्वरविभाजकोपाधिरज्ञानमेवतस्यस्वातंत्र्यात् तदप्येकमेवतत्प्रतिबिंबो

अभिमानत्वेसतिजीवस्यएकत्वात् ६॥

अपरोक्षज्ञान४॥

जीवउपाधेरेकत्वात्सोप्येकएव अज्ञानैक्ये प्रमाणं दर्शितं आभासएवचेत्येकवचनसामर्थ्यात् च ननुजीवैक्ये बंधमोक्षव्यवस्था कथमित्थमंतःकरणनानात्वे प्रमातॄणांनानात्वं नत्वज्ञानेनैकस्मिन्प्रमातरिमुच्यमाने तद्रहितःप्रमाता बद्धइति बंधमोक्षव्यवस्था संभवति स्यादेतन्न कोयंमोक्षोनाम अविद्यानिवृत्तिरिति चेन्न तावत्कार्याविद्यानिवृत्तिमोक्षः सकलभ्रांतिज्ञाननिवृत्तेरसंभवात् मूलाविद्यासत्त्वेन पुनर्भ्रांतिज्ञानोदयसंभवात् यत्किंचिद्भ्रांतिज्ञाननिवृत्तेरपुरुषार्थत्वात् नन्वज्ञानगतावरणशक्तिरविद्या तन्नानात्वेनयस्य प्रमातुस्तत्त्वज्ञानमुत्पन्नं तस्य स्वसंसारहेतुभूताविद्यानिवृत्तिर्मोक्षः यस्य तन्नोत्पन्नं तस्य बंध इति बंधमोक्षव्यवस्थोपपद्यते इति चेन्न नानाजीववादप्रसंगात् तथाहि अविद्यायानानात्वेन बंधहेतुतया तदाश्रयजीवभेदस्यावश्यकतया नानाजीववादप्रसंगः अन्यथा बंधमोक्षव्यवस्था न स्यात् प्रतिज्ञाविरोधश्च अस्तु तर्हि मूलाविद्यानिवृत्तिर्मोक्ष इति चेन्न शुकमुक्तौ सर्वमुक्तिप्रसंगात् न च जीवैक्ये सर्वमुक्त्युपपादनमनुपपन्नमिति वाच्यं हिरण्यगर्भशुकवामदेवादीनां मुक्त्यभ्युपगमेनास्मदादीनां संसारानुपलंभप्रसंगात् तदनभ्युपगमे तत्प्रतिपादकशास्त्रस्याप्रामाण्यप्रसंगा

जीवएकेव२ एकत्ववादेसर्वशब्दार्थासंभवात्२॥

## अत एवोपमा सूर्यकादिवत् ॥

त् किंच यावदधिकारमवस्थितिराधिकाणामित्यत्रोपासनेनेंद्रादिपदं प्राप्तानामधिकारिपुरुषाणां निमित्तवशेन जन्मांतरसत्त्वेपि तत्त्वज्ञानप्रतिबंधाभावे नाधिकारावसाने मोक्षोऽभ्युपेयते एकजीवपक्षे तत्सर्वं दत्तजलांजलिः स्यात् अपि च साक्षात्कृततत्त्वो गुरुः शिष्याय तत्त्वमुपदिशतीत्यभ्युपगंतव्यं तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन इत्यादिश्रुतिस्मृतिभ्यः तत्र चैकजीवपक्षे उत्पन्नब्रह्मसाक्षात्कारस्य गुरोरभावेन गुरुशिष्यव्यवस्थाया असंभवाद्निर्मोक्षः प्रसज्येत किंच कर्मकांडज्ञानकांडयोरेकजीवपक्षेऽधिकारिभेदाभावेनाप्रामाण्यप्रसंगः तस्मादज्ञानमेकं तदुपाधिको जीवोप्येक एवेत्यनुपपन्नमिति अत्र ब्रूमः अजामेकां मायां तु प्रकृतिं विद्यात् नीहारेण प्रावृताः अज्ञानेनावृतं ज्ञानं मम माया दुरत्यया विभेदजनकेऽज्ञाने इत्यादिश्रुतिस्मृतीतिहासपुराणेषु लाघवानुगृहीतश्रुतिलिंगाभ्यामविद्यैक्येनिश्चितेन तदुपाधिको जीवोप्येक एवेति निश्चीयते ननु बंधमोक्षव्यवस्थानुपपत्तिरिति वाच्यं अज्ञस्य बंधो ज्ञानिनो मोक्षः इति व्यवस्थासंभवात् हिरण्यगर्भादीनां मुक्तिप्रतिपादकशास्त्रस्य प्रवृत्तिकरत्वेन स्वार्थे तात्प

प्रकृतिप्रत्ययोः२॥ तयोर्ब्राह्मणादिवर्णाश्रमयुक्ताधिकारिभेदसापेक्षप्रवृत्तेः४॥

अधिकारिणामीश्वराज्ञायां वर्तमानानां व्यासादीनां यावदधिकारमधिकारकर्मयावत्तावदेवावस्थितिरवस्थानं न तु परिशिष्टादिति॥ शा०॥ सू०॥१०॥ कर्मोपासनाव्यावहारकस्यैव ३॥ कर्मज्ञानकांडरूपस्य ५॥

र्याभावात् नच महानुभावानां तेषां तत्वज्ञानाभावेप्यस्मदादीनां तत्वज्ञानोत्पत्तौ काप्रत्याशेति वाच्यं सूक्ष्म्यादिविशिष्टप्रचितत्वेन तेषां ज्ञानाभावेपि विवेकवैराग्यसंपन्नानामस्मदादीनां तत्वज्ञानोत्पत्तौ बाधकाभावात् स्वर्गकामोयजेतेत्यादिवाक्यप्रामाण्यात् स्वर्गोद्देशेन यागादिप्रवृत्तिवद्द्रष्टव्यः श्रोतव्य इत्यादिप्रामाण्यात् ज्ञानोद्देशेन श्रवणादिषु प्रवृत्त्युपपत्तेः नच क्रममुक्त्युपासनाशास्त्रविरोधः व्यावहारिकप्रमातृभेदविषयतया स्वप्नवदविरोधोपपत्तेः नन्वेवं सति पूर्वकल्पे दहराद्युपासनया ब्रह्मलोकंगतानां तत्वसाक्षात्कारेण ज्ञाननिवृत्ते मोक्षस्य संपन्नत्वेनास्मदादीनां संसारानुपलब्धिप्रसंगः इति चेन्मैवं स्वप्नवत्तदुपपत्तेः नहि स्वप्नावस्थायां स्वभ्रांतिकल्पितप्रमातृमुक्तिदर्शनेन बंधदर्शनेन वा स्वस्य मुक्तिर्बंधो वा भवति न च शास्त्रस्याप्रामाण्यं एतेनाधिकारिभेदाभावात् कर्मज्ञानकांडप्रामाण्यं प्रत्युक्तं नच गुरुशिष्यव्यवस्थानुपपत्तिः परोक्षज्ञानिनोपि तत्वनिष्ठस्योपदेष्टृत्वोपपत्तेः अथवा परमेश्वरो वा गुरुशरीरमाविश्य साधकमनुगृह्णातीति व्यवस्था न विरुध्यते तस्मादेक एव जीवः किंच आभास एव च स एव तु कर्मानुस्मृतिशब्दविधिभ्यः॥ सता सोम्य तदा संपन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तः प्रा

ब्रह्म मिलितः
यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः॥

१। लिंगत्र— ज्योतिः सू. आवो विवस्वाने को पि तत्र न.ल्पात्र गा. ना भिन्ना आपो अनुग. छन्बहु. धा. क्रियते एवमयं आत्मा देवः स्वप्रकाशोऽतः नित्य एको पि भिन्नेषु क्षेत्रेषु अनुगच्छन्नुपाधिनाभेदरूपः क्रियते इति योजना।१

ज्ञेनात्मनान्वारूढ इत्यादिष्वेकवचनसामर्थ्याज्जीवैक्यमभ्युपगंतव्यं नन्वेवमिमाः सर्वाः प्रजाः सतिसंपद्य न विदुः वीतरागभयक्रोधा मन्मया मामुपाश्रिताः यावदधिकारमवस्थितिराधिकारिकाणामित्यादिषु बहुवचनसामर्थ्याज्जीवबहुत्वं किं न स्यादिति चेन्नैतदेवं लाघवात्तदैक्योपपत्तेः तस्मादेक एव जीव इति वदंति अत एवेति तृतीये स्थितं तस्यानंतोपि परस्योभयलिंगं सर्वत्र हि जीवः सुषुप्तादौ येन ब्रह्मणा संपन्नो भवति तत्किं निर्विशेषं सविशेषमुभयलिंगं वान्यतरलिंगं वा अन्यत्र लिंगमित्यत्रापि सविशेषलिंगं वा निर्विशेषलिंगं वेति संशयः तत्र सत्यकामः सत्यसंकल्पः अस्थूलमनण्वह्रस्वमित्याद्युभयविधश्रुतिसंभवात् उभयलिंगं ब्रह्मेति प्राप्तेऽभिधीयते नोभयलिंगं ब्रह्म एकस्य वस्तुनो द्विरूप्यायोगात् नह्येकमेव सविशेषं निर्विशेषं च भवतीति युक्त्या वक्तुं शक्यं अस्तु तर्ह्युपाधितः सविशेषं स्वभावतो निर्विशेषं चेत्युभयलिंगं ब्रह्मेति चेन्नैतदेवं नह्युपाधिनोपि स्वभावतोपि निर्विशेषं सविशेषं भवति विरोधात् सर्वत्र किंतु पारमार्थिकं नि र्विशेषस्वरूपं सविशेषस्वरूपं मायामयं तथा च श्रुतिस्मृती भवतः अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्य

योजीवः सुप्तः पुनः स एवोत्तिष्ठति तु शब्दोऽन्यं वारयति कुतः कर्मानुस्मृतिशब्दविधिभ्यः कर्माधिष्ठितस्य शेषोऽध्ययनादिः अनुस्मृतिः पूर्वदिवसभोजनादेः स्मरणं शब्दः प्रतिन्यायं प्रतियोन्यद्रवतीत्यादिः विधिर्ज्योतिष्टोमेनेत्यादिः एभ्यो हेतुभ्यः सुप्तस्यैवोत्थानमिति॥ शा०॥ सू०॥९॥

ने स यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते इत्यादि एतेन सविशेषमेव ब्रह्म न निर्विशेषं सत्यकामत्वादिश्रुतेरिति प्रत्युक्तं ननु ब्रह्मणो निर्विशेषत्वे सगुणवाक्यानां सृष्ट्यादिवाक्यानां वा का गतिरिति चेन्न तेषामन्यपरत्वेन तत्र तात्पर्याभावात् तथाहि सर्वे वेदा यत्पदमामनंतीति शास्त्रेण सर्ववेदप्रतिपाद्यत्वमवगम्यते तत्र कर्मवाक्यानि स्वप्रतिपाद्ययागा।द्यनुष्ठानेन सत्त्वशुद्धिद्वारा ब्रह्मसाक्षात्कारोत्पादनेन तत्र पर्यवस्यंति उपासनावाक्यानि तत्तद्गुणविशिष्टोपासनविधानेन चित्तैकाग्र्यद्वारा ब्रह्मणि पर्यवस्यंति तत्त्वमस्यादिवाक्यानि साक्षाद्ब्रह्मणि पर्यवस्यंति तदुक्तं शुद्धिद्वारा कर्मकांडस्य वाक्यं चित्तैकाग्र्यद्वारतो ध्यानवाक्यं साक्षादेतत्तत्त्वमस्यादिवाक्यं सत्यानंदे स्वप्रकाशे प्रयातीति सृष्टिप्रलयादिवाक्यानि तु अध्यारोपापवादन्यायेन सृष्ट्यादिदर्शनस्य ब्रह्मज्ञानोपायतया ब्रह्मणि पर्यवस्यंति तदुक्तमाचार्यचरणैः मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा उपायः सोऽवतारायनास्ति भेदः कथंचनेति ततश्च सगुणोपासनसृष्ट्यादिप्रतिपादिकवाक्यानां ब्रह्मज्ञानोपा

बुद्ध्युत्तये १

क्षेत्रेष्वेवमजो यमात्मा एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवदित्यादिश्रुतिसूत्रयोः सत्त्वात् ॥

यतोपदर्शनमुखेन निर्विशेषे ब्रह्मणि पर्यवसानात् निर्विशेषं ब्रह्म यत अतो ब्रह्माऽविद्याप्रतिबिंबितं सज्जीवोऽविद्योपहितं सदीश्वरः इति बिंबप्रतिबिम्बभावे।न जीवेश्वरभावः इत्यत्र वेदांतेषु जलसूर्यादिदृष्टांतोपपादनमिति सूत्रकार आह अत एवेति यतो ब्रह्म निर्विशेषमत एवेति वेदान्तेषु जलसूर्याद्युपमोपादीयते तानेव वेदांतानुदाहरंति यथेत्यादिना ननु सूर्यादीनां रूपवत्त्वेन जलादौ प्रतिबिंबसंभवेऽपि ब्रह्मणो रूपादिरहितत्वेन कथमविद्यायां प्रतिबिंबोदयः न च जले आकाशादिप्रतिबिम्बवदविद्यायां ब्रह्मप्रतिबिम्बसंभव इति वाच्यं आकाशस्यापि रूपादिशून्यतया जलादौ प्रतिबिम्बासंभवात् न च स्वल्पजलभाजने साभ्रनक्षत्राकाशानुभवविरोध इति वाच्यं तत्रापि रूपादिमन्नक्षत्रादिप्रतिबिम्ब एवानुभूयते आकाशप्रतिबिम्बानुभवस्तु भ्रम एव तस्माद्बिंबप्रतिबिंबभावेन ब्रह्मणो जीवेश्वरविभागोऽनुपपन्न इति चेन्न रूपवत एव प्रतिबिम्ब इति नियमाभावात् रूपादिरहितस्य लोहितरूपादेः स्फटिकादौ प्रतिबिंबदर्शनात् न च रूपादिहीनस्य द्रव्यस्य प्रतिबिंबसंभव इति वाच्यं तादृशव्योमादेः प्रतिबिम्बदर्शनात् आकाशानुभवस्य सर्वानुभवसिद्धत्वात् न च तस्य भ्रमत्वं बाधकाभावात् तस्माद्ब्रह्मणो बिम्बप्रति।

यथासूर्यप्रतिबिंबस्यजलांतरभूतस्यजलगतवृद्धिह्रासादिभाक्त्वंनवास्तवमेवमविकृतस्यपरमात्मनोदेहाद्युपाध्यंतर्भावाद्देहगतवृद्धिह्रासादिभाक्त्वंनस्वाभाविकमित्येतावतांशेनतयोरुभयोर्दृष्टांतदार्ष्टांतिकयोःसामंजस्याद्भवतिसूर्या
दिदृष्टांतः नहिसर्वात्मनासाम्यंदृष्टांतदार्ष्टांतिकयोः शक्यते वक्तुं दृष्टांतत्वविरोधात् इतिभावः ॥२॥ सूर्ये१

बिम्बभावेनजीवेश्वरविभागः अथवा अविद्याविशिष्टंचैतन्यंजीव अविद्योपहितंचैतन्यमीश्वरः यथाहुः बिंबत्वंप्रतिबिंबत्वंयथापूषणिकल्पितं जीवत्व
मीश्वरत्वंचतथा ब्रह्मणिकल्पितं इति एतदभिप्रेत्यसूत्रकारोप्याह वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवमिति अजो ह्येको जुषमाणोनुशेते ज
हात्येनां भुक्तभोगामजोन्य इत्यादिश्रुतिगतादिशब्देन गृह्यो अज्ञानमेकं तद्विशिष्टचैतन्यंजीव इत्यत्र फलितमाह अस्मिन्निति ननु जीवैक्ये सुखदुःखवैचि
त्र्यानुपपत्तिरित्याशंक्य प्रमातृभेदेन तद्वैचित्र्यमुपपद्यत इत्याह तस्मिन्निति अविद्याप्रतिबिम्बेजीव इत्यर्थः प्रमातार इति प्रमाश्रया इत्यर्थः पक्षांतरमाह के
चित्विति अयमाशयः शास्त्रेषु शुकादीनां मोक्षप्रतिपादनाद् अस्मदादीनां संसारोपलंभाच्च प्रतिपुरुषं नजानामीत्यनुभूयमानानि भिन्नान्यज्ञानानि स्वीकर्तव्या
नि अन्यथा बंधमोक्षव्यवस्था न स्यात् इंद्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतौ मायाभिरिति बहुवचनसामर्थ्याच्च अजामेकामिति श्रुतेः समष्ट्यज्ञानविषयत
यान्यथोपपत्तेः अन्यथा मायाभिरिति बहुवचनस्यानर्थक्यप्रसंगात् अर्थांतरकल्पनायां प्रकृतहानाऽप्रकृतप्रक्रियाप्रसंगात् आनर्थक्ये प्रतिहतानां वि

अस्मिन्पक्षे जीवस्तु एक एव तस्मिन्नंतःकरणविशिष्टाः प्रमातारः कल्पिताः ।३। केचित्तु नानाऽज्ञानं स्वीकृत्य वनवदज्ञानसमुदायः सम
ष्टिः तदुपहितम् ॥ ११

परीतं बलाबलमिति न्यायात् वाक्यशेषानुरोधाच्च एकामिति श्रुतेरज्ञानसमष्ट्यैकविषयत्वमभ्युपगंतव्यं ततश्चाज्ञाननानात्वे
निश्चिते तदुपाधिका जीवा अपि नाना भवंति एवं च शुकादीनां मोक्षेप्यस्मदादीनां संसारोपलंभो न विरुध्यते नन्वज्ञानभेदेन जीवभेदाभ्युपगमे प्रतिजीवं प्रपंचभे
द ईश्वरभेदश्च स्यात् न चेष्टापत्तिः योयं घटस्त्वयानुभूतः स एव मयापीति प्रत्यभिज्ञाविरोधप्रसंगात् अन्याज्ञानकल्पितप्रपंचस्यान्यप्रत्यक्षाविषयत्वात् न च
भ्रांतित्वं बाधकाभावात् एकः परमेश्वरः सकलजगत्सृष्टिस्थितिलयकारणमिति सर्वतंत्रसिद्धांतविरोधप्रसंगाच्च॥ अथैतद्दोषपरिजिहीर्षयास
मष्ट्यज्ञानोपहितचैतन्यमीश्वरः तत्सृष्टः प्रपंचः सर्वसाधारण इत्यभ्युपगम्यते तर्ह्यनिर्मोक्षः प्रसज्येत तथाहि निर्गुणब्रह्मभावापत्तिर्मोक्षः एकस्य तत्त्वज्ञानेन सर्वा
ज्ञानानामनिवृत्तेरीश्वरजगतोरबाधेन निर्गुणब्रह्मप्राप्तेरसंभवान्मोक्षो न स्यात् किंच अद्वितीयब्रह्मज्ञानान्मोक्षोभ्युपगंतव्यः न चाद्वितीयब्रह्मज्ञानं नानाजीवप
क्षेण संभवति स्वव्यतिरिक्तजीवेश्वरजगतां विद्यमानत्वात् ततश्चानिर्मोक्षः प्रसज्येत किंच शास्त्रप्रामाण्यात् कथंचिज्ज्ञानान्मोक्षोपपादनेपि सगुणब्रह्म

मायाभिरिति श्रुतेः ७॥ अनर्थक्ये न प्रतिहतानां श्रुतिलिङ्गादीनां बलाबलं विपरीतं चिन्तनीयं लिङ्गेनापि श्रुतिर्बाध्येतेत्यर्थः॥ ८॥

प्राप्तिः मोक्षः स्यात्तन्निर्गुणब्रह्मप्राप्तिःतच्चानिष्टं अनंतरोबाह्यःकृत्स्नःप्रज्ञानघन एवयत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकं पश्येदित्यादिशास्त्रविरोधात् तस्मात्त्वानाज्ञानंस्वीकृत्यनानाजीववादोऽनुपपन्नइति अत्रोच्यते अज्ञानभेदोवश्यमभ्युपगंतव्यः सर्वशास्त्रप्रामाण्यात् नचजीवभेदेऽनेकप्रपंचेश्वरकल्पनापत्तिरिति वाच्यं इष्टापत्तेः नचप्रत्यभिज्ञाविरोधस्तस्याभ्रमरूपत्वात् तथाहि एकस्मिन् शुक्तिकाशकलेदृष्टानांपुरुषाणांरजतभ्रमेसतिस्वस्वाज्ञानकल्पितस्यरजतस्यान्योन्यभेदेपि अन्याज्ञानकल्पितस्यरजतस्यान्यप्रत्यभिज्ञाविषयत्वेपित्वयायद्रजतमनुभूतं तदेवमयापीति यथाप्रत्यभिज्ञाभ्रमरूपा जायते एवंप्रकृतेपि स्वस्वाज्ञानकल्पितप्रपंचस्यस्वस्वाज्ञानोपहितचैतन्यमीश्वरएकएवेतिनानेकेश्वरकल्पनापत्तिः :सर्वतंत्रविरोधोवा अथवाव्यष्ट्यज्ञानोपहितचैतन्यंजीवःसमष्ट्यज्ञानोपहितचैतन्यमीश्वरः तत्सृष्टः प्रपंचःसर्वसाधारणः एवंचनप्रत्यभिज्ञाविरोधोनवाशास्त्रविरोधःनापिकल्पनागौरवं नत्वानिर्मोक्षप्रसंगःस्वस्वश्रुत्याचार्यप्रसादेनब्रह्मसाक्षात्कारेणस्वाज्ञाननिवृत्यातत्कार्यलिंगशरीरादिनिवृत्तेःसंभवात् निर्गुणब्रह्मभावापत्तेरवि

चैतन्यंईश्वरःवृक्षवत्तस्यैकमज्ञानंव्यष्टिःतदुपहितचैतन्यंप्राज्ञइतिवदंति ४ अन्येतुकारणीभूताज्ञानोपहितंचैतन्यमीश्वरःअंतःकरणोपहितंचैतन्यंजीवः॥

ऽऽरोधात् ननुस्वव्यतिरिक्तानांजीवेश्वरजातानांविद्यमानत्वेनाहं मुक्तोऽन्योबद्धोऽन्यःप्रपंचअन्य ईश्वरइतिभेददृष्टेरनिवारणाद्द्वितीयब्रह्मसाक्षात्काराभावेनकथंनिर्गुणब्रह्मभावापत्तिर्मोक्षःइतिचेन्नैवं इदंसर्वंयदयमात्मावाचारंभणंविकारोनामधेयमित्यादिशास्त्रैरज्ञानादिसमस्तजडजातस्यब्रह्मण्यध्यस्तत्वावधारणेनमिथ्यात्वनिश्चयादद्वितीयब्रह्मसाक्षात्कारसंभवेनब्रह्मभावापत्तिर्मोक्षउपपद्यते॥ नचज्ञानेन स्वाज्ञाननिवृत्तावप्यन्याज्ञानानिवृत्याब्रह्मणईश्वरत्वानपायात् ज्ञानेनसगुणब्रह्मभावापत्तिरेवस्यादितिवाच्यं अन्यज्ञानादन्यप्राप्तेरयोगात् नहिशुक्तिज्ञानाद्रजतप्राप्तिःसंभवतिकिंतुशुक्तिरेवप्राप्यते एवंनिर्गुणब्रह्मज्ञानान्निर्गुणंब्रह्मैवप्राप्यतेनसगुणंतस्यमायामयत्वात् तथाशुक्तावन्यस्यरजतभ्रांतिदशायां अन्योविशेषदर्शीशुक्तिज्ञानाच्छुक्तिमेवप्राप्नोतिनरजतंपरमार्थतस्तत्राभावात् अन्याज्ञानकल्पितस्यरजतस्यान्यप्रत्यक्षविषयत्वाभावाच्चतथाब्रह्मण्यज्ञानादीश्वरजगद्भ्रांतिदशायांश्रुत्याचार्यप्रसादादन्योविशेषदर्श्यहंब्रह्मास्मीति अद्वितीयब्रह्मसाक्षात्कारादानंदैकरसनिर्विशेषमद्वितीयंब्रह्मैवप्राप्नोतिनसगुणमीश्वरंतस्य

ऽनिवारणात्४

ईश्वरकल्पित१।। जीवकल्पित।।

अ.कौ. प्र. १४ मायामयत्वेन परमार्थतस्तद्व्यतिरेकेणाभावान्नहि भ्रांत्याज्ञातं परमार्थिकं वस्तु भवति तस्मात्साधारणाऽसाधारणप्रपंचाभ्युपगमेपि निर्गुणब्रह्मभावापनिरूपो मोक्ष उपपद्यते तस्मादिंद्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतिवशात्सर्वेषामहं ब्रह्म न जानामीति स्वस्वाज्ञानानुभववशादनेकान्यऽज्ञानानि ब्रह्मण्यारोपितानि तदुपाधिका जीवाश्चेतरेतरविलक्षणा एवं च सति रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुतिरथातो ब्रह्मजिज्ञासेति शास्त्रं चेत्येतत्सर्वं सामंजस्येनोपपद्यते तस्मान्नानाजीववाद इति।। अत्र समष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्तदुपहितयोरीश्वरप्राज्ञयोरपि तादात्म्यं द्रष्टव्यं ४ मतांतरमाह अन्ये त्विति ५।। विक्षेपादिशक्तिप्राधान्येनाज्ञानस्य मायाशब्दवाच्यत्वाद्यथोक्तेषु पंचस्वपि पक्षेषु मायोपहितं चैतन्यं जगत्कारणमीश्वर इत्यर्थं संमत इत्युपसंहरति सर्वथापीति अज्ञानैकत्वनानात्वाभ्यां प्रकारांतरेण वा जीवैकत्वनानात्वयोर्विवादेपि मायोपहितं चैतन्यमीश्वर इत्यविवादमिति सूचयन्नपीति ननु ईश्वरे विवादाभावेपि जीवैकत्वनानात्वयोर्विवादसंभवात्किमुपादेयं किं हेयमिति शृणु सर्वमुपादेयं सर्वं हेयं मायामयत्वाद्व्यवहारस्य तर्हि सर्वस्य हेयत्वमेव न तूपादेयत्वमिति चेन्नाध्यारोपा-

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः इति वचनादित्याहुः ५ सर्वथापि मायोपहितं चैतन्यमीश्वरः स च ज्ञानशक्त्युपहितस्वरूपेण जगत्कर्ता विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानं ऊर्णनाभिवत् ।। 74

रे पवादन्यायेन ब्रह्मणोज्ञातव्यत्वात् व्यवहारेण विना ब्रह्मज्ञानासंभवात्तदुपादेयतया सर्वमुपादेयं भवत्येव अयं विशेषः जीवैकत्वे जीवनानात्वे वा यथा यस्य मनोरोचते स तथा तं पक्षं स्वीकृत्य प्रत्यगात्मानं विविच्य तस्य ब्रह्मत्वं साक्षात्कुर्यान्न तु तत्र विवदितव्यं दूषणभूषणयोः सर्वत्र तुल्यत्वात् प्रत्यगात्मप्रधानतया येन प्रकारेण भवति तथा संपादनीयं स एव शास्त्रार्थः तदुक्तं वार्त्तिककाराचार्यैः यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि सा सैव प्रक्रियेह स्यात्साध्वी सा च व्यवस्थितिरिति व्युत्पत्तिर्ज्ञानं तत्पदवाच्यार्थस्य मायोपहितस्येश्वरस्य जन्मादिकारणत्वमुक्तं तदुपादानत्वेन कर्तृत्वेन च द्वेधा भवति तत्र केन रूपेणोपादानत्वं केन रूपेण कर्तृत्वं चेत्याकांक्षायां तदुभयं क्रमेण दर्शयति स चेत्यादिना ज्ञानेति ज्ञानशक्तिमदज्ञानोपहितस्वरूपेणेत्यर्थः अन्यथा शुद्धस्यासंगत्वे कर्तृत्वायोगात् कर्तृत्वं नाम उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं तच्च शुद्धे ब्रह्मणि न संभवति असंगो ह्ययं पुरुष इत्यादिश्रुत्या ब्रह्मणोऽसंगत्वावगमेन ज्ञानेच्छाकृतीनां तस्मिन्नसंभवात् यथोक्तेश्वरस्यैवहितदिति भावः एकस्यैव ब्र- रामः १४

उक्तानुक्तदुरुक्तादिचिंता यत्र प्रवर्तते तं ग्रंथं वार्तिकमाहुर्वार्तिकज्ञा मनीषिणदिति ।। ५ ।।

यथोर्णनाभिः सृजते गृह्णते चेत्यादिश्रुतेः यः सर्वज्ञः स विश्वकृत्स हि सर्वस्य कर्तेत्यादिश्रुतिभ्यश्च एवं पूर्वोक्तादीश्वरादाकाश उत्पद्यते आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी च तस्माद्वा एतस्मात् आत्मनः आकाशः संभूतः इत्यादिश्रुतेः ॥२॥

ह्मण उपादानत्वे कर्तृत्वे च दृष्टांतमाह ऊर्णनाभीति ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणमाह यथेति आदिशब्देन यथा पृथिव्यां ओषधयः संभवंति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वं यथोर्णनाभिस्तंतुनोपचरेत् यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः यथा सुदीप्तात्पावकाद्विस्फुलिंगा इत्यादिवाक्यानि गृह्यंते यथोक्तेश्वरस्यासर्वज्ञत्वे जगत्कर्तृत्वं न संभवतीति ततः सर्वज्ञत्वं वक्तव्यं तत्र प्रमाणमाह यः सर्वज्ञ इति यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते एष सर्वज्ञ एष सर्वेश्वरः एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्यादिश्रुतिस्मृतिभ्यश्च यथोक्त ईश्वरः सर्वशक्तिः यथोक्तप्रकारेण जगत्कर्ता जगदुपादानं चेति योजना अयमेव मायोपहितः परमेश्वरो ब्रह्मविष्णुमहेश्वररूपतां भजते तथा हि मायानिष्ठं निरतिशयसत्त्वं त्रिमूर्त्याकारेण परिणमते परमेश्वरेच्छया लोकानुग्रहाय तत्र दंडकमंडलुमन्मूर्त्युपहितः सन्परमेश्वरो जगत्स्रष्टा ब्रह्मा भवति शंखचक्रगदांबुजपाणिमूर्त्युपहितः सन्परमेश्वरो जगत् गोप्ता विष्णुर्भवति त्रिनेत्रशूलपाणिमूर्त्युपहितः सन्परमेश्वरो जगत्संहर्ता महेश्वरो भवति स ब्रह्मा स शिवः सेंद्रः सोऽक्षरः परमः स्वराट् स एव विष्णुरित्यादिश्रुतेरेकैव मूर्तिर्बिभेद त्रिधासौ सामान्यमेषां प्रथमावरत्वं हरेर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यावित्यपि युक्तोक्तेश्च अत्र स्वस्वभक्त्यनुसारेणोपास्याः सर्व इति अपरे तु स्रष्टा हिरण्यगर्भो जीवः परमेश्वराविष्टः समष्टिलिंगशरीराभिमानी सत्यलोकवासी शिवविष्णुमूर्ती तु शुद्धसत्त्वपरिणामरूपे रुद्रो नारायणश्चैवेत्येकं सत्त्वं द्विधाकृतं लोके चरति कौंतेय व्यक्तिस्थं सर्वकर्मस्विति महाभारतवचनात् तत्रापि विष्णुभक्तिर्मोक्षं प्रत्यंतरंगसाधनं शिवादिभक्तिरीषद्व्यवधानेन विष्णोः सत्त्वप्रवर्तकत्वात् आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात् ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनादिति पुराणवचनाच्च मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते इति भगवद्वचनाच्चेति वदंति शैवास्तु मायोपहितः पर एव चंद्रकलावतंसनीलकंठत्रिनयनोमासमेतनिरतिशयसत्त्वमूर्त्युपहितः सन्परमशिवो भवति स एव मुमुक्षुभिरुपास्यः उमासहायं परमेश्वरं

आद्यपदेनान्वयः ५

अ·कौ·
प्र·
१५

पिनकाख्यधनुर्धारिणोशिवायेत्यर्थः २॥

प्रभुंत्रिलोचनंनीलकंठंप्रशांतंध्यात्वामुनिर्गच्छतिभूतयोनिंसमस्तसाक्षिणंतमसःपरस्तादितिश्रुतेस्तस्यैवब्रह्मविष्णुमहेश्वराविभूतयःसब्रह्मासशिवइत्यादिश्रुतेःयस्याज्ञयाजगत्स्रष्टाविरिंचिःपालकोहरिःसंहर्ताकालरुद्राख्योनमस्तस्मैपिनाकिनइतिवचनाच्चेति वर्णयंति वैष्णवास्तुमायोपाधिकःपरमात्माशंखचक्रगदांबुजपाणिलक्ष्मीसमेतनिरतिशयसत्वमूर्त्युपहितःसन्परमवासुदेवोभवतिसएवमुमुक्षुभिरुपास्यस्तस्यत्रिमूर्तयोविभूतयःवेदाहमेतंपुरुषमहांतमादित्यवर्णंतमसःपरस्तात्तमेवविद्वानमृतइहभवतिनान्यःपंथाविद्यतेऽयनायसब्रह्मासशिवःसेंद्रःसोक्षरःपरमःस्वराडित्यादिश्रुतेःमोक्षमिच्छेज्जनार्दनादितिवचनाच्चेति मन्यंते हैरण्यगर्भास्तुश्रुतिस्मृतिवादानांवहूनांसत्वाद्धिरण्यगर्भंमुमुक्षुभिरुपास्यंप्राहुःशैवादिपक्षेमूर्तित्रयातिरिक्तमूर्तिकल्पनायांप्रमाणंचिंत्यंउदाहृतश्रुतीनामर्थांतरत्वोपपत्तेःब्रह्मणोमायोपहितस्यसृष्टिस्थितिलयकारणत्वंतटस्थलक्षणमुक्तंतदेवप्रपंचयिष्यन्वियत्प्राणपादोक्तन्यायेनसृष्टिक्रममाह एवमितिपूर्वोक्तादितिविक्षेपादिशक्तिप्रधानमायोपहितादीश्वरादित्यर्थःअत्रायंक्रमःसंसृज्यमानप्राणिकर्मसहकृ

भाष्यपादः १॥ भवतिनवाइतिचिंतनीयं २॥

मायायाःसत्वरजस्तमोगुणात्मकत्वात् ॥

न् परमेश्वरइदमिदानींस्रष्टव्यमितीक्षतेततईक्षितुःपरमेश्वरादाकाशउत्पद्यते आकाशाद्वायुस्ततोऽग्निस्ततआपस्ततःपृथिवीचेतिनचाऽचेतनस्यकल्पितस्याकाशादेर्वाय्वाद्युपादानत्वंकथमितिवाच्यं तत्तदुपहितचैतन्यस्यैवोपादानत्वेनविवक्षितत्वात् अन्यथाचेतनकारणतावादिश्रुतिविरोधप्रसंगात् अत्रवैशेषिकामन्यंते द्रव्यगुणकर्मसामान्यविशेषसमवायाःषट्पदार्थाःगुणादयोद्रव्यपरतंत्राःभावकार्य्यंसर्वंसमवायिकारणमसमवायिकारणंनिमित्तकारणंचेतिकारणत्रयजन्यंतत्रद्रव्यंसमवायिकारणंतानिचद्रव्याणिनवैवपृथिव्यादयश्चत्वारःपरमाणवआकाशादीनिचेत्येतानिनित्यद्रव्याणिद्व्यणुकंपरमाणुभ्यामुत्पद्यतेद्व्यणुकेभ्यस्त्र्यणुकंततश्चतुरणुकमेवंक्रमेणमहापृथिवीमहत्यापः महत्तेजोमहान्वायुरुत्पद्यतेआद्व्यणुकाद्ब्रह्मांडांतंसर्वंकार्यमनित्यमवयवसमवेतंचअपकृष्टमहत्परिमाणतारतम्यस्यगगनादिपरिमाणेविश्रांत्ववदणुपरिमाणतारतम्यस्ययत्रविश्रांतिःसएवपरमाणुःनचाणुपरिमाणतारतम्यस्यत्रसरेणौविश्रांतिरस्त्विति वाच्यं तस्यचाक्षुषद्रव्यत्वेनसावयवानुमानेनतदवयवद्व्यणुकसिद्धौतस्यापिमहदवयवत्वेनसावयवानुमानेनतदवयवपरमाणुसिद्धेस्तस्यापिसावयव

75

राम:
१५

आकाशोत्पत्तिबोधिका श्रुतिर्गौणी भवितुमर्हति कस्मात् तस्य समवाय्यसमवायिकारणयोराकाशपरमाणुतत्संयोगयोरसम्भवादिति॥ शा०॥ सू०॥४॥ प्रतिबं०६॥

त्वेनाऽनवस्थाप्रसंगः न च तदिष्टं अनन्तावयवारब्धत्वाविशेषेण मेरुसर्षपयोस्तुल्यपरिमाणप्रसंगोऽतो निरवयवः परमाणुः ततश्च तद्वृत्तौ समवायिकारणानिरूपणादनादिः परमाणुः विनाशकारणाभावान्नित्य एवमाकाशादीनामपि सर्वत्र कार्योपलब्ध्या विभुत्वेन निरवयवद्रव्यतयोत्पत्तिविनाशकारणाभावात्तत्कृत्यतयाऽनादित्वं नित्यत्वं च न चोत्पत्तिश्रुतेराकाशस्याऽनादित्वं कथमिती वाच्यं प्रमाणान्तरविरोधेन तस्या गौणत्वोपपत्तेः तथा च पारमर्षसूत्रं गौण्यऽसंभवादिति एवं मनसोऽपि अत्रेदं चिन्त्यं शक्तिसादृश्यादीनां बहूनां पदार्थानामविद्यमानत्वेन षट्पदार्था न संभवन्ति न च शक्तिसादृश्यसद्भावे मानाभाव इति वाच्यं करतलानलसंयोगे सति मण्यादिसमवधाने दाहाऽनुत्पत्त्या तदपनये दाहोत्पत्त्या वह्नौ दाहानुकूलशक्तिविनाशोत्पत्त्योरावश्यकत्वेन शक्तिसिद्धेः न च प्रतिबंधकाभावेन दाहोत्पत्त्युपपत्तौ कथं शक्तिसिद्धिरिति वाच्यं प्रतिबंधकाभावस्य दाहकारणत्वे मानाभावात्तदन्वयव्यतिरेकयोः कार्याऽनुत्पादस्याग्रिमसमयसंबंधसंपादकत्वेनान्यथासिद्धत्वाच्च कथमसतः सज्जायेतेति श्रुत्या नासतोऽदृष्टत्वादिति न्यायेन चाभावकारणत्वस्य निराकृतत्वाच्च तस्मात्कारणे कार्यानुकू-

असतोऽविद्यमानात्कारणात्कार्य्यं न जायते कस्मात् मृदादेरसत्त्वे घटादेरदृष्टत्वादिति॥ शा०॥ सू०॥१॥

**तत्कार्याण्याकाशादीनि अपि सत्त्वरजस्तमोगुणात्मकानि ॥ ७ ॥**

आत्मन आकाशः सम्भूत इति श्रुतिसिद्धभावकार्य्यत्वेनाकाशस्य सावयवत्वमतो निरवयवद्रव्यत्वरूपो हेतुस्स्वरूपासिद्ध इति भावः॥७॥ असतन्पा

लशक्तिरभ्युपगन्तव्या एवं चन्द्रवन्मुखमित्याद्यनुभवात् सादृश्यसिद्धिस्तस्मात्पदार्थानामनन्त्याद् द्रव्यादयः षट्पदार्था इत्यसंगतं किंच द्रव्याणि नवैवेत्यसंगतं अंधकारस्य दशमद्रव्यस्य सत्त्वात् न चांधकारस्यालोकाभावतया कथं द्रव्यत्वमिति वाच्यं प्रतियोगिनिरपेक्षतया प्रतीयमानस्याभावत्वकल्पनायां मानाभावात् नीलं तमश्चलतीत्यादिप्रत्यक्षप्रतीत्या रूपादिमत्त्वेन तस्य द्रव्यत्वोपपत्तेश्च तस्माद् द्रव्याणि नवैवेत्यनुपपन्नं किंच आत्मनः श्रुतिस्मृतिविद्वदनुभवैर्निर्गुणत्वसच्चिदानंदस्वरूपत्वावगमेन गुणाश्रयत्वे समवायिकारणत्वेन वा द्रव्यत्वकल्पनायां मानाभावात् न चात्मनोऽद्रव्यत्वे गुणादिवत्परतंत्रत्वापत्तिरिति वाच्यं तस्य सर्वकत्वेनाधिष्ठानतया सर्वप्रेरकत्वेन च स्वातंत्र्योपपत्तेः कुतः पारतंत्र्यमतोऽपि द्रव्याणि नवैवेत्यनुपपन्नं अतोऽन्यदार्तमित्यादिश्रुत्या ब्रह्मभिन्नस्य सर्वस्यानित्यत्वात्कथमाकाशादीनां नित्यत्वं न च तस्योपचरितार्थत्वं प्रमाणान्तराविरोधात् तथाहि न तावदाकाशादीनामार्तत्वे प्रत्यक्षविरोधस्तेषामतीन्द्रियत्वान्नाप्याकाशं नित्यं निरवद्रव्यत्वादात्मवदित्यनुमानविरोध इति वाच्यं असिद्धत्वात् न च विभुत्वेन निरवयवत्वसिद्धिरिति वाच्यं तस्याऽनिर्वचनात् न तावत्सकलमूर्तद्रव्यसंयो-

प्रतिबन्धकसत्त्वे कार्य्यानुत्पादस्याग्रिमसमयसम्बन्धो भवति प्रतिबन्धकाभावे च कार्य्यस्याग्रिमसमयसम्बन्ध इत्येतावन्मात्रे चरितार्थयोः प्रतिबन्धकतदभावयोः कार्य्यानुत्पादोत्पादं प्रत्यन्यथासिद्धत्वमिति भावः॥ १० ॥ १०॥

रहित२॥ आकाशवत्सर्वगतश्चनित्यः३ आकाश५॥ शब्दादि२॥ नविपदस्तुनेरितिवि- यदाकाशंनजन्मवत्छान्दोग्येनस्यजन्माश्रवणादितिवादिवाक्यम्॥३॥

गित्वंविभुत्वंसंयोगस्याव्याप्यवृत्तितयासावयवनिरवयवयोस्तदसंभवात् नापिपरममहत्परिमाणवत्त्वंविभुत्वंपरममहत्परिमाणस्यानिरूपणात् नचई यना
नवच्छिन्नपरिमाणत्वंपरममहत्त्वंतथात्वेमानाभावात् नचसर्वत्रकार्योपलब्धिरेवमानमितिवाच्यंतर्हियत्रकदापिकार्यंनोपलभ्येतत्रतदसिद्ध्याविभुत्वा
ऽसिद्धेः नाप्युपमानविरोधः नित्यत्वाभावेपितत्संभवात् नाप्यागमविरोधः वादिवाक्यस्याप्रमाणत्वात् श्रुतिस्त्वऽनित्यमेवबोधयति नचविनाशकारणानिरू
पणात्कथंतदुपपद्यतेइतिवाच्यं उपादानकारणनाशादेवतन्नाशोपपत्तेः किंतदुपादानमितिचेत्परिणाम्युपादानमज्ञानंविवर्त्तोपादानंब्रह्मतत्रब्रह्मणो
नित्यत्वेपिज्ञानेनाज्ञाननिवृत्यातन्निवृत्तिरुपपद्यतइत्यातंश्रुतेर्मानांतराविरोधादुपचरितार्थत्वाभावेनाकाशादीनामनित्यत्वं एतेनाऽऽकाशादीनांसमवा
यिकारणाऽसमवायिकारणानिरूपणादनादित्वमित्यपास्तंसमवायासिद्ध्यासमवायिकारणासमवायिकारणपरिभाषायाअप्रामाणिकत्वात् कुतस्तर्हिकार्यो
त्पत्तिरितिचेदुपादानकारणनिमित्तकारणाभ्यांतेचनिरूपयिष्यंतेसमवायासंभवोवक्ष्यते एतेनपरमाणूनामप्युत्पत्तिविनाशकारणानिरूपणादनादित्वमि

अग्रे१ अविद्यमानगुणारोपः३॥ शास्त्रज्ञानामाधुनकसंकेतःपरिभाषाइति॥२॥ घटादि२

अपंचीकृतानिसूक्ष्मभूतानीतिचवर्णयंति॥ ॥ छ ॥ ६ ॥

आत्मनिर२ अनुमानादेव१ असाधकत्वात्२

त्यपास्तंसूक्ष्मभूतातिरिक्तपरमाणुसद्भावेमानाभावात् नचानुमानात्तत्सिद्धिरितिवाच्यंतर्हितनैएवपरमाणूनांसावयवप्रसंगात् नचानवस्थाभयात्तदसिद्धिरिति
वाच्यं परमकारणेविश्रांतिसंभवेनाऽनवस्थापरिहारात् नचमेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसंगोऽनंतावयवारब्धत्वाविशेषादितिवाच्यं अप्रयोजकत्वात् किं
चरूपादिमत्वात्परिच्छिन्नत्वाच्चपरमाणूनांसावयवत्वमनित्यत्वमभ्युपगंतव्यंघटादीनांरूपादिमतांतथादर्शनात् किंचसंयुक्ताभ्यांपरमाणूभ्यांद्व्यणुकोत्पत्तिर्वा
च्यासाऽनुपपन्नातत्संयोगाऽयोगात् परमाणूनांनिरवयवत्वाभ्युपगमात्संयोगोनभवति तस्याऽव्याप्यवृत्तित्वात् नहिनिःप्रदेशेसंयोगतदऽभावौसंभवतः अस
वद्धानांदिशामनवच्छेदकत्वात् ‾ तत्संबंधानिरूपणाच्चतस्मात्परमाणुभ्यांद्व्यणुकमुत्पद्यतइत्यसंगतं अपिचयेनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमित्येक
विज्ञानेनसर्वविज्ञानंप्रतिज्ञातंतच्चब्रह्मभिन्नस्यानादित्वनित्यत्वेबाधितंस्यात्तच्चतदिष्टंमृदादिदृष्टांतेनकार्यस्यकारणादव्यतिरेकेणतदुपपादनमनर्थकंस्यात्।
तस्माद्ब्रह्मभिन्नंसर्वमुत्पद्यतेविलीयतेचेतिनिश्लिष्टतरं अस्तुतर्हिप्रधानान्महदादिक्रमेणप्रपंचोत्पत्तिरिति चेन्नप्रधानस्याप्रमाणिकत्वेनजगदुपादानत्वायोगा

प्रमाणुसंयोगे३ संवद्धतरम्१ संयोगस्य४

सांख्य१ अप्रामाण्यं४॥ कारणानिकपालतन्त्वादीनि तेषु वर्तन्ते ये नीलपीतादयो गुणास्ते घटपटादिकार्यगतगुणानारभन्ते इति॥ वै०॥ सू०॥ २॥

न् ननु स्मृतिसिद्धत्वात्कथमप्रामाणिकत्वमिति चेन्न श्रुतिविरोधे स्मृतेरप्रामाणिकत्वात् तस्मान्मायोपहिताद्ब्रह्मण आकाशादिक्रमेण प्रपंचोत्पत्तिरिति निस्
वैरभ्युपगंतव्यं अन्यथा श्रुतेरप्रामाण्यप्रसंगात् न चैतदिष्टं अध्ययनविधिपरिगृहीतस्याक्षरमात्रस्यानर्थक्यायोगात्तस्माद्ब्रह्मण एवाकाशादिक्रमेण जग
दुत्पद्यते इत्यनवद्यं आकाशादिभ्यः सूक्ष्मशरीरोत्पत्तिं वक्तुं कारणगुणा हि कार्यगुणानाऽऽरंभ इति न्यायेन भूतकारणस्याज्ञानस्य सत्वरजस्तमोगुणात्मकत्वे
तत्तत्कार्याणामाकाशादीनामपि सत्वरजस्तमोगुणात्मकत्वं व्यवहारायोग्यत्वात् सूक्ष्मभूतत्वं पंचीकरणाभावादऽपंचीकृतत्वं चेत्याह मायाया इति वर्णयंति
वेदांतविद इति शेषः एतेभ्यः सूक्ष्मभूतेभ्यः सूक्ष्मशरीराणां स्थूलभूतानां चोत्पत्तिमाह एतेभ्य इति लिंगानि गणयति सप्तदशेति श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि
ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि कर्मेंद्रियाणि तत्र शब्दोपलब्धिसाधनमिंद्रियं श्रोत्रं स्पर्शोपलब्धिसाधनमिंद्रियं त्वक् रूपोपलब्धिसाधनमिंद्रि
यं रसनं गंधोपलब्धिसाधनमिंद्रियं घ्राणं वचनक्रियासाधनमिंद्रियं वाक् आदानक्रियासाधनमिंद्रियं पाणिगमनक्रियासाधनमिंद्रियं पादौ विसर्गक्रियासाधन

एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि सूक्ष्मशरीराणि च सप्तदशलिंगात्मकानि जायंते सप्तदशलिंगानि तु ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पं
चमनोबुद्धी पंच प्राणाश्चेति तथा च आकाशादिसात्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेंद्रियाणि उत्पद्यंते ॥

ज्ञानि३ ऋतंभरा३॥
मिंद्रियं पायुः सुखक्रियासाधनमिन्द्रिय
ज्ञान१ कर्म
मुपस्थः सुखदुःखानुकूलसाक्षात्कारप्रमिति क्रियान्यतरकरणमतींद्रियमिंद्रियं आलोकादावतिव्याप्तिवारणायातींद्रियमित्युक्तं अतींद्रियत्वं नाम संयोगादिप्र
त्यासत्तिजन्यसाक्षात्काराविषयत्वं न च वस्तुमात्रस्यालौकिकसाक्षात्कारविषयत्वादसंभव इति वाच्यं अलौकिकसाक्षात्कारस्यानंगीकारात् सामान्यज्ञानयोग
जधर्माणां प्रत्यासत्तित्वमानाभावेनातिप्रसंगेन च तज्जन्यसाक्षात्कारविषयस्यासंभवात् न च तर्हि साक्षात्काराविषयत्वमतीन्द्रियत्वमस्तु किं जन्यांतेन चेति वाच्यं
सर्वस्य वस्तुनो ज्ञाततयाऽज्ञानतया वा साक्षिभास्यत्वेन साक्षिणो नित्यापरोक्षत्वेनाऽसंभववारणार्थत्वात् धर्मादावतिव्याप्तिवारणायाद्यविशेषणं अनुमित्यादि
करणेऽतिव्याप्तिवारणाय साक्षादित्युक्तं स्वाकारवृत्त्युपहितावाधितयोग्यवर्तमानविषयचैतन्याभिन्नत्वं प्रमितेः साक्षात्वं एतच्चाग्रे व्युत्पादयिष्यते मनसि चित्त
स्य बुद्धावहंकारस्यांतर्भावं मत्वा बुद्धिमनसोर्ग्रहणं प्राणापानव्यानोदानसमानाः पंचप्राणाः तेषां लक्षणमनुपदमेव वक्ष्यति सप्तदशलिंगानामुत्पत्तिक्रममा

ज्ञानस्य कार्यत्वानसन्निकर्षस्य कारणत्वात् ४॥ अनुमानादौ ४॥ विषयाकारवृत्त्युपहितचैतन्यं ॥२॥१॥ शुक्तिरजतेधामदोस्मत्यादौ चातिप्रसङ्गभङ्गाय अबाधितयोग्यवर्तमानानि विषयविशेषणानि ॥ २॥ २॥

ह तथाचेतिव्यस्तेभ्यः प्रातिस्विकेभ्यः ज्ञानकरणानींद्रियाणि ज्ञानेंद्रियाणि ज्ञानस्यसत्वपरिणामत्वात्तत्करणानामिंद्रियाणांसात्विकांशकार्यत्वमुपपद्यते त
त्रकस्मात्किमुत्पन्नमित्याकांक्षायामाह आकाशेति श्रोत्रस्यशब्दग्राहकत्वेन शब्दगुणकत्वादाकाशसात्विकांशादुत्पत्तिर्यदिंद्रियंरूपादिषुपंचसुमध्येयं
गुणंगृह्णाति तदिंद्रियंतद्गुणकमितिव्याप्तेः अन्यथा शब्दग्राहकत्वमेवनस्यात् एवंत्वगादीनामपिवाय्वादिसात्विकांशकार्यत्वंद्रष्टव्यं तत्र श्रुतिप्रमाणंय
ति श्रोत्रमिति आदिशब्देनवायोस्त्वक् अग्नौचक्षुरप्सुजिह्वापृथिव्यांघ्राणमितिगृह्यते अस्यार्थः आकाशयः सात्विकांशस्तस्माच्छ्रोत्रमुत्पद्यत इतिपर्या
यांतरे षपियोजीनीयं अंतःकरणस्य श्रोत्रादिद्वाराशब्दादिसर्वविषयग्राहकत्वात्सर्वात्मकत्वंवक्तव्यमित्याकांक्षायामाकाशादिसात्विकांशसमुदायादु
त्पत्तिमाह आकाशादीनामिति अत्रसांख्यामतेत्रिविधमंतःकरणंबुद्धिरहंकारोमनश्चेति तत्रप्रकृतेर्बुद्धिरुत्पद्यतेमहतत्वापरपर्यायात्ततोऽहंकारः सचत्रिवि
धः सत्वरजस्तमोगुणभेदात् तत्रसात्विकाहंकारादेकादशेंद्रियाण्युत्पद्यंते तामसाहंकारात्पंचतन्मात्राणि राजसाऽहंकारोऽनयोः प्रवर्तकत्वेनसहकारी पंच

आकाशसात्विकांशात् श्रोत्रमुत्पद्यते वायोः सात्विकांशात् त्वगिंद्रियंतेजसः सात्विकांशाच्चक्षुः अपांसात्विकांशाद्रसनंपृथिवीसात्विकां
शात् घ्राणं श्रोत्रं आकाश इत्यादिश्रुतेः आकाशादीनांसात्विकांशेभ्योमिलितेभ्यो अंतःकरणमुत्पद्यते॥ ११ तन्मात्रेभ्यः पंचमहाभूतानि तद्

कंमूलप्रकृतिरविकृतिमहदाद्याः प्रकृतिविकृतयः सप्तषोडशकस्तुविकारोनप्रकृतिर्नविकृतिः पुरुषइति अस्यार्थः सत्वरजस्तमोगुणानांसाम्यावस्था प्रकृतिः
साजगतोमूलकारणंनकस्यापिविकृतिर्भवति महदहंकारपंचतन्मात्राणिसप्तप्रकृतयोविकृतयश्चभवंतिमूलप्रकृत्यपेक्षयामहतत्वंविकृतिःकार्यमितियावत्त
अहंकारापेक्षयाप्रकृतिरुपादानकारणमितियावत् एवमहंकारोपिमहतत्वापेक्षयाविकृतिः इंद्रियपंचतन्मात्रापेक्षयाप्रकृतिः एवंपंचतन्मात्राण्यहंकारापेक्ष
याविकृतयः स्थूलभूतापेक्षयाप्रकृतयश्चभवंति एकादशेंद्रियाणिपंचमहाभूतानिषोडशविकाराएव असंगत्वात्पुरुषोनोभयमिति नच्चिंत्यंस्वतंत्रप्रकृतेरीक्षतेर्नाशब्दमि
त्यादिनाऽशब्दतयाऽप्रमाणिकत्वेनप्रधानवादस्यदूषितत्वात् अन्नमयंहिसोम्यमनः आपोमयः प्राणस्तेजोमयी वागितिश्रुत्यांतःकरणप्राणेंद्रियाणांभौतिकत्वा
वगमाच्च ननुब्रह्मणोऽसंगत्वेनश्रुन्यावानस्यजगदुपादानत्वंकथंप्रतिपाद्यतेविरोधादितिचेत्सत्यंशुद्धस्यासंभवेपिमायोपहितस्यतत्संभवादेतच्चप्रागेवप्रतिपादि

77

तं एतेन निरवयवमणु नित्यं मन इति नैयायिकमतं प्रत्युक्तं अद्वैतश्रुतिविरोधापत्तेः एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति श्रुतौ मनस उत्पत्तिश्रवणाद्भावकार्यस्यानित्यत्वात् किंच यन्मूर्तं तत्परिछिन्नं यत्परिछिन्नं तत्सावयवं यत्सावयवं तदनित्यमिति नियमेन मनसो मूर्तत्वाभ्युपगमे न सावयवत्वमनित्यत्वं च स्यादेव अपि च मनसोऽणुत्वे तत्संयोगजन्यसुखस्य तावन्मात्रप्रसंगे न सर्वांगव्यापि सुखं न स्यात् तथा च पादे मे वेदना शिरसि मे सुखमिति युगपत्सुखदुःखानुभवो न स्यात् मनसोऽणुत्वेनोभयत्र संयोगाऽभावात् एतेन मनसो विभुत्वं प्रत्युक्तम् तस्मात्सावयवमंतःकरणमुत्पद्यते इति सिद्धं तद्विभजते तदिति तत्र पंचीकरणवार्तिकमुदाहरति मन इति कर्मेन्द्रियाण्युत्पत्तिमाह पूर्वोक्तेति वचनादिक्रियाकर्म तत्करणानीन्द्रियाणि कर्मेन्द्रियाणि अपामिति केचित्तु।

तत्संकल्पविकल्पनिश्चयाभिमानानुसंधानरूपवृत्तिभेदाच्चतुर्विधम् मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधं संकल्पात्मकं मनोरूपं बुद्धिर्निश्चयरूपिणी अभिमानात्मकस्त्वहंकारः प्रकीर्तितः अनुसंधानरूपं च चित्तमित्यभिधीयते इति वार्तिकवचनात् पूर्वोक्त आकाशादिराजसांशेभ्यो व्यस्तेभ्यः कर्मेन्द्रियाण्युत्पद्यंते आकाशराजसांशाद्वागिन्द्रियमुत्पद्यते वायो राजसांशाद्धस्तौ तेजसो राजसांशात्पादौ अपां राजसांशात्पायुः पृथिवीराजसांशादुपस्थः आकाशादिराजसांशेभ्यो मिलितेभ्यः प्राण उत्पद्यते सोऽपि वृत्तिभेदात्पंचविधः प्राग्गमनवान्नासाग्रवर्ती प्राणः अवाग्गमनवान्पाय्वादिस्थानवर्त्यपानः विष्वग्गमनवान्सर्वशरीरवर्ती व्यानः ऊर्ध्वगमनवान्कंठवर्त्युदानः ॥ २१

अपां राजसांशादुपस्थमुत्पद्यते पृथिवीराजसांशात् पायुः कस्मिन्नापः प्रतिष्ठिता इति रेतसीति श्रुतेरिति वदंति प्राणोत्पत्तिं वृत्तिभेदात्तद्भेदं तल्लक्षणं चाह आकाशेति तत्र प्रमाणमाह वाक्पाणीति आदिशब्देन एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादिवाक्यं गृह्यते तथा पद्मपुराणे शिवगीतायामपि सूक्ष्मभूतेभ्यः सप्तदशलिंगानामुत्पत्तिक्रमो दर्शितः व्योमादिसात्त्विकांशेभ्यो जायंते धीन्द्रियाणि तु व्योम्नः श्रोत्रं भुवो घ्राणं जलाज्जिह्वाथ तेजसः ।१। चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौतिकता ततो व्योमादीनां समस्तानां सात्त्विकांशेभ्य एव च ।२। जायते बुद्धिमनसी बुद्धिः स्यान्निश्चयात्मिका वाक्पाणिपादपायूपस्थाख्यकर्मेन्द्रियाणि तु ।३। व्योमादीनां रजोंशेभ्यो जायंते नान्यत्र क्रमात् समस्तेभ्यो रजोंशेभ्यः पंच प्राणास्ततः परं ।४। जायंते सप्तदशकमेवं लिंगशरीरकमिति नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्ये वायवः

सर्वतोगमनवानित्यर्थः ६॥

व्युत्पादयतिवक्ष्यमाणेति अस्मदादिस्थूलशरीरं कार्यान्नमयकोशः ३॥
संति नाग उद्गीर्णकरः कूर्म उन्मीलनकरः कृकलः क्षुत्करः देवदत्तो जृंभणकरो धनंजयः पोषणकर इति वदंति वेदांतिनस्तु तेषां पृथक्कल्पनागौरवाच्छ्रुत्या
दिप्रमाणाभावाच्च प्राणादिष्वंतर्भावं वदंति तैत्तिरीयश्रुत्युक्तानां कार्यकारणरूपाणां पंचकोशानां स्थूलसूक्ष्मकारणोपाधिष्वंतर्भावमाह अन्नमयेति अन्नम
यकोशं विराट्स्थूलशरीरं कारणान्नमयकोश उभयमेकीकृत्य निर्दिशति स्थूलशरीरमिति प्राणमयकोशं व्युत्पादयितुमुक्तसूक्ष्मशरीरे कोशत्रयमंतर्भूतमित्या
ह उक्तमिति। समष्टिव्यष्टिकोशानेकीकृत्य तानेव कोशानऽनुक्रमति कर्मेति अयं विज्ञानमयः कोशः तस्य कर्तृत्वोपाधित्वे प्रमाणमाह विज्ञानमिति आनंदमयको
शं व्युत्पादयितुं सत्ववृत्तिं विभजते अंतःकरणस्येति ततः किमित्यत आह निश्चयवृत्तिमदिति॥ तस्य विज्ञानमयकोशत्वात् तदुपाधिको जीवः कर्ता ज्ञाता प्रमातेति चो

नाडी१ शरीरत्रिकस्य२
अशितपीतान्नपानादिसमीकरणकर्ताऽखिलशिरावर्ती समानः वाक्पाणिपादपायूपस्थाख्यानि कर्मेंद्रियाणि तेषां क्रमेणेत्यादिश्रुतेः अन्नमय
प्राणमयमनोमयविज्ञानमयानंदमयकोशाः पंचात्रैवांतर्भवंति वक्ष्यमाणं स्थूलशरीरमन्नमयः कोशः उक्तं सूक्ष्मशरीरं कोशत्रयात्मकं कर्में
द्रियैः सहितः प्राणः प्राणमयकोशः कर्मेंद्रियैः सहितः मनः मनोमयकोशः ज्ञानेंद्रियैः सहिता बुद्धिर्विज्ञानमयकोशः अयमेव कर्तृत्वोपाधिः
विज्ञानं यज्ञं तनुत इत्यादिश्रुतेः अंतःकरणस्य सत्ववृत्तिर्द्विविधा निश्चयवृत्तिः सुखाकारवृत्तिश्चेति निश्चयवृत्तिमदंतःकरणं बुद्धिरित्युच्यते
सुखाकारवृत्तिमदंतःकरणं भोक्तृत्वोपाधिः तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंदात्मा ब्रह्म पुच्छं प्रतिष्ठा इत्यादिश्रु
तेः अयमेव कारणपर्यंत आनंदमयकोशः केचित्त्वज्ञानमानंदमयकोशं वदंति ॥ ११ च्यते सुखाकारवृत्तिमदंतःकरणस्य भोक्तृत्वोपाधित्वे प्रमा

णमाह तस्येति अयं भोक्तृत्वोपाधिः कारणपर्यंतः अज्ञानपर्यंतः आनंदमयकोशोपाधिकश्चिदात्मा भोक्तेत्युच्यत इति भावः पक्षांतरमाह केचित्त्विति अयं प
क्षश्चिंतनीयः पंचकोशान् व्युत्पाद्य सूक्ष्मशरीरं विभजते इदमिति समष्टिं व्युत्पादयति अपंचीकृतेनेति समष्टिसूक्ष्मशरीरोपाधिकश्चिदात्मा सूत्रादिसंज्ञो भवती
त्याह एतदिति हिरण्यगर्भप्राणसूत्रशब्दानां तद्वाचकत्वे क्रमेण प्रवृत्तिनिमित्तमाह ज्ञानेति ज्ञानं च क्रिया च ज्ञानक्रिये तयोः शक्तिर्ज्ञानक्रियाशक्तिः द्वंद्वांते श्रूय
माणः शक्तिशब्दः प्रत्येकमभिसंबध्यते तथा च ज्ञानशक्तिः क्रियाशक्तिश्चेत्येते यस्य तत् ज्ञानक्रियाशक्तिमत् सूक्ष्मशरीरं तदुपाधिकत्वादित्यर्थः पक्षांतरमाह
श्रुतिविरोधान्नसम्यगिदं प्रलपनमितिचिन्तावीजम्३॥ सोपाधिकचैतन्यस्य२॥

अत्रतु व्यष्टिगतागुणदोषा जन्ममरणादयः समष्ट्युपाध्युपहितेऽपि स्युरिति चन्ताबीजम् २॥

अथवेति किं तत्समष्टित्वं तत्राह समष्टित्वं नामेति उक्तार्थे संमतिमाह तदुक्तमिति तेभ्योऽपंचीकृतपंचभूतेभ्यः सर्वात्मकं सर्वव्यापिकं परमात्मनो गमकत्वाल्लिंगं इदमेव सांख्यैर्महत्तत्त्वमित्युच्यते इत्यभिप्रेत्याह महदिति पश्चात्तरमाह केचित्त्विति अयमपि चिंत्यः व्यष्टिस्वरूपं व्युत्पादयति प्रत्येकमिति व्यष्टित्वं निर्वक्ति व्यष्टित्वं नामेति अस्तु ततः किं तत्राह एतदुपहितमिति तत्र प्रवृत्तिनिमित्तमाह तेजोमयेति तेजोमयं तेजोविकारो यदन्तःकरणं तदेवोपाधिर्यस्य स तथोक्तः तस्य भावस्तत्त्वं तस्मादित्यर्थः समष्ट्युपाधिकहिरण्यगर्भज्ञानव्यष्ट्युपाधिकतैजसज्ञानं च निष्प्रयोजनं सुखप्राप्तिदुःखनिवृत्त्योरसंभवादित्याशंक्य सूत्रतैजसात्मनोरभेदोपासनया हिरण्यगर्भप्राप्तिफलसंभवात्तद्ज्ञानस्य न निष्प्रयोजनत्वमित्यभिप्रेत्य तदनुसंधानोपयोगित्वेन सदृष्टान्तं समष्टिव्यष्ट्योस्तादात्म्यं प्रति

इदं सूक्ष्मशरीरं सप्तदशलिंगं द्विविधं समष्टिव्यष्टिभेदात् अपंचीकृतपंचमहाभूतानि तत्कार्यं सप्तदशलिंगं समष्टिरित्युच्यते एतदुपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते प्राणः सूत्रात्मेति च ज्ञानक्रियाशक्तिमदुपहितत्वात् व्यापित्वाच्च अथवा पूर्वोक्तापंचीकृतभूतेभ्यः सर्वव्यापकं लिंगशरीरं पृथगेवोत्पन्नं तदेव समष्टिरित्युच्यते समष्टित्वं नाम गोत्वादिवत्सर्वत्र व्यष्टिष्वनुस्यूतत्वं तदुक्तं तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं महदिति केचित्तु वनवत् लिंगशरीरसमुदायः समष्टिरिति वदन्ति प्रत्येकं लिंगशरीरं व्यष्टिरित्युच्यते व्यष्टित्वं नाम व्यक्तिवत् व्यावृत्तत्वं एतदुपहितं चैतन्यं तैजस इत्युच्यते तेजोमयान्तःकरणोपाधित्वात् सामान्यविशेषयोरि॥ २१

पृथक्१

पादनेन तदुपहितयोरपि तादात्म्यं प्रतिपादयति सामान्यविशेषयोरिवेति द्रव्यत्वादिसामान्यं पृथिवीजलादिर्विशेषः सत्तासामान्यं द्रव्यं गुणादिर्वा विशेषः घटत्वादिर्जातिः पृथुबुध्नोदराकारघटादिर्व्यक्तिः तत्र यथा सामान्यविशेषयोस्तादात्म्यं सर्वैरभ्युपेयते जातिव्यक्त्योर्वा तथा समष्टिव्यष्टिसूक्ष्मशरीरयोस्तादात्म्यमभ्युपेयते अस्माभिः ननु जातिव्यक्त्योर्वैशेषिकादिभिः समवायाभ्युपगमात्कथं तत्र दृष्टान्तेन समष्टिव्यष्ट्योस्तादात्म्याभ्युपगम इति चेन्न समवायासिद्धेः तथाहि लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायविदां समयः तदभावात्तदसिद्धिः ननु नित्यसम्बन्धत्वं समवायलक्षणं प्रत्यक्षादीनि प्रमाणानीति चेन्यभ्युपगमात्कथं तदसिद्धिरिति चेन्न अद्वैतश्रुतिविरोधेन तदनिरूपणात् तथाहि श्रुतिस्तावत् सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मणोऽनन्तत्वमद्वितीयत्वं च प्रतिज्ञाय तत्सिद्ध्यै तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत यतो वाइमानि

संकेनः३॥

नित्यत्वस्य ५॥ वाचारम्भणंविकारोनामधेयमित्याद्यारम्भणशब्देभ्यः कारणकार्ययोरनन्यत्वमभिन्नत्वमिति॥ शा०॥ सू०॥ १॥

भूतानिजायंते आनंदोब्रह्मेतिव्यजानात् आनंदाद्ध्येवखल्विमानिभूतानिजायंते इत्यादिनाब्रह्मव्यतिरिक्तस्यजगज्जातस्यतस्मादुत्पत्तिंतस्मिंल्लयंचप्रतिपाद्यैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिसयश्चायंपुरुषेयश्चासावादित्येसएकइत्यादिनाब्रह्मणोऽद्वितीयत्वंप्रतिपादयंतिसा समवायस्यनित्यत्वेविरुध्येत अतोनित्यसंबंधत्वलक्षणमित्यसंगतमेतत् ननु अज्ञानतत्संबंधादीनामनादित्वादनादिभावस्यनित्यत्वनियमात्कथंब्रह्मणोऽद्वितीयत्वमितिचेद्बाढं अज्ञानादीनामध्यस्तत्वेनतेषामधिष्ठानमात्रतयाब्रह्मणोऽद्वितीयत्वोपपत्तेः नचानादिभावस्यनित्यत्वनियमः तस्यारोपिततत्वेनज्ञाननिवर्त्यत्वात् अनारोपितस्यानादिभावस्यनतथात्वस्येष्टत्वात् नचनद्वैतंताद्वितीयसिद्धयेप्रपंचस्यब्रह्मकार्यत्वप्रतिपादनमसंगतमिति वाच्यं नहि वयंप्रागऽसतःसत्तायोग्यत्वमाद्यक्षणसंबंधित्वंवाकार्यत्वंब्रूमस्तयोरसंगतत्वात् नापिपरिणामित्वमसंभवात् किंतर्हि विवर्तापरनामाध्यस्तत्वंब्रह्मकार्यत्वेचेति ब्रूमः एवंचसति एतदात्म्यमिदंसर्वंवाचारंभणंविकारोनामधेयं तदनन्यत्वमारंभणशब्दादिभ्यः इत्यादि श्रुतिसूत्राणिसामंजस्येनोपपद्यंते अन्यथाऽसंगतानिस्युः तस्माद्ब्रह्मव्यतिरिक्तस्यसर्वस्य

वजानित्यक्तयोरिवचसमष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्तदुपहितयोस्तैजससूत्रात्मनोरपितादात्म्यं एतदेवसूक्ष्मशरीरं ॥ ॥

नन्वज्ञाननिवर्त्यतयाऽनित्यत्वावगमान्नित्यसंबंधत्वंसमवायलक्षणमित्यसंगतं किंचसमवायः समवायिभ्यांभिन्नोऽभिन्नोवा आद्येपिसमवायः समवायिनिकेनसंबंधेनवर्तते संयोगेनसमवायेनान्येनवा नाद्यः द्रव्यधर्मत्वात्संयोगस्य नद्वितीयः अनवस्थाप्रसंगात् नतृतीयः संबंधांतरानिरूपणात् स्वरूपसम्बन्धस्याप्रामाणिकत्वात् अन्यथासमवायासिद्धिप्रसंगात् नापिद्वितीयः अपसिद्धांतापत्तेः तस्मात्तत्स्वरूपस्यदुर्निरूपत्वात्तदसिद्धिः एवंप्रमाणाभावादपिसमवायासिद्धिः तथाहि नतावत्प्रत्यक्षंप्रमाणमतींद्रियत्वात्समवायस्य घटेरूपंसमवेतमित्यादिप्रतीतेर्वादिकल्पिततयासर्वसंमतत्वाभावेनाप्रमाणत्वात् नापितत्रानुमानंप्रमाणंलिंगाभावात् नचविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धविषयाविशिष्टबुद्धित्वादित्यनुमानेनतत्सिद्धिरितिवाच्यं अनुमानस्यार्थान्तरत्वात् तस्माल्लक्षणप्रमाणयोरनिरूपणात् समवायासिद्धेर्जातिव्यक्त्योः सामान्यविशेषयोर्वासर्वत्रतादात्म्यमेवसंबंधइतिसिद्धं अतस्तद्दृष्टांतेनसमष्टिव्यष्टिसूक्ष्मशरीरयोस्तादात्म्यप्रतिपादनंयुक्तमेव नचव्यष्टिसूक्ष्मशरीरस्यभौतिकतयासमष्टिसूक्ष्मशरीरोपादानत्वाभावात्कथंतयोस्तादात्म्यमितिवाच्यं अपञ्चीकृतभूतानांहिरण्यगर्भोपाधिभूतसमष्टिसूक्ष्मशरीरांतर्भावेनव्यष्टिसूक्ष्मशरीरस्यतदुपादानत्वात्तयोर्हि स्तादात्म्योपपत्तेः अथवासमष्टिकरणानामेवाध्या

तादात्म्यपरत्वात्३॥

संवंध १॥

अग्निः वाक् वाक्

काऽऽसंगपरिच्छेदाभिमानेनव्यष्टित्वमस्तुसर्वैवाचमेवप्रथमामत्यवहन् सोयदामृत्युमत्यमुच्यतसोऽग्निरभवदित्यादिश्रुतेः तथाचसमष्टिव्यष्टिलिंगशरीरयोस्तादात्म्यमुपपद्यते एवंचानयोस्तादात्म्यादेः तदुपहितनैजससूत्रात्मनोरपितादात्म्यंभवतिभिन्नत्वेसतिअभिन्नसत्ताकत्वंतादात्म्यं ततश्चहिरण्यगर्भोहंग्रहोपास्त्या तत्प्राप्तासर्वोत्कृष्टानंदावाप्तिःप्रयोजनंसंभवतीतितद्ज्ञानमर्थवदितिभावः पुर्यष्टकेनलिंगेनप्राणाद्येनसंयुज्यतइतिश्लोकोक्तपुर्यष्टकशब्दार्थंप्रक्रियांतरमाह एतदेवेति ननुकेयमविद्येत्यतआह तत्रेति कार्याविद्यांविभजते साचेति चातुर्विध्यमेवाह अनित्येइति असुखेसुखभिन्नेदुःखेतत्साधनेसुखबुद्धिरितितत्साधनबुद्धेरप्युपलक्षणं तत्रयोगशास्त्रसंमतिमाह तदुक्तमिति सूत्रंव्याचष्टे अस्यार्थइति तत्त्वशोकमहिमंतस्मिन्नसतिशाश्वतीःसमाइत्यादिश्रुत्याब्रह्मलोकस्यनित्यत्वावगमात्कथमनित्यत्वं तत्रतस्यकर्मसाध्यत्वेनलौकिककृष्यादिफलवदंतवत्तुफलंतेषामित्यादिस्मृत्यातद्यथेहकर्मचितोलोकःक्षीयतएवमेवामुत्रपु

अविद्याकामकर्मसहितंपुर्यष्टकमित्युच्यते ज्ञानेंद्रियपंचकंकर्मेंद्रियपंचकंअंतःकरणचतुष्टयंप्राणादिपंचकंभूतसूक्ष्मपंचकंअविद्या कामःकर्मचेतान्यष्टौतत्रकार्याविद्याद्रष्टव्या साचतुर्विधा अनित्येनित्यत्वबुद्धिः अशुचौशुचित्वबुद्धिः असुखेसुखत्वबुद्धिः अनात्मन्यात्मबुद्धिश्चेति तदुक्तं अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्येति ॥ ऽऽण्यचितोलोकःक्षीयतइत्यादिश्रुत्यावानित्यत्वमवगम्यत इतिवाच्यं उपासनाविधेरप्रामाण्यप्रसंगात्॥ यथास्वर्गादावनित्यत्वदोषदर्शनेनस्वर्गतत्साधनेच्छानिवृत्याप्रवृत्तिनिरोधेननित्यफलोद्देशेनतत्साधनेऽप्रवृत्तिरेवंब्रह्मलोकादावनित्यत्वदोषदर्शनेनतदुद्देशेनतत्साधनानुष्ठानेप्रवृत्तिनिरोधात्सर्वेषामन्यत्रप्रवृत्तिप्रसक्त्योपासनाविधायिशास्त्राप्रामाण्यंप्रसज्येत ननुतदिष्टंब्रह्मलोकातिरिक्तनित्यफलेमानाभावात् अन्यत्रापिदोषदर्शनेनप्रवृत्तिनिरोधात्संदिहानःसर्वोपिलोकोनर्थंप्राप्नुयात् मोक्षशास्त्रंसर्वमनर्थकंप्रसज्येतेत्यतःकेवलकर्मसाध्यस्यानित्यत्वेपियथोक्तशास्त्रप्रामाण्यान्नज्ञान कर्मसमुच्चयसाध्यस्यब्रह्मलोकस्यनित्यत्वमभ्युपगंतव्यं एवंचसतिश्रुतिस्मृत्योश्रुत्यंतरविरोधादितरविषयेव्याख्येयेतस्माद्ब्रह्मलोकस्यानित्यत्वकथनमसंगतमेवेत्यतआहभूम्नःनित्यत्वप्रतिपादकश्रुतेरर्थवादत्वाद्ब्रह्मलोकोऽनित्यएव तथाहिपूर्णाहुत्यासर्वान्कामानवाप्नोतीतिवचनस्यविध्यपेक्षिततयाइतरकर्मविध्यानर्थक्यप्रसंगेनचयथार्थवादत्वंतथाऽस्यापितथात्वमेवतथाचोपासनाविधिस्तन्नित्यत्वम

पेशः स्वर्णं तत्करोतीति पेशस्कारी स्वर्णकार इत्यर्थः भृङ्ग्याख्यजन्तुविशेष इत्यपि केचित्॥७॥

पेक्ष्यते किं तर्हि फलमात्रं अन्यथा स्वर्गादिसाधनविधेरपि तथात्वेन कर्मफलानां तारतम्याभावप्रसंगेनाग्निहोत्राद्यनुष्ठानुरुत्तरकालकर्मानुष्ठाने उपासनायां च प्रवृत्तिर्न स्यात् नो विधिः फलमेवापेक्षते न तु नित्यत्वमपि न च ब्रह्मलोकस्यानित्यत्वदोषदर्शनेन तत्साधनोपासनायामप्रवृत्त्या तद्विधायकशास्त्रस्याप्रामाण्यमानर्थक्यं च प्रसज्ज्येतेति वाच्यं तर्हि कर्मविधायकशास्त्रस्यापि तथात्वप्रसंगात् न च कर्मफलानित्यत्वज्ञानेपि रागवशात्प्रवृत्तिसंभवेन कर्मशास्त्रस्य नाप्रामाण्यमानर्थक्यं चेति वाच्यं तर्हि प्रकृतेपि तुल्यत्वात् किं च तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिश्रुतेः श्रवणाविध्यपेक्षते न तथाभूतार्थवादत्वेन स्वर्गार्थवादवत् स्वार्थे प्रामाण्यसंभवेन पुण्यकार्यस्य ब्रह्मलोकांतस्यानित्यत्वमेव न च ब्रह्मलोकस्य विद्यासाध्यत्वेन कर्मफलवैलक्षण्येन नित्यत्वमिति वाच्यं तत्वविद्याया ब्रह्माभिन्नसर्वनिवर्तकत्वेन तत्साधनत्वाभावादुपासनायास्तु मानसक्रियारूपत्वेन पुण्यांतर्भूततया तत्साध्यब्रह्मलोकस्यानित्यत्वं स्यादेव किं च तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्य अविद्यां गम-

अस्यार्थः अनित्ये ब्रह्मलोकादिसंसारफले नित्यत्वबुद्धिरेकाऽविद्या द्रष्टव्या ॥ ६ ॥ ६ ॥

यित्वान्यत् नवतरं रूपं कल्याणतरं रूपं कुरुते पैत्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेत्यादिना ब्रह्मलोकांतस्य सर्वस्य कर्मफलत्वेन संसारगोचरत्वमुक्ता अथाऽकामयमान इत्यारभ्य ब्रह्माप्येतीत्यंतेन संसारासंस्पृष्टमविद्याकामकर्मातीतं ब्रह्मभावं मोक्षं नित्यफलं ब्रह्मलोकातिरिक्तं दर्शयति श्रुतिः अतस्तदतिरिक्तनित्यफले मानाभाव इत्युन्मत्तप्रलापः किं च यो भूमा तदमृतमथ यदल्पं तन्मर्त्यं मनोऽन्यदार्तं अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवंति महात्मानः संसिद्धिं परमां गताः आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन इत्यादिश्रुतिस्मृतिभिरखंडैकरसब्रह्मभावव्यतिरिक्तस्यानित्यत्वदुःखहेतुत्वावगमात् ब्रह्मलोकस्यानित्यत्वमेव अपि च यत्कार्यं तदनित्यमिति व्याप्त्या भावकार्यस्य सर्वस्यानित्यत्वावगमात् ब्रह्मलोकस्यापि कर्मसाध्यत्वेन भावकार्यत्वेनानित्यत्वं स्यादेव तस्मादशोकमहिमभित्यादिवाक्यानां न्यायशून्य

अर्थवादस्त्रिविधा गुणवादोऽनुवादो भूतार्थवादश्चेति प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः यथा आदित्यो यूप इत्यादि यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते॥ प्रमाणान्तरावगतार्थबोधकोऽनुवादः यथा अग्निर्हिमस्य भेषजम् इत्यत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात्॥ प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको वादो भूतार्थवादः यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि॥ १०॥ १० ॥ १० ॥ ॥

शुक्रशोणितेबीजंमातृगर्भःस्थानंमूत्रादिभ्योधारणमुपष्टम्भः आस्यनासादितोमलप्रस्रवणंनिस्यन्दः चरमप्राणवियोगोनिधनं आगन्तुकपवनमाधेयशौच्यमित्येतेभ्योहेतुभ्यः पण्डिताःकायमशुचिमनुमिमतेइत्यर्थः॥२॥

तस्यब्रह्मणोऽधिगमे उत्तराघस्याश्लेषः पूर्वाघस्यविनाशःकुतस्तद्व्यपदेशात् तयोरश्लेषविनाशयोर्व्यपदेशात् अश्लेषस्यतद्यथापुष्करपलाशइत्यादिनाविनाशस्यतद्यथेषीकातूलइत्यादिनृस्मादिति॥शा०॥सू०॥१४॥

तयाविध्यपेक्षितत्तयाचगुणार्थवादत्वाद्ब्रह्मलोकस्यश्रुतिस्मृतिन्यायैरनित्यत्वावगमाच्च तस्मिन्नित्यत्वबुद्धिरविद्येतिनिरवद्यमूत्रमलपूर्णत्वाच्छरीरस्याशुचित्वं तदुक्तंबीजात्स्थानादुपष्टंभान्निस्यन्दान्निधनादपिकायमाधेयशौचत्वात्पंडिताह्यशुचिंविदुरिति अन्यत्रापि अमेध्यपूर्णंकृमिजालसंकुलंस्वभावदुर्गंधमशौचमध्रुवंकलेवरंमूत्रपुरीषभाजनंरमंतिमूढानरमंतिपंडिताइतिऽतोऽशुचौशुचित्वबुद्धिरविद्येत्याह अशुचिष्विति शुचित्वंनिर्मलत्वंप्रतिकूलवेदनीयंपीडात्मकंदुःखंतत्साधनंब्रह्महननापेयपानादि अनुकूलवेदनीयंप्रीत्यात्मकंसत्ववृत्तिरूपंसुखंतत्साधनंब्रह्मपूजनंगंगाजलपानादि दुःखतत्साधनेषुसुखतत्साधनभ्रमंमुचुकुंद आह विमोहितोयंजनईशमाययात्वदीययात्वांनभजत्यऽनर्थदृक् सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पुरुषश्चवंचितइति इयमस्माकंसर्वेषांप्रत्यक्षसिद्धाचेत्यतोदुःखादिषुसुखादिबुद्धिरविद्येतितदुक्तमित्याह दुःखेतिशेषस्पष्टार्थं अविवेकेनाहंकारचिदात्मनोस्तादात्म्याध्यासपूर्वकमिदंमेभूया

अशुचिषुस्वशरीरपुत्रभार्यादिशरीरेषुशुचित्वबुद्धिरपरादुःखेषुदुःखसाधनेषुसुखतत्साधनबुद्धिरन्या अनात्मनिदेहादिष्वहमित्यात्मबुद्धिरितराचेति अविद्याचतुर्विधेतिकामोरागः कर्मत्रिविधंसंचितमागामिप्रारब्धंचेति स्वकृतफलमदत्वा अदृष्टरूपेणविद्यमानंसंचितंकर्मयथासंध्यावंदनाग्निहोत्रादि आगामि अस्मिन् शरीरेक्रियमाणंकर्म वर्तमानशरीरारंभकंप्रारब्धंकर्मसंचितागामिकर्मणोः॥

दितिजायमानांतःकरणवृत्तिविशेषोरागःकर्मविभजतेकर्मेति त्रैविध्यमेवाह संचितमिति संचितंनिरूपयति स्वेति तदुदाहरति यथेति तत्त्वज्ञानादूर्ध्वंक्रियमाणंकर्मागामीत्यभिप्रेत्याहागामीति प्रारब्धकर्मलक्षयति वर्तमानेति। अवश्यमेवभोक्तव्यंकृतंकर्मशुभाशुभंनाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपिप्रायश्चित्तैरपैत्येतो यदज्ञानकृतंभवेत् कामतोव्यवहार्यस्तुवचनादिहजायते क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे तरतिशोकंतरतिपाप्मानंसर्वंपाप्मानंतरति ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुते तथासर्वपापप्रसक्तोपिध्यायन्निमिषमच्युतंभूयस्तपस्वीभवतिपंक्तिपावनपावनः परोक्षब्रह्मविज्ञानंशाब्दंदेशिकपूर्वकं बुद्धिपूर्वकृतंपापंकृत्स्नंदहतिवह्निवत् प्रारब्धंभोगतोनश्येच्छेषंज्ञानेनदह्यते इतरदितियंकर्मतद्द्वेषिप्रियवादिनोः॥ तदधिगमेउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात् ।१। इतरस्याप्येवमसंश्लेषःपातेतु।२। भोगेनत्वितरेक्षपयित्वासंपद्यतइत्यादिश्रुतिस्मृतीतिहासपुराणन्यायैः संचितागामिनोः फलभोगविरोधिकर्मब्रह्मज्ञानेना

इतरस्यसुकृतस्यापिदुष्कृतस्येवमहासंश्लेषःएतदुपलक्षणंविनाशस्यापिउभेउहैवैषएतेतरतीत्यादिश्रुतेःतुशब्दोऽवधारणार्थःपातेशरीरस्यपतनेनतथाचेदंसिद्धंशरीरस्यपातेविदुषोमुक्तिर्भवत्येवेति॥शा०॥सू०॥१॥

इतरेसुकृतदुष्कृतेआरब्धकार्येभोगेनैवक्षपयित्वानन्तरंब्रह्मसंपद्यतेतस्यतावदेवचिरमित्यादिश्रुतेरिति॥शा०॥सू०॥१॥

श्यत्वंप्रारब्धस्यभोगैकनाश्यत्वमित्याह संचितेति नचसंचितस्यकर्मणःप्रायश्चित्तज्ञानाभ्यांनाशोस्तुआगामिकर्मणःकथंनाशःस्यात्तस्यतदानीमनुत्पन्नत्वा
दितिवाच्यं तस्याप्यश्लेषसंभवेनफलाजनकतयानष्टप्रायत्वादितितात्पर्येणनकेवलंब्रह्मसाक्षात्कारेणकर्मनाशःकिंत्वविद्यादिसर्वबंधनिवृत्तिर्भवतीत्याह किं
मिति केतेपंचक्लेशाइत्याकांक्षायांतान्निरूपयितुमाह तत्राहीति पतंजलिसूत्रंपठति अविद्येति तत्राविद्यापूर्वमेवनिरूपितेत्याह कार्येति अस्मितांनिरूप-
यति अहंकारस्येति सूक्ष्मावस्थाकारणावस्थेत्यर्थः कपिलपतंजलिभ्यामिदमेवमहत्तत्वमित्युच्यते वेदांतिभिःसामान्याहंकारइत्युच्यते ताभ्यांप्रकृतेर्महान्मह-
तोहंकारइतिसृष्टिक्रमाभ्युपगमादस्माभिर्व्यष्ट्यऽहंकारस्यसामान्याहंकारापर्यायभूतस्यसूक्ष्माकाशादिसात्विकांशसमुदायादुत्पत्तिस्वीकारात् व्यष्ट्यहं-

फलभोगेनविरोधिकर्मांतरेणवाब्रह्मज्ञानेनवाविनाशःप्रारब्धस्यतुभोगेनैवविनाशःकिंबहुनाप्रारब्धव्यतिरिक्तानांअविद्यादीनांपं-
चक्लेशानांतत्वज्ञानान्नाशः तथाहि अविद्यास्मितारागद्वेषाभिनिवेशाःपंचक्लेशाःकार्यकारणरूपाद्विविधाविद्यानिरूपिता। अहं-
कारस्यसूक्ष्मावस्थाऽस्मिता इदमेव महत्तत्वंसामान्याहंकारइतिचोच्यते रागउक्तः द्वेषःक्रोधःस्वीकृतस्यपुनस्त्यागासहिष्णुत्वंअभि-
निवेशः एतेषांपंचानांब्रह्मसाक्षात्कारान्निवृत्तिः ज्ञात्वादेवंमुच्यतेसर्वपाशैरित्यादिश्रुतेः पाशैः पंचक्लेशैरित्यर्थः निवृत्तुनावप्रासंगिकं
एवंसूक्ष्मशरीरोत्पत्तिनिरूपितापंचीकृतभूतानिस्थूलभूतानि ॥

ऽऽ कारसूक्ष्मावस्थासामान्याहंकारोवक्तुंशक्यतेनेनचतत्रप्रमाणाभावःपूर्वमे
वोक्तत्वादितिभावः तत्रप्रमाणमाह ज्ञात्वेति आदिशब्देनतद्योवेदनिहितंगुहायांसोऽविद्याग्रंथिंविकिरतीहसोम्यगुहाग्रंथिभ्योविमुक्तोऽमृतोभवति॥ यदा
सर्वेप्रमुच्यंते कामायेस्यहृदिस्थिता अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते॥ इत्यादिश्रुतयोगृह्यंतेस्मृतिरपिज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनइत्या
दिर्ज्ञात्वादेवंसर्वपाशापहानिः क्षीणैःक्लेशैर्जन्ममृत्युप्रहाणिरितिवाक्यशेषानुरोधेनोदाहृत्य श्रुतिंव्याचष्टे पाशैरिति अस्यार्थः देवंस्वप्रकाशमहंब्रह्मास्मी
तिसाक्षात्कृत्याविद्यास्मितारागद्वेषाभिनिवेशैःपंचभिःक्लेशापरपर्यायपाशशब्दाभिधेयैर्मुच्यतेइत्यर्थः एतत्सर्वमभिप्रेत्यभगवतावार्तिककाचार्येणाप्यु
क्तं यःपश्येत्सर्वगंशांतमानंदात्मानमद्वयं नतेनकिंचिदाप्तव्यंज्ञातव्यंवावशिष्यते कृतकृत्योभवेद्विद्वान्जीवन्मुक्तोभवेत्सदेतिप्रासंगिकंपरिसमाप्यप्रकृ-

81

नमनुसरति निष्टत्विति प्रसंगादागतं प्रासंगिकं उपसंहरत्येवमिति एवमुक्तरीत्या यथोक्तक्रमेणेतियावत् एवं वार्त्तिककृदपि सृष्टिक्रममाह स्म आसीदेकं परं ब्रह्म नित्यं मुक्तमविक्रियं तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकं तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकं स्पर्शात्मकस्ततो वायुस्तेजोरूपात्मकं ततः॥ आपो रसात्मकास्तस्मात्ताभ्यो गंधात्मिका मही शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः शब्दस्पर्शरूपरसगंधैः पंचगुणा मही तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं महदिति तेभ्योऽपंचीकृतभूतसात्विकांशराजसांशेभ्यः समष्टिव्यष्ट्यात्मकं लिंगशरीरमुत्पन्नमित्यर्थः एवं सूक्ष्मशरीरोत्पत्तिं सप्रपंचां निरूप्य स्थूलभूतोत्पत्तिं वक्तुं तानि लक्षयति पंचीकृतेति तान्यपंचीकृतभूतानां तामसांशेभ्यो जायंत इति शेषः पंचीकरणप्रक्रियामनुभाषते पंचीकरणं त्विति ननु छांदोग्ये तेजोऽबन्नानां सृष्टिमुक्त्वा त्रिवृत्करणप्रतिपादनात्पंचीकरणप्रक्रियाव्युत्पादनम

पंचीकरणं तु पूर्वोक्तानामाकाशादीनां तामसांशान् एकैकं द्विधा समं विभज्य तत्र एकैकं पुनश्चतुर्धा विभज्य स्वांशं परित्यज्य इतरांशेषु योजनं पंचीकरणं तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणश्रुतेः पंचीकरणस्याप्युपलक्षणत्वात् पंचीकरणं प्रामाणिकं। मेव वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेन स्वांशभूयस्त्वाद्विशेषव्यपदेशोपि संभवति ॥ ११

संगतं तत्र प्रमाणाभावात् न च सृष्टिपरिपूर्त्तये भूतत्रयसर्गश्रुतेर्वियदधिकरणन्यायेन तैत्तिरीयश्रुत्यनुसारेण चाकाशं वायुं सृष्ट्वा तेजोऽसृजतेति व्याख्यानत्वेन पंचीकरणस्याप्युचितत्वादिति वाच्यं त्रिवृत्करणेनापि सर्वव्यवहारोपपत्तेरित्याशंक्याह तासामिति तासां पृथिव्यप्तेजोरूपाणां मध्ये एकैकां देवतां त्रिवृतं यथा भवति तथा करवाणि एषात्र प्रक्रिया पृथिव्यप्तेजसां त्रयाणां भूतानां मध्ये एकैकं भूतं द्विधा विभज्य तत्राप्येकं भागं द्विधा विभज्य स्वांशं परित्यज्येतरयोर्योजनीयं त्रिवृत्करणं एतदभिप्रायेण सूत्रकारोप्याह संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशादिति श्रुतिसूत्रप्रसिद्धत्वेन भूतानां त्रिवृत्करणमेव न पंचीकरणमिति वाच स्यादिति भावः २ आचार्यास्तु छांदोग्यश्रुतौ पंचभूतसर्गविवक्षायां त्रिवृत्करणमेव न पंचीकरणमिति प्रतिपादने प्रकरणविरोधप्रसंगात् आकाशवाय्वोः शब्दस्पर्शानुपलब्धिप्रसंगाच्चानिच्छतापि पंचीकरणमवश्यमुपगंतव्यं यदि पंचीकरणाभावेपि आकाशवाय्वोः शब्दस्पर्शोपलब्धिः स्यात्तर्हि तद्वदेव त्रिवृत्करणाभावेपि तेजोबन्नेषु रूपाद्युपलब्धिप्रसं।

त्रिवृत्कुर्वतः परमेश्वरस्यैव संज्ञामूर्तिक्लृप्तिः नामरूपव्याकरणं कार्यं भवितुमर्हति कस्मात्सेयंदेवतेत्युपक्रम्य व्याकरवाणीति व्याकरणस्य परदेवताकर्तृकत्वोपदेशादिति॥ शा॰भा॰सू॰॥ ३॥

दधिमंडाकारःपरिणामः ५॥

त्याव्यवहारोपपत्तौत्रिवृत्करणमपिनसिद्ध्येत् ननस्वश्रुतेरप्रामाण्यंप्रसज्येत्तत्स्वश्रुतेरप्रामाण्यपरिहारायसर्वत्रव्यवहारोपपत्तेश्चश्रुतिसूत्रयोः पंचीकरणंविविक्षितमेवेतित्रिवृत्करणश्रुतिसूत्रयोः पंचीकरणस्याप्युपलक्षणत्वात्पंचीकरणंप्रामाणिकमित्याहुः ननुयदिपंचीकरणेनसर्वेषांभूतानामेकीभावस्तर्हीयंपृथिवीदंजलमित्यादिविशेषव्यपदेशः कथंस्यादित्याशंक्यसूत्रेणपरिहारमाह वैशेष्यादिति विशेषस्यभावोवैशेष्यंस्वांशभूयस्त्वंतस्मात्तद्वादः इयंपृथिवीदंजलमितिविशेषव्यपदेशइतिसूत्रार्थः उक्तमेवार्थमनुसंदधातिस्वांशेति पंचीकरणस्यप्रयोजनमाह एवंचेति पंचीकरणेकृते सतीत्यर्थः॥ आकाशेपंचीकृताकाशेएवंसर्वत्रद्रष्टव्यं आपोवार्कस्तद्यदपांशर आसीत्तत्समहन्यतसापृथिव्यभवत्तस्यामश्राम्यत्तस्यतप्तस्यतेजोरसोनिव

एवंचसति। आकाशेशब्दोभिव्यज्यते वायौशब्दस्पर्शौतेजसिशब्दस्पर्शरूपाणिजलेशब्दस्पर्शरूपरसाः ————————
———— पृथिव्यांशब्दस्पर्शरूपरसगंधाः तथाच पंचीकृतपृथिव्याः ब्रह्मांडमुत्पन्नंतदंतर्वर्तिलोकाः चतुर्दशब्रह्मांडान्मनुशतरूपेजाते ब्रह्मांडांतर्वर्तिपृथिव्याः ओषधय उत्पन्नाः ओषधिभ्योऽन्नंपितमातृभ्यांभुक्तान्नपरिणामरेतः शोणितद्वारास्थूलशरीरमुत्पन्नंतच्चतुर्विधंजरायुजमंडजंस्वेदजमुद्भिज्जंचेति मनुष्यादिशरीरंजरायुजंपक्षिपन्नगादिशरीरमंडजंयूकामशकादिशरीरंस्वेदजंतृणगुल्मादिशरीरमुद्भिज्जं उक्तंस्थूलशरीरंपुनः प्रकारांतरेणद्विविधंसमष्टिव्यष्टिभेदात्॥

ऽ तेनाग्निरितिश्रुतिमाश्रित्यपंचीकृतपृथिव्याः ब्रह्मांडोत्पत्तिमाह तथेतिसवैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत्सह नावतासयथास्त्रीपुमांसौसंपरिष्वक्तौसइममेवात्मानंद्वेधापातयत्ततः पतिश्चपत्नीचाभवतामितिश्रुतिमाश्रित्यब्रह्मांडान्मनोविराट्पुरुषात् मनुशतरूपयोरुत्पत्तिमाह ब्रह्मांडादितिपृथिव्या ओषधयः ओषधिभ्योऽन्नंअन्नात्पुरुषइति श्रुत्युक्त।
अर्कनाम्नः सूर्यप्रसिद्धेस्तद्बलादपशब्दोपि तत्परएवकिंनस्यादितिशंकापनुत्तयेप्रागुक्तमपामर्कनामत्वमनुवदन्ताभ्यःपृथिवीसृष्ट्यादिकमाह आपोवार्क इतिवैअवधारणेआपएव अत्रार्कोनादित्यइत्यर्करूढितोपिवाचनिकयोगस्यानवकाशतयाप्राबल्येनापामेवार्कनामा अर्चतोवैमइतिप्रागुक्तनिरुक्तिबलात् उक्तंहिकंपनादित्यत्ररूढितोपिवाचनिकयोगस्यप्राबल्यंतद्यदपांतत्रासां अपांयत्शरःमंडआसीत्तत्सशरः समहन्यतनिविडोभवत् सेतिविधेयापेक्षयास्त्रीलिंगनिर्देशः संहतशरःपृथिव्यभवत् तस्यांस्वसृष्टायांपृथिव्यां अश्राम्यदंतर्यामितयाप्राविशत्तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः अग्निर्मेस्यादित्यनपृच्चेतिशेषः तस्यश्रांतस्यतप्तस्याग्निर्मेस्यादितिचिंतयतः तेजोरसः तेजसःसामर्थ्यस्यरसःसारभूतोबलदेवतारूपोग्निः अग्रजत्वादग्रणीत्वात् अंगिनांनेतृत्वादग्निनामामुख्यवायुःनिरवर्ततउदपद्यतेतिश्रुत्यर्थः॥ ८ ॥ ८ ॥ ॥

क्रममाश्रित्य पृथिव्याः सकाशादोषध्याद्युत्पत्तिक्रमेण स्थूलशरीरोत्पत्तिमाह ब्रह्मांडांतर्वर्तीति स्थूलशरीरं विभजते तदिति जरायुजादीनि दर्शयति मनुष्य पश्वादीति प्रकारांतरेण स्थूलशरीरं विभजते उक्तमिति समष्टिस्थूलशरीरं व्युत्पादयति पंचीकृतेति पक्षांतरमाह अथवेति तत्रैव मतांतरमाह तनव।दिति ततः किं तत्राह एतदेति समष्टिस्थूलशरीरोपहितचैतन्ये विराड्वैश्वानरशब्दयोः प्रवृत्तिनिमित्तमाह विविधेति व्यष्टिस्वरूपं व्युत्पादयति प्रत्येकमिति व्यष्टिस्थूलशरीरोपहितचैतन्यस्य विश्वसंज्ञामाह एतदिति तत्र युक्तिमाह सूक्ष्मेति ननु समष्टिस्थूलशरीरोपाधिकवैश्वानरज्ञानं व्यष्टिस्थूलशरीरोपाधिकविश्वज्ञानं च निष्प्रयोजनं सुखदुःखप्राप्तिपरिहारयोरसंभवादित्याशंक्य विश्ववैश्वानरयोरभेदोपासनया वैश्वानरप्राप्त्या तदानंदावाप्तिप्रयोजनं संभवादित्यभिप्रेत्य तदुपासनोपयोगित्वेन ———— समष्टिव्यष्टिस्थूलशरीरयोस्तादात्म्यप्रतिपादनेन तदुपहितयोरपि तादात्म्यं प्रतिपादयति अनयोरिति

पंचीकृतपंचमहाभूततत्कार्यं ब्रह्मांडं तदंतर्वर्ति कार्यं सर्वं समष्टिरित्युच्यते अथवा व्यक्तिषु गोत्वादिवत् सर्वव्यष्टिष्वनुस्यूतं पंचीकृतभूतकार्यं ब्रह्मांडात्मकं व्यापकं समष्टिः वनवत् सकलस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते एतदुपहितं चैतन्यं विराट् वैश्वानर इति चोच्यते विविधं राजमानत्वात् सर्वनराभिमानित्वाच्च प्रत्येकं स्थूलशरीरं गवादिव्यक्तिवद्व्यावृतं व्यष्टिरित्युच्यते एतदुपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरे प्रविष्टत्वात् ॥ २१

यथा सत्तासामान्यद्रव्यादिविशेषयोस्तादात्म्यं समवायस्य पूर्वमेव निराकृतत्वात् तथा व्यष्टिस्थूलशरीरस्य समष्टिस्थूलशरीरांतर्गतपंचीकृतभूतकार्यत्वेनोपादानोपादेयसंभवात्तयोस्तादात्म्यात्तदुपहितयोरपि विश्ववैश्वानरयोस्तादात्म्यं एवमनयोर्भेदासंभवादभेदं समादाय —— अहमेव वैश्वानरोऽस्मीति अभेदोपासनया तत्साक्षात्कारेण तदानंदावाप्तेः संभवात् ज्ञानं सप्रयोजनमिति भावः अथवा श्रुत्युक्तप्रकारेण विश्ववैश्वानरतैजससूत्रात्मप्राज्ञेश्वरान् ज्ञात्वा प्रथमं विश्वं वैश्वानरात्मत्वेनाहमेव वैश्वानरोऽस्मीति विभाव्य ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मास्मीति विभाव्यानंतरं प्राज्ञमीश्वरात्मत्वेनाहमेवेश्वरोऽस्मीति विभाव्यानंतरं समष्टिस्थूलसूक्ष्मकारणोपाधिकमोंकारवाच्यं परं ब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य पश्चान्मनसैकाग्रतामापन्ने सति सर्वं जगत्स्थूलसूक्ष्मादिक्रमेण निर्विशेषे चिन्मात्रेऽखंडैकरसानंदे परब्रह्मणि विला

संमुख५॥ रहित३॥

अ.कौ. प्र. २३

प्यनुदर्नंनरमेकाग्रेणमनसास्वस्याखंडैकरसब्रह्मानंदात्मतांसाक्षात्कुर्यादित्यभिप्रायेणसमष्टिव्यष्ट्योस्तादात्म्यनिरूपणेनतदुपहितयोस्तादात्म्यनिरूपणंकृते तदुक्तं समाधिकालात्प्रागेवंविचिंत्यातिप्रयत्नतः स्थूलसूक्ष्मक्रमात्सर्वंचिदात्मनिविलापयेदिति कल्पनवाचार्यैरप्युक्तंनिर्विशेषंपरंब्रह्मसा। क्षात्कर्तुमनीश्वराः येमंदास्तेऽनुकंप्यंतेसविशेषनिरूपणैः वशीकृतेमनस्येषांसगुणब्रह्मशीलनात् तदेवाविर्भवेत्साक्षा— दपेतोपाधिकल्पनमिति एतदभिप्रायाश्रुतिरपि एषसर्वेषुभूतेषुगूढात्मानप्रकाशते दृश्यते त्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरिति तस्माद्वैश्वानरादिज्ञानमर्थवदित्यर्थः ननुव्यष्टि। स्थूलसूक्ष्मकारणाभिमानिनोविश्वतैजसप्राज्ञाः संसारिणः प्राक्निरूपितास्तेकिंस्वतंत्राजीवाः आहोस्विदेकस्यैवावस्थाविशेषाः नाद्यः सर्वेषांस्वतंत्रतया परस्परभेदाभ्युपगमेसुषुप्तिस्वप्नयोरनुभूतस्यपदार्थस्यजाग्रदवस्थायांविश्वस्यस्मरणाभावप्रसंगात् अन्यानुभूतपदार्थस्मरणायोगादऽन्यस्यान्यथानिप्र

अनयोःसमष्टिव्यष्ट्योःसामान्यविशेषयोरिवतादात्म्याभ्युपगमादेतदुपहितंविश्ववैश्वानरयोरपितादात्म्यंएकएवजीवो जाग्रदवस्था
यांस्थूलसूक्ष्मकारणाविद्याभिमानीसन् विश्वइत्युच्यते —— सएवस्वप्नावस्थायांसूक्ष्मशरीरकारणाविद्याभिमानीसन् तैजसइत्युच्य
ते —— सएवसुषुप्तौकारणाविद्याभिमानीसन् प्राज्ञइत्युच्यते —— सएवशरीरत्रयाभिमानरहितःसन् शुद्धपरमात्माभवति ॥ ॥

83

संगात् तस्माद्द्वितीयःपरिशिष्यतइत्याह एकएवेति अयंभावः असंगोदासीनःप्रत्यगात्माऽविद्यामात्मत्वेनोपगतःप्राज्ञः इतिउच्यते सएवसूक्ष्मशरीरमात्मत्वेनोपगतस्तैजसः सएवस्थूलशरीरमात्मत्वेनोपगतोविश्वएवंविश्वतैजसप्राज्ञाः प्रत्यगात्मनएकस्यैवावस्थाविशेषाइतीममेवार्थं स्पष्टयति जाग्रदवस्थायामिति अर्थादनेनत्वंपदार्थशोधनोपायान्वयव्यतिरेकौदर्शितौ तथाहि जाग्रदवस्थायांशरीरत्रयसाक्षित्वेनस्वप्नेशरीरद्वयसाक्षित्वेनसुषुप्तौकारणशरीरसाक्षित्वेनसमाधौशुद्धस्वप्रकाशचिद्रूपेणाभानमन्वयः स्वप्नेस्थूलशरीराभावंसुषुप्तौसूक्ष्मशरीराभानंसमाधौकारणशरीराभानंचशरीरत्रयव्यतिरेकः। चित्तस्यवृत्तिशून्यतयात्मैकाकारावस्थासमाधिस्तदानींदेहादिषुसर्वत्राभिमानस्यनिवृत्तत्वात्समाध्यवस्थायांशरीराणांव्यतिरेकोभवत्येवतस्यामवस्थायामात्मावस्तुतःशुद्धःपरमात्माभवतिसर्वाभिमानशून्यत्वादिदमेवान्वयव्यतिरेकाभ्यांत्वंपदार्थशोधनंयद्व्यावृत्तंतत्सर्वमनात्मेतिनिश्चित्ययदन्वितंसआत्मेतिनिश्च

रामः २३

श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चज्ञानेन्द्रियाणि तेषां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः एवं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः मनोबुद्ध्यहङ्कारचित्तानि चतुष्टयान्तःकरणानि तेषां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवता इति॥ २॥

यः तदुपायान्वयव्यतिरेकाविति शुद्धेति समाधिरवस्थायामिति शेषः जाग्रदाद्यवस्था निरूपयितुमाह तस्येति ता एवोद्दिषति जाग्रदिति जाग्रदवस्थां लक्षयति दिगिति आदिशब्देन दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः इति श्लोकोक्तदेवतावातादयो गृह्यन्ते ताभिर्देवताभिरनुगृहीतानि अधिष्ठातानीन्द्रियाणि यानि श्रोत्रादीनि तैरिति यावत् शब्दादिविषयानुभवावस्था जाग्रदवस्थेत्युक्ते स्वप्नेऽतिव्याप्तिस्तत्रापि वासनामयविषयानुभवस्य सत्वात् तद्व्यावृत्यर्थं दिगादीत्युक्तं स्वप्नावस्थायामिन्द्रियाणामुपरतत्वात् तज्जन्यविषयानुभवान्नातिव्याप्तिः विषयानुभवावस्था जाग्रदवस्थेत्युक्ते सुषुप्तावतिव्याप्तिस्तत्राप्यज्ञानविषयकसाक्ष्यनुभवस्य सत्वात् अत उक्तं शब्दादीति सुषुप्तौ शब्दादिविषयाणामन्तःकरणवृत्तेस्तदाश्रयप्रमातृत्वोपाध्यन्तःकरणादीनां च लीनत्वान्नातिव्याप्तिः शब्दादिविषयाकारान्तःकरणवृत्तिप्रतिबिंबितचैतन्यं शब्दादिविषयानुभवः अंतःकरणवृत्तिमग्रे निरूपयिष्यते स्वप्नावस्थां ल-

तस्यैवाभिमानिनो जीवस्यावस्थाः पंच जाग्रत्स्वप्नसुषुप्तिमूर्छामरणभेदात् दिगाद्यधिष्ठातृदेवतानुगृहीतैरिंद्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था जाग्रद्भोगप्रदकर्मोपरमे सति इन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था स्वप्नावस्था जाग्रत्स्वप्नोभयभोगप्रदकर्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिका बुद्धेः कारणात्मनावस्थितिः सुषुप्तिः मुद्गरप्रहारादिजनितविषादेन विशेषविज्ञानोपरमावस्था मूर्छावस्था ॥

११ क्षयति जाग्रदिति विषयतज्ज्ञानावस्था स्वप्नावस्थेत्युक्ते सुषुप्तावतिव्याप्तिस्तद्वारणाय जाग्रदित्यादिविशेषणं सुषुप्तावज्ञानतत्साक्षिणोरनादिसिद्धत्वेन संस्कारोद्भूतत्वाभावान्नातिव्याप्तिः तावत्युक्ते जाग्रदवस्थायामतिव्याप्तिः रजतानुभवजन्यसंस्कारोद्भूतानिर्वचनीयविषयतद्ज्ञानस्य तदा दृश्यते वीक्षत्वात् तद्वारणाय इंद्रियोपरम इति उपरमे निमित्तमाह जाग्रदिति सुषुप्तिलक्षणमाह जाग्रदिति विशेषविज्ञानोपरमात्मिका सुषुप्तिरित्युक्ते जाग्रदवस्थायामतिव्याप्तिस्तदा समाधौ विशेषविज्ञानोपरमसत्वात् अत उक्तं बुद्धेः कारणात्मनावस्थानमिति समाधावन्तःकरणस्य स्वरूपेण सत्वान्नातिव्याप्तिरित्यर्थः विशेषविज्ञानोपरमे निमित्तमाह स्थूलेति तत्रापि निमित्तमाह॥ जाग्रदिति मूर्छावस्थां लक्षयति मुद्गरेति विशेषविज्ञानोपरमावस्था मूर्छेत्युक्ते जाग्रदवस्थायामतिव्याप्तिरत उक्तं मुद्गरेति मुद्गरप्रहारजनितविषादावस्था मूर्छा इत्युक्ते जाग्रदवस्थायां अतिव्याप्तिरत उक्तं

विशेषेति मूर्छाया अवस्थांतरत्वे व्याससूत्रं संवादयति तदुक्तमिति तृतीयेस्थितं मुद्गरादिप्रहारादिनिमित्ते सति पुंसां यां मूर्छामाचक्षते लोकाः सा मूर्छा जाग्रदाद्यंतर्भूता आहोस्विदवस्थांतरमिति संशयः तत्र श्रुत्यादिष्ववस्थांतरत्वेनाप्रसिद्धत्वाज्जाग्रदादिष्वंतर्भूता तत्रापि विशेषविज्ञानोपरमसाम्यात् मूर्छा सुषुप्तावेवांतर्भूता नावस्थांतरमिति प्राप्तेऽभिधीयते मूर्छा जाग्रदादिभ्योऽवस्थांतरं परिशेषात् सा तावन्न जाग्रत्स्वप्नयोरंतर्भवति विज्ञानाभावान्नापि मरणे पुनरुत्थानदर्शनात् नापि सुषुप्तौ लक्षवैलक्षण्यात् तथाहि सुषुप्तस्य प्रसन्नवदनत्वनिष्कंपत्वादिकं लक्षणं मुग्धस्य तु विकरालवदनत्वसकंपत्वादिकमतो लक्षणवैलक्षण्यान्न सुषुप्तावंतर्भवति मूर्छा किंतु परिशेषादवस्थांतरमेवेति सकंपत्वादीनां सुषुप्तिवैलक्षण्येपि विशेषविज्ञा—नोपरमेण सुषुप्तिसाम्यादर्द्धसंपत्ति मूर्छेति निर्णयः मरणावस्थां लक्षयति एतदिति देहाभिमानो द्विविधः सामान्याभिमानो विशेषाभिमानश्चेति सुषुप्तौ सामान्याभिमानः पुनरुत्थानदर्शनात् जीवस्य निरभिमानस्योत्थानायोगात् अतः सुषुप्तौ जीवस्य देहे सामान्याभिमानस्तिष्ठत्येव जाग्रत्स्वप्नयोर्विशेषाभिमानः मनुष्योहं ब्राह्मणोहमिति मरणे भोगेन

तदुक्तं मुग्धेऽर्धसंपत्तिः परिशेषादिति एतच्छरीरभोगप्रापककर्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या सैपिंडितकरणग्रामावस्थाभाविशरीरप्राप्तिपर्यंतं मरणावस्था केचित्त्वस्या उत्क्रावस्थास्वंतर्भावं वदंति अत्र श्रुतिस्मृतिपुराणप्रमाणानि प्रसिद्धानि ॥ ६ ॥ ॥

84

प्रारब्धक्षये द्विविधस्य सामान्यविशेष—रूपस्याभिमानस्य निवृत्त्या भाविदेवादिशरीरप्राप्तिपर्यंतं सपिंडितकरणग्रामावस्था एकीकृतचतुर्दशकरणग्रामावस्था मरणावस्थेत्यर्थः। सूत्रकृता मरणावस्थाया जाग्रदादिबहिर्भावेनानुक्तत्वात् यथोक्तजाग्रदादिष्वंतर्भाव इति मतांतरमाह केचित्त्विति तत्रापि मरणावस्थाया न जाग्रत्स्वप्नयोरंतर्भावः देहाभिमानाभावान्नापि सुषुप्तौ पुनरुत्थानाभावात् अतः परिशेषान्मूर्छायामंतरभावः तत्र कर्मशेषे सति पुनरुत्थानं भोगप्रदकर्मशेषाभावे मरणमिति भावः ननु संतु विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः वैश्वानरसूत्रात्मेश्वरेषु को निर्णय इतित्राह एवमिति यथा विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः एवं वैश्वानरसूत्रेश्वरा इत्यर्थः ननु भयाऽरत्यादिश्रवणात् कथं वैश्वानरसूत्रात्मनोरीश्वरत्वं तस्य जीवलिंगत्वादीश्वरस्य तद्रहितत्वात् तथा च श्रुतिः योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीत्याद्या अशनायाद्यतीतत्वमीश्वरस्य दर्शयति तस्मादेकस्य परमेश्वरस्यावस्थाविशेषा

महाप्रलये ३॥ साधनकृतात्मानः ३॥ वैश्वानरसूत्रात्मनोः ३॥

अक्षिपुरुषः परमात्मैवोपदिश्यते कुतः सुखविशिष्टाभिधानात् एवकारेणात्र संशयः कार्य्य इति सूच्य|
तिसुखविशिष्टं ब्रह्मवाक्योपक्रमे श्रूयते तस्यैवेहाभिधानादित्यर्थ इति॥ शा०॥ सू०॥ १॥ १॥ ॥

वैश्वानरः परमेश्वरः कुतः साधारणशब्दविशेषात् साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः वैश्वानरशब्दो यद्यप्यग्न्यादित्या
त्मनां साधारण आत्मनश्च जीवपरमात्मनोस्तथाप्यस्ति विशेषः न स्यहवा एतस्यैत्यादिनोक्तो द्युमूर्धत्वादिस्तस्मादिति॥ शा०॥ सू०॥ १॥

इत्यसंगतमिति चेन्मैवं सूत्रकृता बादरायणेन वैश्वानरसूत्रात्मनोः सुखविशिष्टाभिधानादेव च वैश्वानरः साधारणशब्दविशेषादित्यत्रेश्वरत्वस्योक्तत्वात् कथ
न्तर्हि हिरण्यगर्भं जनयामास पूर्वं न मेतावतः कालस्य पुरस्तात् सृजत तं जातमभिव्याददात् स भाणमकरोत्सोबिभेत् स वै नैव रेमे कार्यात्यये तदध्यक्षेण सहातः॥
परमभिधानात् ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमित्यादिश्रुतिस्मृतिसूत्रैस्तयोर्जन्ममरणबंधमोक्षभयाऽरत्यादिप्रतिपा
दनं श्रृणु वैराग्यार्थं तत्प्रतिपादनं तथाहि श्रुत्यादिभिस्तयोर्जन्मादिषु प्रतिपादितेषु तत्रापि दोषदर्शनेन वैराग्यमुत्पद्यत इति तत्प्रतिपादनं न चैतावता तयोर्जी
वत्वं तथात्वे ईश्वरस्यापि तथात्वप्रसंगात् तस्यापि कामनादिश्रवणात् कामनादेर्जीवलिंगत्वात्तस्माद्यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः तमीश्वराणां प
रमं महेश्वरं आप्तकाममात्मकाममित्यादिश्रुत्या निरतिशयज्ञानैश्वर्यादिशक्तिमत्वावगमाद्यथा कामनादिश्रवणेपि न जीवत्वं तथा ज्ञानमप्रतिहतं यस्य
वैराग्यं च जगत्पतेः ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयमिति स्मृत्या सूत्रात्मवैश्वानरयोरप्रतिहतस्वतः सिद्धनिरतिशयज्ञानैश्वर्यादिशक्त्यावगमाज्ज

कार्य्यस्य ब्रह्मलोकस्यात्यये विनाशे तस्य ब्रह्मलोकस्याध्यक्षेण परमेष्ठिना सहातः परमेष्ठिनः परं ब्रह्म भवति कुतः अनावृत्त्याद्यभिधानादिति॥ शा०॥ सू०॥ ६॥

एवं एक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन् वैश्वानर इत्युच्यते अहमेव वैश्वानरोस्मीत्यतदुपासनया
तत्प्राप्तिः फलं भवति॥ २१

न्मादिप्रतिपादनस्य वैराग्यार्थत्वान्न जीवत्वमत ईश्वरत्वमेव युक्तं चैतत् यथा जीवस्यैनात्माश्रुतेर्नित्यत्वाच्च ताभ्य इति
न्यायेन जन्माद्यभावे निश्चितेपि चराचरव्यपाश्रयस्तु तद्व्यपदेशो भाक्तस्तद्भावभावित्वादिति न्यायेनौपाधिकमुत्पत्तिविनाशवत्त्वं तथाऽसंभवस्तु सतोऽनुप
पत्तेरिति न्यायेन न जायते म्रियते वा विपश्चित् आकाशवत्सर्वगतश्च नित्य इत्यादिश्रुत्या च जन्माद्यभावे निश्चितेपि समष्टिस्थूलसूक्ष्मोपाधिप्रयुक्तमुत्पत्त्यादीश्वर
स्याप्यस्तु हिरण्यगर्भादिरूपेण न चैतावता जीवत्वं अनावृतस्वरूपेत्वेन परिच्छेदाभिमानाभावात् आवृतस्वरूपेन परिच्छेदाभिमानस्यैव जीवत्वप्रयोजकत्वात् स्व
योपाधिसंबंधमात्रेण जीवत्वे निरुपाधिकस्य ब्रह्मणो जीवत्वेश्वरत्वयोरनभ्युपगमेन सोपाधिकस्य तदभ्युपगमेन तस्य जीवत्वं प्रसज्येत तस्मात् सूत्रात्मवै
श्वानरयोः सूत्रकारेणेश्वरत्वप्रतिपादनात्तत्प्रतिपादकश्रुतिस्मृतिसंभवाच्च औपाधिकजन्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च निरतिशयज्ञानैश्वर्यादियो

योयं लौकिकस्तयोर्जन्ममरणयोर्व्यपदेशः देवदत्तो जातो मृतश्चेति स चराचरव्यपाश्रयः स्थावरजंगमदेहविषयो|
मुख्यः जीवे तु भाक्तो गौणः स्यात् कुतः जन्ममरणव्यपदेशस्य तद्भावभावित्वात् देहोत्पत्तिनाशानुविधायित्वादित्यर्थ इति॥
शा॥ सू०॥ ५॥

सतः सदात्मकस्य ब्रह्मण उत्पत्त्यसंभवः कुतः अ
नुपपत्तेः सत्सामान्यात्सत्सामान्यस्योत्पत्तेरनुप
पत्तेरिति॥ शा०॥ सू०॥ ५॥

आत्मा जीवो नोत्पद्यते कुतः अश्रुतेः उत्पत्तिप्रकरणेषु जीवोत्पत्तेरश्रु
तेस्ताभ्यः श्रुतिभ्यो जीवस्य नित्यत्वावगमाच्चेति शा०॥ सू० ६॥

सुतेजस्त्वगुणा द्यौर्वैश्वानरस्य मूर्द्धा विश्वरूपत्व⁓गुणाकः सूर्यश्चक्षुः श्यङ् नानावर्त्मगमनमात्मास्वभावो यस्य स तथा नानागतित्वगुणो वायुः प्राणः बहुलत्वगुण आकाशो ऽस्य संदेहः देहमध्यं रयिधनं तद्गुणा आपो ऽस्य वस्तिः मूत्रस्थानं वै
श्वानरस्य होमाधारत्वसंपादनार्थमुर एवेत्यादि ॥ ६॥ अभिमुखत्वेन विश्वं मिमीते जानातीत्यभिविमानः संमुखेनेति ५॥ ॥ अध्ययनकृतवान् ॥ ४

गाच्चानावृतस्वरूपत्वेन परिच्छेदाभिमानाभावाच्च तयोरीश्वरत्वमेवं च तदुपासकानां तत्प्रसादेन क्रममुक्तिरुपपद्यते तस्मादेकस्यैव परमात्मनो वैश्वानरसूत्रे । श्वरा अवस्थाविशेषा इत्यभिप्रेत्येममर्थं स्पष्टयति एक एवेति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेज⁓ इत्यादिश्रुत्युक्तसकलगुणविशिष्टवैश्वानरो ऽहमस्मीत्यर्थः एतदिति वैश्वानरोपासनयेत्यर्थः यथोक्तप्रकारेण वैश्वानरपरमात्मानं ज्ञात्वा तदुपासनेन साधकस्तद्भावं प्राप्नोतीत्यत्र संमतिमाह वैश्वानरेति शारीरके समन्वयलक्षणे स्थितं वैश्वानरः साधारणशब्दविशेषात् को न आत्मा किं ब्रह्मेत्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्य तेजस्त्वा । दिगुणयोगं द्युसूर्यप्रभृतीनामेकैकोपासननिंदया मूर्धादिभावमुपदिश्याम्नायते यः प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पा । दावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनो ऽन्वाहार्यपचन आस्यमाहवनीय इत्यादि तत्र संशयः किमिह वैश्वानरो जठराग्निरुत भूताग्निराहोस्विद्देवता

चैतन्येषु २ वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां एवं एव श्रुत्यर्थस्य मुखं १ तथा प्रतिपादनात् स एव परमात्मा समष्टिसूक्ष्मशरीरतत्कारणमायोपहितः सन् हिरण्यगर्भ इत्युच्यते ॥ ११

त्माथवा शारीरः किंवा परमेश्वरः इति वैश्वानरात्मशब्दाभ्यां संशयः तत्र जाठराग्निर्वा भूताग्निर्वा देवतात्मा वा वैश्वानरः स्यात् श्रुतिषु सर्वत्र वैश्वानरशब्दप्रयोगात् अथवा शारीरो वा स्याद्वैश्वानर आत्मशब्दाद्धात्मशब्दस्य तत्रैव मुख्यत्वाद्वैश्वानरशब्दस्यापि लक्षणया तत्र प्रवृत्तिसंभवात् तस्माच्छारीरो वैश्वानरो न परमेश्वर इत्येवं प्राप्ते ऽभिधीयते वैश्वानरः परमेश्वरो भवितुमर्हति कस्मात्साधारणशब्दविशेषात् वैश्वानरशब्दस्त्रयस्य साधारणः आत्मशब्दो द्वयस्य⁓ साधारणस्तथापि विशेषो दृश्यते मूर्धैव सुतेजा इत्यादिना न चायं जाठरादीनां संभवत्यतः परमेश्वरो वैश्वानरस्तस्य सर्वकारणत्वात् सर्वात्मत्वोपपत्तेः तस्मिन्यथोक्तविशेषसंभवात् किंच सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति वैश्वानरस्य परमेश्वरत्वे तदुपासकस्य तद्भावप्राप्त्या सर्वलोकाश्रयात्मत्वं संभवति अन्यथा तन्न स्यात् अपि च तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते इति वैश्वानरस्य परमेश्वरत्वेन तदुपासकस्य तद्भावमापन्नस्य सर्वपाप्मदाह उपपद्यते इतरथा तदयोगात् एवं च सति वैश्वानरादिशब्दाः भाष्यकारोक्तप्रकारेण परमेश्वरे यथासंभवयोजनीयाः तस्माद्वैश्वा

अंतरअक्षिमध्यगतः परमात्मैव कुतः उपपत्तेः आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां परमात्मन्येवोपपत्तेः ३॥

नरः परमेश्वर इति सूत्रकारभाष्यकाराभ्यां श्रुत्यर्थः प्रतिपादितस्तस्माद्वैश्वानरस्येश्वरत्वं तदुपासकस्य तत्प्राप्तिः फलं भवतीति भावः हिरण्यगर्भस्वरूपमाह स
एवेति श्रुत्युक्तगुणोपेतः सूत्रात्मा हिरण्यगर्भोहमस्मीत्युपासकस्य तद्भावापत्तिफलमाह एतदिति हिरण्यगर्भोपासनयेत्यर्थः हिरण्यगर्भस्येश्वरत्वे तदुपासक
स्य तत्प्राप्तौ च संमतिमाह अंतर उपपत्तेरिति समन्वयलक्षणोस्थितं अंतर उपपत्तेः य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मे
ति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मन्येव गच्छतीति श्रूयते तत्र संशयः किमत्राक्ष्यधिकरणे उपास्यत्वेनोपदिश्यते छायात्मा उत देवतात्मा आहोस्विच्छा
रीरः किं वा परमेश्वर इति तत्र दृश्यत इति निर्देशाच्छायात्मोपास्यत्वेनोपदिश्यत इति प्राप्तं तस्यैव चक्षुःसंनिधानात् अथवा देवतात्मा स्यादिंद्रियानुग्राहकत्वेन
संनिहितत्वात् यद्वा शारीरः स्यात्तस्यापि करणस्वामित्वेन जाग्रदवस्थायां चक्षुर्विशेषतः संनिहितत्वात् तत्रैवात्मशब्दस्यापि मुख्यत्वादेवं निश्चिते सत्यमृतत्वादिकं
शारीरे यथाकथंचिद्योजनीयं तस्माच्छारीर उपास्यः नतु परमेश्वर इत्येवं प्राप्ते ब्रूमः अक्षिस्थाने पमेश्वर एवोपास्यत्वेन निर्दिश्यते न छायादिः कस्माद्वाक्यशेषगत

घृतं ४

सर्वफलोदयहेतुत्वम् १ सुखत्वम् १ प्रकाशकत्वम् १॥

एतदुपासनया तत्प्राप्तिः फलं भवति ॥ ६ ॥

संयद्वामत्ववामनीत्वभामनीत्वामृतत्वादिगुणजातस्य परमेश्वर एवोपपत्तेः इतरत्रासंभवात् किंच वाक्योपक्रमे प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सुखविशिष्टब्रह्माभिधा
नात् य एषोक्षिणि पुरुषो दृश्यत इत्यत्रापि य एष सर्वनाम्नः प्रकृतपरामर्शित्वेन तस्यैव प्रतिभिज्ञानात् आचार्यस्तु ते गतिं वक्तेत्यग्नीनां वचनाच्च वाक्योपक्रमनिर्दिष्टं
सुखविशिष्टब्रह्म इहाक्षिस्थाने ध्येयत्वेनोपदिश्यत इति गम्यते अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात् परमेश्वरस्यापि उपासनार्थमक्षिस्थानत्वमुपप
द्यते तस्मात्परमेश्वर एवोपास्यः उपकोशलेनाधीता विद्योपकोशलविद्या तस्यामियमाख्यायिका उपकोशलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवा
सेति श्रुतावियमाम्नाता उपकोशलो नाम कश्चिद्ब्रह्मचारी सत्यकामस्य गुरोर्निकटे ब्रह्मचर्यं कृतवान् तमुपकोशलं शिष्यमग्निपरिचर्यानिमित्तं गृहे स्थापयित्वा गुरुः
-- सत्यकामो द्रव्यार्जनार्थं देशांतरं जगाम ततोपकोशलस्य परिचर्यया संतुष्टास्त्रेताग्नयो ब्रह्मविद्यामुपदिदिशुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्यनंतरं स्वस्वविद्यां
च पश्चाद्गतिप्रश्ने कृते आचार्यस्तु ते गतिं वक्तेत्यग्नय ऊचुः अनंतरमागतेनाचार्येण प्रणतं शिष्यं प्रति ब्रह्मविन्मुखमिव त्वन्मुखं प्रतिभातीति केनोपदिष्टा ब्रह्मविद्येति

अ· कौ·
प्र·
२६

तस्माज्जायते तज्जं तस्मिंल्लीयते तल्लं तेनानितीति तदनु इति तज्जलानिति ॥६॥ संकल्पमय इत्यर्थः ॥६॥ स उपासकः क्रतुं ध्यानं मनोमयः प्राणशरीरो भारूप इत्याकारकं कुर्वीत ॥४॥

दृष्टे अग्निभिरुपदिष्टा आचार्यो गतिं वक्ष्यतीत्युक्तमित्युक्त्वोपकोशल आचार्यं शरणं प्रतिपेदे शरणागतं शिष्यं सत्यकामो गुरुरुपदिदेश य एषोऽक्षिणि पुरुषो दृश्यत इत्यादिना अनयेयं विद्योपकोशलेनाधीतत्वादुपकोशलविद्येत्युच्यते तस्मिन्नुपकोशलविद्यावाक्यविचारे सूत्रकारभाष्यकाराभ्यां समष्टिप्राणोपाधिकसुखविशिष्टपरमात्मोपास्त्या तत्प्राप्तिः प्रतिपादितेति भावः इदानीमीश्वरस्वरूपमाह स एवेति मायास्वरूपं प्राङ्निरूपितं समष्टिस्थूलसूक्ष्मशरीरराहित्यं कैवल्यं य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप इत्यादिश्रुत्युक्तगुणकः परमात्मा ह स इत्युपासनया तत्प्राप्तिफलं भवतीत्याह तदिति ईश्वरभावापत्तिः फलं भवतीत्यर्थः तत्र संमतिमाह सर्वत्रेति समन्वयलक्षणोक्तं सर्वत्र प्रसिद्धोपदेशात् सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप इत्यादि श्रूयते तत्र संशयः किमत्र मनोमयत्वादिगुणकः शारीर उपास्यत्वेनोपदिश्यते आहोस्वित्परं ब्रह्मेति तत्र शारीर एवोपास्यत्वेनोप

अंतर उपपत्तेरित्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्यां उपकोशलविद्यायां तथैव प्रतिपादनात् स एव केवलं मायोपाधिकः सन्नीश्वर इत्युच्यते तदुपासनया तत्प्राप्तिः फलं भवति सर्वत्र प्रसिद्धोपदेशादिति ॥ १।

दृश्यते मनोमयत्वादिगुणजातस्य तस्यैव मु

जीवधर्मा ब्रह्मणि ४

ख्यत्वेनोपपत्तेः न परं ब्रह्म अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुत्या प्राणादिसंबंधप्रतिषेधेन तस्मिन्मनोमयत्वादिगुणानुपपत्तेः यद्यपि जीवोऽप्रकृतो वाक्योपक्रमगतं ब्रह्म प्रकृतं तथापि शमगुणविध्यर्थवादगतत्वेन ब्रह्मणोऽप्रकृतत्वादिलिंगाच्छारीर एवोपास्य एवं निश्चिते वाक्यशेषगतगुणजातं शारीरे योजयितव्यं तस्माच्छारीर एवोपास्यो न ब्रह्मेति प्राप्तेऽभिधीयते परमेव ब्रह्म मनोमयत्वादिगुणकमुपास्यतया प्रतिपत्तव्यं कस्मात्सर्वेषु वेदान्तेषु तस्यैवोपास्यत्वेन प्रसिद्धस्योपदेशात् अत्रापि प्राणः शरीरमस्येति समासान्तर्गतसर्वनामश्रुत्या संनिहितस्य ब्रह्मणः परामर्शनात् तद्धितार्थस्य सामान्यरूपतयापेक्षायां निवर्तकत्वाभावाच्च वाक्यशेषगतानां सत्यकामत्वादिगुणानां ब्रह्मण्येवोपपत्तेश्च शारीरेऽनुपपत्तेः शमविधिपरा ------ दपि वाक्याद्ब्रह्मैवोपास्यत्वेन ग्राह्यं एवं निश्चिते शारीरपरमात्मनोरभेदान्मनोमयत्वादिकं ब्रह्मण्यपि संभवति यद्यपि वैपरीत्यं तथापि समारोप्यस्वरूपेण विषयो रूपवान्भवेत् विषयस्यानुरूपेण समारोप्यं न रूपवदित्याचार्यवाचस्प

शमादिगुणानां यो विधिरुपासीतेत्याकारकस्तस्यार्थवादत्वेन तज्जलानित्यादिवाक्यानां तद्गतत्वेन ब्रह्मणोऽप्यप्रकृतत्वमित्यर्थः ५॥ ॥ अधिष्ठानं१॥ मयट्प्रत्यय

86

रामः
२६

एतं परमात्मानमभिसंभवितास्मि इतः प्रेत्य १॥

निमिश्रेरुक्तत्वान्न वैपरीत्यं किंच एतमितः प्रेत्याभिसंभवितास्मि ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया तमेव शरणं गच्छ सर्वभावेन भारतेति श्रुतिस्मृतिभ्यामुपास्योपासकयोः शारीरपरब्रह्मणोर्गंतृगंतव्यभावेन भेदव्यपदेशात् अनंतकल्याणगुणाकं सर्वज्ञं सर्वशक्ति नित्यशुद्धबुद्धमुक्तसत्यपरमानंदाद्वयं परंब्रह्मोपास्यं यद्यपि नान्योतोस्ति द्रष्टा क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेति श्रुतिस्मृतिभ्यां परमात्मनोन्यः शारीरो नास्ति तथाप्यविद्याकल्पितभेदमादाय तद्व्यपदेशः एवं च यथोक्तपरमेश्वरोपासनया शारीरस्योपासकस्य तत्प्राप्तिः फलं भवति यथाक्रतुरस्मिन्लोके पुरुषो भवति तथेतः प्रेत्य भवति मद्भक्ता यांति मामपि मत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतमिति इत्यादिश्रुतिस्मृतिभ्यः तस्माद्ब्रह्मैवोपास्यमिति शांडिल्यविद्यावाक्ये निश्चितं सूत्रकारभाष्यकाराभ्यां एवमन्यत्रापि दहर उत्तरेभ्यः अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्याम्नायते अत्राकाशशब्देन भूताकाशः प्रतिपाद्यते शारीरः परमेश्वरो वेति संशयः आकाशशब्दस्य भूतविशेषे रूढत्वा

शांडिल्यविद्यायां दहर उत्तरेभ्यः इति दहरविद्यायां च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया तत्प्राप्तिप्रतिपादनात् तं यथा यथोपासते तत्तथैव भवतीति श्रुतेश्च भावनामांद्ये तु तारतम्येन सार्ष्टिसारूप्यसामीप्यलोक्यफलानि भवंति ॥ २२ नदेवेह प्रतिपाद्यत इति प्राप्तं अ

थवा शारीरो वा प्रतिपाद्यते दहराकाशशब्देन तस्मिन्नात्मशब्दस्य मुख्यत्वात् तस्माच्छारीर एव दहरो न परमेश्वर इति प्राप्ते ब्रूमः दहराकाशः परमेश्वरो भवतुमर्हति कस्मादुत्तरेभ्यो हेतुभ्यः तथाहि उत्तरत्र यावान् वायमाकाशस्तावानेषोंतर्हृदय आकाश इति वाह्याकाशेन दहराकाशस्योपमानोपमेयभावः प्रतिपाद्यते स च भूताकाशपरिग्रहे नोपपद्यते तेन तस्योपमेयत्वायोगात् तथा जीवपरिग्रहेपि तस्योपाधिपरिछिन्नस्य तेन तद्योगात् किंच य आत्माऽपहतपाप्मा विजरो विमृत्युर्विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इति वाक्यशेषगतानां गुणानां शारीरभूताकाशयोरनुपपत्तेः दहराकाशः परमेश्वर एव अपि च तद्य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति दहराकाशोपासकस्य तद्भावापत्तिफलं दर्शयति तच्च शारीरभूताकाशपरिग्रहे नोपपद्यते तस्माद्दहराकाशः परमेश्वर एवेति दहरविद्यावाक्ये सूत्रकारभाष्यकारा

गुणात्२॥ दहरवाक्ये आत्मशब्दस्याप्युक्तत्वात् ॥६॥ जीवा२॥ सत्यकामादिगुणकम ३॥

योगिनां भौतिककेष्वेव स्वातन्त्र्यं न भूतेष्वित्याह जगद्व्यापारवर्जमिति कुतः प्रकरणात् सर्वभूतसृष्टिवाक्येषु परमात्मनः प्रकृतत्वात् नचतेपि परमात्मवत्प्रकृता इत्याह असन्निहितत्वाद्योगिनां चकारो महाभूतसृष्टौ योगिनामशक्यत्वमपि बोधयतीति ॥ शा०॥ सू०॥ ६॥

अ.कौ. प्र. २७ स्यामीश्वरोपासनया तद्भावापत्तिः प्रतिपादिता तस्मात्तदुपासनया तत्प्राप्तिः फलं भवति इति निरवद्यं ईश्वरोपासनया तत्प्राप्तिः फलं भवतीत्यत्र श्रुत्यंतरं संवादयति तं यथेति तं परमात्मानं यथा येन प्रकारेण यादृशगुणविशिष्टत्वेनोपासते अहमेश्वरोस्मीति ध्यायति तथैव तादृशमेव फलं भवति तदुक्तं सदाशिवेन रघुनाथं प्रति येनाकारेण ये मर्त्या मामेवैकमुपासते तेनाकारेण तेभ्योहं प्रसन्नो वांछितं ददे इति चकारेण स्मृतिं समुच्चिनोति यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं तं तमेवैति कौंतेय सदा तद्भावभावित इति स्मृतेश्चेत्यर्थः ननु भावनोत्कर्षेण तत्साक्षात्कारवतस्तत्फलं भवतु भावनामांद्ये किं स्यादिति तत्राह भावनेति मनुष्यत्वविस्मृतिपूर्वकं तद्भावापत्तिर्भावनोत्कर्षः देहे मनुष्योहमिति यथा तद्वत् ईषन्मनुष्यत्वस्मरणपूर्वकं तद्भावापत्तिर्भावनामांद्यं तत्तारतम्येन परमेश्वरेण समानैश्वर्यभोगवत्त्वं सार्ष्टिः जगद्व्यापारवर्जं तदुक्तं जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्चेति समानरूपत्वं सारूप्यं समीपवर्ति

साम्नः सायुज्यं सालोकतां जयतीत्यादिश्रुतेः ये पुनः साधनचतुष्टयसंपन्ना विचारासमर्थाः मंदप्रज्ञाः तेषां गुरुमुखाद् ब्रह्म निश्चित्य सर्वोपाधिविनिर्मुक्तं सच्चिदानंदलक्षणं ब्रह्माहमस्मीति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे जीवदवस्थायां मरणावस्थायां वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिः फलं भवति ॥ २१ ४७

त्वं सामीप्यं समानलोकत्वं सालोक्यं एवं भावनातारतम्येन फलतारतम्ये श्रुतिं प्रमाणयति साम्न इति साम्नः प्राणस्य सायुज्यं तादात्म्यं तद्भावापत्तिरित्यर्थः न चान्यस्यान्यभावापत्तिः कथं विरोधादिति वाच्यं समष्टिकारणतामेव परिच्छेदाभिमानेन व्यष्टित्वप्राप्तिरिति अपरिच्छिन्नोपासनया परिच्छेदाभिमाननिवृत्त्या व्यष्टित्वनिवृत्तिसंभवेन तद्भावापत्तेरविरोधादुपासकस्य इममेवार्थं श्रुतिराह देवो भूत्वा देवानप्येति एतादृशं फलं भावनोत्कर्षेण भवति तन्मांद्ये पूर्वोक्तमेव भवतीति दर्शयति सालोकतामिति आदिशब्देन एतासां देवतानां सायुज्यं। सार्ष्टितां समानलोकतां याति इत्यादिश्रुतयो गृह्यंते सालोक्यादिफलभेदः पुराणेषु स्फुटः एवं सगुणोपासकानां तत्पदवाच्यार्थनिरूपणप्रसंगेन तदुपासनया तत्तत्प्राप्तिफलमुक्त्वोपासनाप्रसंगेन सर्वतो विरक्तानां मंदप्रज्ञानां विचाराक्षमाणां ब्रह्मजिज्ञासूनां निर्गुणब्रह्मोपासनया तत्साक्षात्कारद्वारा ईक्षतिकर्मव्यपदेशात्स इति न्यायेन मणिप्रभायां मणिबुद्ध्या प्रवृत्तस्य मणिप्राप्तिवन्निर्गुणब्रह्मप्राप्तिं दर्शयति ये पुनरिति नित्यानित्यवस्तुविवेकादिसाधनचतुष्ट राम: २७

॥२ सध्यातव्यः परमात्मैव कुतः ईक्षतिकर्मत्वेन व्यपदेशात् वाक्यशेषे ध्यातव्यस्येक्षतिकर्मत्वेन व्यपदेशात् ईक्षतिधातोः कर्मपुरुषसमीक्षते इति ॥ शा०॥ सू०॥

यं एतच्च अग्रे निरूपयिष्यति ब्रह्मविचारासमर्थानित्यर्थः तत्र हेतुमाह मंदेति नच मंदप्रज्ञानां ब्रह्मज्ञाने कथं प्रवृत्तिः स्यादिति वाच्यं गुरुप्रसादवशात् तथा च श्रुति
स्मृतीतिहासपुराणेषु मंदप्रज्ञानां मैत्रेयीप्रभृतीनां मुमुक्षूणां मोक्षसाधने ज्ञानादौ प्रवृत्तिदर्शनात् प्रायः स्त्रीणां मंदप्रज्ञत्वाच्च एवं पुरुषाणामपि तत्त्वं भवान् न काप्य
नुपपत्तिरिति भावः अत्रैषाक्षरयोजना ये मंदप्रज्ञा गुरुमुखाद्ब्रह्म निश्चित्य निरुपाधिकं ब्रह्माहमस्मीत्युपासते तेषां निर्गुणब्रह्मोपासनयोत्पन्नब्रह्मसाक्षात्कारे
ण तत्प्राप्तिः फलं भवतीति कदा भवतीत्याकांक्षायामाह अभिध्येवेति निर्गुणब्रह्मोपास्तेर्निदिध्यासने पर्यवसानान्निदिध्यासनस्य ब्रह्मसाक्षात्कारप्रत्यंतरंगसाधन
त्वावगमात्तेनानात्मन्यात्मबुद्धिनिवृत्तौ तत्संस्कृतांतःकरणस्य भावनापरिपाकतारतम्येनास्मिन्नेव शरीरे जीवदवस्थायां मरणावस्थायां वा ब्रह्मलोके वा ब्रह्मसा
क्षात्कारो भवति ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः ध्यानयोगेन संपश्यन्त्यात्मन्यात्मानमात्मना ध्यानेनात्मनि पश्यंति केचिदात्मान
मात्मनेति श्रुतिभ्यः ततः प्रारब्धक्षीणे स्वस्वरूपेण ब्रह्म प्राप्नोतीत्यर्थः ननु मंदप्रज्ञानां ब्रह्मस्वरूपस्याज्ञातत्वेन निर्गुणब्रह्मोपास्तिः कथं स्यान्न ह्यज्ञातत्वं केन

श्रुतेर्न्यायसामान्यात् ओमित्येतेनैवाक्षरेण परं पुरुषं अभिध्यायीत स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते ओमित्यात्मा
नं युंजीत ओमित्येवं ध्यायथ आत्मानं इत्यादिश्रुतिभ्यः॥ २१

चिदुपासितुं शक्यत इत्यत आह गुरुमुखादिति तद्विज्ञानार्थं स गुरुमेवाभि
गच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं शांतो दांत उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत् आचार्यवान्पुरुषो वेद यस्य देवे परा भक्तिः तद्विद्धि प्रणिपातेन
परिप्रश्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः इत्यादिश्रुतिस्मृत्युक्तप्रकारेण गुरुमुपसृत्य तत्प्रसादात्तदु
पदेशेन ब्रह्मतत्पदार्थं त्वंपदार्थं च विवेकेन देहेंद्रियमनोबुद्ध्यहंकाराज्ञानविलक्षणत्वेन मायाविलक्षणत्वेन स्थूलसूक्ष्मकारणशरीराधिष्ठानभूतं प्रत्यगात्मानं
मायाधिष्ठानं सच्चिदानंदलक्षणमद्वितीयं परमात्मानं च निश्चित्य निश्चयेन ज्ञात्वा यत्तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्ययमस्थूलमन एव ह्रस्वमदीर्घं अप्रा
णो ह्यमनाः शुभ्र असंगो ह्ययं पुरुषः निष्कलं निष्क्रियं शांतं निरवद्यं —— निरंजनं अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सना
तनः अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तदव्यक्तमाह ॥ ॥

वाजसनेयके श्रूयते एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमित्यादि तथान्यत्रापि तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिः उत व्यवस्थेति संशये श्रुतिविभागात् व्यवस्थाप्रा
प्तौ उच्यते ॥ अक्षरधियां तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः सामान्यतद्भावाभ्यां समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते औ
पसदवदिति निदर्शनं यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणामग्ने वेर्होत्रं वेरध्वरमित्येवमादीनामुद्गात्रे वेदोत्पन्नानामप्यध्वर्युभिरभिसम्बन्धो भवति अध्वर्युकर्तृकत्वात्पुरोडा
शप्रदानस्य प्रधानतन्त्रत्वाच्चाङ्गानां एवमिहाप्यक्षरतन्त्रत्वात्तद्विशेषणानां यत्र क्वचिदप्युत्पन्नानामक्षरेण सर्वत्राभिसम्बन्ध इति ॥ शा० ॥ सू० ॥ १ ॥ १ ॥

अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं इत्यादिश्रुतिस्मृतिन्यायैर्ब्रह्मणो निरुपाधिकत्वावगमान्निर्गुणब्रह्मोपासनं संभवत्येव तस्य विचाराऽस
मर्थत्वेपि गुरूपदेशेन तद्ज्ञानस्य परोक्षस्य संभवादित्यर्थः निर्गुणोपासनमभिनीय दर्शयति सर्वेति उक्तलक्षणं ब्रह्मैवाहमस्मि अहं ब्रह्मास्मीति व्यतिहारेणोपास
नं कर्तव्यं त्वं चाहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योऽहं सोऽसौ योऽसौ सोऽहं व्यतिहारो विशिषंति हीतरवदित्यादिश्रुतिसूत्रेभ्यः तथा चोक्तं चिदात्माहं नि
त्यशुद्धबुद्धमुक्तसदद्वयः परमानंदसंदोहो वासुदेवोऽहमस्मि १ इति वक्ष्यमाणविलापनेन ब्रह्मण उपाधिविनिर्मोको द्रष्टव्यः एवं यथोक्तोपासनेन यथोक्तं फलं भव

व्यतिहारस्य वात्रोपास्यत्वेनोपदिश्यमानत्वात् मनईश्वरैकत्वमात्रं इतरवत् यथा इतरे सर्वात्मत्वादयो गुणा उपास्यत्वेनोपदिश्यंते तद्वत् प्रतिज्ञातेर्थे हेतुः विशिषंति हीति समाम्नातारो जीवपरमात्मानौ व्यतिहारेण विशिषंति
तद्योहमित्यादिनेति शा० ॥ सू० ॥ २ ॥ २ ॥ २ ॥

भगवताप्युक्तं ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिं इति अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य
उपासते तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः इति च एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणः ॥ ११ तीति कुतो ज्ञायते इत्याकांक्षायामाह श्रु
श्रुतिमूलकस्य १
तेरिति तं यथा यथोपासनेन तथैव भवतीत्युदाहृतश्रुतेः तन्मूलस्याप्रतीकालंबनान्नयतीति बादरायणः उभयथाप्यदोषात्तत्क्रतुश्चेति न्यायस्य प्रकृतेपि तुल्यत्वादे
वं ज्ञायते इत्यर्थः यथोक्तब्रह्मोपासनेन तत्प्राप्तौ प्रामाणत्वेन श्रुत्यंतराण्युपन्यस्यति ओमित्यनेनेति अत्र तृतीयाद्वितीयार्थे द्रष्टव्या ओंकारवाच्यः परमात्माहमस्मी
ति यः परं पुरुषं परमात्मानमभिध्यायीत उपासीत स उपासकः पुरुषमीक्षत इति श्रुतौ योजना अयमेवार्थः श्रुत्यंतराणामपि आदिशब्देन ओं कं ब्रह्म खं ब्रह्म पुराण
मित्यादिश्रुतिर्गृह्यते तेन तत्स्मृतिमप्याह भगवतेति प्रणवजपं कुर्वन् स्मरन् मां तत्पदलक्ष्यं परमात्मानं वासुदेवमहं ब्रह्मास्मीत्यनुस्मरन्ननुसंधानं कुर्वन् देहं त्यजन् यः
पूर्वोक्तयोगधारणावान्मरणं प्राप्नोति स परमां गतिं ब्रह्मभावलक्षणां मुक्तिं याति प्राप्नोतीत्यर्थः त्रयोदशाध्यायश्लोकमप्यत्रैवोदाहरति अन्ये त्विति अन्ये साधनचतु

प्रतीकोपासकभिन्नान्सर्वानुपासकानमानवपुरुषो नयतीति बादरायण आचार्यो मन्यते तेन च सर्वेषा मित्यत्र सर्वोपासनेषु मार्गोपसंहारोक्तिविरोधस्तत्राह उभयथादोषादिति प्रतीकालम्बनानामनयनेऽ
न्येषां नयने न्यायस्य प्रतीकालम्बनव्यतिरिक्तविषयत्वेनादोषात् तत्र को हेतुरित्यत आह तत्क्रतुश्चेति तस्य ब्रह्मणः क्रतुः संकल्पो ब्रह्मप्राप्तौ हेतुरिति ॥ शा० ॥ सू० ॥ ५ ॥

[illegible]

मंदप्रज्ञा एवमजानंतो विचारं कर्तुमशक्ता अन्येभ्य आचार्येभ्यो ब्रह्मस्वरूपं श्रुत्वा तत्त्वंपदार्थौ विवेकेन परिशोध्य श्रुतिपरायणाः संतः अहं ब्रह्मास्मीत्युपाससते ध्यानं कुर्वंति तेपि सर्वानर्थहेतुं मृत्युमज्ञानमतितरंत्येव अतितरणं नाशयंत्येव नास्त्यत्र संदेहः तेषां नित्याभियुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयांति ते तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता २ इति भगवतैवोक्तत्वात् तेपि चातितरंतीत्यनेन विचारकुशलानां मृत्युतरणं कैमुतिकन्यायप्रसिद्धमिति सूचयत्यपिकारेणेति श्लोकतात्पर्यार्थः किं बहुना सर्वासां सगुणनिर्गुणोपासनानां चित्तैकाग्र्यद्वारा ब्रह्मसाक्षात्कार एवमुख्यफलं ज्ञानप्रकरणे पठितत्वात् एतदभिप्रायेणैव सूत्रकृता वादरायणेनोपासनाविचारो ज्ञानकांडे कृतः ब्रह्मलोकादिफलं तु नांतरीयकमिति भावः एवं सृष्ट्यादिनिरूपणप्रसंगागतमुपासनाविचारं परिसमाप्य परमप्रकृतमुपसंहरति एवमिति एवमुक्तरीत्या नन्वध्यारोपापवादयोर्ब्रह्मप्रतिपत्तिहेतुत्वात्तावपि निरूपणीयावित्याशंक्य ब्रह्मणो मायाद्वारा सूक्ष्मस्थूलप्रपंचसृष्टिनिरूपणमुखेन जगज्जन्मादिकारणत्वनिरूपणमेवाध्यारोपनिरूपणमित्याह अयमे

तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितं अयमेवाध्यारोप इत्युच्यते अस्यापवादश्चेदानीमुच्यते अपवादो नाम अधिष्ठाने भ्रांत्या प्रतीतस्य तद्व्यतिरेकेणाभावनिश्चयः॥ २२

वृत्तिः अतस्मिंस्तद्बुद्धिरध्यारोपः अपवादनिरूपणं प्रतिजानीते अस्येति। इदानीमध्यारोपनिरूपणानंतरं प्रसक्तस्य प्रतिषेधसंभवादिति भावः कोयमपवाद इत्याकांक्षायां तत्स्वरूपमाह अपवादो नामेति तद्व्यतिरेकेण तद्भिन्नत्वेन इत्थंभावे तृतीया उक्तमेवार्थमुदाहरति यथेति ननु तत्त्वमस्यादिवाक्योत्थज्ञानादज्ञानतत्कार्यबाध्यते तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः अविद्या सह कार्येण नासीदस्ति भविष्यतीति वार्तिकवचनादस्मदादीनां घटज्ञानेन घटाज्ञाननिवृत्तिवदहं ब्रह्मास्मीति ब्रह्मसाक्षात्कारेण तदज्ञाननिवृत्तेः विद्वदनुभवसिद्धत्वाच्चेति वदंति तत्र कोयं बाध इत्याकांक्षायामयमपवादः स एव बाध इत्युच्यते इत्याह अयमेवेति यत्र यत्प्रतीयते तत्र तस्य त्रिषु कालेष्वत्यन्ताभावनिश्चयो बाधः तं विभजते स चेति त्रैविध्यमेवाह शास्त्रीयेति आद्यं व्युत्पादयति अथात इत्यादिना द्वितीयं व्युत्पादयति तद्व्यतिरेकेणेति तृतीयं व्युत्पादयति अहं ब्रह्मास्मीत्यादिना विपर्ययेण तु क्रमोत उपपद्यते चेति न्यायमनुसरंस्तत्र यौक्तिकबाधस्य क्रमं निरूपयति यौक्तिकबाधस्येति अयं वक्ष्यमाणः इदंशब्दार्थमाह स्थूलप्रपंचमिति सर्वं स्थूलशरीरमारभ्य ब्रह्मा

तुशब्दः प्रलयउत्पत्तिक्रमं वारयति किन्तु नोऽस्मादुत्पत्तिक्रमाद्धि पर्य्ययेण पृथिव्यप्स्वित्यादिक्रम उक्तः उपपद्यते च यतः कार्य्यस्य घटादेः कारणमृदादौ प्रलयस्य दृष्टत्वादिति॥ शा०॥ सू०॥ २॥

डपर्यंतं स्थूलभूतेषु पंचीकृतभूतेषु तेषां तत्कारणत्वात्तेषु तद्विलापनमुचितमिति भावः किं तद्विलापनमित्याकांक्षायामाह तदिति कारणीभूतपंचीकृतभूतव्यतिरेकेण ब्रह्मांडतदंतर्वर्तिकार्यजातं नास्तीति निश्चित्येत्यर्थः एतदुक्तं भवति दृश्यमानस्य कार्यजातस्य कारणसत्तातिरिक्तसत्तानंगीकारात्कारणव्यतिरेकेण कार्यं नास्तीति निश्चित्य तद्विस्मृत्य कारणैकगोचरं स्मरणं विलापनमिति स्थूलभूतानि स्वस्वकारणीभूततामसांशेष्वंतःकरणं ज्ञानेंद्रियाणि स्वस्वकारणीभूतसात्विकांशेषु प्राणकर्मेंद्रियाणि स्वस्वकारणीभूतराजसांशेषु विलाप्येत्यर्थः इदानीं सूक्ष्मभूतानामुत्तरोत्तरं विलापनमाह तत्रापीति इदानीं परमकारणस्य मूलाज्ञानस्य चिन्मात्रे विलापनमाह अज्ञानमिति उक्तक्रमे प्रमाणत्वेन विष्णुपुराणवचनमुदाहरति तथा चेति तत्र वार्तिकसंमतिमाह उक्तं चेति अध्यारोपापवादनिरूपणेन फलितमर्थं दर्शयत्याभ्यामिति तदेवोपपादयति तथाहीति तत्पदार्थं शोधयति मायेति माया आदिर्यस्याः स्थूलसूक्ष्मभूतायाः समष्टेः सा तथोक्ता मायादिश्चासौ समष्टिश्चेत्यनंतरं कर्मधारयः अयं भावः समष्टिस्थूलसूक्ष्मशरीरमाया तदुपहितवैश्वानरसूत्रात्मेश्वरचैतन्यमेतदाधारानुपहिताखंडचैतन्यमेतत्त्रयं तप्तायःपिंडवदविविक्तमेकत्वेनावभासमानं तत्पदस्य वाच्यार्थः इति तत्पदलक्ष्यार्थमाह विविक्तमिति समष्टिस्थूलसूक्ष्मशरीरमायाभ्यां विविक्तं विवेकेनान्वयव्यतिरेकाभ्यां पृथक्कृत्य निश्चितमखंडचैतन्यं तत्त्वमसिवाक्येन तत्पदलक्ष्यार्थ इत्यर्थः एतावन्वयव्यतिरेकौ तत्पदार्थशोधनोपायौ तत्राह स्थूलप्रपंचस्थित्यवस्थायां तत्साक्षित्वेन पंचीकरणात्पूर्वं सूक्ष्मभूततत्कार्यसाक्षित्वेनाकाशादिसृष्टेः पूर्वं प्रलयावस्थायां मायासाक्षित्वेन तत्त्वज्ञानेनाज्ञाननिवृत्तौ भोगेन प्रारब्धे च क्षीयमाणे जीवस्य वर्तमानदेहपातोत्तरं विदेहमुक्तावस्थायामखं

यथा शुक्त्यादौ भ्रांत्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किंतु शुक्तिरित्यभावनिश्चयः अयमेव बाधो विलापनमिति चोच्यते स च बाधः त्रिविधः शास्त्रीयो यौक्तिकः प्रत्यक्षश्चेति अथात आदेशो नेति नेति नेह नानास्ति किंचनेत्यादिशास्त्राद्ब्रह्मव्यतिरेकेण प्रपंचाभावनिश्चयः शास्त्रीयो बाधः मृद्व्यतिरेकेण घटाभावनिश्चयवत् निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपंचाभावं निश्चित्य दृश्यमानस्य मिथ्यात्वनिश्चयेन ब्रह्मात्ममात्रत्वनिश्चयो यौक्तिकबाधः अहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेण ज्ञानतत्कार्यनिवृत्तिः प्रत्यक्षबाधः यौक्तिकबाधस्यायं क्रमः स्थूलप्रपंचः सर्वोपि स्थूलभूतेषु विलाप्य ॥

ऽस्वप्रकाशचिद्रूपेणभानंतत्पदार्थस्यपरमात्मनोऽन्वयः समष्टिस्थूलशरीरस्य पंचीकरणात्पूर्वमभानं समष्टिसूक्ष्मशरीरस्याकाशाद्युत्पत्तेः पूर्वं मायायाः सुप्त्य
वस्थायां च व्यतिरेकः जीववत्परमात्मनो जाग्रदादिसंबंधाभावात् कार्यस्य कारणात्मनारंभणाधिकरणन्यायेनारोपितस्य चाधिष्ठानात्मना सत्वांगीकाराद्सदुत्प
निवाद्निराकरणाच्च यथोक्तप्रकारेण समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायानां यथोक्तावस्थास्वभानं व्यतिरेकः तत्पदार्थस्य परमात्मनो भानमन्वय इत्येवम

हेनारद २

तद्व्यतिरेकेण तत्त्वास्तीति — निश्चित्य स्थूलभूतानि समष्टिव्यष्टिसूक्ष्मशरीरं च सूक्ष्मभूतेषु विलाप्य — — तत्रापि पृथिवीमप्सु विलाप्य अप
स्तेजसि तेजो वायौ वायुमाकाशे आकाशमज्ञाने अज्ञानं चिन्मात्रे विलापयेत् तथा च स्मृतिः जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः
प्रलीयंते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते इति उक्तं च आकारं पुरुषं
विश्वमुकारे प्रविलापयेत् उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति आभ्यामध्यारोपापवादाभ्यां
तत्त्वंपदार्थशोधनमपि सिद्धं भवति. तथाहि मायादिसमष्टिस्तदुपहितं चैतन्यं एतदाधा — रानुपहितमखंडचैतन्यं च तत्प्रायः पिंडवत् एत
त्त्रयं अविविक्तमेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति विविक्तमखंडचैतन्यं तत्पदलक्ष्यार्थो भवति अविद्यादिव्यष्टिरेतदुपहितचैतन्य एतदा
धारानुपहितप्रत्यक्चैतन्यं एतत्त्रयं तप्तायःपिंडवद् विविक्तमेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति विविक्तं प्रत्यक्चैतन्यं त्वंपद
लक्ष्यार्थो भवति ॥

जीववत् १

ऽन्वयव्यतिरेकावभ्युपगंतव्यौ नत्वन्यौ दृशौ तयोरत्रासंभवात् अन्यत्र धर्मीदित्यादि — श्रुत्या परमात्मनः पुण्यापुण्यसंबंधानवगम
च तस्मादाभ्यामन्वयव्यतिरेकाभ्यां शोधितस्तत्पदार्थो मायातत्कार्याभ्यामपरामृष्टाखंडसच्चिदानंदस्वरूपः परमात्मा तत्पदस्य लक्ष्यार्थ इति भावः त्वंपदार्थं शो
धयति अविद्यादीति अविद्या आदिर्यस्याः सा तथा सा चासौ व्यष्टिश्चेत्यविद्यादिव्यष्टिः अयमभिप्रायः व्यष्टिस्थूलसूक्ष्मशरीरतत्कारणाविद्या एतदुपहितविश्वतै
जसप्राज्ञाश्च एतदाधारानुपहितप्रत्यक्चैतन्यं तप्तायःपिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थ इति त्वंपदलक्ष्यार्थमाह विविक्तमिति ॥ ६ ॥ ६ ॥

श्चेतित्रयः सम्बन्धाः पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावश्च पदयोर्वा पदार्थयोर्वाऽखण्डचैतन्येन सह लक्ष्यलक्षणभावः ॥ ६ ॥

अन्वयव्यतिरेकाभ्यां स्थूलसूक्ष्मकारणशरीरेभ्यो विविक्तं पृथक्कृत्य निश्चितं प्रतीयं जडावृतदुःखात्मकाहंकारादिभ्यः प्रातिलोम्येन सच्चिदानंदलक्षणतयांचतिप्रकाशतइति प्रत्यक् प्रत्यक् चतत् चैतन्यं प्रत्यक्चैतन्यं चेतनस्य भावः चैतन्यं ज्ञप्तिस्वरूपमिति यावत् अन्वयव्यतिरेकौ दर्शितौ अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः सोऽन्वयो व्यतिरेकः तज्ज्ञाने ऽन्यानवभासनं लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः व्यतिरेकस्त्वात्मभाने लिंगस्याभानमुच्यते सुषुप्तभाने भानं तु समाधावात्मनोऽन्वयः व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनमिति एवं तत्त्वंपदार्थौ शोधयित्वा वाक्यार्थं विचारयितुं प्रतिजानीते एतादिति पदार्थज्ञानस्य वाक्यार्थज्ञानकारणत्वात् तत्त्वंपदार्थशोधनोपायान्वयव्यतिरेकाभ्यां सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्याद्यवान्तरवाक्यैश्च शोधितौ तत्त्वंपदार्थौ लक्ष्यौ गृहीत्वेत्यर्थः संबंधेति समानाधिकरण्यं विशेषणविशेष्यभावः लक्ष्यलक्षणभाव एतैः सहितं महावाक्यमखंडार्थबोधकमित्यर्थः लक्षणमग्रे निरूपयिष्यति

विलक्षणम् ६॥

एतौ लक्षार्थावुपादाय संबंधत्रयेण सहितं तत्त्वमस्यादिवाक्यं लक्षणया अखंडार्थबोधकं भवति संबंधत्रयं तु पदयोः सामानाधिकरण्यं सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तानां शब्दानां एकस्मिन्नर्थे वृत्तिः यथा सोऽयं देवदत्त इत्यत्र तत्कालविशिष्टदेवदत्तवाचकसशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य च एकस्मिन् देवदत्तपिंडे वृत्तिः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः यथा तत्रैव सशब्दार्थ तत्कालविशिष्ट अयंशब्दार्थैतत्कालविशिष्टयोरन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः ॥ छ ॥ ॥

ननु समानेनाधिकरणेन संबंधः सामानाधिकरण्यं तत्कथं वाक्यार्थज्ञाने तयोर्हेतुः स्यादित्याशंक्याह सामानाधिकरण्यमिति शब्दानामेकस्मिन्नर्थे वृत्तिसामानाधिकरण्यमित्युक्ते घटकलशयोरपि सामानाधिकरण्यं स्यात्ततश्च ताभ्यामपि वाक्यार्थबोधः स्यान्न च तदस्ति तयोः पर्यायत्वात् अतस्तद्वारणायोक्तं भिन्नेति तत्रोदाहरणमाह यथेति विशेषणविशेष्यभावसंबंधमाह पदार्थयोरिति पदजन्यज्ञानविषयत्वं पदार्थत्वं व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यं तमुदाहरति यथेति तत्रैव सोऽयं देवदत्त इति वाक्ये लक्ष्यलक्षणभावसंबंधमाह पदयोरिति लक्ष्यतेऽर्थोऽनेनेति व्युत्पत्त्या पदं पदार्थो वा लक्षणं अविरुद्धोऽखंडार्थो लक्ष्यः वाक्यजन्यज्ञानविषयो वाक्यार्थस्तेनेति यावत् उदाहरति यथेति प्रत्यभिज्ञावाक्यं सप्तम्यर्थः लौकिके सोऽयमित्यादिवाक्ये स

तत्पर्यायपदानामप्यस्ति ५॥

नत्वं त्वं न दित्य भेदसंसर्गः ब्रह्मविशिष्टो जीव इति विशिष्टः मायाविशिष्टचैतन्यविशिष्टांतःकरणविशिष्टचैतन्यमिति विशिष्टैक्यं एतेषां वाक्यार्थानां प्रत्यक्षादिविरोधेन नात्र संभवः ११॥

वंधत्रयं श्रुत्याद्यवैदिके तत्त्वमस्यादिवाक्येन दर्शयति तथेति तत्र संमतिमाह तदुक्तमिति लक्षणया तत्त्वमस्यादिवाक्यमखंडार्थबोधकमित्यत्राचार्यसंमतिमाह एतदिति ननु किमिदं तादात्म्यं तन्निष्ठासाधारणधर्मो भेदसहिष्णुरभेदो वा नोभयथापि संभवति अद्वैतासिद्ध्याऽपसिद्धांतप्रसंगादित्यत आह तादात्म्येति स चासावात्मा च तदात्मा तदात्मनो भावस्तादात्म्यमिति व्युत्पत्त्या तादात्म्यशब्दस्याखंडअर्थस्वरूपमर्थ इति तात्पर्यार्थः ननु घटमानयेत्यादौ संसर्गो वा विशिष्टो वा वाक्यार्थः सर्वसंमतः तत्त्वखंडवाक्यार्थः कैश्चिदभ्युपगम्यत इत्याशंक्याह संसर्गस्येति सत्यमेवं तथापि संसर्गत्वं वा विशिष्टत्वं वा न वाक्यप्रति

सोयं अयं स इति पदयोरर्थयोर्वा अविरुद्धवाक्यार्थे न सह लक्ष्यलक्षणभावः यथा तत्रैव सोयमित्यादिवाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वाऽविरुद्धे देवदत्तपिंडे न वाक्यार्थे न सह लक्ष्यलक्षणभावः तथा तत्त्वमस्यादिवाक्ये तत्त्वंपदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीववाचकयोरखंडचैतन्ये तात्पर्येण वृत्तिः सामानाधिकरण्यं तथा तत्त्वपदार्थयोरीश्वरजीवयोरन्योन्य—भेदव्यावर्तकतया तत्त्वमसि त्वं तदसि इति विशेषणविशेष्यभावः तथा तत्त्वंपदयोस्तदर्थयोर्वा वाक्यार्थेनाविरुद्धाखंडचैतन्ये न सह विरुद्धांशपरित्यागेन लक्ष्यलक्षणभावः तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणभावश्च पदार्थप्रत्यगात्मनामिति अस्यार्थस्तु उक्त एव एतदभिप्रायेण वाक्यवृत्तावपि उक्तं तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते इति तादात्म्यप्रतिपादने अखंडस्वरूपप्रतिपादने इत्यर्थः संसर्गस्य वा विशिष्टस्य वा विशिष्टैक्यस्य वा प्रत्यक्षादिविरुद्धत्वेन तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वायोगात् अखंडत्वं नाम विजातीयसजातीयस्वगतभेदशून्यत्वं ॥

ऽ पाद्यत्वे तंत्रं अनभिमतसंसर्गादेरपि वाक्यार्थत्वापत्तेः किं तर्हि तात्पर्यविषयत्वं तात्पर्यं चाखंडे ब्रह्मण एव उपक्रमादिभिर्लिंगैर्वेदांतानामवधृतमित्यखंडं ब्रह्म वाक्यार्थः अनभ्युपगमस्य पुरुषदोषत्वात् किं च तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वे संसर्गादेः प्रत्यक्षविरोधपरिहारासंभवेन तस्य तदयोगात् न च नाहमीश्वर इति प्रत्यक्षादिविरोधात्कथमखंडवस्तुनो महावाक्यप्रतिपाद्यत्वमिति वाच्यं श्रुतिविरोधे प्रत्यक्षादीनामाभासत्वात् यो

भोजनप्रकरणे सैन्धवमानयेत्यत्रानभिमतस्याश्वादिसंसर्गस्यापि वाक्यार्थत्वापत्तेरित्यर्थः ॥३॥ ३ ॥ घटकर्मकसंसर्गताकानयनानुकूलकृत्याश्रयो भवेत्यर्थः वैशिष्ट्यञ्च नीलोत्पलादौ बोध्यम् १२॥

ननु तथैवाखंडब्रह्मवाक्यार्थस्योपलब्धिः कथं न भवत्यत आह अनभ्युपगमस्येति यथा भ्रमप्रमादविप्रलिप्सा—दीनां पुरुषदोषत्वं तथाऽखंडब्रह्मवाक्यार्थानभ्युपगमस्यापीत्यर्थः वस्तुनो भ्रमादिदोषैरेवाखण्डार्थानभ्युपगम इति बोध्यम् २॥

संसर्गस्य वाक्यार्थत्वायोगादित्यर्थः ॥२॥ निश्चितम् ॥३॥

तर्जनीसहिताङ्गुष्ठेविस्तृतेप्रदेशप्रमाणंभवतीति॥२॥

तत्वमस्यादिश्रुत्या॥१॥

इन्द्रियसन्निकर्षाश्रयत्वंयोग्यत्वंयोग्ययोर्जीवेश्वरयोरनुपलब्धिर्योग्यानुपलब्धिस्तस्या असम्भवेनेत्यर्थः१॥
वाचस्पतिमिश्रमतेइंद्रियत्वंआचार्याणांमतेतुनकामादिवृत्तीनामुपादानत्वात् १॥

भिन्नत्वेसतीतिपूर्वदलेकथितेसतिसमवायेऽतिव्याप्तिस्तद्वारणायोत्तरदलंसमवेतत्वादित्युत्तरदलेसतिद्रव्यादिष्व
तिव्याप्तिस्तद्वारणायपूर्वदलंकारणद्वयेसमवायोस्तिइति॥१०॥ भेदेन२॥ भेदनि३॥

अ॰कौ॰ ग्यानुपलब्धेरसंभवेनजीवनिष्ठेश्वरभेदस्यप्रत्यक्षायोग्यत्वात् मनसोऽनिंद्रियत्वेनतथात्वाच्चजीवाधिकरणेश्वरभेदस्यसाक्षिभास्यतयाप्रातीतिकत्वेनतद्विषयप्रत्यक्षस्यश्रुत्या
प्र॰ बाधसंभवाच्चंद्रगतप्रादेशिकत्वप्रत्यक्षवत्तद्गतह्रस्वत्वादिप्रत्यक्षवच्चभेदप्रत्यक्षस्याज्ञानोपाधिकत्वेनस्वाभाविकाखंडार्थस्यमहावाक्यस्यतेनैःसमंविरुद्धत्वेनतन्निर्वर्तकतया
३१ भेदप्रत्यक्षस्यभ्रांतित्वाच्च नन्वेवंद्वासुपर्णेत्यादिश्रुत्याजीवपरयोर्भेदप्रतिपादनात् कथंमहावाक्यस्याखंडार्थत्वमितिचेन्नभेदस्यमानांतरसिद्धत्वेनश्रुति
प्रतिपाद्यत्वायोगात्फलवत्यज्ञातेऽर्थेश्रुतेस्तात्पर्यात् तस्मात्तदनुवादेनोदाहृतश्रुतेरखंडेब्रह्मण्येवतात्पर्यात् पैंगिरहस्यब्राह्मणेनश्रुत्यैवतथाव्याख्यातत्वा
च्चाखंडब्रह्मैवतत्वमस्यादिवाक्यप्रतिपाद्यंतस्मात् संसर्गस्यवाविशिष्टस्यवामहावाक्यप्रतिपाद्यत्वायोगात्तात्पर्यप्रतिपादनेइत्यस्याखंडस्वरूपप्रतिपादनइ
तिव्याख्यानमुचितमेवतदुक्तं संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः अखंडैकरसत्वेनवाक्यार्थोविदुषांमतइति ननुकिमिदमखंडत्वंजातिरुपाधिर्वाना

महावाक्ये१

**सर्वस्यप्रपंचस्यब्रह्मव्यतिरिक्तस्यकल्पितत्वेनमिथ्यात्वाद्विजातीयभेदशून्यताजीवपरमात्मनोरत्यंतैक्यात् सजातीयभेदशून्यता ए
करसत्वात्स्वगतभेदशून्यता॥** २१ द्यः अविद्यातिरिक्तजडजातेरनंगीकारात् ननुघटोयंघटोयमित्यनुगताकारप्रतीत्याजातिसिद्धेः कथमनंगीकारइति
चेन्न अनुगताकारप्रतीत्याघटत्वादिसिद्धावपितस्यजातित्वेमानाभावात् नचघटत्वादिकंजातिर्द्रव्यगुणकर्मविशेषभिन्नत्वेसतिसमवेतत्वात् व्यतिरेकेणाभाववव
दित्यनुमानेनतस्यजातित्वसिद्धिरिति वाच्यं समवायस्यनिरस्तत्वेनहेत्वसिद्धेःसाध्यप्रसिद्धेरनुमानांगत्वेनजातित्वस्यमानांतरासिद्धत्वेनव्याप्तिग्रहाभावेनतद
नुमानायोगाच्च अन्यथाऽतिप्रसंगात्तस्मादखंडत्वंनजातिः नचाविद्यातिरिक्तजडजात्यनंगीकारेपि — साविद्यैवास्तामितिवाच्यं तथात्वेतस्यश्रुतिवेद्यत्वाभा
वप्रसंगात् नद्वितीयः तस्यानिर्वचनत्वात्तथाहिनतावद्भेदशून्यत्वमखंडत्वंभेदस्यप्रसिद्धत्वेनतच्छून्यत्वस्यासंभवात् अप्रसिद्धत्वेऽप्रसक्तप्रतिषेधासंभवे
नतच्छून्यत्वस्यग्रहीतुमशक्यत्वान्नापिपरिच्छेदशून्यत्वंतत् परिच्छेदोनामावयवोवस्त्वंतरंवाऽभावोवानाद्यः ब्रह्मणोनिरवयवत्वेनावयवाऽप्रसक्तेन रामः
न्निषेधायोगेनतच्छून्यत्वस्यग्रहणायोगात् नद्वितीयः भवन्मतेब्रह्मव्यतिरिक्तवस्त्वंतरस्यमानांतरासिद्धतयातन्निषेधायोगेनतदनुपपत्तेः नतृतीयः अ ३१

91

मानाभावात्किंतुअविद्यैवघटादिधर्माकारेणभातिनतुनित्यमेकमनेकानुगतंसामान्यमितिलक्षणाजातिरस्तितथात्वेऽद्वैत
श्रुतिविरोधापत्तेः६॥ ॥समवायादीनामपिजातित्वंस्याल्लक्षणस्यतत्रसत्वादिति॥४॥

मायोपलक्षितानुपहितचैतन्यंअंतःकरणोपलक्षितानुपहितचैतन्यंतयोरैक्यमित्यखंडवाक्यार्थः२॥
अविद्यातिरिक्तजातिरूपाखंडार्थस्य४॥

अखण्डत्वम् ३॥ अविशिष्टत्वं विशिष्टाभावः स क इत्युक्ते पूर्वोक्ताभावाप्रसि

उभाभ्यां भावपदार्थाभ्यामन्योन्यस्मिन्नन्योन्याभावास्ति अद्वैतश्रुत्याद्वयोर्भावपदार्थयोरनंगीकारात् २॥ द्विरूपदोषस्यात्रापिततत्वादित्यर्थः ॥ ३॥ यदि ब्रह्मणोऽभेदेणाप्यन्यूनताभावसिद्धिः स्यात्तर्हि तन्निषेधः स्यात् १।

नाद्यनंतमजो नित्य इत्यादिश्रुत्या ब्रह्मणोऽनादिनित्यतया ध्वंसप्रागभावयोरसंभवात् अद्वितीयश्रुत्या ब्रह्मणस्त्रैकालिकानादिनित्यात्यंताभावस्यासंभवात् अतए
वतदन्योन्याभावस्यासंभवात् तस्मात् प्रसक्तप्रतिषेधायोगेनाभावः परिच्छेदस्तच्छून्यत्वमखंडत्वमित्यसंगतमेतत् एतेनानेकापर्यायशब्दप्रकाश्यत्वे सत्यवि
शिष्टत्वं नैदिति निरस्तं पूर्वोक्तदोषस्यात्रापितुल्यत्वात् तस्मादखंडं ब्रह्मवाक्यार्थ इत्यसंगतमित्याशंक्याह अखंडत्वं नामेति अखंडत्वमुपाधिरेव न च तन्निर्वचना
संभव इत्याह विजातीयेति न च विजातीयादिभेदस्याप्रसिद्धतयाऽप्रसक्तप्रतिषेधानुपपत्त्या तच्छून्यत्वं दुर्ग्रहमिति वाच्यं भ्रांत्या प्रसिद्धिसंभवेन तच्छून्यत्वग्रह
संभवात् वृक्षादीनां विजातीयो घटादिस्तद्भेदो वृक्षेषु प्रसिद्धो लोकानां एकस्य वृक्षस्य वृक्षांतरं सजातीयं तत्रान्योन्यभेदेऽन्योन्यस्मिन्प्रसिद्धः स्वगतं शाखापत्रादि
दितद्भेदो वृक्षे प्रसिद्धः प्रत्यक्षादिना नैव ब्रह्मणि संभवतीत्याह सर्वस्येति वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमैतदात्म्यमिदं सर्वं तदनन्यत्वमारंभण
शब्दादिभ्य इत्यादिश्रुतिसूत्राभ्यां कार्यस्य कारणाद्व्यतिरेकात् सर्वस्य कल्पितत्वं न चाज्ञानस्याकार्यतया ब्रह्मव्यतिरेकात्कल्पितत्वप्रसंग इति वाच्यं एकमेवा

**अथवा त्रिविधभेदशून्यत्वं अखंडत्वं विभुत्वाद्देशपरिच्छेदशून्यत्वं नित्यत्वात्कालपरिच्छेदशून्यत्वं सर्वात्मकत्वात् वस्तुपरिच्छेदशून्यत्वं॥**

द्वितीयमैतदात्म्यमिदं सर्वमिति श्रुत्या साज्ञानस्य कार्याकार्यसर्वप्रपंचस्य ब्रह्माव्यतिरेकावगमेनाज्ञानस्यापि कल्पितत्वसंभवात्कल्पितस्य सर्वस्य
प्रपंचस्य मिथ्यात्वेन परमार्थतोऽधिष्ठानेऽसत्त्वेन विजातीयभेदशून्यत्वं ब्रह्मण उपपद्यते एवं तत्त्वमसि अहं ब्रह्मास्मि क्षेत्रज्ञं चापि मां विद्धीत्यादिश्रुतिस्मृतिभिर्जी
वपरमात्मनोरत्यंतैक्यप्रतिपादनेन चेतनांतरस्यासंभवाज्जीवभावस्य मिथ्यात्वेनाज्ञानकल्पितत्वाद्ब्रह्मणः सजातीयभेदशून्यत्वं तथा निष्कलं निष्क्रियं शांतं
निरवद्यं निरंजनं केवलो निर्गुणश्चासंगो ह्ययं पुरुषः नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इति श्रुतिस्मृतिभिरवयवगुणक्रियाजातिसंबंधप्रतिषेधेन सत्यादि
वाक्यैर्ज्ञायमानावयवगुणादीनां श्रुतिप्रति द्यत्वाभावेन मायाकल्पितत्वेन च मिथ्यात्वाद्ब्रह्मणः स्वगतभेदशून्यत्वमिति भावः स्वगतभेदशून्यत्वमखंडत्वमित्युक्ते
सांख्यात्मन्यतिव्याप्तिः सांख्यैरप्यात्मनोऽवयवगुणक्रियाजातिशून्यत्वाभ्युपगमेन स्वगतभेदशून्यत्वसंभवात्तद्वारणाय सजातीयेत्युक्तं तैर्जीवानां परस्परभेदा
भ्युपगमेन सजातीयभेदशून्यत्वाभावान्नातिव्याप्तिः सजातीयस्वगतभेदशून्यत्वमखंडत्वमित्युक्ते आकाशेऽतिव्याप्तिस्तद्वारणाय विजातीयेति॥ छ ॥

हिरण्यश्मश्र्वादीनां सत्यादीनां चेत्यर्थः॥३॥

विजातीयभेदशून्यत्वंनदित्युक्ते सजातीयस्वगतभेदयोरभ्युपगमः स्यादतस्माद्द्वितीयश्रुतिविरोधापत्तिः तद्वारणाय सजातीयेत्यादि एकरसत्वसिद्धये स्वगतेति एवंपदप्रयोजनं द्रष्टव्यम् प्रकारांतरेणाखंडत्वंनिर्वक्त्यथवेति ब्रह्मणि लक्षणमुपपादयति विभुत्वेति परिच्छेदोऽभावो घटत्वादीनां देशपरिच्छेदः पटादिषु तदात्म्यनाभावः स च ब्रह्मणो विभुत्वान्नास्त्येव अन्यथा विभुत्वमेव न स्यात् घटादिव्यक्तीनां कालपरिच्छेदः स्वोपादाने ध्वंसः स च ब्रह्मणो नित्यत्वान्नास्त्येव नित्यत्वं च ब्रह्मणः श्रुतिप्रसिद्धं घटादीनां वस्तुपरिच्छेदो पटादिषु घटादिप्रतियोगिकभेदो वा घटादिषु पटादिप्रतियोगिकभेदो वा द्विविधभेदोपि ब्रह्मणः सर्वा

देशपरिच्छेदेसति २॥

वेदाहमेतमजरं पुराणं सर्वात्मकं सर्वगतं विभुत्वादित्यादिश्रुतेः यद्वा अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वमखंडत्वं तदुक्तं अविशिष्टमपर्यायानेकशब्दप्रकाशितं एकं वेदांतनिष्णाता अखंडं प्रतिपेदिरे इति एवं तत्वमस्यादिवाक्यजन्याखंडापरोक्षज्ञानादज्ञाननिवृत्तिरानंदावाप्तिश्च तदुक्तं प्रत्यक्बोधोय आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यक्बोधैकलक्षणः॥ ६ ॥

निगुणः॥२

घटकलशादावपर्यायत्वाभावः॥३॥ नीलोत्पलादावविशिष्टत्वाभावः॥ ३॥

त्मत्वान्नास्त्येव सर्वस्य स्वप्रकल्पितगजादिवत् ब्रह्मण्यारोपितत्वादारोपितस्याधिष्ठानव्यतिरेकेणाभावाद्ब्रह्मणः सर्वात्मत्वमत एवैकरसत्वं सर्वात्मकत्वं ब्रह्मणः श्रुतियुक्त्यनुभवसिद्धमतो नोक्तविकल्पावकाशः उक्तार्थे श्रुतिमुदाहरति वेदेति कल्पतरावाचार्यनिर्वचनमाह यद्वेति तत्रैव तेषां सम्मतिमाह तदुक्तमिति॥ घटादौ नीलोत्पलादौ चातिव्याप्तिवारणाय विशेषणद्वयं यद्यपि यतो वाचो निवर्तंते इत्यादिश्रुत्या ब्रह्मणो वाङ्मनसाऽतीतत्वप्रतिपादनात् साक्षाच्छब्दप्रकाश्यत्वमनुपपन्नं तथापि वाच्यार्थमायांतःकरणद्वारा लक्षणया शब्दप्रकाशितत्वं संभवत्येव अन्यथा तं त्वौपनिषदमित्यादिश्रुतिविरोधापत्तेः

तस्मात्तत्त्वमस्यादिवाक्यं लक्ष्यार्थावुपादाय खंडस्वरूपप्रतिपादने प्रवर्त्तने इति निरवद्यं अस्तु तत्वमस्यादिवाक्यमखंडार्थबोधकं ततः किंस्यादित्यत आह एवमिति एवमुक्तप्रकारेणाहमेव ब्रह्म ब्रह्मैवाहमस्मीति महावाक्यजन्याखंडापरोक्षज्ञानं ततोऽनर्थनिवृत्तिरानंदावाप्तिश्च भवतीति विशेषः तत्राचार्यसंमतिमाह तदुक्तमिति आचार्यश्लोकं व्याचष्टे अन्योन्येति अहं ब्रह्मास्मीति ज्ञानेन ब्रह्मणः परोक्षत्वानात्मत्वनिवृत्तिः ब्रह्मैवाहमस्मीति ज्ञानेन जीवस्य परिच्छिन्नत्वाब्रह्मत्वनिवृत्तिः किंवहुनाज्ञानेन सर्वसंसारनिवृत्तिः ततश्च प्रत्यगात्माऽखंडैकरसब्रह्मानंदात्मनाऽवतिष्ठति ब्रह्म वेद ब्रह्मैव भवति क्षेत्रक्षेत्रज्ञयो ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितात्मज्ञानरूपेण चक्षुषा क्षेत्रक्षेत्रज्ञयोरन्तरं परस्परवैलक्षण्यं जाड्यचैतन्यविकारित्वनिर्विकारित्वादिरूपं ये विदुर्जानन्ति भूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्यामायाख्यात

तस्या आत्मविद्यया मोक्षमभावगमनञ्च ये विदुस्ते परं कैवल्यं यान्तीत्यर्थः ॥ १॥

पत्ति

इत्थमन्योन्यतादात्म्यप्रतिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येत तदैव हि तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते इत्यन्योन्यतादात्म्यप्रतिपत्तिः अहं ब्रह्मास्मीति ब्रह्मैवाहमस्मीत्यखंडाकारवृत्तिः तया वृत्त्याऽज्ञाने निवृत्ते अब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् प्रत्यगात्मनः अखंडानंदस्वरूपावस्थितिर्भवतीति श्लोकतात्पर्यार्थः इति प्रथमः परिच्छेदः समाप्तः १

रेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परमित्यादिश्रुतिस्मृतिशतेभ्यः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीमुनिवरविरचिते तत्वानुसंधानव्याख्याने अद्वैतचिंताकौस्तुभे प्रथमः परिच्छेदः समाप्तः शुभमस्तु लेखकपाठयोः श्रीकृष्णाय नमः ओंशान्ति शान्ति शान्ति ॥ छ ॥

इतितत्वानुसन्धानमद्वैतकौस्तुभटीकोपेतंसमाप्तः।।

इदंपुस्तकंकाश्यांगोवर्धनदासाभिधेयेनमयाहरिहररत्नाकराख्यस्वीययन्त्रालयेऽङ्कितम् सं० १९४८ मुंबद्याख्य प्रतियायांशोधितं॥ यहसबपुस्तककाशी
मेकुंजगलीकेपश्चिमफाटकपरगोवर्धनशाहकेदुकानपरहै ॥ ❁ ॥

# अथाद्वैतकौस्तुभस्यद्वितीयपरिच्छेदप्रारम्भः

सीतापतिंसर्वसुरैश्चसेव्यंरात्रिंचराणांकुलतूलवह्निम्॥ भक्तप्रियंहेतुचयावसानंश्रीरामचन्द्रंशिरसाभिवन्दे॥१॥ साङ्गोपाङ्गप्रमाणानांद्वितीयेऽस्मिन्निरूपणम्।
कृतश्चाद्वैतसिद्ध्यर्थंग्रन्थकृद्भिश्चसूरिभिः॥२॥ ❁ ॥

॥ श्रीगणेशाय नमः॥ यस्यादाब्जरयोगाद्गृध्रव्याधाद्योऽधमाः॥ पुमर्थं लेभिरे रामं मे श्रीं वयमुपास्महे १॥ योगीन्द्राः समाहितस्वान्ता यं विगलितभिदं शुद्धं परमात्मानं जडतनुसमासङ्गवशतः कार्य्यकारणात्मकजडवर्गेण सहकल्पिततादात्म्याध्यासेन त्रिजगतां नियन्तारं प्रेरकम् अहंस्तुरूपेणावयन्तं माम इति योजना शेषं स्वजडतनुसमासङ्गवशात् इति पुनरावृत्त्य योजनीयम्॥१॥

॥ ॐ श्रीगणेशाय नमः॥ प्रमातारं मानफलमपि च मेयं त्रिजगतां नियन्तारं जीवं विगलितभिदं शुद्धममलं यमाहुर्योगीन्द्रा जडतनुसमासंगवशतो नमामस्तं कृष्णं व्रजयुवतिचिन्तालिकमलं १ नन्वमस्यादिवाक्यजन्याखंडापरोक्षवृत्त्याज्ञाननिवृत्तिरानंदावाप्तिश्च भवतीत्युक्तं तत्र केयं वृत्तिः किं वा तत्र प्रमाणं कथं वा तदुत्पत्तिर्वृत्त्या वा किं प्रयोजनमित्याकांक्षायां प्रमाऽप्रमाभेदेन द्विविधां वृत्तिं निरूपयितुं प्रथमं वृत्तिं लक्षयति वृत्तिर्नामेति यद्यपि प्रमेयसिद्धिः प्रमाणादिति प्रथमं प्रमाणनिरूपणमुचितं तथापि तन्त्रान्तरे प्रमेयस्य जडतया प्रमाणाधीनासिद्धिर्भवतीति तन्निरूपणमुचितं इह त्वद्वितीयात्मसाक्षिचैतन्यस्य सर्वप्रमाणादिव्यवहारसाधकस्य वेदान्तप्रमेय— तया तन्निरूपणं कृतमनन्तरं प्रमाणादिनिरूपणमुचितमेवेत्यतो न काप्यनुपपत्तिः यथाहुः मानेन मेयाधिगतिस्तु युक्ता प्रमेयजाड्याद्धि धिनिष्ठकांडे मेये न मानाधिगतिस्तु युक्ता वेदान्तवाक्याद्जडं हि मेयमिति वृत्तिर्वृत्तिर्ज्ञानं घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यं क्रोधादि।

श्रीगणेशाय नमः॥ वृत्तिर्नाम विषयचैतन्याभिव्यंजकोन्तःकरणाज्ञानयोः परिणामविशेषः अभिव्यंजकत्वं नामापरोक्षव्यवहारजनकत्वमावरणनिवर्तकत्वं वा परिणामो नाम उपादानसमसत्ताकोऽन्यथाभावः उपादानविषमसत्ताकोन्यथाभावो विवर्त इति भेदादनयोः परिणामविवर्तयोर्वृत्तिः उपादानान्तःकरणाज्ञानापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति न सिद्धान्तविरोधः॥

((अतिव्याप्तिवारणाय पूर्वदलं चक्षुरादावतिव्याप्तिवारणायोत्तरदलं तेषामपि स्वजन्यवृत्तिद्वारा विषयचैतन्याभिव्यंजकत्वात्तद्वारावृत्त्यर्थमपेक्षितं ननु किमिदमभिव्यजकत्वमित्याशंक्याह अभिव्यंजकं नामेति नन्वनुमित्यादिवृत्तीनां प्रत्यक्षव्यवहारजनकत्वाभावादव्याप्तिरित्यरुचेराह आवरणनिवर्तकत्वं वेति यद्यपि प्रत्यक्षवृत्तेरेवावरणनिवर्तकत्वमित्यव्याप्तिस्तदवस्था तथाप्यनुमित्यादेरसत्त्वापादकमौल्याज्ञानावरणनिवर्तकत्वान्नाव्याप्तिरिति ध्येयं ननु पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः स चानुपपन्नः पूर्वरूपे स्थिते नष्टे वा रूपान्तरापत्तेरदर्शनात् किंच वेदान्तवादस्तु विवर्तवाद इत्यभ्युपगमात्परिणामवादाश्रयणे सिद्धान्तविरोधापत्तेश्चेत्यत आह॥ परिणामो नामेति अन्यथाभावः परिणाम इत्युक्ते विवर्तेऽतिव्याप्तिः स्यादत उक्तं उपादानसमसत्ताक इति अन्यथाभावो विवर्त इत्युक्ते। परिणामेऽतिव्याप्तिवारणायोपादानविषमसत्ताक इत्युक्तम् ॥ ६ ॥

उपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वे सति तदवस्थाविशेषत्वं तत्परिणामत्वं एवं विवर्तेपि ८॥

अग्निस्त्रिकोणइत्यादिवत् ४ ॥ १निरवयवस्यपरिणामस्वीकारेनदीयंयन्निरवयवस्वरूपंतस्यनाशप्रसंगादित्यर्थः १॥ स्वभावसिद्धम् ७

नन्वंतःकरणस्यनिरवयवत्वात्कथंपरिणामःसावयवस्यक्षीरादेःपरिणामदर्शनात्नहिनिरवयवंपरिणम्यमानंदृष्टंलोकेअन्यथास्वरूपनाशप्रसंगा
त् इत्याशंक्याह तदिति वृत्तिज्ञानेस्यांतःकरणधर्मत्वेकामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतिरेवतत्रप्रमाणं
दृष्टव्यंननुजानामीच्छामीत्यात्मधर्मत्वेनानुभूयमानानांज्ञानेच्छादीनांकथमंतःकरणधर्मत्वमनुभवविरोधात्तच्चानुभवोभ्रमःबाधकाभावादितिचेन्नतप्ता
यःपिंडवदन्योन्यतादात्म्याध्यासेनांतःकरणात्मनोरैक्येदहतीतिवज्जानामीत्याद्यनुभवोपपत्तेःनचाध्यासेमानाभावःस्वानुभवस्यैवप्रमाणत्वात् तथाहि
जानामीतिज्ञातृत्वमनुभूयतेतच्चांतःकरणस्यकेवलस्यनसंभवति जडत्वान्नापितदात्मनःसंभवतिअसंगोह्ययंपुरुषः।केवलोनिर्गुणश्चअव्यक्तोयम
चिंत्योयमविकार्योयमुच्यतेइत्यादिश्रुतिस्मृतिभिरसंगत्वावगमात्ततश्चाहमित्यात्मन्यंतःकरणमध्यस्यांतःकरणेऽहंचेतनइत्यात्मतादात्म्यमध्यस्यान्यो
न्यधर्मांश्चान्योन्यस्मिन्नध्यस्याहंजानामीतिज्ञातृत्वमनुभवतिजीवःअतःस्वानुभवएवाध्यासेप्रमाणंतदाहभगवान्भाष्यकारःअहमिदंममेदमितिनैस

तन्मनोऽकुरुतेत्यादिश्रुत्यांतःकरणस्यकार्यद्रव्यत्वेनसावयवतयापरिणामित्वोपपत्तिःसाचवृत्तिर्द्विविधाप्रमाऽप्रमाभेदात्
अत्रबोधेद्धावृत्तिर्वृत्तीद्धबोधोवाप्रमासाचद्विविधाईश्वराश्रयाजीवाश्रयाचेति॥ २२ र्गिकोयंलोकव्यवहारइतियच्चजन्यज्ञानेच्छा।

दीनामात्ममनःसंयोगादुत्पत्तिरितिन्यायमतंतन्नोपपद्यते आत्ममनसोर्निरवयवतयासंयोगासंभवात् तथाहि अव्याप्यवृत्तिर्हिसंयोगःअव्याप्यवृत्ति
त्वंनामस्वाधिकरणनिष्ठात्यंताभावप्रतियोगित्वंतच्चविरुद्धयोःप्रतियोगि———तदभावयोरवच्छेदकभेदमंतरेणात्मनिनिःप्रदेशेऽसंभवेनात्मनि।
ज्ञानादयोजायंतइत्यनुपपन्नं अपिच ज्ञानस्यात्मकार्यत्वेउपादानमात्मावक्तव्यस्तस्योपादानत्वमारंभकत्वेनवास्यात् परिणामित्वेनवानाद्यःएकस्यानारंभ
कत्वात् नद्वितीयःनिरवयवस्यपरिणामायोगात्सावयवत्वेऽनित्यत्वप्रसंगात्तस्मादसंगतत्वान्न्यायमतस्य वृत्तिज्ञानमंतःकरणधर्मएवेतिवृत्तिंविभजते सा
चेति प्रमांनिरूपयतिबोधेति बोधेनेद्धाज्वलिताप्रकाशिनासाचासौवृत्तिश्चेतितथावृत्याविद्धःप्रतिबिंबितोवृत्तीद्धःसचासौबोधश्चसतथावृत्त्यभिव्यक्तचैतन्य
मितियावत् प्रमांविभजते साचेति॥ छ ॥

न्यायमतेपुरीतनिवहिर्देशावच्छेदेनात्ममनःसंयोगस्यज्ञानहेतुत्वम्तथाचदेशकालस्यवकोलपिदेशस्यावच्छेदक
त्वादितिवदात्मन्यपिपुरीतनिवहिर्देशस्यावच्छेदकत्वमस्त्वितोदूषणांतरमाह॥ अपिचेति॥४॥

॥५॥ किमवच्छेदेनमनआत्मसंयोगरूपप्रतियोगिकिमवच्छेदेनचतदभावइत्यात्मनिवक्तुमयोग्यंतस्यनिरवय
वत्वेनप्रदेशशून्यत्वात्॥ ५॥

आकाशादि ६॥ सर्वस्यसाक्षिणाधिगतत्वात् ब्रह्मज्ञानेनचवाधितत्वादसम्भवः ॥४॥ ॥ ॥

अ·कौ प्रथमांनिरूपयति तत्रेति तयोर्मध्येइतिसप्तम्यर्थः तत्रप्रमाणमाह तदिति तत्प्रकृतंसच्छब्दवाच्यमैक्षत ईक्षणंकृतवत् ईक्षणमभिनयति बह्विति ब
हि·प्र· हुस्यांवहुभवेयंप्रजायेयउत्पद्येयजीवाश्रयांप्रमांनिरूपयति अनधिगतेति अनधिगतः अज्ञानः बोधेनाविषयीकृतोयोर्थोविषयस्तदाकारायांतःकरण
३५ वृत्तिः तत्प्रतिविंविताचित् द्वितीयाजीवाश्रयाविषयाकारांतःकरणवृत्तिप्रतिविंविताचिज्जीवाश्रयप्रमेत्युक्ते भ्रांतिज्ञानेऽतिव्याप्तिस्तद्वारणायावाधितेति।
भ्रमविषयीभूतस्यरजतस्यबाधितत्वात्नातिव्याप्तिस्तावदुक्तेस्मृतावतिव्याप्तिरतउक्तमनधिगतेति स्मृतेरनुभूतविषयत्वान्नातिव्याप्तिः संपूर्णासंभव
माशंक्याह ब्रह्मेति तथात्वादनधिगतावाधितार्थविषयाकारांतःकरणवृत्तिप्रतिविंवितचित्त्वात् ननुप्रपंचस्यब्रह्मज्ञानवाध्यत्वेनतत्प्रमायामव्याप्ति

तत्र ईक्षणापरपर्यायस्रष्टव्यविषयाकारमायावृत्तिप्रतिविंवितचिदीश्वराश्रया तदैक्षत वहुस्यांप्रजायेयेत्यादिश्रुतेः अनधिगता
वाधितविषयाकारांतःकरणवृत्तिप्रतिविंवितचिज्जीवाश्रयातु द्वितीया ब्रह्मात्मैक्यप्रमायास्तथात्वान्नासंभवः प्रपंचस्यसंसारदशा
यामवाधितत्वात् तत्प्रमायांनाव्याप्तिः शुक्तिरजतादेर्ज्ञान सत्ताकत्वेनाज्ञानसत्ताकत्वाभावात् नातिव्याप्तिः तत्करणंप्रमाणंसाजी 95
वाश्रयाप्रमाद्विविधापारमार्थिकीव्यावहारिकीचेति तत्र तत्त्वमस्यादिवाक्यजन्याप्रमापारमार्थिकीसाचनिरूपिता अग्रेपिनिरू
पयिष्यते प्रपंचप्रमाव्यावहारिकी॥

ऽऽ रित्याशंक्याह प्रपंचस्येति ननुभ्रांतिज्ञानेयथोक्तलक्षणसद्भावादतिव्याप्तिरित्याशंक्याह शुक्तीति
एवंप्रमालक्षणेनिर्दिष्टेफलितमाह तदिति तस्याःप्रमायाः करणंप्रमाणं अत्रप्रमाणंलक्ष्यंप्रमाकरणंलक्षणंकरणंप्रमाणमित्युक्तेकुठारेऽति
व्याप्तिःस्यात्तस्यापिछिदिक्रियांप्रतिकरणत्वात् तद्वारणायप्रमेति प्रमाप्रमाणमित्युक्तेचक्षुरादावव्याप्तिःस्यात्तस्यद्रव्यत्वेनप्रमात्वाभावात्तत्परिहाराय
करणमित्युक्तंकरणस्वरूपमग्रेव्युत्पादयिष्यतिजीवाश्रयांप्रमांविभजते सेति पारमार्थिकींव्युत्पादयति तत्रेति तर्हिपारमार्थिकीप्रमानिरूपणीयेत्याकां रामः
क्षायामाहसाचेति अग्रेशाब्दिप्रमानिरूपणावसरे व्यावहारिकींप्रमांनिरूपयति प्रपंचेति॥ ९॥ ९॥ प्रमा ६ ३५

आवर्णभंगमात्रविषयत्वात्॥८

वैशेषिकः १ ॥ घटप्रकारकरूपविशेष्यकशाब्दबोधः ४ ॥ अनिर्वचनीयख्यातिवादिभिः शांकरैः शुक्तिरजतादिस्थलेऽनिर्वचनीयरजतादीनामुत्प त्ती कारादिनिभावः ॥ ३

त्तां विभजते साचेति प्रत्यक्षप्रमां लक्षयति तत्रेति तासुमध्य इत्यर्थः अत्र नैयायिकाः प्रमाकरणं प्रमाणं । यथार्थानुभवः प्रमा तद्वति तत्प्रकारकत्वं याथार्थ्यं । स्मृतिभिन्नज्ञानमनुभवः साचतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दप्रमाभेदात् तत्रेंद्रियत्वेनेंद्रियजन्यं ज्ञानं ज्ञानाकरणकं ज्ञानं वा प्रत्यक्षमिति वदंति । तच्चिंत्यं भ्रमज्ञानेऽतिव्याप्तेः न च तद्वति तत्प्रकारकानुभवस्य प्रमात्वेन भ्रमस्यातथात्वान्नातिव्याप्तिरिति वाच्यं भ्रमविषयरजतस्य शुक्तावप्युपेयत्वेन भ्रमस्यापि तद्वति तत्प्रकारकत्वात् अन्यथाख्यातेर्निरसिष्यमाणत्वात् किंच घटे रूपमिति प्रमायामव्याप्तिस्तस्य तद्वति तत्प्रकारकत्वाभावात् स्वरूपसंबंधेन तथात्वे भ्रमेऽतिव्याप्त्यापत्तेस्तस्माद्यथोक्तमेव साधु ननु भवन्मते धारावाहिकज्ञानेऽव्याप्तिः स्यात्तस्याधिगतविषयत्वादिति चेन्न तत्रापि तत्तत्क्षणविशिष्टघटस्यानधिगतत्वेन धारावाहिकज्ञानस्यापि तथात्वात् ननु क्षणस्यातींद्रियत्वेन तस्य तद्विशिष्टविषयत्वमनुपपन्नमिति चेन्न धारावाहिकस्थलेवि

अनधिगताबाधितार्थविषयत्वात् ॥ १ ॥ क्षणस्य घटविशिष्टविषयत्वं १ ॥ प्रकारांतरेण समाधत्ते १

साच षड्विधा प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यभावप्रमाभेदात् तत्र विषयचैतन्याभिन्नप्रमाणचैतन्यं प्रत्यक्षप्रमा ॥

व्यतिरेकस्य २

रोधित्वमुत्पत्ति पर्यंतं यावद्घटस्फुरणं तावद्वृत्तेरेकत्वेन ज्ञानभेदाभावेनाव्याप्तिशंकानवतारात् वृत्तिभेदे मानाभावाच्च किंच प्रमाचातुर्विध्यमप्यसंगतं पीनत्वदर्शनाद्रात्रिभोजनप्रमाऽभावप्रसंगात् न च व्यतिरेकानुमानात् साभविष्यतीति वाच्यं तस्याग्रे परिहरिष्यमाणत्वात् तथानुपलब्ध्याभावप्रमादर्शनात् प्रमितेश्चातुर्विध्यमसंगतं इंद्रियान्वयव्यतिरेकयोरधिकरणज्ञानोपक्षीणत्वेनेंद्रियस्य संबद्धार्थप्रकाशकत्वे चाभावेनेंद्रियस्य संबंधाभावेन च तेन तद्ग्रहणायोगात् तस्मादनिच्छताप्यच्छमतिनार्थापत्त्यनुपलब्ध्योः पृथक्प्रामाण्यमभ्युपगंतव्यं ततः षड्विधैव प्रमा किंच इंद्रियत्वेनेंद्रियजन्यं ज्ञानं प्रत्यक्षमित्यसंगतं इंद्रियस्यानीं————द्रियतयानद्घटितप्रत्यक्षत्वविशिष्टज्ञानस्याप्यतींद्रियत्वप्रसंगात् न चेष्टापत्तिः साक्षात्करोमीत्यनुभवविरोधप्रसंगात् जन्यताच्छेदकग्रहमंतरेण जन्यत्वस्य दुर्ग्रहत्वाच्च न च साक्षात्त्वजातिरेव जन्यतावच्छेदिकास्त्विति वाच्यं ॥ ॥२ इंद्रियत्वं जातिरुपाधिर्वा नाद्यः श्रुतिविरोधात् न द्वितीयाप्यर्थिआभावात् ॥ इंद्रियेणाभावस्य ३ ॥

प्रत्यक्षलक्षणंज्ञानाकरणकंज्ञानं१॥ इंद्रियसंनिकर्षाश्रयत्वंयोग्यत्वं५॥ मतांतर६॥ अर्थोविषयोयस्यज्ञानस्यतत्त्व६॥ भ्रमप्रत्यक्षेसाक्षिद्वयोरैक्यात्॥३॥

जातेर्निरस्तत्वात् अपिच द्वितीयमप्यसंगतमेवतत्वसाक्षात्कारस्यश्रवणमननादिजन्यतयातत्राव्याप्तिप्रसंगात् तस्मादसंगतमेतत् प्रमाणचैतन्यप्रत्यक्षप्रमेत्युक्ते अनुमित्यादावतिव्याप्तिःस्यात् तद्वारणायविषयेतिविषयचैतन्याभिन्नंवृत्त्यवछिन्नचैतन्यंप्रत्यक्षप्रमेत्युक्तेभ्रमप्रत्यक्षेऽतिव्याप्तिःस्यात्तद्व्यावृत्त्यर्थंप्रमाणेतिनचैवंविषयचैतन्याभिन्नप्रमाणचैतन्यमिदमाकारवृत्त्यवछिन्नभ्रमविषयरजतभासकसाक्षिचैतन्यमितिपुनरतिव्याप्तिरितिवाच्यं अबाधितत्वस्यापिविषयविशेषणत्वात् नचैवंघटादेर्ब्रह्मज्ञानबाध्यतयाऽव्याप्तिरितिवाच्यंसंसारदशायामबाधितत्वस्यविवक्षितत्वात् नचैवमपिधर्माधर्मानुमित्यादावतिव्याप्तिरितिवाच्यंयोग्यत्वस्यापिविषयविशेषणत्वात् एवंसत्तावतिव्याप्तिपरिहारायवर्तमानेतिविशेषणंदेयंतथाचायमर्थःसंपन्नःसंसारदशायामबाधितवर्तमानयोग्यविषयचैतन्याभिन्नप्रमाणचैतन्यंप्रत्यक्षप्रमेति अथवाऽबाधितापरोक्षार्थविषयज्ञानंप्रत्यक्षप्रमाभ्रमविषयस्यबाधितत्वान्नातिव्याप्तिःघटादीनांसंसारदशायामबाधितत्वान्नाव्याप्तिःपूर्वंप्रत्यक्षविषयस्यापरोक्षत्वंनामसाक्षितादात्म्यं तथाचनान्योन्याश्रयःविषयत्वंना''

तथाहिएकमेवचैतन्यमुपाधिभेदाच्चतुर्विधंप्रमातृचैतन्यंप्रमाणचैतन्यंविषयचैतन्यंफलचैतन्यंचेति तत्रांतःकरणविशिष्टचैतन्यं प्रमातृचैतन्यंअंतःकरणवृत्त्यवछिन्नचैतन्यंप्रमाणचैतन्यंघटाद्यवछिन्नचैतन्यंविषयचैतन्यं॥

'' मज्ञानेस्वाकारसमर्पकत्वंविषयित्वंनामतदवभासकत्वं ननुवृत्तीद्धबोधस्यप्रमात्वेनाखंडचैतन्यस्यस्वप्रकाशत्वेनतज्ज्ञेयत्वाभावात् ज्ञानज्ञेययोःकथंविषयविषयीभाव। इतिचेन्नबोधेद्धवृत्तेरेवप्रमात्वाभ्युपगमेनाखंडचैतन्यस्यतद्विषयतयाविषयविषयीभावोपपत्तेःअथवाविषयत्वंनामव्यंग्यत्वंविषयित्वंनामव्यंजकत्वंविषयनिष्ठावरणनिवर्तकत्वमितियावत् ततश्चब्रह्मैक्यप्रमायाःअखंडचैतन्यनिष्ठावरणनिवर्तकत्वाद्विषयविषयीभावउपपद्यते यद्वा अध्यस्तत्वंविषयत्वं चित्वंविषयित्वंततश्चाज्ञानादिसमस्तंजगद्विषयश्चिदात्मावृत्त्यारूढोविषयीति चैतन्यभेदेज्ञातेविषयचैतन्याभिन्नप्रमाणचैतन्यंप्रत्यक्षप्रमेतिज्ञातुंशक्यमिति॥उपाधिभेदात्तद्भेदंव्युत्पादयत्येकमिति अथवाचैतन्यस्याद्वितीयत्वेनविषयचैतन्याभिन्नंप्रमाणचैतन्यमित्यनुपपन्नमित्याशंक्योपाधिभेदात्तद्भेदंव्युत्पादयत्येकमितिएवंचैतन्यभेदंव्युत्पाद्यप्रमाणचैतन्यस्यविषयचैतन्याभेदंव्युत्पादयति तत्रेति तेषुमध्येंतःकरणपरिणामोवृत्तिरित्युक्तंतत्रापरोक्षवृत्तेरुत्पत्तिप्रकारंसदृष्टांतंव्युत्पा

आवरणभंगायवृत्त्यंशविषयतया५॥ वृत्तिप्रतिबिंबनाभासेन।६। अबाधितापरोक्षार्थविषयत्वंज्ञानस्यापरोक्षत्वंअपरोक्षज्ञानविषयत्वमर्थापरोक्षमित्यन्योन्याश्रयोनास्तीत्यर्थः८॥

द्यति तथाहीत्यादिनावृत्तिरित्युच्यत इति शेषः अनुमित्यादिस्थले विषयेंद्रियसन्निकर्षाभावादंतःकरणस्य वहिर्निर्गमनं नास्ति तत्र वह्न्याद्याकारा वृत्तिरंतरेव जायते अत एव तस्याः परोक्षत्वं विषयेन संबंधाभावादिति भावः अस्तु ततः किं तत्राह तस्यामिति इंद्रियार्थसन्निकर्षजन्यवृत्तावित्यर्थः विषयचैतन्यं घटाद्यवच्छिन्नचैतन्यं ततोपि किं तत्राह तदेति यदेंद्रियार्थसंनिकर्षानंतरं घटाकारवहिर्निर्गतांतःकरणवृत्तौ विषयचैतन्यं प्रतिफलति तदेति योजना घटाकारवृत्तिघटयोरित्यर्थः युगपदेकदा एकदेशस्थत्वेन एकस्मिन्देशे विद्यमानत्वेन वृत्तिघटोपाधिकयोश्चैतन्ययोर्भेदाप्रयोजकत्वात् भेदापादकत्वाभावाद्यथा सुखावच्छिन्नचैतन्यं तदाकारवृत्त्यवच्छिन्नचैतन्यं चोभयमभिन्नं भवति सुखतदाकारवृत्त्योरेकस्मिन् साक्षिण्यध्यस्तत्वादेवं घटतदाकारवृत्त्योरेकस्मिन् साक्षिण्यध्यस्त-

अंतःकरणवृत्त्यभिव्यक्तचैतन्यं फलचैतन्यं तत्र वृत्तिविषययोर्युगपदेकदेशावस्थानेन तदुपहितचैतन्ययोरप्यभेदो भवति तथाहि तडागोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुःकोणाद्याकारेण यथा परिणमते तथेंद्रियार्थसन्निकर्षानंतरं अंतःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन संयुज्यते पश्चात्तदाकारेण परिणमते सोयं परिणामो वृत्तिः तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति तदा वृत्तिविषययोर्युगपदेकदेशस्थत्वे न तदुपहितचैतन्यभेदाप्रयोजकत्वात् प्रमाणचैतन्यं विषयचैतन्याभिन्नं भवति सेयं प्रत्यक्षप्रमा॥ तत्र वृत्त्यावरणं निवर्त्तते चैतन्येनाज्ञानं निवर्तते प्रमया वा सावरणाज्ञानं निवर्त्तते ॥

१२ त्वाद्वृत्त्यवच्छिन्नप्रमाणचैतन्यं घटाद्यवच्छिन्नविषयचैतन्याभिन्नं भवतीत्यर्थः अस्तु प्रकृते किमायातं तत्राह सेयमिति अनुमित्यादिस्थले विषयतदाकारवृत्त्योरेकस्मिन्नध्यस्तत्वाभावे प्रमाणचैतन्यस्य विषयाचैतन्याद्भिन्नतया परोक्षत्वमिह तु तद्विपरीत्यात्प्रत्यक्षत्वमिति भावः॥ प्रमायाः फलमाह तत्रेति प्रमासप्तम्यर्थः प्रमायां यो वृत्त्यंशस्तेनावरणं निवर्त्तते चैतन्यांशेनाज्ञानं निवर्त्तत इति च सिंहाश्रममतमुक्त्वेदानीं प्रमया सशक्तिकमज्ञानं निवर्तत इत्याचार्यमतमाह प्रमया वेति ततः किमत आह तत इति यतः सावरणमज्ञानं प्रमया निवृत्तं ततः साक्षिणा घटः स्फुरतीत्यर्थः ननु कोयं साक्षीत्याशंक्याह अंतःकरणेति ननु साक्षित्वं नाम उदासीनत्वे सति बोद्धृत्वं तच्चात्मन एव ततस्य बोद्धृत्वं नाम बोधाश्रयत्वमिति कथं साक्षिणा विषयस्फुरणं स्यादतोयं घट इति व्यवसायज्ञानानंतरं घटमहं जानामीत्यनुव्यवसायेन घटः स्फुरतीति वक्तव्यं न साक्षिणा॥

आदित्योयूपइतिस्तुतिवद्गुणवादपरत्वादित्यर्थः॥२॥ जानामीत्यादि६

तत्स्ववोधाश्रयत्वेनतत्स्फोरकत्वायोगात् नचात्मनश्चिद्रूपतयाघटादिस्फोरकत्वमितिवाच्यं तर्हिसर्वदासर्वस्फुरणप्रसंगात् किंचज्ञानवानहमितिज्ञानाश्रयत्वेनानुभूयमानस्यचिद्रूपत्वेमानाभावात् नचश्रुत्यातथात्वमितिवाच्यं प्रत्यक्षविरोधेश्रुतेरन्यपरत्वात्तस्मात्साक्षिणाघटःस्फुरतीत्यसंगतमितिचेन्नैवंयोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषइत्यादिश्रुतेरर्थांतरत्वासंभवेनात्मनश्चिद्रूपतावगमात्तत्त्वप्रत्यक्षविरोधःप्रत्यक्षेणाहंकारस्यैवज्ञानाश्रयत्वेनानुभूयमानत्वात् नचसएवात्मेतिवाच्यंतस्याध्यस्तत्वेनानात्मत्वेनानात्मत्वस्यवक्ष्यमाणत्वात् प्रमातृप्रमेयाद्यवभासकस्यश्रुत्यादिसिद्धस्यापलापायोगात् नचात्मनश्चिन्मयत्वेपिकथंप्रमात्राद्यवभासकत्वमिति चेन्नस्वप्रकाशतयातदुपपत्तेः नचस्वप्रकाशत्वेमानाभावइति वाच्यं अत्रायंपुरुषःस्वयंज्योतिर्भवतीत्यादिश्रुतेरेवप्रमाणत्वात् तस्याअर्थांतरत्वकल्पनायांश्रुतहान्यश्रुतकल्पनाप्रसंगात् लाघवादेकेनस्वप्रकाशसाक्षिणासर्वव्यवहारोपपत्तावनंतज्ञानकल्पनागौरवप्रसंगात् किंचानुव्यवसायेनघटःस्फुरतीत्यसंगतंसाक्ष्यतिरिक्तानुव्यवसायकल्पनायांमानाभावात् नचप्रत्यक्षमेवतत्रप्रमाण-

ततोविषयःस्फुरतिसाक्षिणाऽन्तःकरणोपहितचैतन्यंसाक्षी॥ सेयंप्रत्यक्षप्रमाद्विविधावाह्यप्रमाआंतरप्रमाचेति तत्रवाह्यप्रमा
शब्दस्पर्शरूपरसगंधविषयभेदात्पंचविधातत्करणानिश्रोत्रादिज्ञानेंद्रियाणिपंचआंतरप्रमाद्विविधा॥ ॥ ॥ ॥ ॥

घटप्रत्यक्षं२

मिति वाच्यं अनवस्थाप्रसंगात् किंचानुव्यवसायस्यमानसत्वेनतेनघटस्फुरणंकथंस्यात्मनसोवहिरस्वतंत्र्यात् अन्यथातिप्रसंगात् नचव्यवसायज्ञानद्वारातद्विष्यतीतिवाच्यं व्यवसायस्यमानसप्रत्यक्षत्वेपिवाह्यस्यघटादेस्तदयोगात् नचज्ञानप्रत्यासत्त्यातद्विष्यतीति वाच्यं ज्ञानस्यप्रत्यासत्तित्वेऽतींद्रियमात्रोच्छेदापत्तेः तस्मात्स्वप्रकाशसाक्षिणाघटःस्फुरतीतिनिरवद्यम्॥ प्रत्यक्षप्रमांविभजते सेयमिति प्रथमांविभजते तत्रेति शब्दप्रमास्पर्शप्रमारूपप्रमारसप्रमागंधप्रमेतिपंचविधेत्यर्थः तत्करणभेदमाह तानीति द्वितीयांविभजते आंतरेति आत्मप्रमांविभजते आत्मेति आंतरप्रमायाःकरणमाह अंतरिंद्रियमिति इन्द्रियलक्षणलक्षितत्वान्मनइंद्रियं आंतरप्रमाकरणंसुखादिप्रमाकरणंयथारूपादिसाक्षात्प्रमितिकरणत्वेनचक्षुरादींद्रियंसिद्ध्यति एवंसुखादिसाक्षात्प्रमितिकरणत्वेनमनोंतरिंद्रियंसिध्यतिसुखादीनांव्यवहारिकत्वेनतद्गोचरज्ञानस्यापिव्यावहारिकप्रमात्वात् नचमनसस्तत्करणत्वेपिशुद्धात्मप्रमाक

अतींद्रियाणांधर्मादीनामपिज्ञानप्रत्यासत्त्यैवप्रत्यक्षत्वात्संनिकर्षेणैवप्रत्यक्षत्वानियमात्४॥ घटज्ञानवानहमित्याद्यांतरस्फुरणं६॥ वहिर्गमनाभावात्६॥ मनसःस्वतोवहिर्निर्गमनस्वीकारेऽनुमित्यादीनांमानसत्वंस्यादित्यर्थः६

अनुव्यवसायोनामज्ञानविषयकंज्ञानम् तच्चप्रत्यक्षप्रमाणंचेत्तर्हितस्यप्रत्यक्षस्यापिज्ञानविषयकत्वेनानुव्यवसायात्वाविशेषात्तत्रापिप्रत्यक्षांतरमपेक्षणीयमेवमग्रेऽपीत्यनवस्थास्यात्॥६॥

97

यन्मनसा न मनुते येनाहुर्मनो मतमिति श्रुतिविरोधादित्यर्थः॥१॥ ३ निश्चितत्वात् ३ श्रुतिः३ ॥ विशिष्टात्मसाक्षात्कारेपि श्रुतिःकरणांस्यात्३॥ असंस्कृतमनःपरत्वोपपत्तेरित्यर्थः॥१॥

रणत्वमनुपपन्नं श्रुतिविरोधादिति वाच्यं मनसैवानुद्रष्टव्यमित्यादिश्रुत्या मनसः शुद्धात्मप्रमाकरणत्वे निश्चिते श्रुत्यन्तरस्यार्थान्तरत्वोपपत्तेः नचात्मनो मानसत्वेऽउपनिषदत्वश्रुतिविरोध इति वाच्यं शास्त्राचार्यसंस्कृतस्य मनस एव ब्रह्मसाक्षात्कारकरणत्वेनाविरोधादौपनिषदत्वश्रुतेः किंच विशिष्टात्मसाक्षात्कारे मनसः करणत्वेन क्लृप्तत्वाच्छुद्धात्मसाक्षात्कारेपि तदेव करणं वाच्यं विजातीयकैरणांतरकल्पनेऽतिप्रसंगात् मानाभावाच्च तस्मादांतरप्रमायां मनएव करणमिति वाचस्पतिमिश्रमतानुसारिणामाशयः आचार्यमतमाह आचार्यास्त्विति एवं वक्ष्यमाणप्रकारेण मनस आंतरप्रमाकरणत्वमनुपपन्नमिति वक्तुं इंद्रियत्वं दूषयति इंद्रियेभ्य इति नच श्रुतिस्मृतिभ्यां बाह्येंद्रियेभ्यः प्रथक्त्वं प्रतिपाद्यते नत्विंद्रियेभ्य इति वाच्यं संकोचे मानाभावात् नचतन इन्द्रियाणि

आत्मगोचरा सुखादिगोचरा चेति आत्मगोचरा द्विविधा विशिष्टात्मविषया शुद्धात्मविषया चेति अहं जीव इत्यादिविशिष्टात्मविषया अहं ब्रह्मास्मीति शुद्धात्मविषया चेति अहं सुखीत्यादिसुखादिविषया अंतरिन्द्रियं मन आंतरप्रमाकरणमिति वाचस्पतिमिश्राः आचार्यास्त्वेवं वर्णयंति इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मन इति श्रुतिस्मृतिभ्यां मनस इन्द्रियेभ्यः पृथक्त्वकरणान्मनो नेन्द्रियं॥ वृत्तिं प्रत्युपादानत्वान्न करणं मनः सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वेनाप्रमात्वमिष्टमेव ॥

तद्व्यपदेशादन्यत्र श्रेष्ठा दित्यस्मिन्नधिकरणे एकादशानाममुख्यप्राणानामिंद्रियत्वनिर्णयात् हेतोः५ मनसोऽनिंद्रियत्वे तद्विरोधापत्त्या संकोचो युक्त इति वाच्यं यजमानपंचमा इडां भक्षयंतीत्यादौ ऋत्विग्भिन्नेन यजमानेन तद्गतपंचत्वसंख्यापूरणादनिंद्रियेणापि मनसा इन्द्रियगतसंख्यापूरणसंभवेन न तदधिकरणविरोधात्॥ किंच मनसः करणत्वसिद्धे इंद्रियत्वं स्यात् तच्च तस्य करणत्वं संभवति निखिलवृत्त्युपादानत्वेन तस्य तदयोगात् इत्याह वृत्तिंप्रतीति ननु सुखाद्युपलब्धिः करणसाध्या साक्षात् प्रमितित्वाद्रूपाद्युपलब्धिवदित्यनुमानेन मनसः करणत्वसिद्धेरिंद्रियत्वसिद्धिरन्यथा सुखादिसाक्षात्कारस्याप्रमात्वप्रसंग इति। चेत् ओमित्याह सुखेति ईश्वरस्य देहेंद्रियादिशून्यत्वेन तदीयसुखादिप्रमायां व्यभिचारादनुमानस्य मनसः करणत्वासिद्धाविंद्रियत्वं दूरनिरस्तं एवं च। सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वाभावेनाप्रमात्वांगीकरणमुचितमिति भावः ननु सुखादीनां साक्षात्कारस्य प्रातीतिकत्वे सुखादीनां व्यावहारिकत्वं न

किंमुख्यप्राणस्यैव वृत्तिभेदा इतरे प्राणा वागादय उत तत्त्वान्तराणीति तत्र तेरानस्यैव सर्वे रूपमभवन्निति श्रुतेस्तदात्मान एवेति प्राप्ते आह त इति तत्त्वान्तराण्येव वागादीनि एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रेष्ठात्प्राणादन्यत्र भिन्न

व्यपदेशात् नच मनोवृत्तीनामपि इन्द्रियाणां पार्थक्यं एकादशत्वदर्शनादिति शा
रीरकसूत्रार्थः॥११॥

एकत्वज्ञापकोपनिषज्जन्यज्ञानंविनानिर्विकल्पकज्ञानंनसम्भवतीतिभावः॥७॥

स्यादित्याशंक्याह अतएवेति सुखादिसाक्षात्कारस्याप्रमात्वादेवेत्यर्थः नचसुखादीनांप्रातीतिकत्वेहर्षाद्यर्थक्रियाकारित्वंनस्यादिति वाच्यंप्रातीतिकस्यापिशुक्तिरजतादेस्तद्दर्शनात् आतोंतःकरणतद्धर्माणांप्रातीतिकत्वमुपपन्नमितिभावः॥नन्वेवमात्मसाक्षात्कारस्यापिप्रमाणाजन्यतयाऽप्रमात्वापत्तिः नचेष्टापत्तिरितिवाच्यं तर्ह्यंतःकरणादिवदात्मनोपि प्रातीतिकत्वापत्तिरतस्तद्व्यावृत्त्यर्थमात्मसाक्षात्कारंप्रतिमनसः करणत्वमेष्टव्यं इत्याशंक्यकिंविशिष्टात्मसाक्षात्कारस्याप्रमात्वमापद्यते आहोस्विच्छुद्धात्मसात्कारस्यनाद्यः इष्टापत्तेः नद्वितीयइत्याह शुद्धेति नतुवाक्यस्यपरोक्षज्ञानजकत्वनियमात्कथंवेदांतवाक्यादात्मसाक्षात्कार इत्याशंक्याह वाक्यस्येति वक्ष्यतइति शाब्दप्रमानिरूपणवेलायामिति शेषः अत्रवैशेषिकाःसाक्षात्कारिप्रमाद्विविधासविकल्पकनिर्विकल्पकभेदात् निःप्रकारकंवैशिष्ट्यानवगाहिवाज्ञानंनिर्विकल्पकंसप्रकारकंवैशिष्ट्यावगाहिवाज्ञानंसविकल्पकंतत्।त्कारणमिंद्रियंप्रत्यक्षमितिवदंति तदसंगतं अशाब्दनिर्विकल्पकज्ञानेमानाभावात् नन्वविशिष्टज्ञानस्यविशेषणज्ञानजन्यत्वनियमेनतत्सिद्धिरितिवा।

अतएवअंतःकरणतद्धर्माणांचशुक्तिरजतादिवत् प्रतीतिकत्वंशुद्धात्मसाक्षात्कारस्यवेदांतवाक्यजन्यत्वात्प्रमात्वंवाक्यस्यापरोक्षज्ञानजनकत्वंचसते इतिप्रत्यक्षप्रमाणं लिंगज्ञानजन्यंज्ञानमनुमितिः॥व्याप्त्याश्रयोलिंगंसाधनसाध्ययोर्नियतः॥ ॥ ॥ ॥

तुच्छे२ अपोह—वादिनः१

च्यंविशेषेणसन्निकर्षाद्विशिष्टज्ञानोपपत्तेः॥निर्विकल्पकज्ञानवत्सविकल्पकज्ञानंप्रत्यक्षमितिवाह्यास्तदसत् निर्विकल्पकज्ञानवत् —— सविकल्पकज्ञानस्यापिप्रमात्वेवाधकाभावान्नचालीकसामान्यविषयतयातस्याप्रमात्वमिति वाच्यं सामान्यस्यालीकत्वासिद्धेः प्रत्युतनिर्विकल्प —— ज्ञानस्यैवाप्रामाणिकत्वात् तस्माद्यत्किंचिदेतत् तदेवंप्रत्यक्षप्रमानिरूपिताप्रत्यक्षोपजीव्यत्वात् प्रत्यक्षनिरूपणानंतरमनुमितिंलक्षयति लिंगेति पर्वतोयंवह्निमान् धूमवत्वात्योयोधूवान्ससोऽग्निमान् यथामहानसइत्यत्रपर्वतःपक्षःवह्निःसाध्यंधूमोलिंगंतत्पक्षएवपक्षधर्मःतथाचायंधूमवानितिव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानंलिंगज्ञानंतेनजन्यमयंपर्वतोवह्निमानितिज्ञानमनुमितिः। यद्वाजीवोब्रह्माभिन्नःसच्चिदानंदलक्षणत्वात् ब्रह्मवदित्यत्रजीवःपक्षःब्रह्माभेदःसाध्यंसच्चिदानंदलक्षणत्वंलिंगमयमेवपक्षधर्मःएवंचव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानंलिंगज्ञानंतेनजन्यंजीवोब्रह्माभिन्नमितिज्ञानमनुमितिःपक्षताश्रयःपक्षःसि

व्याप्यतावच्छेदकप्रकारकेत्यस्यव्याप्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः३॥ २धूमत्वंसएवप्रकारोयस्मिन्धूमेतस्मिन्

यत्रसिषाधयिषासत्वेसिद्धिसत्वंतत्रविशेषणाभावप्रयुक्तविशिष्टाभावःपक्षतायत्रसिषाधयिषाऽभावेसिद्ध्यभावस्तत्रविशेष्याभावप्रयुक्तविशिष्टाभावःपक्षतायत्रसिषाधयिषासत्वेसिद्ध्यभावस्तत्रोभयाभावप्रयुक्तविशिष्टाभावःपक्षतायत्रसिद्धिरस्तिसिषाधयिषाचनास्तितत्रनपक्षतासिषाधयिषाविरहविशिष्टसिद्धेःसत्वादिति॥१॥

षाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता एवंचव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनलिंगज्ञानजन्यत्वमनुमितेर्विवक्षितमतोनस्मृत्यादावतिव्याप्तिः नतृतीयलिंगपरामर्शत्वेनतज्जन्यत्वमनुमितेःतृतीयलिंगपरामर्शस्याप्रामाणिकत्वेनतज्जन्यत्वस्यदूरनिरस्तत्वात् किंतल्लिंगमित्याकांक्षायामाह व्याप्तीति केयं व्याप्तिरित्यत आह साधनेति व्याप्याधारत्वंसाधनत्वंव्याप्तिनिरूपकत्वंसाध्यत्वं अव्यभिचरितत्वंनियतत्वं अव्यभिचरितत्वंनामसाधनसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यवदन्यावृत्तित्वंवा तथाचायंनिष्कर्षः साधनसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यंव्याप्तिरिति द्वितीयपक्षेतु साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वंव्याप्तिः अस्तिचेयंधूमेसाधनेनधूमादिनासमानाधिकरणोयोत्यंताभावोघटादिप्रतियोगिकस्तदप्रतियोगियत्साध्यंतेन सामानाधिकरण्यंधूमादेर्व्याप्तिः अत्रयद्यपिहेतुसमानाधिकरणात्यंताभावाः तत्तद्वह्न्यत्यंताभावास्तत्प्रतियोगिनस्तत्तद्वह्नयः।पर्वतीयधूमसमानाधिकरणात्यंताभावप्रतियोगित्वान्महानसीयवह्नेः महानसीयधूमसमानाधिकरणात्यंताभावप्रतियोगित्वात्पर्वतीयवह्नेस्तथाचलक्षणमव्याप्तं अप्रतियोगिसाध्यसामाना

साध्यनिष्ठ४

हेतोः४ ३साधनस्य कस्य२

समानाधिकरणंविह्नधूमयोःपर्वतमहानसादौसत्वत्रसत्वान्नाव्याप्तिरित्यर्थः॥१

**समानाधिकरणंव्याप्तिःप्रतिबंधकाभावेसतिसहचारदर्शनेनसाव्याप्तिर्गृह्यते ॥ ६ ॥**

जनन५ नाशकत्वं५

संयोगस्य३

आद्यक्षणोत्पन्नत्वाभावेपिद्रव्यत्वस्यसत्वान्नसाधननिष्ठात्यन्ताभावप्रतियोगित्वमेवसाध्यस्येति४॥

धिकरण्याभावात् नचसमानाधिकरणयोरेव व्याप्तिर्विवक्षितेतिवाच्यं तर्हि गुणवान्द्रव्यत्वादित्यत्राव्याप्तिर्वज्जलेपायिता तथापिहेतुतावच्छेदकावच्छिन्नहेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नसाध्यसामानाधिकरण्यंहेतोर्व्याप्तिर्विवक्षिता तथाचनाव्याप्तिः नचैवमपिसंयोगीद्रव्यत्वादित्यत्राव्याप्तिरितिवाच्यं अत्यंताभावस्यप्रतियोगिव्यधिकरणत्वस्यविवक्षितत्वात् अस्मिन्मतेसंयोगस्याव्याप्यवृत्तित्वाद्धानदोषः अवच्छेदकत्वमनतिरिक्तदेशवृत्तित्वं तथाचनात्माश्रयदोषोपि अत्रविस्तरस्तुन्यायचिंतामणितद्व्याख्यासुद्रष्टव्यः अस्माभिरत्रदिङ्मात्रप्रदर्शितंपारमार्थिकतत्वनिरूपणेप्रवृत्तत्वादिति एवमन्योन्यघटितव्याप्तिलक्षणेपिद्रष्टव्यं ननुइयंव्याप्तिः केनप्रकारेणगृह्यतइत्यत आहप्रतिबंधकेति प्रतिबंधकत्वंनामकार्यानुकूलकिंचिद्धर्मविघटकत्वं। कार्यानुत्पादप्रयोजकत्वंवा तत्रव्यभिचारज्ञानंसाक्षाद्व्याप्तिग्रहणप्रतिबंधकंउपाधिज्ञानंपरंपरया।साध्यवदन्यवृत्तित्वंव्यभिचारः साध्यव्यापकत्वेसतिसाधनाव्यापकत्वंउपाधिः तथाहि क्रत्वंतरवर्तिनीहिंसाऽधर्मसाध नंहिंसात्वाद्बाह्यहिंसावदित्यत्रनिषिद्धत्वमुपाधिः तत्रास्तीदंलक्षणंसाध्यस्याधर्मसाधनत्वस्यव्यापकं ॥ ॥

अव्याप्यवृत्तिःसं०५ बाधव्याप्तिवारणायद्वितीयलक्षणमाहकार्येति२॥

ससमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्वंव्याप्यवृत्तित्वं५॥ यत्साध्यतावच्छेदकमित्यत्रावच्छेदकत्वंसमव्याप्तत्वमितिवक्तव्यंतथाव्याप्तिघटितव्याप्तिलक्षणाकरणेनात्माश्रयःस्यादित्याशंक्याह अवच्छेदकमिति तथाचावच्छेदकत्वस्याव्याप्यवृत्तित्वेसतिइत्यर्थः५॥

महानसादौदृष्टांतेवह्निधूमयोर्भूयःसहचारदर्शनात्व्याप्यत्वेनधूमज्ञानप्रथमंततः
पर्वतादौधूमंदृष्ट्वाव्याप्यत्वेनतत्स्मरणंद्वितीयंततस्तत्रैवव्याप्यत्वेनधूमस्यपरामर्शो
वह्निव्याप्यधूमवानयमित्येवरूपोज्ञायतेइतितृतीयत्वंतस्येतिबोध्यम्॥२॥

साध्यवान्पक्षः १॥ अनुमितेः संस्कारजन्यत्वेन स्मृतित्वांगीकृते सति ५॥ पर्वतो धूमवान्वह्निमत्वान् २॥ धूमदर्शनेन व्याप्तिसंस्कारोद्बोधे ४॥ अनुकूलतर्कस्त्वयदि धूमो वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यात् ३॥

निषद्धत्वं व्यापकत्वं नाम तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं निषिद्धत्वं च तथा एवं साधनस्य हिंसात्वस्य निषिद्धत्वमव्यापकं अव्यापकत्वं नाम तद्वन्निष्ठात्यन्ता
भावप्रतियोगित्वं निषिद्धत्वं च तथा अग्नीषोमीयहिंसायां तदभावात् एवं धूमवान् वह्नेरित्यत्रार्द्रेधनसंयोगः उपाधिः अत्राप्युक्तप्रकारेण लक्षणं योजनी
यं एवं यथोक्तप्रतिबंधकाभावे सति सहचारदर्शनेन व्याप्तिर्गृह्यते ननु यथोक्तप्रतिबंधकाभावः कस्मान्निश्चीयते इति चेत् अनुकूलतर्कादिना स निश्चीयते
इति गृहाण एवमनुकूलतर्कादिना प्रतिबंधकाभावे निश्चिते तेन सहकृतेन सहचारदर्शनेन व्याप्तिनिर्णयानंतरं लिंगज्ञानेन संस्कारोद्बोधे सत्येवानुमितिरुत्पद्य
ते तत्र व्याप्तिज्ञानं करणं तत्संस्कारोऽवांतरव्यापारः अनुमितिः फलं न च संस्कारजन्यत्वे स्मृतित्वापत्तिरिति वाच्यं तत्प्रागभावजन्यत्वस्य वा संस्कारमात्रजन्यत्व
स्य वा स्मृतित्वप्रयोजकत्वात् अन्यथा प्रत्यभिज्ञायामपि स्मृतित्वापत्तेरित्यभिप्रेत्य फलितमाह तस्यामिति उद्बोधः सहकारिलाभः सहकारिणः सदृशदर्शनादयः।

साधनवान्पक्षः

व्याप्तिः तस्यां गृहीतायां लिंगज्ञानेन व्याप्त्यनुभवजन्यसंस्कारोद्बोधे सति अनुमितिर्जायते सा द्विधा स्वार्था परार्था चेति इयं स्वार्थाऽनुमितिस्तु [illegible]
क्ता परार्थानुमितिस्तु न्यायसाध्या न्यायोऽवयवसमुदायः अवयवास्त्रयः प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपा
वा तथाहि जीवः परस्मान्न —— भिद्यते सच्चिदानंदलक्षणत्वात् परमात्मवदित्यत्र जीवः परस्मान्न भिद्यते इति प्रतिज्ञा सच्चिदानंदल
क्षणत्वं हेतुः इदमेव लिंगमित्युच्यते यः सच्चिदानंदलक्षणः स परस्मान्न भिद्यते यथा परमात्मेत्युदाहरणम्॥ ऽऽ स्वस्य व्याप्तिनिश्चयानंतरं

परोपदेशमंतरेण व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानाद्याऽनुमितिर्जायते सा स्वार्थानुमितिरित्यर्थः परार्थानुमितिं व्युत्पादयति परार्थेति कोऽसौ न्याय इत्य
पेक्षायामाह न्याय इति किं यतोऽवयवा इत्यत आह अवयवा इति के ते त्रय इत्याकांक्षायामाह प्रतिज्ञेति त्रीणि उदाहरणांतानि यद्वा उदाहरणादिका इत्यभियुक्तोक्त्या
प्रतिज्ञाद्यास्त्रयोऽवयवा उदाहरणाद्यास्त्रयो वाऽनुमानवाक्यैकदेशत्वे प्रतिज्ञाद्यन्यतमत्वं वाऽवयवत्वं साध्यविशिष्टधर्मिप्रतिपादकं वाक्यं प्रतिज्ञा पक्षधर्मतावाच
कं पंचम्यंतः शब्दो हेतुः सव्याप्तिकदृष्टांतप्रतिपादकवाक्यमुदाहरणं पक्षे हेतूपसंहार उपनयः पक्षे साध्योपसंहारो निगमनं तद्यथा पर्वतोऽयं वह्निमानिति प्रतिज्ञा धूम
वत्त्वादिति हेतुः यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्युदाहरणं तथा चायमित्युपनयः तस्मात्तथेति निगमनमेवं लौकिकोदाहरणे प्रतिज्ञादिविभागमभिप्रेत्य जी

पक्ष ३

११

ज्ञानाश्रयं ६॥ आत्मनः परस्मादभेदरूपं १॥

भेदं व्युत्पादयन्ननुमानप्रयोगमाह तथाहीति अनुमानवाक्यं सप्तम्यर्थः प्रतिज्ञादिविभागं दर्शयति जीव इत्यादिना लीनमर्थं गमयतीति व्युत्पत्त्या साध्यसाधको हेतुर्लिंगशब्दवाच्य इत्याह॥ इदमिति॥ ननु जीवः परस्मान्न भिद्यत इत्यत्र किमन्तःकरणविशिष्टो जीवः पक्षः उत तत्साक्षी आहोस्विन्निरुपाधिकः प्रत्यगात्मा वा नाद्यः विशिष्टस्य कर्तृत्वादिधर्मिणस्तद्विपरीतब्रह्मण्यैक्यायोगात् नहि श्रुतिरपि बाधितमर्थं बोधयति न द्वितीयः साक्षिणः सोपाधिकतया तद्विपरीतब्रह्मण्यैक्यायोगान् न तृतीयः शुद्धस्य जीवशब्दवाच्यत्वायोगात् लक्ष्यस्याद्वितीयतया तत्साधने सिद्धसाधनतापत्तेः तथा जीवस्य परस्माद्भेदः प्रसिद्धो न वा नाद्यस्तदैक्यसाधने बाधापत्तेः न द्वितीयः अप्रसिद्धस्य शशशृंगस्येव निषेधायोगात् तथा जीवस्य ज्ञानाश्रयत्वेन सच्चिदानंदलक्षणहेत्वसिद्धेः तत्स्वरूपत्वे मानाभावान् तदाश्रयत्वस्य जानामीत्यनुभवसिद्धत्वादेवं ब्रह्मणोऽपि द्रष्टव्यं तस्मादेवमनुमानमसंगतमिति अत्र ब्रूमः जीवशब्दवाच्यस्य ब्रह्मैक्यबाधेऽपि तल्लक्ष्यस्य तदैक्यसाधनेन स एव पक्षः ननु सिद्धसाधनता वाच्ययोर्भेददर्शनेन लक्ष्ययोरपि तद्भ्रांतिसंभवेन श्रुत्यननुगृहीतानुमानेन तद्वारणात् किंच परमते जीवपर

अहमस्मीति भामि इति कदाप्यप्रियो न भवामि इत्यनुभवाज्जीवस्य सच्चिदानंदलक्षणत्वं अतो न हेत्वसिद्धिः॥ ६ ॥

योर्भेदाभ्युपगमेन श्रुत्यननुगृहीतानुमानेन जीवपरयोरैक्यसाधनेन भेदस्य मिथ्यात्वोपपत्तेः न सिद्धसाधनता बाधो वेत्यभिप्रेत्य श्रुतिस्मृतियुक्तिविद्वदनुभवैर्जीवस्य सच्चिदानंदत्वावगमान्नासिद्धो हेतुरित्याह अहमिति अत्रायं पुरुषः स्वयंज्योतिर्भवतीति आत्मैवास्य ज्योतिर्भवतीति योऽयं विज्ञानमयः प्राणेषु हृद्यंज्योतिः पुरुषः त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः इत्यादि श्रुतयः यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारतेत्यादिस्मृतयः यद्यात्मा चिद्रूपो न स्यात्तर्हि जगदांध्यप्रसंग इति तर्कात्मिका युक्तयः विद्वदनुभव इत्येतैरात्मनः सच्चिदानंदरूपत्वमंगीकर्तव्यमित्यस्मिन्नर्थे स्वानुभवमभिनीय दर्शयति अहमिति अस्मीत्यात्मनः सत्यत्वानुभवः भामीति चिद्रूपत्वानुभवः अप्रियो न भवामीत्यप्रियत्वनिषेधानुभवेनात्मन आनंदत्वं सिद्धं ननु स्वात्मनः सच्चिदानंदलक्षणत्वं ततः किमित्यत आह अत इति यतः कारणादात्मनः सच्चिदानंदलक्षणत्वं स्वानुभवसिद्धं अतः कारणादित्यर्थः हेत्विति हेतोस्त्रिविधा असिद्धयो न भवंतीत्यर्थः॥

यथापर्वतोवह्निमान्प्रमेयत्वात्साधा॥शब्दोनित्यःशब्दत्वात् असा०॥१॥यथाशब्दोनित्यःकृतकत्वात्विरुद्धः॥२॥गगनारविंदंसुरभिअरविंदत्वात्सरोजारविंदवत् आश्रयासिद्धिः॥१॥शब्दोगुणःचाक्षुषत्वात्स्व०॥२॥पर्वतोधूमवान्वह्निमत्त्वात्॥३॥शब्दोनित्यःश्रावणत्वात्शब्दोऽनित्यःकार्यत्वात्घटवत्सत्प्रति०॥४॥वह्निर

ष्णःदृश्यत्वात्का॥५॥

तथाहि हेत्वाभासःपंच अनैकांतिकविरुद्धासिद्धप्रकरणसमकालात्ययापदिष्टभेदात् सव्यभिचारोऽनैकांतिकःसचद्विविधःसाधारणोऽसाधारणश्चेतिसाध्यवदन्यवृत्तिःसाधारणःसपक्षाद्वृत्तिरसाधारणःसाध्यव्यापकीभूताभावप्रतियोगीविरुद्धःअनिश्चितपक्षवृत्तिरसिद्धःसचत्रिविधःआश्रयासिद्धःस्वरूपासिद्धोव्याप्यत्वासिद्धश्चेतिपक्षतावच्छेदकाभावआश्रयासिद्धःपक्षेहेतुस्वरूपाभावःस्वरूपासिद्धःसाध्याप्रसिद्धिःहेत्वसिद्धिर्वाव्याप्यत्वासिद्धःसाध्यविपरीतसाधकंहेत्वंतरंप्रकरणसमःअयमेवसत्प्रतिपक्षःइत्युच्यतेपक्षेसाध्यशून्यत्वंबाधःअयमेवकालात्ययापदिष्टइतिचोच्यते ततश्चात्मनःसच्चिदानंदलक्षणत्वस्यश्रुत्यादिभिर्निश्चितत्वादसिद्ध्यादिदोषाणामसंभवात्तेनब्रह्मैक्यसाधनंयुक्तमितिभावः ननुद्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजातेऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धेद्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच।जीवपरमात्मानौभिन्नौविरुद्धधर्माक्रांतत्वाद्दहनतुहिनवत्नाहमीश्वरइत्यादिश्रुतिस्मृत्यनुमानप्रत्यक्षैर्जीवब्रह्मैक्यस्यबाधितत्वात् कथंसच्चिदानंदलक्षणत्वेनब्रह्मैक्यसिद्धिःनचाद्वितीयश्रुतिस्मृत्यनुमानविरोधादन्येषामप्रामाण्यंकिंनस्यादितिवाच्यंसर्वतंत्रविरोधापत्यातेदयोगादद्वैतश्रुत्यादीनामुपासनपरत्वोपपत्तेःतस्मादनुमानेनब्रह्मैक्यसाधनंबाधितमितिचेन्नैवंद्वैतश्रुतिस्मृत्योरतत्परत्वात् तथाहि फलवत्स्वज्ञातेर्थेश्रुतेस्तात्पर्यंवक्तव्यंजीवपरभेदस्यमानांतरसिद्धत्वेनतज्ज्ञानस्यापुरुषार्थत्वेनचश्रुतेस्तत्रतात्पर्यायोगात् किंचमृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीतिभेददर्शिनोऽनर्थश्रवणाच्चश्रुतेस्तत्रतात्पर्यंनसंभवति अपिच अथयोऽन्यांदेवतामुपास्तेन्योसावन्योहमस्मीतिनसवेदयथापशुःएवंसदेवानामितिभेददर्शिनोनिंदाश्रवणान्नतत्रश्रुतितात्पर्यंकिंचउपक्रमादिषड्विधलिंगैरद्वितीयेब्रह्मणितात्पर्यस्यनिश्चितत्वात्तद्विरोधान्नभेदश्रुतेःस्वार्थेतात्पर्यं किंचास्मिन्नपिप्रकरणेकस्मिन् भगवोविज्ञातेसर्वमिदंविज्ञातंभवतीत्येकविज्ञानेनसर्वविज्ञानोपक्रमेणाद्वितीयंब्रह्मप्रतिज्ञायपरेऽव्ययेसर्वएकीभवंतिब्रह्मविद्ब्रह्मैवभवतीत्यद्वितीयब्रह्मणएवोपसंहारात्तन्मध्यपातिद्वासुपर्णादिवाक्यमपिप्रत्यक्षसिद्धभेदानुवादेनानंदैकरसमद्वितीयंब्रह्मतात्पर्येणप्रतिपादयतीतिनिश्चिष्टतरमन्यथोपक्रमादिबाधप्रसंगःएवंस्मृतेरपिद्रष्टव्यंअनुमानस्यविंबप्रतिविंबयोर्व्यभिचारात् प्रत्यक्षस्यनेहनानास्तिकिंचनेत्यादिशास्त्रबाधितत्वेनभ्रमत्वान्नब्रह्मैक्यबाधकत्वं तस्माद्बाधकाभावादनुमानेनब्रह्मैक्यसाधनमुपपन्नंएतेनसर्वतंत्रविरोधोपिनिरस्तः॥ ॥नेद्वैतप्रतिपादनपरा७॥श्रेष्ठसिंहासनेअंतराकाशे८॥श्रुत्यादीनांएक्यायोगा९॥द्वासुपर्णाश्रुतौ४॥

२॥ऋतंसत्यमवश्यंभावित्वात्कर्मफलंपिबंतौएकस्तत्रकर्मफलंपिबतिभुंक्तेनेतरःतथापिपातृसंबन्धात्पिबंताविन्युच्यतेछत्रिन्यायेनसुकृतस्यस्वयंकृतस्यकर्मणःकृतमितिपूर्वेणसंबंधःलोकेऽस्मिन्शरीरेगुहायांबुद्धौप्रविष्टौपरमेबाह्यपुरुषाकाशसंस्थानापेक्षयापरमंपरस्यचब्रह्मणोऽर्द्धंस्थानेपरार्द्धंतस्मिन्हिपरब्रह्मोपलभ्यतेततस्तस्मिन्परमेपरार्द्धेहार्दाकाशेप्रविष्टावित्यर्थः ११

विंबप्रतिविंबयोर्विम्बत्वप्रतिविम्बत्वादिविरुद्धधर्माक्रान्तत्वेऽपिपरस्परभेदरूपसाध्यस्यतदभावात्विरुद्धधर्माक्रांतत्वहेतोस्तत्रव्यभिचारन्दर्शिति॥२॥

अलिंगनंकरोतिद्व॥

सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुत्या॥१॥ गुणादिविशिष्टबोधकत्वेनाप्युपपत्ते॥२॥

नन्वेवमपिदृष्टांताभावादिदमनुमानंनावतरति जीवातिरिक्तब्रह्मसद्भावेमानाभावात् भावेवातस्यज्ञानाश्रयत्वेनसच्चिदानंदलक्षणत्वेमान[illegible]भावा
च्चश्रुत्यानत्सिद्धिरितिवाच्यंतस्यार्थांतरत्वोपपत्तेरित्याशंक्याह सत्यमिति अयंभावः पारमार्थिकभेदाभावेपिजीवपरयोरौपाधिकभेद[illegible]भावेहंकारो
कस्याभ्युपगमेनदृष्टांतसंभवादनुमानमवतरत्येवनचपरस्यज्ञानाश्रयत्वंश्रुत्यातदात्मकत्वावगमात् नचश्रुतेरर्थांतरत्वंवक्तुंशक्यंगौरवात्श्रुत्यं
तरविरोधप्रसंगात् आनंत्यानुपपत्तेश्चेतिभावः ब्रह्मणःसच्चिदानंदलक्षणत्वेफलितमाह अत इति ननु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानेनव्या
प्त्यनुभवसंस्कारोद्बोधेसतिस्वार्थानुमितिरुत्पद्यतेइत्युक्तंसाकिंसर्वेषामुत्पद्यते आहोस्वित्केषांचिन्नाद्यः अदर्शनान्नद्वितीयः तदुपायाभावादित्याशंक्यावि
वेकेनतदुपायलिंगज्ञानसंभवान्नैवमित्याह एवमिति उक्तप्रकारेणान्वयव्यतिरेकाभ्यांशोधितस्त्वंपदार्थोयेनसतथोक्तः तस्यस्वस्मिन् सच्चिदानंदलक्षण

सत्यंज्ञानमनंतंब्रह्म आनंदोब्रह्मेतिव्यजानात् इत्यादिश्रुत्याब्रह्मणःसच्चिदानंदलक्षणत्वं अतोनदृष्टांतासिद्धिःएवंगुरुमुखाच्छु
तवेदांतस्यशोधितत्वंपदार्थस्यस्वस्मिन् सच्चिदानंदलक्षणदर्शनात् अहंब्रह्मेतिब्रह्माभिन्नानुमितिरुत्पद्यते नचौपनिषदस्यब्र
ह्मान्यैकस्यानुमानगम्यत्वानुपपत्तिः आत्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिश्रुत्यामननविधानात् वेदांतसहका
रित्वेनानुमानप्रामाण्यस्वीकारात् परार्थानुमितिस्तुन्यायोपदेशेनोत्पद्यतेन्यायोदर्शितः एवंब्रह्मव्यतिरिक्तस्यप्रपंचस्यमिथ्यात्वसा
ध्यानुमितिर्दृश्यत्वादिहेतुभिरुत्पद्यते॥

१ त्वलिंगज्ञानादहंब्रह्मास्मीतिब्रह्माभिन्नाऽनुमितिःस्वार्थोत्पद्यते ननुतंत्वौपनिषदंपुरुषंपृच्छामीत्यादि
दिश्रुत्याधर्मवद्ब्रह्मणोवेदैकगम्यत्वात्कथमनुमानगम्यत्वमित्याशंक्यानिराकरोति नचेति किंब्रह्मण्यनुमानस्यस्वतंत्रप्रामाण्यंनिराक्रियते आहोस्विद्वेदां
तसहकारित्वमिति नाद्यः इष्टापत्तेः नद्वितीय इत्याह मंतव्य इति अन्यथामननविधानवैयर्थ्यंस्यादितिभावः कथंतर्हि परार्थानुमितिरुत्पद्यत इत्याशंक्याह परा
र्थानुमितिस्त्विति अवयवसमुदायात्मकानुमानवाक्यप्रयोगेणान्यर्थः उक्तन्यायमन्यत्राप्यतिदिशति एवमिति व्यावहारिकःप्रपंचोमिथ्यादृश्यत्वात् शुक्तिरूप्य
वदित्यनुमानप्रयोगोद्रष्टव्यः आदिशब्देनब्रह्मव्यतिरिक्तत्वबाध्यत्वादयोगृह्यंते ॥ ६ ॥ ॥

घटादौ तावत्स्वात्यंताभावप्रतियोगित्वमस्त्येवातः सिद्धसाधनप्रसंगः॥१॥संयोगस्याव्याप्यवृत्तित्वेन स्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वमस्त्येव॥१॥ ॥ ॥ ॥ ॥ १ ॥
स्वसंबंधीर॥ अवच्छेदकावच्छेदेननिरूपिताधिकरणे याआधारतातदाश्रयदेशानवच्छिन्ना॥३॥ संयोगेनघटवतिभूतले अभावीयदैशिकविशेषणतासंबंधेनघटात्यंताभावोऽपितत्रैव वर्ततइतितियापिकाः॥२॥

ननु किमिदं मिथ्यात्वं नतावदत्यंताभावप्रतियोगित्वं सिद्धसाधनत्वप्रसंगात् नापि स्वाधिकरणनिष्ठात्यंताभावप्रतियोगित्वं तदिति वाच्यं संयोगादिकमादायार्थान्तरतोपपत्तेः नापि स्वसंसृज्यमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वं तदिति वाच्यं परैरपि घटवति भूतले संबंधांतरेण तदत्यंताभावाभ्युपगमेन सत्यत्वविरोधिमिथ्यात्वासिद्धेः नाप्येकावच्छेदेन येन संबंधेन प्रतियोगिसत्त्वं तेनैव संबंधेन तत्त्वं विवक्षितमिति वाच्यं तादृशस्य लोके अप्रसिद्धत्वात् नापि ज्ञाननिवर्त्यत्वं तदिति वाच्यं यतो ज्ञानमज्ञानस्यैव निवर्तकमिति नियमेन प्रपंचस्य तदभावेन मिथ्यात्वाभावप्रसंगात् तस्मान्मिथ्यात्वस्यानिरूपणान्न तत्साधकमनुमानमित्याशंक्याह मिथ्यात्वं नामेति नच प्रपंचस्यानिर्वचनीयशब्देन निरुच्यमानत्वात्कथमनिर्वचनीयत्वमिति वाच्यं सत्त्वासत्त्वाभ्यामनिरुक्तत्वस्यैव तत्त्वात् नच विरोधादुभयान्यत्वमनुपपन्नमिति वाच्यं घटात्यंताभावस्य स्वाभावप्रतियोग्यनधिकरणत्वदृष्टत्वेन प्रकृतेप्युपपत्तेः नचैवं क्लिष्टकल्पनायां किं प्रयोजनमिति वाच्यं प्रकारांतरस्यासंभवात् तथाहि सत्त्वे बाधायोगादसत्त्वे प्रपंचस्यापरोक्षत्वायोगात् सदसदात्मकत्वस्य विरोधेनासंभवात् तस्मादुभयविलक्षणत्वमभ्युपगंतव्यं नचासतोऽप्रसिद्धत्वेन तदै

घटात्यंताभावस्यासद्रूपस्यात्यंताभावादन्यत्वं अत्यंताभावस्यत्रैकालिकत्वेन स्वाभावाभा
वप्रतियोगिसद्रूपघटादप्यन्यत्वं तस्य अतो अत्यंताभावस्यानिर्वचनीयत्वं सिद्धम्॥२॥
नात्रघटोवर्ततेकिंतुस्वरूपेणात्रत्वस्तिसव॥४॥ यस्य५॥

## मिथ्यात्वं नाम अनिर्वचनीयत्वं॥

शून्यैकदे॥ अभावस्य५॥
भूतले३

तत्त्वस्याप्यप्रसिद्धत्वादसंगतमिति वाच्यं तर्हि सदन्यत्वमेवानिर्वचनीयत्वमस्तु नचासत्यतिव्याप्तिः असन्नाम किंचिदस्ति चेत् सत्त्वव्याघातः नास्ति चेत् कुत्रातिव्याप्तिः तस्मात्सदन्यत्वमेवानिर्वचनीयत्वं बाधायोग्यं सत् तदन्यत्वं बाधयोग्यत्वं अथवा एकावच्छेदेन स्वसंसृज्यमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वं मिथ्यात्वं समानसत्ताकयोः प्रतियोगितदभावयोरेकत्र विरोधेपि भिन्नसत्ताकयोरविरोधात् नासंभवः प्रतियोगिमति संबंधांतरेण तदभावस्य प्रतियोगिसत्त्वस्याभावविरोधित्वेनासंभवात् प्रतीतेरन्यथाप्युपपन्नेर्नोक्तदोषः यद्वा भावस्य प्रतियोगिसत्ताधीनसत्ताकत्वेन प्रपंचाभावस्यापि तत्समानसत्ताकतया तत्सामानाधिकरण्यमनुपपन्नमिति मन्यसे तर्हि सत्त्वावच्छिन्नप्रतियोगिकेस्वात्यंताभावसमानाधिकरणत्वं मिथ्यात्वमस्तु ———— प्रतियोगिवत्प्रतियोगितावच्छेदकस्यापि तन्निरूपकत्वात्सत्त्वावच्छिन्नप्रतियोगिकस्वात्यंताभावस्य पारमार्थिकत्वेन तत्सामानाधिकरण्यं प्रपंचस्योपपद्यते अभावस्य भिन्नसत्ताकत्वात् यद्वात्रापि विरहैकस्वभावाभावस्य प्रतियोगिसत्ताकतया भिन्नसत्ताकत्वानभ्युपगम्यते तर्हि कल्पितस्याभावोधिष्ठाने प्रतीयमानस्तादात्म्यकएव यत्राधिकरणसत्तापेक्षयाऽभिन्नसत्ताकः प्रतियोगी तत्रैवाधिकरणे तदभावो भिद्यते सएवानुपपत

स्वस्यानधिकरणं यद्घटादि तदनधिकरणं यस्यात्यंताभावस्य तत्प्रतियोगित्वं ब्रह्मरूपात्यंताभावस्यैवेति नासंभवः यथा मिथ्यारजतस्थलेऽपदेन रजतं धार्यते तेन तदनधिकरणं शुक्त्यवच्छिन्नचैतन्यभिन्नं वस्तुजातं तदनधिकरणं यस्यात्यंताभावस्य तादृ
शोऽत्यंताभावोशुक्त्यवच्छिन्नचैतन्यमात्रनिष्ठोभावः कल्पिताभावोधिष्ठानात्रातिरिच्यते इति सिद्धांतात् तत्प्रतियोगिरजतं संयोगाद्यभावस्तु न तथेति नतद्व्यासः॥१॥

ब्रह्मज्ञानेनेतरत्रनयाचस्वसमानाधिकरणात्यंताभाव
प्रतियोगित्वंमिथ्यात्वमेतदेवानिर्वचनीयत्वं॥

मिथ्यात्वात्मकम्१॥

निरुक्तलक्षणलक्षितकेवलान्वयित्वात्६॥ विषयात्प्रमायाभिन्नत्वंचेत्विषयंविनापिप्रमायाज्ञानंस्यात् विषयवत्अभिन्नत्वंचेत्साकारतापत्तिः५॥ सौगतमतानुमतिप्रसंगःस्या६ अधेयतयासात्यंताभाव३॥

ननुदृश्यत्वंनामदर्शनविषयत्वंदर्शनंनामवृत्तिज्ञानंतद्विषयत्वंब्रह्मणिवर्ततेउक्तसाध्यंनास्तिब्रह्मणःपारमार्थिकत्वात्अतोव्यभिचारइत्याशंक्याह दृशत्व
नाम्निब्रह्मणःस्वप्रकाशत्वेनस्वपरविषयत्वाभावात्नोक्तदोषइत्यर्थः शुक्तिरूप्यमग्रेनिरूपयिष्यतेअतोनदृष्टांतासिद्धिरितिदृश्यत्वंनैयायिकात्यस्त्वनुमा
नंत्रिविधंकेवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकीत्वेतिवर्णयंतितन्मतमनुपपादयंस्तान्निराकरोतितच्चेतिएवकारव्य—वच्छेद्यमाह नान्वितिवृत्तिमद्त्यंता
भावाप्रतियोगित्वंकेवलान्वयित्वंनतच्चास्मन्मतेनभवतीत्याह अस्मन्मतेइति ब्रह्मभिन्नस्यसर्वस्यकल्पितत्वेनमिथ्यात्वात्मिथ्यावस्तुनोऽधिष्ठाननिष्ठात्यंताभा
वप्रतियोगित्वेननिरुक्तंकेवलान्वयित्वमसिद्धमेवनचप्रमेयत्वादीनांतथात्वात्कथमसिद्धिरितिवाच्यंप्रमाविषयत्वंप्रमेयत्वंप्रमायाभिन्नाभिन्नत्वेनतन्निरू
पितविषयत्वस्यापितथात्वेनकेवलान्वयित्वासिद्धेःनन्वीश्वरप्रमाविषयत्वंकेवलान्वयित्वमितिवाच्यंईश्वरप्रमायाःस्वविषयत्वेऽपसिद्धांतापत्तेस्तद्भा

विषयसापेक्षतया निरूपिताऽसिद्धिःजीववत्१

दृश्यत्वंनामचैतन्यविषयत्वंअतोनब्रह्मणिव्यभिचारःतच्चानुमानमन्वयिरूपमेवनतुकेवलान्वयिअस्मन्मतेब्रह्मव्यतिरिक्तस्यसर्वस्य
ब्रह्मनिष्ठात्यंताभावप्रतियोगित्वेनतदप्रतियोगित्वरूपकेवलान्वयित्वस्याप्रसिद्धेःनापिव्यतिरेकीसाधनेनसाध्यानुमितौसाध्याभावेसा

इतिमतेन१ संयोगाभाव३

धनाभावनिरूपितव्याप्तिज्ञानस्यानुपयोगात्॥ २२ वैकुंनः केवलान्वयित्वंनचाकाशोत्यंताभावःकेवलान्वयीतिवाच्यंनस्त्वस्वप्रतियोगित्वाकाशेऽअ
सत्त्वेनतत्संयोगात्प्रतियोगितदभावयोःसामानाधिकरण्यवदाधाराधेयभावस्यापिविरुद्धतयाऽसंभवात्अन्यथाकाशस्यासत्त्वप्रसंगात् किंचाकाशवदाकाशा
त्यंताभावस्यापिब्रह्मणिकल्पितत्वेनतन्निष्ठात्यंताभावप्रतियोगितयाकेवलान्वयित्वंदूरनिरस्तंएवमन्यदपिनिरूपणीयंएवंकेवलव्यतिरेक्यनुमानमपिन
संभवतीत्याह नापीति साधनसाध्ययोर्व्याप्तिज्ञानात्साध्यानुमितिर्भवतिननुसाध्याभावसाधनाभावव्याप्तिज्ञानात् तदन्यव्याप्तिज्ञानादन्यानुमितिर्भवति अतिप्र
संगात्अनुप्रतियोगित्वानुयोगिभावत्वान्तनियामकत्वेइतिवाच्यंप्रतियोगित्वादेर्निरूपणात् किंचव्याप्तिप्रकारकपक्षधर्मताज्ञानादनुमितिरितितेमतंतत्साधना
भावव्याप्तसाध्याभाववान्निष्ठत्वेनतत्प्रकारकपक्षधर्मताज्ञानासंभवात्कथंव्यतिरेकलिंगज्ञानेनसाध्यानुमितिःस्यात् किंचसाध्यप्रसिद्धेरनुमानांगत्वेनपृथिवीतर
भेदस्याकुत्राप्यप्रसिद्धत्वेनतदनुमितिर्नस्यात्तदन्यत्र अन्यथाऽप्रसिद्धसाध्यानुमितौअप्रसिद्धशशशृंगाद्यनुमितिःकुतोनस्यात् नचघटादावितरभेदःप्रत्यक्षइति

[illegible] ब्रह्मणापरमात्मनात्यंताभावात्यंताभावः५॥ प्रतियोगितानाभावनिरूपकत्वेनाभावप्रतियोगित्वेनतयाभावोव्याप्यत्वेस्यात्२॥ अन्येताभावस्य७॥

[illegible]

नन्वेवंसति अन्वयव्याप्तिमविदुषः व्यतिरेकव्याप्तिज्ञानाद्गृहीतानुमितिः कथंस्यादित्यत आह अन्वयेनेति तस्मादन्वयिरूपमनुमानमेकमेवेतिभावः एवमनुमितिप्रमांनिरूप्यक्रमप्राप्तामुपमितिं निरूपयति सादृश्येति अयंभावः नगरदृष्टगोपिंडोगवयार्थीपुरुषःवनमुद्दिश्यप्रस्थितः आरण्यकपुरुषाद्गोसदृशोगवयइतिश्रुत्वावनंगतोगोसादृश्यविशिष्टपिंडमनुभवति गोसदृशोयंगवयइति पश्चादेतत्सदृशीमदीयागौरितिस्वगेहस्थांगामुपमिनोति तत्रगवयनिष्ठगोसादृश्यज्ञानंकरणंगोनिष्ठगवयसादृश्यज्ञानंफलंसैवमुपमितिरिति भक्ताभीष्टदंसंतानंगोपीजनमनोहरं सत्यभामासुतंकृष्णंवंदेसच्चित्सुखात्मकं१ क्रमप्राप्तांशाब्दप्रमांलक्षयति वाक्यमिति किंतद्वाक्यमित्याकांक्षायांवाक्यस्यलक्षणमाह अकांक्षेति वर्णसमूहः पदंतच्चवर्णानांक्षणिकानांक्रमेणोत्पद्यमानानांकथंसमूहः स्यादिति वाच्यं एकज्ञानविषयत्वस्यैवतत्वात् नन्वेकज्ञानविषयत्वंवाकथंक्षणिकानामिति वाच्यंवर्णानांक्षणिकत्वेमानाभावात् नचोत्पन्नोगकारोनष्टोगकारइत्यनुभवःप्रमाणमिति वाच्यं तस्योच्चारणोत्पत्त्यादिविषयत्वेनतत्राप्रमाणत्वात् नचप्रत्युच्चारणगकारादिव्यक्त्युत्पत्तिःकुतोनभवतीति वाच्यंसोयंगकारइति

अन्वयव्याप्तिमविदुषःसाध्यप्रमार्थापत्तिप्रमाणादिति वक्ष्यते सादृश्यप्रमितिरुपमितिर्वाक्यकरणिकाप्रमाशाब्दी आकांक्षायोग्यतासंनिधिमत्पदसमुदायोवाक्यम्॥

प्रत्यभिज्ञाविरोधात् तच्चप्रत्यभिज्ञानस्यसादृश्यविषयतयाजातिविषयतयावाऽन्यथासिद्धत्वेनाविरोधइति वाच्यं मुख्यत्वेबाधकाभावादुत्पत्तिविनाशप्रत्ययस्यान्यथासिद्धत्वस्योक्तत्वात् ननुतर्हिवर्णानांनित्यत्वेऽद्वैतश्रुतिविरोधःस्यादिति चेन्नप्रत्यभिज्ञाविरोधेनतेषांक्षणिकत्वमात्रनिराकरणात् आकाशादिवत् सर्गाद्यकालेउत्पत्तेःप्रलयकालेविनाशस्यचोपपत्तेर्नाद्वैतश्रुतिविरोधः अतएवतत्समुदायात्मकंपदंनक्षणिकं अतएवपदसमुदायात्मकंवाक्यंनक्षणिकं अतएववाक्यसमुदायात्मकोवेदोपिनक्षणिकः अतएवोक्तंभगवतासूत्रकारेणातएवचनित्यत्वमिति नित्यत्वंप्रलयपर्यंतावस्थायित्वंविवक्षितंप्राकृतप्रलयेसकलकार्यविनाशस्यप्रतिपादनात् ननुध्वंसाप्रतियोगित्वंतदिति विवक्षितं अद्वैतश्रुतिविरोधापत्तेः छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत अस्यमहतोभूतस्यनिःश्वसितमेवैतद्यदृग्वेदोयजुर्वेदइत्यादिश्रुत्यावेदस्यकार्यत्वावगमात् तस्यचानित्यत्वावश्यंभावाच्चवाचाविरूपनित्ययेति श्रुतेरप्ययमेवार्थः अन्यथैकमेवाद्वितीयमिति श्रुतिविरोधापत्तेः नन्वेवंवेदस्योत्पत्तिविनाशाभ्युपगमेपौरुषेयतयास्वतःप्रामाण्यंव्याहन्येतेति चेन्न नहिपुरुषाधीनोत्पत्तिकत्वंपौरुषेयत्वं अप्रयोजकत्वात् किंतुसजातीयोच्चारणमनपेक्ष्योच्चार्यमाणत्वंपौरुषेय

---

अस्मदादिकर्तृकत्वादिनासिद्धमेववेदस्यनित्यत्वंवेदःअवांतरप्रलयावस्थायीजगत्हेतुत्वादीश्वरवदिति ४॥

अस्मिन्मंत्रेविरूपेतिदेवतासंबोधनंनित्ययावाचास्तुतिंप्रेरयेतिप्रतीयते२॥

त्वं ईश्वरस्तु पूर्वं पूर्वानुपूर्वीमपेक्ष्य सर्गादौ वेदं विरचितवानिति वेदस्यापौरुषेयत्वेन न स्वतःप्रमाण्यव्याहतिरित्यलमतिविस्तारेण पदसमुदायो वाक्यमित्युक्ते विलंबोच्चारितपदसमुदायेतिव्याप्तिरतस्तद्व्यावृत्त्यर्थं उक्तं सन्निधीनिति तावदुक्तेऽग्निना सिंचेदिति वाक्येतिव्याप्तिः स्यात्तद्वारणाय योग्यतेति तथापि गौरश्वः पुरुषो हस्तीत्यत्रातिव्याप्तिः स्यात्तन्निवृत्तये आकांक्षेति अत्रापि पदसमुदायत्वमेकज्ञानविषयत्वं विवक्षितमतो नासंभवः॥ नन्वाकांक्षादिमत्पदसमुदायो वाक्यमित्युक्तं अथ आकांक्षाया इच्छात्मकत्वेन चेतनधर्मत्वात्कथं पदानां साक्षात्तद्वत्त्वमित्याशंक्याकांक्षाजनकत्वेन पदानां साकांक्षत्वमित्यभिप्रेत्याकांक्षालक्षणमाह अन्वयेति यस्य पदस्य येन पदेन विनाऽन्वयानुपपत्तिस्तस्य पदस्य तेन पदेन समभिव्याहार आकांक्षा योग्यतालक्षणमाह वाक्येति सन्निधिस्वरूपमाह अविलंबेनेति पदानामविलंबोच्चारणं संनिधिः इत्यर्थः ननूक्तलक्षणं वाक्यं शाब्दप्रमाकरणं चेदव्युत्पन्नस्यापि श्रुतवाक्याद्वाक्यार्थप्रमाप्रसंग इत्याशंक्याह अव्युत्पन्नस्येति संग

अन्वयानुपपत्तिराकांक्षा वाक्यार्थाबाधो योग्यता अविलंबेनोच्चारणं सन्निधिः अव्युत्पन्नस्य संगतिग्रहाभावान्न वाक्यार्थप्रमा पदपदार्थयोः स्मार्यस्मारकभावः संगतिः सा द्विविधा शक्तिर्लक्षणा चेति शक्तिर्नाम मुख्या वृत्तिः पदपदार्थयोर्वाच्यवाचकभावसंबंध इति यावत् सा च द्विधा योगो रूढिश्चेति अवयवशक्तिर्योगः यथा पाचकादिपदानां रूढिः समुदायशक्तिः यथा घटादिपदानां सा च व्यवहारादिना गृह्यते तथाहि उत्तमवृद्धस्य घटमानयेति वाक्यश्रवणानंतरं मध्यमवृद्धः प्रवर्तते ततो बालस्तत्प्रवृत्तिं दृष्ट्वा ज्ञानमनुमिनोति तथाहि इयं प्रवृत्तिर्ज्ञानसाध्या प्रवृत्तित्वात्।

तिग्रहस्यापि वाक्यार्थप्रमोत्पत्तौ कारणत्वादव्युत्पन्नस्य तदभावान्न वाक्यार्थप्रमेत्यर्थः ननु केयं संगतिरित्यत आह पदेति संगतिं संबंध इत्यर्थः संगतिं विभजते सा द्विधेति द्वैविध्यमेवाह शक्तिरिति यद्यपि शक्तिर्गौणी लक्षणा चेति वृत्तिस्त्रिविधा तथापि वक्ष्यमाणविधया गौण्यां लक्षणायामंतर्भाव्य द्वैविध्यकथनमिति ध्येयं प्रथमोद्दिष्टां शक्तिं निरूपयति शक्तिर्नामेति का सा मुख्या वृत्तिरित्याशंक्याह पदेति पदजन्यज्ञानविषयत्वं वाच्यत्वं पदार्थस्मृतिजनकत्वं वाचकत्वं तदुक्तं पदमभ्यधिकाभावात्स्मारकाद्विशिष्यते इति शक्तिं विभजते सा चेति यथोद्देशं योगं लक्षयति अवयवेति केषां पदानां योग इत्याशंक्योदाहरणमाविष्करोति यथेति पाचकादिपदानां योग इत्यनुषज्यते रूढिं लक्षयति रूढिरिति उदाहरति यथेति शक्तिग्रहप्रकारमाह सा चेति व्यवहारेण शक्तिग्रहप्रकारमुपपादयति तथाहीत्यादिना उत्त

प्रकृतिप्रत्ययार्थयोः संबंधेन शब्दस्यार्थेषु वर्तनं ७॥ प्रकृतिप्रयार्थयोः संबंधेन विना शब्दस्यार्थेषु वर्तनं ७॥

उत्तरकालेलाघवेनपदार्थत्वे७ ॥ शक्यसंबंधिलक्षणाभवतियर्हिसंबंध्यपिपदार्थःस्यात्।तर्हिलक्षणयाःकिंप्रयोजनंतेनलक्षणापिशब्दलभ्यैवस्यात्अनन्यलभ्यस्यैवशाब्दार्थत्वादितिन्यायात्४॥

मत्तवृद्धस्यप्रयोजकवृद्धस्यमध्यमवृद्धःप्रयोज्यवृद्धःशिष्यपुत्रादिरितियावत् ननुमध्यमवृद्धप्रवृत्त्याकिमायातमित्यतआह बालइतिप्रवृत्तिगमनागमनादिव्यवहा
रंतत्रानुमानंप्रयुज्यदर्शयति तथाहीत्यादिना॥ ननुज्ञानस्यकथंवाक्यजन्यत्वमनुमिनोतीत्याशंक्यानुमानप्रकारमाह इदमितिप्रवृत्त्यानुमितंज्ञानंयोयदन्वय
व्यतिरेकानुविधायीसतज्जन्यःयथादंडान्वयव्यतिरेकानुविधायीघटोदंडजन्यइतिसामान्यव्याप्तिमभिप्रेत्यदृष्टांतमाचष्टेदंडेति ननुज्ञानस्यवाक्यजन्यत्वमस्तु
प्रकृतेकिमायातमित्याशंक्याह इत्यनंतरमितिपदार्थेशक्तिःपदात्पदार्थस्मरणस्यैवजायमानत्वात् समभिव्याहाराद्वाक्यार्थलाभः अन्यथालक्षणामात्रोच्छेदप्र
संगाद्दनन्यलभ्यस्यैवशाब्दार्थत्वादितिपूर्वपक्षत्वेननैयायिकमतमाह साचेति ननुकार्यान्वितेशक्तिःगौरवात् नचकार्यान्वितेपदार्थेशक्त्यनंगीकारेकार्यताज्ञानस्याभा
वात् कथंशक्तिग्रहइतिवाच्यंकार्यपरवाक्यश्रवणानंतरंकार्यताज्ञानात्प्रवृत्त्याज्ञानानुमानवत्सिद्धार्थवाक्यश्रवणानंतरंमुखविकाशादिनाज्ञानानुमानसंभवा
त् किंचप्रथमव्युत्पत्तौतदपेक्षायामपि लाघवेनानंतरंतदुपेक्ष्यपदार्थमात्रेशक्तिग्रहसंभवात् अन्यथाकथंकविकाव्यादिरचनास्यात् तस्मात्पदानांपदार्थेए

पुत्रस्तेजातः २

मदीयप्रवृत्तिवत् इतिज्ञानमनुमायतस्यवाक्यजन्यत्वमनुमिनोति इदंज्ञानमेतद्वाक्यजन्यंएतद्वाक्यान्वयव्यतिरेकानुविधायित्वात् दंड
जन्यघटादिवत् इत्यनंतरमावापोद्वापाभ्यांघटपदस्यघटव्यक्तौशक्तिमवधारयति साचशक्तिः पदार्थे इतिनैयायिकाः॥ ६ ॥

वशक्तिरितिनैयायिकानामाशयःमतांतरमाह कार्यान्वितइति तेषामयमाशयःपदानांकार्यान्वितेपदार्थेशक्तिर्नकेवलपदार्थेवाक्याद्वाक्यार्थप्रमानुत्पत्तिप्र
संगात् तथाहिपदार्थमात्रेशक्तानिपदानिकथंवाक्यार्थंबोधयेयुःतेषांतत्राशक्तत्वात् नचसमभिव्याहारात्तद्बोधइतिवाच्यंपदानांतत्रसामर्थ्याभावेनसम
भिव्याहारेणापितद्बोधासंभवात् किंचसमभिव्याहारेणापिभवत्वपिधवखदिरपलाशाइतिवाक्यादिवपदार्थानांसमूहालंबनबोधएवस्यात् नचसंसर्गरू
पवाक्यार्थबोधःपदानांतत्रसामर्थ्याभावात् किंचपदानांपदार्थमात्रेशक्त्यभ्युपगमेसंगतिग्रहोनस्यात् तथाहिप्रवृत्त्याज्ञानाद्यनुमानद्वारापदानांपदार्थे
शक्तिनिश्चयःप्रथमंबालस्यवाच्यःकार्यताज्ञानंप्रवृत्तौहेतुःकार्यत्वंनामकृतिसाध्यत्वंएवंचवाक्यश्रवणानंतरंकार्यताज्ञानाभावेप्रवृत्त्यभावेनज्ञानाद्यनुमाना
संभवेनकथंशक्तिनिश्चयःस्यात् नचहर्षादिनाज्ञानानुमानेनतन्निश्चयइतिवाच्यंव्युत्पन्नस्यतदभावेप्यतिबालस्यप्रथमव्युत्पत्तौतदयोगात् किंचहर्षादीना

पदशक्तिनिरूपितायापदार्थेशक्यतासाकेनावच्छिन्नापदार्थत्वेनावच्छिन्नाइतिनैयायिकाःक्रियाऽन्वितपदार्थत्वेनेतिमीमांसिकाःअन्विताऽर्थत्वेनेतिवेदांतिनः११॥

मन्यतोपिसंभवेनननस्तदनुमानायोगात् ॥

103

सि[illegible]परवाक्येयः संसर्गीभावः भ्रान्त्या तस्य ज्ञानाभावेन सिद्धपरवाक्यमपि संसर्गिणमिवबोधजनकं मन्यन्ते ४॥

तस्मात्पदानां कार्यान्विते पदार्थे शक्तिरभ्युपगंतव्या एवं च वाक्यश्रवणानंतरं कार्यताज्ञानात्प्रवृत्त्या ज्ञानाद्यनुमानेन शक्तिनिश्चय उपपद्यते न चेष्टसाधनताज्ञानात्प्रवृत्तिसंभवे न कार्यताज्ञानमकिंचित्करमिति वाच्यं सुधामरीचिमंडले तत्त्वेपि प्रवृत्तेरदर्शनात् न च कार्यताज्ञानस्य प्रवर्त्तकत्वे कूपपतनादावपि प्रवृत्तिप्रसंग इति वाच्यं इष्टसाधनताज्ञानसमानकालस्य तस्य प्रवर्त्तकत्वस्वीकारात् तस्मात्कार्यताज्ञानमेव प्रवर्त्तकं अतएव कार्यपराणां लिङ्·लोट् तव्यप्रत्यय आदिघटितानां वाक्यानामेव प्रामाण्यं तेन तेषां कथं तर्हि वाक्यार्थबोधः। असंसर्गाग्रहादिति वदामस्तस्मात्पदानां कार्यान्विते पदार्थे शक्तिरिति॥ इदानीं स्वसिद्धांतमाह अन्विते इति पदानां लाघवादितरान्विते पदार्थे शक्तिर्न कार्यान्विते गौरवात् मानाभावाच्च यद्यपि प्रथमव्युत्पत्तौ कार्यान्विते पदानां शक्तिर्गृह्यते तथापि पर्यायांतरे कार्यांशं गौरवबलेनोपेक्ष्येतरान्विते पदार्थे पदानां सामर्थ्यमवधार्यते तावता व्यवहारोपपत्तेः नचैवं कार्यताज्ञानाभावे प्रवृत्त्यभावात्कथं शक्तिग्रह इति वाच्यं पुत्रस्ते जात इति वाक्यश्रवणानंतरं सिद्धार्थज्ञानादपि मुखविकासेन हर्षमनुमाय तत्र तस्य ज्ञानजन्यत्वमनुमायानंतरं तस्य वाक्यजन्यत्वमन्वयव्यतिरेकाभ्यां निश्चित्यो

कार्यान्विते इति मीमांसकाः। अन्विते तु निवेशांतिनः एवं व्याकरणादिनापि शक्तिर्गृह्यते उक्तं च शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इति लक्षणा शक्यसंबंधः॥

११ वापोद्वापाभ्यां जनिमत्पिंडे पुत्रपदस्य शक्तेरवधारणेन कार्यताज्ञानस्य सर्वत्रानैत्यत्वात् तदुक्तं वाचस्पतिमिश्रैः कार्यबोधे यथा चेष्टा लिंगं हर्षादयस्तथा सिद्धबोधेऽर्थवत्ता च शास्त्रत्वं हितशासनादिति एतेन कार्यपराणामेव वाक्यानां प्रामाण्यं न सिद्धवस्तुपराणां वाक्यानामिति प्रत्युक्तं उक्तरीत्या संगतिग्रहसंभवात् प्रयोजनवत्त्वाच्च अनधिगतार्थबोधकतया प्रामाण्योपपत्तेः नन्वेवं सति ततो लाघवात्पदानां पदार्थे एव शक्तिरस्तु न त्वन्वयांशे गौरवात् न चैवं पदानामन्वयांशे शक्त्यभावेन तो वाक्यार्थबोधः कथमिति वाच्यं समभिव्याहारादेव तदुपपत्तेरिति चेन्नातिप्रसंगात् तथाहि पदानां यत्र सामर्थ्यं अवधारितं तद्बोधकत्वमेवावश्यमभ्युपगंतव्यं अन्यथा घटपदात्पटबोधोपि स्यात् ततश्चाशक्तपदसमभिव्याहारात्कथं वाक्यार्थबोधः स्यात् न च क्रियापदसमभिव्याहृतेनाकांक्षादिमत्पदवृंदेन स्वस्वार्थे गृहीतसंगतिकेन बाधकाभावाच्छाब्दबोधोस्त्विति वाच्यं तत्तत्पदश्रवणेन तत्तत्पदार्थोपस्थितावप्यन्वयांशे शक्त्यभावेन पदानां समभिव्याहारात्कथं तद्बोधः स्यात्· तस्मात्समभिव्याहाराद्वाक्यार्थबोधस्यासंभवात्पदानामितरान्विते पदा

अयं पुरुषो हर्षवान् मुखविकासित्वात् संमतवत् १ अयं हर्ष इष्टज्ञानजन्यः हर्षत्वात् २ इदं इष्टज्ञानं वाक्यजन्यं एतद्वाक्यान्वयव्यतिरेकानुविधायित्वात् दंडान्वयव्यतिरेकानुविधायिघटवत् ३॥ प्रत्नोन्सवेन किंचिदर्थग्रहणं किंचिदर्थत्यागाभ्यां२

योयेनविनानुपपन्नः सतेनैवाक्षिप्यतेइतिन्यायेनानयनादेर्जातावनुपपत्तौव्यक्त्याक्षेपः आनयनादिनान्यथानुपपत्तौवाजातिशब्दस्यजातिविशिष्टव्यक्तौलक्षणा२॥

र्थेशक्तिरवधार्यतेइतिसर्वैरवश्यमभ्युपगंतव्यं साचशक्तिर्जातावेवनव्यक्तौव्यक्तीनामानंत्यात् कथंतर्हिपदश्रवणानंतरंव्यक्तिबोधस्तत्राशक्तत्वादिति चेदाक्षेपाल्लक्षणयावाव्यक्तिबोधः अथवाजातिविशिष्टव्यक्तौशक्तिरस्तुतथापिजातौज्ञातोपयुज्यतेव्यक्तौस्वरूपसतीतज्ज्ञानंविनाव्यक्तिधीविलंबाभावादित्यलमतिविस्तरेण एवंव्यवहाराच्छक्तिग्रहमुक्त्वान्यतोपिशक्तिग्रहमाह एवमिति तत्रसंमतिमाह उक्तंचेति इदानीलक्षणांनिरूपयति लक्षणेति शक्तिविषयः शक्यस्तेनसंबंधोलक्ष्यमाणपदार्थस्यलक्षणायथामंडपभोजयेत्यत्रमंडपपदस्यतन्निष्ठपुरुषेशक्यसंबंधोलक्षणा॥ तांविभजते साचेति शक्यसाक्षात्संबंधः केवललक्षणायालक्षणमभिप्रेत्यकेवलांविभजते केवलेति त्रैविध्यमेवाह जहल्लक्षणेति जहल्लक्षणांलक्षयति शक्येति अजहल्लक्षणायामतिव्याप्तिवारणाय शक्यार्थपरित्यागेनेत्युक्तं तत्रोदाहरणमाह यथेति अजहल्लक्षणांलक्षयति शक्यार्थापरित्यागेनेति जहल्लक्षणायामतिव्याप्तिवारणाय शक्यार्थापरित्यागेनेतिविशेष

साचद्विधाकेवलालक्षणालक्षितलक्षणाचेति केवलात्रिविधाजहल्लक्षणाऽजहल्लक्षणाजहदजहल्लक्षणाचेति शक्यार्थपरित्यागेनतत्संबंध्यर्थांतरेप्रवृत्तिर्जहल्लक्षणायथागंगायांघोषइत्यत्रगंगापदस्यतीरे शक्यार्थापरित्यागेनतत्संबंध्यर्थांतरेप्रवृत्तिरजहल्लक्षणायथाशोणोधावतीत्यत्रशोणपदस्यशोणगुणविशिष्टाश्वादिद्रव्येषु शक्यैकदेशपरित्यागेनैकदेशवृत्तिर्जहदजहल्लक्षणाइयमेवभागलक्षणेत्युच्यते यथासोयंदेवदत्तइत्यत्रसोयमितिपदयोः केवलदेवदत्तपिंडे॥

णं तत्रोदाहरणमाह यथेति जहदजहल्लक्षणांनिरूपयति शक्यैकदेशेति तत्रलौकिकोदाहरणमाह यथेति वैदिकमपितदाह यथेति मायोपहितचैतन्यंतत्पदवाच्यार्थः स्थूलसूक्ष्मादिशरीरोपहितचैतन्यंत्वंपदवाच्यार्थः ततश्चतत्पदवाच्यैकदेशोमायातत्परित्यागेनैकदेशेचैतन्येवृत्तिस्तत्पदस्य एवंत्वंपदस्यवाच्यार्थेपिस्थूलसूक्ष्मादिशरीरमेकदेशस्तत्परित्यागेनैकदेशेचैतन्येवृत्तिस्त्वंपदस्यजहदजहल्लक्षणेत्यर्थः ननुतत्त्वंपदयोरखंडचैतन्येलक्षणास्वीकारे एकेनैवपदेनब्रह्मसाक्षात्कारसंभवात् पदांतरवैयर्थ्यमितिचेन्नैषदोषः पदस्यस्मारकत्वेनपदांतरंविनासाक्षात्काराजनकत्वात् ततश्चप्रथमंश्रुत्येकंतत्त्वंपदाभ्यांनिर्विकल्पाखंडचैतन्यस्मरणमुपपद्यते ततःपदसमुदायात्मकवाक्याद्ब्रह्मात्मैक्यापरोक्षानुभवउपपद्यते अहंब्रह्मास्मीति अतोनपदांतरवैयर्थ्यंस्यादेतत् तत्त्वमस्यादिवाक्येलक्षणांगीकारोनिरर्थकः वाच्ययोरेवैक्यबोधसंभवान्नचविरु

यथामंचाःक्रोशंतीत्यत्रमंचपदस्यमंचस्थेपुरुषे इति पाठांतरम्॥८॥ तदाश्रयग्रहणं इति पाठांतरम्॥८॥

घटत्वे ५

द्धधर्माक्रांतयोस्तयोः कथमैक्यबोध इति वाच्यं विशेषणांशयोर्विरुद्धत्वेनैक्यबोधासंभवेपि योग्यतया शक्त्युपस्थितयोर्विशेष्ययोरैक्यबोधसंभवात् तथाहि यथा अनित्यो घट इत्यत्र विशेषणांशस्य घटत्वस्यानित्यत्वान्वयासंभवेपि योग्यतया विशेष्यांशव्यक्तेस्तदन्वयः तथा प्रकृतेप्युपपद्यते यत्रोपसर्जनत्वेनोपस्थितस्य वाक्यार्थान्वयः विशेष्यस्य वाक्यार्थान्वययोग्यता नास्ति तत्रैव स्वतंत्रोपस्थित्यर्थं पदार्थैकदेशपरित्यागेनैकदेशे लक्षणा पदस्य विशिष्टवाचकस्य यथा घटो नित्य इत्यत्र विशेष्यांशव्यक्तेर्नित्यत्वान्वयायोग्यतया घटत्वस्य स्वतंत्रोपस्थित्यर्थं तस्मिन्विशिष्टवाचकघटपदस्य लक्षणा न तत्र प्रकृते शक्त्युपस्थितयोर्विशेष्ययोर्योग्यतयैक्यबोधसंभवान्न लक्षणा अन्यथा गेहे घटमानय इत्यादावपि लक्षणाप्रसंग इति॥ अत्रोच्यते येन रूपेण पदार्थोपस्थितिस्तेन रूपेण पदार्थानां वाक्यार्थान्वयो वाच्यः अन्यथातिप्रसंगात् एवं विशिष्टरूपेणोपस्थितयोस्तत्त्वंपदार्थयोरत्यंतविरुद्धत्वेन कथमभेदवाक्यार्थान्वयः स्यात्ततो नि

यथा वा तत्त्वमसीत्यत्र तत्त्वंपदयोरखंडचैतन्ये लक्षणा शक्यपरंपरासंबंधो लक्षितलक्षणा यथा द्विरेफपदस्य मधुकरे गौण्यपि लक्षितलक्षणैव एवं व्युत्पन्नस्य गृहीतसंगतिकवाक्याद्वाक्यार्थस्य प्रमोत्पत्तौ आकांक्षा योग्यता आसत्तिस्तात्पर्यज्ञानं चेति चत्वारि कारणानि आकांक्षा योग्यते निरूपिते शक्तिलक्षणान्यतरसंबंधेनाव्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिः॥ २२ र्विकल्पकचिद्रूपेणोपस्थित्यर्थं तत्त्वंपदार्थयोस्तत्त्वमस्यादिवाक्येषु लक्षणांगीकारः न चानित्यो घट इत्यत्रापि लक्षणा स्यादिति वाच्यं तत्र विशिष्टव्यक्तेरनित्यत्वान्वये बाधकाभावादत्र विशिष्टैक्यस्य प्रत्यक्षादिप्रमाणविरुद्धत्वाच्च गेहे घट इत्यादावपि घटादेर्विशिष्टवृत्तित्वे बाधकाभावान्न लक्षणा तस्मान्निर्विकल्पकचिद्रूपेण तत्त्वंपदार्थयोरुपस्थित्यर्थं तत्त्वमस्यादिवाक्येषु लक्षणांगीकरणमिति दिक् लक्षितलक्षणां निरूपयति शक्येति तत्रोदाहरणमाह यथेति द्विरेफपदस्य शक्यं रेफद्वयं तस्य भ्रमरपदेन संबंधः भ्रमरपदस्य मधुकरेण संबंधः तथा च द्विरेफपदस्य मधुकरेण परंपरासंबंधो लक्षितलक्षणेत्यर्थः सिंहो देवदत्त इत्यत्र सिंहपदस्य देवदत्ते गौणी वृत्तिः सा लक्षितलक्षणायामन्तर्भूता तथाहि सिंहपदस्य सिंहमृगः शक्यस्तस्य क्रौर्येण संबंधः क्रौर्यस्य देवदत्तेन संबंधः ततश्च सिंहपदस्य लक्ष्येण देवदत्तेन शक्यपरंपरासंबंधो वर्तत इति गौण्यपि लक्षितलक्षणैवेत्याह गौण्यपीति एवं संगतिग्रहस्यान्वयव्यतिरेकाभ्यां वाक्यार्थप्रमोत्पत्तौ कारणत्वमभिप्रेत्य शक्तिलक्षणाभेदेन संगतिं व्युत्पाद्य वाक्यार्थप्र

प्रकृते ६॥

मोत्पत्तौ कारणांतराण्यपि दर्शयति एवमिति यथावा

कुड्यादिप्रविष्टेमनुष्यादिर्यदिशब्दंकरोतितर्हिशब्दएवतस्यलिंगंलक्षकं ५॥

क्यार्थप्रमोत्पत्तौसंगतिग्रहः कारणं एवं व्युत्पन्नस्य गृहीतसंगतिकस्य गृहीतसंगतिकाद्वाक्यात्तदर्थप्रमोत्पत्तावाकांक्षादीन्यपि कारणानीति योजना न च वाक्यस्याशक्तत्वादगृहीतसंगतिकवाक्यादित्यसंगतमिति वाच्यं वाक्यस्याशक्तत्वेपि तस्य पदसमुदायात्मकतया पदानां शक्तत्वादगृहीतसंगतिकवाक्यादिति वक्तुं युक्तमिति भावः तर्हि तानि चत्वार्याकांक्षादीनि निरूपणीयानीत्याकांक्षायां द्वयं निरूपितमवशिष्टं द्वयं निरूप्यत इत्यभिप्रेत्याह आकांक्षेति॥ वाक्यलक्षणनिरूपणप्रस्तावे अन्वयानुपपत्तिराकांक्षा वाक्यार्थाबाधो योग्यतेति तेन निरूपित इत्यर्थः आसत्तिं लक्षयति आसत्तीति ॥ ॥ ॥ शक्तिलक्षणान्यतरत्वं नाम तदन्यान्यत्वं पदार्थोपस्थितिरासत्तिरित्युक्ते प्रमाणान्तरजन्यायाः पदार्थोपस्थितेरप्यासत्तित्वप्रसंगस्तद्वारणाय पदजन्येति लिंगविधया पदजन्यपदार्थोपस्थितेरासत्तित्ववारणाय शक्त्येत्यादि शक्तिलक्षणे निरूपितेऽव्यवहितपदजन्यपदार्थोपस्थितेरासत्तित्ववारणायाव्यवधानेनेति॥ तात्पर्यज्ञानस्य वाक्यार्थप्रमां प्रति कारणत्वमुप

तात्पर्यं द्विविधं वक्तृतात्पर्यं शब्दतात्पर्यं चेति पुरुषाभिप्रायो वक्तृतात्पर्यं तज्ज्ञानं वाक्यार्थज्ञाने न कारणं तदभावेपि अव्युत्पन्नस्य वाक्याद्वाक्यार्थज्ञानदर्शनात् तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वे सति तदर्थप्रतीति जननयोग्यत्वं शब्दतात्पर्यं तच्च षड्विधैर्लिंगैर्निश्चीयते। वेदे लिंगानि तु दर्शितानि उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इति अस्यार्थः प्रकरणप्रतिपाद्यस्य अद्वितीयवस्तुनः॥ २२ पादयितुं तात्पर्यं विभजते तात्पर्यमिति तदर्थप्रतीतीच्छयोच्चरितत्वं वक्तृतात्पर्यमिति केचिदाहुः तन्न मौनिश्लोकादौ तदभावा

दित्यभिप्रेत्य वक्तृतात्पर्यं व्युत्पादयति पुरुषेति तद्ज्ञानस्य वाक्यार्थप्रमां प्रति कारणत्वं न संभवति व्यभिचारादित्यभिप्रेत्याह तदिति तद्ज्ञानं वाक्यार्थप्रमां प्रति। कुतो न कारणमित्याशंक्याह तदभावेपीति अव्युत्पन्नस्य वाक्यार्थज्ञानाभावेन तदिच्छायाः सुतरामसंभवात् तस्य तज्ज्ञानाभावेपि तद्वाक्याद्वाक्यार्थप्रमादर्शनान्न तत्कारणमित्यर्थः शब्दतात्पर्यं निरूपयति तदितरेति तस्मात्प्रकृतवाक्यार्थादितरो यो वाक्यार्थस्तत्प्रतीतिमात्रेच्छया अनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यमित्यर्थः भोजनप्रकरणे सैन्धवमानयेत्युक्ते लवणानयनप्रतीतिवदश्वानयनप्रतीतिरपि स्यात्तद्योग्यत्वस्य विद्यमानत्वात्तद्वारणाय पूर्वदलं तथाप्युभयेच्छया सैंधवमानयेत्युक्ते वाक्येऽव्याप्तिः स्यादत उक्तं मात्रेति उभयेच्छयायुक्तत्वेपि तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वस्य सत्त्वान्नाव्याप्तिः तर्हि तत्तात्पर्यं केन प्रमाणे

अव्युत्पन्नस्य४॥ व्युत्पन्नस्य४॥

न निश्चीयत इत्याकांक्षायामाह तच्चेति शब्दतात्पर्यमित्यर्थः कानि तानि तात्पर्यलिंगानीत्याकांक्षायामाह लिंगानि त्विति संग्रहश्लोकं पठत्युपक्रमेति श्लो
कं व्याचष्टे अस्यार्थ इति कौ तावुपक्रमोपसंहारावित्याकांक्षायामाह प्रकरणेति उभयाकांक्षं प्रकरणं तत्प्रतिपाद्यस्य वस्तुन आदौ प्रतिपादनमुपक्रमः अंते
प्रतिपादनमुपसंहारः एतद्द्वयं तात्पर्यनिर्णायकमेकं लिंगमित्यर्थः तदुभयमुदाहरंति यथेति हे सौम्य सोमवन् प्रियदर्शन इदं दृश्यमानं सर्वं अग्रे सृष्टेः पूर्वं
सदेवासीत् एकमेवाद्वितीयं तद्भिन्नं विजातीयं सजातीयं वा किमपि नासीत्यर्थः एवं छांदोग्यषष्ठे आदावद्वितीयवस्तुप्रतिपादनमुपक्रमः॥ तथा एवं तदद्वि
तीयवस्तु आत्मा यस्य तदेतदात्मा एतदात्मनो भावः ऐतदात्म्यं इदं सर्वं दृश्यमानं अद्वितीयवस्तुव्यतिरेकेण नास्तीत्यर्थः एवमंते अद्वितीयवस्तुप्रतिपादनमुप
संहार इत्यर्थः॥ अभ्यासं निरूपयति प्रकरणेति अभ्यासमुदाहरंति यथेति तत्रैव छांदोग्यषष्ठ एव नवकृत्वो नववारं अपूर्वतां निरूपयति प्रकरणप्रतिपाद्ये

आद्यंतयोः प्रतिपादनमुपक्रमोपसंहारौ यथा छांदोग्यस्य षष्ठे सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म ऐतदात्म्यमिदं सर्वमित्युपक्र
मोपसंहारौ वाद्यंतयोः प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनमभ्यासः यथा तत्रैव तत्त्वमसीति नवकृत्वोऽभ्यासः प्रकरणप्रतिपाद्यस्या
नांतराविषयताऽपूर्वता यथा तत्रैवाद्वितीयवस्तुनो मानांतराविषयता प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिः प्रयोजनं फलं यथा
तत्रैवाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति अद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलं प्रकरणप्रतिपाद्यस्य प्र
शंसनमर्थवादः यथा तत्रैव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं॥ २२

ति उदाहरंति यथेति श्रुत्यति
रिक्तमानं मानांतरं तदगोचरत्वमपूर्वत्वमित्यर्थः फलं निरूपयति प्रकरणेति तत्राप्युदाहरणमाह यथेति आचार्यवान् गुरुमुखात्कृतवेदार्थः वेद ब्रह्मास्मीति
साक्षात्कारोतीति तत्त्वमस्यादिवाक्यैरिति शेषः तस्य ब्रह्मसाक्षात्कारवतः यावन्न विमोक्ष्ये प्रारब्धफलभोगेन बंधनान्न मुच्यते तावदेव चिरं तावत्कालमवस्थानं अथ
भोगेन प्रारब्धे क्षीणे संपत्स्ये ब्रह्म संपद्यते परमात्मा भवतीत्यर्थः अर्थवादं निरूपयति प्रकरणेति उदाहरणं दर्शयति यथेति येन श्रुतेन ब्रह्मणाऽश्रुतं श्रुतं भवति
तमादेशमप्राक्षः पृष्टवानसीति पूर्वेण संबंधः एवं सर्वत्र द्रष्टव्यं उपपत्तिमाह प्रकरणेति लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टांतः तैर्दृष्टांतैः प्रकरणप्रति
पाद्यप्रतिपादनमुपपत्तिरिति योजना उदाहरंति॥
हे श्वेतकेतो त्वं तमुपदेशैकगम्यं गुरोः सकाशात्पृष्टवानसीत्यर्थः॥२॥

यथेति यथैकेन मृत्पिंडेन विज्ञातेन सर्वं मृण्मयं घटशरावादिकं विज्ञातं स्यान्मृदात्मना नामधेयं विकारश्चेति द्वयं वाचारंभणमनृतं मृत्तिकेत्येव सत्यं अतो मृद्विज्ञानेन घटादिज्ञानं युक्तमित्यर्थः एवं लिंगानि निरूप्यते वेदांतानां ब्रह्मणि तात्पर्यनिश्चयो भवतीत्युपसंहरति एवमिति ततः किमित्यत आह इदमिति उपक्रमादिषड्विधलिंगैरद्वितीये ब्रह्मणि वेदांतानां तात्पर्यनिश्चयानुकूलव्यापाररूपं श्रवणमित्यर्थः प्रसंगान्मननं निरूपयति श्रुतस्येति निदिध्यासनं निरूपयति विजातीयेति अनात्मबुद्धिर्द्वैतदर्शनं च विजातीयप्रत्ययः अहंब्रह्मास्मीति प्रत्ययात्तिरस्कारेणेत्यर्थः अत्र श्रवणेन मानगतासंभावना निवर्तते मननेन मेयगतासंभावना निदिध्यासनेन विपरीतभावना अनंतरं तत्त्वमस्यादिवाक्याद्ब्रह्मापरोक्षज्ञानं शोधिततत्त्वंपदार्थस्य ततोऽज्ञाननिवृत्तिः एवं श्रवणादीनां ब्रह्मसा

प्रकरणप्रतिपाद्यस्य दृष्टांतैः प्रतिपादनमुपपत्तिः यथा तत्रैव यथा सोम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्यप्रतिपादितमृदादिदृष्टांतैरद्वितीयवस्तुप्रतिपादनं एवं षड्विधतात्पर्यलिंगैर्वेदांतानामद्वितीये ब्रह्मणि तात्पर्यनिश्चयः इदमेव श्रवणमित्युच्यते श्रुतस्यार्थस्योपपत्तिभिश्चिंतनं मननं विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनं ॥ तदुक्तम् शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्यते ॥ चेतसस्तु चितिमात्रशेषता ध्यानमित्यभिवदंति वैदिकाः अंतरंगमिदमित्यमीरितं तत्तुरुष्यपरमात्मबुद्धये इति ॥ २१ साक्षात्कारद्वारा मोक्षे विनियो

गः एतच्चाग्रे व्युत्पादयिष्यति ॥ तत्र संमतिमाह तदुक्तमिति शब्दानां वेदांतानां शक्तिविषयं निरूपणं शक्तितात्पर्यावधारणानुकूलव्यापार इत्यर्थः युक्तितो न्यायतो बुधैर्वेदांतशास्त्रार्थरहस्यविद्भिर्वस्तुतत्त्वविषयं निरूपणं अद्वितीयब्रह्मतत्त्वनिर्णयानुकूलव्यापार इत्यर्थः युक्तिः उपपत्तितः साव्याख्याता चेतसः अंतःकरणस्य चितिमात्रशेषता विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहिता वैदिकाः वेदांतार्थचिंतकाः द्वितीयश्लोकस्योत्तरार्द्धं व्याचष्टे इदमिति ज्ञानं प्रति ब्रह्मसाक्षात्कारं प्रति तत्र प्रमाणमाह आत्मेति आदिशब्देन तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन निष्ठासेत् पांडित्यं च बाल्यं च निर्विद्याथ मुनिः तद्विजिज्ञासस्वेत्यादिश्रुतयो गृह्यंते ननु साधनसंपन्नस्य संन्यासिनः श्रवणादित्रयं ज्ञानं प्रत्यंतरंगसाधनमित्युक्तं तत्र कानि साधनानि यैः संपन्नः श्रवणाद्यधिकारी स्यात्तत्राह साधनानीति अजो नित्य

106

शाश्वतोयंपुराणो आकाशवत्सर्वगतश्च नित्यः तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः यत्कृतकं तदनित्यं यथा घट इत्यादिश्रुतिस्मृतिन्यायैरात्मा नित्यः आत्मनोन्यदखिलं ब्रह्मलोकान्तमनित्यं पुण्यकार्यत्वात् नच कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुत्या ब्रह्मलोकस्य विद्यासाध्यत्वावगमात्पुण्यकार्यत्वानुपपत्तेः कथमनित्यत्वमिति वाच्यं विद्यया देवलोक इत्यत्र विद्याशब्देनोपासनाया विवक्षितत्वात्तस्याः कर्तुमकर्तुमन्यथाकर्तुं शक्यत्वेन मानसक्रियारूपत्वाद्ब्रह्मलोकस्यापि पुण्यकार्यत्वेनानित्यत्वोपपत्तेः एतच्चास्माभिः प्रागेव विस्तरेण प्रतिपादितं तस्मादात्मनोन्यदखिलमनित्यं आत्मा नित्य इति विवेचनं नित्यानित्यवस्तुविवेकः ननु कश्चित्त्वयमेव श्रुतिस्मृत्यर्थन्यायं च कथमनुसंधत्ते माऽस्त्विति चेत्तर्हि नित्यानित्यानित्यवस्तुविवेकः कथं स्यात् किं चाक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीति श्रुत्या कर्मफलस्याक्षय्यत्वावगमात्कथमात्मभिन्नस्यानित्यत्वनिश्चय इति नायं दोषः मलिनचित्तस्य तदसंभवेपि निःकामतयाऽनुष्ठितनित्यनैमित्तिकप्रायश्चि

इदं श्रवणादित्रयं साधनसंपन्नस्य संन्यासिनो ज्ञानं प्रत्यन्तरंगसाधनं आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुतेः साधनानि नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिः मुमुक्षुत्वं चेत्येवंरूपाणि ॥ २२

नोपासनैराराधिताराध्यपादश्रीकृष्णभगवदनुग्रहीतस्यात्यन्तनिर्मलस्वान्तस्य श्रुत्याद्यनुसंधानेन नित्यानित्यवस्तुविवेकोपपत्तेः कर्मफलाक्षय्यत्ववचनस्य विध्यपेक्षिततया गुणार्थवादत्वात् न तद्यथेह कर्मचितो लोकः क्षीयत इत्यादिवचनस्य श्रवणविध्यपेक्षितत्वेन न्यायोपोद्बलितत्वेन च भूतार्थवादतया ततो बलवत्त्वाच्च ततः आत्मभिन्नस्यानित्यत्वनिश्चयो भवेत्येव अर्थवादस्त्रिविधः गुणवादोऽनुवादो भूतार्थवादश्चेति तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति अत्रादित्यो यूपो भवति अग्निर्हिमस्य भेषजं यन्न दुःखेन संभिन्नमित्यादिवाक्यानि यथाक्रममुदाहरणीयानि तत्र च विधेः फलापेक्षायामपि नित्यत्वानित्यत्वयोरौदासीन्याच्चातुर्मास्यफलनित्यत्वे ज्योतिष्टोमाश्वमेधादिविधीनामानर्थक्यप्रसंगात्तदक्षय्यत्ववचनं गुणार्थवाद एव पूर्णाहुत्या सर्वकामानवाप्नोति वचनवत् तद्यथेह कर्मचितो लोकः क्षीयत इत्यादिवाक्यं तु श्रवणविध्यपेक्षितत्वान्मानान्तराविरुद्धत्वात् यत्कृतकं तदनित्यमिति न्यायोपोद्बलितत्वादज्ञातार्थबोधकतया भूतार्थवादत्वात्स्वार्थे मानमेवात

यत्कृतकं तदनित्यमिति न्यायसहकारित्वेन ॥५ प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकतया ५॥ आदित्यो यूप इति तत्प्रशंसामात्रपरत्वादित्यर्थः ॥ ६ ॥

नित्यानित्यवस्तुविवेके समक्ष संक्षेपकम्

फलेष्वनित्यत्वदोषदर्शनेनेहामुत्रार्थफलभोगविरागोभवतिवांतपायसादाविवैहिकभोगसाधनस्रक्चंदनवनितादिविषयेष्वमुत्रामृतादिविषयेषु चानित्यत्वदोषदर्शनेनात्यंतजिहासासंपद्यते अयमेवेहामुत्रार्थफलभोगविरागः नत्वप्रथममेतादृशवैराग्यसिद्धौकिंरहति पादारंभेणवैराग्यफलकेनेतिवाच्यंएतदध्यायतदारंभोपपत्तेः। ततःशमदमोपरतितितिक्षाश्रद्धासमाधानानिभवंति तान्यग्रेव्युत्पादयिष्यंति ततोमुमुक्षा एवंसाधनानिभवंतीत्यर्थः॥ अत्र विवेकादिसाधनचतुष्टयंसमुच्चितमधिकारिविशेषणमित्याचार्याः अन्येतुमुमुक्षैवाधिकारिविशेषणं विवेकादिकंतुतत्साधनत्वेनप्रणाड्या अन्यथाप्रसज्यप्रतिषेधादितिवदंति विवेकादीनामधिकारिविशेषणत्वेप्रमाणमाह· परीक्ष्येतिकर्मचितान्कर्मसंपादितान् लोकान्ब्रह्मलोकादीन्परीक्ष्यानित्यत्वेननिश्चित्यब्राह्मणोब्रह्मजिज्ञासुर्निर्वेदंवैराग्यमायात्प्राप्नुयात्किमितियतः अकृतोमोक्षःकृतेनकर्मणानास्तिनसंभवतिततः किंकुर्यादित्यत आह तदिति विरक्तःसर्वकर्माणि

परीक्ष्यलोकान्कर्मचितान् ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेनतद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठं कश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वा आत्मन्येवात्मानंपश्येदित्यादिश्रुतिभ्यः यथोक्तसाधनसंपन्नस्यसंन्यासाधिकारः॥ ११

नित्यादीनिसंन्यस्यतद्विज्ञानार्थंमोक्षसाधनीभूतब्रह्मविज्ञानार्थंगुरुमेवाभिगच्छेत्समित्पाणिरुपहारपाणिः श्रोत्रियं शास्त्रज्ञानवंतंब्रह्मनिष्ठंकरामलकवदखंडैकरसानंदब्रह्मसाक्षात्कारवंतमितिमुंडकश्रुतेरक्षरार्थः कठवल्लीवाक्यमप्युदाहरति कश्चिदिति धीरोविवेकीजडात्तदुःखहंकारेभ्यःप्रातिलोम्येनसच्चिदानंदतया अंचतिप्रकाशतेइतिप्रत्यङ् सचासावात्माचप्रत्यगात्मातंअनावृत्तंविषयेभ्योव्यावृत्तंचक्षुर्यस्यसतथोक्तःचक्षुरितिसर्वेंद्रियाणामुपलक्षणंजितेंद्रियइत्यर्थः बृहदारण्यकवाक्यमुदाहरति शांतइति आत्मनिमनसि आत्मानमद्वयात्मानंपश्यन्त्यहंब्रह्मास्मीतिसाक्षात्करोतिआदिशब्देनात्मनस्तुकामायसर्वंप्रियंभवति असुर्यानामतेलोका अंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः उदरमंतरंकुरुते अथतस्यभयंभवतितत्त्वेवभयंविदुषोमन्वानस्यतस्यत्रयअवस्थास्त्रयःस्वप्नाइत्यादिवाक्यानिगृह्यंते ततः किमित्यत आह यथोक्तेति यथोक्तसाधनसंपन्नस्यविवेकादिसाधनसंपन्नस्यविवेकादिसाधनसंपन्नस्यजिज्ञासोरितिशेषः एतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीत्यादिश्रुतेः ननुसाधनसंपन्नस्यजिज्ञासानोपपद्यतेकुतइतिचेत् ब्रह्म

जिज्ञासायाः ९॥

ज्ञातं ज्ञातं वा नाद्यः अज्ञाते जिज्ञासाऽयोगात् तस्या धर्मिज्ञानसाध्यत्वात् न द्वितीयः ज्ञातेस्तुतरां तद्योगात् न च तद्ज्ञानमापातस्वरूपमेवेति वाच्यं किमिदमापातत्वं
सामान्यरूपत्वं वा संशयरूपत्वं वा परोक्षरूपत्वं वा नाद्यः निःसामान्यविशेषे ब्रह्मणि सामान्यलक्षणापातनाया असंभवात् न द्वितीयः ब्रह्मणो मानान्तरागम्यत्वेन
तज्ज्ञानस्य संशयत्वायोगात् न तृतीयः नित्यापरोक्षे ब्रह्मणि परोक्षज्ञानायोगात् यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुत्या ब्रह्मणो नित्यापरोक्षत्वावगमात् तस्मात्साधन
संपन्नस्य जिज्ञासाऽनुपपन्नेति॥ उच्यते यद्यपि ब्रह्मणो मानान्तरागोचरत्वात् स्वप्रकाशसाक्ष्यभिन्नतया नित्यापरोक्षत्वाच्च तस्मिन्वेदान्तवाक्यादपरोक्षमेव ज्ञा
नं जायते तथापि तद्ज्ञानमापातरूपमेव अग्रे संशयादिदर्शनात् तस्यापातत्वं नामाविचारितवाक्यजन्यत्वं संशयादिग्रस्तत्वं वा तत्संशयत्वभासमानविरुद्ध

विहितानां कर्मणां विधिना परित्यागः संन्यासः स च वैराग्यहेतुकः यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतेः वैराग्यं परमेतस्य परमोव
धिरितिस्मृतेश्च स च वैराग्यस्य तारतम्येन चतुर्विधः कुटीचकबहूदकहंसपरमहंसभेदात् वैराग्यं द्विविधं अपरमपरं चेति तत्रापरं चतुर्वि
धं यतमानव्यतिरेकैकेन्द्रियत्ववशीकारभेदात् अस्मिन्संसारे इदं सारमिदमसारमिति सारासारविवेको यतमानवैराग्यं चित्तगतदोषाणाम
ध्ये एतावन्तः पक्वा एतावन्तोऽपक्वा इति विविच्यापक्वदोषनिरोधयत्नो व्यतिरेकवैराग्यं विषयेच्छासत्त्वेपि मनसेन्द्रियनिरोधावस्थानं एकेन्द्रियत्वं
वैराग्यं वशीकारवैराग्यमैहिकामुष्मिकविषयजिहासा॥ २ नानाकोटिजन्यज्ञानस्यैव संशयत्वात् वाक्यजन्यज्ञानस्यैककोटिकत्वेत् निर्दोषवेदान्तवाक्यजन्य
ज्ञानस्य संशयत्वायोगात् अन्ये तु क्वचिदेककोटिकज्ञानमप्यनवधारणात्मकं अन्यथाऽनभ्यासदशायां जलज्ञानानन्तरं प्रामाण्यसंशयो हि न संशयो न स्यात् जलज्ञानस्य
तस्य सतो निश्चयरूपत्वात् न चैककोटिकज्ञानस्य संशयत्वे निश्चयसंशययोः को भेद इति वाच्यं संशयविरोधिज्ञानस्यैव निश्चयत्वात् न चान्योन्याश्रयः एकस्मिन् धर्मिणि
स्वाकारविरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरोधिज्ञानत्वस्यैव संशयत्वात् एवं च वाक्यजन्यमपि ज्ञानमेककोटिकमपि अग्रे संशयादिदर्शनादनवधारणात्मक
मेवेति वदन्ति तथा च साधनसंपन्नस्य जिज्ञासोः संन्यासाधिकार इति निरवद्यम् ननु यथोक्तसाधनसंपन्नस्य संन्यासाधिकार इत्युक्तं तत्र कोऽसौ संन्यास इत्याका
ङ्क्षायां तं व्युत्पादयति विहितानामिति अविहितनिषिद्धत्यागिनां संन्यासित्वाभावाद्विहितानामित्युक्तं आलस्यादिना विहितत्यागिनां भ्रष्टानां संन्यासित्ववारणाय

वर्तमानस्य॥४॥

विशिष्टज्ञानस्य॥५॥

अ·कौ· विधिनेत्युक्तं संन्यासस्य वैराग्यहेतुकत्वे प्रमाणमाह यदहरेवेति यस्मिन् दिने वैराग्यं प्राप्नुयात्तदहस्तस्मिन्नेव दिने प्रव्रजेत्सर्वकर्मसंन्यासं कुर्यात् इति
द्वि·प्र· श्रुतेरक्षरार्थः मोक्षस्य संन्यासस्य संन्यासं विभजते सचेति वैराग्यतारतम्यमुपपादयितुं वैराग्यं विभजते वैराग्यमिति अपरं वैराग्यं विभजते तत्रेति तयोर्म
४८ ध्य इत्यर्थः यतमानवैराग्यं निरूपयति अस्मिन्निति व्यतिरेकवैराग्यं निरूपयति चि नेति एकेंद्रियत्ववैराग्यमाह विषयेति चतुर्थमाह वशीकारेति॥ तत्र पतंज
लि सूत्रं संवादयति तदुक्तमिति ऐहिकाः स्रक्चंदनवनितादयो दृष्टविषया आमुष्मिकाः अनुश्राविकास्तेषु विगततृष्णा यस्य स तथा तस्य ऐहिकामुष्मिक
विषये जिहासायुक्तस्येत्यर्थः तादृशस्य वशीकारनामकं वैराग्यं भवतीति शेषः अर्थाद्यतमानादित्रयं सूत्रितं द्रष्टव्यं तदपि विभजते तदिति मंदवैराग्यस्वरूपं द

तदुक्तं दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति तत्त्रिविधं मंदं तीव्रं तीव्रतरं चेति पुत्रदारादिवियोगे धिक् संसारमि
तिबुद्ध्या विषयजिहासा मंदं वैराग्यं अस्मिन् जन्मनि पुत्रदारादिर्मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रं पुनरावृत्तिसहितब्रह्मलोकादि
पर्यंतं मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रतरं तत्र मंदवैराग्ये संन्यासाधिकार एव नास्ति यदा मनसि वैराग्यं जायते सर्ववस्तुषु॥ तदैव सं
न्यसेद्विद्वानन्यथा पतितो भवेदिति स्मरणात् तीव्रवैराग्ये सति यात्राद्यशक्तौ कुटीचकाधिकारस्तच्छक्तौ बहूदकसंन्यासाधिकारः तीव्रतरवैरा
ग्ये सति हंससंन्यासाधिकारः एते त्रयः संन्यासाः एतेषामाचाराश्च स्मृतौ प्रसिद्धाः तीव्रतरवैराग्ये मुमुक्षोः परमहंससंन्यासाधिकारः स च परमहं
सो द्विविधः विविदिषासंन्यासो विद्वत्संन्यासश्चेति साधनसंपन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः॥ ११ र्शयति पुत्रेति ती

व्रवैराग्यं निरूपयति अस्मिन्निति तीव्रतरं निरूपयति पुनरावृत्तीति तच्चेदं वैराग्यतारतम्यं कुतोऽवगम्यत इति वाच्यं परवैराग्ये मृदुमध्यतीव्रभेदेन तारतम्यावगमा
त् अपरेऽपि स्वानुभवानुरोधेन तदुपपादितमिति भावः कस्मिन् वैराग्ये सति को वा संन्यासः कर्तव्य इत्याकांक्षायां तदुक्तं मंदवैराग्ये सति संन्यासानधिकारमाह तत्र मं
देति तत्र गमकमाह यदेति यात्राद्यशक्तिशक्तिभ्यां तीव्रविरक्तस्य संन्यासद्वयमाह तीव्रेति तीव्रतरविरक्तस्य हंससंन्यासाधिकारमाह तीव्रतरेति तर्हि ते संन्यासा निरूपणीया रामः
स्तेषामाचाराश्च वक्तव्या इति तत्राह एत इति मुमुक्षोः परमहंससंन्यासाधिकारमाह तीव्रतरेति परमहंससंन्यासं विभजते सचेति विविदिषासंन्यासस्य लक्षणमाह साधने ४८

108

वाशब्दे आश्रमान्तरे विध्यभावं निराकरोति विधिरेवायमपूर्वार्थत्वात् धारणवत् उपरि हि देवेभ्यो धारयतीत्यत्र यथा तद्वत् सति चाश्रमान्तरे ब्रह्मसंस्थत्वं न कर्मिणामित्यभिप्राय इति॥ शा०॥ सू०॥ ६॥ तत्र प्रमाणमाह एतमेवेति लोको द्विविधः आत्मलोकोऽनात्मलोकश्चेति तत्रानात्मलोकः श्रुत्या त्रिविधः प्रतिपादितः अथ त्रयो वाव लोका मनुष्यलोक इति श्रुतिः आत्मलोकोऽपि श्रुत्या प्रतिपादितः अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा ह वेदेननूक्तोऽन्यद्वा कर्मकृतं यदि ह वाप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्याद्याः श्रुतयः तेनैव एतमिति सर्वनाम्नः प्रकृतपरामर्शित्वात् स वा एष महानज आत्मा इत्यात्मनः प्रकृतत्वादिहापि लोकमिति लोकशब्देनात्मलोको विवक्षित इति गम्यते एवं च लोक्यतेऽनेनेति व्युत्पत्त्या लोकमात्मानं भवमिच्छन्तः प्रव्राजिनो विरक्ताः प्रव्रजंति संन्यासं कुर्वंतीत्यर्थः अत्रापूर्वत्वात् संन्यासं कुर्युरिति विधिर्द्रष्टव्यः उपांशुयाजमन्तरा यजतीत्यत्र यथा तद्वत् तदुक्तं विधिर्वा धारणवदिति विविदिषासंन्यासं विभजते स चेति जन्मापादककर्म काम्यं फलाभिसंधिकृतं नित्यादि कर्म तस्य त्या

एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजंतीत्यादिश्रुतिस्तत्र प्रमाणं स च द्विविधः जन्मापादककर्मत्यागात्मकः प्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपश्चेति न कर्मणा न प्रजया न धनेन त्यागेनैकेऽमृतत्वमानशुरित्यादिश्रुतिराद्ये मानं विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्यासप्रतिबंधे आद्ये संन्यासेऽधिकारः अत्र स्त्रीणामप्यधिकारः जनकादीनां मैत्रेयीप्रभृतीनां तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषूपलंभात्॥

गः काम्यकर्मणां स्वरूपेण त्यागो विवक्षितः नित्यादीनां फलाभिसंधित्यागमात्रं विवक्षितं न स्वरूपेण अन्यथाऽवान्तरभेदो न स्यादिति भावः तत्र प्रथमविविदिषासंन्यासे प्रमाणमाह नेति कर्मणा काम्येन फलाभिसंधिकृतनित्यादिना वा कर्मणाऽमृतत्वं नाप्नुयुरेवं सर्वत्र योजनीयं प्रजया पुत्रेण धनेन हिरण्यादिना एके विरक्तास्त्यागेन यथोक्तजन्मापादककर्मत्यागात्मकसंन्यासेनामृतत्वं मोक्षसाधनं ब्रह्मसाक्षात्कारमानशुः प्राप्नुयुरित्यक्षरार्थः कस्य तत्राधिकार इत्याकाङ्क्षायामाह विरक्तस्येति संन्यासप्रतिबंधे दंडधारणाद्याश्रमरूपसंन्यासप्रतिबंधे जन्मापादककर्मत्यागात्मकसंन्यासे स्त्रियोऽप्यधिक्रियंत इत्याह अत्रेति तत्र गमकमाह जनकादीनामिति आदिशब्देनाजातशत्रुयाज्ञवल्क्यकहोलप्रभृतयो गृह्यंते मैत्रेयीप्रभृतीनामिति न च स्त्रीणामुपनयनाभावात् वेदाध्ययनानर्हतया कथं ब्रह्मज्ञानाधिकारस्तस्य महावाक्यजन्यत्वादिति वाच्यं अतीतानेकजन्मसुकृतपरिपाकवशेन नितांतनिर्मलस्वांतानां मनुष्याणां पुराणश्रवणादिना तत्त्वज्ञानोत्पत्तौ बाधकाभावात् त्रैवर्णिकानामेव वेदांतश्रवणादिनाज्ञा

नोत्पत्तिः एतदभिप्रायाच्छ्रुतिरपि यद्ब्रह्मविद्यया सर्वं भवि

येनाभिमानेनधर्मादीन्त्यजसितमपिनिवारयेत्यर्थः॥४॥
ष्यंतोमनुष्यामन्यंतइति अतएवेतिहासपुराणेषुविदुरादीनांतत्त्वज्ञानंश्रूयते किमुवक्तव्यंब्राह्मणीनांमैत्रेय्यादीनांतत्त्वज्ञानाधिकारेत्रैवर्णिकस्त्रीणांज्ञानमात्रोप
पयोगीस्तुत्यस्यासेनविरोधइतिकेचित्तदाहश्रुतिस्मृतीति॥ द्वितीयविविदिषासंन्यासेप्रमाणमाह द्वितीयइति यदिवेतरथाब्रह्मचर्यादेवप्रव्रजेद्गृहाद्वावनाद्वा
यदहरेवविरजेत्तदहरेवप्रव्रजेत् प्रवृत्तिलक्षणोयोगोज्ञानंसन्यासलक्षणं तस्माज्ज्ञानंपुरस्कृत्य संन्यसेदिहबुद्धिमान्त्यजधर्ममधर्मंचउभेसत्यानृतेत्यजउभेसत्या
नृतेत्यक्त्वायेनत्यजसितंत्यजकर्मणाबध्यतेजंतुर्विद्ययाचविमुच्यते तस्मात्कर्मनकुर्वंतियतयःपारदर्शिनइत्यादिवचनान्यादिशब्देनगृह्यंते

विद्वत्संन्यासमुपपादयति गृहस्थाश्रमादाविति उत्पन्नःब्रह्मसाक्षात्कारोयस्यसतथातेनेतियावत् आदिशब्देनब्रह्मचारिवानप्रस्थौगृह्येते चित्त
द्वितीयेतुदंडमाच्छादनंकौपीनंपरिगृह्यशेषंविसृजेदितिसंसारमेवनिःसारंदृष्ट्वासारदिदृक्षयाप्रव्रजंत्यकृतोद्वाहाःपरंवैराग्यमा
श्रिता१इत्यादिवचनानिप्रमाणानि गृहस्थाश्रमादौकृतश्रवणादिभिरुत्पन्नसाक्षात्कारेणगृहस्थादिनाविक्षिप्तचित्तस्यचित्तविश्रांति
लक्षणांजीवन्मुक्तिमुद्दिश्यक्रियमाणःसंन्यासोविद्वत्संन्यासः तत्रएतमेवविदित्वामुनिर्भवति अथयोगिनांपरमहंसानामित्यादिपर
महंसोपनिषत् यदातुविदितंतत्त्वंपरंब्रह्मसनातनंतदैकदंडंसंगृह्यसोपवीतांशिखांत्यजेदित्यादिश्रुतिस्मृतिवचनानिप्रमाणानि
तत्राद्यसंन्यासोजन्मांतरीयोपिज्ञानेउपकरोति जनकादीनांतत्त्वज्ञानोपलंभाच्छ्रुत्यादिषु॥ ५ विश्रांतिर्नामविक्षेपोपशमः विद्वत्संन्यासे

प्रमाणमाह तत्रेति एतंपरमात्मानंविदित्वाब्रह्मास्मीतिसाक्षात्कृत्यमुनिर्मननशीलोभवतीत्यर्थः तच्चमननशीलत्वमसतिकर्तव्यांतरेसंभवतीतिसंन्यासोवि
धीयतेतस्यजीवन्मुक्तिरेवफलंतत्त्वज्ञानस्यसंपन्नत्वादितिभावः आदिशब्देनैतमात्मानंविदित्वाब्राह्मणाःपुत्रैषणायाश्चलोकैषणायाश्च उत्थायाथभिक्षाच
र्यंचरंतिनदंडंनशिखांनयज्ञोपवीतंनाच्छादनंचरतिपरमहंसःकंथाकौपीनवासास्तुदंडधृग्ध्यानतत्परःएकाकीरमतेनित्यंतंदेवाब्राह्मणंविदुःकपालंवृक्षमूला
निकुचेलमसहायतासमताचैवसर्वस्मिन्नेतन्मुक्तस्यलक्षणं इत्यादिवचनानिगृह्यंते ननुविविदिषासंन्यासस्तत्त्वज्ञानहेतुरित्युक्तंतदयुक्तंयाज्ञवल्क्यजनकप्रभृ
तीनांतत्त्वज्ञानोपलंभादित्याशंक्याह तत्रेतितयोर्मध्यइत्यर्थः जन्मांतरीयसंन्यासस्यज्ञानोपकारित्वेगमकमाह जनकादीनामिति बृहदारण्यकश्रुत्यादिष्वित्यर्थः

प्रमाणान्तान्४॥

आतुरसंन्यासस्य४॥

गमकांतरमाह यदीति यदहरेव विरजेत्तदहरेव प्रव्रजेदिति वैराग्यहेतुकं संन्यासं सांगं कर्तव्यत्वेन विधाय दशाविशेषे यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदिति पूर्वविहितं वैराग्यहेतुकं संन्यासमनूद्येतरांगव्यावृत्तये विकल्पेन वाङ्मनसरूपसाधनद्वयं विधीयते मनसा वा वाचा वा संन्यसेदिति तदानीं मुमूर्षोः श्रवणाद्यसंभवेन तत्त्वज्ञानासंभवात् स च संन्यासो जन्मांतरे ज्ञाने उपकरोतीत्यंगीकर्तव्यं अन्यथा संन्यासस्य वैयर्थ्यं स्यादिति भावः नन्विदं ब्रह्मलोकसाधनं संन्यासांतरमस्तु न च तत्र प्रमाणाभावः संन्यासाद्ब्रह्मणः स्थानमिति स्मृतेः सत्वात् तथा च न वैयर्थ्यमित्याशंक्याह आतुरेपीति तथा च संन्यासाद्ब्रह्मणः स्थानमिति स्मृतिः तस्यैव नांतरीयकफलं प्रतिपादयति अथवा स्मार्तसंन्यासस्य तत्फलमस्तु प्रकृतस्य वैराग्यहेतुकस्य संन्यासस्य ज्ञानैकफलत्वादिति भावः विपक्षे दंडमाहात्म्यस्येति तत्र संमतिमाह तदुक्तमिति एवं संन्यासं सप्रपंचं निरूप्य साधनसंपन्नस्य संन्यासिनः श्रवणादिकं तत्त्वज्ञानहेतुः तस्यैवान्वयव्यतिरेकानुविधानादित्युपसंहरति त

यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदित्यातुरसंन्यासविधानाच्च आतुरेपि विरक्तस्यैवाधिकारात् न संन्यासांतरं अन्यथा प्रकरणविरोधप्रसंगात् तदुक्तं जन्मांतरेषु यदि साधनजातमासीत्संन्यासपूर्वकमिदं श्रवणादिकं च विद्यामवाप्स्यति जनः सकलोपि यत्र तत्राश्रमादिषु वसन्न निवारयामः इति तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकरणत्वमन्वयव्यतिरेकाभ्यां निश्चीयते अर्हार्थे श्रोतव्य इत्यादितव्यप्रत्यय इति वाचस्पतिमिश्राः॥ ११ देवमिति यस्मात्कारणात्साधनचतुष्टयसंपन्नस्य जिज्ञासोः श्रवणादिकं तत्त्वज्ञाने प्रत्यंतरंगसाधनं तत्तस्मात्कारणादित्यर्थः ननु तत्त्वज्ञानोद्देशेन श्रोतव्य इत्यादिना श्रवणादिविधिः किं न स्यादिति वाच्यं ——— विधेरप्राप्तविषयत्वात् यद्यपि साक्षात्कारं प्रति श्रवणादीनां कारणत्वं मानांतरेणाप्राप्तं तथापि षड्जादिस्वरसाक्षात्कारं प्रति गांधर्वशास्त्राभ्यासस्य कारणताग्रहकाले श्रवणत्वेन दुर्ज्ञेयवस्तुसाक्षात्कारत्वेनान्वयव्यतिरेकाभ्यां सामान्याकारेण कार्यकारणभावस्य निश्चितत्वात् ब्रह्मणोप्यतिसूक्ष्मतया दुर्ज्ञेयत्वात्तत्साक्षात्कारं प्रत्यपि श्रवणादीनामन्वयव्यतिरेकाभ्यां कारणत्वं प्राप्तमेवेति न तत्र विधिरिति भावः ननु श्रोतव्य इत्यादितव्यप्रत्ययानां का गतिरित्याशंक्याह अर्हार्थ इति नियमादृष्टसाध्यस्य परमापूर्वस्यासंभवेन नियमविध्यसंभवादर्हार्थे श्रोतव्य इत्यादितव्यप्रत्ययो युक्त इति वाचस्पतिमिश्राणामाशयः॥ ॥ ॥

विविदिषासंन्यासादन्योनातुरसंन्यासः८॥

अ॰ कौ॰
द्वि॰ प्र॰
५०

मतानंतरमाह आचार्यास्त्विति आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन चोच्यत इति श्लोकोक्तलक्षणः पंचपादिकाचार्यमतानुसारिणो विवरणाचार्यप्रभृतय आचार्याः इत्युच्यंते वक्ष्यमाणरीत्या एवं शब्दार्थमाह यथेति साधनचतुष्टयसंपन्नस्य जिज्ञासोः कृतसंन्यासस्येत्यर्थः यथा तुषनिवृत्तिमुद्दिश्य व्रीहीनवहंतीत्यवघातो विधीयते एवं द्रष्टव्य इति ब्रह्मसाक्षात्कारमुद्दिश्य श्रोतव्यो मंतव्यो निदिध्यासितव्यः तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेत्पांडित्यं बाल्यं च निर्विद्याथ मुनिः तद्विजिज्ञासस्वेत्यादिवाक्यैः सांगोपांगैः श्रवणनामांगी विधीयते यत्साक्षात्फलसाधनत्वेन श्रुतं तदंगी शेषी प्रधानमिति चोच्यते तत्संनिधौ फलं विना यत्कर्तव्यत्वेन श्रुतं तदंगं शेषः सहकारीत्यभिधीयते यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधिना दर्शपूर्णमासाग्नेयादयः षट् यागाः साक्षात्फलसाधनत्वेन विहितास्त एवांगिनस्तत्प्रकरणे व्रीहीन्प्रोक्षति समिधो यजतीत्यादिना प्रोक्षणादयः समिधादयश्च साक्षात्स्वर्गफलमंतरेण कर्तव्य

तस्मादधुनातनोपि ब्राह्म पंडाध्ययनजापानब्रह्मधीनद्वान्पंडितः तस्य कृत्यं पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन मननेन स्थातुमिच्छेत् ततद्द्वयं लब्ध्वाऽथ श्रवणमननानंतरं मुनिनिदिध्यासनं ॥४॥

आचार्यास्त्वेवं वर्णयंति यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवाक्यैर्दर्शनमुद्दिश्य मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां सह श्रवणनामांगी विधीयते ॥

110

ॐ त्वेन विहितास्तान्यंगानि फलवत्संनिधावफलं तदंगमिति न्यायात् तानि चांगानि द्विविधानि स्वरूपोपकारीणि फलोपकारीणि चेति तत्र प्रोक्षणादयः स्वरूपोपकारिणस्त एव संनिपत्योपकारिण इत्युच्यंते प्रयाजादयस्तु फलोपकारिण आरादुपकारिण इति भाष्यंते एवं प्रकृतेपि वेदांतश्रवणं प्रमाणविचारात्मकतया साक्षाद्ब्रह्मसाक्षात्कारफलसाधनत्वेन विहितत्वादंगी विवेकादिगुरूपसदनांतानि तत्संनिधौ विहितानि स्वरूपोपकार्यंगानि ज्ञानातिरिक्तफलाश्रवणान्मननादि फलोपकार्यंगं फलं विना तत्संनिधौ विहितत्वात् तथा च मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां श्रवणनामांगी विधीयते श्रोतव्यो निदिध्यासितव्य इति न च तद्विषये श्रूयमाणलिङादयोऽनियोज्यविषयत्वात्कुंठीभवंतीत्यादिना भाष्यकृता निराकृतत्वात्कथं श्रवणविधिरिति वाच्यं । ज्ञानविधिरेव तत्र निराकृतः ननु श्रवणादिविधि — स्तत्र प्रवृत्त्यभावप्रसंगात् न च फलेच्छया तत्र प्रवृत्तिरिति वाच्यं द्वैतात्मविचारे पुराणादिविचारे च प्रवृत्तिप्रसंगेन

रामः
५०

फलभूतसाक्षात्कारे श्रवणाद्यपेक्षयासहकार्यंतरस्यमौनस्यनिदिध्यासनाख्यस्यविधिः श्रवणमननद्वयापेक्षयातृतीयंनिदिध्यासनमेवात्रविधेयमित्यर्थः तद्वतः ब्रह्मपरोक्षवतःसंन्यासिनः ॥ १॥

द्वैतविचारेवेदांत विचारेचनियमेनतन्मुमुक्षोःप्रवृत्त्यभावप्रसंगात् तस्माच्छ्रवणादिविधिरपेक्षितः तदुक्तंभगवतासूत्रकारेण सहकार्यंतरविधिः पक्षेणतृतीयंत
द्वतोविध्यादिवदिति तत्रसहकारिध्यानविधिरेवतत्रस्वीकृतः नश्रवणादिविधिरिति वाच्यंप्रधानविध्यभावेसहकारिविध्ययोगात् तस्माच्छ्रवणंविधेयमेव पुरुष
प्रवर्त्तकोविधिः सचद्विविधः अभिधानविधिरभिधेयविधिश्चेति लिङादिघटितंवाक्यमभिधानविधिः सचतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिःप्रयो
गविधिश्चेति तत्रकर्मस्वरूपबोधकोविधिरुत्पत्तिविधिः सयथा अग्निहोत्रंजुहोति सोमेनयजेत इत्यादिश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानामन्यतमस
हायेनांगताबोधकोविधिर्विनियोगविधिः सयथा दध्नाजुहोति पशुनायजेतेत्यादिः उत्पन्नस्यकर्मणः फलसंबंधबोधकोविधिरधिकारविधिः सयथा अग्निहो
त्रंजुहुयात्स्वर्गकामः ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादिः सांगकर्मणाअनुष्ठापकोविधिः प्रयोगविधिः सयथा पौर्णमास्यांपौर्णमास्यांयजेत अमाव स्याया
ननुब्रह्मपरवाक्येकथंमौनविधिरित्याशंक्यदृष्टांतमाहविध्यादिवदिति यथादर्शपूर्णमासप्रधानपरेवाक्ये अन्वाधानादेरंगजातस्यविधिस्तद्वदिति॥शा॰॥सू॰५॥ ननुमूलवस्तुसाक्षात्कारेनिदिध्यासनस्यप्राप्तत्वा
त्त्वविधेयत्वमत आहपक्षेणेतियस्मिन्पक्षेभेद

तस्यचदृष्टफलत्वात्तन्नापूर्वविधिः अप्राप्तार्थविधायकोह्यपूर्वविधिः ॥ ६ ॥ ६ ॥दर्शनप्राप्तिस्तस्मिन्पक्षेप्राप्तभावाद्वि
धिरर्थवानित्यर्थः ६॥ २

इच्छाज्ञानयोः विषयदर्शनानंतरंस्वतउत्पन्नत्वात्॥२ कर्तव्यता४॥ मननादिनासह३॥०

ममावस्यायांयजेतेत्यादिः एवंप्रकृतेपितस्माद्ब्राह्मणः पांडित्यंनिर्विद्येत्यादिरुत्पत्तिविधिः मंतव्यइत्यादिविनियोगविधिः तद्विजिज्ञासस्वेत्यधिकारविधिः तथाहिस
न्नत्ययवाच्याया इच्छायाःप्रकृत्यर्थज्ञानस्यचकर्तुमशक्यतयासन्नत्ययेनानंतर्नीतंविचारंलक्षयित्वाप्रकृत्याफलीभूतज्ञानंचलक्षयित्वा द्वितीयब्रह्मज्ञानायतत्कर्त
व्यताविधीयतेब्रह्मसाक्षात्कारकामोवेदांतश्रवणंकुर्यादिति अतोयमधिकारविधिः साधनचतुष्टयसंपन्नोधिकारीजिज्ञासुःसंन्यासीसांगवेदांतश्रवणंकुर्यादिति
प्रयोगविधिः कल्प्यः कृतिसाध्यत्वेसतीष्टसाधनत्वमभिधेयविधिरयमेवलिङर्थः ——— ननुभावनाविनियोगोवाप्रमाणाभावादिति भावः॥ ननुश्रोतव्यइत्यादि
वाक्येश्रवणंविधिरित्युक्तंकिमयंव्रीहीन्प्रोक्षतीतिप्रोक्षणविधिवत् श्रवणविधिरपूर्वविधिराहोस्विद्व्रीहीनवहंतीत्यवघातविधिवन्नियमविधिरथवाइमामगृभ्णा
न्रशनामृतस्येत्यश्वाभिधानीमादत्तइतिगर्दभरसनाग्रहणव्यावृत्तिविधिवत्परिसंख्याविधिर्वानाद्यः श्रवणस्यदृष्टफलकत्वेनतद्योगात् अन्वयव्यतिरेकाभ्यांश्र

रुद्वेदशब्दोब्रह्माहमस्मीत्याकारकोनास्ति मुखेयेषांतेऽरुन्मुखास्तानरुन्मुखान् यतीनहंशालावृकेभ्यः कपिक्रोष्टुश्वभ्यः प्रायच्छं दत्तवानितिमघवानगदीदित्यर्थः॥ ३॥

वणस्यतत्त्वज्ञानसाधनत्वावगमेनदृष्टफलत्वं आप्ताप्राप्तार्थबोधकस्यैवापूर्वविधित्वेनश्रवणादेस्तथात्वाभावात् नद्वितीयः अवघातनियमाद्दृष्टसाध्यपरमापूर्ववच्छ्रवणानियमाद्दृष्टसाध्यस्याभावात् नचतत्त्वज्ञानमेवतत्साध्यमस्त्वितिवाच्यं अन्यत्रतथादृष्टत्वात् नतृतीयः उपनिषदेकगम्यतयाब्रह्मणस्तत्त्वज्ञानंप्रत्युभयप्राप्त्यभावात् भावेवाप्रत्यवायाभावप्रसंगात् नहिपंचनखभक्षणाभावेप्रत्यवायोहिश्रूयतेश्रूयतेचप्रकृतेप्रत्यवायः अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छमितिमास्तुश्रवणादौविधिरितिचेत्तर्हितत्रप्रवृत्त्यभावप्रसंगात्तस्मात्कोयमत्र विधिर्विवक्षित इत्याशंक्यप्राप्तत्वेनापूर्वविध्यसंभवंवदन्नियमादिकमाह॥ तस्येतिश्रवणादेरित्यर्थः दृष्टेति अन्वयव्यतिरेकसिद्धफलत्वादित्यर्थः तथाप्यपूर्वविधिःकुतोनसंभवतीत्याशंक्यतल्लक्षणलक्षितत्वाभावादितितदसंभवसंभवंवक्तुमपूर्वविधेर्लक्षणमाह अप्राप्तेतिमानांतरेणाप्राप्तस्यार्थस्यविधायकः कर्तव्यत्वेनबोधकोऽपूर्वविधिःकर्तव्यत्वबोधकोविधिरपूर्वविधिरित्युक्तेनियमादिविधावतिव्या

दृष्टान्तेः वहन्तीत्यादौपूर्वोक्तप्रकारेणनियमविधेर्दृष्टत्वादन्यत्रचादृष्टत्वादिति ५॥

किंतुनियमविधिर्वापरिसंख्याविधिर्वापक्षप्राप्तांशपूरकोविधिर्नियमविधिः यथाव्रीहीनवहन्यादित्यवघातविधिः॥ उभयप्राप्तावितरव्यावृत्तिबोधकोविधिःपरिसंख्याविधिः॥

२ प्तिरतउक्तंमानांतराप्राप्तेति तर्हिकोसौविधिर्विवक्षितइतिपृच्छतिकिंत्विति उत्तरमाह नियमेतिनियमविधेर्लक्षणमाह पक्षेति तुषनिवृत्तिंप्रतिएकस्मिन्पक्षेऽवघातःप्राप्तएकस्मिन्पक्षेनखविदलनादिः यदानखविदलनादिःप्राप्तस्तदाऽवघातोनप्राप्तस्तत्रतुषनिवृत्तिंप्रतिपक्षप्राप्तस्यावघातादेरप्राप्तांशंपूरयतिव्रीहीनवहंतीतिवाक्यं अवघातेनैवतुषनिवृत्तिःसंपादनीयेति तत्रार्थान्नखविदलनादिव्यावृत्तिः अप्राप्तांशपूरकोविधिर्नियमविधिरित्युक्ते अपूर्वविधावतिव्याप्तिस्तद्वारणायोक्तंपक्षप्राप्तेतितत्रोदाहरणमाह यथेति॥ परिसंख्याविधेर्लक्षणमाह उभयेति यथापंचपंचनखाःभक्ष्याइत्यत्ररागतःपंचनखापंचनखभक्षणयोरुभयोःप्राप्तौ अपंचनखभक्षणव्यावृत्तिंबोधयतिपंचपंचनखाःभक्ष्याइतिवाक्यंनतुपंचनखभक्षणंकर्तव्यत्वेनबोधयति तस्यरागतःप्राप्तत्वादितरव्यावृत्तिबोधकोविधिःपरिसंख्याविधिरित्युक्तेन कलंजंभक्षयेदित्यादिनिषेधवाक्येऽतिव्याप्तिरतस्तद्वारणायोक्तमुभयप्राप्ताविति

गीतालापांश्चवर्जयेदित्यादिवचनेनेति ॥६॥ अपूर्व२॥

वैदिकोदाहरणमाह यथेति अत्र मंत्रलिंगेन गर्दभरशनाऽश्वरशनयोर्ग्रहणप्राप्तावश्वाभिधानीमादत्त इति गर्दभरशनाग्रहणव्यावृत्तिर्विधीयते न त्वश्वरशनाग्रहणं विधीयते तस्य मंत्रलिंगप्राप्तत्वादतः परिसंख्याविधिः एतत्सर्वमभिप्रेत्योक्तं भट्टपादैः विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते इति नन्वस्त्वेवमन्यत्र प्रकृते किमायातमित्याशंक्याह एवमिति एवमुक्तरीत्या प्रकृते व्यवहारभूमौ ननु पक्षे साधनद्वयप्राप्तौ पक्षप्राप्तस्याप्राप्तांशपूरको विधिर्नियमविधिरित्युक्तत्वाद्ब्रह्मणो मानांतरागोचरत्वेन शास्त्रैकगम्यतया तज्ज्ञानं प्रति वेदांतव्यतिरिक्तसाधनांतराप्राप्तेः कथं नियमविधिः श्रवणादौ न च ब्रह्मज्ञानं प्रति पक्षे पुराणादिश्रवणस्य साधनतया प्राप्तौ नियमो युक्त इति वाच्यं अध्यात्मपुराणस्य वेदांतमूलतया तच्छ्रवणस्य साधनांतरत्वाभावात् न च पक्षे रागिगीतादिश्रवणस्य साधनत्वप्राप्तौ नियमो युक्त इति वाच्यं तस्य वचनांतरेण निवारितत्वात् न च द्वैतशास्त्रश्रवणस्य पक्षे साधनत्वप्राप्तौ स युक्त इति वाच्यं तस्य वि

वैशेषिकादेः१॥

यथेमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते इति गर्दभरशनाग्रहणव्यावृत्तिविधिः एवं प्रकृतेपि जिज्ञासुर्वेदांतश्रवणमेव कुर्यादिति नियमविधिः वेदांतश्रवणव्यतिरिक्तं न कुर्यादिति परिसंख्याविधिर्वा ॥

११ रूढत्वेनाद्वितीयब्रह्मज्ञानं प्रति साधनत्वायोगात् यतो वाचो निवर्त्तंते यन्मनसा न मनुते इत्यादिश्रुत्या ब्रह्मणो वेदांतव्यतिरिक्तवाङ्मनसयोरविषयत्वेन तज्ज्ञानं प्रति प्रत्यक्षादीनां साधनत्वाप्राप्तेश्च अत एव न परिसंख्याविधिस्तस्मान्नियमः परिसंख्या वेति विकल्पाश्रयणमनुपपन्नमिति मैवं वेदांतश्रवणवदध्यात्मपुराणादिश्रवणस्यापि ब्रह्मज्ञानं प्रति स्वातंत्र्येण साधनत्वप्राप्तौ श्रवणादौ नियमविधिरभ्युपगम्यते न चापूर्वविधिरेवास्तु किमनेन क्लेशेनेति वाच्यं श्रवणादेर्दृष्टफलत्वेन तदसंभवस्योक्तत्वात् नन्वन्यत्र नियमादृष्टस्य परमापूर्वोपयोगदर्शनात्प्रकृते तदभावात्तस्य कुत्रोपयोग इति शृणु तत्त्वज्ञाने तस्योपयोगः न च प्रमाणपरतंत्रस्य कथमदृष्टसाध्यत्वमिति वाच्यं साक्षात्तदभावेपि प्रतिबंधकनिवृत्तिद्वारा तदुपपत्तेः किंचान्यत्त्वमिदमुच्यते सर्वादृष्टसाध्यत्वाद्ब्रह्मसाक्षात्कारस्य न च तत्र प्रमाणाभावः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेन कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इत्यादिश्रुतिस्मृत्योः सत्वात् तस्माज्जिज्ञासुर्वेदांतश्रवणमेव कुर्यादिति नियमविधिरिति निरवद्यम् ॥ ६ ॥ ॥

कर्मफलप्रतिपादकाद्वेदानित्यर्थः॥६॥ वाक्ये ४॥

अ·कौ अतएवजिज्ञासुर्वेदांतश्रवणाव्यतिरिक्तंनकुर्यादितिपरिसंख्याविधिरपिसंभवति नचनियमपरिसंख्याविध्योः कोविशेषउभयत्रेतरव्यावृत्तेरविशेषादिति
दि·प्र वाच्यंनियमविधावितरव्यावृत्तिरार्थिकीपरिसंख्याविधौविधेयेतिविशेषः उक्तार्थेसंमतिमाह तदुक्तमिति अनात्मादर्शनेनानात्मदर्शनव्यावृत्त्याहंब्रह्मास्मी
५२ तिपरमात्मानमुपास्महे ध्यायामइत्यर्थः वस्तुतस्तुश्रवणादौनियमविधिरेवपरिसंख्याविधिर्वेत्यभ्युपगमवादतइतरथाऽकरणेप्रत्यवायश्रवणविरोध
प्रसंगादितिद्रष्टव्यं ननुश्रवणंविधीयतइत्युक्तंतत् किंकाम्यमुतनित्यं अहोनैमित्तिकंप्रायश्चित्तं वानाद्यः स्वर्गकामोयजेतेतिवद्विध्युद्देशेफलाश्रवणान्नच
रात्रिसत्रन्यायेनतत्कल्प्यमिति वाच्यंगृहस्थादीनांब्रह्मज्ञानकामनायाअसंभवात् प्रत्युतब्रह्मज्ञानादुद्वेगदर्शनात् अतएवरागिगीतमपिश्लोकमुदाहरति
अपिवृंदावनेशून्येशृगालत्वंसइछति नतुनिर्विषयंमोक्षंकदाचिदपिगौतमइति किंचवेदानिमंलोकममुंचपरित्यज्यात्मानमन्विछेदित्यादिश्रुत्यासाधनच

तदुक्तंनियमः परिसंख्यावाविध्यर्थोहिभवेद्यतः अनात्मादर्शनेनैवपरमात्मानमुपास्महे इतितच्चश्रवणंसंन्यासिनांनित्यं नित्यकर्मप
रित्यज्यवेदांतश्रवणंविना वर्तमानस्तुसंन्यासीपतत्येवनसंशयः१ इत्यकरणेप्रत्यवायश्रवणात् आसुप्तेरामृतेःकालंनयेद्वेदांतचिं
तयेतिस्मृत्या यावज्जीवमग्निहोत्रंजुहुयादित्यादि श्रुत्याजीवनंनिमित्तीकृत्याग्निहोत्रादिविधानवज्जीवनंनिमित्तीकृत्यश्रवणादिविधाना 112
त्त्वंपदार्थविवेकायसंन्यासः सर्वकर्मणांश्रुत्याभिधीयते॥ २१ तुष्टयसंपन्नस्यजिज्ञासोः संन्यासिनः श्रवणादिकर्तव्यतावगमेनगृहस्थादीनांतत्रान
धिकारात् अस्तुतर्हिसंन्यासिनामेतत्काम्यमितिचेन्नश्रवणादिरहितस्यसंन्यासिनः प्रत्यवायाभावप्रसंगात् नचेष्टापत्तिः अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायछं
नित्यंकर्मपरित्यज्येत्यादिश्रुतिस्मृतिविरोधप्रसंगात् तस्मान्नश्रवणादिकाम्यंनद्वितीयः अग्निहोत्रादिवत्कृत्याजीवनंनिमित्तीकृत्याविधानात् नतृतीयः गृहदाहा
दिवन्निमित्ताश्रवणात् नचरमः पापनिवृत्तिमुद्दिश्याविधानात् तरतिब्रह्महत्यांयोऽश्वमेधेनयजते उपचैनमेवंवेदेत्यादिवत् तस्याश्रवणात् तस्माच्छ्रवणादिविधा
नमनुपपन्नं इत्याशंक्यतस्यनित्यत्वकाम्यत्वयोः संभवाद्विधिरुपपद्यतइत्यभिप्रेत्याह तच्चेति॥ यथाचातुर्णामाश्रमाणामुपकुर्वाणस्यब्रह्मचारिणः काम्यत्वेपिगृह रामः
स्थाश्रमंप्राप्तस्याकरणेप्रत्यवायश्रवणात्जीवनंनिमित्तीकृत्यविधानाच्च अग्निहोत्रसोमयागसंध्यावंदनादिनित्यंएवंस्वीकृतसंन्यासाश्रमस्यपरमहंसस्यविविदि ५२

षोऽपि श्रवणादि नित्यं अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छं श्रवणायापि बहुभिर्यो न लभ्यः नित्यं कर्म परित्यज्य वेदांतश्रवणं विनेत्यादिश्रुतिस्मृतिषु संन्यासिनां श्रवणाद्यकरणे प्रत्यवायश्रवणात् आसुप्तेरित्यादिस्मृतिषु जीवननिमित्तीकृत्य विधानाच्च श्रवणादि नित्यं न च आसुप्तेरामृतेः कालं नयेद्वेदांतचिंतयेत्यादिस्मृतावेव जीवननिमित्तीकृत्य श्रवणं विधीयते न तु श्रुताविति वाच्यं न हूलेन तत्रापि तत्कल्पनासंभवात् न केवलं प्रत्यवायश्रवणाज्जीवननिमित्तविधिबलाभ्यामस्माभिरेव श्रवणनित्यत्वमभ्युपगम्यते किंत्वाचार्यैरंगीकृतं श्रवणादिरहितस्य पातित्याभिधानादित्याह त्वंपदार्थेति तत्त्वमसीत्यत्र त्वंपदस्य योऽयं वाच्यार्थः अंतःकरणविशिष्टचैतन्यं न हि विकार्यांतःकरणपरित्यागेन तदेकदेशलक्ष्यार्थप्रत्यक्चैतन्यज्ञानायेत्यर्थः सर्वकर्मणां नित्यादीनां विहितानामेनमेवेत्यादिश्रुत्या न त्यागी श्रवणादित्यागी व्यंजकस्येति श्रवणादेरित्यर्थः असौ संन्यासी ननु विवरणाचार्येण तत्त्वदीपनाचार्याभ्यां श्रवणविधेः काम्यत्वमुक्तं कः पुनरस्य प्रसंग इत्याक्षिप्य समाधानावसरे तत्कथमुपपद्यते इत्याशंक्य तस्य गृहस्थादिविषयत्वान्न काप्यनुपपत्तिरित्याह गृहस्थादीनामिति ननु गृहस्थादीनां साधनचतुष्ट-

काम्यत प्रागस्य
यस्मान्न त्यागी पतितो भवेत् १ कारकस्य करणेन न तत्क्षणाद्भिक्षुरेव पतितो यथा भवेत् व्यंजकस्य परिवर्जनादसौ सद्य एव पतितो न संशयः १

इति वार्तिकाचार्यसंक्षेपशारीरकाचार्याभ्यां श्रवणादिरहितस्य संन्यासिनः पातित्याभिधानाच्च गृहस्थादीनां श्रवणादि काम्यम् ॥ ८ ॥ ८ ॥

यसंपत्त्यभावाद्ब्रह्मजिज्ञासा न संभवतीत्युक्तं सत्यमुक्तं अत्यंतबहिर्मुखानामसंभवेपि केषांचित्परमेश्वरानुगृहीतानां फलासक्तिरहितकर्मानुष्ठायिनां साधनसंपत्त्या ब्रह्मजिज्ञासासंभवत्येव निमित्तांतरप्रतिबंधेन संन्यासाश्रमस्वीकाराभावेपि श्रवणादौ प्रवृत्तिरुपपद्यते तेषां श्रवणविधिः काम्योऽन्यथा गृहस्थाश्रमादावुत्पन्नब्रह्मसाक्षात्काराणां जीवन्मुक्तिमुद्दिश्य विद्वत्संन्यासविधानं कथं स्यात् न च विद्वत्संन्यास एव नास्तीति वक्तुं शक्यं प्रमाणबलेन विविदिषाविद्वत्संन्यासयोर्निरूपितत्वात् किंच विविदिषासंन्यासे जिज्ञासुरधिकारी उत्पन्नसाक्षात्कारो विद्वत्संन्यासे यथा विविदिषासंन्यासस्य तत्त्वज्ञानं फलं तथा विद्वत्संन्यासस्य जीवन्मुक्तिर्यथा तत्त्वज्ञानसाधनं श्रवणादिर्विविदिषासंन्यासिनानुष्ठेयः तथा जीवन्मुक्तिसाधनं वासनाक्षयाद्यभ्यासः विद्वत्संन्यासिनेत्यधिकारिफलानुष्ठेयानां भेदात् विविदिषाविद्वत्संन्यासयोर्महान्भेदोस्त्येव॥ ९ ॥ ९ ॥

वेदान्तेष्वधिकारितेत्यर्थः॥५॥

न च जीवन्मुक्तिरेव नास्ति प्रमाणाभावादिति वाच्यं स्वानुभवश्रुतिस्मृतीतिहासपुराणानां सत्त्वात्तच्चोत्तरत्र व्युत्पादयिष्यति उक्तं च जीवन्मुक्तिस्तावदस्ति प्रतीतेर्द्वैतच्छायानत्र चास्ति प्रतीतेः द्वैतच्छायारक्षणायास्ति लेशः अस्मिन्नर्थे स्वानुभूतिः प्रमाणमिति १ तस्माद्गृहाश्रमादावुत्पन्नतत्त्वसाक्षात्कारिणां विद्वत्संन्यासविधानानुरोधेन गृहस्थादीनामेव श्रवणविधिः काम्य इति विवरणाचार्य तत्त्वदीपनाचार्ययोस्तात्पर्यं द्रष्टव्यं गृहस्थादीनां श्रवणविधेः काम्यत्वे गमकमाह दिने दिन इति ननु विवरणाचार्यैस्तृतीयवर्णके संन्यासस्य श्रवणांगत्वमभिधीयते तथा च वार्तिकाचार्यैरपि त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः॥ जिज्ञासोरेव चैकात्म्यं त्रय्यन्तेष्वधिकारिता॥२॥ सर्वकर्मपरित्यागात्संत्यक्ताशेषसाधनात् श्रुत्युक्तोक्तपरिव्राट्स्यादैकात्म्यज्ञानजन्मने १ इत्यादिभिः तच्च भाष्यकारैरपि ब्रह्मसंस्थोऽमृतत्वमेतीत्यत्र संन्यासिनामेव ब्रह्मनिष्ठायामधिकार इति श्रुत्यापि॥ अतः संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः॥ हित्वाऽविद्यां धियै-

दिने दिने तु वेदांतश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् इति फलश्रवणात्॥ अन्ये तु वेदांतश्रवणे साधनचतुष्टयसंपन्नस्यैवाधिकारात् गृहस्थादेः श्रवणाधिकार एव नास्ति श्रुतिषु याज्ञवल्क्यजनकप्रभृतीनां तत्त्वज्ञानप्रतिपादकोपाख्यानस्य ब्रह्मात्मनि तात्पर्यात्स्वार्थे तात्पर्यमेव नास्तीत्याहुः॥ तदसत् याज्ञवल्क्यप्रभृतीनां गृहस्थस्य तुलाधारस्य च ज्ञानित्वस्मरणात् परवैराग्यं गुणवैतृष्ण्यं गुणेषु जिहासेति यावत् तदुक्तं तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति॥ तच्चासंप्रज्ञातसमाधेरंतरंगसाधनं उक्तं च तीव्रसंवेगानामासन्नः समाधिलाभ इति अलमतिप्रसंगेन॥

वैयात् तद्विष्णोः परमं पदं १ वेदान्तिमं लोकममुं च परित्यज्यात्मानमन्विच्छेदित्याद्यया ततश्च गृहस्थादीनां श्रवणाधिकार एव नास्ति तस्माद्गृहस्थादीनां श्रवणादि काम्यं संन्यासिनां नित्यमित्यसंगतमिति चेत्तर्हि संन्यासिनामेव श्रवणादि नित्यं काम्यं च भवतु यथा गृहस्थस्याग्निहोत्रादि नित्यं काम्यं च भवति तद्वत्पूर्वोक्तयुक्त्यैव श्रवणादीनां नित्यत्वं काम्यत्वं च तथा च न विवरणविरोधः नापि वार्तिकाचार्यादिवचनविरोध इत्यभिप्रेत्य मतांतरमाह अन्ये त्विति वैराग्यतारतम्येन संन्यासभेदनिरूपणप्रसंगात् श्रवणादिविधिं सप्रपंचं निरूप्य क्रमप्राप्तं परं वैराग्यं निरूपयति परं वैराग्यमिति उक्तार्थे पतंजलिसूत्रं संवादयति तदुक्तमिति प्रासंगिकं परिसमापयत्यलमिति॥ ६ ॥ ६ ॥

अन्वयानुपपत्तेःवीजत्वेन३॥ अननुगतस्य५॥

उक्तन्यायमन्यत्राप्यतिदिशति एवमिति ननूपक्रमादिभिर्वेदवाक्यानां तात्पर्यनिर्णयेपि लौकिकवाक्यानां कुतः तात्पर्यनिर्णय इत्यत आह प्रकरणादिनेति लिंगादिकमादिशब्दार्थः एवं तात्पर्यं सप्रपंचं निरूप्य प्रसंगात्पूर्वोक्तलक्षणाया वीजं दर्शयति एतादृशेति नन्वन्वयानुपपत्तिरेव लक्षणावीजमस्तु गंगायां घोष इत्यत्र तस्यास्तथात्वेन दृष्टत्वादित्याशंक्याह नन्विति प्रतिज्ञातेर्थे हेतुमाह तस्या इति यद्यन्वयानुपपत्तिर्लक्षणावीजं तर्हि यष्टीः प्रवेशयेत्यत्र यष्टीनां प्रवेशान्वययोग्यतायां तदनुपपत्तेरभावेन लक्षणा न स्याद्दृष्टा तु सा लक्षणावीजमिति भावः नन्वत्र तात्पर्यानुपपत्तिर्लक्षणावीजमस्तु अन्यत्रान्वयानुपपत्तिः न चाननुगमः अननुगताऽलाभेन तस्याप्याश्रयणीयत्वादित्याशंक्य तात्पर्यानुपपत्तेः सर्वत्रानुगतत्वेन लक्षणावीजमंगीकर्तव्यमित्याह गंगायामिति आदिशब्देन शोणो धावतीत्यादि गृह्यते एवं लक्षणावीजं निरूप्य लक्षणा पदमात्रवृत्तिस्तस्य शक्तत्वादिति नैयायिकास्तान्निराकर्तुमाह न केवलमिति ननु वाक्यस्याशक्तत्वात्कथं वा

एवं कर्मवाक्यानामप्युपक्रमादिभिस्तात्पर्यनिर्णयः प्रकरणादिना लौकिकवाक्यानां तात्पर्यनिर्णयः एतादृशतात्पर्यानुपपत्तिः पूर्वोक्तलक्षणावीजं न त्वन्वयानुपपत्तिः तस्या अन्वयः यष्टीः प्रवेशयेत्यादौ असंभवात् गंगायां घोष इत्यादौ तात्पर्यानुपपत्तेः संभवात् न केवलं लक्षणा पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरपि गंभीरायां नद्यां घोष इत्यादौ पदसमुदायात्मकवाक्यस्य तीरे लक्षणास्वीकारात् अत एवार्थवादवाक्यानां प्राशस्त्ये लक्षणा॥ अन्यथा पदान्तरवैयर्थ्यं स्यात् अत एव प्राशस्त्यपदार्थप्रत्यायकत्वेनार्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वं॥ ९॥

क्यवृत्तिर्लक्षणा स्याच्छक्यसंबंधस्यैव लक्षणात्वात् उच्यते १पदस यथा शक्तिज्ञाप्यः पदार्थस्तथा वाक्यार्थोपीति लक्षणा वाक्यवृत्तिरपि भवत्येव पदानामितरान्विते पदार्थे सामर्थ्यावधारणात्तदन्वयांशे समुदायशक्त्यभावेपि प्रातिस्विकशक्तेः सत्वाद्वाक्यस्यापि शक्यसंबंधसंभवाल्लक्षणोपपद्यते केषां तर्हि वाक्ये लक्षणास्वीकार इत्यत आह गंभीरायामिति ननु नदीपदमेव लक्षकं गंभीरपदं तात्पर्यग्राहकमित्युपपत्तेः वाक्ये लक्षणांगीकरणं मुधेति वाच्यं प्रकरणादिना तात्पर्यग्रहसंभवेन पदान्तरवैयर्थ्याद्वाक्ये लक्षणांगीकरणमर्थवदिति भावः तत्रोपोद्बलकमाह अत एवेति यतो वाक्ये लक्षणा स्वीकृता अत एव तस्यार्थः स्तावकवाक्यं अर्थवादः स्तवः स्तुतिः सा च गुणिनि गुणसंकीर्तनं प्राशस्त्य इति स्तुतावित्यर्थः विपक्षे दंडमाहान्यथेति एवं चार्थवादवाक्यानां प्राशस्त्ये लक्षणास्वीकारे पदैकवाक्यत्वं सिद्धमित्याह अत एवेति केषां तर्हि वाक्यैकवाक्यता इत्याकांक्षायामाह स्वार्थेति उपकार्यांगी उप

स्तुत्यनंगीकारे६॥ एकैकस्य४ विधिवाक्येन सह६॥

तस्मिन्कल्पितत्वात्५॥

कारकमंगं तदुक्तं स्वार्थबोधे समाप्तानामंगांगित्वाद्यपेक्षया वाक्यानामैक्यवाक्यत्वं मिथः संहत्य जायत इति नन्वस्तु वाक्यैक्यवाक्यत्वं ततः किमित्यत आह एवं चेति नन्वत्र प्रमाणाभाव इत्याह तथेति परमप्रकृतमुपसंहरति एवमिति शक्तिग्रह आकांक्षाज्ञानं योग्यताज्ञानं आसत्तिस्तात्पर्यज्ञानं अवांतरवाक्यार्थज्ञानं चेत्येते यथोक्तसहकारिणस्तैः संपन्नमित्यर्थः वाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमामुत्पादयति इत्युक्तं तदसंगतमदर्शनादित्याशंक्य तदुपपादयति तत्रेति परोक्षार्थस्य धर्माधर्मादेः प्रतिपादकं किमिदं परोक्षत्वमर्थस्येत्याशंक्याह परोक्षत्वं नामेति विषयस्यानावृत्तसंवित्तादात्म्याभावः परोक्षत्वमित्युक्ते धर्माधर्मयोः परोक्षत्वं न स्यादत उक्तं योग्यस्येति धर्माधर्मयोः संवित्तादात्म्यसत्त्वेप्ययोग्यत्वात्परोक्षत्वमित्यर्थः योग्येति विशेषणव्यावर्त्यमाह धर्मेति परोक्षार्थविषयत्वं प्रमायाः परोक्षत्वं विषयचै

१अंगवा २अंगीवाः

स्वार्थे तात्पर्यवतां समिधो यजति दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानामुपकार्योपकारकाकांक्षायां ऐक्यवाक्यत्वं वाक्यैकवाक्यत्वं एवं

३अंगवा ४अंगीवाक्यार्थं

चावांतरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणं तथान्वयव्यतिरेकानुविधानात् एवं च यथोक्तसहकारिसंपन्नं वाक्यं परोक्षापरोक्षभेदेन द्विधां प्रमामुत्पादयति तत्र परोक्षार्थप्रतिपादकं वाक्यं परोक्षप्रमोत्पादकं यथा स्वर्गकामो यजेत् सदेव सौम्येदमग्र आसीत् दशमोस्तीत्यादिवाक्यं परोक्षत्वं नाम अनावृत्तसंवित्तादात्म्याभावो योग्यस्य विषयस्य धर्माधर्मयोरयोग्यत्वान्न प्रत्यक्षत्वं अपरोक्षार्थप्रतिपादकं वाक्यं अपरोक्षप्रमोत्पादकं यथा दशमस्त्वमसीति तत्त्वमसीत्यादि वाक्यं अपरोक्षत्वं नाम अनावृत्तसंवित्तादात्म्यम् ॥

साक्षि२

२२ तन्वभिन्नत्वं वाद्दृष्टव्यं किं तर्ह्यपरोक्षप्रमोत्पादकमित्याशंक्याह अपरोक्षेति अपरोक्षत्वमर्थस्य निर्वक्ति अपरोक्षत्वं नामेति ननु धर्माधर्मयोरनावृत्तसंवित्तादात्म्यादपरोक्षत्वापत्तिरिति वाच्यं तयोरयोग्यत्वादत एवात्रापि योग्यस्य विषयस्यानावृत्तसंवित्तादात्म्यमिति विशेषणीयं ननु शब्दादीनां घटादीनां च जडत्वात्कथमनावृत्तसंवित्तादात्म्यं चेतनेनाचेतनयोस्तादात्म्यायोग्यत्वात् किंच भवतां मते संविदोद्वितीयत्वेनानावृतत्वे कृत्स्नस्य प्रपंचस्य तत्कार्यत्वेन तादात्म्यसंभवेन सर्वदा प्रत्यक्षत्वापत्तिः अपि च संवित्तादात्म्यं प्रत्यक्षत्वमित्येवास्तु तस्याः स्वतो नित्यापरोक्षत्वेन विषयभानसंभवादनावृत्तेति विशेषणं व्यर्थं आवृतस्य संविदंतरस्याप्रसिद्धत्वात् संविदावृतत्वाभ्युपगमे जगदांध्यप्रसंगात्तर्ह्येतावदेवास्त्विति चेन्न उक्तदोषानपायात् तस्मादिंद्रियजन्यज्ञानविषयत्वं विषयस्यापरोक्षत्वं तद्भिन्नत्वं परोक्षत्वमिति अत्र ब्रूमः अनावृत्ततादात्म्यमेव विषयस्यापरोक्षत्व

उपादानोपादेययोर्जडाजडयोस्तादात्म्येन प्रपंचस्य सर्वदा प्रत्यक्षत्वापत्तिः १॥

प्रमाणचैतन्यात्६॥

अनावृत्तविशेषणं व्यर्थं स्यात् ॥२॥

अवच्छेदकम् ३॥ करणत्वायोगात् ४॥ अव्यवधानेन स्वस्यापेक्षायाऽऽत्माश्रयः॥२॥ स्थूलं८॥

मभ्युपगंतव्यं न त्विंद्रियजन्यज्ञानविषयत्वं इंद्रियजन्यत्वस्य ज्ञाने जन्यतावच्छेदकग्रहमंतरेण तद्दुर्ग्रहत्वात् न च साक्षात्त्वमेव सदवच्छेदकमिति वाच्यं तस्या निर्वचनात् न चेंद्रियत्वेनेंद्रियजन्यज्ञानत्वं तदिति वाच्यं आत्माश्रयापत्तेः इंद्रियस्यातींद्रियत्वेन तद्घटितसाक्षात्त्वस्यापि तथात्वेन साक्षात्करोमीत्यनुभवाविषयत्वप्रसंगाच्च न च ज्ञानाकरणकज्ञानत्वं तदिति वाच्यं मनःकरणकानुमितिपक्षे तत्रातिव्याप्तेः न च तस्य निराकरणात्तान्नोक्तदोष इति वाच्यं परामर्शस्य व्यापाराभावेनानुमितिकरणत्वायोगात् द्वितीयज्ञानस्य नष्टत्वेन तदयोगात् व्याप्तिज्ञानस्य विशकलितस्थले व्यभिचारेण तदयोगाच्च अतः परिशेषादनुमितेः मनःकरणकत्वस्यावश्यकत्वात् तत्रातिव्याप्तिर्वज्रलेपायिता कथं तर्हि सिद्धांते व्याप्तिज्ञानस्यानुमितिकरणत्वं विशकलितस्थले व्यभिचारात् तस्माद्विशकलितस्थले पक्षवृत्तिहेतोस्तदुभयवैशिष्ट्यभानादनुमितिर्भवतीत्यत्र मानाभावात् सर्वत्र व्याप्तिज्ञानमेवानुमितिकरणमन्यथा सिद्धांतविरोधप्रसंगात् ततश्च कुत्रातिव्याप्तिरिति चेत्सत्यं तत्त्वसाक्षात्कारे श्रवणादीनां व्यापारवत्त्वेन करणतयाऽव्याप्तेर्दुष्परिहरत्वादतो न ज्ञानाकरणकज्ञानत्वं साक्षात्त्वं नापि साक्षात्त्वं जातिः अविद्यानिरुक्तिजडज्ञाने निरस्तत्वात् किंचेश्वरज्ञानस्य भवन्मतेऽप्रत्यक्षत्वापत्तेश्च तस्येंद्रियजन्यज्ञानाविषयत्वादीश्वरस्य शरीरेंद्रियादेरनंगीकारादन्यथा न तस्य कार्यं कारणं च विद्यत इति श्रुतिविरोधप्रसंगादस्मदादींद्रियस्य तत्रासामर्थ्यात् तस्मादिंद्रियजन्यज्ञानविषयत्वमपरोक्षत्वं तद्भिन्नत्वं परोक्षत्वमिति यदुक्तं तन्मनोरथमात्रं किं तर्ह्यपरोक्षत्वं विषयस्येति चेदुक्तमेव गृहाण स्वरूपेण संविदैक्यात्तस्याः नित्यापरोक्षत्वेऽप्यौपाधिकभेदाभ्युपगमेन कार्यबलादंतःकरणोपहितचैतन्यमनावृत्तं घटाद्यधिष्ठानचैतन्यमावृतमिति गम्यते घटादिष्वनवभाससंशयविपर्यासदर्शनादंतःकरणोपहिते तदभावादेवं च सर्वदा न सर्वप्रत्यक्षतापत्तिः न तदाकारवृत्तिदशायां तु विषयावरणनिवृत्तिसंभवाद्विषयचैतन्यप्रमातृसाक्षिणामेकोपाध्यवच्छेदेनैक्यादंतःकरणादिवद् घटादिकमपि साक्षिण्यध्यस्तमेवेति घटादेरनावृत्तसंवित्तादात्म्यात्प्रत्यक्षत्वं तत्तदाकारवृत्तिविरहदशायां तु तदभावान्न प्रत्यक्षत्वं नन्वेवं सति परोक्षस्थलेऽपि तत्तदाकारवृत्तिदशायां तु वह्न्यादेरपि प्रत्यक्षत्वापत्तिः न तत्रेंद्रियसन्निकर्षाभावादिंद्रियद्वारा बहिर्निर्गतांतःकरणस्य विषयसंबंधेन तदाकारवृत्त्या तन्निष्ठावरणनिवृत्त्या विषयप्रत्यक्षत्वाभ्युपगमेन परोक्षस्थले संनिकर्षाभावेन मनसो बहिरस्वतंत्रतया बहिर्गमनाभावेन विषयासंबंधात्तत्तदाकारवृत्तिदशायां न वह्न्यादेः प्रत्यक्षत्वापत्तिः कथं पुनर्वह्न्यादेर्भानमिति शृणु अंतःकरणोपहितचैतन्यस्य वह्न्याद्यधिष्ठानचैतन्यस्य च वास्तवैक्याल्लिंगज्ञानादिना तत्तदाकारवृत्त्याऽसत्त्वापादकमोढ्याज्ञाननिवृत्त्या वह्निरस्तीति परोक्षतया वह्न्यादेर्भा

लिंगशरीरं च८॥ चेत३॥ ज्ञानसर्व॥ तादात्म्य४॥ अंतरैव५॥

विशेषणस्य२॥ जडस्य घटादेः साक्षिचैतन्यधर्मीयोगान्दे॥ साक्षि५॥ घटादिः ५॥

अ·कौ· द्वि·प्र· ५५

नंनापरोक्षतया अत एव बहिरस्तीत्यनुभवो नान्वयमिति एतेन संविद ———— स्वभावैक्याद् परोक्षत्वेन तत्तादात्म्यमेव तत्प्रयोजकमस्तु अनावृतेनेति विशेषणं व्यर्थमिति प्रत्युक्तं औपाधिकभेदप्रतिपादनेन तदर्थवैत्वस्योक्तत्वाज्जडाजडयोर्वास्तव अवास्तवयोस्तादात्म्यासंभवेप्यवास्तवस्य वास्तवेन तादृशतादात्म्यवाधकाभावात्तस्याद्योग्यस्याविषयस्यानावृतसंवित्तादात्म्यमपरोक्षत्वमिति निरवद्यम् केयमनावृतसंविदित्याकांक्षायामाह अनावृतेनेति कोयं साक्षीत्याकांक्षायामाह अंतःकरणेति स च नित्यः नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादिति श्रुतेः प्रातरारभ्य प्रहरमिदमद्राक्षमिति परामर्शात्साक्षिसिद्धिरिति भावः ननु साक्षिचैतन्यमप्यावृतमस्तु को दोष इत्याशंक्याह तस्येति ननु घटादीनां किमिदं संवित्तादात्म्यं तन्निष्ठासाधारणधर्मो वा स चासावात्मा तदात्मा तदात्मनो भावस्तादात्म्यमैक्यमित्यर्थो वा भेदसहिष्णुरभेदस्तादात्म्यमित्यर्थो वा नाद्यः जडस्य तदयोगान्न द्वितीयः जडाजडयोस्तमःप्रकाशवद्विरुद्धत्वेनैक्यस्य दूरनिरस्तत्वात् न तृतीयः समानस

अनावृतसंवित्साक्षिचैतन्यं अंतःकरणोपहितं चैतन्यं साक्षी तस्यावृतत्वे जगदांध्यप्रसंगः तत्तादात्म्यं नाम तद्भिन्नत्वे सति तदभिन्नसत्ताकत्वं तयाचद्दशमस्त्वमसीत्यत्र दशमस्य त्वंपदार्थाभिन्नतयाऽपरोक्षत्वेन वाक्याद्दशमापरोक्षप्रमैव जायते दशमोस्मीति ननु वाक्यात्परोक्षज्ञानं मनसा तत्साक्षात्कारो मनसोऽनिंद्रियत्वस्योक्तत्वात्॥ ९९

त्ताकयोर्भेदाभेदयोर्विरुद्धत्वेन तदयोगादित्याशंक्य घटादेः कल्पितत्वेन साक्षिसत्तातिरिक्तसत्ताशून्यत्वमेव तत्तादात्म्यं विवक्षितमित्यभिप्रेत्याह तदिति नन्वेवमर्थस्यानावृतसंवित्तादात्म्यमपरोक्षत्वं भवतु तथापि तत्प्रतिपादिकवाक्यस्य कथमपरोक्षप्रमोत्पादकत्वं गामानयेत्यादिवाक्यानां परोक्षप्रमाजनकत्वस्यैव दृष्टत्वादित्याशंक्याह तथा चेति गोकर्मकानयनसंसर्गस्यानावृतसंवित्तादात्म्याभावेन परोक्षत्वाद्वाक्यस्य परोक्षप्रमाजनकत्वेपि दशमस्त्वमसीत्यत्र दशमस्य त्वंपदार्थाभिन्नतया तद्वैपरीत्याद्वाक्यस्यापरोक्षप्रमाजनकत्वमुपपद्यते इतरथा अपरोक्षे वस्तुनि परोक्षप्रमाजनकं वाक्यमप्रमाणं स्यादित्यर्थः नन्वेवमपि वाक्यस्य परोक्षप्रमाजनकत्वस्वाभाव्याद्दशमस्त्वमसीति वाक्यात्प्रथमं परोक्षमेव ज्ञानं जायतेऽनंतरं मनसा दशमत्वसाक्षात्कारः आत्मतद्धर्मसाक्षात्कारस्य करणजन्यत्वस्यावश्यकत्वेन चक्षुरादीनां तत्रासामर्थ्यात्परिशेषादन्वयव्यतिरेकाभ्यां मन एव तत्र करणं अन्यथा सुखादिसाक्षात्कारस्याप्रमात्वापत्तेः किंच परोक्षप्रमाजनकस्वभावस्य यद्यपरोक्षप्रमाजनकत्वं कल्प्यते तर्हि कुटजबीजाद्वटांकुरोत्पत्तिरपि कल्प्येत तस्मान्मनसैव दशमत्वसाक्षात्कारः न वाक्यादित्या

115

रामः ५५

इदृयवफललना१॥

अंतरिंद्रियवहिरिंद्रियभावेन ३॥

शंकां निराकरोति नन्विति सुखादिसाक्षात्कारकरणत्वेन मनस इंद्रियत्वे सिद्धे वाक्यात्परोक्षज्ञानं मनसा साक्षात्कार इति वक्तुं शक्येन तत्पूर्वमेव निरस्तमित्याह मनस इति इंद्रियेभ्यः परं मन इति प्रथक्करणान्मनो नेंद्रियमित्युक्तं प्रत्यक्षनिरूपणावसरे इति भावः॥ ननु सुखाद्युपलब्धिरिंद्रियकरणिका जीवाश्रयापरोक्षप्रमात्वात् रूपोपलब्धिवदित्यनुमानेनेंद्रियाणि दशैकं चेत्यादिस्मृत्या च मनस इंद्रियत्वसिद्धेः कथमनिंद्रियत्वोक्तिः प्रथक्करणस्यान्यथाप्युपपत्तेरिति चेन्न तत्सुखाद्युपलब्धेर्नित्यसाक्षिस्वरूपतया सकरणिकत्वासिद्धेः ननु सुखादिसाक्षात्कारस्य नित्यसाक्षिस्वरूपतया दुःखज्ञानं नष्टं सुखज्ञानमुत्पन्नमित्यनुभवस्य विरोधः स्यादिति वाच्यं साक्षिणो नाशाभावेपि सुखादिविषयनाशात्तदुपपत्तेः नहि सुखादिविषये सति नतत् ज्ञानोत्पत्तिविनाशौ कश्चिदनुभवति स्मृतिस्त्वन्यथापि भविष्यति नन्वेवमप्यात्मसाक्षात्कारकरणत्वेनेंद्रियत्वं मनस इति वाच्यं निरुपाधिकात्मनो वाङ्मनसयोरविषयातयात्साक्षात्कारत्वस्य तत्कारणत्वायोगात् अस्तु तर्हि सोपाधिकात्मसाक्षात्कारे तत्करणमित्याशंक्याह वृत्तिमिति निमित्तकारणस्य कुठारादेः करणत्वदर्शनादुपादानस्य मृदादेस्तददर्शनात् वृत्त्युपादानस्य मनसः करणत्वम

**वृत्तिं प्रत्युपादानत्वेन करणत्वायोगाच्च प्रमाणजन्याऽपरोक्षज्ञानस्यैव भ्रमनिवर्तकत्वाच्च एवं तत्त्वमसीत्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणस्त्वंपदलक्ष्यसाक्ष्यभिन्नतयाऽनावृतसंवित्तादात्म्यात्॥ २२**

युक्तं कामः संकल्पो विचिकित्सेत्यादिश्रुत्या वृत्त्युपादानत्वं मनसोऽवगम्यत इति किंचालोकादिवत्प्रमाणसहकारित्वेन मनसः प्रथक्प्रमाणत्वमनुपपन्नमेवेति अपि च पृथक् विषयाभावादपि न तत्संभवति नहि चक्षुरादेरिव मनसः पृथक् विषयोऽस्त्यंतःकरणतद्धर्माणां साक्षिभास्यत्वात् तदुक्तं प्रमाणसहकारित्वाद्विषयस्याप्यभावतः न प्रमाणं मनोऽस्माकं प्रमादेराश्रयत्वत इति किंचात्ममनसोः संनिकर्षाऽनिरूपणान्न तत्साक्षात्कारकरणत्वं मनस इति भावः ननु माभून्मनसः प्रमाणत्वं तेन न ब्रह्मसाक्षात्कारो भवतु को दोष इत्याशंक्याह प्रमाणेति अपरोक्षभ्रमनिवर्तकत्वादित्यर्थः एवं दृष्टांतेन वाक्यस्यापरोक्षप्रमाजनकत्वमुपपाद्य दार्ष्टांतिके तस्य तदुपपादयति एवमिति तत्त्वमस्यादिवाक्यादपरोक्षप्रमा जायत इति स

---

अंतःकरणादिर्मनसो विषय इति चेन्न ३॥ सुरेश्वरैः ३ ॥ स्वधः ॥ ५॥ ६॥ कारणत्वात् ३

ननुश्रवणरहितस्यासंभावनादिग्रस्तत्वात्कथंवाक्यादपरोक्षप्रमेत्याशंक्याह विचारितेति तथापिकथंविषयप्रवणचित्तस्यचित्तैकाग्र्यशून्यस्यवाक्यात्सेत्यत आह मननेति श्रवणेनमानगतासंभावनायांमननेनमेयगतासंभावनायांनिदिध्यासनेनविपरीतभावनायांनिवृत्तायांनिर्मलचित्तदर्पणसहकृतवाक्यात्साजायतइत्यर्थः नन्वेवमपिसाधनचतुष्टयसंपत्तिशून्यस्याविवेकिनोयथोक्तवाक्यात्कथंसास्यादित्यत आह शोधितत्वंपदार्थस्येति अधिकारिणःसाधनचतुष्टयसंपन्नस्येत्यर्थः ननुब्रह्मणोऽतींद्रियताधर्मादिवत्परोक्षत्वेनकथंवाक्यादपरोक्षप्रमास्यात्तत्राह नित्यापरोक्षत्वेनेति यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुत्याब्रह्मणोनित्यापरोक्षतयावाक्यात्तदपरोक्षप्रमाभवत्येवेत्यर्थः ननुब्रह्मणोजगत्कर्तृत्वेनतटस्थतयाश्रुत्यापिकथंतदपरोक्षत्वमवगंतुंशक्यमित्याशंक्यवाच्यार्थस्यतथात्वेपिलक्ष्यस्याखण्डचैतन्यस्वप्रत्यग्रूपतयातटस्थाभावेनश्रुत्यातदपरोक्षत्वंप्रतिपादयितुंशक्यतएवेत्यभिप्रेत्याहतदिति अनावृतसंवित्स्वरूपत्वादे

अपरोक्षत्वाभावेपि १॥

नित्यापरोक्षत्वेनशोधितत्वंपदार्थस्याधिकारिणोमनननिदिध्यासनसंस्कृतांतःकरणसहकृतविचारिततत्त्वमस्यादिवाक्यादहंब्रह्मास्मीत्यपरोक्षप्रमाजायते एवंचसतिसर्वेवेदायत्पदमामनंतितंत्वौपनिषदंपुरुषंपृच्छामीति नावेदविन्मनुतेतंबृहंतमित्यादिश्रुतयःसामंजस्येनोपपद्यंते ।

२२ वेत्यर्थः एवंतत्त्वमस्यादिवाक्याद्ब्रह्मापरोक्षप्रमोत्पत्त्यभ्युपगमे शास्त्रदृष्ट्यातूपदेशोवामदेववदितिसूत्रंतंत्वौपनिषदमित्यादिश्रुतिवाक्यंवनाननुकूलंभवतीत्याह एवंचसतीति ननुवाक्यादपरोक्षप्रमोत्पत्त्यभ्युपगमेमनसैवानुद्रष्टव्यमित्यादिश्रुतिविरोधःस्यात्तत्रतृतीयाविभक्त्यामनसःकरणत्वावगमात् नचसासहकारित्वप्रतिपादनपरेति वाच्यंतर्हितंत्वौपनिषदमित्यादिश्रुतिरपिवाक्यस्यमनःसहकारित्वप्रतिपादनपराकिंनस्यात् न्यायस्यतुल्यत्वात् नचयन्मनसानमनुतेइत्यादिश्रुत्या———— मनसःकरणत्वप्रतिषेधाद्वाक्यसहकारित्वं ¯ मतमिति वाच्यंतर्हियद्वाचानभ्युदितंइत्यादिश्रुत्यावाक्यस्यापितत्प्रतिषेधात् नचमुख्ययावृत्त्यातत्प्रतिषेधेपिवाक्यस्यलक्षणयातदपरोक्षप्रमाकरणत्वमिति वाच्यं तर्ह्यसंस्कृतस्यमनसःकरणत्वप्रतिषेधेपिशास्त्राचार्यसंस्कृतस्यतस्यतत्संभवात् ॥ ६ ॥

करणत्व २॥

इन्द्रस्यवक्तुः मामेवविजानीहीत्युपदेशःशास्त्रदृष्ट्याज्ञातव्यः अहमेवपरंब्रह्मेतिशास्त्रदृष्ट्यापश्यन्नेवमुक्तवानित्यर्थः यथावामदेवःशास्त्रदृष्ट्या अहंमनुरभवं सूर्यश्चास्मीत्याहतद्वदिति॥शा०॥सू०॥५॥

मनसैवेत्यादि१॥

अन्यथाश्रुतिविरोधापत्तेरित्याशंक्याह मनसेति अयंभावःसत्यमेतत् यदिमनसःकरणत्वंसंभवेत्तत्प्रागेवनिरस्तंवाक्यस्यप्रमाकरणत्वंउभयवादिसिद्धंश्रुतिस्मृतितंत्रांतरसिद्धंचेयांस्तुविशेषः त्वयावाक्यस्यपरोक्षप्रमाकरणत्वमभ्युपगम्यतेऽस्माभिःस्मृतिन्यायविद्वदनुभवबलात्परोक्षापरोक्षभेदेनद्विविधप्रमाकरणत्वंवाक्यस्यप्रतिपाद्यते तत्रप्रमाणकुशलैःप्रतीतिशरणैर्यदुचितंतदभ्युपगंतव्यंप्रकृतमुपसंहरति एवमिति क्रमप्राप्तामर्थापत्तिप्रमांलक्षयति अनुपपद्यमानेति तत्रोदाहरणमाह यथेति अत्रनैयायिकादयः रात्रिभोजनंव्यतिरेक्यनुमानेनैवज्ञायते तथाहि अयंदेवदत्तोरात्रौभुंक्तेदिवाऽभुंजानत्वेसतिपीनत्वात् यस्तुरात्रौनभुंक्तेनासौदिवाभुंजानत्वेसतिपीनः यथादिवारात्राऽभुंजानोऽपीनः इत्येवंव्यतिरेक्यनुमानेनैवरात्रिभोजनस्यप्रमीयमाणत्वात्कथमर्थापत्तेः पृथक्प्रमाणत्वंकल्पनीयंगौरवादितिवदंतितान्निराकरोति नचेति अयमाशयः व्यतिरेक्यनुमानस्यप्रागेवनिरस्तत्वात्कथंतेनरात्रिभोजनानुमितिर्भवेत् कथंतर्हि अन्वयव्याप्तिमजानानस्यव्यतिरेकिव्याप्तिज्ञानात् रात्रिभोजनप्रतीतिरित्युच्यते रात्रिभोजनेनविनापीनत्वानुपपत्त्यातत्प्रतीतिः॥ अन्यथाऽन्यव्याप्तिज्ञानादन्यानुमितीवतिप्रसंगात् नचप्रतियोग्यनुयोगिभावस्यनियामकस्यसत्त्वान्नातिप्रसंगइति वाच्यंतस्यसर्वत्रसुलभत्वेनसर्वत्रसर्वानुमित्यापत्तेः तथाहि केवलप्रतियोग्यनुयोगिभावस्याप्रयोजकत्वेनसाध्याभावव्यापकीभूताभावप्रतियोगित्वंनियामकंवाच्यं तच्चघटत्वादीनांसंभवतीतितेनाप्यनुमितिःस्यात् नचेष्टापत्तिरितिवाच्यंतर्हिभवन्मतेसुवर्णघटस्यापिपृथिवीत्वापत्तेः नचतदिष्टंअपसिद्धांतापत्तेः नचसुवर्णघटेघत्वमेवनास्तीतिवाच्यं तत्रघटोयमित्यनुभवस्यसार्वजनीनत्वात् मृद्घटेघटोयमित्यनुभवोघटत्वगोचरः नान्यत्रेतिनियंतुमशक्यत्वात् ॥

मनसैवानुद्रष्टव्यं इत्यादिश्रुतिस्तु मनसोवाक्यसहकारित्वप्रतिपादनपरा अन्यथा यन्मनसानमनुत इत्यादिश्रुतिविरोधप्रसंगात् एवंशाब्दप्रमानिरूपिता अनुपपद्यमानार्थदर्शनात् तदुपपादकभूतार्थांतरकल्पनमर्थापत्तिप्रमा यथादिवाऽभुंजानस्यदेवदत्तस्यरात्रिभोजनंविना अनुपपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनकल्पनं तत्रानुपपद्यमानपीनत्वज्ञानंकरणंरात्रिभोजनकल्पनं फलं॥

हेतोः२॥ एवंभूताभावस्य३॥ रात्रिभोजनस्य४॥

जलत्वशीतलत्वयोर्व्याप्तेर्ग्रहेऽनुमितिरपिस्यादित्यतिप्रसंगात्४॥ यस्याभावःसप्रतियोगीसयस्मिन्सअनुयोगि४॥ प्रतियोगित्वं॥३॥ घटःपृथिवीघटत्वात् यत्रयत्रपृथिवीत्वाभावःतत्रतत्रघत्वाभावःयथाजले३॥

परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशो हि सङ्करः॥ प्रकृते च घटत्वमपहाय सुवर्णत्वं कुण्डलादौ सुवर्णत्वं विहाय घटत्वं मृण्मयघटे द्वयोः समावेशः सुवर्णघटे एवं मृण्मयघटेऽपि योजनीयम्॥ १॥

कथं तर्हि व्याप्यजात्यनुमानमिति कात्र कथंता पृथिवीत्वादिना वा द्रव्यत्वादिना वा तदनुमाने बाधकाभावात् अत एव न घटत्वादिकं जातिरिति निर्वदंति सांकर्य्यात् तस्माद्व्यतिरेकानुमानेन रात्रिभोजनप्रतीतिरिति शिष्यबंधनमात्रं न हि सिद्धान्ते वा कथमन्यानुपपत्त्याऽन्यकल्पनं अतिप्रसंगस्य तुल्यत्वादिति चेन्नैवम् रात्रिभोजनपीनत्वयोः कार्यकारणत्वसंभवे न कार्यं कारणं विनाऽनुपपन्नं सत्तत्कल्पयति किमिदं तेन विना तस्यानुपपन्नत्वमिति तदभावव्यापकीभूताभावप्रतियोगित्वमिति निश्चितं न च घटत्वादिनां तत्संभवति तेषां कार्यत्वाद्यसिद्धेः अन्यस्यान्वयव्याप्तिं धूमवह्न्योरजानानस्य व्यतिरेकव्याप्तिज्ञानदशायां दृश्यमानधूमानुपपत्त्या वह्निप्रतीतिरिति न व्यतिरेकानुमानावकाशः तस्मादर्थापत्तिः प्रमाणान्तरमेवेति शिष्यबुद्धिसौकार्याय करणफले व्युत्पादयति अनुपपद्यमानेति अर्थापत्तिं विभजते सत्वेति दृष्टार्थापत्तिमुदाहरति इत्येति सा यथा स्पष्टं तथोच्यत इत्यर्थः नन्वभ्रमस्थले इदं रजतमिति विशिष्टज्ञानमेव नास्ति प्रमाणाभावात् स्यादि सर्वधियां यथार्थत्वेन भ्रान्तिज्ञानस्यैवासिद्धेः न च पुरोवर्तिप्रवृत्त्यनुपपत्त्या रजतत्वविशिष्टभ्रमानुभवसिद्धिरिति वाच्यं प्रवृत्तेरन्यथाप्युपपत्तेः तथा हि इदमिति ग्रहणात्मकं ज्ञानं रजतमिति स्मरणा-

शुक्त्यादौ १ कार्यस्य ५॥

स चार्थापत्तिर्द्विविधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति दृष्टार्थापत्तिर्यथा शुक्ताविदं रजतमित्यनुभूयमानस्य रजतस्य नेदं रजतमिति बाध्यत्वं दृष्टं तस्य मिथ्यात्वमन्तरेणासत्यत्वेऽनुपपन्नं सन्मिथ्यात्वं कल्पयति न चेदं रजतमिति ज्ञानद्वयं पुरोवर्तिनि प्रवृत्त्यभावप्रसंगात्॥ २१

भेदा १ काचादि १

त्मकं प्रमुष्टतत्ताकमनयोर्ग्रहणस्मरणयोरसंसर्गाग्रहणेन पुरोवर्तिरजतयोरसंसर्गाग्रहात् दोषैर्दुष्टकरणस्य रजतार्थिनः पुरोवर्तिनि प्रवृत्तिरुपपद्यते अन्यथा ज्ञानस्यायथार्थत्वेनाविश्वासप्रसंगात् यथाहुः ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबंधन इति तस्माद्रजतत्वविशिष्टभ्रमानुभवाभावादनुभूयमानरजतस्य दृष्टं बाध्यत्वं मिथ्यात्वं कल्पयतीत्यनुपपन्नमित्याशंक्य निराकरोति न चेति इदमत्राकूतं पुरोवर्तिनि रजतार्थिप्रवृत्तिर्विशिष्टानुभवसाध्या प्रवृत्तित्वात् संवादिप्रवृत्तिवदित्यनुमानमेव विशिष्टज्ञाने प्रमाणं न च सर्वधियां यथार्थत्वाद्विशिष्टभ्रान्त्यसंभवे न बाध इति वाच्यं ज्ञानमात्रस्य स्वरूपेणायथार्थत्वेऽपि विषयबाधाबाधाभ्यां यथार्थत्वायथार्थत्वे बाधकाभावादन्यथा नेदं रजतमिति बाधः कथं स्यात् अप्रसक्तप्रतिषेधायोगात् न च व्यवहार एव बाध्यते न ज्ञानं विषयो वेति वाच्यं विषयनिषेधस्यानुभवसिद्धत्वात् अन्यथा नेदं रजतव्यवहार इत्येवोल्लेखः स्यात् न चाप्रयोजकत्वं भेदाग्रहात्प्रवृत्तेरुपपत्तेरिति वाच्यं तर्हि सर्वदा प्रवृत्तिप्रसंगात् न चोपस्थितेष्टभेदाग्रहात्सेति वाच्यं तदृष्टाभावप्रतियोगीदं रजतमिति ज्ञानान्-

नरमपि प्रवृत्तिप्रसंगात् न च स्वतन्त्रोपस्थितेष्टभेदाग्र

हेतोः १   रजतत्वं ४॥   शुक्त्यादौ ५

भेद३।।　　　　　　　　　　　　　　　　　　　　　　　　　　रजतत्व२।।

हात्प्रवृत्तिरिति वाच्यं नहि लाघवादिष्टोपस्थितेरेव प्रवर्त्तकत्वोपपत्तेः न च तर्हि रजतस्मरणमेव तदस्तीति वाच्यं स्मर्यमाणस्य देशांतरस्थत्वेन पुरोवर्त्तिनि प्रवृत्तिनिप्र
वृत्त्यभावप्रसंगात्।। इदमिति ज्ञानस्य प्रवर्त्तकत्वेऽतिप्रसंगात् तस्माद्दोषवशेन स्मर्यमाणं रजतं पुरोवर्त्तिनि शुक्त्यादावारोप्यते तत्प्रकारकपुरोवर्त्तिविशेषकज्ञानं प्रवर्त्त
कमभ्युपगंतव्यं अन्यथासत्यरजतस्थलेप्यसंसर्गाग्रहात्प्रवृत्त्युपपत्तौ विशिष्टज्ञानं प्रवर्त्तकं न सिद्ध्येत् तस्मादकामेनापि रजतत्वविशिष्टभ्रमानुभवोऽवश्यमभ्युपगंत
व्यः स च निर्विषयो न संभवतीति सविषयो वाच्यः स्वं च तस्य वाध्यत्वानुपपत्त्या मिथ्यात्वमिति ननु भ्रमविषयरजतमसदेवास्तु न च तत्र प्रमाणाभावः असदेव रजतम
भादित्यनुभवस्य सत्त्वादित्याशंक्याह रजतस्येति नहि शशशृंगं साक्षात्करोमीति कश्चिदनुभवति अतो रजतस्यासत्त्वेन तद्ज्ञानस्य प्रत्यक्षत्वमनुपपन्नमेव किंचासन्नामभ
किंचिदस्ति न वा नाद्यः व्याघातात् नाद्वितीयः कुतस्तज्ज्ञानं तस्माद्रजतस्यासत्त्वमनुपपन्नमिति भावः भवतु तर्हि भ्रमविषयस्य रजतस्याधिष्ठाने सत्त्वं सदिदं रजतमिति प्रत्यक्ष
सत्त्वादित्याशंक्याह सत्त्व इति अयमभिसंधिः यद्यधिष्ठाने रजतं सत्स्यात्तर्हि नेदं रजतमिति वाधो न स्यात् नहि सतो वाधोस्ति तस्य वाधायोग्यत्वादतो न सद्रजतं न च सदिदं रजत

रजतस्यासत्त्वेन ज्ञानस्य प्रत्यक्षत्वाभावप्रसंगात् सत्त्वे वाधाभावप्रसंगात्।। देशांतरसत्त्वे रजतेन्द्रियसन्निकर्षाभावेन प्रत्यक्षत्वाभावप्रसं((गात्।।

चाकचिक्यादिदोषवलेन२।।　　　　　　　　विशेषणज्ञान४　　　　नैया२　　　　शुक्त्यादौ रजतरूपत्वस्य२।।

मिति प्रत्यक्षं कथमिति वाच्यं आरोपितस्य स्वतः सत्ताभावेन प्रत्यक्षस्याधिष्ठानसत्ताविषयत्वात् इति अस्तु तर्हि भ्रमविषयस्य देशांतरसत्त्वं पुरोवर्त्तीन्द्रि
　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　　अनुमित्यादौ२
यसंनिकर्षानंतरं दोषवशेन देशांतरीयरजतात्मना पुरोवर्त्ति शुक्त्यादि गृह्यते इदं रजतमितीयमेवान्यथाख्यातिरिति वदंति तत्र भ्रांत्याप्रसक्तस्य वाधोप्युपपद्यते न च
रजतेन्द्रियसन्निकर्षाभावेन रजतज्ञानस्य प्रत्यक्षत्वं न स्यात् हि विशिष्टप्रत्यक्षे विशेषणसन्निकर्षस्य कारणत्वात् न च तत्र ज्ञानमेव सन्निकर्षः अतिप्रसंगादिति वाच्यं विशेष
णज्ञानविशेष्येन्द्रियसंनिकर्षविशेषणविशेष्ययोरसंसर्गाग्रहादीनां विशिष्टप्रत्यक्षसामग्रीत्वेन तत्सत्त्वेन रजतप्रत्यक्षसंभवाद्रजतेन्द्रियसंनिकर्षस्याप्रयोजकत्वादन्य
थासोयं देवदत्त इति प्रत्यभिज्ञानं प्रत्यक्षं न स्यात् तत्तायाः अतीतत्वेन विशेषणसंनिकर्षाभावात् न चेष्टापत्तिः अनुभवविरोधात् अत एव ज्ञानस्य संनिकर्षत्वमभ्यु
पगंतव्यं न च तत्तांशे प्रत्यभिज्ञानस्य स्मृतित्वान्न सन्निकर्षापेक्षेति वाच्यं जातिसांकर्यप्रसंगात् तस्माद्विशेषणज्ञानादिविशिष्टप्रत्यक्षसामग्र्या रजतविशिष्टप्रत्यक्षसं
भवेन देशांतरीयरजतत्वप्रकारकपुरोवर्त्तिविशेष्यकमिदं रजतमिति ज्ञानमन्यथाख्यातिरेव अतो न भ्रमविषयस्य मिथ्यात्वमित्याशंक्याह।। देशांतरेति भ्रमविषयरजतस्य देशांतरसत्त्वे तत्सन्निकर्षाभावेन तज्ज्ञानस्य प्रत्यक्षत्वं न स्यादित्यस्यार्थः।।

---

स्मृतित्वमपहाय प्रत्यक्षत्वमयं घट इति ज्ञाने प्रत्यक्षत्वमपहाय स्मृतित्वं सामेमानेतिज्ञाने वर्त्तते द्वयोः समावेशः प्रत्यभि
ज्ञारूपे सोऽयमित्याकारके इति।।२।। | अन्यत्रस्थितस्यान्यत्रभानं १।।

विशेषणसन्निकर्षस्यविशिष्टप्रत्यक्षकारणत्वेसति३॥ विशिष्टप्रत्यक्षमात्रेविशेषणसंनिकर्षस्यकारणत्वावधारणात् इतिपाठांतरं१॥ स्मृतित्वानुभवत्वयोः२॥ अग्नि३॥ विशेष्यस्यविशेषणापेक्षायांविशेष्येंद्रियसन्निकर्षत्वेगौरवं४॥

नन्वविशेषणज्ञानविशेष्येंद्रियसंनिकर्षादिविशिष्टप्रत्यक्षसामग्र्यानत् प्रत्यक्षत्वस्यानस्याः प्रत्यक्षमात्रेकारणत्वानवधारणात् नचसोयंदेवदत्तइतिप्रत्यक्षंनस्याद्विशेषणसन्निकर्षाभावादितिवाच्यं तत्तांशेऽप्रत्यक्षत्वस्येष्टत्वात्तत्तांशेज्ञानस्यस्मृतित्वात् नचजातिसांकर्यप्रसंगइतिवाच्यंतस्याऽदोषत्वात् अविद्यातिरिक्तजडजातेर्निरस्तत्वाच्च एवंतर्हिज्ञानमेवतत्संनिकर्षोस्त्वितिचेन्नातिप्रसंगात् तथाहि अनुमानादिस्थलेपिविशेष्येंद्रियसन्निकर्षविशेषणज्ञानादिविशिष्टप्रत्यक्षसामग्रीसत्वेनपर्वतेवह्निप्रत्यक्षमेवस्यात् किंचयदवच्छेदेनरजतस्यपूर्वमनुभूतत्वंतदवच्छेदेनतज्ज्ञानंप्रत्यासत्तिरितिवाच्यंशुक्तित्वावच्छेदेनरजतस्यपूर्वमननुभूतत्वेनकथंतद्ज्ञानंप्रत्यासत्तिः नचदोषएवप्रत्यासत्तिरस्त्वितिवाच्यं स्वतंत्रान्वयव्यतिरेकाभ्यांभ्रमकारणत्वेनक्लृप्तस्यतत्त्वेमानाभावात् किंचविशेष्येंद्रियसन्निकर्षत्वेनकारणत्वेगौरवात् विषयेंद्रियसन्निकर्षत्वेनतद्वाच्यंतत्रापियत्किंचिद्विषयेंद्रियसंनिकर्षत्वेनकारणत्वेऽतिप्रसंगात् यावद्विषयेंद्रियसंनिकर्षत्वेनप्रत्यक्षकारणत्वमवश्यंवक्तव्यं तथाचविशेषणसंनिकर्षोपिकारणंभवत्येव अन्यथोष्णीषाच्छादितेकुंडलिनिकुंडलविशिष्टप्रत्यक्षत्वप्रसंगः नचेष्टापत्तिः अननुभवात् ततश्च भ्रमविष

रजतंसाक्षात्करोमीत्यनुभवस्यसर्वानुभवसिद्धत्वात् तस्माद्भ्रमकालेशुक्तिकाशकलेरजतमुत्पद्यत इत्यंगीकर्त्तव्यम् ॥ ६ ॥

यस्यदेशांतरसत्वेतदिंद्रियसन्निकर्षाभावेनतज्ज्ञानस्यप्रत्यक्षत्वंनसंभवत्येवनचेष्टापत्तिरित्याह रजतमितिनन्वेवंसतिपुरोवर्त्तिनीदंरजतमितिविशिष्टप्रत्यक्षस्यकागतिस्तत्रविषयाभावादित्याशंक्याह तस्मादिति यस्मात्कारणाद्रजतस्यासत्वंभ्रमाधिष्ठानेसत्वंदेशांतरसत्वंचनोपपद्यतेउक्तदोषवशात् तस्मादित्यर्थः किंचभ्रमविषयस्यदेशांतरसत्वेरजतार्थिनस्तत्रैवप्रवृत्तिःस्यात् ज्ञानस्यस्वविषयेप्रवर्त्तकत्वनियमात् नचरजतज्ञानंशुक्तिमपिविषयीकरोतीतिपुरोवर्त्तिनिरजतार्थिप्रवृत्तिरुपपद्यतइति वाच्यं अन्याकारज्ञानस्यान्यविषयत्वेसंविद्विरोधात् ननुज्ञानंयत्रेष्टतावच्छेदकवैशिष्ट्यंविषयीकरोतितत्रैवपुरुषंप्रवर्त्तयतीतिनियमाज्ज्ञानंज्ञानमपि। शुक्तौरजतत्ववैशिष्ट्यंविषयीकुर्वन् रजतार्थिनंतत्रप्रवर्त्तयतीत्यदोषः इति चेन्न रजतत्वस्यस्वतंत्रोपस्थित्यभावेनशुक्तौतदारोपानुपपत्तेः नहिपूर्वंरजतत्वंविशेष्यत्वेनानुभूतंयेनतस्यस्वतंत्रोपस्थितिःस्यात्किंतुरजतविशेषणत्वेन तथाचतस्यस्वातंत्र्येणानुपस्थिततया तत्संसर्गारोपोऽनुपपन्न एव नचरजतोपस्थितिसामग्र्यां सत्यांरजतत्वस्यस्वातंत्र्येणोपस्थितिरुपपद्यते रजतत्वस्यजातित्वेनतत्परतंत्रत्वात् अन्यथासंसर्गाभावधीसमयेप्रतियोग्यारोपवत् प्रतियोगितावच्छेदकस्यारोप्य

अत्यंताभावादिधीसमये१॥ विशेषणसंनिकर्षस्यविशिष्टप्रत्यक्षकारणत्वेसति१॥ सादृश्य२॥

पुरुषस्य५॥ कृषीवलादीनामप्यदृष्टंउद्यमंविनासामग्रींविनाकृषीफलमुत्पादयेत्५॥ स्य२ देशांतरे१

संभवेनान्योन्याभावधीरेवस्यान्नसंसर्गाभावधीः तस्माच्छुक्तौरजतत्वसंसर्गारोपोनसंभवत्येवरजत तादात्म्यारोपेतु आरोप्यस्यदेशांतरेसत्वेनतत्रैवप्रवृत्तिःस्या
त्तस्मादपिभ्रांतिकालेरजतंशुक्तावुत्पद्यते एवेत्यभ्युपगंतव्यं किंचैवमन्यथाख्यातिपक्षेत्वारोप्यस्यदेशांतरसत्वेनबाधोपिनस्यात् ज्ञानस्यस्वरूपेणाबाधायोगे
नविषयबाधात्तस्यवक्तव्यतयाविषयस्यान्यत्रविद्यमानत्वेनतद्बाधानुपपत्तेः नचतद्वैशिष्ट्यमेवबाध्यतइतिवाच्यं तस्यासद्रूपतयाख्यातिबाधयोरसंभवात्त
स्मादपिभ्रमविषयंरजतंतत्कालेजायतेतत्रैवेतिस्वीकर्तव्यम्॥ नन्वेवंरजतोत्पादकसामग्र्यारजतावयवादेरसंभवात्कथंभ्रमकालेशुक्त्यादौरजतोत्पत्तिः नचाद
ष्टमेवतदुत्पादकमितिवाच्यंदृष्टसामग्रीमंतरेणतस्यतदयोगात् अन्यथातिप्रसंगात् इत्यत आह रजतोत्पादकेति अयंभावः नहिरजतोत्पादकलौकिकसामग्री।
भ्रमविषयरजतोत्पादिका किंतुतद्विलक्षणैव तथाहि अधिष्ठानेनेंद्रियसन्निकर्षानंतरं इदमाकारवृत्तौचाकचिक्याकारवृत्तौचसत्यामंतःकरणस्यवहिर्निर्गतस्यसा
दृश्यसंदर्शनसमुद्बुद्धसंसकारदोषसहकारिसंपन्नमिदमवछिन्नचैतन्यनिष्ठाशुक्तित्वप्रकारकमज्ञानं रजताकारेणतद्ज्ञानाकारेणचपरिणमतेनन्वज्ञानेरजता

रजतोत्पादकलौकिकसामग्र्यभावेपिपुरोपवर्तींद्रियसन्निकर्षानंतरमिदमाकारवृत्तौसत्यामिदमवछिन्नचैतन्यनिष्ठाशुक्तित्वप्रकारका
ऽविद्यासादृश्यदर्शनसमुद्बुद्धसंस्कारसहकृतारजताकारेणतद्ज्ञानाकारेणचपरिणमते॥ ११ कारेणपरिणमनइत्यस्तुतद्ज्ञानाकारेणपरिणम

परिणामस्य रजतस्य
नेइत्यनुपपन्नंप्रयोजनाभावात् नचतस्यतद्व्यवहारएवप्रयोजनमितिवाच्यं तस्यसाक्षिण्यध्यस्तत्वेनसुखादिवत्तेनैवरजतव्यवहारोपपत्तेः नचरजतस्यापरोक्ष
त्वसिद्ध्यर्थमविद्यावृत्त्यभ्युपगमइतिवाच्यं अनावृत्तसंवित्तादात्म्यात्सुखादिवद्विद्यावृत्तिंविनापितदुपपत्तेः नचानिर्वचनीयरजतानुभवस्यसाक्षिणोनित्यतया
संस्कारजनकत्वासंभवेनरजताकाराविद्यावृत्त्यभ्युपगमेतदुपहितत्वेनरूपेणसाक्षिणोनाशसंभवेनसंस्कारोत्पत्त्यारजतस्मृतिर्भवतीतिवृत्त्यभ्युपगमइतिवाच्यं इदंसा
कारवृत्त्युपहितत्वेनरूपेणसाक्षिणोनाशसंभवेनसंस्कारोत्पत्त्यास्मृत्युपपत्तेः अथवारजतनाशाद्वातदुपहितनाशसंभवेनसुखादिनाशात्तदुपहितनाशवत्संस्का
रोस्तुतस्माद्रजताकाराविद्यावृत्त्यभ्युपगमोनिष्प्रयोजनइति अत्रोच्यते संस्कारार्थमेवाविद्यावृत्तिरभ्युपगम्यते नचेदमाकारवृत्त्युपहितसाक्षिनाशेनरजतस्मृति
जनकसंस्कारोऽस्तुइति वाच्यं अन्यानुभवसंस्कारेणान्यस्मरणायोगात् तथात्वेतिप्रसंगात् नचविषयनाशात्तदुपहितनाशेनरजतस्मृतिजनकसंस्कारोऽस्त्विति

रजतस्याभिवदनरूपव्यवहारस्य६ साक्षिणांतःकरणद्वारा६॥

वाच्यंलोकेतथादृष्टत्वात् नचसुखादौदृष्टमितिवाच्यं

व्यवहर्तव्य५॥ असंभवेन२॥ वेदांतिनः४॥

तत्रापि तदाकारवृत्तेरभ्युपगमात् अस्तु वांऽतःकरणतद्धर्माणां वृत्तिं विना साक्षिभास्यत्वं तदुपहितनाशात्तस्य निजजनकसंस्कारोपि अविद्याकार्याणां घटादीनां तदाकारवृत्तिनाशेन तत्संस्कारोत्पत्तेर्दृष्टत्वात् प्रातिभासिकरजतस्याप्यविद्याकार्यतया तदाकारवृत्तिनाशात्तत्संस्कारो वाच्यः नहि क्वचिदगत्या विषयनाशात्तदुपहितनाशे न तत्संस्कारो दृष्ट इति सर्वत्र तथैव भवितव्यमिति नियमोस्ति अन्यथा स्वप्नपदार्थाकारवृत्त्यभ्युपगमोपि न स्यात् न तत्रापि साक्षिणाभानसंभवात् जाग्रत्स्वप्नयोरहमाकारांतःकरणवृत्त्यभ्युपगमोपि न स्यात् न चेष्टापत्तिः श्रुतिविरोध आचार्यग्रंथविरोधश्च प्रसज्येत तस्मात्संस्कारार्थं प्रातिभासिकरजताकाराविद्यावृत्त्यभ्युपगम इति वेदांतिनः अन्ये तु कादाचित्कव्यवहारस्य कादाचित्कत्वगोचरज्ञानसाध्यत्वात् प्रातिभासिकरजतव्यवहारस्य कादाचित्कत्वात्तदाकाराऽविद्यावृत्तिरभ्युपेयतेऽन्यथा घटादिष्वपि तदाकारांतःकरणवृत्तिरपि न सिद्ध्येत् तद्व्यवहारस्य साक्षिणैव सिद्धेरित्याहुः नन्वेवं सति नृसिंहाश्रमैरविद्यावृत्तिः किमर्थं खंडितेति चेत्प्रौढवादेनेति द्रष्टव्यम् ननु भ्रमकालेपि शुक्तौ रजतोत्पत्तिरस्तु तथापि तस्य कथं मिथ्यात्वमित्याशंक्याह तस्य चेति शुक्तिरजतादेर्मिथ्यात्वे यथोक्तार्थापत्तिरेव प्रमाणमित्यभिप्रेत्य दृष्टार्थापत्तिनि

तस्य च मायाकार्यत्वान्मिथ्यात्वं एवं दृष्टार्थापत्तिर्निरूपिता श्रुतार्थापत्तिर्यथा तरति शोकमात्मविदिति शोकोपलक्षितप्रमातृत्वादिबंधस्य ज्ञाननिवर्त्यत्वं श्रुतं तस्य मिथ्यात्वमंतरेणासत्यत्वेऽनुपपन्नं सन्मिथ्यात्वं कल्पयतीति सेयं श्रुतार्थापत्तिः अंतःकरणविशिष्टं चैतन्यं प्रमाता कर्त्ता भोक्ता॥

तरोऽध्वरः३॥

रूपणमुपसंहरति एवमिति द्वितीयार्थापत्तिमुपपादयति श्रुतेति ननु तरति शोकमात्मविदित्यत्र शोकस्यैव ज्ञाननिवर्त्यत्वश्रवणात् कथमन्यथानुपपत्त्या बंधस्य मिथ्यात्वसिद्धिरित्याशंक्य छत्रिणो गच्छंतीत्यत्र छत्रिपदेन लक्षणया यथा अछत्रिसमुदाय उपलक्ष्यते तथा शोकपदेन बंध उपलक्ष्यते इत्याह शोकोपलक्षितेति तस्येति बंधस्येत्यर्थः न च सत्यस्य दुरितविषादेः सेतुदर्शनतीर्थध्यानादिना निवृत्तिदर्शनाद्बंधस्य सत्वे ज्ञाननिवर्त्यत्वानुपपत्तिः कथमिति वाच्यं दृष्टांतदार्ष्टांतिकयोर्वैषम्यात् तथाहि न तावत्केवलसेतुदर्शनेन ब्रह्महत्यादिपापनिवृत्तिः किंतु नियमसहकृतेन अन्यथा तत्रत्यम्लेच्छादीनामपि पापनिवृत्त्यापत्तेर्न च तद्दृष्टं नियमविधायिधर्मशास्त्रस्याप्रामाण्यप्रसंगात् ततश्च तीर्थस्य क्रियामिश्रतया तदात्मकत्वेन ततः सत्यस्य निवृत्तिरुपपद्यते तथा तीर्थध्यानस्यापि मानसक्रियात्वेन ततो विषसत्यस्य निवृत्तिः संभवति प्रकृते साधनांतरं निरपेक्ष्यात्मज्ञाननिवर्त्यत्वं श्रूयते बंधस्य तत्सत्यत्वे तदनुपपन्नमिति बंधस्य मिथ्यात्वक्लृप्तिरिति महद्वैषम्यमिति नार्थो

सेतुदर्शनस्य२॥ पापनिवर्तकत्वात्मकत्वेन२॥ बंधस्य१॥

119

विशिष्टे ३॥ प्रमातृत्वं २॥

पत्तेरन्यथोपपत्तिरितिभावः ननुप्रमातृत्वादिबंधस्यज्ञाननिवर्त्यत्वादुक्तंमिथ्यात्वंनत्रकोऽसौप्रमाता आदिशब्देनवाकिंविवक्षितं नतावदात्माप्रमातातस्यासंगत्वान्ना
प्यंतःकरणंतस्यजडत्वेनतदयोगात् प्रमातृत्वादेश्चैनतद्धर्मत्वाच्चेत्याशंक्याहांतःकरणेति नचात्मांतःकरणयोः प्रत्येकंप्रमातृत्वाभावेकथंविशिष्टेतेत्स्यादिति
वाच्यंविशिष्टस्यपारमार्थिकप्रमातृत्वस्यासंभवेपितस्मिंस्तदारोपसंभवात् नचारोपस्यप्रमितिपूर्वकत्वात्कथंसइतिवाच्यं अप्रयोजकत्वाल्लाघवात्पूर्वानुभवस्यैवभ्र
मनिमित्ततयातस्यपूर्वंभ्रमलक्षणस्यसुलभत्वेनविशिष्टेप्रमातृत्वारोपोयुक्तः आदिशब्दार्थमाह कर्तेति कृतिमानित्यर्थः कृतिःप्रयत्नः सचउत्साहः भोगाश्रयो
भोक्ता भोगःसुखदुःखानुभवःसचधर्माधर्महेतुकः इदंप्रमातृत्वादित्रयंविशिष्टस्यैवनात्मनःकेवलस्यनचांतःकरणस्येतिनोक्तदोषइतिभावः॥ नैयायिकाद
यःकेवलस्यात्मनःप्रमातृत्वादिकंवदंतितान्निरस्यति केवलस्येतिसाक्षित्वेनाकेवलोनिर्गुणश्चासंगोह्ययंपुरुषः॥ अप्राणोह्यमनाःशुभ्रः अनंतश्चात्माविश्व
रूपोह्यकर्ता एकस्तथासर्वभूतानरात्मानलिप्यतेलोकदुःखेनबाह्यः अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते शरीरस्थोपिकौंतेयनकरोतिनलिप्यते यथास

अन्यतर ३

केवलस्यात्मनोऽसंगत्वेनप्रमातृत्वाद्यनुपपत्तेः शुक्तिरजतवदात्माऽज्ञानादंतःकरणादिकंस्वरूपेणप्रत्यगात्मन्यध्यस्तम्॥

भवद्भिः ४॥ प्रमातृत्वादेः २

र्वगतंसौक्ष्म्यादाकाशंनोपप्यिते सर्वत्रावस्थितोदेहे तथात्मानोपलिप्यते इति श्रुतिस्मृतिवाक्यशतैः केवलस्यनिरुपाधिकस्यात्मनोऽसंगत्वादिप्रतिपादनेन
तस्यप्रमातृत्वादिकंनोपपद्यते अतोविशिष्टस्यैवतत् अन्यथोदाहृतशास्त्राप्रामाण्यप्रसंगात् नैयायिकादीनामनिर्मोक्षप्रसंगश्च सत्यस्यज्ञानेननिवृत्त्ययोगा
च्चात्मस्वज्ञापकत्वेनकारकत्वायोगाच्च तस्मान्नैयायिकादिमतमनुपपन्नमितिभावः नन्वंतःकरणविशिष्टप्रमातृत्वादिकमुक्तंतदयुक्तं आत्मनोऽसंगत्वेननि
रवयवत्वेनयासावयवक्रियाश्रयांतःकरणेनवैशिष्ट्यानुपपत्तेः तथाहि नतावदात्मनोंऽतःकरणेनसंयोगःसंभवतिप्रागेवनिरस्तत्वान्नापितादात्म्यंतस्यभेदाभेद
रूपत्वेनजडाजडयोस्तदयोगात् किंचांतःकरणस्यसत्त्वेनवैशिष्ट्यस्यापिसत्यत्वेनतस्यज्ञानानिवर्त्यतयात्मनोऽनिर्मोक्षः प्रसज्येत तथाचमोक्षशास्त्राप्रामा
ण्यप्रसंगः अंतःकरणस्यकल्पितत्वेमानाभावात् तस्माद्विशिष्टस्यप्रमातृत्वादिकमित्यसंगतमित्यत आह शुक्तिरजतवदिति यथाशुक्त्यज्ञानाद्रजतंकल्पितंशु
क्तौतथात्माज्ञानात् स्वरूपेणप्रत्यगात्मन्यंतःकरणादिकमध्यस्तंतथायंप्रयोगः अंतःकरणमध्यस्तंजडत्वाद्दृश्यत्वादाविद्यकत्वाच्चशुक्तिरजतवदिति॥ इदमपि

सत्यस्यनिवृत्तिःकारकत्वायोगात् ५॥ भौतिकत्वेन१॥ ज्ञाननिवर्त्यत्वेन१॥

अहममृतेत्यादिश्रुतेश्च अंतःकरणमध्यस्तं एतेनातः